ASSOCIATE, *s.* (A partner, confederate) सहायः, सङ्गी *m.* (न्), अनुषङ्गी *m.* (न्), उपसङ्गी *m.* (न्), सहकारी *m.* (न्), सयुक् *m.* (-युज्), सहवासी *m.* (न्).—(A companion, equal) वयस्यः.

To ASSOCIATE, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), सङ्गम् in caus. (-गमयति -यितुं), सम्बन्ध् in caus. (-बन्धयति -यितुं), संश्लिष् in caus. (-श्लेषयति -यितुं).

To ASSOCIATE WITH, *v. n.* संवस् (c. 1. -वसति -वस्तुं), सह वस्; सहितः -ता -तं भू, मिल् (c. 6. मिलति -ते, मेलितुं), सम्मिल्; सह गम् (c. 1. गच्छति, गन्तुं), सहवासं कृ.—(Not to be associated with) अपाङ्क्तेयः -या -यं.

ASSOCIATED, *p. p.* संयुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, संहतः -ता -तं, सहितः, -ता -तं, सहगतः -ता -तं, सङ्घातवान् -वती -वत् (त्), संसक्तः -क्ता -क्तं

ASSOCIATION, *s.* संयोगः, साहित्यं, साहाय्यं, सार्थं, सङ्गमः, सङ्गतिः *f.*, संसर्गः, सहायता or -त्वं, साहचर्य्यं, समागमः, सङ्घातः, आसङ्गः, सङ्गः, संश्लेषः.—(Evil association) असत्संसर्गः.—(Set, club) पङ्क्तिः *f.*—(Partnership) समांशिता.

To ASSORT, *v. a.* यथाक्रमं or क्रमेण स्था in caus. (स्थापयति -यितुं), विधा (c. 3. -दधाति -धातुं), संविधा; रच् (c. 10. रचयति -यितुं), विरच्; ग्रन्थ् (c. 1. ग्रन्थति, c. 9. ग्रथ्नाति, ग्रन्थितुं), पृथक् पृथक् स्था in caus. or कृ.

ASSORTED, *p. p.* विरचितः -ता -तं, व्यूढः -ढा -ढं, विन्यस्तः -स्ता -स्तं.

ASSORTMENT, *s.* विरचनं, पृथक्करणं, विन्यासः, श्रेणिविभागं, क्रमबन्धनं, व्यूहनं, व्यूढिः *f.*, परिपाटिः *f.*—(A mass of things assorted) समवायः, सङ्घातः, वृन्दं, ओघः.

To ASSUAGE, *v. a.* शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्; सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, तुष् in caus. (तोषयति -यितुं), परितुष्.

To ASSUAGE, *v. n.* शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, तुष् (c. 4. तुष्यति, तोष्टुं).

ASSUAGED, *p. p.* शान्तः -न्ता -न्तं, प्रशमितः -ता -तं, प्रशान्तः -न्ता -न्तं.

ASSUAGEMENT, *s.* प्रशमनं, शान्तिः *f.*, उपशान्तिः *f.*, सान्त्वनं.

ASSUASIVE, *a.* शान्तिकः -की -कं, शमकः -की -कं, शान्तिदः -दा -दं.

To ASSUME, *v. a.* (To take) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), परिग्रह्, प्रतिग्रह्, लभ् (c. 1. लभते, लब्धुं).—(To arrogate) अधर्म्मतस् or मिथ्या ग्रह् or आत्मसात्कृ, परधर्म्मं ग्रह्: 'he assumes the king,' राजायते.—(To suppose something granted) अप्रमाणीकृत्य or अप्रमाणतस् or निष्प्रमाणेन वद् (c. 1. वदति, वदितुं), अनुमतं -तां -तं ज्ञा (c. 9. जानाति, ज्ञातुं).

ASSUMED, *p. p.* गृहीतः -ता -तं, आदत्तः -त्ता -त्तं.—(Not natural) कृतकः -का -कं.

ASSUMPTION, *s.* (The act of taking) ग्रहणं, आदानं, प्रतिग्रहः, परिग्रहः, आत्मसात्करणं, 'false assumption,' मिथ्याग्रहणं.—(The supposition of any thing granted) निष्प्रमाणेन or अप्रमाणतस् ग्रहणं, प्रमाणव्यतिरेकेण कस्यचित् मतस्य धारणं, 'on the assumption,' न्यायात्.—(The thing supposed) प्रतिज्ञा, प्रमेयं, उपन्यासः.—(Of a disguise) वेशधारणं, छिद्मनं.

ASSURANCE, *s.* (Certain expectation) विश्वासः, प्रत्ययः, प्रत्याशा, निश्चयः, दृढः प्रत्ययः.—(Want of modesty) धार्ष्ट्यं, प्रगल्भता, साहसं, निर्लज्जता.—(Reason for confidence) विश्वासकारणं, प्रत्ययहेतुः.—(Insurance, assurance of safety) योगक्षेमः, अभयवाक् *f.* (च्), साहाय्यत्वं.

To ASSURE, *v. a.* स्थिरीकृ, दृढीकृ, संस्तम्भ् (c. 5. -स्तभ्नोति, c. 9. -स्तभ्नाति, -स्तम्भितुं), or caus. (-स्तम्भयति -यितुं), विश्वासं दा, प्रमाणं दा, असन्दिग्धं -ग्धा -ग्धं कृ, सुनिश्चितं -तां -तं कृ.—(To affirm) निश्चयेन वद् (c. 1. वदति).

ASSURED, *p. p.* (Certain) स्थिरः -रा -रं, दृढः -ढा -ढं, सुनिश्चितः -ता -तं, असन्दिग्धः -ग्धा -ग्धं, असंशयः -या -यं.

ASSUREDLY, *adv.* निश्चितं, सुनिश्चितं, असंशयं, निःसन्देहेन, नूनं, एवं, खलु, किल, सुतरां.

ASTERISK, *s.* नक्षत्राकारश् चिह्नविशेषः

ASTERISM, *s.* नक्षत्रं, पुञ्जः, तारा, तारकः, ज्योतिषां, ...ज्योतिषां

ASTERN, *adv.* नावः पश्चाद्भागं or पश्चिमभागं प्रति.

ASTHMA, *s.* दुःश्वासः, दुःश्वसनं, श्वासरोगः.

ASTHMATICAL, ASTHMATIC, *a.* दुःश्वासशीलः -ला -लं, श्वासरोगपीडितः -ता -तं

To ASTONISH, *v. a.* विस्मि in caus. (-स्मापयति -ते -यितुं), व्याकुलीकृ, आकुलीकृ, चमत्कारं or विस्मयं जन् in caus. (जनयति -यितुं), चमत्कृ.

ASTONISHED, *p. p.* विस्मितः -ता -तं, विस्मयान्वितः -ता -तं, विस्मयाकुलः -ला -लं, चमत्कृतः -ता -तं, विलक्षः -क्षा -क्षं.—(To be astonished) विस्मि (c. 1. -स्मयते -स्मेतुं), आश्चर्य्यं ज्ञा (c. 9. जानाति, ज्ञातुं) or मन् (c. 4. मन्यते, मन्तुं).

ASTONISHING, *a.* आश्चर्य्यः -र्य्या -र्य्यं, अद्भुतः -ता -तं, विचित्रः -त्रा -त्रं.

ASTONISHMENT, *s.* विस्मयः, आश्चर्य्यत्वं, चमत्कारः, व्याकुलता.—(With astonishment) साश्चर्य्यं, सविस्मयं.—(Matter of astonishment) विस्मयहेतुः *m.*, विस्मयकारणं, अद्भुतं.

To ASTOUND, *v. a.* मुह् in caus. (मोहयति -यितुं), व्यामुह्, व्याकुलीकृ, विस्मयाकुलं -लां -लं कृ.

ASTOUNDED, *p. p.* विस्मयाकुलः -ला -लं, मोहितः -ता -तं, व्याकुलीकृतः -ता -तं.

Astral, *a.* नाक्षत्रः -त्री -त्रं, तारकी -किनी -कि (न्), तारकितः -ता -तं.

Astray, *adv.* उत्पथं, पथभ्रष्टः -ष्टा -ष्टं, विमार्गगामी -मिनी -मि (न्), विपथगामी -मिनी -मि (न्), भ्रान्तः -न्ता -न्तं.—(To lead astray) उत्पथं नी (c. 1. नयति, नेतुं).

Astride, *adv.* (To stand with the legs apart) पादौ पृथक् कृत्वा or प्रगतजङ्घः -ङ्घा -ङ्घं स्था (c. 1. तिष्ठति, स्थातुं).

To **astringe**, *v. a.* सङ्कुच् (c. 1. -कोचति, c. 6. -कुचति -कोचितुं); कषाय् (nom. कषायति -यितुं).

Astringency, *s.* सङ्कोचनं, कषायः -यं, तुवरः -रं.

Astringent, *a.* कषायः -या -यं, सङ्कोचनशीलः -ला -लं, रूक्षः -क्षा -क्षं, तुवरः -रा -रं, ग्राही -हिणी -हि (न्), विरूक्षणः -णी -णं.

Astrologer, *s.* गणकः, ज्यौतिषिकः, दैवज्ञः, मौहूर्त्तः, मौहूर्त्तिकः, दैवलेखकः, कार्त्तान्तिकः, ज्योतिःशास्त्रानुरूपं भाविविषयकथकः or भाविकथकः or भाविव्यक्तीकर्त्ता *m.* (र्तृ), सांवत्सरः, ज्ञानी *m.* (न्).

Astrological, *a.* ज्योतिषः -षी -षं, ज्योतिर्विद्याविषयः -या -यं, नाक्षत्रः -त्री -त्रं.

Astrologically, *adv.* ज्योतिर्विद्यानुसारात्, ज्योतिःशास्त्रानुरूपं, ज्योतिःशास्त्रवत्.

Astrology, *s.* नक्षत्रविद्या, ज्योतिषं, दैवप्रश्नः, देवप्रश्नं, ज्योतिःशास्त्रमूला भाविव्यक्तीकरणविद्या; ज्योतिःशास्त्रज्ञानात् or -ज्ञानेन भाविकथनविद्या.

Astronomer, *s.* ज्योतिःशास्त्रज्ञः, ज्योतिर्विद्, ज्योतिषः, ज्यौतिषिकः, राशिग्रहनक्षत्रादिगतिज्ञः, ग्रहनक्षत्रादिविद्याज्ञः.

Astronomical, *a.* ज्योतिषः -षी -षं, ज्योतिःशास्त्रविषयः -या -यं, नाक्षत्रिकः -की -कं.

Astronomically, *adv.* ज्योतिःशास्त्रानुसारात्, ज्योतिःशास्त्रानुरूपं, ज्योतिःशास्त्रवत्.

Astronomy, *s.* ज्योतिःशास्त्रं, ज्योतिर्विद्या, राशिग्रहनक्षत्रादिविद्या, ज्योतिषं, खगोलविद्या.

Astute, *a.* विदग्धः -ग्धा -ग्धं, सव्याजः -जा -जं, चतुरः -रा -रं.

Asunder, *adv.* विरलं, पृथक्, प्रगतः -ता -तं, विगतः -ता -तं.—'Asunder' may often be expressed by the prep. वि; as, 'cut asunder,' विच्छिन्नः.

Aświns, (Nāsatya and Dasra, the twin sons of the Sun by the constellation Aświnī, physicians of heaven) अश्विनौ *du.*, स्वर्वैद्यौ *du.*, नासत्यौ *du.*, दस्रौ *du.*, अश्विनीसुतौ *du.*, आश्विनेयौ *du.*

Asyle, **Asylum**, *s.* आश्रयः, आश्रयः, शरणं, संश्रयः, गतिः *f.*, प्रतिश्रयः, विषयः.—(To seek asylum with) आश्रि (c. 1. -श्रयति -ते -श्रयितुं), उपाश्रि, समुपाश्रि, संश्रि.

At, *prep.* expressed by आ or अभि prefixed to roots, as, 'to arrive at,' आगम्, अभिगम्.—Before names of towns, expressed by the loc. c.; as, 'at Ayodhyā,' अयोध्यायां. 'At home,' स्वगृहे, स्वस्थाने; 'at night,' रात्रौ; 'at evening,' आसन्ध्यं; 'at this time,' तत्काले, तत्क्षणे; 'at the moment,' सपदि; 'at present,' वर्त्तमाने काले, अधुना, सम्प्रति; 'at first,' प्रथमतस्, पूर्व्वं; 'at last,' अनन्तरं, शेषे; 'at least,' तावत्; 'at all,' कथञ्चन, मनाक्; 'at the sight,' आदर्शनात्; 'at ease,' यथासुखं, सुखेन; 'at large,' निर्विघ्नं; 'at the price,' मूल्येन; 'at once,' युगपत्, एकदा, एककाले.—'At,' may often be expressed by the indec. part., as, 'at the sight of that,' तद् दृष्ट्वा; or by the loc. c., as, 'at their arrival,' तेषु आगतेषु; or by the abl. c., as, 'at his bidding,' तस्य निदेशात्; or by the instr. c., as, 'at the king's command,' राजाज्ञया.

At-hand, *adv.* उपस्थितः -ता -तं, आसन्नः -न्ना -न्नं; 'to be at hand,' उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), प्रत्युपस्था.

Atheism, *s.* नास्तिकता, नास्तिक्यं, देवनिन्दा, परलोकाभावबुद्धिः.

Atheist, *s.* नास्तिकः, देवनिन्दकः, अनीश्वरवादी *m.* (न्), नास्तिकमतावलम्बी.

Atheistical, *a.* (Given to atheism) नास्तिकबुद्धिः -द्धिः -द्धि, देवनिन्दकः -का -कं.

Athirst, *a.* तृषार्त्तः -र्त्ता -र्त्तं, तृषितः -ता -तं, पिपासुः -सुः -सु.

Athlete, *s.* मल्लयोद्धा *m.* (द्धृ), मल्लः, भल्लः.

Athletic, *a.* (Belonging to wrestling) मल्लयुद्धसम्बन्धकः -का -कं.—(Strong) बाहुवीरः -रा -रं, मल्लः -ल्ला -ल्लं, व्यायामी -मिनी -मि (न्), व्यायामशीलः -ला -लं, व्यूढोरस्कः -स्का -स्कं, पृथुशरीरः -रा -रं, बलवान् -वती -वत् (त्).—(Athletic exercise) व्यायामः, [illegible]

Athwart, *prep.* कोणाकोणि, विपरीतं, विलोमं, [illegible]; 'athwart the way,' प्रतिमार्गं; 'athwart the [illegible]; 'athwart the river,' नदीपारं, नदीतीरान्तरं.

Atlantic, *a.* महासमुद्राणां मध्ये य एट्लाण्टिकिति अभिधीयते महासमुद्रः.

Atlas, *s.* भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकार[illegible] मुद्रितः पत्रसमूहः.

Atmosphere, *s.* आकाशः, नभः *n.* (स्), गगनं, खं, [illegible] *n.*, (न्), विहायसः -सं, मण्डलं, शून्यं, शून्यत्वं, वायुः.

Atmospherical, *a.* आकाशीयः -या -यं, आन्तरीक्षः -क्षी -क्षं, वायवः -वी -वं, वैहायसः -सी -सं, विहायसीयः -या -यं.

Atom, *s.* परमाणुः *m.*, अणुः *m.*, कणः, लवः, लेशः, कणिका, सूक्ष्मः.

Atomical, *a.* (Consisting of atoms) आणवः -वी -वं, अणुकः -का -कं, परमाणुमयः -यी -यं.—(Minute) सूक्ष्मः -क्ष्मा -क्ष्मं.—(Relating to atoms) अणुविषयः -या -यं, परमाणुसम्बन्धकः -का -कं.

At-once. एकदा, युगपत्, एकपदे, एककाले.

To **atone**, *v. a.* (To expiate, answer for) प्रायश्चित्तं कृ, निष्कृतिं कृ, प्रायश्चित्तेन पापं परिशुध् in caus. (-शोधयति -यितुं), or पापात् मुच् (c. 6. मुञ्चति मोक्तुं); पापक्षमां सिध् in caus. (साधयति -यितुं).—(To reconcile) सन्धा (c. 3. -दधाति -धातुं), अनुनी (c. 1. -नयति -नेतुं), प्रशम् in caus. (-शमयति -यितुं).

To **atone**, *v. n.* (To agree) सम्मन् (c. 4. -मन्यते -मन्तुं).—(To stand as an equivalent) प्रायश्चित्तः or प्रतिनिधिः or प्रतिभूः भू.

Atonement, *s.* प्रायश्चित्तः, निष्कृतिः *f.*, पापक्षमासाधनं, पापनाशः, अग्निष्टुत् *f.*—(One who atones) प्रायश्चित्तकारी *m.* (न्), निष्कृतिकर्त्ता *m.* (र्तृ), पापक्षमासाधकः.

Atonic, *a.* अग्निनाशकः -का -कं, क्लेशकारी -रिणी -रि (न्).

Atrabilarious, *a.* कालपित्तसम्भूतः -ता -तं, दुर्मनाः -नाः -नः (स्).

Atramentous, *a* मसिवर्णः -र्णा -र्णं, कृष्णवर्णः -र्णा -र्णं.

Atrocious, *a.* अतिपापी -पिनी -पि (न्), अतिदोषी -षिणी -षि (न्), अतिपातकी -किनी -कि (न्), अतिपापिष्ठः -ष्ठा -ष्ठं, अत्यन्तदुराचारः -रा -रं, दुर्वृत्तः -त्ता -त्तं, दारुणः -णा -णं.

Atrocity, **atrociousness**, *s.* अतिपातकं, अतिपापं, अतिदोषः, अतिदुष्टता.

Atrophy, *s.* क्षयः, क्षयरोगः, शरीरक्षीणता, अङ्गशोषः, [illegible]

To **attach**, *v. a.* (To fix to one's interests, win over) सञ्ज् in caus. (सञ्जयति -यितुं), अनुरञ्ज् in caus. (-रञ्जयति -यितुं).—(To connect) सम्बन्ध् (c. 9. -बध्नाति -बद्धुं).—(To seize) आसेधं कृ, धृ (c. 1. धरति, धर्त्तुं), आक्रम् (c. 1. -क्रामति -क्रमितुं).—(To attribute) आरुह् in caus. (-रोपयति -यितुं).—(To be attached) आसञ्ज् in pass. (-सज्यते), अनुरञ्ज् in pass. (-रज्यते).—(To be connected)

सज्जन्स् in pass. (-सज्यते).

ATTACHED, *p. p.* अनुरक्तः -क्ता -क्तं, आसक्तः -क्ता -क्तं, संसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, लग्नः -ग्ना -ग्नं, लगितः -ता -तं, भक्तः -क्ता -क्तं, अभिलाषवान् -वती -वत् (त्), अभिरक्तः -क्ता -क्तं, संहितः -ता -तं, अनुरागवान् -वती -वत् (त्), सानुरागः -गा -गं.

ATTACHMENT, *s.* आसक्तिः *f.*, प्रसक्तिः *f.*, अनुरागः, अनुरक्तिः *f.*, रक्तिः *f.* सङ्गः, आसङ्गः, प्रसङ्गः, भक्तिः *f.*, स्निग्धसङ्गः, सम्प्रीतिः *f.*, परायणः, गुरायणः.

To ATTACK, *v. a.* आक्रम् (c. 1. -क्रामति, c. 4. -क्राम्यति -क्रमितुं), उपक्रम्, उपाक्रम्, अभिक्रम्; आसद् (c. 10. -सादयति -यितुं), आस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं); आयुध् (c. 4. -युध्यते -योद्धुं), प्रतियुध्, युध् in caus. (योधयति -यितुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं), उपद्रु, समाद्रु, अभिधाव् (c. 1. -धावति -ते -धावितुं), अभिप्रया (c. 2. -याति -यातुं).

ATTACK, *s.* अभियोगः, अभिग्रहः, अभिक्रमः, आक्रमः, अवस्कन्दः, अभिमर्दः.

ATTACKED, *p. p.* अभियुक्तः -क्ता -क्तं, आक्रान्तः -न्ता -न्तं, आसादितः -ता -तं.

To ATTAIN, *v. a.* प्राप् (c. 5. -प्राप्नोति -प्राप्तुं), सम्प्राप्; लभ् (c. 1. लभते, लब्धुं), गम् (c. 1. गच्छति, गन्तुं), with acc., अधिगम्; या (c. 2. याति, यातुं), आया; इ (c. 2. एति, एतुं), अभी (अभ्येति); ऋ (c. 1. ऋच्छति, अर्तुं), अश् (c. 5. अश्नुते, अशितुं), उपाश्, समश्; स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), आविश् (c. 6. -विशति -वेष्टुं).

ATTAINABLE, *a.* प्राप्यः -प्या -प्यं, प्रापणीयः -या -यं, गम्यः -म्या -म्यं, लभ्यः -भ्या -भ्यं, समासाद्यः -द्या -द्यं, सुलभः -भा -भं, साध्यः -ध्या -ध्यं.

ATTAINDER, *s.* (The conviction of a crime) आधर्षणं.—(Taint, sully of character) कलङ्कः, अपयशः *n.* (स्), अपकीर्तिः *f.*

ATTAINED, *p. p.* प्राप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, अधिगतः -ता -तं.

ATTAINMENT, *s.* लाभः, लब्धिः *f.*, प्राप्तिः *f.*, अवाप्तिः *f.*, उपलब्धिः *f.*, अर्जनं, उपार्जनं; 'attainment of knowledge,' विद्यागमः.

To ATTAINT, *v. a.* (To corrupt, disgrace) दुष् in caus. (दूषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), कलङ्कं कृ.—(To convict) आधृष् (c. 10. -धर्षयति -यितुं), आधर्षितं कृ.

ATTAINTED, *p. p.* (Convicted) आधर्षितः -ता -तं.—(Corrupted) दूषितः -ता -तं.

To ATTEMPER, *v. a.* (To mingle in just proportions) यथांशतस् मिश्र् (c. 10. मिश्रयति -यितुं) or संयुज् in caus. (-योजयति -यितुं); मृदूकृ.—(To soften, mollify) शम् in caus. (शमयति -यितुं), मृद (nom. मृदयति -यितुं), स्निग्धीकृ.—(To regulate) नियम् (c. 1. -यच्छति -यन्तुं).

To ATTEMPT, *v. a.* (To try) यत् (c. 1. यतते, यतितुं), उपक्रम् (c. 1. -क्रमते -क्रमितुं), आरभ् (c. 1. -रभते -रब्धुं), समारभ्; उद्यम् (c. 1. -यच्छति -यन्तुं), प्रवृत् (c. 1. -वर्तते -वर्तितुं), घट् (c. 1. घटते, घटितुं), व्यवसो (c. 4. -स्यति -सातुं), चेष्ट् (c. 1. चेष्टते, चेष्टितुं), उद्योगं कृ.—(To attack) आक्रम् (c. 1. -क्रामति, c. 4. -क्राम्यति, -क्रमितुं).

ATTEMPT, *s.* उद्यमः, यत्नः, आरम्भः, उपक्रमः, उद्योगः, प्रवृत्तिः *f.*, चेष्टा, ग्रहः, साधनं, व्यापारः.—(Attack) आक्रमः.

ATTEMPTED, *p. p.* आरब्धः -ब्धा -ब्धं, अध्यवसितः -ता -तं, समुद्यतः -ता -तं.

ATTEMPTER, *s.* आरम्भकः, प्रवर्तकः, उपक्रमिता *m.* (तृ), आक्रामकः.

To ATTEND, *v. a.* (To listen to) श्रु (c. 5. शृणोति, श्रोतुं), आश्रु, समाश्रु; आकर्ण् (c. 10. -कर्णयति -यितुं).—(To fix the attention upon) अवधा (c. 3. -धत्ते -धातुं), प्रणिधा, समाधा; मनो युज् (c. 7. युनक्ति, योक्तुं), सेव् (c. 1. सेवते, सेवितुं).—(To wait upon) श्रु in desid. (शुश्रूषते, शुश्रूषितुं), आश्रु, प्रतिश्रु; सेव्, उपसेव्; उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), पर्युपस्था, उपचर् (c. 1. -चरति -चरितुं), परिचर्, उपाचर्; परिविश् (c. 6. -विशति -वेष्टुं), उपास् (c. 2. -आस्ते -आसितुं).—(To accompany) अनुया (c. 2. -याति -यातुं), परिवृ in caus. (-वारयति -यितुं).—(To stay for) प्रतीक्ष् (c. 1. -ईक्षते -ईक्षितुं).

To ATTEND, *v. n.* (To be attentive) अवधा in pass. (-धीयते); 'let attention be paid,' अवधीयतां.—(To delay) विलम्ब् (c. 1. -लम्बते -लम्बितुं).

ATTENDANCE, *s.* शुश्रूषा, परिचर्य्या, उपासनं, उपचारः, सेवा, उपसेवा, अनुगमनं.

ATTENDANT, *a.* सहगामी -मिनी -मि (न्), सहचारी -रिणी -रि (न्).

ATTENDANT, *s.* सेवकः, परिचरः, सहचारी *m.* (न्), अनुयायी *m.* (न्), अनुसारी *m.* (न्), अनुचरः, पारिषदः, परिचारकः.—(Train of attendants) परिवारः, परिबर्हः.—(Of Siva) प्रमथः.

ATTENDED, *p. p.* (Accompanied) सहितः -ता -तं, समेतः -ता -तं, परिवारितः -ता -तं, परिवृतः -ता -तं, वृतः -ता -तं, समन्वितः -ता -तं.—(Attended to) अनुष्ठितः -ता -तं. When only two persons are referred to, द्वितीय or सहाय may be used; as, 'attended by Indrasena,' इन्द्रसेनद्वितीयः -या -यं or इन्द्रसेनसहायः -या -यं; 'attended by servants,' सप्रेष्यः -ष्या -ष्यं.

ATTENT, *a.* निविष्टः -ष्टा -ष्टं, अवहितः -ता -तं, आहितः -ता -तं.

ATTENTION, *s.* अवधानं, अवधानता, अपेक्षा, अन्ववेक्षा, अपेक्षा, अभिनिवेशः, मनोनिवेशः, मनोनिधानं, मनःप्रवेशः, निविष्टचित्तता, मनोयोगः, आसक्तिः *f.*, अनुरागः, अप्रमादः.—(To a pursuit) परायणः, अनुष्ठानं, सेवनं, उपसेवा.—(To discourse) कथानुरागः.—(To one object) एकाग्रता.

ATTENTIVE, *a.* सावधानः -ना -नं, अवहितः -ता -तं, दत्तावधानः -ना -नं, कृतावधानः -ना -नं, अभिनिविष्टः -ष्टा -ष्टं, आसक्तः -क्ता -क्तं, आसक्तचित्तः -त्ता -त्तं, आस्थः -था -थं, समाहितः -ता -तं, प्रमादरहितः -ता -तं, मनस्वान् -वती -वत् (त्), प्रणिहितः -ता -तं, अप्रमत्तः -त्ता -त्तं.—(Closely attentive) अनन्यमनाः -नाः -नः (स्), एकाग्रः -ग्रा -ग्रं, अनन्यवृत्तिः -त्तिः -त्ति, एकतानः -ना -नं, एकायनः -ना -नं.

ATTENTIVELY, *adv.* सावधानं, अवधानात्, अवहितं, मनःप्रवेशेन, प्रमादव्यतिरेकेण.

To ATTENUATE, *v. a.* कृश् (nom. कृशयति -यितुं), तनूकृ, क्षि in caus. (क्षपयति -यितुं), सूक्ष्म (nom. सूक्ष्मयति -यितुं), सूक्ष्मीकृ.

ATTENUATED, *p. p.* कृशः -शा -शं, प्रकृशितः -ता -तं, परिकृशः -शा -शं, तनुः -नुः -न्वी -नु, क्षीणः -णा -णं, क्षीणः -णा -णं, क्षामः -मा -मं.—(In body) कृशाङ्गः -ङ्गी -ङ्गं, शुष्काङ्गः -ङ्गी -ङ्गं.

ATTENUATION, *s.* कार्श्यं, क्षामता, क्षीणता.—(Of body) कृशाङ्गत्वं, शरीरशोषणं.

To ATTEST, *v. a.* (To bear witness of) साक्ष्यं or साक्षित्वं दा (c. 3. ददाति, दातुं), साक्षेण or साक्षिणा or प्रत्यक्षदर्शनेन प्रमाणं दा, or प्रमाणीकृ, or दिश् (c. 6. दिशति देष्टुं).—(To call to witness) साक्षे (c. 1. -ह्वयति -ते -ह्वातुं), साक्षिणं कृ.

ATTEST, ATTESTATION, *s.* साक्ष्यं, साक्षिता, प्रमाणं, दृढोक्तिः, प्रत्यक्षप्रमाणं.

ATTIC, *s.* (Upper room) अट्टः, सौधः, शिरोगृहं.

To ATTIRE, *v. a.* (To attire one's self) वस् (c. 2. वस्ते, वसितुं).—(To clothe) वेष्ट् (c. 1. वेष्टते, वेष्टितुं), वस्त्र (nom. वस्त्रयति -यितुं), आच्छद् (c. 10. -छादयति -यितुं), संव्ये (c. 1. -व्ययति -व्यातुं).—(To adorn) परिष्कृ (c. 8. -करोति -कर्तुं), अलङ्कृ, संस्कृ; भूष् (c. 10. भूषयति -यितुं).

ATTIRE, *s.* वस्त्रं, वेशः, परिधानं, परिच्छदः, आभरणं, भूषणं, अम्बरं,

संस्थानं, अलङ्कारः, परिष्कारः.

ATTIRED, *p.p.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, संवीतः -ता -तं, प्रावृतः -ता -तं, अलङ्कृतः -ता -तं, परिष्कृतः -ता -तं.

ATTITUDE, *s.* स्थानं, भावः, अवस्था, स्थितिः *f.*, आकारः, रूपं, वृत्तिः *f.*, भूमिः *f.*

ATTORNEY, *s.* परकार्य्यसाधकः, परकार्य्यसम्पादकः, प्रतिपुरुषः, प्रतिहस्तः.

To ATTRACT, *v. a.* आकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं), समाकृष्, प्रतिकृष्, समुपकृष्; अभिप्रणी (c. 1. -णयति -णेतुं).—(To beguile) मुह् in caus. (मोहयति -यितुं), विमुह्, सम्मुह्; प्रलुभ् in caus. (-लोभयति -यितुं), विलुभ्.

ATTRACTED, *p. p.* आकृष्टः -ष्टा -ष्टं, आकर्षितः -ता -तं, प्रलोभितः -ता -तं, विलोभितः -ता -तं, मोहितः -ता -तं.

ATTRACTION, *s.* आकर्षः -र्षणं, आकृष्टिः *f.*, अभिकर्षणं.—(Allurement) प्रलोभनं, विलोभः, विलोभनं; 'desire to blend,' यियविषा.

ATTRACTIVE, *a.* आकर्षकः -की -कं, कर्षकः -का -कं, मनोहरः -रा -रं, आकर्षणशीलः -ला -लं, चित्तापहारी -रिणी -रि (न्).—(Beguiling) मोही -हिनी -हि (न्), प्रलोभकः -का -कं.—(Winning friends) मित्रयुः -युः -यु.

ATTRIBUTABLE, *a.* आरोपणीयः -या -यं, अध्यारोपणीयः -या -यं, अभिसम्बन्धनीयः -या -यं.

To ATTRIBUTE, *v. a.* (As an action, quality, &c., to any one) कर्म्म गुणं वा इत्यादि कस्मिंश्चित् or कस्मैचित् आरुह् in caus. (-रोपयति -यितुं), अध्यारुह् or अभिसम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं) or सम्बन्ध्, or दा (c. 3. ददाति, दातुं).—(To attribute a fault) दोषारोपणं or दोषकल्पनं or दोषप्रसङ्गं कृ.

ATTRIBUTE, *s.* गुणः, विशेषः, विशेषणं, संज्ञाविषयः.

ATTRIBUTIVE, *a.* वाच्यः -च्या -च्यं, विशेषकः -का -कं, विशेषणः -णा -णं.

ATTRITION, *s.* (The act of wearing things by rubbing one against another) घर्षणं, सम्मर्द्दः -र्द्दनं, पेषणं, क्षयः, क्षीणत्वं.—(Grief for sin) भयमूलः पश्चात्तापः, अनुतापः, सन्तापः.

To ATTUNE, *v. a.* (To make any thing musical) सुस्वरं -रां -रं कृ, तालोपेतं -तां -तं कृ.—(To tune one thing to another) गीतवादित्रादि तुल्यस्वरं कृ, गीतवादित्रादीनाम् एकतालं कृ, तौर्य्यत्रिकं कृ, नानाध्वनीनां तूर्य्यादीनाम् ऐक्यं कृ.

AUBURN, *a.* श्यावः -वा -वं, कपिशः -शा -शं, पाण्डुवर्णः -र्णा -र्णं.

AUCTION, *s.* वर्द्धमानमूल्येन नानाद्रव्यविक्रयः, घोषणपूर्व्वकं नानाद्रव्यविक्रयः.—(Auction-room) द्रव्यविक्रयगृहं.

AUCTIONEER, *s.* विक्रेता *m.* (तृ), विक्रयिकः, विक्रयी *m.* (न्), यो घोषणपूर्व्वकं विक्रयार्थं द्रव्याणि विक्रीणाति.

AUDACIOUS, *a.* प्रगल्भः -ल्भा -ल्भं, गल्भः -ल्भा -ल्भं, धृष्टः -ष्टा -ष्टं, साहसिकः -की -कं, निर्लज्जः -ज्जा -ज्जं, प्रतिभानवान् -वती -वत् (त्), निर्भयः -या -यं: 'to be audacious,' धृष् (c. 5. धृष्णोति, धर्षितुं).

AUDACIOUSLY, *adv.* प्रगल्भं, साहसेन, निर्भयं, धार्ष्ट्येन, लज्जां विना.

AUDACIOUSNESS, AUDACITY, *s.* प्रगल्भता, धार्ष्ट्यं, धृष्टता, साहसं, निर्लज्जत्वं, प्रतिभानं.

AUDIBLE, *a.* श्राव्यः -व्या -व्यं, श्रोतव्यः -व्या -व्यं, कर्णगोचरः -रा -रं, कर्णश्रवः -वा -वं, श्रावणार्हः -र्हा -र्हं, श्रवणयोग्यः -ग्या -ग्यं, श्रोत्रग्राह्यः -ह्या -ह्यं.

AUDIBLY, *adv.* श्राव्यप्रकारेण, कर्णगोचरं.

AUDIENCE, *s.* (The act of hearing) श्रवणं, आकर्णनं, निशमनं.—(Liberty of speaking to or seeing a superior) राजदर्शनं, दर्शनं: 'he is come begging an audience,' दर्शनार्थिम् आगतोऽस्ति.—(An auditory, hearers) श्रोतारः *m. pl.* (तृ), सभा, सभासदः *m. pl.*, सदः *n.* (स्), परिषद् *f.*, प्रेक्षकाः *m. pl.*—(Audience-chamber) दर्शनशाला, दर्शनगृहं.

AUDIT, *s.* गणितशोधनं, गणितशुद्धीकरणं, गणनं, विगणनं, अनुसन्धानं, अनुयोगः, परीक्षणं.

To AUDIT, *v. a.* गणितानि शुध् in caus. (शोधयति -यितुं), or शुद्धीकृ or अनुसन्धा (c. 3. -दधाति -धत्ते -धातुं), or अनुयुज् (c. 7. -युनक्ति -योक्तुं) or परीक्ष् (c. 1. -ईक्षते -ईक्षितुं); गणनं कृ, विगणनं कृ.

AUDITED, *p. p.* शुद्धीकृतः -ता -तं, शोधितः -ता -तं, विगणितः -ता -तं.

AUDITOR, *s.* श्रोता *m.* (तृ).—(One employed to take an account) गणितशोधकः, अनुसन्धायी *m.* (न्), गणकः.

AUDITORY, *s.* (A collection of hearers) श्रोतारः *m. pl.*, सभासदः *m. pl.*, सभा, सदः *n.* (स्), परिषद् *f.*—(A lecture room) पाठशाला, अध्ययनशाला.

AUGER, *s.* आस्फोटनी, वेधनिका, आविधः.

AUGHT, *s.* किञ्चित्, किमपि, किञ्चन.

To AUGMENT, *v. a.* वृध् in caus. (वर्धयति -यितुं), संवृध्, परिवृध्; एध् in caus. (एधयति -यितुं), समेध्; प्रचुरीकृ; आप्यै in caus. (-प्याययति -यितुं), समाप्यै.

To AUGMENT, *v. n.* वृध् (c. 1. वर्धते, वर्धितुं), अभिवृध्, प्रवृध्, विवृध्; ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, अर्धितुं), समृध्; उपचि in pass. (-चीयते), प्यै (c. 1. प्यायते, प्यातुं), बृंह् in caus. (बृंहयति -यितुं), उपबृंह्, समुपबृंह्.

AUGMENT, *s.* वृद्धिः *f.*—(In grammar) आगमोक्तिः *f.*

AUGMENTATION, *s.* (The act) वर्द्धनं.—(The state) वृद्धिः *f.*, विवृद्धिः *f.*, ऋद्धिः *f.*, उपचयः, उन्नतिः *f.*, समुन्नतिः *f.*

AUGMENTED, *p. p.* संवर्द्धितः -ता -तं, वृद्धः -द्धा -द्धं, प्रवृद्धः -द्धा -द्धं, उपचितः -ता -तं, प्रचुरीकृतः -ता -तं, समेधितः -ता -तं.

AUGUR, *s.* शकुनपरीक्षकः, अजन्यज्ञः, पूर्व्वचिह्ननिरीक्षकः, पूर्व्वलक्षणज्ञः, पक्षिगतिहस्तरेखादिलक्षणात् शुभाशुभदर्शकः, भूकम्पाद्युत्पातपक्षिगतिचक्षुःस्पन्दादिनिमित्तफलकथकः.

To AUGUR, *v. n.* भूकम्पाद्युत्पातपक्षिगतिचक्षुःस्पन्दादिनिमित्तफलकथनेन शुभाशुभं or मङ्गलामङ्गलं or अजन्यानि प्रदृश् in caus. (-दर्शयति -यितुं); शकुनानि or पूर्व्वलिङ्गानि परीक्ष् (c. 1. -ईक्षते -ईक्षितुं).—(To conjecture) अनुमा (c. 2. -माति -मातुं), शङ्क् (c. 1. शङ्कते, शङ्कितुं).

AUGURED, *p.p.* (Foreshewn) प्रदर्शितः -ता -तं.—(Inferred) अनुमितः -ता -तं.

AUGURY, *s.* (The act of prognosticating) पक्षिगतिहस्तरेखाचक्षुःस्पन्दादिलक्षणात् शुभाशुभदर्शनं or भविष्यदनुमानं, शकुनपरीक्षणं, पूर्व्वलक्षणज्ञानं.—(An omen) शकुनं, अजन्यं, पूर्व्वचिह्नं, पूर्व्वलक्षणं.

AUGUST, *a.* ऐश्वरः -री -रं, ऐशिकः -की -कं, प्रतापवान् -वती -वत् (त्), महामहिमा -मा -म (न्), अत्युत्कृष्टः -ष्टा -ष्टं, अतिमहान् -हती -हत् (त्), राजयोग्यः -ग्या -ग्यं.

AUGUST, *s.* श्रावणः, नभाः *m.* (स्), भाद्रः, नभस्यः, प्रौष्ठपदः.

AUGUSTNESS, *s.* महाप्रतापः, अतिमहत्त्वं, अत्युत्कृष्टता, प्रतापः.

AUNT, *s.* (By the mother's side) मातुली, -ला, -लानी.—(Father's sister) पितृष्वसा *f.* (स्).

AURICLE, *s.* (The external ear) कर्णशष्कुली *f.*, कर्णबहिर्भागः.—(Of the heart) हृद्रन्ध्रयुत् कर्णाकारः कोषः.

AURICULAR, *a.* (Relating to the ear) कार्णः -र्णी -र्णं, श्रावकः -का -कं, श्रावणः -णी -णं, श्रौतः -ती -तं.—(Told in the ear, secret) उपकर्णं

or कर्णे अर्पितः -ता -तं or श्रव्यः -व्या -व्यं, सुगमः -मा -मं.—(Within the sense of hearing) कर्णगोचरः -रा -रं.

Aurora, *s.* (The dawn) अरुणः, दिवसमुखं, अहर्मुखं, उषः, पूर्वसन्ध्या.

Auspice, *s.* (An omen drawn from birds) शकुनं, निमित्तं, पक्षिगतिप्रयुक्तं पूर्वलक्षणं, पूर्वचिह्नं.—(Favour, protection) आश्रयः, अनुग्रहः.

Auspicious, *a.* शुभः -भा -भं, कल्याणः -णी -णं, शङ्करः -री -रं, शिवङ्करः -रा -रं, भद्रः -द्रा -द्रं, मङ्गल्यः -ल्या -ल्यं, माङ्गलिकः -की -कं, श्रीमान् -मती -मत् (त्), शुभङ्करः -रा -रं, क्षेमकरः -रा -रं, तिष्यः -ष्या -ष्यं.—(Prosperous) सौभाग्यवान् -वती -वत् (त्), श्रीयुक्तः -क्ता -क्तं, क्षेमवान् -वती -वत् (त्).—(Favourable) प्रसन्नः -न्ना -न्नं, अनुग्राही -हिणी -हि (न्); 'an auspicious moment,' शुभलग्नः, लग्नवेला.

Auspiciously, *adv.* दिष्ट्या, शुभलग्ने, शुभक्षणे, सौभाग्येन, कौशल्येन, क्षेमेण.

Auspiciousness, *s.* कल्याणं, मङ्गलं, माङ्गल्यं, कौशल्यं, क्षेमः.

Austere, *a.* निष्ठुरः -रा -रं, कर्कशः -शा -शं, कठिनः -ना -नं, उग्रः -ग्रा -ग्रं, कटुमतिः -तिः -ति, कठोरः -रा -रं, निर्दयः -या -यं.—(In taste) शुक्तः -क्ता -क्तं.

Austerely, *adv.* निष्ठुरं, काठिन्येन, कठोरं, नैष्ठुर्येण, उग्रं.

Austereness, austerity, *s.* (Severity) कार्कश्यं, काठिन्यं, कठिनता, उग्रता, निष्ठुरता, नैष्ठुर्यं, कठोरता, कटुता.—(Penance) तपः *n.* (स्), कृच्छ्रं; 'patient of austerities,' तपःक्लेशसहः; 'to practise austerities,' तप् in pass. (तप्यते), समतप्; तपस्य् (nom. तपस्यति).

Austral, *a.* (Southern) दक्षिणः -णा -णं, अपाचीनः -ना -नं.

Authentical, authentic, *a.* सिद्धप्रमाणः -णा -णं, अबाधप्रमाणः -णा -णं, प्रामाणिकः -की -कं, प्रमाणयुक्तः -क्ता -क्तं, आप्तः -प्ता -प्तं.—(Real, genuine) वास्तवः -वी -वं, वास्तविकः -की -कं, निर्व्यलीकः -का -कं, निर्व्याजः -जा -जं, अकृत्रिमः -मा -मं, अकल्पितः -ता -तं, मूलिकः -की -कं, सारः -रा -रं, तथ्यः -थ्या -थ्यं, सत्यः -त्या -त्यं.

Authentically, *adv.* प्रमाणतस् *ind.*, प्रमाणानुरूपेण, वस्तुतस्, तत्त्वतस्, निर्व्यलीकं, सारतस्.

To **authenticate**, *v. a.* प्रमाणीकृ, प्रमाण (nom. प्रमाणयति -यितुं), सत्याकृ.

Authenticity, *s.* प्रामाण्यं, प्रमाणत्वं, वास्तवता, निर्व्यलीकता, अकृत्रिमता, मौलता, सारता, सत्यता.

Author, *s.* (The first beginner of any thing) प्रयोजकः, प्रवर्त्तकः, आरम्भकः, आदिकर्त्ता *m.* (र्तृ).—(The effector) साधकः, उत्पादकः, सम्पादकः, जनकः, कर्त्ता *m.* (र्तृ), कारकः, निर्वाहकः.—(A writer) निबन्धा *m.* (न्धृ), ग्रन्थकारः, ग्रन्थकर्त्ता *m.* (र्तृ), रचकः.

To **authorise**, *v. a.* (To establish by authority) प्रमाणीकृ, प्रमाणेन सिद्धीकृ or स्थिरीकृ or संस्था in caus. (-स्थापयति -यितुं), सप्रमाणं -णां -णं कृ, प्रमाणवशं -वर्तीं -वत् कृ.—(To give authority to any one) नियुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं, c. 10. -योजयति -यितुं), अधिकारित्वं दा (c. 3. ददाति, दातुं).—(To permit) अनुज्ञा (c. 9. -जानाति -जानीते -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं).

Authorised, *p. p.* प्रमाणीकृतः -ता -तं, सप्रमाणः -णा -णं, नियुक्तः -क्ता -क्तं, अधिकृतः -ता -तं, नियोगी -गिनी -गि (न्), विधीयमानः -ना -नं.—(Permitted) अनुज्ञातः -ता -तं, अनुमतः -ता -तं.

Authoritative, *a.* प्रामाणिकः -की -कं, प्रमाणधारी -रिणी -रि (न्), वैधिकः -की -कं, आधारिकः -की -कं, शासनानुरूपः -पा -पं.

Authoritatively, *adv.* प्रमाणतस् *ind.*, प्रमाणानुसारेण, विधिवत्, आधारानुरूपं, शासनात्.

Authority, *s.* (Weight of testimony, credit) प्रमाणं, प्रामाण्यं.—(Power, influence, control) शक्तिः *f.*, प्रभावः, वशः.—(Dominion) ऐश्वर्यं, राज्यं, प्रभुत्वं.—(Weight) गुरुत्वं, गौरवं.—(Credibility) श्रद्धेयता.—(Legal power, title) अधिकारित्वं, अधिकारः, आधिपत्यं, नियोगः, कर्तृत्वं, प्रभुत्वं.—(A received text) आप्तवचनं, निदर्शनं.—(Testimony) साक्ष्यं.—(A person invested with legal powers) अधिकारी *m.* (न्), नियोगी *m.* (न्), प्रभुः *m.*—(An authority, a guide) निर्देष्टा *m.* (ष्टृ); 'of little authority,' अल्पप्रमाणः -णा -णं, अल्पप्रभावः -वा -वं; 'by his authority,' तस्य आज्ञया.

Authorship, *s.* निबन्धृत्वं, ग्रन्थकर्तृत्वं, कर्तृत्वं.

Auto-biography, *s.* आत्मवृत्तान्तरचनं, आत्मचरितरचनं.

Autocrasy, *s.* साम्राज्यं, आधिराज्यं, राजाधिराज्यं, स्वाधिपत्यं, स्वाधीनता.

Autocrat, *a.* सम्राट् *m.* (ज्), अधिराजः, राजाधिराजः.

Autocratical, *a.* साम्राज्ययोग्यः -ग्या -ग्यं, स्वाधीनः -ना -नं.

Autograph, *s.* स्वहस्तलिखितं, स्वहस्ताक्षरं, स्वहस्तलेखः, स्वहस्तलिपिः *f.*

Automaton, *s.* स्वयं चलति यद् यन्त्रं, स्वयञ्चलन्ती मूर्तिः.

Autumn, *s.* शरद् *f.*, शरदा, शरत्कालः, श्रावणावधिः *m.*, वर्षावसानः.

Autumnal, *a.* शरत्कालीनः -ना -नं, शारदीयः -या -यं, शारदः -दी -दं, शारदी -दिनी -दि (न्).—(Produced in autumn) शरदिजः -जा -जं, शरदुद्भवः -वा -वं.

Auxiliary, *s.* सहायः, सहकारी *m.* (न्), उपकारकः, उपकारी *m.* (न्), उत्तरसाधकः.

Auxiliary, *a.* उपकारकः -का -कं or -री -रिणी -रि (न्), सहकारी -रिणी -रि (न्), उत्तरसाधकः -का -कं.—(Auxiliary verb) गौणक्रिया.

To **avail**, *v. a.* (To assist) उपकृ (c. 8. -करोति -कर्तुं), हितं कृ, साहाय्यं कृ, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(To avail one's self of) प्रयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), उपयुज्.

To **avail**, *v. n.* (To be of use) सोपकारः -रा -रं or सफलः -ला -लं भू or अस्, हिताय or फलाय or लाभाय भू.

Avail, *s.* (Use) प्रयोजनं, उपयोगः.—(Profit) फलं, हितं, लाभः, साफल्यं, अर्थः.—(Aid) उपकारः.

Available, *a.* (To be used) प्रयोज्यः -ज्या -ज्यं, उपयोजनीयः -या -यं, प्रयोगी -गिनी -गि (न्).—(Profitable) सफलः -ला -लं, अर्थकरः -री -रं.

Avant-guard, *s.* सेनामुखं, अग्रिमसैन्यं, रणमूर्द्धा *m.* (न्), नासीरं, अग्रव्यूहः, प्रथमपङ्क्तिः *f.*

Avarice, *s.* लोभः, अतिकाङ्क्षा, लालसा, लिप्सा.—(Desire of wealth) अर्थकामः, वित्तेहा, धनतृष्णा, धनलोभः.

Avaricious, *a.* लोभी -भिनी -भि (न्), लुब्धः -ब्धा -ब्धं, लोभवान् -वती -वत् (त्), कृपणः -णा -णं, अर्थपरः -रा -रं, अर्थलुब्धः -ब्धा -ब्धं, धनलुब्धः -ब्धा -ब्धं, धनार्थी -र्थिनी -र्थि (न्), लिप्सुः -प्सुः -प्सु, मितम्पचः -चा -चं.

Avariciousness, *s.* कृपणत्वं, कार्पण्यं, लुब्धता, धनलुब्धता, अतिलोभः.

Avariciously, *adv.* लोभेन, लोभात्, सलोभं, कार्पण्येन, कृपणं, अतिकाङ्क्षया.

Avaunt, *interj.* अपेहि, अपसर, दूरम् अपसर.

To **avenge**, *v. a.* प्रतिकृ (c. 8. -करोति -कुरुते -कर्तुं), परिष्कृ, प्रतिहिंस् (c. 1. -हिंसति, c. 7. हिनस्ति -हिंसितुं), प्रतीकारं or प्रतिहिंसां कृ.—(To punish) दण्ड् (c. 10. दण्डयति -यितुं).—(To wipe out a grudge) वैरं शुध् in caus. (शोधयति -यितुं).

Avenged, *p. p.* प्रतिकृतः -ता -तं, प्रतिहिंसितः -ता -तं, प्रतिहतः -ता -तं, निर्यातितः -ता -तं.—(Wiped out as a grudge) शोधितः -ता -तं.—(Punished) दण्डितः -ता -तं.

Avengement, *s.* प्रतीकारः, प्रतिक्रिया, प्रतिहिंसा, निर्यातनं, वैरशुद्धिः *f.*

Avenger, *s.* प्रतिहिंसकः, प्रतिहन्ता *m.* (न्तृ), प्रतीकारकर्त्ता *m.* (र्तृ), वैरशोधकः.

Avenue, *s.* (An approach) पथः, आगमः, द्वारं.—(An alley of

trees) तरुपंक्तिः *f.*, मार्गे उभयतो रोपिता वृक्षश्रेणी.

To AVER, *v. a.* शपथेन or दिव्येन or दार्ढ्येन वद् (c. 1. वदति, वदितुं).

AVERAGE, *s.* (Mean proportion) मध्यमता, मध्यतं, मध्यं, मध्यमावस्था, समं.

AVERMENT, *s.* दृढवाक्यं, दृढवचनं, दृढोक्तिः *f.*, स्थिरवचनं.

AVERSE, *a.* विरक्तः -क्ता -क्तं, प्रतिकूलः -ला -लं, विपरीतः -ता -तं, विमतः -ता -तं, विमनीभूतः -ता -तं, द्वेषी -षिणी -षि (न्), वैरी -रिणी -रि (न्).—(To be averse) विरञ्ज् in pass. (-रज्यते), अपावृत् (c. 1. -वर्त्तते -वर्त्तितुं), प्रतीप (nom. प्रतीपायते).—(Averting the face) पराङ्मुखः -खी -खं, विमुखः -खी -खं.

AVERSELY, *adv.* निष्कामं, प्रतिकूलं, विपरीतं, विरक्तं, विरक्त्या.

AVERSENESS, AVERSION, *s.* वैरक्त्यं, विरक्तिः *f.*, निग्रहः, प्रतिकूलता, विमतिः *f.*, पराङ्मुखता, वैमुख्यं, वैपरीत्यं, अप्रियता, अप्रीतिः *f.*, द्वेष्यता; 'aversion to business,' कार्य्यप्रद्वेषः.

To AVERT, *v. a.* अपवृत् in caus. (-वर्त्तयति -यितुं), व्यावृत्, निवृत्, विनिवृत्, निवृ in caus. (-वारयति -यितुं), प्रतिवृ, अपानुद् (c. 6. -नुदति -नोत्तुं), व्यपानुद्, विमुखीकृ.

AVERTED, *p. p.* (Having the face averted) पराङ्मुखः -खी -खं, विमुखः -खी -खं, विमुखीकृतः -ता -तं, विमुखी -खिनी -खि (न्), पराधीनः -ना -नं.—(Kept off) निवारितः -ता -तं, व्यावृत्तः -त्ता -त्तं.

AVIARY, *s.* विटङ्कः, पञ्जरं, पिञ्जरं, वीतंसः, कपोतपालिका, पक्षिशाला, कुलायिका.

AVIDITY, *s.* अतिक्षुधा, गृध्रता, गर्द्धः, अतिस्पृहा, कौतूहलं, लालसा, अतिलोभः.

AVOCATION, *s.* (Calling aside, withdrawing) अपकर्षणं, आकर्षः, अपहरणं.—(Business that calls aside) कार्य्यं, कर्म्म *n.* (न्), विकर्म्म *n.* (न्), व्यापारः, व्यवसायः.

To AVOID, *v. a.* वृज् in caus. (वर्जयति -यितुं), परिवृज्, विवृज्; परिहृ (c. 1. -हरति -ते -हर्त्तुं); प्रोज्झ् (c. 6. -उज्झति -उज्झितुं); हा (c. 3. जहाति, हातुं); त्यज् (c. 1. त्यजति, त्यक्तुं).

AVOIDABLE, *a.* (To be avoided) परिहरणीयः -या -यं, परिहर्त्तव्यः -व्या -व्यं, परित्याज्यः -ज्या -ज्यं, हेयः -या -यं, हातव्यः -व्या -व्यं, त्याज्यः -ज्या -ज्यं.

AVOIDANCE, *s.* त्यागः, परित्यागः, परिहारः, परिहरणं, प्रतिहरणं, वर्जनं, प्रोज्झनं.

AVOIDED, *p. p.* परिहृतः -ता -तं, त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, विवर्जितः -ता -तं, प्रोज्झितः -ता -तं.

To AVOUCH, *v. a.* (To affirm) दार्ढ्येन or स्थैर्य्येण or शपथेन वद् (c. 1. वदति, वदितुं).—(To vindicate, assert any thing in favour of another) परार्थं प्रतिवद्.

To AVOW, *v. a.* (To confess) स्वीकृ, अङ्गीकृ, उरीकृ, अनुभाष् (c. 1. भाषते -भाषितुं).—(To declare openly) प्रकाशं or व्यक्तं वद् (c. 1. वदति, वदितुं).

AVOWED, *p. p.* स्वीकृतः -ता -तं, अङ्गीकृतः -ता -तं, व्यक्तोदितः -ता -तं.

AVOWEDLY, *adv.* प्रकाशं, व्यक्तं, प्रकटं, अगूढं.

To AWAIT, *v. a.* अपेक्ष् (c. 1. -ईक्षते -ईक्षितुं), उदीक्ष्, प्रतीक्ष्; प्रतिपाल् (c. 10. -पालयति -यितुं), उद्दृश् (c. 1. -पश्यति -द्रष्टुं), अपेक्षां कृ.

To AWAKE, AWAKEN, *v. a.* जागृ in caus. (जागरयति -यितुं), बुध् in caus. (बोधयति -यितुं), प्रबुध्, प्रतिबुध्, विबुध्; निद्रां भञ्ज् (c. 7. भनक्ति, भंक्तुं), निद्राभङ्गं कृ.—(To incite) उत्था in caus. (-थापयति -यितुं), उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्; उत्तिज् (c. 10. -तेजयति -यितुं).

To AWAKE, *v. n.* जागृ (c. 2. जागर्त्ति, जागरितुं), प्रजागृ; बुध् (c. 4. बुध्यते, बोद्धुं), अनुबुध्, प्रबुध्, प्रतिबुध्, विबुध्, प्रतिसंबुध्.

AWAKE, *a.* जागरः -रा -रं, प्रबुद्धः -द्धा -द्धं, प्रतिबुद्धः -द्धा -द्धं, विप्रबुद्धः -द्धा -द्धं, प्रजागरः -रा -रं, उन्निद्रः -द्रा -द्रं; 'that which keeps one awake at night,' रात्रिजागरदः.

AWAKENED, *p. p.* जागरितः -ता -तं, प्रबोधितः -ता -तं, निद्राभङ्गः -ङ्गा -ङ्गं

AWAKENING, *s.* प्रबोधनं, प्रबोधः, निद्राभङ्गः.

To AWARD, *v. a.* दा in caus. (दापयति -यितुं), तीर् (c. 10. तीरयति -यितुं)

AWARD, *s.* (Judgment, sentence) विचारः, निर्णयः, निष्पत्तिः *f.* तीरणं, समाधानं, दण्डः, आज्ञा.

AWARDED, *p. p.* दापितः -ता -तं, तीरितः -ता -तं.

AWARDER, *s.* विचारकः, निर्णेता *m.* (तृ), दायकः.

AWARE, *a.* (Excited to consciousness) विज्ञापितः -ता -तं, बोधितः -ता -तं.—(Knowing) वेदी -दिनी -दि (न्), ज्ञः -ज्ञा -ज्ञं in comp.—(Vigilant, attentive) सावधानः -ना -नं, जागरः -रा -रं, -री -रिणी -रि (न्); 'he is aware,' वेत्ति, जानाति.

AWAY, *a.* and *adv.*, expressed by the preposition अप.—(Absent) परोक्षः -क्षा -क्षं, स्थानान्तरकृतः -ता -तं, अनुपस्थितः -ता -तं, अविद्यमानः -ना -नं.—(Far away) दूरस्थः -स्था -स्थं, दूरस्थायी -यिनी -यि (न्).—(Come along) यातु.—(Begone!) अपेहि, अपसर, दूरम्; 'away with this fear,' अलम् अनया शङ्कया.

AWE, *s.* आदरः, सम्भ्रमः, विस्मयः, त्रासः, आतङ्कः, आदरप्रयुक्तं भयं.—(To stand in awe of) भी (c. 3. बिभेति, भेतुं), त्रस् (c. 4. त्रस्यति त्रसितुं) with abl., आदृ (c. 6. -द्रियते) with acc.

To AWE, *v. a.* (To strike terror into) भी in caus. (भाययति or भीषयति -यितुं), त्रस् in caus. (त्रासयति -यितुं), व्याकुलीकृ, आकुलीकृ, सम्भ्रमेण उपहन् (c. 2. -हन्ति -हन्तुं).

AWE-STRUCK, *a.* सम्भ्रान्तः -न्ता -न्तं, विस्मयाकुलः -ला -लं, भयविप्लुतः -ता -तं

AWFUL, *a.* घोरः -रा -रं, दारुणः -णा -णं, भैरवः -वा -वं, भीषणः -णा -णं, भयङ्करः -रा -रं, भयानकः -का -कं.—(Worshipful) आदरणीयः -या -यं, आदृत्यः -त्या -त्यं, पूज्यः -ज्या -ज्यं.

AWFULLY, *adv.* दारुणं, घोरं, यथा सम्भ्रम उत्पद्यते तथा.

AWFULNESS, *s.* घोरता, दारुणता, भीषणत्वं, भैरवं, भीष्मं.

AWHILE, *adv.* कियत्कालं, किञ्चित्कालं, अल्पकालं, इयत्कालं, मुहूर्त्तं, क्षणं, यत्किञ्चित्समयं.

AWKWARD, *a.* (Clumsy, unskilful) अदक्षः -क्षा -क्षं, अनाप्तः -प्ता -प्तं, अपटुः -टुः -टु, अक्षिप्रः -प्रा -प्रं, अविज्ञः -ज्ञा -ज्ञं, अकृती -तिनी -ति (न्).—(Inelegant) विरूपः -पी -पं, स्थूलः -ला -लं.

AWKWARDLY, *adv.* अपटु, अदक्षं, अक्षिप्रं, अनाप्तं.

AWKWARDNESS, *s.* (Unskilfulness) अपाटवं, अपटुता, अदाक्ष्यं, अक्षिप्रत्वं.—(Inelegance) स्थूलता, वैरूप्यं.

AWL, *s.* आरा, चर्म्मप्रभेदिका, आविधः, वेधनिका.

AWN, *s.* (A beard of corn) शूकः -कं, शस्यशूकं, किंशारुः *m.*

AWNING, *s.* वितानं, वितानकं, आच्छादनं, उल्लोचः.

AWRY, *adv.* तिरस्, साचि, तिर्य्यक्, कुटिलं, जिह्मं, अनृजु.—(Perversely) विपरीतं, प्रतिकूलं, विलोमं.

AXE, *s.* टङ्कः, कुठारः, परशुः *m.*, परश्वधः, छिदिः *f.*, वृक्षभिद् *f.*, वृक्षभेद *m.* (न्). स्वधितिः *m.*

AXIOM, *s.* तत्त्वं, सूत्रं, सिद्धान्तः, आदेशः, वचनं.

AXIOMATIC, *a.* सौत्रः -त्री -त्रं, सिद्धान्ती -न्तिनी -न्ति (न्).

AXIS, *s.* अक्षः, ध्रुवः, मेरुः *m.*

AXLE, AXLE-TREE, *s.* अक्षाग्रं, अक्षदण्डः.

AY, *adv.* तथेति, एवं, हूम्, आम्.

AYE, *adv.* सर्व्वदा, सदा, नित्यं, नित्यदा, शाश्वतं, अजस्रं, शाश्वतीः समाः

AZURE, *a.* नीलः -ला -लं, नीलवर्णः, -र्णा -र्णं, आकाशवर्णः -र्णा -र्णं.

B.

To BAA, *v. n.* उ (c. 1. अवते, ओतुं), मेषवत् or उरभ्रवत् शब्दं कृ.

To BABBLE, *v. n.* (To prattle like a child) बालवत् जल्प् (c. 1. जल्पति, जल्पितुं).—(To talk idly) जल्प्.—(To tell secrets) रहस्यं प्रकाश् in caus. (-काशयति -यितुं) or विख्या, in caus. (-ख्यापयति -यितुं), रहस्यभेदं कृ.

BABBLE or BABBLING, *s.* जल्पः, जल्पनं, वावदूकता, बालवचनं, आख्यायिका.

BABBLER, *s.* वाचालः, जल्पकः, उपजल्पी *m.* (न्), वाचाटः, जल्पाकः, वावदूकः.

BABE, BABY, *s.* बालः -ला, बालकः, शिशुः *m.*, शावकः.—(At the breast) स्तनन्धयः, स्तनपाः *m.* (पा), क्षीरपः.

BABEL, *s.* (Confusion) सङ्कटः, साङ्कर्यं, तुमुलं, कोलाहलः, कालकीलः.

BABOON, *s.* वानरः, कपिः, मर्कटः, प्लवङ्गः, प्लवगः, शाखामृगः, वलीमुखः.

BABYHOOD, *s.* बाल्यं, बालकत्वं, बालभावः, शैशवं.

BABYISH, *a.* बालकीयः -या -यं, बालिशः -शा -शं, बालेयः -यी -यं.

BACCHANALIAN, *s.* पानरतः, पानप्रसक्तः, मद्यपीतः, मद्यप्रियः मध्वीतिरतः.

BACHELOR, *s.* (A man unmarried) अविवाहितः, अकृतदारः, अकृतदारसङ्ग्रहः, अकृतविवाहः.—(One who takes his first degree) विद्यालये पूर्वपदप्राप्तः.

BACK, *s.* पृष्ठं, पिच्छापारं, 'to turn the back, avert the face,' पराङ्मुखः -खी -खं or पराधीनः -ना -नं भू, 'to turn back, away from,' अपवृत् (c. 1. -वर्त्तते वर्त्तितुं), विनिवृत्, अपावृत, निवृत्त, 'turned back,' विपरिवर्त्तितः -ता -तं; 'at one's back, behind the back,' पृष्ठतस्, 'behind one's back in one's absence,' परोक्षे (The hinder part) पृष्ठदेशः, पश्चाद्देशः, पश्चाद्भागः, पृष्ठं, नितम्बः 'the back of the hand,' करपृष्ठं

BACK, *adv.* (To the place whence one came) commonly expressed by प्रति prefixed, as, 'to go back,' प्रतिगम, 'come back,' प्रत्यावृत्तः -त्ता -त्तं, पुनरागतः -ता -तं, 'brought back,' प्रत्यानीतः -ता -तं —(Backward from the present station) expressed by परा, प्रति, or पश्चात् prefixed, as, 'to beat back, पराहन्, प्रत्याहन्.—(Again) expressed by पुनर्, प्रति, or अनु prefixed, as, 'to give back,' प्रतिदा.—(Kept back) निगृहीतः -ता -तं, निवारितः -ता -तं; 'in the back-ground,' दूरस्थः -स्था -स्थं, निभृतः.

To BACK, *v. a.* (To mount a horse) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, समारुह्.—(To support, justify) रक्ष् (c. 1. रक्षति, रक्षितुं), अभिरक्ष्, संरक्ष्; पक्षपातं कृ, उपकृ, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(To impel backwards) परानुद् (c. 6. -नुदति -नोत्तुं), विपरीतं प्रयुज्.

To BACK, *v. n.* (To go backwards) अपक्रम् (c. 1. -क्रामति, c. 4. -क्राम्यति, -क्रमितुं), अपक्रम्, परावृत् (c. 1. -वर्त्तते -वर्त्तितुं).

To BACKBITE, *v. a.* पृष्ठमांसं खाद् (c. 1. खादति, खादितुं).—(To slander) परिवद् (c. 1. -वदति -ते -वदितुं), अपवद्.

BACKBITER, *s.* पृष्ठमांसादः, परोक्षे अपवादकः, परिवादकः, पिशुनः.

BACKBITING, *s.* परिवादः, अपवादः, पिशुनवाक्यं.

BACKBONE, *s.* कशेरुका, पृष्ठवंशः, पृष्ठास्थि *n.*, रीढकः.

BACKDOOR, *s.* पक्षद्वारं, अन्तर्द्वारं, उपद्वारं, प्रच्छन्नं, पक्षकः, खड्किका.

BACKGAMMON, *s.* चर्म्मपट्टिकाक्रीडा.—(Backgammon-board) चर्म्मपट्टिका, अष्टापदं, पाशः.

BACKROOM, *s.* अन्तर्गृहं, अन्तःशाला, उपरोधकं, उपशाला.

BACKSIDE, *s.* (The hinder part of any thing) पृष्ठदेशः, पश्चाद्देशः, पश्चाद्भागः, अधोदेशः.—(The hinder part of any animal) नितम्बः, पृष्ठं.

To BACKSLIDE, *v. n.* स्वधर्म्मात् परिभ्रंश् (c. 4. -भ्रश्यति -भ्रंशितुं) or च्यु (c. 1. च्यवते, च्योतुं), स्वधर्म्मं त्यज् (c. 1. त्यजति, त्यक्तुं).

BACKSLIDER, *s.* धर्म्मच्युतः, धर्म्मभ्रष्टः, स्वधर्म्मत्यागी *m.* (न्), उन्मार्गगामी *m.* (न्), अन्यशास्त्रकः

BACKSTAIRS, *s.* उपसोपानं, अन्तःसोपानं, पक्षसोपानं, प्रच्छन्नसोपानं.

BACKWARD or BACKWARDS, *adv.* Expressed by परा or प्रति prefixed, पश्चात्, प्रतीपं, विपरीतं, अपकृष्टं; 'to walk backwards and forwards,' गतागतानि or प्रतिगतागतं or गमनागमनं or यातायातं कृ.

BACKWARD, *a.* (Unwilling) प्रतीपः -पा -पं, अनिच्छुः -च्छुः -च्छु, असम्मतः -ता -तं, अनिच्छकः -का -कं —(Sluggish) मन्दः -न्दा -न्दं, अलसः -सा -सं, विलम्बी -म्बिनी -म्बि (न्) —(Dull of apprehension) मन्दमतिः -तिः -ति (Late after its time) अतीतकालः -ला -लं, अतिक्रान्तकालः -ला -लं, दीर्घकालीनः -ना -नं, दीर्घपक्कः -क्का -क्कं, दीर्घपक्कशीलः -ला -लं.

BACKWARDNESS, *s.* (Unwillingness) अनिच्छा, अस्वीकारः, असम्मतिः *f.* —(Sluggishness) आलस्यं, मान्द्यं, विलम्बत्वं —(Dulness) मन्दमतिता — (Lateness) दीर्घकालीनता, अतीतकालत्वं, दीर्घता, दीर्घपक्कता.

BACON, *s.* वल्लूरं, शूकरस्य शुष्कमांसं.

BAD, *a.* (Vicious, corrupt) पापः -पा -पं, दुष्टः -ष्टा -ष्टं, अधमः -मा -मं, नीचः -चा -चं, खलः -ला -लं, कुत्सितः -ता -तं, कदर्य्यः -र्य्या -र्य्यं (Not good) अभद्रः -द्रा -द्रं, असाधुः -धुः -धु, अधार्म्मिकः -की -कं, असारः -रा -रं, असन् -सती -सत् (त्) (Worthless) निर्गुणः -णा -णं.—(Hurtful, unwholesome) हिंस्रः -स्रा -स्रं, अहितः -ता -तं, अपथ्यः -थ्या -थ्यं, रुजाकरः -रा -रं. (Sick) रोगी -गिणी -गि (न्), व्याधितः -ता -तं (Sick of) आतुरः -रा -रं, आर्त्तः -र्त्ता -र्त्तं (Unfortunate) विपन्नः -न्ना -न्नं, अभागः -गा -गं 'Bad,' as a general word, is often expressed by दुर्, कु, कत or sometimes by वि or अप prefixed, as, 'a bad road, दुरध्वा, कुपथं, कदध्वा *m.* (न्), विमार्गः, 'a bad man, दुर्जनः, दुराचारः, 'bad weather,' दुर्द्दिनं, 'bad food,' कदन्नं, 'bad thing,' कद्रव्यं 'bad conduct,' दुर्नयः, कुकर्म्म *n.* (न्), अपकर्म्म *n.* (न्), 'bad policy,' अनीतिः *f.*

BADGE, *s.* चिह्नं, लिङ्गं, व्यञ्जनं, लक्षणं — (Badge of rank) पदचिह्नं, पदसूचकं चिह्नं.

BADGER, *s.* गर्त्तवासी जन्तुविशेषः.

BADINAGE, *s.* लघुवाक्यं, लघूक्तिः *f.*, हास्यवाक्यं, नर्म्म *n.* (न्), ठट्ठरी

BADLY, *adv.* दुष्टु, दुष्टं, अभद्रं. Often expressed by दुर्, कु, अप prefixed; as, 'badly managed,' दुर्नीतः -ता -तं; 'badly shaped,' कुरूपः -पी -पं, 'badly-behaved,' दुःशीलः, कुशीलः, 'badly done,' दुष्कृतः -ता -तं, अपकृतः -ता -तं.

BADNESS, *s.* दुष्टता, दौष्ट्यं, निर्गुणत्वं, नीचता, अभद्रता, कदर्य्यत्वं (Of character) दुरात्मता, दुराचारत्वं.

To BAFFLE, *v. a.* (To make ineffectual) मोघीकृ, निष्फल (nom निष्फलयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), व्यर्थीकृ, प्रतिहन् (c. 2. -हन्ति -हन्तुं), मुधा कृ, वृथा कृ.—(To defeat) पराभू (c. 1 -भवति -भवितुं), पराजि (c. 1. -जयति -ते -जेतुं).

BAFFLED, *p. p.* प्रतिहतः -ता -तं, मोघाशः -शा -शं, भग्नोद्यमः -ता -तं, प्रति-

बद्धः -द्धा -द्धं, भग्नोद्यमः -मा -मं, खण्डितः -ता -तं, खण्डिताशंसः -सा -सं, पराजितः -ता -तं.

Bag, *s.* शाणपुटः -टं, स्यूतः, स्योतः, कोषः, आधारः.

To bag, *v. a.* (To put into a bag) शाणपुटे or स्यूते or कोषे निधा (c. 3. -दधाति -धातुं) or निविश् in caus. (-वेशयति -यितुं).—(To make tumid) श्वि in caus. (श्वाययति -यितुं).

To bag, *v. n.* (To swell out like a bag) स्यूतवत् लम्ब् (c. 1. लम्बते, लम्बितुं), प्रलम्ब्, or पॄ in pass. (पूर्य्यते), or श्वि (c. 1. श्वयति, श्वयितुं).

Bagatelle, *s.* स्वल्पविषयः, अल्पमूल्यद्रव्यं, क्षुद्रद्रव्यं, क्षुद्रविषयः.

Baggage, *s.* (The furniture of an army) सामग्री -ग्र्यं, भारः, उपकरणं, परिच्छदः.—(A worthless woman) पुंश्चली *f.*, वेश्या, बन्धकी.

Bagnio, *s.* (A house for bathing) स्नानागारं, गात्रमार्ज्जनशाला.—(A brothel) वेश्यालयः.

Bail, *s.* (Security for one's appearance) दर्शनप्रतिभूः *m.*, दर्शनप्रतिभाव्यं, प्रतिनिधिः *m.*, प्रतिभूः *m.*, प्रातिभाव्यं, पारिभाव्यं, लग्नकः, न्यासः, अन्वाधिः *m.*, बन्धकः, भूतमलकुला.—(The person who gives the security) प्रतिनिधिः *m.*, प्रतिभूः *m.*, लग्नकदायी *m.* (न्).

To bail, *v. a.* (To give bail for another) प्रतिनिधिः or प्रतिभूः भू, लग्नकं दा (c. 3. ददाति, दातुं).

Bailable, *a.* यो लग्नकं दत्त्वा मोक्तुं शक्यते or शक्यः.

Bailiff, *s.* (An officer who arrests) आसेद्धा *m.* (द्धृ), आसेधकर्त्ता *m.* (र्तृ), ग्राहकः, यष्टिधरः, दण्डनायकः.—(A steward) कार्य्याधीशः.

Bailment, *s.* आक्षेपः.

Bairn, *s.* बालः, बालकः, शिशुः *m.*

To bait, *v. a.* (To put meat on a hook to tempt animals) मत्स्यादिग्रहणार्थं बडिशे आमिषादि निधा (c. 3. -दधाति -धातुं), or निविश् in caus. (-वेशयति -यितुं).—(To give food to horses on the road) मध्ययाने यवादिना वाहनानि भुज् in caus. (भोजयति -यितुं), यानश्रान्तानि वाहनानि विश्रम् in caus. (-श्रामयति -यितुं).—(To incite dogs to attack a bull) वृषभम् आक्रमितुं कुक्कुरान् प्रचुद् in caus. (-चोदयति -यितुं).

To bait, *v. n.* (To stop on the road for refreshment) मध्ययाने भोजनार्थं विश्रम् (c. 4. -श्राम्यति -श्रमितुं).

Bait, *s.* मत्स्यग्रहणार्थं यद् आमिषं बडिशे निधीयते.—(Temptation) प्रलोभनं.

Baize, *s.* शाणं, कम्बलः, ऊर्णामयो वस्त्रविशेषः.

To bake, *v. a.* आपाके or कन्दौ or चुल्लौ पच् (c. 1. पचति, पक्तुं) or तप् (c. 1. तपति, तप्तुं, c. 10. तापयति -यितुं) or भ्रस्ज् (c. 6. भृज्जति, भ्रष्टुं), कान्दवीकृ.

To bake, *v. n.* (To be heated) तप् in pass. (तप्यते), पच् in pass. (पच्यते).

Baked, *p. p.* कान्दवः -वा -वं, उख्यः -ख्या -ख्यं, कन्दुपक्वः -क्वा -क्वं.

Bakehouse, *s.* आपाकः, कन्दुः *m. f.*, पूपागारं, पूपशाला.

Bake-meats, *s.* कान्दवं, कान्दवान्नं, उख्यं, पक्वान्नं, आपूपिकं, शाष्कुलिकं.

Baker, *s.* आपूपिकः, कान्दविकः, मोदककृत्, भक्ष्यकारः.

Baking, *s.* कन्दुपचनं, चुल्लिपचनं, पचनं, तपनं, तापनं.

Balance, *s.* (Scales) तुला, मापनः, मापनदण्डः, तौलं, तौलदण्डः.—(The act of comparing two things in the mind) विवेचनं, विकल्पनं, विगणनं, उपमानं.—(That which is wanting to make two parts of an account even) अवशेषः, शेषं, शेषभागः, अधिकांशः, न्यूनांशः.—(Equipoise) तुल्यता, भारतुल्यता.

To balance, *v. a.* (To weigh in a balance) तुल् (nom. तुलयति -यितुं), तूल् (c. 10. तूलयति).—(In the mind) विक्लृप् in caus. (-कल्पयति -यितुं), विगण् (c. 10. -गणयति -यितुं).—(To equipoise) समीकृ, तुल्यभारं -रां -रं कृ.—(To regulate an account) शुध् in caus. (शोधयति -यितुं), समीकृ, अपनयनं कृ, विगणनं कृ.

To balance, *v. n.* (To hesitate, fluctuate) दोल (nom. दोलायते -यितुं), विक्लृप् (c. 1. -कल्पते -कल्पितुं).—(To be equipollent) समीभू, तुल्यीभू.

Balanced, *p. p.* तुलितः -ता -तं, समीकृतः -ता -तं, तुल्यभारः -रा -रं.—(As an account) शोधितः -ता -तं, अपनीतः -ता -तं, विगणितः -ता -तं.

Balaráma, *s.* (A celebrated demigod, half-brother to Krishńa and the third of the Rámas; and considered to be the eighth avatár of Vishńu) बलरामः, बलदेवः, रामः.—(As elder brother of Krishńa) अच्युताग्रजः.—(As armed with a plough-share) हलायुधः, हलभृत् *m.*, हली *m.* (न्), सीरपाणिः सङ्कर्षणः.—(As carrying a pestle-like club) मुसली *m.* (न्).—(As having the palm for a banner) तालध्वजः, तालाङ्कः.—(As diverting the stream of the Yamuná) कालिन्दीभेदनः.—(As dressed in blue) नीलाम्बरः.—(As husband of Revatí) रेवतीरमणः.—(As killer of a certain demon) प्रलम्बघ्नः.—(As guardian of Káma) कामपालः.

Balcony, *s.* वरण्डः, इन्द्रकोषः, प्रग्रीवः -वं, निष्काशः, वितर्द्धिः *f.* or -र्द्धी.

Bald, *a.* (Without hair) मुण्डः -ण्डा -ण्डं, मुण्डितः -ता -तं, अकेशः -शा -शं, विकेशी -शी -शि, केशहीनः -ना -नं.—(Without natural covering) अनावृतः -ता -तं, विवृतः -ता -तं, नग्नः -ग्ना -ग्नं.—(Unadorned, inelegant) असंस्कृतः -ता -तं, अपरिष्कृतः -ता -तं, असभ्यः -भ्या -भ्यं.—(As style) अलङ्कारहीनः -ना -नं, अप्रसन्नः -न्ना -न्नं.

Balderdash, *s.* (Any thing jumbled together) प्रकीर्णकं.—(Nonsense) अनर्थकवाक्यं, आलस्यवचनं, वृथाकथा.

Baldness, *s.* मौण्ड्यं, मुण्डता, अकेशत्वं.—(Inelegance) असभ्यता.

Bald-pated, *a.* मुण्डितशिराः -राः -रः (स्), मुण्डमस्तकः -का -कं, नग्नमस्तकः -का -कं.

Baldrick, *s.* (A girdle) मेखला, कक्ष्या.—(The zodiac) राशिचक्रं, राशिमण्डलं, लग्नमण्डलं, ज्योतिश्चक्रं.

Bale, *s.* भाण्डकं, भाण्डं, द्रव्यकूर्चं, पोटलिका, द्रव्यपोटली, भारः.

To bale, *v. a.* (To make up into a bale) भाण्डं कृ, द्रव्याणि कूर्चीकृ.—(To bale out water) अञ्जलिना or द्रोण्या जलम् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or उत्तुल् (c. 10. -तोलयति -यितुं).

Baleful, *a.* (Full of misery) क्लेशी -शिनी -शि (न्), दुःखी -खिनी -खि (न्), सशोकः -का -कं, शोकान्वितः -ता -तं.—(Destructive) नाशी -शिनी -शि (न्), आत्ययिकः -की -कं, प्राणहरः -रा -रं, क्लेशकः -का -कं, हिंस्रः -स्रा -स्रं.

Balefully, *adv.* सशोकं, सक्लेशं, दुःखेन, यथा हिंसा जायते तथा.

Baling-vessel, *s.* सेकपात्रं, सेचनं, सेक्तृ, अञ्जलि *n.*, अञ्जलिः *f.*, वसुसेचनी, द्रोणिः *f.*, -णी, अवग्राहः, काष्ठकुद्दालः, काष्ठाम्बुवाहिनी *f.*

Balk, *s.* (A ridge of land left unploughed) सेतुः *m.*

To balk *v. a.* (To frustrate, disappoint) खण्ड् (c. 10. खण्डयति -यितुं), प्रतिहन् (c. 2. -हन्ति -हन्तुं), वृथा कृ, मुधा कृ, भग्नाशं -शां -शं कृ, मोघाशं -शां -शं कृ, व्यर्थीकृ, मोघीकृ, भञ्ज् in caus. (भञ्जयति -यितुं).

Balked, *p. p.* प्रतिहतः -ता -तं, भग्नोद्यमः -मा -मं, खण्डितः -ता -तं, वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं.

Balkh, *s.* (The country) वाह्लीकः.

Ball, *s.* (Any thing round) गोलः -लं, मण्डलं, परिमण्डलं, गोलकः, वर्त्तुलः, पिण्डः, पिण्डं.—(The ball of the earth) भूगोलः, भूमण्डलं.—(For playing) कन्दुकः, गुडः, गेण्डुः *m.*, गेण्डुकः, गिरिः *m.*—(A dancing party) सहनर्त्तनं, नृत्यक्रीडा.—(A ball of thread) सूत्रकोषं.—(Ball of the eye) अक्षिगोलः.—(Ball-room) नृत्यस्थानं, रङ्गशाला, वातकर्णी *f.*

To ball, *v. a.* (To make into a ball) वर्त्तुलीकृ, गोलीकृ.

Ballad, *s.* (A song) गीतं, गानं, गीतिः *f.*, सङ्गीतं.

Ballad-singer, *s.* गायकः, गाथाकारः, गायनः, गाता *m.* (तृ).

Ballast, *s.* नाव अधोभागे स्थापितो भारः. पोतस्थिरीकरणाय तदधोभागे यत् प्रस्तरवालुकादि द्रव्यं निवेश्यते, स्थैर्यद्रव्यं.

To ballast, *v. a.* नौकायाः स्थिरीकरणाय तदधोभागे भारं स्था in caus. (स्थापयति -यितुं), स्थिरीकृ.

Balloon, *s.* आकाशयानं, व्योमयानं, आकाशवर्त्मना गमनार्थं विमानं.

Ballot, *s.* (A ball or ticket used in voting) गुटिका, गुलिका, काकिनी *f.*, कपर्दकः, स्वीकृतास्वीकृतचिह्नं.—(The act of voting by ballot) गुटिकां निभृतं पातयित्वा स्वीकृतास्वीकृतज्ञापनं or मतामतसूचनं.

To ballot, *v. n.* स्वीकृतास्वीकृतज्ञापनाय गुटिकां निभृतं पत् in caus. (पातयति -यितुं).

Balm, *s.* (The juice of a shrub) गुग्गुलुः *m.*—(That which alleviates) प्रशमनं, शान्तिः *f.*, उपशान्तिः *f.*, वेदनाशान्तिः *f.*

Balmy, *a.* (Having the qualities of balm) पूर्व्वोक्तवृक्षरसोपेतः -ता -तं.—(Soothing) उपशमकः -का -कं, उपशायी -यिनी -यि (न्).—(Fragrant) सौगन्धिकः -की -कं, सुरभिः -भिः -भि.

Balsam, *s.* (Ointment, unguent) विलेपः, विलेपनं, उपदेहः, अभ्यञ्जनं.

Balsamic, *a.* (Unctuous) स्निग्धः -ग्धा -ग्धं, मेदुरः -रा -रं, म्रक्षितः -ता -तं, चिक्कणः -णा -णं, स्नेही -हिनी -हि (न्), मृदुः -द्वी -दु.

Balustrade, *s.* पङ्क्तिक्रमेण रचितः क्षुद्रस्तम्भसमूहः, क्षुद्रस्तम्भश्रेणी.

Bamboo, *s.* वेणुः, वंशः, वेतसः, त्वक्सारः, शतपर्वा *m.* (न्), मस्करः, तृणध्वजः, यवफलः, तेजनः, कर्म्मारः.—(When rattling) कीचकः.

To bamboozle, *v. a.* (To cheat) वञ्च् in caus. (वञ्चयते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

Bamboozled, *p. p.* वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं.

To **call**, *v. a.* (Name, denominate) अभिधा (c. 3. -दधाति -धातुं), आख्या (c. 2. -ख्याति -ख्यातुं), प्रचक्ष् (c. 2. -चष्टे), कृत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्, नाम कृ; 'they called his name Rama,' तस्य नाम राम इति चक्रुः; 'to call upon by name,' सम्बोधनं कृ; 'to be called,' अभिधा in pass. (-धीयते), ख्या in pass. (ख्यायते).—(Summon) आह्वे (c. 1. -ह्वयति -ह्वातुं).—(Invite) निमन्त्र् (c. 10. -मन्त्रयति -यितुं), आमन्त्र्.—(Convoke) समाह्वे, आह्वे, सङ्घुट् (c. 10. -घट्टयति -यितुं).—(Appeal to, invoke) ह्वे, आह्वे, उपह्वे.—(Call forth, put in action, excite) प्रोत्सह् in caus. (-साहयति -यितुं), उद्युज् in caus. (-योजयति -यितुं), चेष्ट् in caus. (चेष्टयति -यितुं).—(Call back, revoke) निवृत् in caus. (-वर्त्तयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं) प्रत्यादिश् (c. 6. -दिशति -देष्टुं).—(Call for, require) अर्ह् (c. 1. अर्हति अर्हितुं), प्रार्थ् (c. 10. -अर्थयते -यितुं), याच् (c. 1. याचति, याचितुं) 'this matter calls for deliberation,' अत्र विचारेण प्रयोजनं.—(Call in, as coin) मुद्राप्रचलनं निवृत्, मुद्राप्रचारार्थं निषृ in caus. (-वारयति -यितुं).—(Call over names) प्रत्यक्षाप्रत्यक्षनिश्चयनार्थं नामानि एकैकश उदाहृ (c. 1. -हरति -हर्त्तुं) or परिसंख्या or वच् in caus. (वाचयति -यितुं).—(Call out, exclaim) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं) प्रक्रुश्, विक्रुश्, उच्चैःस्वरे घुष् (c. 10. घोषयति -यितुं), उद्घुष्, चित्कारं कृ, चीत्कृ.—(Call out, challenge) आह्वे, उपाह्वे.—(Call to witness) साक्षिणं कृ or आह्वे.—(Call to mind) स्मृ (c. 1. स्मरति, स्मर्त्तुं).—(Call to account) अनुयुज् (c. 7. -युङ्क्ते -योक्तुं), अभियुज्, अनुसन्धा (c. 3. -दधाति -धातुं), निबद्धं -द्धा -द्धं कृ.—(Call up, from sleep) जागृ in caus. (जागरयति -यितुं), प्रबुध् in caus. (-बोधयति -यितुं).—(Address) आमन्त्र्, आलप् (c. 1. -लपति -लपितुं); 'by name,' नाम ग्रह (c. 9. गृह्णाति, ग्रहीतुं).—(Call upon, implore) प्रार्थ् (c. 10. -अर्थयते -यितुं), विनयेन प्रार्थ्.—(To visit) अभिगम् (c. 1. -गच्छति -गन्तुं), अभ्यागम्, अभिसृ in caus. (-सारयति -यितुं).

Called, *p. p.* (Named) प्रोक्तः -क्ता -क्तं, अभिहितः -ता -तं, उदाहृतः -ता -तं, परिकीर्त्तितः -ता -तं, स्मृतः -ता -तं, शब्दितः -ता -तं, संज्ञितः -ता -तं. The following are used in composition only: नामा -मा -म अभिधानः -ना -नं, आख्यः -ख्या -ख्यं, आह्वः -ह्वा -ह्वं, आह्वयः -या -यं नामधेयः -या -यं; thus, 'a lake called blue-lotus,' नीलोत्पलनामा or नीलोत्पलाभिधानं सरः.—(Summoned, invited) आहूतः -ता -तं निमन्त्रितः -ता -तं.

Calling, *s.* (Inviting) आह्वानं, हूतिः *f.*, हवः, निमन्त्रणं.—(Addressing by name) सम्बोधनं, नामग्रहः.—(Giving name) नामकरणं.—(Profession, employment) वृत्तिः *f.*, जीविका, उपजीविका, व्यापारः, व्यवसायः.—(Divine vocation) प्रत्यादेशः, आकाशवाणी.

Callosity, *s.* (Induration of the skin) कदरः, किणः, त्वक्काठिन्यं, त्वग्घनता, त्वग्दृढता, तनुकूपघनता.

Callous, *a.* कठिनः -ना -नं, दृढः -ढा -ढं, घनः -ना -नं, घनीकृतः -ता -तं.—(Hard-hearted) कठिनहृदयः -या -यं.—(Insensible, unfeeling) चिचेतनः -ना -नं, कर्कशः -शा -शं, निर्दयः -या -यं, कृपाहीनः -ना -नं.—(Shameless) निर्लज्जः -ज्जा -ज्जं.

Callously, *adv.* काठिन्येन, सकार्कश्यं, दार्ढ्येन, निर्दयं, लज्जां विना.

Callousness, *s.* (Hardness) कठिनता, काठिन्यं, कार्कश्यं, दृढता, दार्ढ्यं, द्रढिमा *m.* (न्).—(Insensibility, want of feeling) अचैतन्यं हृदयकाठिन्यं, निर्दयता, निर्लज्जता.

Callow, *a.* पक्षहीनः -ना -नं, अजातपक्षः -क्षा -क्षं, अजातपर्णः -र्णी -र्णं, अनुत्पन्नपक्षः -क्षा -क्षं, गरुद्रहितः -ता -तं, नग्नदेहः -हा -हं, अच्छादहीनः -ना -नं.

Calm, *s.* (Freedom from wind and waves) निर्वातः, वायुनिवृत्तिः *f.* निर्वेगता, निस्तरङ्गता.—(Quiet, repose) शान्तिः *f.*, शमः, प्रशान्तिः *f.*

विश्रामः, विश्रान्तिः *f.*, प्रसन्नता, प्रसादः.

CALM, *a.* (Free from wind and waves) निर्वातः -ता -तं, गतानिलः -ला -लं, निवृत्तवायुः -युः -यु, निर्वेगः -गा -गं, निस्तरङ्गः -ङ्गा -ङ्गं.—(Quiet, composed in mind) शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, विश्रान्तः -न्ता -न्तं, प्रसन्नः -न्ना -न्नं, अव्याकुलः -ला -लं, निराकुलः -ला -लं, समाहितः -ता -तं, प्रशान्तात्मा -त्मा -त्म (न्), स्थिरमतिः -तिः -ति, शान्तचेताः -ताः -तः (स्), अन्तर्वेगहीनः -ना -नं, असम्भ्रमः -मा -मं, अनुग्रः -ग्रा -ग्रं.—(In countenance) प्रसन्नमुखी -खिनी -खि (न्).

To CALM, *v. a.* शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्, तुष् in caus. (तोषयति -यितुं), परितुष्, प्रसद् in caus. (-सादयति -यितुं), अभिप्रसद्, शान्त्व् or सान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्; 'to be calm,' शम् (c. 4. शाम्यति, शमितुं), प्रसद् (c. 1. 6. -सीदति -सत्तुं), सम्प्रसद्; 'the sea became calm,' प्रससाद सागरः; 'my mind is calm,' अन्तरात्मा प्रसीदति.

CALMED, *p. p.* शमितः -ता -तं, प्रशमितः -ता -तं, प्रसादितः -ता -तं.

CALMER, *s.* शमकः, शामयिता *m.* (तृ), शान्तिकरः, शामिदः, तुष्टिकरः.

CALMLY, *adv.* शान्त्या, शान्तं, मनःप्रसादेन, असम्भ्रमं, प्रशान्तचेतसा.

CALMNESS, *s.* शान्तता, प्रशान्तता, शान्तिः *f.*, विश्रान्तता, प्रसादः, निराकुलता, अव्याकुलता, स्थिरता, असम्भ्रमः.—(Of the sea) निर्वातत्वं.

CALOMEL, *s.* पट्कृत्वः शोधितः or ऊर्ध्वपातितः पारदः स च चिकित्सकैर् नानाव्याधिप्रतिकाराय रोगार्त्तेषु प्रयुज्यते.

CALORIFIC, *a.* तापकरः -री -रं, तापजनकः -का -कं, निदाघकरः -री -रं.

CALOTTE, *s.* धर्म्माचार्य्यैर् भृतं शरावाकृति मस्तकाभरणं or शिरोवेष्टनं.

CALTROP, *s.* विग्रहसमये शत्रोर् अश्वखुरवेधनार्थं रणभूमौ न्यस्तं शूलत्रययुक्तं लोहयन्त्रं.—(The plant) गोक्षुरः -रकः, गोखुरः -रकः.

To CALVE, *v. n.* वत्सं or तर्णं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् in caus. (जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं); 'a cow that calves often,' बहुसूतिः *f.*, चिरसूता, वष्कयणी; 'cows calve every year,' प्रतिवर्षं प्रसूयन्ते गावः; 'a cow that has lately calved,' नवसूतिका; 'calving of a cow,' गोप्रसवः.

To CALUMNIATE, *v. a.* परिवद् (c. 1. -वदति -वदितुं), अपवद्, निन्द् (c. 1. निन्दति, निन्दितुं), मिथ्या अभियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), अभिशप् (c. 1. -शपति -शप्तुं), अभिशंस् (c. 1. -शंसति -शंसितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षर् in caus. (-क्षारयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), परगुणान् अपवद्.

CALUMNIATED, *p. p.* अभिशस्तः -स्ता -स्तं, मिथ्याभिशस्तः -स्ता -स्तं, मिथ्याभियुक्तः -क्ता -क्तं, आक्षारितः -ता -तं, क्षारितः -ता -तं, कलङ्कितः -ता -तं.

CALUMNIATOR, *s.* परिवादी *m.* (न्) -दकः, पिशुनः, अभिशंसकः, अभिशापकः, मिथ्याभियोगी *m.* (न्), अभ्यसूयकः, निन्दकः, गुणघाती *m.* (न्), गुणापवादकः, कलङ्ककरः, कुवादः.

CALUMNIOUS, *a.* पिशुनः -ना -नं, असूयकः -का -कं, अभ्यसूयकः -का -कं, वाग्दुष्टः -ष्टा -ष्टं, कलङ्ककरः -री -रं, कलङ्कमयः -यी -यं, कलङ्की -ङ्किनी -ङ्कि (न्).

CALUMNIOUSLY, *adv.* परिवादेन, सापवादं, गुणापवादेन, असूयया, सकलङ्कं, पैशुन्येन, पिशुनवचनेन, निन्दापूर्व्वकं, सासूयं.

CALUMNY, *s.* परिवादः, अपवादः, असूया *f.* -यनं, असूयुः *m.*, अभ्यसूया, पिशुनवचनं, पिशुनवाक्यं, पैशुन्यं, अभिशंसनं, मिथ्याभिशंसनं, अभिशपनं, अभिशापः, आक्षारः -रणं, कलङ्कः, गुणापवादः, वाग्दोषः, मिथ्याभियोगः, निन्दा, परदोषवादः, अलीकप्रवादः.

CALX, *s.* चूर्णं, भस्म *n.* (न्).—(Of brass) रीतिपुष्पं, रीतिका, पुष्पकेतु *n.*, पौष्पकं, कुसुमाञ्जनं.

CALYCLE, *s.* क्षुद्रमुकुलं, क्षुद्रकुड्मलं, नवजालकं.

CAMADEVA, *s.* See KÁMADEVA.

CAMBIST, *s.* हुण्डिकापत्रक्रयविक्रयजीवी *m.* (न्).

CAMBRIC, *s.* अंशुकं, दुकूलं, कुलीनस्त्रीलोकेन भृतः सूक्ष्मक्षौमपटविशेषः.

CAMEL, *s.* उष्ट्रः, क्रमेलः, क्रमेलकः, महाङ्गः, मयः, वणिग्वहः, शरभः, द्विककुद् *m.*, दीर्घग्रीवः; 'a young camel,' करभः; 'a flock of camels,' औष्ट्रकं.

CAMELEON, *s.* सरटः, सरटुः *m.*, प्रतिसूर्य्यः, कृकलासः, कृकवाकुः *m.*

CAMELOPARD, *s.* तरक्षुरूपेण चित्रित उष्ट्रजातीयो दीर्घग्रीवो जन्तुप्रभेदः.

CAMELOT, *s.* (A stuff made of camel's hair, &c.) उष्ट्रलोमादिनिर्म्मितं वस्त्रं.

CAMEO, *s.* तक्षितुं शक्यो द्विवर्णप्रस्तरविशेषः, तक्षणीयत्वक्षमः वस्तुविशेषः.

CAMERA-OBSCURA, *s.* सान्धकारकुटीपटलनिवेशितश् चाक्षुषयन्त्रविशेषो यद्द्वारेण अन्तरस्थश्वेतफलके प्रतिबिम्बिता बहिःस्था विषया दृश्या भवन्ति.

CAMERATED, *a.* (Arched) तोरणाकारपटलयुक्तः -क्ता -क्तं, तोरणीकृतः -ता -तं.

CAMISADO, *s.* सौप्तिकं, सौप्तिकवधः, नैशाक्रमः, नैशाभिक्रमः, रात्रियुद्धं, रात्रौ or अन्धकारे अभियोगः or अवस्कन्दः.

CAMOYS or CAMOUS, *a.* (Flat, said of the nose) चिपिटः -टा -टं, चिकिनः -ना -नं, अवभ्रटः -टा -टं.

CAMP, *s.* वाहिनीनिवेशः, निवेशः, शिबिरं, कटकः, मन्दिरं, स्कन्धावारः, बलस्थितिः *f.*, पटकः; 'camp-follower,' सेनाचरः.

To CAMP, *v. n.* (To pitch a camp, to lodge in a camp) निविश् (c. 6. -विशते -वेष्टुं), सैन्यं निविश् in caus. (-वेशयति -यितुं), शिबिरे वस् (c. 1. वसति, वस्तुं).

CAMPAIGN, *s.* (A level open tract of ground) समभूमिः *f.*, समस्थलं, तरुगुल्मरहितः समो भूभागः, निर्वनभूमिः.—(The time for which any army keeps the field) अभिषेणनकालः, युद्धकालः, रणक्षेत्रे वर्त्तनकालः, वत्सरमध्ये यावत्कालपर्य्यन्तं सैन्या रणक्षेत्रे युद्धार्थं विचरन्ति.

CAMPANIFORM, *a.* (As a flower) घण्टाकारः -रा -रं, घण्टाकृतिः -तिः -ति.

CAMPESTRAL, *a.* क्षैत्रिकः -की -कं, कैदारः -री -रं, जाङ्गलः -ली -लं.

CAMPHOR or CAMPHIRE, *s.* कर्पूरः -रं, चन्द्रः, सोमः, सोमसंज्ञं, सिताभः, ताराभः, सुधांशुः *m.*, घनसारः, हिमबालुका.

CAMPHORATED, *a.* कर्पूरसंसृष्टः -ष्टा -ष्टं, कर्पूरीयः -या -यं.

CAN, *s.* कंसः, कांस्यः, धातुपकुम्भः, लौहकुडः, धातुमयपात्रं, भाजनं.

To CAN, *v. n.* (To be able) शक् (c. 5. शक्नोति, c. 4. शक्यति, शक्तुं), समर्थः -र्था -र्थं अस्, क्षम् (c. 1. क्षमते, क्षन्तुं), प्रभू (c. 1. -भवति -भवितुं).

CANAILLE, *s.* अन्त्याः *m. pl.*, अन्त्यजातीयाः *m. pl.*, अन्त्यजाः *m. pl.*, प्राकृतमनुष्याः *m. pl.*, अधमजातीयाः *m. pl.*, खलाः *m. pl.*, हीनवर्णाः *m. pl.*, पृथग्जनाः *m. pl.*, इतरजनाः *m. pl.*

CANAL, *s.* कुल्या, उपकुल्या, खातं, प्रणालः -ली, खनः, जलनिर्गमः, सारणिः *f.*, कृत्रिमा सरित्.

CANARY-BIRD, *s.* उत्तमालरुतविशिष्टः पीतवर्णो विजातीयः क्षुद्रपक्षी.

To CANCEL, *v. a.* (To annul, obliterate) लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अपमृज् (c. 2. -मार्ष्टि -मार्ष्टुं), निर्मृज्, व्यामृज्, परिमृज्, उद्धृ (c. 1. -हरति -हर्त्तुं).—(To mark a writing with cross lines) लिखितलोपसूचनार्थं व्यस्तरेखाद्वयेन पत्रं चिह्न् (c. 10. चिह्नयति -यितुं).

CANCELLATED, *p. p.* व्यस्तरेखाचिह्नितः -ता -तं.

CANCELLED, *p. p.* लुप्तः -प्ता -प्तं, उच्छिन्नः -न्ना -न्नं, व्यामृष्टः -ष्टा -ष्टं.

CANCER, *s.* (A sore) विद्रधिः *m.*, व्रणः, गलितव्रणं, नालीव्रणः, तनुव्रणः, उपदंशः, विस्फोटः, नाडी.—(The sign of the summer

solstice) कर्कटः, कर्कः, कर्कटराशिः *m.* ; 'stars in cancer,' पुष्यः, सिध्यः, तिष्यः.—(A crab-fish) कुलीरः, कर्कटः.

To CANCERATE, *v. n.* (To become a cancer) व्रणीभू, विद्रधीभू. व्रण (nom. व्रणायते).

CANCEROUS, *a.* विद्रधिगुणविशिष्टः -ष्टा -ष्टं, विद्रधीयः -या -यं.

CANCRINE, *a.* कर्कटीयः -या -यं, कुलीरसम्बन्धी -न्धिनी -न्धि (न्).

CANDENT, *a.* प्रचण्डः -ण्डा -ण्डं, अत्युष्णः -ष्णा -ष्णं, अत्यन्ततप्तः -प्ता -प्तं.

CANDID, *a.* (Fair, upright) सरलः -ला -लं, दक्षिणः -णा -णं, उदारः -रा -रं, अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, शुद्धमतिः -तिः -ति, ऋजुः -जुः -जु, अगूढभावः -वा -वं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं.—(Pure) शुचिः -चिः -चि, विमलः -ला -लं, निर्म्मलः -ला -लं.—(White) शुक्लः -क्ला -क्लं.

CANDIDATE, *s.* अर्थी *m.* (न्), प्रार्थकः, याचकः, प्रत्याशी *m.* (न्), पदान्वेषी *m.* (न्), अभियोक्ता *m.* (तृ).

CANDIDLY, *adv.* सरलं, दाक्षिण्येन, अजिह्मं, धर्म्मतस्, अमायया, निर्व्यलीकं, निर्व्याजं, कपटं विना, मायाव्यतिरेकेण.

CANDIDNESS, *s.* सरलता, सारल्यं, दाक्षिण्यं, शुचिता, ऋजुता, आर्जवं, अजिह्मता, निर्व्यलीकता, अमाया.

CANDIED, *a.* घनीभूतः -ता -तं.—(Sugar) खण्डमोदकः, माक्षिकशर्करा, उपला, दृढगात्रिका.

To CANDIFY, *v. a.* शुक्लीकृ, धवलीकृ, धवल (nom. धवलयति -यितुं).

CANDLE, *s.* दीपः -पकः, दीपिका, प्रदीपः, वर्त्ती, वर्त्तिः *f.*, दशाकर्षः, शिखी *m.* (न्), कज्जलध्वजः.

CANDLEHOLDER, *s.* दीपधारी *m.* (न्), दीपवाहः, प्रदीपभृत्, दीपहस्तः.

CANDLELIGHT, *s.* दीपद्युतिः *f.*, प्रदीपद्युतिः, दीपप्रभा, वर्त्तिदीप्तिः *f.*

CANDLEMAS, *s.* मरियमनामिकायाः कन्यायाः शुचित्वम् उद्दिश्य महोत्सवो यस्य सेवनकाले भूरिप्रदीपाः समिद्धा भवन्ति.

CANDLESTICK, *s.* दीपाधारः, दीपपादपः, प्रदीपपादपः, दीपवृक्षः, वर्त्याधारः, शिखातरुः *m.*, शिखावृक्षः, कौमुदीवृक्षः, कज्जलरोचकः.

CANDLESTUFF, *s.* दीपिकानिर्म्माणार्थं तैलवसादि द्रव्यं, वसा, तैलं, स्नेहः.

CANDOUR, *s.* सरलता, दाक्षिण्यं, शुचिता, अमाया, ऋजुता, सत्यता, सत्यवादित्वं, विमलात्मता, मनोनिर्म्मलत्वं, निर्व्यलीकता, औदार्य्यं, सुशीलता.

To CANDY, *v. a.* (To form into congelations) खण्डीकृ, खण्डमोदाकारं -रां -रं or उपलाकारं कृ, घनीकृ or सान्द्रीकृ or संहतीकृ, श्यै in caus. (श्यापयति -यितुं).

To CANDY, *v. n.* (To grow congealed) खण्डीभू, खण्डमोदकवत् घनीभू or सान्द्रीभू, उपलाकारः -रा -रं भू, श्यै (c. 1. श्यायते, श्यातुं).

CANDY, *s.* (Sugar) खण्डमोदकः, खण्डः, उपला, शुक्लोपला, माक्षिकशर्करा, शर्करा, दृढगात्रिका.

CANE, *s.* वेतसः, वेणुः *m.*, वेत्रः, वेत्रं, वंशः, कीचकः, वानीरः; 'made of cane,' वैणवः -वी -वं, वैत्रकः -की -कं, वैदलः -ली -लं; 'a worker in cane,' वेणुच्छेदनजीवी *m.* (न्), वैदलकारः; 'a blow with a cane,' वेत्राघातः, वेत्रेण आघातः.—(A stick) यष्टिः *m. f.*, दण्डः; 'a cane stick,' वैणवी यष्टिः.—(Sugar-cane) इक्षुः *m.*, इक्षुयष्टिः *m.*, इक्षुदण्डः.—(Cane-chair) वेत्रासनं.

To CANE, *v. a.* (To beat with a cane) दण्डेन or वेत्रेण or यष्टिना हन् (c. 2. हन्ति, हन्तुं) or तड् (c. 1. ताडयति -यितुं), वेत्राघातं कृ.

CANICULAR, *a.* (Belonging to the dog-star) कुक्कुराख्यनक्षत्रसम्बन्धी -न्धिनी -न्धि (न्).

CANINE, *a.* कुक्कुरसम्बन्धकः -का -कं, कुक्कुरीयः -या -यं, शौवः -वी -वं.

CANISTER, *s.* (A basket) डल्लकः, करण्डः.—(A tin-box) त्रापुषपात्रं.

CANKER, *s.* (A corroding sore) गलितक्षतं, विद्रधिः *m.*, नालीव्रणः.—(A worm that destroys fruits) फलनाशकः कीटः.—(Any thing that corrupts or corrodes) कलङ्कः, विषं, दूषकः, गरः.—(Corrosion, consuming) दूषणं, विलयः, विलयनं, क्षयः, नाशः, विनाशः.—(Virulence) विषालुता, सगरता.

To CANKER, *v. a.* (To corrupt, corrode) दुष् in caus. (दूषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), विली in caus. (-लाययति -यितुं), विनश् in caus. (-नाशयति -यितुं), क्षि in caus. (क्षययति -यितुं), मृ in caus. (मारयति -यितुं).

To CANKER, *v. n.* (To grow corrupt) दुष् (c. 4. दुष्यति, दोष्टुं), प्रदुष्, विली (c. 4. -लीयते -लेतुं), विषसम्पर्कात् or विषसंसर्गात् क्षी in pass. (क्षीयते), गल् (c. 1. गलति, गलितुं), विगल्.

CANKER-BIT, *a.* विषाक्तदन्तेन दष्टः -ष्टा -ष्टं or दंशितः -ता -तं.

CANKERED, *p. p.* कलङ्कितः -ता -तं, दूषितः -ता -तं, विषाक्तः -क्ता -क्तं, गरली -लिनी -लि (न्).—(In disposition) प्रतीपः -पा -पं, दुःशीलः -ला -लं, विषहृदयः -या -यं.

CANNABINE, *a.* शाणः -णी -णं, भाङ्गीनः -ना -नं, शणसूत्रमयः -यी -यं.

CANNIBAL, *s.* पुरुषादः, नृजग्धः, नरभुक् *m.* (ज्), मनुष्यभोजी *m.* (न्), अस्रपः, पिशिताशः, क्रव्याशी *m.* (न्), आममांसाशी *m.* (न्), राक्षसः.

CANNIBALISM, *s.* नृजग्धत्वं, क्रव्याशिता, मनुष्यभोजित्वं.

CANNON, *s.* अन्तरग्निबलेन लोहगुलिकाप्रक्षेपणं युद्धयन्त्रं, वृहद्गोलप्रक्षेपार्थं सुषिरयन्त्रं, गोलासनं, गुलिप्रक्षेपणी वृहल्लोहनाडिः *f.*

To CANNONADE, *v. a.* पूर्व्वोक्तेन यन्त्रेण मृद् (c. 9. मृद्नाति, मर्द्दितुं) or प्रमृद्.

CANNON-BALL, *s.* रणगुलिः *f.*, रणगोलः, गुलिः *f.* -ली, अयोगुडः, पूर्व्वोक्तवृहन्नाडेः प्रक्षेपणीयो लोहगोलकः, दूरवेधिनी गुलिका, आग्नेयास्त्रं.

CANNONEER, *s.* पूर्व्वोक्तयन्त्रेण मर्द्दी *m.* (न्) or विमर्द्दी, रणगुलिप्रक्षेपकः, रणगोलासः, आग्नेयास्त्रप्रक्षेपकः.

CANOE, *s.* वृक्षस्य खातस्कन्धनिर्म्मिता क्षुद्रनौका, लघुनौका.

CANON, *s.* (A rule, a law) विधिः *m.*, नियमः, सूत्रं, व्यवस्था, शास्त्रं, रीतिः *f.*—(Ecclesiastical law) पौरोहितधर्म्मशास्त्रं, धर्म्माध्यक्षसमाजेन व्यवस्थापिता धर्म्मसंहिता, पौरोहित्यसम्बन्धि स्मृतिशास्त्रं, याजकीयधर्म्मशास्त्रं.—(The received books of Holy Scripture) धर्म्ममूलं, धर्म्मपुस्तकसंहिता, धर्म्मनिदर्शनं.—(A dignitary of a Cathedral) महापूजाशालासम्बन्धीयमठे गुरुः or सभासद्, महाभजनप्रासादे प्रधानपुरोहितः, महापूजाशालायां मुख्यधर्म्माध्यापकः.

CANONESS, *s.* पूर्व्वोक्तपुरोहितव्यवहारानुसारिणी स्त्री or नारी.

CANONICAL, *a.* वैधिकः -की -कं, नैयमिकः -की -कं, शास्त्रीयः -या -यं, धर्म्मशास्त्रीयः -या -यं, रीत्यनुसारी -रिणी -रि (न्), व्यावहारिकः -की -कं, पौरोहितधर्म्मानुरूपः -पा -पं.

CANONICALLY, *adv.* विधिवत्, शास्त्रवत्, विधितस्, शास्त्रतस्, विधिपूर्व्वकं, रीतिपूर्व्वकं, नियमपूर्व्वकं, यथाविधि, यथाशास्त्रं, पौरोहितधर्म्मानुसारेण, याजकीयस्मृतिशास्त्रक्रमेण.

CANONICALS, *s. pl.* धर्म्माध्यापकलाक्षणिकं वस्त्रादि, पुरोहितवेशः, याजकवेशः.

CANONIST, *s.* पौरोहितधर्म्मशास्त्रज्ञः, पुरोहितव्यवहारपण्डितः, याजकीयधर्म्मशास्त्रज्ञः.

CANONIZATION, *s.* सिद्धानाम् मध्ये आरोपणं, अमुकसाधुजनः सिद्धिं प्राप्तवान् इति घोषणापत्रेण विज्ञापनं.

To CANONIZE, *v. a.* सिद्धलोकमध्ये आरुह् in caus. (-रोपयति -यितुं), अमुकसाधुजनः सिद्धानां मध्ये विगणनीय इति घोषणापत्रेण विज्ञा in caus. (-ज्ञापयति -यितुं).

CANONIZED, *p. p.* सिद्धलोकारोपितः -ता -तं, सिद्धानां मध्ये संख्यातः -ता -तं.

CANONRY OF CANONSHIP, *s.* पृष्ठोक्तपुरोहितसम्बन्धि पदं or वर्त्तनं.

CANOPIED, *p. p.* वितानीकृतः -ता -तं, वितानाच्छादितः -ता -तं.

CANOPY, *s.* वितानं -नकं, चन्द्रातपः, उल्लोचः, आच्छादनं, पिधानं, व्यवधा.

To CANOPY, *v. a.* वितानीकृ, चन्द्रातपेन आच्छद् (c. 10. -छादयति -यितुं).

CANOROUS, *a.* मुखरः -रा -रं, सुचारुस्वनः -ना -नं, स्वरयुक्तः -क्ता -क्तं.

CANT, *s.* (A technical form of speaking) परिभाषा, लाक्षणिकवाक्यं, कल्पितवाक्यं, कल्पितसंज्ञा, रचितवाक्यं.—(A corrupt dialect) भ्रष्टभाषा, अपभाषा, कुभाषा, अपशब्दः.—(A whining pretension to goodness) अन्तर्दुष्टस्य धर्म्मध्वजीकरणार्थं सद्वाक्यमात्रं, साधुवाङ्मात्रं, दम्भोक्तिः *f.*, दाम्भिकवचनं, धर्म्मोपदेशकवाक्यं, निःसत्यवाक्यं, वैलक्ष्यवचनं, वाक्छलं, छाद्मिकवचनं.

To CANT, *v. n.* (To talk in technical language) परिभाष् (c. 1. -भाषते -भाषितुं), लाक्षणिकवाक्यं or रचितवाक्यं वद् (c. 1. वदति, वदितुं).—(To speak hypocritically) धर्म्मध्वजीकरणार्थं or धर्म्मोपदेशमात्रात् सज्जन इव वद्, दम्भार्थं स्वव्यवहारविरुद्धं सद्वाक्यमात्रं वद्.

CANTATION, *s.* (The act of singing) गानं, गीतिः *f.*, गीतं, गानकरणं.

CANTEEN, *s.* सैन्यानां प्रस्थानकाले मद्यशुण्डादिधारणयोग्यं धातुमभाण्डं.

CANTER, *s.* (Pace of a horse) अर्द्धपुलायितं, अर्द्धवल्गितं, विक्रान्तिः *f.*—(A canting hypocrite) दम्भार्थं वादी *m.* (न्), वाङ्मात्रेण धार्म्मिकः, दाम्भिकः, छद्मतापसः, धर्म्मध्वजी *m.* (न्), सार्य्यलिङ्गी *m.* (न्), साधुम्मन्यः.

To CANTER, *v. n.* अर्द्धपुलायितेन or अर्द्धवल्गितेन चल् (c. 1. चलति, चलितुं).

CANTHARIDES, *s. pl.* त्वक्स्फोटोत्पादका विदेशीयमक्षिकाप्रभेदाः.

CANTHUS, *s.* (Corner of the eye) अपाङ्गः -ङ्गकं, नयनोपान्तः, नेत्रपर्य्यन्तः.

CANTICLE, *s.* उपगीतं, उपगानं, ईषद्गीतं, काव्यबन्धः.—(Book of the Bible) सुलेमान्नाम्ना राज्ञा रचितं धर्म्मग्रन्थानां मध्ये गणितं गीतं.

CANTLE OR CANTLET, *s.* (A piece) खण्डं, भिन्नं, भागः, विभागः, शकलं.

CANTO, *s.* अध्यायः, सर्गः, पर्व्व *n.* (न्), परिच्छेदः, विच्छेदः, स्कन्धः, खण्डः -ण्डं, उच्छ्वासः, काण्डः, परिवर्त्तः.

CANTON, *s.* मण्डलं, उपमण्डलं, चक्रं, भूप्रदेशः, भूमिभागः, भूभागः, देशः.

To CANTON, *v. n.* (To divide into parts) खण्डशस् or भागशस् or खण्डं खण्डं विभज् (c. 1. -भजति -भक्तुं) or परिकॢप् (c. 10. -कल्पयति -यितुं) or व्यंश् (c. 10. -अंशयति -यितुं).—(To canton a town for soldiers) नगरे स्वं स्वम् आवासं सैन्यानां कॢप् (c. 10. कल्पयति -यितुं).

CANTONMENT, *s.* सैन्यावासः, नगरे पृथक् पृथक् परिकल्पितं सैन्यनिवासस्थानं.—(Camp) कटकः, शिबिरं.

CANVASS, *s.* (A coarse cloth) शाणं, शणवस्त्रं, पटः, पटी, स्थूलपट्टं, स्थूलशाटिः *m.*—(Sails of a ship) वातवसनं.—(Solicitation upon an election) अमुकपदप्रेप्सया परसम्मतप्रार्थनं.

To CANVASS, *v. a.* (To sift, examine) परीक्ष् (c. 1. -ईक्षते -ईक्षितुं), निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं).—(To debate) विचर् in caus. (-चारयति -यितुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्.

To CANVASS, *v. n.* (To solicit votes) अमुकपदप्रेप्सया परेषां सम्मतं or आश्रयं or आग्रहं or अनुपालनं or संवर्द्धनं प्रार्थ् (c. 10. -अर्थयते -यितुं).

CANVASSER, *s.* प्रार्थकः, अर्थी *m.* (न्), अमुकपदप्रेप्सुः *m.*, पराश्रयप्रार्थकः.

CANY, *a.* वेतस्वान् -स्वती -स्वत् (त्), वैत्रकः -की -कं, वैदलः -ली -लं, वैणवः -वी -वं.

CANZONET, *s.* (A little song) उपगीतं, उपगानं, गीतकः, ईषद्गीतं.

CAP, *s.* शिरोवेष्टः -ष्टनं, शिरस्कं, शिरस्त्रं, शिरस्त्राणं, शिरोवस्त्रं, मस्तकाभरणं.

To CAP, *v. n.* (To take off the cap in salutation) मस्तकम् उन्मुच्य or शिरस्कम् उन्नम्य अभिवद् (c. 10. -वादयति -ते -यितुं); अभिवादनार्थं शिरस्त्रम् अवतॄ in caus. (-तारयति -यितुं), or अवमुच् (c. 6. -मुञ्चति -मोक्तुं).

To CAP, *v. a.* (To cover) पिधा (c. 3. -दधाति -धातुं), सपिधानं -ना -नं कृ; 'to cap verses,' प्रतिमालां कृ.

CAPABILITY, *s.* शक्यत्वं, शक्तिः *f.*, शक्तता, सामर्थ्यं, समर्थता, क्षमता, उपयोगिता, योग्यता, युक्तिः *f.*, पात्रता, सामञ्जस्यं; 'of acting,' क्रियाशक्तिः *f.*

CAPABLE, *a.* (Having powers equal to any thing) क्षमः -मा -मं, समर्थः -र्था -र्थं, शक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उचितः -ता -तं; 'capable of building a house,' गृहकरणे शक्तः; 'capable of a journey,' अध्वनि क्षमः; 'capable of toils,' क्लेशानाम् उचितः; 'capable of being done,' शक्यः -क्या -क्यं; 'to be capable of,' शक् (c. 5. शक्नोति or pass. शक्यते), क्षम् (c. 1. क्षमते), उत्सह् (c. 1. -सहते) with inf.; कॢप् (c. 1. कल्पते), उपकॢप्; 'I am not capable of leaving thee,' त्वाम् उत्स्रष्टुं नोत्सहे; 'he is rendered capable of immortality,' अमृतत्वाय कल्पते.—(Qualified, competent) उपयुक्तः -क्ता -क्तं, पात्रिकः -का -कं.—(A competent person) पात्रं, सत्पात्रं.—(One endowed with good qualities, intelligent) गुणवान् -वती -वत् (त्), बुद्धिमान् -मती -मत् (त्), कृती -तिनी -ति (न्).—(Capable of holding) धारणक्षमः -मा -मं, आदानयोग्यः -ग्या -ग्यं.

CAPACIOUS, *a.* विशालः -ला -लं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, पृथुः -थुः -थु, विवृतः -ता -तं, विपुलः -ला -लं, उरुः -रुः -रु, प्रसृतः -ता -तं, प्रस्थः -स्था -स्थं.

CAPACIOUSNESS, *s.* विशालता, विस्तीर्णता, पृथुता, परिसरः, उरुत्वं.

To CAPACITATE, *v. a.* क्षमीकृ, उपयुक्तं -क्तां -क्तं कृ, उपयोगित्वं दा (c. 3. ददाति, दातुं).

CAPACITY, *s.* (Size) परिमाणं.—(Power of holding) धारणशक्तिः *f.*, कोषः.—(Room) प्रसरः, विस्तृतिः *f.*, विस्तारः.—(Power of the mind) धीशक्तिः *f.*, बुद्धिपात्रता.—(Power, ability, fitness) शक्तिः *f.*, सामर्थ्यं, बलं, योग्यता, उपयुक्तता, उपयोगित्वं, पात्रता; 'according to one's capacity,' यथाशक्ति, यथासामर्थ्यं, यथाबलं; 'beyond one's capacity,' अतिशक्ति.—(State, profession) भावः, दशा, अवस्था, वृत्तिः *f.*

CAP-À-PEÉ OR CAP-À-PIÉ, अङ्गप्रत्यङ्गं, मस्तकात्प्रभृति पादपर्य्यन्तं, सर्व्वाङ्गं.—(Completely armed) संवर्म्मितः -ता -तं.

CAPARISON, *s.* (Of a horse or elephant) आस्तरः -रणं, परिस्तोमः, वर्णः, जयनं, सज्जा, अश्वसज्जा, अश्वपरिधानं, प्रखरः.

To CAPARISON, *v. a.* परिस्तोमं or आस्तरं परिधा (c. 3. -दधाति -धातुं), सज्जीकृ.

CAPARISONED, *p. p.* परिस्तोमभूषितः -ता -तं, सज्जितः -ता -तं, जयनयुक् *m. f. n.* (ज्).

CAPCASE, *s.* लघुवस्त्राधारः, भाण्डं, समुद्गः -द्गकः, सम्पुटः.

CAPE, *s.* (Promontory) अन्तरीपः -पं, नासारूपेण समुद्रमध्ये प्रलम्बो भूमिभागः, समुद्रमध्ये उदग्रा गिरिनासिका, स्थलाभोगः.—(Neck-piece of a cloak) ग्रीवाप्रच्छदः, स्कन्धप्रच्छदः, स्कन्धप्रावरणं, उत्तरप्रच्छदः.—(A small cloak) अरत्निपर्य्यन्तं लम्बमानः क्षुद्रप्रावारः.

CAPER, *s.* (A jump) प्लुतं, प्लवः, झम्पः, वल्गितं, उत्फालः, लङ्घनं, नर्त्तनं.—(A kind of pickle) सन्धितविशेषः.

To CAPER, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), नृत् (c. 4. नृत्यति, नर्त्तितुं), वल्ग् (c. 1. वल्गति, वल्गितुं), उत्पत् (c. 1. -पतति -पतितुं).

CAPILLAMENT, *s.* केशरः, केसरः, पक्ष्म *n.* (न्), किञ्जलः, किञ्जल्कः.

CAPILLARY, *a.* (Resembling hair) केशोपमः -मा -मं, कैशिकः -की -कं, केशरी -रिणी -रि (न्).—(Minute) सूक्ष्मः -क्ष्मा -क्ष्मं, कणीकः -का -कं.

CAPILLARY, *s.* सूक्ष्मतृणाकारदलविशिष्ट ओषधिभेदः.—(Vein) सूक्ष्मनाडिः *f.*

Capital, *a.* (Relating to the head) मस्तकसम्बन्धी -न्धिनी -न्धि (न्). —(Chief, principal) परमः -मा -मं, मुख्यः -ख्या -ख्यं, उत्तमः -मा -मं, अग्र्यः -ग्र्या -ग्र्यं, विशिष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, प्रधानः in comp. —(Criminal in the highest degree, worthy of death) महापातकी -किनी -कि (न्), वधार्हः -र्हा -र्हं, वधदण्ड्यः -ण्ड्या -ण्ड्यं; 'a capital crime,' महापातकं, महापापं.—(A capital city) पुरोत्तमः, *see* the next.—(Capital punishment) वधदण्डः, उत्तमसाहसं, प्राणहननं, प्राणदण्डः.—(Capital stock) मूलद्रव्यं.

Capital, *s.* (In money, &c.) मूलं, मूलधनं, मूलद्रव्यं, नीवी -विः *f.*, परिपणं.—(A capital city) राजधानं -नी, स्कन्धावारः, कर्व्वटः -टं, खर्व्वटः -टं.—(A large letter) वृहदक्षरं, महाक्षरं.—(Top of a pillar) स्तम्भशीर्षं, स्तम्भाग्रं, स्तम्भशृङ्गं.

Capitalist, *s.* कोटीश्वरः, मूलधनाढ्यः, धनाढ्यः, धनवान् *m.* (त्), कोषवान् *m.* (त्), सधनः, वित्तवान् *m.* (त्).

Capitally, *adv.* उत्तमसाहसेन, प्राणदण्डेन, परमं, उत्तमप्रकारेण.

Capitation, *s.* मस्तकसंख्या, शरीरगणना, व्यक्तितः परिसंख्या, प्रत्येकं or एकशस् or एकतस् or एकैकशस् or पृथक् पृथक् संख्यानं or परिगणना.

Capitol, *s.* रोमनगरे पूजितस्य युपितराख्यस्य आदिदेवस्य प्रासादः.

Capitular, *s.* (The statutes of the chapter of a cathedral) महाभजनप्रासादे सभ्यसभासद्भिः विहिता व्यवस्थासंहिता.—(A member of the chapter) महाभजनप्रासादे सभासद् *m.*, महापूजाशालासम्बन्धी-यमठे सभासद्.

Capitular, *a.* पूर्व्वोक्तमठव्यवस्थासम्बन्धी -न्धिनी -न्धि (न्).

To capitulate, *v. n.* (To surrender on certain stipulations) समयं or नियमं कृत्वा शत्रुवशे or शत्रुहस्ते or शत्रोरधिकारे परादा (c. 3. -ददाति -दातुं) or प्रदा, or सम्प्रदा or समृ in caus. (-अर्पयति -यितुं) or शत्रोरधीनः -ना -नं भू or शत्रोर् वशीभू.—(To draw up any thing in heads) मार्गेषु निबन्ध् (c. 9. -बध्नाति -बन्द्धुं) or रच् (c. 10. रचयति -यितुं), सम्प्रवच् (c. 2. -वक्ति -वक्तुं), समासतस् or सङ्क्षेपतस् लिख् (c. 6. लिखति, लेखितुं).

Capitulation, *s.* (Surrendering on certain stipulations) नियमपूर्व्वकं परादानं or सम्प्रदानं or प्रदानं or समर्पणं.—(Reduction to heads) मार्गेषु निबन्धनं or रचना, समासतो लिखनं.

Capitulator, *s.* नियमपूर्व्वकं परादाता *m.* (तृ) or सम्प्रदाता *m.* (तृ), समयकर्त्ता *m.* (र्त्तृ).

Cap-maker, *s.* शिरस्त्रकारी *m.* (न्), शिरोवेष्टनकृत्, मस्तकाभरणविक्रेता *m.* (तृ).

Capon, *s.* छिन्नवृषणः कुक्कुटः, वृषणहीनः कृकवाकुः *m.*

Capot, *s.* पिकेटाख्यायां क्रीडायां सर्व्वद्यूतपत्राणां निर्जयः or स्वीकरणं.

To capot, *v. a.* पूर्व्वोक्तक्रीडायां सर्व्वद्यूतपत्राणि निर्जि (c. 1. -जयति -जेतुं) or स्वीकृ.

Capouch, *s.* (A monk's hood) सन्न्यासिभिर् भृतं शिरःपिधानं.

Caprice, *s.* मनोलौल्यं, लौल्यं, चापलं, निर्बन्धः, सङ्कल्पः *m.*, समन्त्रहः, स्फातिः *f.*

Capricious, *a.* चपलः -ला -लं, चञ्चलः -ला -लं, लोलः -ला -लं, अस्थिरः -रा -रं, सङ्कसुकः -का -कं, चञ्चलहृदयः -या -यं, लोलचेताः -ताः -तः (स्), चलचित्तः -त्ता -त्तं, चपलात्मकः -का -कं, प्रकृतितरलः -ला -लं, नैकभावाश्रयः -या -यं, असमवायः -या -यं.

Capriciously, *adv.* मनोलौल्येन, चापल्येन, चाञ्चल्येन, लोलचेतसा.

Capriciousness, *s.* चापल्यं, चपलता, चाञ्चल्यं, चञ्चलता, अस्थिरता, चलता, हृदयचाञ्चल्यं, चलचित्तता, चित्ततरलता.

Capricorn, *s.* (Sign of the zodiac) मकरराशिः *m.*, मकरः.

Capriole, *s.* अश्वप्लुतं, तुरङ्गवल्गितं, अश्वस्य गतिविशेषः.

Capstan, *s.* गुरुभारकर्षणार्थं यष्टिभिः सञ्चारितं चक्रयन्त्रं.

Capsular, capsulary, *a.* बीजकोशाकारः -रा -रं, पुटाकारः -रा -रं.

Capsulated, *a.* कोशस्थः -स्था -स्थं, कोशपरिगतः -ता -तं.

Capsule, *s.* बीजकोशः, बीजगुप्तिः *f.*, कोषः, पुटः, शिम्बा.

Captain, *s.* (In the army) सैन्याधिपतिः *m.*, सैन्याध्यक्षः, व्यूहपतिः *m.*, गुल्मपतिः, योधमुख्यः, दण्डनायकः, सेनानीः *m.*—(Of a ship) नौकाधिपतिः *m.*, नौकाधिष्ठाता *m.* (तृ), पोताध्यक्षः, नौपतिः.—(Any chief) मुखरः, नायकः, नेता *m.* (तृ), पुरोगः -गमः, अग्रगः.

Captainship, *s.* सैन्याधिपतिपदं, नौकाध्यक्षाधिकारः, नेतृत्वं, मुखरत्वं.

Captation, *s.* (Courting favour) लोकरञ्जनं, लोकानुरञ्जनं, लोकसेवनं, लोकप्रशंसासेवनं, जनप्रसादलिप्सा.

Caption, *s.* (Seizure of person) आसेधः.—(Overreaching) प्रलम्भः, प्रतारणं, छलं.

Captious, *a.* (Censorious) छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्), घृणी -णिनी -णि (न्), दोषग्राही -हिणी -हि (न्), विवादशीलः -ला -लं, उद्ग्राहशीलः -ला -लं.—(Fallacious, insidious) मोही -हिनी -हि (न्), भ्रान्तिकरः -री -रं.

Captiously, *adv.* विवादार्थं, विवादमात्रवाञ्छया, छिद्रान्वेषिवत्, उद्ग्राहशीलत्वात्, घृणया.

Captiousness, *s.* छिद्रान्वेषिता, विवादशीलता, घृणा, दोषग्राहित्वं, उद्ग्राहशीलता.

To captivate, *v. a.* (To bring into bondage) वशीकृ, वन्दीकृ, दासीकृ, करदीकृ, दम् in caus. (दमयति -यितुं).—(To charm) वशीकृ, चित्तं or मनो हृ (c. 1. हरति, हर्त्तुं) or अपहृ, हृदयं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), मुह् in caus. (मोहयति -यितुं).

Captivated, *p. p.* वशीकृतः -ता -तं, वशीभूतः -ता -तं, वशतापन्नः -न्ना -न्नं.

Captivating, *a.* मनोहरः -रा -रं, चित्तहारी -रिणी -रि (न्), चित्तापहारी -रिणी -रि (न्), हृदयग्राही -हिणी -हि (न्), मोहनः -ना -नी -नं, मोही -हिनी -हि (न्).

Captivation, *s.* वशीकरणं, ग्रहणं, बन्धनं, दासीकरणं, वन्दीकरणं.

Captive, *a.* वन्दीकृतः -ता -तं, दासीभूतः -ता -तं, शत्रुधृतः -ता -तं, शत्रुवशः -शा -शं, शत्रुग्रस्तः -स्ता -स्तं, कारास्थितः -ता -तं, कारागुप्तः -प्ता -प्तं, ग्रहणः -णा -णं.

Captive, *s.* वन्दिः *f.*, वन्दी, शत्रुधृतः, कारास्थः, कारागुप्तः, ग्रहणः, उपग्रहः, प्रग्रहः, करदः, करचर्मी; 'taken alive,' जीवग्राहः.—(Slave) दासः; 'to take captive,' वन्दीकृ, दासीकृ.—(One charmed by beauty, &c.) वशीभूतः, मोहितः.

Captivity, *s.* बन्धनं, वन्दिभावः, कारागोपनं, वशित्वं, वश्यता, शत्रुवशिता.—(Servitude) दासत्वं, दास्यं, दासभावः.

Captor, *s.* वन्दीकर्त्ता *m.* (र्त्तृ), ग्राहकः, जेता *m.* (तृ), लोप्त्रकृत्.

Capture, *s.* (The act of taking) ग्रहणं; 'capture of a fort,' दुर्गलङ्घनं, दुर्गभङ्गः.—(The prize taken) लोप्त्रं, लोत्रं; 'capture of cattle,' गोग्रहः.

To capture, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), वन्दीकृ, दासीकृ, करदीकृ; 'to capture a fort,' दुर्गं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or लङ्घ् (c. 10. लङ्घयति -यितुं).

Capuchin, *s.* रोमीयमतस्थः सन्न्यासिविशेषः.

Caput mortuum, *s.* मलं, खलं, किट्टं, कल्कं, विनीयः, शेषं.

Car, *s.* रथः, चक्रयानं, गन्त्री, गन्त्रीरथः, शकटः; 'of the gods,' विमानः -नं; 'war-car,' स्यन्दनः, शताङ्गः; 'pleasure-car,' क्रीडारथः,

पुष्परथः; 'a covered car,' कर्णीरथः, ड्यनं, प्रवहणं; 'multitude of cars,' रथ्या, रथकड्या; 'car-maker,' रथकारः.

Carabine or carbine, *s.* (A short gun used by the light horse) सङ्ग्रामसमये अश्वारूढैर्भृता सीसकगोलकप्रक्षेपणी ब्राहुपरिमाणा लोहनाडिः.

Carabineer, *s.* पूर्व्वोक्तशस्त्रधारी हयारूढः, पूर्व्वोक्तशस्त्रभृत्.

Carack, *s.* (A large ship of burthen) भारवाहिनी वृहन्नौका.

Caracole, *s.* तिर्य्यक्प्लुतं, तिर्य्यग्वल्गितं, वक्रगतिः *f.*, कुटिलगतिः, अर्द्धचन्द्राकारा तुरङ्गगतिः.

To caracole, *v. a.* तिर्य्यक् प्रु (c. 1. प्रवते, प्रोतुं) or वल्ग् (c. 1. वल्गति, वल्गितुं), अश्ववद् वक्रगत्या or अर्द्धचन्द्राकारगत्या चल् (c. 1. चलति, चलितुं).

Carat, caract, *s.* (A weight of four grains) रक्तिकाद्वयसम उन्मानविशेषः.—(Manner of expressing the fineness of gold) स्वर्णकारभाषायां सुवर्णनिर्म्मल्यवाचिकः शब्दः.

Caravan, *s.* सार्थः, पथिकसन्ततिः *f.*, यात्रा, यात्रिकसङ्घः, सार्थवाहसमूहः, समध्वगनिवहः.

Caravansary, *s.* पथिकाश्रयः, पथिकावासस्थानं, सार्थवाहानाम् उत्तरणस्थानं, उपकारी.

Caraway or carway, *s.* अजमादा, क्षुद्रवीजप्रभेदः स च पिष्टकापूपादिना कदापि संसृज्यते.

Carbonado, *s.* भक्षणार्थं छिन्नमांसं or व्यवछिन्नमांसं, भक्षणयोग्यं विनिकृत्तमांसं.

To carbonado, *v. a.* भक्षणार्थं मांसं व्यवछिद् (c. 7. -छिनत्ति -छेत्तुं) or विनिकृत् (c. 6. -कृन्तति -कर्त्तितुं) or विशस् (c. 1. -शसति -शसितुं).

Carbuncle, *s.* (Swelling) व्रणः -णं, विस्फोटः, स्फोटः, गण्डः.—(Jewel) पद्मरागः, सर्पमणिः.

Carbuncled, *a.* (Having swellings) व्रणी -णिनी -णि (न्).—(Set with the jewel) पद्मरागमयः -यी -यं, सर्पमणिकरखचितः -ता -तं.

Carcanet, *s.* (A chain or necklace of jewels) रत्नावलिः *f.*, मणिमाला, मुक्तावली.

Carcass, *s.* (A dead body) शवः -वं, मृतशरीरं, मृताङ्गं, मृतकं, कुणपः -पं.—(The remains, ruins) शेषभागः, जीर्णभागः.

Carcelage, *s.* (Prison fees) कारागृहशुल्कं, कारारक्षकेण गृहीतं शुल्कं.

Carceral, *a.* कारासम्बन्धी -न्धिनी -न्धि (न्), बन्धनालयसम्बन्धकः -का -कं.

Card, *s.* (A painted paper used in games of chance) क्रीडापत्रं, द्यूतपत्रं, चित्रितद्यूतपत्रं.—(The paper on which the points of the compass are marked under the needle) दिग्विदिगङ्कितं पत्रं.—(The instrument for combing wool, flax, &c.) ऊर्णाशणादिमार्जनार्थं लोहदन्तयुक्तं यन्त्रं, ऊर्णामार्जनी, ऊर्णानिर्घर्षणयन्त्रं.

To card, *v. a.* (To comb wool) पूर्व्वोक्तयन्त्रेण ऊर्णां सम्मृज् (c. 2. -मार्ष्टि -मार्ष्टुं) or निर्घृष् (c. 1. -घर्षति -घर्षितुं).

Cardamom, *s.* (Large) एला, एलीका, पृथ्वीका, चन्द्रवाला, निष्कुटिः *f.*, बहुला.—(Small) तुत्था, त्रिपुटा, त्रुटिः *f.*, कोरङ्गी, कुणिका.

Carder, *s.* (One that cards wool) ऊर्णामार्जकः, ऊर्णानिर्घर्षकः.—(One that plays much at cards) द्यूतपत्रक्रीडासक्तः.

Cardiacal, cardiac, *a.* तेजस्करः -री -रं, दीपनः -ना -नं, अग्निदः -दा -दं.

Cardinal, *a.* (Chief) परमः -मा -मं, मुख्यः -ख्या -ख्यं, उत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, विशिष्टः -ष्टा -ष्टं, अग्र्यः -ग्र्या -ग्र्यं, प्रधानः in comp.

Cardinal, *s.* रोमनगरे महाधर्म्माध्यक्षसमाजे सभासद्, रोमीयमतधारिणां मध्ये धर्म्माधिपतिः *m.*

Cardinalate or cardinalship, *s.* पूर्व्वोक्तधर्म्माधिपतेः पदं or अधिकारः.

Cardinal-point, *s.* उत्तरदिक्, पूर्व्वदिक्, पश्चिमदिक्, दक्षिणदिक् *f.* (श्).

Cardmatch, *s.* (Game at cards) द्यूतपत्रक्रीडा, चित्रितपत्रद्यूतं.

Care, *s.* (Anxiety) चिन्ता, चित्तोद्वेगः, चित्तवेदना, मनोदुःखं, मनस्तापः, आधिः *m.*, चर्चा, औत्सुक्यं, उद्वेगः -जनं, चिन्ताभारः, मानसी व्यथा; 'cares of this world,' सांसारिकी चिन्ता.—(Diligence, pains) प्रयत्नः, यत्नः, व्यवसायः, आस्था; 'with care,' प्रयत्नतस्.—(Regard, attention) अवेक्षा, अपेक्षा, मनःप्रवेशः, मनोयोगः.—(Caution, heed) अवधानं, अप्रमादः; 'to take care,' अवधा (c. 3. -धत्ते -धातुं), सावधानः -ना -नं भू.—(Heed, in order to protection) गुप्तिः *f.*, रक्षणं, रक्षा, पालनं; 'to take care of, protect,' रक्ष् (c. 1. रक्षति, रक्षितुं), पाल् (c. 10. पालयति -यितुं), गुप् (c. 1. गोपायति, गोप्तुं).—(The object of care) रक्षणीयः -या -यं, अपेक्षाभूमिः *f.*—(Care and management) योगक्षेमः.

To care, *v. n.* (To care for, concern one's self about) अपेक्ष् (c. 1. -ईक्षते -ईक्षितुं), अवेक्ष्, चिन्त् (c. 10. चिन्तयति -यितुं), अनुचिन्त्, सेव् (c. 1. सेवते, सेवितुं), भज् (c. 1. भजति -ते, भक्तुं), मनो धा (c. 3. दधाति, धातुं) with loc.

Care-crazed, *a.* चिन्ताव्याकुलः -ला -लं, चिन्ताकुलः -ला -लं, चिन्ताव्यग्रः -ग्रा -ग्रं.

To careen, *v. a.* (To calk) दारुजीर्णत्वाद् दारुस्फोटनाद् वा नौकां पार्श्वे पर्य्यस्य छिद्राणि पिधा (c. 3. -दधाति -धातुं).

Career, *s.* (A race-ground) धावनस्थानं, चर्य्यास्थानं.—(A race) चर्य्या, मार्गः, पणलाभार्थं धावनं.—(Course of action, &c.) गतिः *f.*, मार्गः, क्रियाप्रसङ्गः, प्रसरः, पर्य्यायः, क्रमः, रीतिः *f.*, गमनं, चलनं; 'in full career, at full speed,' परमवेगेन, सरभसं, सर्व्ववेगेन.

To career, *v. n.* परमवेगेन धाव् (c. 1. धावति -वितुं), त्वर् (c. 1. त्वरते -रितुं).

Careful, *a.* (Heedful, attentive) सावधानः -ना -नं, अवहितः -ता -तं, कृतावधानः -ना -नं, अप्रमत्तः -त्ता -त्तं, अप्रमादी -दिनी -दि (न्), सयत्नः -त्ना -त्नं, यत्नवान् -वती -वत् (त्), प्रयत्नवान् -वती -वत्.—(Anxious, full of care) चिन्तावान् -वती -वत् (त्), सचिन्तः -न्ता -न्तं, उत्सुकः -का -कं, व्यग्रः -ग्रा -ग्रं.

Carefully, *adv.* सावधानं, सयत्नं, प्रयत्नतस्, यत्नतस्, प्रयत्नेन, प्रयत्नात्, यत्नात्, प्रमादं विना, अप्रमत्तं, प्रमादव्यतिरेकेण.

Carefulness, *s.* अवधानता, सावधानता, सयत्नता, अप्रमादः, अप्रमादित्वं.

Careless, *a.* प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), अनवहितः -ता -तं, अनवधानः -ना -नं, निरपेक्षः -क्षा -क्षं, असावधानः -ना -नं, असमीक्ष्यकारी -रिणी -रि (न्).—(To be careless of) प्रमद् (c. 4. -माद्यति -मदितुं) with abl.; 'he is careless of his own interest,' स्वहितात् प्रमाद्यति.

Carelessly, *adv.* प्रमादेन, प्रमादतस्, सप्रमादं, निरपेक्षं, अनपेक्षया, अवधानं विना, अनवधानेन.—(Implying absence of restraint) निर्यन्त्रणं.

Carelessness, *s.* अनवधानं -नता, असावधानता, प्रमाद्यं, प्रमादः, अनपेक्षा.

To caress, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -लिङ्गितुं), समालिङ्ग्, भज् (c. 1. भजते, भक्तुं), स्वञ्ज् (c. 1. स्वजते, स्वंक्तुं), परिष्वञ्ज्; क्रोडीकृ; परिमृश् (c. 6. -मृशति -मर्ष्टुं), परिरभ् (c. 1. -रभते -रब्धुं), प्रेम कृ.

Caress, *s.* आलिङ्गितं -ङ्गनं, परिष्वङ्गः, ललितं, क्रोडीकृतिः *f.*, अङ्कपाली, अङ्कपालिः *m.*, परिरम्भः.

Caressed, *p. p.* आलिङ्गितः -ता -तं, क्रोडीकृतः -ता -तं, परिमृष्टः -ष्टा -ष्टं, परिरब्धः -ब्धा -ब्धं, परिष्वक्तः -क्ता -क्तं, उपगूढः -ढा -ढं.

Caret, *s.* इह किञ्चिद् अधिकं विस्मृतं वा निवेशयितव्यम् इति सूचनार्थं हंसपादाकृति चिह्नं.

CARGO, *s.* नौकाभारः, पोतभारः, पौतिकं, पोतस्थद्रव्यं, पोतस्थं भाण्डं.

CARICATURE, *s.* विकृताकारत्वाद् हास्यजनकं प्रतिमानं or उपमानं, हास्यप्रतिमानं, हास्योपमानं, हास्यचित्रं, विकृतचित्रं, हास्यप्रकारेण or अतिशयेन चित्रितम् आलेख्यं.

To CARICATURE, *v. a.* आकारं or मूर्त्तिं विकृत्य or सांचीकृत्य हास्यप्रकारेण चित्र् (c. 10. चित्रयति -यितुं) or आलिख् (c. 6.-लिखति -लेखितुं), हास्यप्रतिमानं कृ, मूर्त्तिविकारपूर्वकं प्रतिमूर्त्तिं चित्रे लिखित्वा हास्यभूमिं कृ.

CARICATURED, *p. p.* हास्यप्रकारेण चित्रलिखितः -ता -तं, अङ्गविकारपूर्वकम् आलिखितः -ता -तं.

CARICATURIST, *s.* हास्यप्रकारेण उपमाता *m.* (तृ), हास्यप्रतिमानकृत्, हास्यचित्रकर्त्ता *m.* (र्तृ), विकृतप्रतिमानकृत्, यो मूर्त्तिम् चित्रे विकृत्य प्रतिमूर्त्तिं हास्यास्पदं करोति.

CARIES or CARIOSITY, *s.* अस्थिगलितत्वं, अस्थिपूयनं, अस्थिव्यसनं, अस्थिपाकः, अस्थिक्षयः, अस्थिशोषः.—(Of the teeth) दन्तव्यसनं.

CARIOUS, *a.* गलितः -ता -तं, पूयपूर्णः -र्णा -र्णं, क्षीणः -णा -णं, पूतिगन्धः -न्धा -न्धं.

To CARK, *v. n.* (To be anxious) चिन्ताव्याकुलः -ला -लं or चिन्ताव्यग्रः -ग्रा -ग्रं अस्, उत्सुक (nom. उत्सुकायते).

CARLE, *s.* दुर्वृत्तः, दुराचारः, अधमाचारः, कुशीलः, असभ्यः, निकृष्टः.

CARMAN, *s.* रथिकः, रथी *m.* (न्), रथवाहकः, चातुरिकः, सारथिः *m.*

CARMELITE, *s.* (Belonging to the order of Carmelites) रोमीयमतधारी सन्न्यासिविशेषः.

CARMINATIVE, *a.* वातघ्नः -घ्ना -घ्नं, वायुघ्नः -घ्ना -घ्नं, वायुनाशी -शिनी -शि (न्), रोचकः -का -कं, रूक्षकः -का -कं, अग्निदः -दा -दं, स्वेदजनकः -का -कं.

CARMINE, *s.* जतुसवर्णो रक्तरङ्गः, सिन्दूरोपमः or ओड्रपुष्पसवर्णो रङ्गः, जतुजरङ्गः, रक्तरेणुः *m.*

CARNAGE, *s.* संहारः, विशसनं, वधः, हत्या, घातनं, निहननं, निषूदनं.

CARNAL, *a.* (Fleshly, bodily) शारीरिकः -की -कं, शरीरजः -जा -जं, दैहिकः -की -कं, कायिकः -की -कं, वापुषिकः -की -कं.—(Worldly) सांसारिकः -की -कं, लौकिकः -की -कं, ऐहिकः -की -कं, ऐहलौकिकः -की -कं.—(Sensual) विषयी -यिणी -यि (न्), विषयासक्तः -क्ता -क्तं, विषयसङ्गी -ङ्गिनी -ङ्गि (न्), विषयानुरागी -गिणी -गि (न्), विषयोपसेवी -विनी -वि (न्), कामासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, कामुकः -का -कं; 'carnal desire,' कामः; 'carnal connexion,' अङ्गसङ्गः, सङ्गहणं.

CARNALITY, *s.* विषयासक्तिः *f.*, विषयोपसेवा, विषयकामः, कामासक्तिः, विषयसङ्गः, शारीरिकविषयेषु अनुरागः, सङ्गः, कामिता.

CARNALLY, *adv.* शारीरिकरीतिक्रमेण, सांसारिकरीत्यनुसारात्, विषयसङ्गात्, कामुकवत्; 'to know carnally,' भज् (c. 1. भजते, भक्तुं).

CARNATION, *s.* (Flesh colour) मांसवर्णः.—(The flower) मांसवर्णविशिष्टः पुष्पप्रभेदः.

CARNELIAN or CORNELIAN, *s.* मांसवर्णः प्रस्तरविशेषः.

CARNEOUS, *a.* मांसलः -ला -लं, मांसशीलः -ला -लं, मांसगुणविशिष्टः -ष्टा -ष्टं.

To CARNIFY, *v. n.* and *a.* मांसीभू, मांससाद्भू, मांससात्कृ.

CARNIVAL, *s.* (The feast held before Lent) वसन्तसमये प्राग्ग्रहोपवासाद् रोमीयमतधारिभिः भवितो महोत्सवः, दोलोत्सवः, होलाका.

CARNIVOROUS, *a.* क्रव्यादः -दा -दं, क्रव्यभुक् *m. f. n.* (ज्), क्रव्यभोजनः -ना -नं, मांसाशी -शिनी -शि (न्), मांसभक्षः -क्षा -क्षं, आमिषाशी -शिनी -शि (न्) or पिशिताशी, आममांसभक्षी -क्षिणी -क्षि (न्).

CARNOSITY, *s.* अर्बुदः, गण्डः, मेदोग्रन्थिः *m.*, अर्शः *n.* (स्), दुष्टमांसं, मांसवृद्धिः *f.*

CAROB-BEAN, *s.* शिम्बाप्रभेदः, शिम्बिका, शिम्बा.

CAROCHE, *s.* क्रीडारथः, पुष्परथः, रथः, प्रवहणं, चातुरं.

CAROL, *s.* (A song of joy) हर्षगीतं, हर्षगानं, आनन्दगीतं, जयगीतं जयशब्दः, आह्लादसूचकं गीतं.—(A song of devotion) स्तवगीतं, भक्तिगीतं, गीतं, स्तुतिः *f.*, स्तोत्रं, गाथा, स्तोभः *f.*, सङ्गीतं.

To CAROL, *v. n.* गै (c. 1. गायति, गातुं), सुख (nom. सुखायते); 'to celebrate in song, &c.' उपगै, स्तु (c. 2. स्तौति, स्तोतुं), उपवीण (nom. उपवीणयति -यितुं).

CAROTID, *s.* (Two arteries) हृत्पिण्डाद् रक्तप्रवाहकं वृहन्नाडिद्वयं, कण्ठराद्वयं.

To CAROUSE, *v. n.* (To drink largely) अतिशयेन पा (c. 1. पिबति, पातुं) or सम्पा, अतिशयसम्पीत्या क्षीबः -बा -बं भू, उत्सवं कृ.

CAROUSE or CAROUSAL, *s.* सम्पीतिः *f.*, अतिपानं, अतिशयसम्पीतिः *f.*, उत्सवः.

CAROUSER, *s.* पानप्रसक्तः, पानरतः, सम्पीतिरतः, मद्यपीतः, अतिपायी *m.* (न्).

CARP, *s.* (A fish) शफरी, सफरी, प्रोष्ठी, प्रोष्ठः, रोहितः.

To CARP AT, *v. n.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, गर्ह् (c. 1. गर्हते, गर्हितुं, c. 10. गर्हयति -ते -यितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवक्षिप्, दोषीकृ, दोषं or छिद्रम् अन्विष् (c. 6. -इच्छति -एषितुं), असूय (nom. असूयति -यितुं).

CARPENTER, *s.* तक्षकः, तक्षा *m.* (न्), सूत्रधारः, त्वष्टा *m.* (ष्टृ), काष्ठतक्षकः, काष्ठतट् (क्ष्), तष्टा *m.* (ष्टृ), स्थपतिः *m.*, वर्द्धकिः *m.*, रथकारः; 'carpenter's bench,' उद्घनः.

CARPENTRY, *s.* त्वष्टिः *f.*, तक्षणं, काष्ठतक्षणं, सूत्रधारकर्म्म *n.* (न्), तक्षकक्रिया.

CARPER, *s.* दोषग्राही *m.* (न्), दोषकथकः, छिद्रान्वेषी *m.* (न्), दोषैकदृक् *m.* (श्), घृणी *m.* (न्), पापदर्शी *m.* (न्), गुणघाती *m.* (न्), निन्दकः, विवादशीलः, विवादप्रियः.

CARPET, *s.* आस्तरणं, पादपाशी, कुथः, कुथा, चित्रितवस्त्रं, पुष्पालङ्कृतवस्त्रं, आसनवस्त्रं; 'a carpet of grass,' दर्भास्तरणं; 'brought on the carpet,' प्रस्तुतः -ता -तं, उपन्यस्तः -स्ता -स्तं, प्रतिज्ञातः -ता -तं.

To CARPET, *v. a.* चित्रितवस्त्रादिना आस्तॄ or आस्तृ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं -स्तरीतुं).

CARPING, *a.* दोषग्राही -हिणी -हि (न्), घृणी -णिनी -णि (न्), निन्दकः -का -कं.

CARPING, *s.* (Cavil) निन्दा, गर्हा -र्हणं, घृणा, अपवादः, दोषकल्पनं, दोषप्रसङ्गः, दोषीकरणं, छिद्रान्वेषः, असूया, जुगुप्सा, ऋतीया, आक्षेपः, उद्ग्राहः.

CARPINGLY, *adv.* निन्दया, घृणया, असूयया, विवादशीलत्वात्, जुगुप्सया, सापवादं.

CARRIAGE, *s.* वाहनं, यानं, रथः, गन्त्री, चातुरं, वाहः, प्रवहणं, चक्रुरः; 'travelling-carriage,' अध्वरथः, पुष्परथः; 'bullock-carriage,' वृषभयानं; 'one who has a carriage,' रथी *m.* (न्), रथिकः; 'riding in a carriage,' रथारूढः -ढा -ढं; 'alighting from a carriage,' रथावरोही -हिणी -हि (न्); 'carriage-road,' रथ्या; 'carriage-horse,' रथ्यः, प्रवहणवाजी *m.* (न्); 'bottom of a carriage,' अनुकर्षः.—(Framework of a gun) युद्धयन्त्रवाहनं.—(Behaviour) गतिः *f.*, चरितं, आचारः, चलनं, व्यवहारः.—(Management) नयः, प्रणयनं.

CARRIED, *p. p.* ऊढः -ढा -ढं, भृतः -ता -तं, धृतः -ता -तं, आहृतः -ता -तं, सञ्चारितः -ता -तं; 'grass carried along by the wind,' वातप्रेरितं तृणं.

CARRIER, *s.* वाहकः, वाही *m.* (न्).—(One who lives by carrying goods) भारवाहनजीवी *m.* (न्).—(Carrier of news) सन्देशहरः.—(Pigeon) पत्रवाहकः कपोतः.

CARRION, *s.* पूतिमांसं, मृतं, मृतकं, अखाद्यमांसं, अखाद्यं, अमेध्यकुणपः.

CARROT, *s.* गर्जरं, पीतकन्दं, शिखामूलं, स्वादुमूलं, पिण्डमूलं.

CARROTINESS, *s.* रक्तत्वं, पिङ्गलत्वं.—(Of hair) केशरक्तत्वं, केशपिङ्गलता.

CARROTY, *a.* रक्तः -क्ता -क्तं, पिङ्गलः -ला -लं, गजेरवर्णः -र्णा -र्णं.—(Carroty haired) पिङ्गलकेशी -शिनी -शि(न्) or रक्तकेशी, धूपिकाकेशः -शी -शं.

To CARRY, *v. a.* (Convey, transport) वह् (c. 1. वहति -ते, वोढुं), आवह्, उपवह्, संवह्, आनी (c. 1. -नयति -नेतुं), तॄ in caus. (तारयति -यितुं) गम् in caus. (गमयति -यितुं); 'he is carried on horseback,' अश्वेन उह्यते or अश्वेन सञ्चरति.—(Bear as a burden) वह्, प्रवह्, उद्वह्; भृ (c. 3. बिभर्त्ति, भर्त्तुं), हृ (c. 1. हरति, हर्त्तुं); 'he carried his son on his back,' पुत्रम् अवहत् पृष्ठेन.—(Gain, carry a cause) साध् in caus. (साधयति -यितुं); 'to carry a fortress,' दुर्गं लङ्घ् (c. 10. लङ्घयति -यितुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं); 'to carry one's point,' अभिप्रेतसिद्धिं कृ, प्रतिज्ञापूरणं कृ.—(Carry about) परिवह्, पर्यानी.—(Carry away) अपवह्, अपनी (c. 1. -नयति -नेतुं), व्यपनी, अपोह् (c. 1. -ऊहते -ऊहितुं), व्यपोह्; 'to carry away with one,' समुपादा (c. 3. -ददाति -दातुं).—(Carry back) प्रत्यानी, प्रतिनी.—(Carry forth) निर्हृ.—(Carry off) अपवह्, अपनी, हृ, अपहृ, व्यपहृ, अपकृ (c. 8. -करोति -कुरुते -कर्त्तुं), कल् (c. 10. कालयति -यितुं).—(Carry on) कृ, प्रणी, सम्प्रणी, विधा (c. 3. -दधाति -धातुं).—(To carry on war) विग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सङ्ग्रामं कृ, युद्धं कृ.—(Carry out, effect) निर्वह् in caus. (-वाहयति -यितुं), सम्पद् in caus. (-पादयति -यितुं), निष्पद्.—(Carry letters) पत्राणि वह् or हृ.—(Carry arms) शस्त्राणि ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), भृ or धृ, सैनिकवृत्तिम् आस्था (c. 1. -तिष्ठति -स्थातुं).

To CARRY ONE'S SELF, *v. n.* (Behave) चर् (c. 1. चरति, चरितुं), आचर्, वृत् (c. 1. वर्त्तते, वर्त्तितुं), व्यवहृ (c. 1. -हरति -हर्त्तुं).

CART, *s.* शकटः, गन्त्री, गन्त्रीरथः, चक्रयानं, वाहनं, अनः *n.* (स्), चातुरं.

To CART, *v. a.* (To carry in a cart) शकटेन वह् (c. 1. वहति, वोढुं).—(To place in a cart) शकटे आरुह् in caus. (-रोपयति -यितुं) or निविश् in caus. (-वेशयति -यितुं).

CARTE-BLANCHE, *s.* अलिखितपत्रं, लिखनशून्यं पत्रं.—(Permission to act as one pleases) स्वेच्छातः or स्वेच्छया कर्तुम् अनुमतिः or अनुज्ञा.

CARTED, *a.* शकटारूढः -ढा -ढं, शकटारोपितः -ता -तं, शकटनिवेशितः -ता -तं.

CARTEL, *s.* (A paper containing a challenge) द्वन्द्वयुद्धार्थं or नियुद्धार्थम् आह्वानपत्रं.—(Compact for exchange of prisoners) सङ्ग्रामसमये परस्परं बन्दीकृतानां योधानां परिवर्त्तनार्थं नियमपत्रं.

CARTER, *s.* शाकटिकः, शकटवाहकः, गन्त्रीवाहकः, चातुरिकः.

CART-HORSE, *s.* शाकटः, शकटवाजी *m.* (न्), शकटवाहनः, धुर्य्यः, धुरीणः.

CARTHUSIAN, *s.* रोमीयमतधारी सन्यासिविशेषः.

CARTICEYA. *See* KARTIKEYA.

CARTILAGE, *s.* तरुणास्थि *n.*, सन्धिबन्धनं, उपास्थि *n.*, कोमलास्थि *n.*

CARTILAGINOUS, *a.* तरुणास्थिमयः -यी -यं, तरुणास्थिविशिष्टः -ष्टा -ष्टं.

CART-LOAD, *s.* शाकटं, शाकटीनः, शाकटो भारः, आचितः -तं, शलाटः.

CARTOON, *s.* पटे लिखितश् चित्रारम्भः, कार्पासगतश् चित्रारम्भः, चित्रितपटं.

CARTOUCH, *s.* (A box for charges) वह्न्यस्त्रचूर्णकोषधारणयोग्यः सम्पुटकः.—(A case filled with balls fired from a mortar) अनेकगुलिकागर्भो युद्धयन्त्रात् प्रक्षेपणीयः काष्ठादिमयः सम्पुटः.

CARTRIDGE, *s.* आग्नेयचूर्णकोषः, चूर्णगुलिकाकोषः; यो चूर्णगोलकौ एकधारे युद्धनाडी निवेशयितव्यौ तयोः पूर्णम् आवेष्टनं.

CART-RUT, *s.* शकटचक्रचिह्नं, चक्राङ्कं, चक्रचिह्नं, चक्रपद्धती, चक्रपद्धतिः *f.*

CARTULARY, *s.* आगमपत्रं, पांशुपत्रं, पट्टोलिका, पञ्जिका.

CART-WAY, *s.* रथ्या, रथमार्गः, शकटमार्गः, शकटपथः, गन्त्रीमार्गः.

CART-WRIGHT, *s.* रथकारः, शकटकारः, गन्त्रीकारकः, चक्रकारः.

To CARVE, *v. a.* (To cut) कृत् (c. 6. कृन्तति, कर्त्तितुं), विकृत्, छिद् (c. 7. छिनत्ति छेत्तुं).—(To cut meat) भोजनकाले परपरिवेषणार्थं खाद्यमांसादि निकृत् or व्यवछिद्, मांसादि परिविष् or परिविश् in caus. (-वेषयति -यितुं).—(To engrave) तक्ष् (c. 1. तक्षति, c. 5. तक्ष्णोति, तक्षितुं), त्वक्ष् (c. 1. त्वक्षति, त्वक्षितुं), रेखादिना अलङ्कृ or मुद्रीकृ, मुद्र् (nom. मुद्रयति -यितुं).—(To apportion) कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, विभज् (c. 1. -भजति -भक्तुं).

CARVED, *p. p.* निकृत्तः -त्ता -त्तं, व्यवछिन्नः -न्ना -न्नं, तष्टः -ष्टा -ष्टं, परिकल्पितः -ता -तं.

CARVER, *s.* (A sculptor) तक्षकः, तष्टा *m.* (ष्टृ), त्वष्टा *m.* (ष्टृ), मुद्राकरः.—(One who cuts meat at a table) भोजनकाले परपरिवेषणार्थं खाद्यमांसव्यवछेदकः, परिवेषकः, परिवेशकः.—(One that apportions) परिकल्पकः, विभागकल्पयिता *m.* (तृ).

CARVING, *s.* (Sculpture, engraving) तक्षणं, तक्षणकर्म्म *n.* (न्).—(Cutting up meat) खाद्यमांसादिव्यवछेदः.—(Distributing) परिकल्पनं, विभागकल्पना.—(Carved wood, &c.) तष्टकाष्ठं, नानारेखालङ्कृतं काष्ठादि.

CARUNCLE, *s.* (A fleshy protuberance) अधिमांसः, मांसपिण्डः, गण्डः, त्वक्पुष्पं, मांसवृद्धिः *f.*

CASCADE, *s.* निर्झरः -री, झरः, वारिप्रवाहः, प्रपातः, सरः -री, प्रस्रवणं, स्रवः.

CASE, *s.* (A covering, sheath) आच्छादनं, कोशः, कोषः, पुटः, पटलं, आवेष्टनं, आवरणं, पिधानं, व्यवधानं, तिरोधानं.—(A box) भाण्डं, आधारः, सम्पुटः, समुद्गः, पिधानं; 'a case for books,' ग्रन्थभाण्डं, ग्रन्थाधारः; 'a case for razors,' क्षुरभाण्डं.—(State of the case, matter) अर्थः, वृत्तान्तः, विषयः.—(Point, question) स्थलं, पदं, अधिकरणं.—(A position advanced) पक्षः, प्रतिज्ञा.—(Condition) अवस्था, दशा, भावः, स्थितिः *f.*, वृत्तिः *f.*—(State of the body) शरीरस्थितिः *f.*—(Contingence, occurrence) प्रवृत्तिः *f.*, सङ्गतं, वृत्तं.—(Inflection of nouns) विभक्तिः *f.*, कारकः *f.*; 'the true state of the case,' यथार्थतः; 'case in point,' दृष्टान्तः; 'in both cases,' उभयथा, पक्षद्वये; 'in certain cases,' क्वचित्; 'this being the case,' एवं सति, तथा सति;' 'in case, if it should happen,' यदि, चेत्, यदि सम्भवेत्, एवं सति; 'upon the supposition,' पक्षे.

To CASE, *v. a.* (To put in a case) भाण्डे or आधारे निविश् in caus. (-वेशयति -यितुं).—(To cover) पिधा (c. 3. -दधाति -धातुं), आच्छद् (c. 10. -छादयति -यितुं).

To CASEHARDEN, *v. a.* वाह्यतस् or बहिर्भागे दृढीकृ or कठिनीकृ.

CASEMATE, *s.* वप्रस्य पार्श्वभागाभ्यन्तरे तोरणाकारा प्रस्तरनिर्म्मिता गुप्तिः.

CASEMENT, *s.* जालं -लिका, गवाक्षः, वातायनं, गवाक्षजालं, आकाशजननी *m.* (न्).

CASEWORM, *s.* कोषकारः, कोशकारः -रकः, कोशस्थः.

CASH, *s.* टङ्कः, टङ्ककः, मुद्रा, नाणकं, धनं.

CASH-KEEPER OR CASHIER, *s.* टङ्करक्षकः, टङ्काधीशः, टङ्काधिकृतः.

To CASHIER, *v. a.* पदात् or अधिकाराद् भ्रंश् in caus. (भ्रंशयति -यितुं), प्रभ्रंश्, or निपत् in caus. (-पातयति -यितुं) or अवरुह् in caus. (-रोपयति -यितुं) or अपसृ in caus. (-सारयति -यितुं) or विसृज् in caus. (-सर्जयति -यितुं), or च्यु in caus. (च्यावयति -यितुं).

CASHIERED, *p. p.* च्युताधिकारः -रा -रं, भ्रष्टाधिकारः -रा -रं, पदात्प्रभ्रंशितः -ता -तं, अधिकारात्प्रभ्रंशितः -ता -तं or निराकृतः -ता -तं or अवरोपितः -ता -तं, अपसृतः -ता -तं.

CASING, s. छादनं, आच्छादनं, पटलं, पुटः, कोषः, कोशः, आवेष्टनं.

CASK, s. भाण्डं, भाजनं, दीर्घगोलाकृति काष्ठमयभाण्डं.

CASKET, s. सम्पुटः -टकः, समुद्गः, स्वर्णिका, पेटिका, पेटकः, करण्डः; 'of jewels,' रत्नभाण्डं.

CASQUE, s. शिरस्त्राणं, शिरस्त्रं, शिरस्कं, शीर्षरक्षं, शीर्षण्यं.

To CASSATE, v.a. (Invalidate) खण्ड् (c. 10. खण्डयति -यितुं), मोघीकृ, व्यर्थीकृ.

CASSIA, s. (A plant) प्रपुन्नाडः, एडगजः, दद्रुघ्नः, चक्रमर्द्दकः, शिग्रुः.—(Woody cassia) त्वक्पत्रं, उत्कटं, भृङ्गं.—(Bark) गन्धवल्कलं, गुडत्वक्, सुरसं.

CASSIOWARY, s. वृहत्कायः प्रतुदभेदः, अतिमहान् पक्षिप्रभेदः.

CASSOCK, s. (Part of a priest's dress) अधुनातनपुरोहितैर् भृतं परिधानं or अन्तरीयं or उपसंव्यानं.

To CAST, v.a. (Throw) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, अस् (c. 4. अस्यति, असितुं), प्रास्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), ईर् (c. 10. ईरयति -यितुं), उदीर्, पत् in caus. (पातयति -यितुं); 'to cast one's self at another's feet,' परस्य पादयोः पत् (c. 1. पतति, पतितुं); 'into prison,' कारायां प्रविश् in caus. (-वेशयति -यितुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं).—(Compute) विगण् (c. 10. -गणयति -यितुं), संख्या (c. 2. -ख्याति -ख्यातुं), कल् (c. 10. कलयति -यितुं).—(Cast in a law-suit) साध् in caus. (साधयति -यितुं), दा in caus. (दापयति -यितुं).—(Condemn) दोषीकृ, दोषिणं -णीं -णि कृ.—(Found as metals) लोहादि द्रावयित्वा or विलाप्य सन्धा (c. 3. -दधाति -धातुं).—(Consider, weigh) विचिन्त् (c. 10. -चिन्तयति -यितुं), विचर् in caus. (-चारयति -यितुं), विगण्.—(Shed, moult) निर्मुच् (c. 6. -मुञ्चति -मोक्तुं), पत् in caus. (-पातयति -यितुं).—(Cast away) अपास्, व्युदस्, प्रास्, प्रक्षिप्, अपव्यध् (c. 4. -विध्यति -ते -व्यद्धुं), परित्यज् (c. 1. -त्यजति -त्यक्तुं).—(Cast down) पत् in caus. निपत्, विनिपत्, अधःपत्, अवक्षिप्, पर्य्यस्, अधःक्षिप्, निक्षिप्.—(Cast forth, emit) उदीर्, मुच्, प्रमुच्, निरस्, उत्सृज्, उद्गॄ (c. 6. -गिरति -गरितुं -गरीतुं), उद्वम् (c. 1. -वमति -वमितुं).—(Cast off) अवमुच्, अपास्, प्रतिक्षिप्, विक्षिप्, पराकृ (c. 8. -करोति -कर्त्तुं), अपाहा (c. 3. -जहाति -हातुं), निर्णुद् (c. 6. -णुदति -णोत्तुं).—(Cast out, expel) निरस्, वहिःक्षिप्, वहिर्निक्षिप्, वहिष्कृ, निराकृ, निर्या in caus. (-यापयति -यितुं), निःसृ in caus. (-सारयति -यितुं), भ्रंश् in caus. (भ्रंशयति -यितुं), अपानुद्, निष्क्रम् in caus. (-क्रामयति -यितुं).—(Cast the eye, glance) दृष्टिं पत् in caus., ईषद्दर्शनं कृ.—(Cast lots) गुटिकां पत् in caus.

CAST, p.p. क्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं, प्रास्तः -स्ता -स्तं, ईरितः -ता -तं, पातितः -ता -तं, नुन्नः -न्ना -न्नं, नुत्तः -त्ता -त्तं.—(Cast off) अपास्तः -स्ता -स्तं, समाक्षिप्तः -प्ता -प्तं.—(Cast in a law-suit) साधितः -ता -तं, दापितः -ता -तं.

CAST, s. (A throw) क्षेपः, क्षेपणं, असनं, पातनं; 'cast of a stick,' यष्टिपातः.—(Oblique direction of the eye) दृष्टितिर्य्यक्त्वं, दृष्टिविक्षेपः; 'having a cast in the eye,' तिर्य्यग्दृष्टिः m., टेरितेक्षणः, ककराक्षः.—(Mould) संस्कारः, संधानः, रूपं, आकारः, संस्थानं, मूर्त्तिः f.

CASTANETS, s. करर्द्धिः m., एकताली, हस्तवर्णी, करताली.

CASTAWAY, s. त्याज्यः, अग्राह्यः, अग्रहणीयः, उत्सृष्टः, महापातकी m. (न्), अपांक्तेयः.

CASTE, s. वर्णः, वर्गः, कुलं, जातिः f.; 'of low caste,' विवर्णः, नीचः, प्राकृतः, हीनजातिः m. f., निकृष्टजातिः m. f.; 'of good caste,' सुवर्णः, वर्णश्रेष्ठः, उत्कृष्टजातिः; 'of mixed caste,' सङ्कीर्णः; 'loss of caste,' जातिभ्रंशः.—(Outcaste) जातिहीनः -ना -नं, वर्णहीनः, अपसदः, चाण्डालः

CASTELLAN, s. दुर्गाधिपतिः m., दुर्गाधिकारी m. (न्), दुर्गाध्यक्षः, कोटिपालः.

CASTELLATED, s. (Formed like a castle) दुर्गाकारः -रा -रं, कूटाकृतिः -तिः -ति.

CASTER, s. (A thrower) क्षेपकः, क्षेप्ता m. (तृ), असिता m. (तृ), प्रासकः.—(A calculator) गणकः, गणयिता m. (तृ).

To CASTIGATE, v.a. दण्ड् (c. 10. दण्डयति -यितुं), तड् (c. 10. ताडयति -यितुं), शास् (c. 2. शास्ति, शासितुं or caus. शासयति -यितुं), अनुशास्.

CASTIGATION, s. दण्डः, साहसं, शिष्टिः f., अनुशासनं, ताडः, ताडनं, निग्रहः.

CASTIGATORY, a. दाण्डः -ण्डी -ण्डं, साहसिकः -की -कं, प्रायश्चित्तिकः -की -कं.

CASTING-HOUSE, s. सन्धानी, लोहादिद्रावणस्थानं, धातुविलयनशाला, कुप्यशाला.

CASTING-NET, s. क्षेपणिः f. -णी, हस्तेन प्रक्षेपणीयं सद्यश्चोत्तोलनीयं लघुजालं.

CASTLE, s. दुर्गं, कूटः, कूटः, कोटः, कोटिः f.—(Castle in the air) गगनकुसुमं, अनर्थकवासना, अनर्थकभावना, मनोरथसृष्टिः f.

CASTLING, s. गर्भपतितः, गर्भच्युतः, गर्भभ्रष्टः.

CASTOR, s. (A beaver) जलजन्तुविशेषः, जलमार्जारविशेषः.—(A hat) पूर्व्वोक्तजलजन्तुलोमनिर्म्मितम् अधुनातनपुम्भिर् भृतं शिरस्कं, शिरस्त्रं.

CASTOR-OIL, s. एरण्डतैलं, एरण्डरसः, रुवुतैलं, अमण्डतैलं.

CASTRAMETATION, s. शिविरनिवेशनविद्या, कटकनिवेशनं, कटकसमावासः, रचना.

To CASTRATE, v.a. वृषणौ उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), वृषणद्वयं उत्पट् in caus. (-पाटयति -यितुं).

CASTRATED, p.p. छिन्नवृषणः -णा -णं, छिन्नमुष्कः -ष्का -ष्कं, मुष्कशून्यः -न्या -न्यं.

CASTRATION, s. वृषणच्छेदः, वृषणोत्कर्त्तनं, मुष्कच्छेदनं, वृषणोत्पाटनं.

CASTREL, s. श्येनः, कपोतारिः m., श्येनजातीयः पक्षिभेदः.

CASTRENSIAN, a. शिविरसम्बन्धी -न्धिनी -न्धि (न्), सैनिकः -की -कं.

CASUAL, a. आगन्तुकः -का -कं, आकस्मिकः -की -कं, आपतिकः -की -कं, दैवायत्तः -त्ता -त्तं, दैविकः -की -कं, अकाण्डः -ण्डा -ण्डं, अदृष्टः -ष्टा -ष्टं, अचिन्तितः -ता -तं, अतर्कितः -ता -तं, नैमित्तिकः -की -कं.

CASUALLY, adv. अकस्मात्, दैवात्, आगन्तुकप्रकारेण, अचिन्तितं, अतर्कितं.

CASUALNESS, s. आकस्मिकत्वं, आगन्तुकत्वं, दैवायत्तता, दैवाधीनता.

CASUALTY, s. सङ्गतिः -तं, अकस्मात्सङ्गतं, दैवगतिः f., दैवयोगः, दैवघटनं, आगन्तुः m., अतिवर्त्तनं.—(Unseen danger) अदृष्टं.

CASUIST, s. धर्म्माधर्म्मविचारकः, धर्म्माधर्म्मविषये विवादी m. (न्) or वादानुवादविद्याज्ञः, धर्म्माधर्म्मोपदेशकः, कार्य्याकार्य्यनिर्णयविदग्धः.

CASUISTICAL, a. धर्म्माधर्म्मविचारणविषयः -या -यं, धर्म्माधर्म्मोपदेशसम्बन्धी -न्धिनी -न्धि (न्).

CASUISTRY, s. धर्म्माधर्म्मविचारणविद्या, धर्म्माधर्म्मविषये वादानुवादविद्या, कार्य्याकार्य्यनिर्णयः, धर्म्माधर्म्मोपदेशः, इदं कर्त्तव्यं इदम् अकर्त्तव्यं इति विवेचनविद्या.

CAT, s. मार्जारः, विडालः, ओतुः m., कुन्दमः, मूषकारातिः m., आखुभुक् m. (ज्), वृषदंशकः, पयस्यः, व्याघ्रास्यः, दीप्ताक्षः.

CAT-O'-NINE-TAILS, s. नवबलिसङ्ग्रयुक्ता कशा, नवरज्जुयुक्ता ताडनी, नवग्रन्थिष्कशयुक्ता चर्म्मयष्टिः.

CATACHRESIS, s. कुत्सितलक्षणविशेषः यथा कर्णाभ्यां पीयते सुकवेः शब्द इति.

CATACLYSM, s. भूतसम्प्लवः, आप्लावः, जलाप्लावनं, पृथिवीप्लावः.

CATACOMBS, s. भूमौ खाताः शवगोपनयोग्या गूढमार्गाः, अन्तर्भौमश्मशानं.

CATALECTIC, a. न्यूनैकाक्षरः -रा -रं, छन्दोविशेषः.

CATALEPSIS, s. ग्रहामयः, अपस्मारः, भ्रामरं, भूतविक्रिया, अङ्गविकृतिः f.

CATALOGUE, s. परिसंख्या, अनुक्रमणिका, परिगणना, एकैकशः परिसंख्या, सङ्ग्रहः, सूचिः f.; 'of names,' नामावलिः f.

Catamenia, *s.* ऋतुः *m.*, आर्त्तवं, रजः *n.* (स्), पुष्पं, योनिरञ्जनं.

Cataphract, *s.* संवर्म्मितः or सर्व्वसन्नाहयुक्तः अश्वारूढः सैनिकः.

Cataplasm, *s.* उत्कारिका, लेपः, प्रलेपः, उपनाहः.

Catapult, *s.* पूर्व्वकालीनयोद्धृभिः प्रस्तरप्रक्षेपणे प्रयुक्तो युद्धयन्त्रविशेषः.

Cataract, *s.* निर्झरः -री, झरः, वारिप्रवाहः, प्रपातः, सरः -री, प्रस्रवणं, उच्चदेशात् तोयपतनं.—(Disease of the eye) मन्थः, लिङ्गनाशः, शुक्रः, नेत्रपटलं.

Catarrh, *s.* पीनसः, प्रतिश्यायः, काशः -सः, श्लेष्मा *m.* (न्), कफः.—(Having one) पीनसी *m.* (न्), काशी *m.* (न्).

Catarrhal, *a.* पीनसी -सिनी -सि (न्), काशी -शिनी -शि (न्), कफी -फिनी -फि (न्), श्लेष्मलः -ला -लं, पीनससम्बन्धी -न्धिनी -न्धि (न्).

Catastrophe, *s.* (Of a drama) निष्ठा, निर्व्वहणं.—(Conclusion) परिणामः, निर्व्वाहः, निर्वृत्तिः *f.*—(Event) सङ्गतिः *f.*—(Misfortune) आपद् *f.*, विपद् *f.* दुर्गतिः *f.*

Cat-call, *s.* रङ्गे प्रेक्षकाणाम् अप्रसादवाचको विस्वरवाद्यविशेषः.

To catch, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्त्तुं), लभ् (c. 1. लभते, लब्धुं), प्राप् (c. 5. -आप्नोति -आप्तुं).—(Lay hold with the hand) सङ्ग्रह्, परिग्रह्, परामृश् (c. 6. -मृशति -म्रष्टुं), अवलम्ब् (c. 1. -लम्बते -लम्बितुं).—(Receive suddenly) अकस्माद् ग्रह् or लभ् or प्राप्; 'to catch cold,' पीनसग्रस्तः -स्ता -स्तं भू, पीनसोपहतः -ता -तं भू; 'to catch a distemper,' सम्पर्कात् or संसर्गाद् रोगग्रस्तः -स्ता -स्तं भू; 'to catch fire,' अकस्माद् दह् in pass. (दह्यते) or दीप् (c. 4. दीप्यते, दीपितुं), लब्धदाहः -हा -हं भू, अग्निदीप्तः -प्ता -प्तं भू, अग्निं ग्रह्.—(Ensnare, entrap) ग्रह्, धृ, बन्ध् (c. 9. बध्नाति, बन्द्धुं), प्रलुभ् in caus. (लोभयति -यितुं), वञ्च् in caus. (वञ्चयते -यितुं): 'to catch fish,' मत्स्यान् धर्त्तुं or ग्रहीतुं.—(Come upon unexpectedly) अकस्माद् आसद् (c. 10. -सादयति -यितुं) or समासद् or प्राप्; 'caught out in a fault,' दृष्टदोषः -षा -षं. 'I caught him in the act of stealing,' चौरयन्तमेव तम् आसादयं or उपास्थिषं.—(Allure) प्रलुभ् in caus., आकृष् (c. 1. -कर्षति -क्रष्टुं).—(Catch up, snatch, seize) हृ (c. 1. हरति, हर्त्तुं), अपहृ, हृत्वा अपनी.—(To spread as contagion) सञ्चर् (c. 1. -चरति -चरितुं).

Catch, *s.* (Seizure) ग्रहणं, ग्रहः, सङ्ग्रहणं, सङ्ग्राहः, धरणं, हरणं.—(Any thing that catches) ग्राहकः -कं, ग्रहः, धरः; 'a latch,' तालकं; 'a clasp,' कुडुपः.—(Prize, advantage) लाभः, प्राप्तिः *f.*, लोप्त्रं, फलं.—(A song sung in succession) पर्य्यायगीतं, परस्परगीतं, परिवर्त्तकगीतं.

Catcher, *s.* ग्राहकः, वागुरिकः, जालिकः, लुब्धकः.—(That in which fish, &c. are caught, a snare for animals) मत्स्यधानी, मृगबन्धिनी, वागुरा, जालं.

Catching, *a.* (Contagious) सञ्चारकः -का -कं, सञ्चारी -रिणी -रि (न्), सम्पर्कीयः -या -यं, स्पर्श्यः -र्शा -र्शं.

Catchpole, *s.* आसेद्धा *m.* (द्धृ), आसेधकर्त्ता *m.* (र्त्तृ), ग्राहकः, यष्टिधरः.

Catchword, *s.* मुद्राकरभाषायां परपत्रगः शब्दः.

Catechetical, *a.* प्राश्नोत्तरिकः -की -कं, प्रश्नोत्तरमयः -यी -यं, प्रश्नोत्तरविशिष्टः -ष्टा -ष्टं, सप्रश्नोत्तरः -रा -रं.

Catechetically, *adv.* प्रश्नोत्तरक्रमेण, सप्रश्नोत्तरं, प्रश्नोत्तरद्वारेण.

To catechise, *v. a.* प्रश्नोत्तरद्वारेण or प्रश्नोत्तरक्रमेण उपदिश् (c. 6. -दिशति -देष्टुं) or शिक्ष् in caus. (शिक्षयति -यितुं) or अधी in caus. (अध्यापयति -यितुं).—(To interrogate) प्रच्छ् (c. 6. पृच्छति, प्रष्टुं), परीक्ष् (c. 1. -ईक्षते -ईक्षितुं).

Catechising, *s.* प्रश्नोत्तरद्वारेण शिक्षा or उपदेशः or अध्यापनं, परीक्षा.

Catechism, *s.* (Form of question and answer) प्रश्नोत्तरं, कथोपकथनं, उत्तरप्रत्युत्तरं, प्रश्नोत्तरविधिः *m.*, प्रश्नोत्तररीतिः *f.*, सप्रश्नोत्तरः पाठः.

Catechist or catechiser, *s.* प्रश्नोत्तरद्वारेण or प्रश्नोत्तरक्रमेण or प्रश्नोत्तरविधिना उपदेशकः or शिक्षकः or अध्यापकः or पाठकः.

Catechumen, *s.* नवछात्रः, नवशिष्यः, नवाधीयानः, प्राथमकल्पिकः.

Categorical, *a.* एकार्थः -र्था -र्थं, व्यक्तः -क्ता -क्तं, सुव्यक्तः -क्ता -क्तं, अवक्रः -क्रा -क्रं, स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, वाचकः -का -कं, नियतः -ता -तं, पर्य्याप्तः -प्ता -प्तं, सव्यञ्जनः -ना -नं.

Categorically, *adv.* एकार्थं, सुव्यक्तं, स्पष्टं, स्पष्टार्थं, अवक्रं, वाचकतया.

Category, *s.* पदार्थः, समानाधिकरणं, समानपदं, समानवर्गः, पदं.—(Of individual application) अव्याप्यवृत्तिः *f.*

Catenarian, *a.* शृङ्खलाकारः -रा -रं, शृङ्खलसम्बन्धी -न्धिनी -न्धि (न्).

Catenation, *s.* शृङ्खलता, शृङ्खलत्वं, पर्य्यायः, सम्बन्धः.

To cater, *v. a.* भोजनादि परिकॢप् (c. 10. -कल्पयति -यितुं) or उपकॢप् or सम्भृ (c. 1. -भरति, c. 3. -बिभर्त्ति -भर्त्तुं) or युज् in caus. (योजयति -यितुं).

Caterer, *s.* भोजनाधिकारी *m.* (न्), भोजनाधिकृतः, भोजनाधिष्ठाता *m.* (तृ), अन्नादिपरिकल्पकः.

Caterpillar, *s.* वृश्चिकः, शूककीटः, कोशवासी *m.* (न्), कोषकारी *m.* (न्).

To caterwaul, *v. n.* मत्तबिडालवद् रु (c. 2. रौति, रवितुं), मेनादं कृ.

Caterwauling, *s.* मत्तबिडालरुतं, मैथुनमार्ज्जारचीत्कारः, कर्कशरावः, मेनादः.

Cates, *s. pl.* स्वाद्वन्नं, विशिष्टान्नं, भोजनविशेषाः *m. pl.*, मिष्टान्नं.

Cat-gut, *s.* बिडालादिपुरीतन्निर्म्मिता तन्त्रीः, जन्तुनाडिमयं सूत्रं, तन्तुः *m.*

Cathartic, *s.* रेचकः, रेचनं, विरेकः, विरेचनं, उदरशोधनं.

Cathartical, *a.* रेचकः -की -कं, विरेचकः -की -कं, अधोभागहरः -रा -रं, अतिसारी -रिणी -रि (न्), शोधकः -का -कं.

Cathedral, *s.* महापूजाशाला, महाभजनभवनं, महामण्डपः, महामन्दिरं, महाधर्म्माध्यक्षाधिष्ठिता पूजाशाला.

Cathedral, *a.* महाधर्म्माध्यक्षमठसम्बन्धी -न्धिनी -न्धि (न्), महापूजाशालासम्बन्धीयः -या -यं.

Catheter, *s.* मूत्रकृच्छ्रपीडितानां मेहमोचनार्थं मूत्रमार्गनिवेशयितव्या वक्रनाडिः.

Catholic, *a.* सामान्यः -न्या -न्यं, सर्व्वसामान्यः -न्या -न्यं, साधारणः -णा -णं, सर्व्वसाधारणः -णा -णं, सार्व्वः -र्व्वी -र्व्वं, सार्व्वत्रिकः -की -कं, सर्व्वीयः -या -यं, सार्व्वलौकिकः -की -कं, सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं.

Catholic, *s.* सर्व्वसाधारणमतस्थः, सर्व्वसामान्यमतधारी *m.* (न्).—(Roman Catholic) रोमीयमतधारी *m.* (न्).

Catholicism, *s.* साधारण्यं, सामान्यं, सर्व्वसाधारण्यं, सर्व्वसामान्यं.

Catholicon, *s.* सर्व्वसाधारणभेषजं, सर्व्वसम्मतभेषजं.

Catkins, *s.* तरुशाखातो लम्बमाना बिडालपुच्छाकारा हरितपुष्पश्रेणी.

Catling, *s.* शस्त्रचिकित्सकैर् अङ्गच्छेदने प्रयुक्तः कर्त्तरिकाविशेषः.

Catoptrical, *a.* वक्ष्यमाणचाक्षुषविद्याङ्गसम्बन्धी -न्धिनी -न्धि (न्).

Catoptrics, *s.* चाक्षुषविद्यायाः प्रतिबिम्बविषयकम् अङ्गं.

Cattle, *s.* गावः *m. pl.*, गोधनं, गोकुलं; 'cattle for draught,' धुरीणः, धुर्य्यः; 'fit for any draught,' सर्व्वधुरीणः, सर्व्वधुरावहः; 'rich in cattle,' गोमान् -मती -मत् (त्), गोमी -मिनी -मि (न्); 'capture of cattle,' गोग्रहः; 'cattle-keeper,' गोपालः, पशुपालः; 'the keeping of cattle,' पाशुपाल्यं.

Cavalcade, *s.* आश्विकयात्रा, सादिनां or अश्वारोहिणां यात्रा or श्रेणी.

Cavalier, *s.* सादी *m.* (न्), अश्ववारः, आश्विकः, अश्वारूढः, अश्वारोही *m.* (न्), अश्ववहः, हयारूढः, तुरगी *m.* (न्), तुरङ्गी *m.* (न्).

Cavalierly, *adv.* (Disdainfully) सावमानं, अवमानेन, सदर्पं, सगर्व्वं,

सावलेपं, सावहेलं.—(To treat cavalierly) अवमन् (c. 4. -मन्यते -मन्तुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), कदर्थीकृ, लघूकृ.

CAVALRY, *s.* आश्वं, आश्विकं, अश्वीयं, अश्वाः *m. pl.*, अश्वारोहाः *m. pl.*, अश्वारोहं सेनाङ्गं, अश्वारूढाः *m. pl.*, अश्वारोहिणः *m. pl.*, हयारूढाः *m. pl.*, अश्ववहाः *m. pl.*, सादिनः *m. pl.*, तुरङ्गिणः *m. pl.*, तुरङ्गयायिनः *m. pl.*

To CAVATE, *v. a.* (To hollow) खन् (c. 1. खनति, खनितुं, खातुं), शुषिरीकृ.

CAVATION, *s.* गृहतले खातं, गृहस्याधस्तात् खाता शुषिः.

CAUDATED, *a.* पुच्छी -च्छिनी -च्छि (न्), लाङ्गूली -लिनी -लि (न्).

CAUDLE, *s.* प्रसूताभिर् आहार्यं मद्यादिसम्मिश्रितं पानीयं.

CAVE or CAVERN, *s.* बिलं, विवरं, कन्दरः -रा, गर्तः, गह्वरं -री, रन्ध्रं, गुहा, गुहागृहं, निर्हरिः *m.*, दरी *f.*, शैलरन्ध्रं.—(Excavation) खातं, देवखातं, देवखातबिलं.

CAVEAT, *s.* सावधानो भव इति विज्ञापनं, निषेधः, निषेधपत्रं.

CAVERNED, *a.* (Full of caverns) गह्वरी -रिणी -रि (न्).—(Excavated) खातः -ता -तं.—(Inhabiting caverns) गह्वरवासी -सिनी -सि (न्) or -भाक् (ज्), बिलवासी -सिनी -सि (न्).

CAVESSON, *s.* अश्वदमने प्रयुक्तं नासायन्त्रणं.

CAUGHT, *p. p.* गृहीतः -ता -तं, धृतः -ता -तं, प्राप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, बद्धः -द्धा -द्धं; 'caught in a net,' जालबद्धः -द्धा -द्धं; 'caught hold of,' सङ्गृहीतः -ता -तं, अवलम्बितः -ता -तं; 'caught out in a crime,' दृष्टदोषः -षा -षं; 'caught by a glance,' कटाक्षमुष्टः -ष्टा -ष्टं.

CAVIAR, *s.* लवणादिसन्धितं वृहन्मत्स्याण्डं, लवणार्क्तं मीनाण्डं.

To CAVIL, *v. a.* मिथ्या विवद् (c. 1. -वदते -वदितुं) or निन्द् (c. 1. निन्दति -न्दितुं), वाक्यं खण्ड् (c. 10. खण्डयति -यितुं), दोषं or छिद्रम् अन्विष् (c. 6. -इच्छति -एषितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), विप्रलप् (c. 1. -लपति -लपितुं), दोषीकृ.

CAVIL, *s.* मिथ्याविवादः, विवादः, उद्ग्राहः, मिथ्योद्ग्राहः, दोषग्राहः, दोषकल्पनं, दोषप्रसङ्गः, छिद्रान्वेषः, मिथ्यापत्तिः *f.*, मिथ्यावितर्कः, विप्रलापः, वाक्यखण्डनं, वाक्यविरोधः, अपवादः, वाग्युद्धं, वितण्डा, विप्रतिपत्तिः *f.*

CAVILLER, *s.* विवादशीलः, उद्ग्राहशीलः, मिथ्याविवादी *m.* (न्), उद्ग्राहमल्लः.

CAVILLING, *a.* दोषग्राही -हिणी -हि (न्), विवादी -दिनी -दि (न्), छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्), घृणी -णिनी -णि (न्), निन्दकः -का -कं, अपवादकः -का -कं, विसंवादी -दिनी -दि (न्).

CAVILLINGLY, *adv.* मिथ्याविवादपूर्वकं, विवादशीलत्वात्, छिद्रान्वेषिवत्.

CAVITY, *s.* गर्त्तः, छिद्रं, विवरं, खातं, बिलं, रन्ध्रं, कोशः, कुहरं, अवटः, अवटिः *m.*

CAUL, *s.* (Covering for the head) शिरोवेष्टनं.—(Integument of the bowels) अन्त्रावेष्टनं, पुरीतदावेष्टनं.—(Membrane encompassing the head of a new-born child) सद्यो योनिजातस्य बालकस्य मस्तकावेष्टकः कोशविशेषः, गर्भवेष्टनं, गर्भाशयः.

CAULIFEROUS, *a.* प्रकाण्डविशिष्टः -ष्टा -ष्टं, काण्डवान् -वती -वत् (त्), मञ्जरितः -ता -तं.

CAULIFLOWER, *s.* शाकप्रभेदः, हरितकः, शिग्रुः *m.*

CAUSABLE, *a.* उत्पादनीयः -या -यं, उत्पादयितुं शक्यः -क्या -क्यं.

CAUSAL, *a.* कारणिकः -की -कं, हेतुकः -का -कं, हैतुकः -की -कं.—(Causal verb) प्रेरणं.

CAUSALITY or CAUSATION, *s.* कारणत्वं -ता, हेतुता -त्वं, निमित्तत्वं, प्रयोजककर्तृत्वं.

CAUSATIVE, *a.* उत्पादकः -का -कं, जनिकः -का -कं, जनयिता -त्री -तृ (तृ).

CAUSE, *s.* (That which effects, motive, reason) कारणं, हेतुः *m.*, निमित्तं -त्तकं, निदानं, प्रयोजनं, निबन्धनं, करणं, उपाधिः *m.*—(Origin) प्रभवः, उद्भवः, सम्भवः, योनिः *f.*, बीजं, बैजिकं, मूलं;

'without cause,' अकस्मात्; 'for this cause,' अनेन हेतुना, तदर्थं, तस्य हेतोः; 'primary cause,' आद्यबीजं, आदिकारणं; 'a good cause,' सन्निमित्तं; 'cause and effect,' कार्यकारणं.—(The person who effects) उत्पादकः, कारकः, कर्त्ता *m.* (र्तृ), प्रयोजकः, प्रवर्त्तकः.—(Subject of litigation) अर्थः; 'one who has lost his cause,' साधितः.—(Occasion) प्रयोजनं, कारणं, स्थानं, अवसरः.—(Side, party) पक्षः; 'one's own cause,' आत्मपक्षः.

To CAUSE, *v. a.* जन् in caus. (जनयति -यितुं), उत्पद् in caus. (-पादयति -यितुं), कृ (c. 8. करोति, कर्त्तुं), साध् in caus. (साधयति -यितुं), निमित्त (nom. निमित्तायते). Sometimes भू is used with the dat. c.; as, 'that will cause my destruction,' तन्मम विनाशाय भविष्यति: or even the dative alone may be used; as, तन्मम विनाशाय. Sometimes a phrase like the following may be found; 'I was not the cause of this deed,' इदं कर्म्म न मत्स्वामिकं or मत्कर्तृकं.

CAUSED, *p. p.* कारितः -ता -तं, कृतः -ता -तं, जनितः -ता -तं, उत्पादितः -ता -तं, कारणभूतः -ता -तं, उद्भवः -वा -वं or प्रभवः -वा -वं in comp.; as, 'caused by the wind,' अनिलोद्भवः -वा -वं.

CAUSELESS, *a.* निष्कारणः -णा -णं, निर्निमित्तः -त्ता -त्तं, अनिमित्तः -त्ता -त्तं, निष्प्रयोजनः -ना -नं, अहेतुकः -का -कं, अनिदानः -ना -नं, हेतुशून्यः -न्या -न्यं; 'causeless state,' विलक्षणं.

CAUSELESSLY, *adv.* निष्प्रयोजनं, अकारणं, अकारणात्, निष्कारणं, अनिमित्ततस्, निर्निमित्तं, असति प्रयोजने, हेतुना विना, हेतुं विना.

CAUSER, *s.* कारकः, कर्त्ता *m.* (र्तृ), करः, कारः, उत्पादकः, जनकः, जनयिता *m.* (तृ), प्रयोजकः, प्रवर्त्तकः.

CAUSEWAY, *s.* सेतुः *m.*, सेतुबन्धः, पाली, पिण्डलः, पिण्डिलः, धरणः, संवरं.

CAUSTIC, *a.* (Burning, corrosive) दाहकः -का -कं, अरुन्तुदः -दा -दं, अरुष्करः -रा -रं, क्षयकरः -री -रं, तिग्मः -ग्मा -ग्मं.—(Biting, satirical) अरुन्तुदः -दा -दं, दंशेरः -रा -रं, मर्म्मभेदी -दिनी -दि (न्), मर्म्मस्पृक् *m. f. n.* (श्).

CAUSTICITY, *s.* अरुन्तुदत्वं -ता, अरुष्करत्वं -ता.

CAUTELOUS, *a.* (Cunning, wily) विदग्धः -ग्धा -ग्धं, विचक्षणः -णा -णं.

CAUTERIZATION, *s.* दाहः, दाहनं, उपयन्त्रेण or तप्तलोहेन or तिग्मौषधप्रयोगेण मांसदाहनं, क्षारकर्म्म *n.* (न्), कृशानुकर्म्म, क्षारार्पणं.

To CAUTERIZE, *v. a.* दह् in caus. (दाहयति -यितुं), तप्तलोहेन or उपयन्त्रेण or तिग्मौषधप्रयोगेण मांसं दह्, क्षारम् ऋ in caus. (अर्पयति -यितुं).

CAUTERY, *s.* (Actual) दाहः, उपयन्त्रं, तप्तलोहेन मांसदाहः, क्षारः.—(Potential) दाहः, औषधीयारुन्तुदद्रव्यप्रयोगेण मांसदाहः.

CAUTION, *s.* (Prudent care) अवधानं -नता, सावधानता, समीक्षा -क्षणं, प्रसमीक्षा, अवेक्षा, अन्ववेक्षा, अपेक्षा, अप्रमादः, चिन्ता, कार्य्यचिन्ता, विवेचनं, चेतना, आशङ्का, आशङ्काशीलता.—(Warning) प्रत्यादेशः, अवधेहि or सावधानो भव इति विज्ञापनं, सन्देशः.—(Security) प्रातिभाव्यं, पारिभाव्यं, बन्धकः, आधिः *m.*

To CAUTION AGAINST, *v. a.* प्रत्यादिश् (c. 6. -दिशति -देष्टुं), सन्दिश्; अवधेहि or अवधत्स्व or सावधानो भव इति विज्ञा in caus. (-ज्ञापयति -यितुं); 'he cautioned his sons against evil company,' असत्संसर्गात् सावधाना भवत or अवधत्त इति पुत्रान् प्रत्यादिशत्.

CAUTIONARY, *a.* (Containing a security) सबन्धकः -का -कं, सपारिभाव्यः -व्या -व्यं.—(Containing a warning) प्रत्यादेशकः -का -कं.

CAUTIONED, *p. p.* प्रत्यादिष्टः -ष्टा -ष्टं, सन्दिष्टः -ष्टा -ष्टं.

CAUTIOUS, *a.* सावधानः -ना -नं, कृतावधानः -ना -नं, अवहितः -ता -तं,

सावहितः -ता -तं, अप्रमत्तः -त्ता -त्तं, अप्रमादी -दिनी -दि (न्), समीक्ष्यकारी -रिणी -रि (न्), विमृश्यकारी -रिणी -रि (न्), आशङ्काशीलः -ला -लं, कार्यचिन्तकः -का -कं, बुधः -धा -धं.

CAUTIOUSLY, *adv.* सावधानं, अवधानेन, अवहितं, अप्रमादेन, अवेक्षया, साशङ्कं.

CAUTIOUSNESS, *s.* अवधानता, सावधानता, अप्रमत्तता, अप्रमादित्वं.

To CAW, *v. n.* काकावद् रु (c. 2. रौति, रवितुं), कै (c. 1. कायति, कातुं), ध्वाङ्क्ष् (c. 1. ध्वाङ्क्षति, ध्वाङ्क्षितुं), ध्मांक्ष् (c. 1. ध्मांक्षति -क्षितुं).

CAYENNE, *s.* मरीचगुणोपेतः सुतिग्मो रक्तवर्ण उपस्करविशेषः.

To CEASE, *v. n.* (To be at an end) विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -वर्त्तितुं), निवृत्, विनिवृत्, शम् (c. 4. शाम्यति, शमितुं), अपया (c. 2. -याति -यातुं), विगम् (c. 1. -गच्छति -गन्तुं), विच्छिद् in pass. (-छिद्यते), विश्रम् (c. 4. -श्राम्यति -श्रमितुं).—(To desist from) विरम् or निवृत् with abl. c.; 'he ceases from wickedness,' पापाद् विरमति.

To CEASE, *v. a.* (To put a stop to) निवृत् in caus. (-वर्त्तयति -यितुं), निवृत्, विरम् in caus. (-रमयति -यितुं), उपरम्, शम् in caus. (शमयति -यितुं).

CEASED, *p. p.* विरतः -ता -तं, उपरतः -ता -तं, अवरतः -ता -तं, व्युपरतः -ता -तं, निवृत्तः -त्ता -त्तं, प्रशान्तः -न्ता -न्तं, शान्तः -न्ता -न्तं, विगतः -ता -तं, विश्रान्तः -न्ता -न्तं, विच्छिन्नः -न्ना -न्नं, निरस्तः -स्ता -स्तं; 'one whose fever has ceased,' विगतज्वरः or गतज्वरः or वीतज्वरः or शान्तज्वरः; 'one who has ceased from desire after worldly objects,' उपरतविषयाभिलाषः -षा -षं.

CEASELESS, *a.* अविरतः -ता -तं, अनवरतः -ता -तं, निरन्तरः -रा -रं, अनिवृत्तः -त्ता -त्तं, अविश्रान्तः -न्ता -न्तं, नित्यः -त्या -त्यं.

CEASELESSLY, *adv.* अविरतं, अनवरतं, निरन्तरं, नित्यं.

CEASING, *s.* विरतिः *f.*, निवृत्तिः *f.*, उपरतिः *f.*, उपरामः -रमः -रतिः *f.*, आरतिः *f.*

CECITY, *s.* अन्धता -त्वं, तिमिरं, अदृष्टिः *f.*, दृष्टिहीनता.

CECUTIENSY, *s.* दृष्टिवैकल्यं, नेत्रेन्द्रियवैकल्यं, नाकुलान्ध्यं, कुदृष्टिः *f.*

CEDAR, *s.* देवदारुः *m.* -रु *n.*, दारु *n.* (रु), दारुलः *m.*

To CEDE, *v. a.* (To give up) उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, वितृ (c. 1. -तरति -तरितुं -तरीतुं), त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, अनुदा (c. 3. -ददाति -दातुं), अनुज्ञा (c. 9. -जानाति -ज्ञातुं), प्रोत्सृ in caus. (-सारयति -यितुं).—(To go over) अभ्युपे (c. 2. अभ्युपैति, अभ्युपैतुं), वशीभू.

CEDED, *p. p.* उत्सृष्टः -ष्टा -ष्टं, विसर्ज्जितः -ता -तं, प्रोत्सारितः -ता -तं, वितीर्णः -र्णा -र्णं, त्यक्तः -क्ता -क्तं.

CEDRINE OR CEDARN, *a.* देवदारुमयः -यी -यं, देवदारुसम्बन्धीयः -या -यं.

To CEIL, *v. a.* अन्तःपटलेन छद् (c. 10. छादयति -यितुं), आच्छद्.

CEILING, *s.* अन्तःपटलः, अन्तश्छादं -दनं, अन्तराच्छादनं, पटलः, चालः.

CELANDINE, *s.* अहङ्कारनिर्य्यासविशिष्टः पीतपुष्प ओषधिभेदः, बहुदुग्धिका.

CELATURE, *s.* तक्षणं, तक्षणकर्म्म *n.* (न्), नानारेखादिना अलङ्करणविद्या.

To CELEBRATE, *v. a.* प्रशंस् (c. 1. -शंसति -शंसितुं), स्तु (c. 2. स्तौति, स्तोतुं), विख्या (c. 2. -ख्याति -ख्यातुं), कृत् (c. 10. कीर्त्तयति -यितुं), श्लाघ् (c. 1. श्लाघते, श्लाघितुं), वन्द् (c. 1. वन्दते -न्दितुं), पूज् (c. 10. पूजयति -यितुं), श्रु in caus. (-श्रावयति -यितुं), प्रथ् in caus. (प्रथयति -यितुं), प्रकाश् in caus. (-काशयति -यितुं), अनुवर्ण् (c. 10. -वर्णयति -यितुं).—(To perform solemnly) सेव् (c. 1. सेवते, सेवितुं), विधिवत् कृ, यथाविधि अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं) or सम्पद् in caus. (-पादयति -यितुं) or निर्वह् in caus. (-वाहयति -यितुं) or पाल् (c. 10. पालयति -यितुं) or आचर् (c. 1. -चरति -चरितुं) or पृ (c. 10. पारयति -यितुं).—(To celebrate on the lyre) उपवीण (nom. -वीणयति -यितुं).

CELEBRATED, *a.* विश्रुतः -ता -तं, ख्यातः -ता -तं, विख्यातः -ता -तं, प्रथितः -ता -तं, प्रसिद्धः -द्धा -द्धं, कीर्त्तिमान् -मती -मत् (त्), कीर्त्तितः -ता -तं, स्तुतः -ता -तं, अनुवर्णितः -ता -तं, लब्धशब्दः -ब्दा -ब्दं, यशस्वी -स्विनी -स्वि (न्), यशस्वान् -स्वती -स्वत् (त्), प्रतीतः -ता -तं, विज्ञातः -ता -तं, वित्तः -त्ता -त्तं.—(In song) उपगीतः -ता -तं, उपगीयमानः -ना -नं; 'to be celebrated,' प्रशंस् in pass. (-शस्यते), विश्रु in pass. (-श्रूयते), प्रथ् (c. 1. प्रथते, प्रथितुं); 'by mention,' अतिपद् in pass. (पठ्यते), परिपद्.—(As a festival) अभ्युदितः -ता -तं.

CELEBRATION, *s.* (Solemn performance) सेवनं, निषेवनं, विधिवत् पालनं or अनुष्ठानं or आचरणं, अभ्युदयः.—(Praise) स्तुतिः *f.*, स्तवः, वर्णना, प्रशंसा, पूजा, कीर्त्तनं, उत्कीर्त्तनं, श्लाघा.

CELEBRITY, *s.* (Fame) कीर्त्तिः *f.*, यशः *n.* (स्), ख्यातिः *f.*, सुख्यातिः *f.*, विश्रुतिः *f.*, प्रसिद्धिः *f.*, प्रकीर्त्तिः *f.*, विख्यातिः *f.*, प्रविख्यातिः *f.*, प्रतिख्यातिः *f.*, प्रतिपत्तिः *f.*, विश्रावः, प्रथा, सम्प्रथा, प्रथितिः *f.*, प्रतिष्ठा; 'conferring celebrity,' यशस्करः -री -रं, कीर्त्तिकरः -री -रं.

CELERITY, *s.* शीघ्रता, वेगः, जवः, त्वरा, रभसः, तूर्णिः *m.*, आशुगमनं.

CELERY, *s.* अजमोदाजातीयः शाकप्रभेदः.

CELESTIAL, *a.* (Relating to heaven, or the sky, divine) स्वर्गीयः -या -यं, दिव्यः -व्या -व्यं, दिविजः -जा -जं, दिविष्ठः -ष्ठा -ष्ठं, दैवः -वी -वं, देवकीयः -या -यं, देवार्हः -र्हा -र्हं, सौरः -री -रं, आन्तरीक्षः -क्षी -क्षं, वैहायसः -सी -सं, विहायसीयः -या -यं, नभःस्थः -स्था -स्थं; 'clothed in celestial raiment,' दिव्यवस्त्रः -स्त्रा -स्त्रं; 'celestial nymph,' स्वर्वेश्या.—(Excellent) परमः -मा -मं, उत्तमः -मा -मं.

CELIBACY OR CELIBATE, *s.* अविवाहः, अनुद्वाहः, अपरिणयनं, अपाणिग्रहणं, अविवाहावस्था, अकृतविवाहत्वं; 'living in celibacy,' अविवाहितः.

CELL, *s.* (A small cavity) बिलं, छिद्रं, रन्ध्रं, कूपः, कुहरं.—(A small apartment) कुटी, कक्षः.—(In a prison) कारागार कुटी or कक्षः or उपरोधकं, अवरोधनशालिका, गुप्तिः *f.*—(A cottage) कुटीरः.—(The habitation of a religious person) मठः, आश्रमः.

CELLAR, *s.* गुप्तिः *f.*, भूमिकोष्ठः, अवटः -टिः *m.* गृहतले or गृहस्याधस्ताद् भूमौ खातो मद्यादिकोष्ठः.

CELLARIST, *s.* धर्म्मचारिणां मठे मद्यादिरक्षकः or भोजनाधिकारी *m.* (न्).

CELLULAR, *a.* सूक्ष्मकूपविशिष्टः -ष्टा -ष्टं, सूक्ष्मरन्ध्रपूर्णः -र्णा -र्णं, मधुकोषाकारः -रा -रं.

CELSITUDE, *s.* उच्चता, ऊर्द्ध्वत्वं, उच्छ्रयः, उत्सेधः, समुन्नतिः *f.*, उत्कर्षः.

CEMENT, *s.* (The matter with which two bodies are made to cohere, as mortar) सुधा, लेपः, विलेपः, संलग्नीकरणार्थम् अतिश्यानद्रव्यं.—(Bond of union) बन्धनं, सम्बन्धः, आबन्धः, सन्धिः *m.*

To CEMENT, *v. a.* संलग्नीकृ, संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), संश्लिष् in caus. (-श्लेषयति -यितुं), सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), सन्धा (c. 3. -दधाति -धातुं).

CEMENTATION, *s.* संलग्नीकरणं, संयोजनं, संयोगः, सन्धानं, संश्लेषः.

CEMENTED, *p. p.* संलग्नीकृतः -ता -तं, संयुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, सम्बद्धः -द्धा -द्धं, सन्धितः -ता -तं.

CEMETERY, *s.* श्मशानं, प्रेतवनं, पितृवनं, पितृकाननं, पितृवसतिः *f.*, शवस्थानं, शतानकं, रुद्राक्रीडः.

CENATORY, *a.* रात्रिभोजनसम्बन्धी -न्धिनी -न्धि (न्), नक्तभोजनविषयकः -का -कं.

CENOTAPH, *s.* शून्यचैत्यं, चैत्यं, चित्यं, स्थानान्तरे निखातं मृतजनमुद्दिश्य स्मरणचैत्यं.

Cense, *s.* करः, राजकरं, राजस्वं, शुल्कः.—(Rank) पदं.

Censer, *s.* धूपाधारः, धूपपात्रं.—(Fire-pan) अङ्गारधानिका.

Censor, *s.* नीतिशास्ता *m.* (स्तृ), धर्म्माध्यक्षः, धर्म्माधिकारी *m.* (न्), व्यवहारद्रष्टा *m.* (ष्टृ), आचारोपद्रष्टा *m.* (ष्टृ), कण्टकोद्धर्त्ता *m.* (र्त्तृ), दण्डप्रणेता *m.* (तृ), दोषनिग्रहीता *m.* (तृ), पापनिग्रहकृत्.

Censorian, *a.* नीतिशिष्टिसम्बन्धी -न्धिनी -न्धि (न्) or आचारदर्शनसम्बन्धी.

Censorious, *a.* निन्दकः -का -कं, घृणी -णिनी -णि (न्), दोषग्राही -हिणी -हि (न्), गुणघाती -तिनी -ति (न्), अपवादकः -का -कं, -दी -दिनी -दि (न्), सापवादः -दा -दं, कुवादः -दा -दं, कुवदः -दा -दं, पापदर्शी -र्शिनी -र्शि (न्), निन्दाशीलः -ला -लं, छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्), कुत्सावादी -दिनी -दि (न्) or असूयावादी, कुचरः -रा -रं, दोषैकदृक् *m. f. n.*, पुरोभागी -गिनी -गि (न्).

Censoriously, *adv.* घृणया, सापवादं, निन्दापूर्व्वकं, जुगुप्सया, अपवादशीलत्वात्, छिद्रान्वेषित्वात्.

Censoriousness, *s.* निन्दकता, अपवादशीलत्वं, छिद्रान्वेषः, परदोषकीर्त्तनं.

Censorship, *s.* नीतिशास्तृपदं, आचारद्रष्टृपदं, धर्म्माधिकारः, -करणं.

Censurable, *a.* निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, वचनीयः -या -यं, वाच्यः -च्या -च्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, विगर्ह्यः -र्ह्या -र्ह्यं, दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्).

Censurableness, *s.* निन्द्यता, वाच्यता, वचनीयता, सापराधता.

Censure, *s.* निन्दा, अपवादः, परीवादः, जुगुप्सा -प्सनं, उपक्रोशः, परिभाषणं, तिरस्कारः, घृणा, उपालम्भः, आक्षेपः, गर्हा, गर्हणं, कुत्सा, निर्व्वादः, अवर्णः, अकीर्त्तनं, ऋतीया.

To censure, *v. a.* निन्द् (c. 1. निन्दति, निन्दितुं), प्रणिन्द्, प्रतिनिन्द्, विनिन्द्; प्रत्यादिश् (c. 6. -दिशति -देष्टुं), परिवद् (c. 1. -वदति -वदितुं), अपवद्, गर्ह् (c. 1. गर्हते, गर्हितुं, c. 10. गर्हयति -ते -यितुं), विगर्ह्, परिगर्ह्; तिरस्कृ; कुत्स् (c. 10. कुत्सयति -यितुं), अभिकुत्स्, गुप् in des. (जुगुप्सते -प्सितुं), असूय (nom. असूयति -यितुं), उपालभ् (c. 1. -लभते -लब्धुं), दोषीकृ, धिक्कृ.

Censured, *p. p.* निन्दितः -ता -तं, जुगुप्सितः -ता -तं, तिरस्कृतः -ता -तं, विगर्हितः -ता -तं, निर्भर्त्सितः -ता -तं, धिक्कृतः -ता -तं, अवरीणः -णा -णं, उपालब्धः -ब्धा -ब्धं.

Censurer, *s.* निन्दकः, अपवादकः, अपवादी *m.* (न्), परिवादी *m.* (न्), निन्दाकृत्.

Cent, *s.* शतं; 'five per cent.,' शते विंशभागः, पञ्चकं शतं, पञ्चोत्तरं; 'two per cent.,' द्विकं शतं.

Centaur, *s.* जन्तुविशेषो यस्य पूर्व्वभागः पुरुषाकारः पश्चिमभागश्च अश्वाकृतिः, पूर्व्वकालीनकविभिः कल्पितो नरोर्द्धकायो वाज्यधःकायो जन्तुविशेषः, अर्द्धेन अश्वो ऽर्द्धेन पुरुषो जन्तुः, राक्षसः, दैत्यः.

Centaury, *s.* तिक्तस्वाद ओड्रपुष्पसवर्ण ओषधिप्रभेदः.

Centenarian, *s.* (One a hundred years of age) शतायुः *m.* (स्), शतवर्षः.

Centenary, *a.* शतकः -का -कं, शतिकः -की -कं, शत्यः -त्या -त्यं.

Centenary, *s.* शतकः, शतं; 'a centenary of years,' वर्षशतं, अब्दशतं, शतवर्षं.

Centennial, *a.* शतवर्षः -र्षा -र्षं, शताब्दः -ब्दा -ब्दं, शतवत्सरः -रा -रं.

Centesimal, *a.* शततमः -मी -मं.—(Hundredth part) शतभागमध्ये एकभागः.

Centifolious, *a.* शतपत्रः -त्री -त्रं, शतपर्णः -र्णी -र्णं, शतच्छदः -दा -दं.

Centipede, *s.* शतपदी *f.*, शतपाद् *f.*, शतपादिका, घृषिका, वृश्चिकः, कर्णजलौका -काः (स्).

Cento, *s.* (A poem formed by scraps) प्रकीर्णकाव्यं, खण्डकाव्यं, नानाग्रन्थसङ्गृहीतं काव्यं.—(A collection of a hundred stanzas) शतकः.

Central or centrical, *a.* मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यमीयः -या -यं, मध्यस्थः -स्था -स्थं, मध्यस्थायी -यिनी -यि (न्), गर्भस्थः -स्था -स्थं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्).

Centrality, *s.* मध्यत्वं, मध्यस्थता -त्वं, मध्यमत्वं.

Centre, *s.* (The middle, interior) मध्यं, मध्यः, मध्यस्थानं, मध्यस्थलं, गर्भः, उदरं, अभ्यन्तरं, हृदयं; 'in the centre,' मध्ये, अभ्यन्तरे.—(Of a circle) केन्द्रं, चतुष्टयं.

To centre, *v. n.* (To rest on) अवलम्ब् (c. 1. -लम्बते -लम्बितुं), समालम्ब्, संश्रि (c. 1. -श्रयति -श्रयितुं).—(To meet together in one point) मध्यस्थानं or एकस्थानं प्रति समि (c. 2. समेति, समेतुं), एकत्र समागम् (c. 1. -गच्छति -गन्तुं) or सम्मिल् (c. 6. -मिलति -मेलितुं).

Centrically, *adv.* मध्यतस्, मध्यं प्रति, मध्ये, मध्यस्थाने, मध्यमुद्दिश्य.

Centrifugal, *a.* केन्द्रापजिगमिषुः -षुः -षु, मध्यापजिगमिषुः -षुः -षु.

Centripetal, *a.* केन्द्रजिगमिषुः -षुः -षु, केन्द्राभिपिपतिषुः -षुः -षु, मध्यं प्रति पतयालुः -लुः -लु or पातुकः -का -कं.

Centuple, *s.* शतगुणः -णा -णं, शतधा *ind.*

To centuplicate, *v. a.* शतगुणं -णां -णं कृ, शतगुणीकृ, शतधा कृ.

To centuriate, *v. a.* शतभागशः कृ, शतखण्डशः कृ, शतधा कृ, शतखण्डीकृ.

Centurion, *s.* शतसेनापतिः *m.*, शतयोधमुख्यः, शतसैन्याधिपतिः *m.*

Century, *s.* (Space of a hundred years) वर्षशतं, शतवर्षं, वत्सरशतं, अब्दशतं.—(A hundred) शतं, शतकः.

Cephalalgy, *s.* शिरोवेदना, शीर्षवेदना, शिरःपीडा, शिरोर्त्तिः *f.*, शिरोरोगः.

Cephalic, *a.* मस्तकपथ्यः -थ्या -थ्यं, मस्तिष्करोगघ्नः -घ्नी -घ्नं.

Cerastes, *s.* शृङ्गविशिष्टः सर्पप्रभेदः, विषाणी व्यालः, शृङ्गी.

Cerate, *s.* सिक्थादिनिर्म्मितः or सिक्थतैलादिमयः क्षतशमक उपनाहः.

Cerated, *a.* सिक्थाक्तः -क्ता -क्तं, सिक्थमयः -यी -यं, सिक्थानुलिप्तः -प्ता -प्तं.

To cere, *v. a.* सिक्थेन लिप् (c. 6. लिम्पति, लेप्तुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं).

Cerebral, *a.* मस्तिष्कसम्बन्धकः -का -कं; 'a cerebral letter,' मूर्द्धन्यं.

Cerebrum, *s.* मस्तिष्कं, मस्तिस्कः, गोर्दं, मस्तकस्नेहः.

Cerecloth or cerement, *s.* सिक्थाक्तं वस्त्रं, शववस्त्रं.

Ceremonial, *s.* व्यवहारः, आचारः, रीतिः *f.*, विधिः *m.*, विधानं, नियमः, कृत्यं, नित्यकृत्यं, आह्निकाचारः, संस्कारः, क्रियाविधिः *m.*, शास्त्रविधानं.—(Sacrificial) यज्ञकर्म्म *n.* (न्), विधियज्ञः, इष्टिः *f.*

Ceremonial, *a.* वैधिकः -की -कं, वैधः -धी -धं, नैयमिकः -की -कं, आचारिकः -की -कं, व्यावहारिकः -की -कं, ऐष्टिकः -की -कं, पौर्त्तिकः -की -कं.

Ceremonious, *a.* अतिशयेन आदरकृत्, अतिशयेन आदृतः -ता -तं or सभ्याचारसेवी -विनी -वि (न्), अतिसभ्यः -भ्या -भ्यं or अत्यञ्जलिकृत्, एकान्तसभ्यः -भ्या -भ्यं, सभ्यम्मन्यः -न्या -न्यं, एकान्तप्रश्रितः -ता -तं, एकान्तप्रणयी -यिनी -यि (न्), अतिसमादरकृत्, अत्यादृतः -ता -तं, अतिसभाजनकृत्, अत्यानन्दनकृत्, अत्यनुनयी -यिनी -यि (न्).

Ceremoniousness, *s.* (The use of too much ceremony) अत्यादरः, अतिशयेन शिष्टाचारानुष्ठानं, or सभ्याचारसेवनं, अतिसौजन्यं, अतिप्रश्रयः, अत्यनुनयः, अतिसभाजनं, अतिसमादरः, अत्यानन्दनं.

Ceremoniously, *adv.* एकान्तादरपूर्व्वं, अतिसमादरेण, अतिप्रश्रयेण, सातिशयसभाजनं.

Ceremony, *s.* (Rite) विधिः *m.*, नियमः, संस्कारः, विधानं, कृत्यं, नित्यकृत्यं, कर्म्म *n.* (न्), नित्यकर्म्म *n.* (न्), क्रिया, आह्निकाचारः, दीक्षा; 'engaged in ceremonies,' दीक्षितः; 'occasional ceremony,' नैमित्तिककर्म्म *n.* (न्); 'marriage ceremony,' विवाहविधिः *m.*—(Form of civility) शिष्टाचारविधिः *m.*, सभ्याचारविधिः *m.*, सौजन्यरीतिः *f.*

CERTAIN, *a.* (Sure) ध्रुवः -वा -वं, अवश्यकः -का -कं, सुनिश्चितः -ता -तं. —(Not admitting doubt) असन्दिग्धः -ग्धा -ग्धं, असंशयः -या -यं, निःसन्दिग्धः -ग्धा, निःसन्देहः -हा -हं, निःसंशयः -या -यं; 'it is certain,' अत्र न संशयः.—(Settled, determined, resolved) निश्चितः -ता -तं, कृतनिश्चयः -या -यं, निर्णीतः -ता -तं, नियतः -ता -तं; 'as to time,' कृतकालः -ला -लं.—(Regular) नियतः -ता -तं.—(Infallible) अमोघः -घा -घं.—(Particular) सविशेषः -षा -षं.—(Some) कश्चित् काचित् किञ्चित्, कोऽपि कापि किमपि, कश्चन [illegible] किञ्चन; 'some few,' कतिचित् *ind.*, कतिपयः -या -यं, -यती -यत् (त); 'a certain person,' कश्चित्; 'a certain [illegible]on,' कश्चित् सिंहः, or in more modern Sanscrit एकः सिंहः; 'certain people,' कतिपयलोकाः; 'certain teachers,' कियन्तोऽध्यापकाः; 'on a certain time,' एकदा, कदाचित्, विशेषकाले.

[C]ERTAINLY, *adv.* अवश्यं, निश्चितं, सुनिश्चितं, असंशयं, ध्रुवं, नूनं, खलु, किल, नाम, तत्त्वतस्, संशयं विना, अत्र न संशयः, कः सन्देहः, कोऽत्र सन्देहः.

[C]ERTAINNESS, or CERTAINTY, or CERTITUDE, *s.* निश्चयः, निर्णयः, नैश्चित्यं, अवश्यकता, दृढप्रमाणं, ध्रुवत्वं, असन्दिग्धता; 'certainties,' ध्रुवाणि.

[CE]RTIFICATE, *s.* प्रमाणपत्रं, अभिज्ञानपत्रं, निर्णयपत्रं, निश्चयपत्रं, सत्यापनपत्रं, निदर्शनपत्रं, आगमपत्रं, निर्णेता *m.* (तृ).

[To] CERTIFY, *v. a.* (To inform) ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा. —(To bear testimony, give proof) प्रमाणीकृ, सप्रमाणं -णां -णं कृ, दृढीकृ, स्थिरीकृ, सत्याकृ, प्रमाणपत्रेण or अभिज्ञानपत्रेण निर्णयं कृ.

[C]ERVICAL, *a.* ग्रैवः -वी -वं, ग्रैवेयः -यी -यं, कण्ठ्यः -ण्ठ्या -ण्ठ्यं.

[C]ERULEAN, *a.* नीलः -ला -लं, नीलवर्णः -र्णा -र्णं, आकाशवर्णः -र्णा -र्णं.

[C]ERUMEN, *s.* (Ear-wax) कर्णमलः -लं, तोक्मं, कर्णगूथः, कर्णविट् (ष्).

[C]ERUSE, *s.* (White-lead) श्वेतरञ्जनं, शुक्लवर्णः सीसकविशेषः.

[C]ESARIAN, *a.* (Operation) गर्भोच्छेदनं, भ्रूणोत्कर्त्तनं.

[CE]SS, *s.* (A sum levied) करः, शुल्कः -ल्कं, राजस्वं.—(The act of assessing) करग्रहणं, शुल्कग्रहणं.

[T]o CESS, *v. a.* (To assess) करं or शुल्कं or राजस्वं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or दा in caus. (दापयति -यितुं).

[CESSA]TION, *s.* विरतिः *f.*, विरामः, अवरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, विच्छित्तिः *f.*, निर्वृतिः *f.*, निवर्त्तनं, निवेर्त्तनं, विच्छेदः, उपशमः, अपशमः, क्षयः; '[ce]ssation of arms,' अवहारः.—(Without cessation) अविरतं, अनवरतं, निरन्तरं; 'cessation of affection,' स्नेहच्छेदः.

CESSAVIT, *s.* अमुकजनो वर्षद्वयप्रभृति अद्य यावत् करं न दत्तवान् इति ज्ञापनार्थं लेख्यं.

CESSIBLE, *a.* त्याज्यः -ज्या -ज्यं, प्रदेयः -या -यं, विसर्जनीयः -या -यं.

CESSION, *s.* त्यागः, परित्यागः, प्रदानं, वितरणं, विसर्जनं, समर्पणं.

CESSMENT, *s.* करग्रहणं, शुल्कग्रहणं, राजस्वग्रहणं, करदापनं.

CESSOR, *s.* नियतधर्मनिरपेक्षत्वात् or करदानमन्दादरत्वात् पूर्वोक्तलेख्यद्वारेण अभियोक्तव्यः.

CESTUS, *s.* रतिमेखला, रतिरशना, रतिकलापः.

CETACEOUS, *a.* तिमिजातीयः -या -यं, मीनराजातीयः -या -यं.

CEYLON, *s.* (The island) सिंहलद्वीपः, सिंहलं, लङ्का.

CHAD, *s.* पाठीनः, मद्गुरः, शृङ्गी *f.*

To CHAFE, *v. a.* (To rub, make hot by rubbing) घृष् (c. 1. घर्षति, घर्षितुं), आघृष्, निर्घृष्, संवाहं कृ, घर्षणेन तप् in caus. (तापयति -यितुं).—(To irritate) तप् in caus., परितप्, बाध् (c. 1. बाधते, बाधितुं).—(To make angry) कुप् in caus. (कोपयति -यितुं), प्रकुप्, रुष् in caus. (रोषयति -यितुं).

To CHAFE, *v. n.* तप् in pass. (तप्यते), परितप्, सन्तप्, दुर्मनस् (nom. दुर्मनायते), क्लिश् (c. 4. क्लिश्यते, क्लेशितुं), कुप् (c. 4. कुप्यति -ते, कोपितुं), प्रकुप्, रुष् (c. 4. रुष्यति, रोषितुं), क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं), मन्तु (nom. मन्तूयति); 'chafing,' आतप्यमानः -ना -नं.

CHAFE, *s.* प्रकोपः, उत्तापः, परितापः, मनस्तापः, क्लेशः, रोषः, मन्युः *m.*, अमर्षः.

CHAFER, *s.* पिङ्गशरीरो ध्वनमोदी भ्रमरप्रभेदः.

CHAFF, *s.* बुसं, बुषं, तुषः -षा, तुच्छं, तुच्छधान्यकं, धान्यकल्कं, कडङ्गरः, निष्पावः.—(Freed from the chaff) निस्तुषः -षा -षं.

To CHAFFER, *v. a.* पण् (c. 1. पणते, पणितुं or पणायति -यितुं), पणं कृ, पणीकृ, विपणीकृ, कुत्सितप्रकारेण पणायां कृ or क्रयविक्रयं कृ.

CHAFFERN, *s.* उदस्थाली, स्थाली, पिठरः, उखा.

CHAFFINCH, *s.* बुसप्रियः क्षुद्रपक्षिप्रभेदः.

CHAFFLESS, *a.* निस्तुषः -षा -षं, बुसहीनः -ना -नं, तुषरहितः -ता -तं.

CHAFFY, *a.* तुषमयः -यी -यं, तुषोपमः -मा -मं, लघुः -घुः -घु.

CHAFING-DISH, *s.* अङ्गारधानिका, अङ्गारशकटी *f.*, अङ्गारिः *f.* -रिणी, कटाहः.

CHAGRIN, *s.* क्लेशः, मन्युः *m.*, शोकः, पिड्डना, व्यथा, असन्तोषः.

To CHAGRIN, *v. a.* दुःख् (c. 10. दुःखयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), व्यथ् in caus. (व्यथयति -यितुं), तप् in caus. (तापयति -यितुं), सन्तप्, परितप्, शुच् in caus. (शोचयति -यितुं).

CHAGRINED, *p. p.* आगतमन्युः -न्युः -न्यु, सव्यथः -था -थं, दुःखितः -ता -तं, उद्विग्नः -ग्ना -ग्नं.

CHAIN, *s.* शृङ्खलः -ला -लं, दामः.—(Fetter) लोहबन्धनं, लोहबन्धं, निगडः -डं, बन्धनं, पाशः; 'a gold chain,' कनकसूत्रं.—(A series) श्रेणी, पर्य्यायः, पंक्तिः *f.*, अनुक्रमः, माला; 'a chain of causes,' कारणमाला.

To CHAIN, *v. a.* शृङ्खलया or निगडेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), शृङ्खल (nom. शृङ्खलयति -यितुं), निगड (nom. निगडयति -यितुं).

CHAINED, *p. p.* शृङ्खलितः -ता -तं, निगडितः -ता -तं, शृङ्खलाबद्धः -द्धा -द्धं.

CHAIN-PUMP, *s.* शृङ्खलासञ्चारितं जलोत्तोलनयन्त्रं or [illegible]

CHAIN-SHOT, *s.* शृङ्खलाबद्धं युद्धयन्त्रात् प्रक्षेपणीयं लोहगोलद्वयं.

CHAIN-WORK, *s.* शृङ्खलकर्म्म *n.* (न्), शृङ्खलारूपेण निर्मितं यत् किञ्चिद् विरलकर्म्म.

CHAIR, *s.* पीठं, आसनं, विष्टरः, विस्तरः, संवेशः.—(Wheel-chair) पर्यं.

CHAIRMAN, *s.* सभापतिः *m.*, सभाधिकृतः, गोष्ठीपतिः, अग्रणी *m.* (न्), प्रामाणिकः.—(One whose profession it is to carry a chair) प्रवहणिकः.

CHAISE, *s.* यानविशेषः, रथः, क्रीडारथः, पुष्परथः, वाहनं.

CHALCOGRAPHY, *s.* ताम्रफलके or पित्तलफलके लिखनविद्या.

CHALDRON, *s.* पिठरः, उखा, स्थाली, उदस्थाली, पिष्टपचनं.

CHALICE, *s.* कंसः, पात्रं, भाजनं, शरावः, यज्ञपात्रं, यज्ञभाजनं.

CHALK, *s.* कठिनी, खटिनी, कठिका, खटिका, खडिका, चूर्णः -र्णं, श्वेतधातुः *m.*, शुक्लधातुः, वर्णलेखा, पाण्डुमृत् *f.*, शिलाधातुः, सितोपलः, पाकशुक्ला, धवलमृत्तिका.—(Red chalk) गैरेयं, अर्थ्यं, गिरिजं, अश्मजं, शिलाजतु *n.*

To CHALK, *v. a.* (To mark with chalk) कठिन्या चिह्न् (c. 10. चिह्नयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

CHALK-CUTTER, *s.* कठिनीखनकः, कठिनीखनिता *m.* (तृ), शुक्लधातुखनकः.

CHALKY, *a.* कठिनीमयः -यी -यं, श्वेतधातुपूर्णः -र्णा -र्णं, कठिनीसंसृष्टः -ष्टा -ष्टं.

To CHALLENGE, *v. a.* आह्वे (c. 1. -ह्वयति -ते -ह्वातुं), उपाह्वे, समाह्वे; द्वन्द्वयुद्धार्थं or नियुद्धार्थं आह्वे; स्पर्ध् (c. 1. स्पर्धते, स्पर्धितुं), आक्रन्द् (c. 1. -क्रन्दति -क्रन्दितुं), प्रत्यर्थ् (c. 10. -अर्थयति -यितुं).—(To accuse) अभियुज् (c. 7. -युनक्ति -योक्तुं).—(To claim as one's own due)

आत्मसात्कृ, स्वीकृ, मम देयं or मह्यं दातव्यमिति ज्ञापयित्वा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or in des. (जिघृक्षति शितुं).

CHALLENGE, s. आह्वानं, समाह्वयः -ह्वानं, योधसंरावः, क्रन्दितं, अभिग्रहः. —(A writing containing a challenge) युद्धाह्वानपत्रं, द्वन्द्वयुद्धार्थम् आह्वानपत्रं.

CHALLENGED, p. p. आहूतः -ता -तं, समाहूतः -ता -तं, कृताह्वानः -ना -नं.

CHALLENGER, s. आह्वानकर्त्ता m. (र्तृ), समाह्वानकृत्, समाह्वाता m. (तृ), अभियोक्ता m. (क्तृ).

CHALLENGING, s. (Act of) आह्वानं, हूतिः f., हवः, क्रन्दनं, स्पर्द्धा.

CHALYBEATE, a. अयःसंसृष्टः -ष्टा -ष्टं, लोहव्याप्तः -प्ता -प्तं, लोहगुणविशिष्टः -ष्टा -ष्टं, लोहघटितः -ता -तं; 'a chalybeate pill,' अयोगुडः.

CHAMADE, s. युद्धे पराजयसूचकं or सम्प्रदानसूचकं पटहताडनं.

CHAMBER, s. कोष्ठः, प्रकोष्ठः, शाला, शालिका, आगारः -रं, गृहं, स्थलं, आवासः, वासभवनं, कक्षः, कुटी, कुटिः f.; 'bed-chamber,' शयनागारः, स्वप्ननिकेतनं, शयनशाला, शय्यावेश्म n. (न्); 'an inner chamber,' उपरोधकं, कक्षान्तरं; 'an upper chamber,' उपरिस्थः प्रकोष्ठः; चन्द्रशालिका, शिरोगृहं.—(A cavity) कोटरः, गर्त्तः, विलं, कुहरं.

To CHAMBER, v. n. लम्पटवत् स्त्रियो गम् (c. 1. गच्छति, गन्तुं) or अभिगम्, लम्पटाचारः -रा -रं भू.

CHAMBERING, s. स्त्रीगमनं, नार्य्यभिगमनं, स्त्रीसेवा, नारीप्रसङ्गः, लम्पटता.

CHAMBERLAIN, s. शयनाधिकृतः, अन्तःपुरवर्त्ती m. (न्), अन्तर्वंशिकः, कञ्चुकी m. (न्), स्थापत्यः, वस्त्रगृहाधीशः, द्वाःस्थितदर्शकः, सन्धुलः.

CHAMBERMAID, s. शयनशालायां शय्यादिपरिकल्पिका परिचारिका or दासी.

CHAMELEON, s. सरटः, सरटुः, प्रतिसूर्य्यः, कृकलासः. See CAMELEON.

To CHAMFER, v. a. स्तम्भस्य परितः सीताकारा रेखा लिख् (c. 6. लिखति, लेखितुं).

CHAMFER or CHAMFRET, s. स्तम्भस्य परितो लिखिता सीताकारा रेखाः, स्तम्भरेखा, स्तम्भसीता.

CHAMOIS, s. यातप्रमीयः, वनच्छागजातीयो गिरिप्रियो महावेगो जन्तुभेदः.

CHAMOMILE, s. अतितिक्तरसविशिष्टः सुगन्ध ओषधिभेदः.

To CHAMP, v. a. चर्व् (c. 1. चर्वति, चर्वितुं), दंश् (c. 1. दशति, दंष्टुं), परिदंश्, दन्तघर्षं कृ; 'to champ the bit,' खलीनं परिदंश्.

CHAMPAIGN, s. समभूमिः f., समभूभागः, समस्थलं -ली, समप्रदेशः, निम्नभूमिः f.

CHAMPAKA, s. (A plant) चम्पकः, चाम्पेयः, हेमपुष्पकः, स्थिरगन्धः, स्थिरपुष्पः.—(Its flower) गन्धफली.

CHAMPIGNON, s. छत्राप्रभेदः, छत्राकं, उच्छिलीन्ध्रं, शिलीन्ध्रं.

CHAMPION, s. (A warrior) भटः, सुभटः, वीरः, प्रवीरः, योद्धा m. (द्धृ), प्रयुयुत्सुः m., विक्रान्तः, गण्डीरः, नासीरः.—(A defender) रक्षकः, रक्षिता m. (तृ), परिरक्षी m. (न्).

CHANCE, s. दैवं, दैवयोगः, दैवगतिः f., घटना, दैवघटना, सङ्गतिः f., अकस्मात्सङ्गतं, आगन्तुः m., अतिवर्त्तनं.—(Unfortunate chance) विपद्, आपद्; 'a game of chance,' अक्षादिक्रीडा, द्यूतं; 'trusting too much to chance,' दैवपरः, दैवायत्तः, दैवचिन्तकः; 'by chance,' अकस्मात्, दैवात्, दैववशात्, घटनया, अनपेक्षं, प्रमादेन.—(State of doubt) संशयः; 'committed to chance,' संशयस्थः -स्था -स्थं.

To CHANCE, v. n. अकस्मात् सम्भू (c. 1. -भवति -भवितुं) or सम्पद् (c. 4. -पद्यते -पत्तुं) or समापद् or उपस्था (c. 1. -तिष्ठति -स्थातुं) or समुपस्था, or आपत् (c. 1. -पतति -पतितुं).

CHANCEL, s. पूजाशालायाः पूर्व्वदिग्यो महापवित्रत्वाद् व्यवधानेन अवरुद्धो भागः, मन्दिरस्य प्राचीनभागः.

CHANCELLOR, s. महाप्राड्विवाकः, प्रधानधर्म्माध्यक्षः, महाविचारकः, महाशासनकर्त्ता m. (र्तृ).—(Chancellor of the Exchequer) कोशाधीशः —(Of the University) राजविद्यालयाधिपतिः m.

CHANCELLORSHIP, s. महाप्राड्विवाकत्वं, प्रधानधर्म्माध्यक्षस्य पदं or अधिकारः.

CHANCE-MEDLEY, s. डिम्बाहवे अनिच्छातो नृहत्या or मनुष्यमारणं.

CHANCER, s. विद्रधिः m., उपदंशः, गलितक्षतं. See CANCER.

CHANCERY, s. दण्डनैष्ठुर्य्यशमका महाविचारणसभा, महाविचारस्थानं, धर्म्मोग्रतानियामकः सभाविशेषः.

CHÁNDÁLA, s. (An outcaste or man of a degraded tribe) चाण्डालः, चण्डालः, मातङ्गः, निषादः, दिवाकीर्त्तिः, श्वपचः, जनङ्गमः, अन्तेवासी, पुक्कसः, प्लवः.

CHANDELIER, s. दीपवृक्षः, दीपपादपः, शिखातरुः, शिखावृक्षः, दीपाधारः.

CHANDLER, s. (A huckster) वार्त्तावहः, वैवधिकः, विवधिकः; 'a corn-chandler,' धान्यमायः.—(One who makes or sells candles) दीपिकाकृत्, दीपविक्रेता m. (तृ).

To CHANGE, v. a. विकृ (c. 8. -करोति -कर्तुं), अन्यरूपं -पीं -पं कृ, भिन्नरूपं -पीं -पं कृ, विपर्यस् (c. 4. -अस्यति, असितुं).—(To barter) निमे (c. 1. -मयते -मातुं), विमे, विनिमे, परिवृत् in caus. (-वर्त्तयति -यितुं); 'he changes beans for sesamum-seed,' तिलेभ्यः प्रति माषान् ददाति.—(To change the mind) अन्यमानसीभू, विपरीतं विज्ञा (c. 9. -जानाति -ज्ञातुं).—(To change a note) हुण्डिकापत्रं सुवर्णरूप्यादिभिः परिवृत्.—(To change gold for coin of less value) सुवर्णरूप्यादिकं कृष्णलाणकपणकपर्दादिभिः परिवृत्.—(To change one's clothes) वासांसि अवतार्य्य or विहाय or अवमुच्य अपराणि परिधा (c. 3. -दधाति -धातुं).

To CHANGE, v. n. विकृ (c. 8. -कुरुते), विकृतीभू, अन्यथा भू, अन्यरूपः -पी -पं भू, भिन्नरूपः -पी -पं भू, विकृताकारः -रा -रं भू; 'the mouse was changed into a cat,' मूषिको विडालः कृतः.—(To change in mind) विमनीभू.—(To change one's evil course) पापाद् विनिवृत् (c. 1. -वर्त्तते -वर्त्तितुं) or निवृत्.

CHANGE, s. विकारः, विकृतिः f., विक्रिया, वैकृतं, परिणामः, विपरिणामः, विपर्य्ययः, परिवर्त्तः, अन्यथाभावः.—(Vicissitude) आवृत्तिः f., परिवृत्तिः f.; 'of the seasons,' ऋतुपर्य्यायः.—(Variety) वैचित्र्यं, विभेदः.—(Reformation) निवर्त्तनं.—(Small money) अल्पसारं धनं यथा कृष्णलाणकपणकपर्दकादि, अल्पार्घमुद्रा, क्षुद्रमुद्रा.—(Place where merchants meet) वणिक्समागमचत्वरं, श्रेष्ठिचत्वरं.—(Of the moon) अमावस्या, प्रतिपत्, चन्द्रपरिवर्त्तः, पर्व्वसन्धिः m.; 'of mind,' बुद्धिभेदः.

CHANGEABLE, a. (Possible to be changed) विकार्य्यः -र्य्या -र्य्यं.—(Fickle) अस्थायी -यिनी -यि (न्), अस्थिरः -रा -रं, अधीरः -रा -रं, चलः -ला -लं, चलचित्तः -त्ता -त्तं, चपलः -ला -लं, सङ्कसुकः -का -कं, नैकभावाश्रयः -या -यं, प्रकृतितरलः -ला -लं, अन्यमनाः -नाः -नः (स्), अन्यमानसः -सी -सं.—(Inconstant) अनित्यः -त्या -त्यं.

CHANGEABLENESS, s. अस्थिरता, अस्थैर्य्यं, चलचित्तता, चञ्चलत्वं, चापल्यं.

CHANGED, p. p. विकारितः -ता -तं, विकृतः -ता -तं, वैकृतः -ता -तं, कृतविक्रियः -या -यं, अन्यरूपः -पी -पं, परिणतरूपः -पी -पं, विपर्य्यस्तः -स्ता -स्तं, विकृताकारः -रा -रं.—(In feelings) विमनीकृतः -ता -तं, विमनीभूतः -ता -तं.

CHANGELING, s. कुलीनपुत्रेण परिवर्त्तितो धात्रीपुत्रः; वेतालेन सुरूपबालकम् अपहृत्य तस्य स्थाने उपसर्ज्जितः कुरूपबालक इति केचिन् मन्यन्ते; उपसर्ज्जितपुत्रः, उपकल्पितपुत्रः, कृत्रिमपुत्रः, पुत्रप्रतिनिधिः m.

CHANGER, s. हुण्डिकापत्रसुवर्णरूप्यादिपरिवर्त्तकः.

CHANNEL, s. (A strait) सङ्कटं.—(The bed of a river) नदीभाण्डं, नदीपात्रं, गर्भः, नदीगर्भः.—(A long excavation, a canal) कुल्या, उपकुल्या, खातं, नालः, प्रणालः.—(A narrow passage) सङ्कीर्णपथः.—(Furrow of a pillar) स्तम्भरेखा, स्तम्भसीता.—(A stream) स्रोतः n. (स्).

To CHANNEL, v. a. खन् (c. 1. खनति, खनितुं, खातुं), उत्खन्, कुल्याः कृ, सीताः कृ.

To CHANT, v. n. गै (c. 1. गायति, गातुं), प्रगै, उद्गै, सुख (nom. सुखायते), पठ् (c. 1. पठति, पठितुं).

CHANT, s. गीतं, गेयं, गानं, गाथा, स्तुतिः f., स्तोत्रं.

CHANTED, p. p. गीतः -ता -तं, परिगीतः -ता -तं, पठितः -ता -तं.

CHANTER, s. उद्गाता m. (तृ), गायकः, गेष्णुः, गाथिकः, सुस्वरः m.

CHANTICLEER, s. उषाकलः, कुक्कुटः, कृकवाकुः, यामघोषः.

CHAOS, s. महाभूतादिसाङ्कर्य्यं, प्राग्जगत्सृष्टेर् जलादिभूतानाम् अस्तव्यस्तता, एकार्णवः.—(Confusion) सङ्करः, साङ्कर्य्यं, संक्षोभः, व्यस्तता, अव्यक्तता.

CHAOTIC, a. सङ्करीकृतः -ता -तं, अस्तव्यस्तः -स्ता -स्तं, अधरोत्तरः -रा -रं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, एकार्णवीभूतः -ता -तं, अव्यक्तः -क्ता -क्तं, अलक्षणः -णा -णं.

To CHAP, v. n. (To break into gapings from the effect of cold) शीतोपहतत्वात् त्रुट् (c. 4. त्रुट्यति, त्रुटितुं) or विदल् (c. 1. -दलति -दलितुं) or विभिद् in pass. (-भिद्यते) or विदॄ in pass. (-दीर्य्यते) or छिद् in pass. (छिद्यते) or स्फुट् (c. 6. स्फुटति, स्फुटितुं).

CHAP, s. (Cleft, chink) त्रुटितं, त्रुटिः f. -टी, छिद्रं, रन्ध्रं, गर्त्तः, भित्तिः f.; 'in the feet,' पाददारी, अलसः.—(A person, a fellow, contemptuously) माणवः -वकः, मनुष्यकः, नागरः.

CHAPE, s. (The catch of any thing by which it is held) बन्धनी, बन्धनकीलकः, सङ्ग्रहणार्थं दन्तकः, ग्रहणी, रक्षणी, आलानं.

CHAPEL, s. (Shrine) देवागारः, देवतागारः, देवायतनं, देवालयं.—(A small place of worship subject to a church) महामन्दिराधीना क्षुद्रपूजाशाला, अप्रधानमन्दिरं.—(Of ease) दूरस्थैः सेवितं क्षुद्रभजनभवनं.

CHAPELRY, s. क्षुद्रमन्दिराधिकारः, पूर्व्वोक्तपूजाशालाधीनो भूमिभागः.

CHAPERON, s. नृत्यगीतादिसमाजे अनूढाम् तरुणीम् उपास्ते या मध्यमवयस्का भाविनी or कुलीना स्त्री.

To CHAPERON, v. a. नृत्यगीतादिसमाजे अनूढां तरुणीं युवतिगणं वा उपास् (c. 2. -आस्ते -आसितुं) or उपस्था (c. 1. -तिष्ठति -स्थातुं), or उपचर् (c. 1. -चरति -चरितुं).

CHAPFALLEN, a. म्लानवदनः -नी -नं, मलिनमुखः -खी -खं, हताशः -शा -शं.

CHAPITER, s. स्तम्भशीर्षं, स्तम्भमस्तकः, स्तम्भशृङ्गं, ऊर्द्ध्वस्तम्भः, स्तम्भस्य ऊर्द्ध्वभागः.

CHAPLAIN, s. पुरोहितः, कुलाचार्य्यः, ऋत्विक् m. (ज्), कुलगुरुः m., कुलविप्रः.

CHAPLAINSHIP, s. पौरोहित्यं, पुरोहितपदं, कुलाचार्य्यपदं, आर्त्विज्यं.

CHAPLET, s. माला, माल्यं, स्रक् f. (ज्), दाम n. (न्), कुसुमावतंसकं, निर्य्यूहः, आपीडः, पीडा; 'chaplet-maker,' मालाकारः, मालिकः; 'chaplets worn in different positions,' गर्भकः, प्रभ्रष्टकं, ललामकं, प्रालम्बं, वैकक्षकं, आपीडः, शेखरः.

CHAPMAN, s. आपणिकः, विपणी m. (न्), क्रयिकः, विक्रयिकः.

CHAPPED, p. p. त्रुटितः -ता -तं, त्रुटितवान् -वती -वत् (त्), विदलितः -ता -तं, विभिन्नः -न्ना -न्नं, विदीर्णः -र्णा -र्णं, छिन्नः -न्ना -न्नं.

CHAPS, s. pl. (The mouth of a beast of prey) आस्यं, मुखं, वदनं, हनुः m.—(Entrance of a channel) सङ्कटमुखं, सङ्कटप्रवेशः.

CHAPTER, s. (Division) अध्यायः, अध्ययः, सर्गः, पर्व्व n. (न्), परिच्छेदः, विच्छेदः, काण्डः -ण्डं, खण्डः -ण्डं, स्कन्धः, उच्छ्वासः, आश्वासः, प्रकरणं, लम्बकः.—(An assembly of canons) महामन्दिरे प्रधानपुरोहितानां सभा.

To CHAR, v. a. (To burn wood to a cinder) अङ्गारसात्कृ, अङ्गारीकृ, अङ्गार (nom. अङ्गारयति -यितुं); ईषद्दह् (c. 1. -दहति -दग्धुं).

To CHAR, v. n. (To work at other's houses by the day) गृहसम्मार्ज्जने उदकवाहने इत्यादिकुत्सितकर्म्मणि एकदिनमात्रं यावद् व्यापृता भू or नियुज् in pass. (-युज्यते).

CHAR-WOMAN, s. गृहसम्मार्ज्जने उदकवाहने इत्यादिकुत्सितकर्म्मणि एकदिनमात्रं नियुक्ता or व्यापृता चेटी, प्रत्यहं भृतिं गृह्णाति या कर्म्मकरी, दिनिकाचेटी, दिनिकाप्रेष्या, प्रेष्या, सैरिन्ध्री.

CHARACTER, s. (Disposition) शीलः -लं, शीलत्वं -ता, स्वभावः, वृत्तिः f., स्वरूपं, स्वाभिप्रायः, चारित्रं.—(Property, peculiarity) भावः, गुणः, विशेषः.—(Natural character) स्वभावः, निसर्गः, प्रकृतिः f.—(Mark) लक्षणं, चिह्नं, अभिज्ञानं.—(Letter) अक्षरं, वर्णः -र्णं.—(Handwriting) स्वहस्ताक्षरं.—(Personage in a drama) भूमिका.—(Reputation, honour) मर्य्यादा, कीर्त्तिः f., यशः n. (स्).—(Dignity) गौरवं

CHARACTERISTIC, a. लाक्षणिकः -की -कं, लाक्षण्यः -ण्या -ण्यं, विशेषकः -का -कं, विशेषणः -णा -णं, स्वाभाविकः -की -कं, गुणवाचकः -का -कं.

CHARACTERISTIC, s. लक्षणं, विशेषलक्षणं, संलक्षणं, लिङ्गं, चिह्नं, विशेषः -षणं, अभिज्ञानं, संज्ञा, गुणः, उपाधिः m., स्वधर्म्मः, स्वभावः; 'generic property,' समानाधिकरणं; 'specific property,' जातित्वं.

CHARACTERISTICALLY, adv. विशेषतस्, सविशेषं, लक्षणतस्.

To CHARACTERIZE, v. a. लक्ष् (c. 10. लक्षयति -यितुं), संलक्ष्, उपलक्ष्; विशिष् in caus. (-शेषयति -यितुं), चिह्न् (c. 10. चिह्नयति -यितुं).—(To give an account of the personal qualities) गुणदोषान् व्याख्या (c. 2. -ख्याति -ख्यातुं).

CHARACTERIZED, p. p. विशिष्टः -ष्टा -ष्टं, विशेषितः -ता -तं, सविशेषः -षा -षं, -षणः -णा -णं, लक्षितः -ता -तं, संलक्षितः -ता -तं, उपलक्षितः -ता -तं, कृतलक्षणः -णा -णं, लिङ्गी -ङ्गिनी -ङ्गि (न्).

CHARADE, s. सर्व्वतोभद्रः, वर्द्धमानः, प्रहेलिका, पद्यविरचिता प्रश्नदूती यथा किंस्विच्छीघ्रतरं वायोः किंस्विद्बहुतरं तृणात् मनः शीघ्रतरं वाताच्चिन्ता बहुतरा तृणादिति.

CHARCOAL, s. अङ्गारः -रं, निर्वापकः, दग्धकाष्ठं, दग्धेध्मं.

Company, *s.* (Assembly of people, party) सभा, समाजः, पंक्तिः *f.*, परिषद् *f.*, रासेरसः; 'inadmissible into company,' अपांक्तेयः -या -यं; 'politeness to company,' सभाचातुर्य्यं, सभाजनं.—(Body of men) जनसमूहः, गणः.—(Band of soldiers) गुल्मः, सैन्यदलं; 'by companies,' पंक्तिभिः.—(Fellowship, society) सहायता, साहचर्य्यं, साहित्यं, संसर्गः, संवासः, समागमः; 'evil company,' असत्संसर्गः, कुसंसर्गः, कुसङ्गतिः *f.*—(Company of actors) पात्रवर्गः.—(Company of traders, corporate body) श्रेणी -णिः *m.f.*; 'to bear or keep company with,' सह चर् (c. 1. चरति -रितुं), अनुचर्, सह वस् (c. 1. वसति, वस्तुं), सह गम् (c. 1. गच्छति, गन्तुं).

Comparable, *a.* उपमेयः -या -यं, तुलनीयः -या -यं, तुल्यः -ल्या -ल्यं.

Comparative, *a.* (Relative, not absolute) आनुषङ्गिकः -की -कं, प्रासङ्गिकः -की -कं, उपमानेन निर्णीतः -ता -तं.—(Having the faculty of comparing) तोलनः -ना -नं.

Comparatively, *adv.* उपमानेन, औपम्येन, सादृश्येन, उपमानपूर्व्वं.

To compare, *v. a.* उपमा (c. 2. -माति, c. 3. -मिमीते -मातुं), तुल् (c. 10. तुलयति -यितुं), साधारणीकृ, सम्पृ in caus. (-पारयति -यितुं) with two acc., उपदिश् (c. 6. -दिशति -देष्टुं).—(Liken, equal) समीकृ, तुल्यीकृ, सदृशीकृ, समान (nom. समानयति -यितुं).

Compared, *p. p.* उपमितः -ता -तं, उपमेतः -ता -तं, साधारणीकृतः -ता -तं, तुलितः -ता -तं, उत्प्रेक्षितः -ता -तं, समीकृतः -ता -तं.

Comparison, *s.* उपमा, उपमितिः *f.*, उपमानं, तोलनं, उत्प्रेक्षा, साधारण्यं, सादृश्यं, औपम्यं; 'by comparison with one's self,' आत्मौपम्येन; 'without comparison,' अतुलनीयः -या -यं, अतुल्यः -ल्या -ल्यं, असाधारणः -णा -णं.—(Simile) दृष्टान्तः, उपमा.

Compartment, *s.* (Division) छेदः, भागः, विभागः, परिच्छेदः, अंशः, खण्डः -ण्डं.—(Of an edifice) कक्षः.

Compass, *s.* (Circuit) परिवेष्टनं, मण्डलं, परिमण्डलं, परिधिः *m.*, परिणाहः.—(Extent, limits) परिमाणं, पर्य्यन्तं, विस्तारः, सीमा.—(Range, reach) विषयः, परिमाणं; 'within compass of the understanding,' बुद्धिगम्यः -म्या -म्यं; 'of the ear,' कर्णगोचरः -रा -रं.—(Due limits, moderation) परिमितत्वं, अनतिक्रमः, अप्रसक्तिः *f.*—(Instrument to find the quarter) दिक्सूचकयन्त्रं, उत्तरदिक्प्रदेशिनी सूचिः, दिङ्निर्णययन्त्रं, दिग्लक्षणं, समुद्रपथलक्षणं.

To compass, *v. a.* (Surround) वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), परिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).—(Go round) परिगम् (c. 1. -गच्छति -गन्तुं), परिचर् (c. 1. -चरति -रितुं); 'reverentially,' प्रदक्षिणीकृ.—(Attain) अधिगम् (c. 1. -गच्छति -गन्तुं), आप्, प्रतिपद् (c. 4. -पद्यते -पत्तुं), अभिपद्; आपद्; आसद् in caus. (-सादयति -यितुं), लभ् (c. 1. लभते, लब्धुं), साध् in caus. (साधयति -यितुं).—(Contrive) घट् (c. 1. घटते -टितुं).

Compass or compasses, *s.* कर्कटः, कर्कटकः.

Compassion, *s.* कारुण्यं, करुणा -णं, दया, कृपा, अनुकम्पा, घृणा, अनुक्रोशः, अनुग्रहः, दयालुता -त्वं, करुणार्द्रता, दुमोक्तिः *f.*, आपन्नरक्षणं.

To compassionate, *v. a.* अनुकम्प् (c. 1. -कम्पते -म्पितुं), समनुकम्प् with acc.; दय् (c. 1. दयते -यितुं) with gen.; करुण (nom. करुणायते), कृपा (nom. कृपायते), अनुकृपा, दयां कृ, कृपां कृ, करुणां कृ.

Compassionate, *a.* दयालुः -लुः -लु, कृपालुः -लुः -लु, सदयः -या -यं, कारुणिकः -की -कं, सकरुणः -णा -णं, कारुण्यवेदी -दिनी -दि (न्), घृणी -णिनी -णि (न्), करुणामयः -यी -यं, करुणार्द्रः -र्द्रा -र्द्रं, अनुकम्पी -म्पिनी -म्पि (न्), सानुकम्पः -म्पा -म्पं, सानुक्रोशः -शा -शं, कृपावान् -वती -वत् (त्), कृपामयः -यी -यं, हृदयालुः -लुः -लु, दयायुक्तः -क्ता -क्तं, दयामयः -यी -यं, दयाशीलः -ला -लं, दयाकरः -रा -रं, दयान्वितः -ता -तं, सुरतः -ता -तं, आपन्नरक्षणशीलः -ला -लं, क्षमावान् -वती -वत् (त्).

Compassionately, *adv.* सानुकम्पं, सदयं, सकारुण्यं, कारुण्येन, कृपया.

Compaternity, *s.* धर्म्मपितृत्वं, धर्म्मपितुर् अवस्था or दशा or भावः.

Compatibility, *s.* योग्यता, उपयुक्तता, सम्भवः, सम्भाव्यता, अविरोधः, अविरुद्धता, अविगुणता, आनुसार्य्यं.

Compatible, *a.* अविरुद्धः -द्धा -द्धं, योग्यः -ग्या -ग्यं, सम्भाव्यः -व्या -व्यं, अविगुणः -णा -णं, अनुसारी -रिणी -रि (न्), अनुगुणः -णा -णं, उपयुक्तः -क्ता -क्तं.

Compatibly, *adv.* अविरुद्धं, अविगुणं, उपयुक्तं, अनुसारात् -रेण -रतस्.

Compatriot, *s.* स्वदेशजः, स्वदेशीयः, एकदेशीयः, एकदेशवासी *m.* (न्), सांस्थानिकः.

Compeer, *s.* वयस्यः, तुल्यपदभाक् *m.* (ज्), समानपदस्थः, समानवयस्कः, सवयाः *m.* (स्), तुल्यवृत्तिः, प्रतियोगी *m.* (न्), सङ्गी *m.* (न्).

To compel, *v. a.*, Expressed by the causal form, usually in conjunction with the adverb बलात् or बलेन; as, 'the king should compel him to pay,' तं राजा बलाद् दापयेत्; 'he compels the Brahmans to perform the sacrifice,' ब्राह्मणान् यज्ञं कारयति. The root अर्ह् (c. 1. अर्हति -र्हितुं) has sometimes the sense of 'being compelled'; as, 'he is compelled to pay,' दातुम् अर्हति. In modern Sanskrit such expressions as the following are found: 'They compelled him to bear a burden,' भारं वोढुं तं बलाद् दधुः (root धृ); 'Compel the people to come,' लोकान् आगन्तुं प्रवर्त्तय. *See* Constrain.

Compellable, *a.* Expressed by the fut. pass. part. of the causal form; as, 'compellable to pay,' दापनीयः -या -यं, दाप्यः -प्या -प्यं.

Compellation, *s.* आभाषणं, आमन्त्रणं, अभिवादः, सम्बोधनं.

Compelled, *p. p.*, Expressed by the pass. part. of the causal form; as 'compelled to pay,' दापितः -ता -तं. The adverb बलात्, or बलेन may be joined with it.

Compeller, *s.* कारयिता *m.* (तृ), प्रवर्त्तकः, प्रयोजकः, प्रेरकः.

Compendious, *a.* साङ्क्षेपिकः -की -कं, सामासिकः -की -कं, संक्षिप्तः -प्ता -प्तं, समस्तः -स्ता -स्तं, सङ्गृहीतः -ता -तं, परिमितः -ता -तं, अविस्तीर्णः -र्णा -र्णं.

Compendiously, *adv.* संक्षेपेण, संक्षेपात्, संक्षेपतस्, समासतस्, अविस्तरेण, अविस्तरशस्, संक्षिप्तप्रकारेण.

Compendiousness, *s.* संक्षिप्तता, संक्षिप्तिः *f.*, संक्षेपः, उपसंक्षेपः, समस्तत्वं, समासः, संहारः, सुग्रहत्वं.

Compend or Compendium, *s.* संक्षेपः, सङ्ग्रहः, समाहारः, संहारः.

उपसंहारः, उपसंक्षेपः, संहिता, सारः.

COMPENSABLE, *a.* परितोषणीयः -या -यं, प्रतिफलार्हः -र्हा -र्हं.

To COMPENSATE, *v. a.* परितुष् in caus. (-तोषयति -यितुं), पारितोषिकं or प्रतिफलं or निष्कृतिं दा (c. 3. ददाति, दातुं), निष्कृ, अपाकृ, प्रतिकृ, शुध् in caus. (शोधयति -यितुं), परिशुध्, निस्तारं कृ.—(Be equivalent) तुल्यीभू, तुल्यबलः -ला -लम् अस्.

COMPENSATED, *p. p.* प्रतिफलितः -ता -तं, प्रत्युपकृतः -ता -तं, परितोषितः -ता -तं.

COMPENSATION, *s.* पारितोषिकं, निष्कृतिः *f.*, निस्तारः, प्रतिफलं, प्रत्युपकारः, क्षतिपूरणं, दण्डः.

COMPENSATIVE, *a.* पारितोषिकः -की -कं, प्रत्युपकारी -रिणी -रि (न्), क्षतिपूरकः -का -कं.

COMPETENCE or COMPETENCY, *s.* (Adequacy, sufficiency) सामर्थ्यं, योग्यत्वं, उपयुक्तत्वं, युक्तता औचित्यं, सम्भावना, सामयिकसम्भावना, निर्वाहः.—(Fortune sufficient for subsistence) वृत्त्युचितं धनं, जीवननिर्वाहसमर्थं धनं.—(Bare subsistence, food and clothing) ग्रासाच्छादनं, अशनाच्छादनं (or -ने).—(Enough) अलं.

COMPETENT, *a.* (Adequate) शक्तः -क्ता -क्तं, क्षमः -मा -मं, योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, समर्थः -र्था -र्थं, पर्य्याप्तः -प्ता -प्तं.—(Adequate to any work) कार्य्यक्षमः -मा -मं, कर्म्मक्षमः -मा -मं, अलङ्कर्म्मीणः -णा -णं, कृती -तिनी -ति (न्).—(Reasonable, moderate) मितः -ता -तं, परिमितः -ता -तं, समः -मा -मं.

COMPETENTLY, *adv.* पर्य्याप्तं, युक्तं, उपयुक्तं, उचितं, सामर्थ्येन, योग्यप्रकारेण.—(Sufficiently) अलं, यथावत्.—(Moderately) परिमितं.

COMPETIBLE, *a.* योग्यः -ग्या -ग्यं, अविरुद्धः -द्धा -द्धं. *See* COMPATIBLE.

COMPETITION, *s.* जिगीषा, विजिगीषा, स्पर्द्धा, प्रतिस्पर्द्धा, आस्पर्द्धा, सङ्घर्षः, अहम्पूर्व्विका, परस्पराभिभवेच्छा, उपप्लवः, समवायः; 'of buyers,' प्रयामः.

COMPETITOR, *s.* जिगीषुः *m.*, विजिगीषुः *m.*, स्पर्द्धी *m.* (न्), प्रतिस्पर्द्धी *m.* (न्), अभियोक्ता *m.* (क्तृ), अर्थी *m.* (न्), दायादः, प्रतिपक्षः, एकार्थाभिलाषी *m.* (न्), एकचेष्टः, प्रतियोगी *m.* (न्).

COMPILATION, *s.* सङ्ग्रहः -हणं, सङ्क्षेपः, संहारः, समाहारः, समाहृतिः *f.*, संहिता, खिलः -लं.

To COMPILE, *v. a.* समाहृ (c. 1. -हरति -हर्त्तुं), संहृ, उद्धृ; सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

COMPILED, *p. p.* समाहृतः -ता -तं, संहृतः -ता -तं, सङ्गृहीतः -ता -तं, संक्षिप्तः -प्ता -प्तं, प्रणीतः -ता -तं.

COMPILER, *s.* व्यासः, समाहर्त्ता *m.* (र्त्तृ), उद्धर्त्ता *m.* (र्त्तृ), निबन्धा *m.* (न्धृ).

COMPLACENCE, COMPLACENCY, *s.* (Satisfaction, pleasure) प्रसन्नता, प्रसादः, तुष्टिः *f.*, सन्तोषः, परितोषः, सौमनस्यं, शान्तिः *f.*, प्रीतिः *f.*—(Civility, complaisance) अनुग्रहः, अनुकूलता, अनुवृत्तिः *f.*, अनुनयः.

COMPLACENT, *a.* प्रसन्नः -न्ना -न्नं, सन्तुष्टः -ष्टा -ष्टं, सुशीलः -ला -लं, अनुरोधी -धिनी -धि (न्), अनुनयी -यिनी -यि (न्), सुप्रसादः -दा -दं.

COMPLACENTLY, *adv.* प्रसादेन, प्रसन्नमनसा, सन्तोषेण, तुष्टमनसा.

To COMPLAIN, *v. n.* (Represent sorrowfully) सशोकं or विलापपूर्व्वकं or सविलापं स्वार्थं निविद् in caus. (-वेदयति -यितुं) or विज्ञा in caus. (-ज्ञापयति -यितुं), क्लेशं or दुःखम् आख्या (c. 2. -ख्याति -ख्यातुं) or कथ् (c. 10 कथयति -यितुं).—(Lament) विलप् (c. 1. -लपति -पितुं), परिदेव् (c. 1. -देवते -वितुं), क्रुश् (c. 1. क्रोशति, क्रोष्टुं), विक्रुश्, अनुशुच् (c. 1. -शोचति -चितुं), रुद् (c. 2. रोदिति -दितुं), क्रन्द् (c. 1. क्रन्दति -न्दितुं).—(Inform against) अभियुज् (c. 7. -युनक्ति -योक्तुं), पिशुन (nom. पिशुनयति -यितुं), परिवद् (c. 1. -वदति -दितुं).

COMPLAINANT, *s.* अभियोक्ता *m.* (क्तृ), अभियोगी *m.* (न्), विवादार्थी *m.* (न्), अर्थी *m.* (न्), पूर्व्वपक्षवादी *m.* (न्) or कारणवादी or क्रियावादी or परिवादी, पूर्व्वावेदकः.—(Informer) पिशुनः.

COMPLAINER, *s.* विलापी *m.* (न्), परिदेवी *m.* (न्), परिदेवकः, विलपनकृत्.

COMPLAINT, *s.* (Sorrowful representation) विलापेन or शोकेन स्वार्थनिवेदनं or स्वार्थविज्ञापनं or दुःखकथनं, क्लेशख्यापनं.—(Lamentation) विलापः, विलपनं, परिदेवनं.—(In law) अभियोगः, भाषापादः, पूर्व्वपक्षपादः, विवादः.—(Informing against) पैशुन्यं.—(Disease) रोगः, व्याधिः *m.*, आमयः, आर्त्तिः *f.*, पीडा.

COMPLAISANCE, *s.* अनुकूलता, अनुग्रहः, अनुवर्त्तनं, अनुवृत्तिः *f.*, अनुनयः, अनुरोधः -धनं, आनन्दनं, प्रश्रयः, अभिनीतिः *f.*, सभाजनं, सुशीलता, दाक्षिण्यं.

COMPLAISANT, *a.* अनुकूलः -ला -लं, अनुग्राही -हिणी -हि (न्), अनुनयी -यिनी -यि (न्), अनुरोधी -धिनी -धि (न्), सानुनयः -या -यं, चाटुकारः -रा -रं, दक्षिणः -णा -णं, वन्दारुः -रुः -रु, सुप्रसादः -दा -दं, प्रियंवदः -दा -दं.

COMPLAISANTLY, *adv.* अनुकूलं, सानुग्रहं, सानुरोधं, सानुनयं, आनन्दनपुरःसरं.

To COMPLANE, *v. a.* समीकृ, समान (nom. समानयति -यितुं), समस्थलीकृ.

COMPLEMENT, *s.* (Perfection, fulness) सम्पूर्णता, पूर्त्तिः *f.*—(The full quantity, complete set) साकल्यं, पूरणं, परिपूरकं, परिसंख्या, साकल्यं, समुदायः.—(Of an arc) कोटिः *f.*—(Of a segment) पीठः.

COMPLETE, *a.* (Perfect, full) सम्पूर्णः -र्णा -र्णं, पूर्णः -र्णा -र्णं, समाप्तः -प्ता -प्तं, सम्पन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, संसिद्धः -द्धा -द्धं, पर्य्याप्तः -प्ता -प्तं, समस्तः -स्ता -स्तं, सकलः -ला -लं, निखिलः -ला -लं, अखिलः -ला -लं, समग्रः -ग्रा -ग्रं, कृत्स्नः -त्स्ना -त्स्नं, राद्धः -द्धा -द्धं, साधनः -ना -नं.—(Having no deficiencies) अशेषः -षा -षं, निःशेषः -षा -षं, अविकलः -ला -लं, अन्यूनः -ना -नं.—(Mature) पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, परिणतः -ता -तं; 'complete army,' अक्षौहिणी, चतुरङ्गः.

To COMPLETE, *v. a.* समाप् in caus. (-आपयति -यितुं), सम्पॄ in caus. (-पूरयति -यितुं), समभिपॄ, सम्पद् in caus. (-पादयति -यितुं), निष्पद्; साध् in caus. (साधयति -यितुं), संसाध्, निर्वृत् in caus. (-वर्त्तयति -यितुं), निवृत्, संवृत्.

COMPLETED, *p. p.* समाप्तः -प्ता -प्तं, सम्पन्नः -न्ना -न्नं, निष्पन्नः -न्ना -न्नं, सम्पूर्णः -र्णा -र्णं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, विपर्य्यस्तः -स्ता -स्तं, समापन्नः -न्ना -न्नं, अवसितः -ता -तं, निर्वृत्तः -त्ता -त्तं.

COMPLETELY, *adv.* अशेषतस्, अशेषेण, निःशेषेण, पर्य्याप्तं, सम्पूर्णं, साकल्येन, अखिलेन, निखिलेन, कृत्स्नशस्, कार्त्स्न्येन, सम्यक्, सर्व्वतस्, आमूलं, निरवशेषं, तत्त्वतस्.

COMPLETENESS, *s.* सम्पूर्णता, परिपूर्णता -त्वं, पूर्त्तिः *f.*, संसिद्धिः *f.*

COMPLETION, *s.* (The act) समापनं, साधनं, निष्पादनं, सम्पादनं, निर्व्वर्त्तनं, निर्व्वहणं, निर्व्वाहः.—(The state) सिद्धिः *f.*, संसिद्धिः *f.*, सम्पूर्णता, परिपूर्णता, समाप्तिः *f.*, निष्पत्तिः *f.*, निर्वृत्तिः *f.*, आभोगः.—(Maturity) परिणामः, परिणतिः *f.*, परिपाकः.

COMPLETIVE, *a.* पूरकः -का -कं, परिपूरकः -का -कं, समापकः -का -कं.

COMPLEX, *a.* सङ्कीर्णः -र्णा -र्णं, प्रकीर्णः -र्णा -र्णं, [illegible] -ता -तं, समस्तः -स्ता -स्तं, सामासिकः -की -कं, अनेकार्थः -र्था -र्थं, नानार्थिकः -का -कं, बह्वर्थः -र्था -र्थं, नानाप्रकारः -रा -रं, असरलः -ला -लं.

COMPLEXION, *s.* (Colour of the face) मुखरागः, [illegible]रागः, वदनवर्णः; 'having a pale complexion,' विवर्णवदनः -ना -नं, पाण्डुवर्णः -र्णा -र्णं.—(Temperament) भावः, प्रकृतिः *f.*, देहस्वभावः, शरीरभावः, शरीरस्थितिः *f.*

COMPLEXIONAL, *a.* प्राकृतः -ती -तं, देहस्वभावसम्बन्धी -न्धिनी -न्धि (न्).

COMPLEXITY, *s.* सङ्कटः, साङ्कर्यं, सङ्कीर्णता, समस्तता, मिश्रता, नानार्थकत्वं.

COMPLIANCE, *s.* अनुकूलता, अनुरोधः -धनं, अनुरोधित्वं, अनुवृत्तिः *f.*

अनुवर्त्तनं, अनुग्रहः, परिग्रहः, अनुनयः, स्वीकारः, सम्मतिः *f.*, अनुमतिः.

COMPLIANT, *a.* अनुरोधी -धिनी -धि (न्), अनुकूलः -ला -लं, अनुग्रही -हिणी -हि (न्), अनुनयी -यिनी -यि (न्), विनयग्राही -हिणी -हि (न्), विनेयः -या -यं, प्रणेयः -या -यं, विधेयः -या -यं, अनुविधायी -यिनी -यि (न्), वचनेस्थितः -ता -तं, नम्रः -म्रा -म्रं, कृतानुकूल्यः -ल्या -ल्यं, आश्रवः -वा -वं.

To COMPLICATE, *v.a.* सङ्कुरीकृ, मिश्रीकृ, सङ्कीर्णीकृ, सङ्कुलीकृ, व्यस्तव्यस्तीकृ, परस्परं सम्मिश् (c. 10. -मिश्रयति -यितुं) or सम्बन्ध् (c. 9. -बध्नाति, -बन्धुं) or संयुज् (c. 7. -युनक्ति -योक्तुं) or समस् (c. 4. -अस्यति -असितुं).

COMPLICATED, *p. p.* सङ्कुरीकृतः -ता -तं, सान्निपातिकः -की -कं, प्रकीर्णः -र्णा -र्णं, समस्तः -स्ता -स्तं, मिश्रितः -ता -तं, सम्बद्धः -द्धा -द्धं.

COMPLICATION, *s.* (The act) सङ्कुरीकरणं, सङ्कुलीकरणं, समसनं.—(The state) सन्निपातः, प्रकीर्णता, समस्तता, व्यस्तव्यस्तता.

COMPLICE, *s.* पापसहायः, पापसम्मितः, सहकारी *m.* (न्), सङ्गी *m.* (न्).

COMPLIER, *s.* अनुरोधी *m.* (न्), अनुग्रही *m.* (न्), अनुविधायी *m.* (न्), प्रणयी *m.* (न्).

COMPLIMENT, *s.* चाटूक्तिः *f.*, चाटुः *m.* -टु *n.*, सान्त्वं, सान्त्वोक्तिः *f.*, आलोकः, आलोकशब्दः, कोमलवाक् *f.* (च्), मधुरवाक्यं, प्रश्रयवाक्, मानोक्तिः *f.*, मङ्गलः; 'a complimentary present,' उपायनं.

To COMPLIMENT, *v. a.* चाटूक्त्या or आलोकेन or कोमलवाचा or मधुरवाक्यैः सान्त्व् (c. 10. सान्त्वयति -यितुं).

COMPLIMENTAL, COMPLIMENTARY, *a.* चाटुकारः -री -रं, सान्त्ववादः -दा -दं, सान्त्वकरः -री -रं, स्तुतिमयः -यी -यं, वन्दारुः -रुः -रु, प्रियवादी -दिनी -दि (न्), औपचारिकः -की -कं.

COMPLIMENTER, *s.* सान्त्ववादः, चाटुवादी *m.* (न्), प्रियवादी, आभाषणशीलः, आदरकृत्.

COMPLOT, *s.* गोपनीयकर्म्मसम्पादनार्थं पापसाहित्यं, कुसाहित्यं, कूटसाहित्यं, कूटसंविद् *f.*, कुमन्त्रणा, कुपरामर्शः, कूटसंसर्गः.

To COMPLOT, *v. n.* गोपनीयकर्म्मसम्पादनार्थं कुसाहित्यं कृ, कूटसाहित्यं कृ, कूटसंसर्गं कृ.

COMPLOTTER, *s.* पापसहितः, कूटसहितः, कूटसम्पादनार्थं अन्यसहितः or अन्यसङ्घातवान् *m.* (त्) or संश्रमकः.

To COMPLY, *v. n.* (Yield to, assent to) अनुमन् (c. 4. -मन्यति -ते -मन्तुं), अनुज्ञा (c. 9. -जानाति -ज्ञातुं), स्वीकृ, स्वीकारं कृ, प्रतिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), प्रतीष् (c. 6. -इच्छति -एषितुं), सम्प्रतीष्, अनुरुध् in pass. (-रुध्यते), अनुविधा in pass. (-धीयते), अनुकूल (nom. अनुकूलयति -यितुं).—(Suit with, accord with) युज् in pass. (युज्यते).—(Submit to) उपगम् (c. 1. -गच्छति -गन्तुं), अभ्युपे (c. 2. अभ्युपैति -एतुं).

COMPONENT, *a.* साधकः -का -कं, रचकः -का -कं, विरचकः -का -कं, कल्पकः -का -कं.—(Component part) साधनं, अङ्गं, भागः; 'component part of an army,' सेनाङ्गं.

To COMPORT, *v. n.* (Agree, suit) युज् in pass. (युज्यते), उपपद् in pass. (-पद्यते); 'comport one's self,' आचर् (c. 1. -चरति -रितुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), व्यवहृ (c. 1. -हरति -हर्त्तुं).

COMPORTABLE, *a.* योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं, अविरुद्धः -द्धा -द्धं.

COMPORTMENT, *s.* वृत्तिः *f.*, आचारः, व्यवहारः, स्थितिः *f.*, रीतिः *f.*, गतिः *f.*, चारित्र्यं, चरितं, चेष्टितं.

To COMPOSE, *v. a.* (Form by joining different things together) सन्धा (c. 3. -दधाति -धातुं), समाधा, संस्था in caus. (-स्थापयति -यितुं), क्लृप् (c. 10. कल्पयति -यितुं), सङ्क्लृप्, निर्म्मा (c. 2. -माति -मातुं), एकत्र कृ, सम्मिलीकृ.—(Arrange, adjust) रच् (c. 10. रचयति -यितुं), विरच्, विधा, संविधा, समाधा, विन्यस् (c. 4. -अस्यति -असितुं), ग्रन्थ् (c. 1. ग्रन्थति or ग्रथति -न्थितुं).—(Settle a difference) सन्धा, प्रशम् in caus. (-शमयति -यितुं).—(Compose a book) रच्, विरच्, निबन्ध् (c. 9. -बध्नाति -बन्धुं), ग्रन्थं कृ, क्लृप्.—(Compile) सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), समस् (c. 4. -अस्यति -असितुं).—(Constitute) संस्था, क्लृप्, निर्म्मा. *See* COMPOSED; 'the body is composed of five elements,' पञ्चभिर् निर्म्मितो देहः; 'whatever wealth composes the treasury,' यद् धनं कोषभूतं.—(Calm) शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्; प्रसद् in caus. (-सादयति -यितुं), अभिप्रसद्, सान्त्व् (c. 10. सान्त्वयति -यितुं).—(Arrange the type) अक्षराणि or मुद्राक्षराणि विन्यस् or सन्धा or विधा.

COMPOSED, *p. p.* (Calm) शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, समाहितः -ता -तं, प्रसन्नः -न्ना -न्नं, अव्याकुलः -ला -लं, स्थिरः -रा -रं, अविक्षिप्तः -प्ता -प्तं.—(In mind) शान्तचेताः -ताः -तः (स्), प्रशान्तात्मा -त्मा -त्म (न्), स्थिरमतिः -तिः -ति, स्थिरधीः -धीः -धि, अविक्षिप्तचित्तः -त्ता -त्तं, अनावेगरहितः -ता -तं, असम्भ्रमः -मा -मं, निरुद्विग्नः -ग्ना -ग्नं.—(In countenance) प्रसन्नमुखः -खी -खं.—(Constituted, consisting of) आत्मकः -का or -त्मिका -कं in comp., रूपः -पा -पं in comp.; 'an army composed of elephants, horses, and infantry,' हस्त्यश्वपादातात्मकं बलं; 'composed of two,' द्व्यात्मकः -का -कं.—(Made of) निर्म्मितः -ता -तं, मयः -यी -यं in comp., सम्भृतः -ता -तं.—(Written, arranged, compiled) रचितः -ता -तं, विरचितः -ता -तं, कल्पितः -ता -तं, बद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, ग्रथितः -ता -तं, प्रणीतः -ता -तं, सङ्गृहीतः -ता -तं; 'a story composed in verse,' श्लोकबद्धा कथा.—(As music) स्वरबद्धः -द्धा -द्धं.

COMPOSEDLY, *adv.* प्रशान्तं, निरुद्विग्नं, असम्भ्रमं, सम्भ्रमेण विना.

COMPOSEDNESS, *s.* शान्तता, शान्तिः *f.*, प्रसन्नता, निराकुलता, असम्भ्रमः, अश्रमः.

COMPOSER, *s.* रचकः, विरचकः, ग्रन्थकारः, ग्रन्थकृत्, निबन्धा *m.* (न्धृ).—(Of music) स्वरबन्धा *m.* (न्धृ).

COMPOSING, *a.* (Causing sleep) उपशायी -यिनी -यि (न्), स्वप्नकृत *m. f. n.*

COMPOSITION, *s.* (Conjunction, combination, union) सन्धिः *m.*, संयोगः, मिश्रणं, सङ्घातः, संश्लेषः, समासञ्जनं, संव्यूहः, संस्थापनं.—(Adjustment) समाधानं, सन्धानं, निष्पत्तिः *f.*—(Of differences) सन्धिः *m.*, सन्धानकरणं, समासः.—(Literary composition) रचना, विरचना, ग्रन्थकरणं.—(Poetical) काव्यरचना, कवनं.—(A poetical composition) काव्यं, काव्यबन्धः.—(A written work) ग्रन्थः.—(Compilation) संहिता, संहारः, समाहारः, सङ्ग्रहः, सन्निपातः.—(Art of rhetorical composition) अलङ्कारविद्या.—(Of words) समसनं, समासः, सङ्घातः.—(Agreement, compact) नियमः, संविद्, समयः.

COMPOSITIVE, *a.* सन्धानकरणः -णी -णं, सामासिकः -की -कं, मिश्रितः -ता -तं.

COMPOSITOR, *s.* मुद्रायन्त्रालये मुद्राक्षरविन्यासकृत्, यो जनो मुद्रायन्त्रे मुद्राक्षराणि विन्यस्यति.

COMPOST, *s.* (Manure) पांशुः *m.*, पांसुः, सारः, उर्व्वराकरणार्थं गोमयादिसम्मिश्रद्रव्यं.

To COMPOST, *v. a.* उर्व्वराकरणार्थं पांशुं or गोमयादिसम्मिश्रद्रव्यं भूमौ प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or धा (c. 3. दधाति, धातुं).

COMPOSURE, *s.* (Act of composing) रचना, विरचनं -ना, निर्म्माणं.—(Combination, arrangement) सन्धिः *m.*, संयोगः, मिश्रणं, सङ्घातः, विन्यासः.—(Of mind) शान्तिः *f.*, शमः, समाधिः *m.*, प्रसादः, विश्रामः, अश्रमः, असम्भ्रमः, निराकुलता, अक्षोभः, स्थिरता, स्थैर्यं.—(Settlement of differences) सन्धानं, सन्धिः *m.*, सन्धानकरणं, समासः.

COMPOTATION, s. सपीतिः, सम्पीतिः f., सहपानं, तुल्यपानं, एकत्र पानं.

COMPOTATOR, s. सहपायी m. (न्), अन्येन सह पायी m. (न्).

To COMPOUND, v. a. समस् (c. 4. -अस्यति -असितुं), मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, मिश्रीकृ, संश्लिष् in caus. (-श्लेषयति -यितुं), संयुज् (c. 7. -युनक्ति -योक्तुं), सन्धा (c. 3. -दधाति -धातुं), संहन् (c. 2. -हन्ति -हन्तुं), संलग्नीकृ, एकीकृ, एकत्र कृ, सङ्करीकृ; 'to compound ingredients,' प्रक्षेपं कृ; 'medicines,' संस्कारं कृ, योगं कृ.—(Settle differences) सन्धा (c. 3. -दधाति -धातुं), समाधा, समाधं कृ.

To COMPOUND, v. n. (*Settle a debt by agreement to abate something*) समयपूर्व्वकम् ऋणभागम् अपास्य ऋणं शुध् in caus. (शोधयति -यितुं), समयपूर्व्वम् ऋणांशं शोधयित्वा आनृण्यं गम् (c. 1. गच्छति, गन्तुं), ऋणांशं वितीर्य्य आनृण्यं दा (c. 3. ददाति, दातुं).

COMPOUND, s. मिश्रणं, समसनं, समासः, सङ्करः.—(The mass compounded) मिश्रितद्रव्यसमूहः.—(A compound substance) योगः, मिश्रितद्रव्यं; 'a compound word,' समस्तपदं, समासः; 'separating compound words,' पदभञ्जनं.

COMPOUND, COMPOUNDED, a. समस्तः -स्ता -स्तं, सामासिकः -की -कं, मिश्रितः -ता -तं, मिश्रः -श्रा -श्रं, सम्मिश्रः -श्रा -श्रं, संयुक्तः -क्ता -क्तं, संसृष्टः -ष्टा -ष्टं, एकत्रीकृतः -ता -तं, सङ्करीकृतः -ता -तं; 'a compound perfume,' कृत्रिमधूपः.

COMPOUNDER, s. मिश्रणकृत्, सङ्करकृत्, सन्धानकरणः -कर्त्ता m. (र्त्तृ), समाधाता m. (तृ); 'of medicines,' योगविद् m.

To COMPREHEND, v. a. (Understand in the mind) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), उपलभ् (c. 1. -लभते -लब्धुं), अवगम् (c. 1. -गच्छति -गन्तुं), अवे (*i.e.* root इ with अव, अवैति -तुं), ऊह् (c. 1. ऊहते -हितुं), बुध् (c. 1. बोधति -धितुं), विद् (c. 2. वेत्ति, वेदितुं), अनुभू (c. 1. -भवति -भवितुं), भू in caus. (भावयति -यितुं).—(Include) परिग्रह, अन्तर्गण् (c. 10. -गणयति -यितुं), परिसमाप् (c. 5. -आप्नोति -आप्तुं), व्याप्, प्रतिसंहृ (c. 1. -हरति -हर्त्तुं). 'Comprehending' is expressed by आत्मकः -का -कं or रूपः -पा -पं affixed; as, 'comprehending two,' द्व्यात्मकः -का -कं.

COMPREHENDED, p. p. (Understood) गृहीतः -ता -तं, उपलब्धः -ब्धा -ब्धं, अवगतः -ता -तं.—(Included) अन्तर्गतः -ता -तं, परिसमाप्तः -प्ता -प्तं, आन्तर्गणिकः -की -कं, प्रतिसंहृतः -ता -तं, आकलितः -ता -तं, समाविष्टः -ष्टा -ष्टं, गर्भः -र्भा -र्भं in comp.

COMPREHENSIBLE, a. ग्रहणीयः -या -यं, ग्राह्यः -ह्या -ह्यं, उपलभ्यः -भ्या -भ्यं, धीगम्यः -म्या -म्यं, मनोगम्यः -म्या -म्यं, विभाव्यः -व्या -व्यं, भावनीयः -या -यं, बोधनीयः -या -यं, अवधारणीयः -या -यं, व्यापनीयः -या -यं.

COMPREHENSION, s. (Understanding) मेधा, उपलब्धिः f., उपलम्भः, भावना, बुद्धिः f., मतिः f., बोधः, अवधारणं, अनुभवः, विवेचना.—(Act of comprising) ग्रहणं, परिग्रहः, परिवेष्टनं.—(Inclusion) प्रतिसंहारः, परिसमाप्तिः f., व्याप्तिः f., समासक्तिः f., समावेशः, संवरः.

COMPREHENSIVE, a. (Comprising much) बहुग्रहः -हा -हं.—(Extending far and wide) व्यापी -पिनी -पि (न्), व्यापकः -का -कं, सुपर्य्याप्तः -प्ता -प्तं, सर्व्वमयः -यी -यं, बहुविस्तीर्णः -र्णा -र्णं.—(Compendious) साङ्क्षेपिकः -की -कं, सामासिकः -की -कं; 'a comprehensive speech,' बहुमर्म्मवाक्यं.

COMPREHENSIVELY, adv. संक्षेपतस्, संक्षेपात्, समासतस्, कार्त्स्न्येन, निःशेषं.

COMPREHENSIVENESS, s. (Conciseness) संक्षेपः, संक्षिप्तता, सांक्षेपिकत्वं, समस्तता, उपसंहारः.—(Extensive diffusion) व्यापकत्वं, बहुविस्तीर्णता, सर्व्वगत्वं.

COMPRESS, s. पट्टः, पट्टकः, आवेष्टनं, कवलिका, अनुवेल्लितं.

To COMPRESS, v. a. सङ्कुच् (c. 1. -कोचति -चितुं), संहृ (c. 1. -हरति -हर्त्तुं), प्रतिसंहृ, संवृ (c. 5. -वृणोति, c. 1. -वरति -वरितुं -रीतुं), संहन् (c. 2. -हन्ति -हन्तुं), सम्पीड् (c. 10. -पीडयति -यितुं).

COMPRESSED, p. p. संहृतः -ता -तं, प्रतिसंहृतः -ता -तं, संहतः -ता -तं, सङ्कुचितः -ता -तं, आकुञ्चितः -ता -तं, सम्पीडितः -ता -तं, संवृतः -ता -तं, सङ्कलितः -ता -तं, पुटितः -ता -तं.

COMPRESSIBILITY, s. संहरणीयता, सङ्कोचक्षमत्वं, सम्पीडनीयत्वं, संवरितुं शक्यता.

COMPRESSIBLE, a. संहरणीयः -या -यं, प्रतिसंहरणीयः -या -यं, सङ्कोचनीयः -या -यं, सम्पीडनीयः -या -यं, संवारणीयः -या -यं, सङ्कोचक्षमः -मा -मं.

COMPRESSION, s. संहृतिः f., संहारः, प्रतिसंहारः, समाहारः, संवृतिः f., संवरः, पीडनं, सम्पीडनं, सङ्कोचः -चनं, आकुञ्चनं, समसनं, ह्रासः.—(Of the lips, &c.) संवारः.

To COMPRISE, v. a. परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अन्तर्गण् (c. 10. -गणयति -यितुं), परिसमाप् (c. 5. -आप्नोति -आप्तुं), प्रतिसंहृ (c. 1. -हरति -हर्त्तुं); 'Karpúradwípa is comprised in Jambudwípa,' कर्पूरद्वीपो जम्बुद्वीपान्तर्गतः. 'Comprising' is expressed by आत्मकः -का -त्मिका -कं or रूपः -पा -पं; as, 'comprising two,' द्व्यात्मकः -का -कं.

COMPRISED, p. p. अन्तर्गतः -ता -तं, अन्तर्गणितः -ता -तं, आन्तर्गणिकः -की -कं, प्रतिसंहृतः -ता -तं, आकलितः -ता -तं, समाविष्टः -ष्टा -ष्टं, गर्भः -र्भा -र्भं in comp., गर्भितः -ता -तं.

COMPROBATION, s. प्रमाणं, प्रमाणीकरणं, साक्ष्यं, साक्षिता, सम्मतिः f.

COMPROMISE, s. समयं कृत्वा परस्परेण स्वस्वत्वाद् अंशापासनं or अंशवितरणं or स्वाधिकारात् किञ्चिन्निवर्त्तनं or स्वस्वत्वात् किञ्चिन्निवृत्तिः f. or स्वाभियोगात् किञ्चिदपासनं.—(A mutual promise to refer a controversy to arbitrement) प्रमाणपुरुषः पृच्छ्यताम् इति परस्परविवादिनोः समयः.

To COMPROMISE, v. a. समयं कृत्वा परस्परं स्वाधिकारात् or स्वस्वत्वात् किञ्चिन् निवृत् (c. 1. -वर्त्तते -र्त्तितुं) or किञ्चिद् अपास् (c. 4. -अस्यति -असितुं) or अंशम् अपास् or वितृ (c. 1. -तरति -रितुं -रीतुं).—(Bring into hazard) संशयस्थं -स्थां -स्थं कृ, सन्देहस्थं -स्थां -स्थं कृ.

COMPROVINCIAL, s. एकदेशीयः, एकदेशजः, सदेशः, सदेशीयः, एकप्रदेशस्थः.

To COMPTROL, v. a. अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), कार्य्याण्य् अवेक्ष् (c. 1. -ईक्षते -क्षितुं).

COMPTROLLER, s. अध्यक्षः, उपद्रष्टा m. (ष्टृ), कार्य्याधीशः, कार्य्यद्रष्टा m. (ष्टृ), अवेक्षिता m. (तृ), अधिकारी m. (न्), कार्य्याधिकृतः, आधिकर्मिकः.

COMPTROLLERSHIP, s. अध्यक्षता -त्वं, कार्य्येक्षणं, कार्य्यदर्शनं, कार्य्याधीशता.

COMPULSION, s. बलात्कारः, बलं, साहसं, प्रमाथः, प्रसभं; 'by compulsion,' बलात्, बलेन, बलात्कारेण.

COMPULSORY, COMPULSIVE, a. बलात्कारी -रिणी -रि (न्), बलवान् -वती -वत् (त्), बली -लिनी -लि (न्), प्रबलः -ला -लं.—(Obligatory) अवश्यकः -का -कं.

COMPULSORILY, COMPULSIVELY, adv. बलात्कारेण, बलेन, बलात्, प्रसह्य, प्रसभं.

COMPUNCTION, s. सन्तापः, अनुतापः, पश्चात्तापः, मनस्तापः, अनुशोकः, अनुशयः.

COMPUNCTIOUS, a. अनुतापी -पिनी -पि (न्), अनुशोचकः -का -कं, अनुशयी -यिनी -यि (न्).

COMPUTABLE, a. गणनीयः -या -यं, विगण्यः -ण्या -ण्यं, संख्येयः -या -यं.

COMPUTATION, s. गणनं -ना, विगणनं, सङ्ख्यानं, परिसङ्ख्यानं, गुणनं.—(The sum computed) गणितं.

To COMPUTE, *v. a.* गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्; संख्या (c. 2. -ख्याति -ते -तुं), परिसंख्या, अभ्यरिख्या; कल् (c. 10. कलयति -यितुं), सङ्कल्.

COMPUTED, *p. p.* गणितः -ता -तं, परिगणितः, संख्यातः -ता -तं, परिसंख्यातः -ता -तं, गुणितः -ता -तं, कलितः -ता -तं.

COMPUTER, *s.* गणकः, विगणकः, गुणकः, गुणाकारः, संख्याता *m.* (तृ).

COMRADE, *s.* सङ्गी *m.* (न्), सहायः, सहचरः, सहवासी *m.* (न्), बन्धुः *m.*, सुहृद् *m.*, मित्रं, उपसङ्गी *m.* (न्), पक्षकः, भागी *m.* (न्).—(In arms) सहयुध्वा *m.* (न्).

To CON, *v. n.* (Study) अभ्यस् (c. 4. -अस्यति -असितुं), अधी (c. 2. अधीते, अध्येतुं).

To CONCATENATE, *v. a.* शृङ्खलारूपेण अन्यद् अन्येन सन्धा (c. 3. -दधाति -धातुं), अविच्छिन्नक्रमेण or अविच्छिन्नं or निरन्तरम् अन्यद् अन्येन संयुज् (c. 7. -युनक्ति -योक्तुं).

CONCATENATION, *s.* शृङ्खलता -त्वं, शृङ्खलारूपेण अन्यस्य अन्येन सन्धानं or संयोजनं.—(A series) श्रेणी, पंक्तिः *f.*, माला, प्रबन्धः, प्रसङ्गः; 'a concatenation of causes,' कारणमाला.

CONCAVE, *a.* उन्नतः -ता -तं, पुटाकारः -रा -रं, गर्भाकारः -रा -रं, उदराकृतिः -तिः -ति, अब्जाकारः -रा -रं, कूर्म्मपृष्ठाकारः -रा -रं.

CONCAVITY, *s.* उन्नतता, पुटः, पुटकं, गर्भः, उदरं.

To CONCEAL, *v. a.* गुह् (c. 1. गूहति -ते, गूहितुं, गोढुं), निगुह्, विनिगुह्; छद् (c. 10. छादयति -यितुं), आच्छद्, समाच्छद्, प्रच्छद्, प्रतिच्छद्, सञ्छद्; गुप् in des. (जुगुप्सते -प्सितुं), स्थग् (c. 10. स्थगयति -यितुं); निह्नु (c. 2. -ह्नुते -ह्नोतुं), अन्तर्धा (c. 3. -दधाति -धातुं), तिरोधा, उपनिधा, अपिधा, पिधा; अपवृ in caus. (-वारयति -यितुं), संवृ; गोपनं कृ; 'to be concealed,' लिरस्कृ in pass. (-क्रियते), रहस् (nom. रहायते).

CONCEALABLE, *a.* गुह्यः -ह्या -ह्यं, गोप्यः -प्या -प्यं, गोपनीयः -या -यं, प्रच्छादनीयः -या -यं, गोपनार्हः -र्हा -र्हं.

CONCEALED, *p. p.* गूढः -ढा -ढं, गुप्तः -प्ता -प्तं, अलुप्तः -प्ता -प्तं, छन्नः -न्ना -न्नं, प्रच्छन्नः -न्ना -न्नं, उपच्छन्नः -न्ना -न्नं, छादितः -ता -तं, प्रच्छादितः -ता -तं, स्थगितः -ता -तं, अपवारितः -ता -तं, निवारितः -ता -तं, संवृतः -ता -तं, आवृतः -ता -तं, अन्तर्हितः -ता -तं, तिरोहितः -ता -तं, पिहितः -ता -तं, अन्तरितः -ता -तं, निभृतः -ता -तं, निह्नुतः -ता -तं, तिरस्कृतः -ता -तं, अपह्नुतः -ता -तं.

CONCEALER, *s.* प्रच्छादयिता *m.* (तृ), गोपनकृत्, गोप्ता *m.* (प्तृ), अपह्नोता *m.* (तृ).

CONCEALMENT, *s.* गोपनं, सङ्गोपनं, छादनं, प्रच्छादनं, गुप्तिः *f.*, अन्तर्धानं, तिरोधानं, अपिधानं, पिधानं, स्थगनं, अपवारणं, अपह्नुत्वं, अपहारः, निह्नवः, अन्तर्द्धिः; 'in concealment,' निभृते, रहसि, गोपने, प्रच्छन्नं, गुप्ते.

To CONCEDE, *v. a.* वितॄ (c. 1. -तरति -रितुं -रीतुं), दा (c. 1. यच्छति, दातुं), अनुज्ञा (c. 9. -जानाति -जानीते -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं), अनुप्रदा (c. 3. -ददाति -दातुं), प्रयम् (c. 1. -यच्छति -दातुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), मोक्ष् in caus. (-वारयति -यितुं), अनुमुद् (c. 1. -मोदते -दितुं), क्षम् (c. 1. क्षमते, क्षन्तुं).

CONCEDED, *p. p.* अनुज्ञातः -ता -तं, प्रोत्सारितः -ता -तं, प्रदत्तः -त्ता -त्तं, वितीर्णः -र्णा -र्णं, दत्तः -त्ता -त्तं, अङ्गीकृतः -ता -तं.

CONCEIT, *s.* (Self-conceit) गर्वः, अहङ्कारः, अहम्मतिः *f.*, मानः, मानिता, अभिमानः -नता, दर्पः, दर्पाटोपः, आटोपः, स्मयः.—(Conception, thought) मेधा, बोधः, बुद्धिः *f.*, चिन्ता, कल्पना, भावः, सङ्कल्पः.—(Fancy) कल्पना, मनःकल्पना, भावना, वासना.—(Opinion) मतिः *f.*, मतं, बुद्धिः *f.*; 'idle-conceit,' वृथाचिन्ता; 'affectation of knowledge,' ज्ञानाभिमानं.

To CONCEIT, *v. a.* (Fancy, imagine) मन् (c. 4. मन्यते, मन्तुं), चिन्त् (c. 10. चिन्तयति -यितुं), बुध् (c. 1. बोधति -धितुं), मनसा कृप् (c. 10. कल्पयति -यितुं), भू in caus. (भावयति -यितुं).

CONCEITED, *a.* मानी -निनी -नि (न्), मानवान् -वती -वत् (त्) or अभिमानवान्, अहङ्कारी -रिणी -रि (न्), अहंयुः -युः -यु, आत्माभिमानी -निनी -नि (न्), गर्वितः -ता -तं, दृप्तः -प्ता -प्तं, उद्धतः -ता -तं, समुद्धतः -ता -तं, जातस्मयः -या -यं, साटोपः -पा -पं, अवलिप्तः -प्ता -प्तं, मत्तः -त्ता -त्तं, भावितः -ता -तं; 'one conceited of his appearance,' दर्शनीयमानी *m.* (न्); 'conceited of her beauty,' रूपगर्विता; 'one conceited of his learning,' पण्डितम्मन्यः, ज्ञम्मन्यः, अलम्बुद्धः.

CONCEITEDLY, *adv.* साभिमानं, सगर्वं, सदर्पं, अहङ्कारेण, साटोपं.

CONCEITEDNESS, *s.* अहङ्कारित्वं, अहङ्कृतिः *f.*, मानिता, अभिमानता, चित्तसमुन्नतिः *f.*

CONCEIVABLE, *a.* मनोगम्यः -म्या -म्यं, धीगम्यः -म्या -म्यं, बोधगम्यः -म्या -म्यं, विभाव्यः -व्या -व्यं, भावनीयः -या -यं, विभावनीयः -या -यं, बोध्यः -ध्या -ध्यं, मन्तव्यः -व्या -व्यं.

CONCEIVABLENESS, *s.* मनोगम्यता, धीगम्यत्वं, विभाव्यत्वं, बोध्यता.

To CONCEIVE, *v. a.* and *n.* (Imagine, think) चिन्त् (c. 10. चिन्तयति -यितुं), मन् (c. 4. मन्यते, मन्तुं), ध्यै (c. 1. ध्यायति, ध्यातुं).—(Comprehend, understand) उपलभ् (c. 1. -लभते -लब्धुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), अवगम् (c. 1. -गच्छति -गन्तुं), बुध् (c. 1. बोधति -धितुं), अवधृ in caus. (-धारयति -यितुं), अवबुध् (c. 4. -बुध्यते -बोद्धुं), भू in caus. (भावयति -यितुं), सम्भू, ऊह् (c. 1. ऊहते -हितुं), अवे (c. 2. अवैति -तुं).—(In the womb) गर्भं लभ् or उपलभ् or ग्रह् or धृ (c. 1. धरति, धर्तुं).

CONCEIVED, *p. p.* (Imagined, understood) चिन्तितः -ता -तं, भावितः -ता -तं, विभावितः -ता -तं, मतः -ता -तं, बुद्धः -द्धा -द्धं, उपलब्धः -ब्धा -ब्धं, गृहीतः -ता -तं, अवगतः -ता -तं, ऊहितः -ता -तं, प्रतिपन्नः -न्ना -न्नं, अनुभूतः -ता -तं.—(Contained in the womb) गर्भधारितः -ता -तं; 'a female who has conceived,' गृहीतगर्भा, धृतगर्भा, पूर्णगर्भा, सञ्जातगर्भा, प्ररूढगर्भा, ससत्वा.

To CONCENTRATE, *v. a.* (Drive towards the centre) केन्द्रं or मध्यस्थलं प्रति गम् in caus. (गमयति -यितुं).—(Contract into a narrow compass) अल्पस्थानं प्रति गम् in caus. or समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संक्षिप्; संहृ (c. 1. -हरति -हर्तुं).—(Collect into one spot) एकत्र समाचि (c. 5. -चिनोति -चेतुं) or उपचि or समुपचि, एकीकृ, राशीकृ.—(Concentrate one's thoughts) एकाग्रः -ग्रा -ग्रं or एकायनः -ना -नं or अनन्यमनाः -नाः -नः भू.

To CONCENTRATE, *v. n.* केन्द्रं or मध्यस्थलं प्रति समागम् (c. 1. -गच्छति -गन्तुं), एकत्र मिल् (c. 6. मिलति, मेलितुं) or सम्मिल्; 'his affections concentrate in her,' अस्यां बहुभावोऽस्ति.

CONCENTRATED, *p. p.* केन्द्रं or मध्यस्थलं प्रति गमितः -ता -तं, एकत्र समाक्षिप्तः -प्ता -प्तं or समुपचितः -ता -तं, राशिगतः -ता -तं, एकीकृतः -ता -तं.

CONCENTRATION, *s.* एकत्र समाक्षेपणं, एकीकरणं.—(Of the thoughts) एकाग्रता.—(Essence) सारः.

CONCENTRIC or CONCENTRICAL, *a.* एककेन्द्रः -न्द्रा -न्द्रं, समानकेन्द्रः -न्द्रा -न्द्रं, साधारणकेन्द्रः -न्द्रा -न्द्रं.

CONCEPTION, *s.* (Comprehension) उपलब्धिः *f.*, उपलम्भः, मेधा, ग्रहणं, अनुभवः.—(Imagination) भावना, कल्पना, मनःकल्पना, वासना.—(Idea, thought) बुद्धिः *f.*, मतिः *f.*, चिन्ता, सङ्कल्पः, मनोगतं.—

(Becoming pregnant) गर्भग्रहणं, गर्भाधानं, गर्भधारणं.

To CONCERN, *v. a.* (Belong to) सम्बन्ध् in pass. (-बध्यते).—(Regard) प्रतीक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्. —(Disturb, trouble) क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), तप् in caus. (तापयति -यितुं), बाध् (c. 1. बाधते -धितुं).—(Intermeddle, be busy about other's affairs) परकार्य्येषु व्यापृ in pass. (-प्रियते) or व्यापृतः -ता -तम् अस् or चर्चां कृ or चिन्त् (c. 10. चिन्तयति -यितुं) with acc. c.

CONCERN, CONCERNMENT, *s.* (Affair, business) विषयः, अर्थः, व्यापारः, कार्य्यं, प्रयोजनं, सम्बन्धः.—(Interest) अर्थः, स्पृहणीयत्वं, सम्बन्धः, अभिसन्धानं; 'one's own concern,' स्वार्थः.—(Importance) गौरवं, गुरुत्वं -ता.—(Regard for, affection) अपेक्षा, प्रतीक्षा, अपेक्षा, अनुरागः, प्रणयः, स्नेहः.—(Thought, attention) चिन्ता, विचारः, मनोनिवेशः, मनोयोगः.—(Meddling) चर्चा, व्यापारः.—(Anxiety) चित्तोद्वेगः, उद्वेगः, औत्सुक्यं, मनोदुःखं, मनस्तापः.

CONCERNED, *p. p.* (Anxious) उद्विग्नः -ग्ना -ग्नं, उत्सुकः -का -कं, व्यग्रः -ग्रा -ग्रं.—(Interested) सम्बन्धी -न्धिनी -न्धि (न्).

CONCERNING, *prep.* प्रति, प्रतीक्ष्य, उद्दिश्य, समुद्दिश्य, उद्देशेन, अधि. 'Concerning' may be expressed by the acc. or loc. case. (Relating to) सम्बन्धी -न्धिनी -न्धि (न्), विषयकः -का -कं.

CONCERT, *s.* (Symphony) सङ्गीतं, एकतालः, एकतानः, एकलयः, तौर्य्यत्रिकं, गान्धर्वं; 'concert-room,' सङ्गीतशाला.—(Common deliberation on measures) सम्प्रधारणा, अन्यैः सह कार्य्यचिन्ता or विमर्शः or परामर्शः or सञ्चिन्तनं.—(Mutual communication) संवादः, सम्प्रवदनं.—(Co-operation) सहकारिता, सम्प्रतिपत्तिः *f.*, प्रतियोगः, अङ्गाङ्गिभावः.—(Union of purpose) चित्तैक्यं; 'one who acts in concert,' सहकारी *m.* (न्), सम्भूयकारी.

To CONCERT, *v. n.* and *a.* (Communicate mutually) संवद् (c. 1. -वदति -दितुं), सम्प्रवद्.—(Deliberate together on measures) अन्यैः सह कार्य्याणि चिन्त् (c. 10. चिन्तयति -यितुं) or प्रचिन्त् or सञ्चिन्त्. —(Co-operate) सह कृ, सम्भूय कृ.—(Contrive) घट् (c. 1. घटते -टितुं).

CONCERTED, *p. p.* सञ्चिन्तितः -ता -तं; 'well concerted,' सुघटितः -ता -तं, पक्वः -क्वा -क्वं.

CONCESSION, *s.* प्रदानं, सम्प्रदानं, वितरणं, विसर्जनं, त्यजनं, त्यागः, स्वीकारः, अङ्गीकारः, क्षमा.

CONCESSIONARY, CONCESSIVE, *a.* क्षमया प्रदत्तः -त्ता -त्तं, क्षमी -मिणी -मि (न्).

CONCH, *s.* (Shell) शङ्खः, कम्बुः *m.*, दरं, जलजं, रेचटः.—(Of Vishnu) दरेन्द्रः.

To CONCILIATE, *v. a.* (Procure good will) आराध् in caus. (-राधयति -यितुं), अभिराध्, प्रसद् in caus. (-सादयति -यितुं), अनुरञ्ज् in caus. (-रञ्जयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं), प्रसाध् in caus. (-साधयति -यितुं), लल् in caus. (लालयति -यितुं).—(Reconcile) सन्धा (c. 3. -दधाति -धातुं), समाधा, अनुनी (c. 1. -नयति -नेतुं).

CONCILIATED, *p. p.* आराधितः -ता -तं, अनुरञ्जितः -ता -तं, प्रसादितः -ता -तं, लालितः -ता -तं.

CONCILIATION, *s.* सान्त्वः -न्त्वं, सान्त्वनं, साम *n.* (न्), आराधनं, प्रसादनं, अनुरञ्जनं, सन्धानं, प्रीतिः *f.*, शाम *n.* (न्).

CONCILIATOR, *s.* अनुरञ्जकः, आराधकः, सन्धानकारकः -कारी *m.* (न्).

CONCILIATORY, *a.* अनुरञ्जकः -का -कं, आराधकः -का -कं, सान्त्वयन् -यन्ती -यत् (त्), प्रसादयन् -यन्ती -यत् (त्), हृदयग्राही -हिणी -हि (न्), हृदयङ्गमः -मा -मं.

CONCINNITY, *s.* विनीतत्वं -ता, विनयः, उपयुक्तता, योग्यः -ग्या -ग्यं.

CONCINNOUS, *a.* विनीतः -ता -तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं.

CONCISE, *a.* सङ्क्षिप्तः -प्ता -प्तं, साङ्क्षेपिकः -की -कं, सामासिकः -की -कं, अविस्तीर्णः -र्णा -र्णं, पुञ्जकः -का -कं, संहृतः -ता -तं.

CONCISELY, *adv.* सङ्क्षेपतस्, सङ्क्षेपात्, सङ्क्षेपेण, समासतस्, अविस्तरशस्, अविस्तरेण.

CONCISENESS, *s.* सङ्क्षिप्तता, सङ्क्षेपः, सामासिकत्वं, समस्तता, संहृतिः *f.*, संहारः, उपसंहारः, अविस्तरः, अविस्तीर्णता.

CONCISION, *s.* कर्त्तनं, उत्कर्त्तनं, छेदनं, उच्छेदः, उत्कृत्तिः *f.*

CONCITATION, *s.* उत्थापनं, उत्तेजनं, समुत्तेजनं, प्रोत्साहनं, उत्तापः.

CONCLAMATION, *s.* संहूतिः *f.*, संरावः, सांराविणं, बहुभिः कृता संहूतिः.

CONCLAVE, *s.* (Assembly of cardinals) रोमनगरे धर्म्माधिपतिसभा.—(Secret assembly) गूढसभा, गूढसमाजः.—(Private apartment) अवरोधनं, कक्षान्तरं, अन्तःशाला.

To CONCLUDE, *v. a.* (End, finish) समाप् in caus. (-आपयति -यितुं), सम्पॄ in caus. (-पूरयति -यितुं), साध् in caus. (साधयति -यितुं), निर्वृत् in caus. (-वर्त्तयति -यितुं), निष्पद्, अवसो (c. 4. -स्यति -सातुं), निष्पद् in caus. (-पादयति -यितुं).—(Infer by ratiocination) अनुमा (c. 2. -माति, c. 3. -मिमीते -मातुं), ऊह् (c. 1. ऊहते -हितुं), तर्क् (c. 10. तर्कयति -यितुं), अवगम् (c. 1. -गच्छति -गन्तुं).—(Determine, decide) निश्चि (c. 5. -चिनोति -चेतुं), निर्णी (c. 1. -णयति -णेतुं), अवसो, निर्दिश् (c. 6. -दिशति -देष्टुं).

To CONCLUDE, *v. n.* (End) विरम् (c. 1. -रमते -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विगम् (c. 1. -गच्छति -गन्तुं).—(Determine) अनुमानं कृ, निश्चयं कृ.

CONCLUDED, *p. p.* (Completed) समाप्तः -प्ता -प्तं, समापितः -ता -तं, सम्पूर्णः -र्णा -र्णं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, निर्वृत्तः -त्ता -त्तं, वृत्तः -त्ता -त्तं, निष्पन्नः -न्ना -न्नं, समापन्नः -न्ना -न्नं.—(Ended) अवसितः -ता -तं, अवसन्नः -न्ना -न्नं, पर्य्यवसितः -ता -तं, सितः -ता -तं, सन्नः -न्ना -न्नं, परिणतः -ता -तं, गतः -ता -तं, विपर्य्यस्तः -स्ता -स्तं.—(Inferred) अनुमितः -ता -तं, अवगतः -ता -तं.—(Determined) निश्चितः -ता -तं, निर्णीतः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

CONCLUSION, *s.* (Completion) समाप्तिः *f.*, समापनं, सिद्धिः *f.*, साधनं, निष्पादनं, निष्पत्तिः *f.*, निर्वर्त्तनं, निर्वृत्तिः *f.*—(Close, end) अवसानं, पर्य्यवसानं, अवसायः, सातिः *f.*, सायः, अन्तः, अन्तः -न्तं, पर्य्यन्तं, शेषः, परिणामः, गतिः *f.*, उपसंहारः; 'conclusion of a play or tale,' निष्ठा, निर्वहणं.—(Inference) अनुमानं, अनुमितिः *f.*, अनुमा, अनुभवः, ऊहनं, अवगमः.—(Consequence) फलं, फलानुबन्धं, उत्तरं, परिणामः, अनुवर्त्तनं.—(Decision, determination) निश्चयः, निर्णयः, निश्चितिः, निर्णयनं.—(Demonstrated conclusion) सिद्धान्तः, राद्धान्तः, कृतान्तः.—(Last result of argument) उत्तरपक्षः.

CONCLUSIVE, *a.* निश्चायकः -का -कं, निर्णायकः -का -कं, निर्णयकः -का -कं, प्रामाणिकः -की -कं, निर्देष्टा -ष्ट्री -ष्टृ (ृ), सिद्धान्तकारकः -का -कं, एकान्तिकः -की -कं.

CONCLUSIVELY, *adv.* निश्चितं, निर्णीतं, अनिश्चयं, निश्चयेन, सिद्धान्तपूर्व्वकं.

CONCLUSIVENESS, *s.* निश्चायकत्वं, निर्णायकत्वं, निर्णीतत्वं, निर्देष्टृत्वं, प्रामाण्यं.

To CONCOCT, *v. a.* (Digest, mature by heat) जॄ in caus. (जरयति -यितुं), पच् (c. 1. पचति, पक्तुं), परिपच्, श्रा (c. 1. श्रापयति -यितुं), निष्क्वथ्.—(Plot) घट् (c. 1. घटते -टितुं), सञ्चिन्त् (c. 10. -चिन्तयति -यितुं).

CONCOCTED, *p. p.* जरितः -ता -तं, परिपक्वः -क्वा -क्वं, घटितः -ता -तं.

CONCOCTION, *s.* (Digestion) पाकः, पाचनं, परिपाकः, जरणिः *f.*, भुक्तस्य आहारस्य पचनं, जीर्णिः *f.*—(A decoction) निष्क्वाथः, क्वाथः.

CONCOCTIVE, *a.* पाचकः -का -कं, पाचकः -का -कं, परिपाकी -किणी -कि (न्).

Concolour, *a.* सवर्णः -र्णा -र्णं, समवर्णः -र्णा -र्णं, एकवर्णः -र्णा -र्णं.

Concomitance, *s.* सङ्गः, अनुषङ्गः, संयोगः, सहवर्त्तनं, अनुवर्त्तनं, समवायः, अन्वयः, समन्वयः.

Concomitant, *a.* सङ्गी -ङ्गिनी -ङ्गि (न्), अनुषङ्गिकः -का -कं or आनुषङ्गिकः, संयुक्तः -क्ता -क्तं, सहवर्त्ती -र्त्तिनी -र्त्ति (न्), समवेतः -ता -तं, समेतः -ता -तं, समवायी -यिनी -यि (न्), सहितः -ता -तं, समितः -ता -तं, अन्वितः -ता -तं, समन्वितः -ता -तं.

Concomitant, *s.* सङ्गी *m.* (न्), अनुषङ्गी *m.* (न्), सहचारी *m.* (न्), सहवर्त्ती *m.* (न्), सहभावी *m.* (न्).

Concomitantly, *adv.* अन्यैः सह or सहितं or संयुक्तं or समवेतं.

To **concomitate**, *v. n.* संयुज् in pass. (-युज्यते), अन्वि (c. 2. -एति -एतुं).

Concord, *s.* (Agreement of opinion, union) सम्मतिः *f.*, एकचित्तता, चित्तैक्यं, ऐक्यं, एकता, परस्परानुमतिः *f.*, संवादः, दाक्षिण्यं, संयोगः, सन्धिः *m.*, सङ्गः.—(Love) प्रीतिः *f.*, प्रणयः.—(Compact) समयः, संविद् *f.*, नियमः.—(Grammatical relation) अनुबन्धनं, अनुषङ्गः, शब्दानां परस्परसंयोगः, अन्वयः.—(Harmony) तालैक्यं, स्वरैक्यं.

Concordance, (Agreement) ऐक्यं, एकता, सादृश्यं, अनुरूपता, आनुगुण्यं.—(To the Bible) धर्म्मपुस्तकसूची, धर्म्मपुस्तकनिर्द्देशनं.

Concordant, *a.* अनुरूपः -पा -पं, अनुगुणः -णा -णं, सदृशः -शी -शं.

Concordat, *s.* नियमः, समयः, संविद् *f.*, संश्रयः, संवादः, उपगमः.

Concorporal, *a.* एकशरीरः -रा -रं, समशरीरः -रा -रं, एकदेहः -हा -हं.

To **concorporate**, *v. a.* एकशरीरीकृ, एकीभावीकृ, एकत्र कृ, एकीकृ, पिण्डीकृ.

Concourse, *s.* (Of people) जनसमूहः, लोकसङ्घः, बहुजनमेलकः, लोकनिवहः, जनसम्मर्द्दः, जनौघः, जनसमागमः, जनता.—(Point of junction) सन्धिः *m.*, सङ्गमः.

Concremation, *s.* (Of a widow with her dead husband) सहमरणं, अनुमरणं.

Concrement, *s.* पिण्डः -ण्डं, घनता, संहतिः *f.*, लोष्टः -ष्टं, ओघः, राशिः *m. f.*, एकौघः, सान्द्रता, श्यानता.

To **concrete**, *v. n.* पिण्डीभू, एकौघीभू, राशीभू, घनीभू, लोष्टीभू, संहन् in pass. (-हन्यते), श्यै (c. 1. श्यायते, श्यातुं).

To **concrete**, *v. a.* पिण्डीकृ, एकौघीकृ, राशीकृ, घनीकृ, लोष्टीकृ, एकीकृ, सान्द्रीकृ, संहन् (c. 2. -हन्ति -हन्तुं), श्यै in caus. (श्यापयति -यितुं).

Concrete, *s.* पिण्डः -ण्डं, ओघः, लोष्टः -ष्टं, घनद्रव्यं, श्यानद्रव्यं, घनचयः.

Concrete, *a.* पिण्डीभूतः -ता -तं, एकौघभूतः -ता -तं, राशीभूतः -ता -तं, घनः -ना -नं, शीनः -ना -नं, श्यानः -ना -नं, संहतः -ता -तं, सान्द्रः -न्द्रा -न्द्रं.—(Not abstract) समवेतः -ता -तं, अन्वितः -ता -तं, अविविक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं.

Concretion, *s.* (The act of concreting) पिण्डीकरणं, एकौघीकरणं, घनीकरणं.—(Coalition) संसक्तिः, संहतिः *f.*, सङ्घातः.—(Mass formed) पिण्डः -ण्डं, ओघः, लोष्टः -ष्टं.

Concubinage, *s.* उपपत्नीसेवा, उपपत्नीगमनं, उपपत्नीसम्भोगः, वेश्यासेवा.

Concubine, *s.* उपस्त्री, उपपत्नी, वारस्त्री, भोग्या स्त्री, सैरिन्ध्री.—(As shut up in the haram) अवरुद्धा, अवरोधवधूः.

To **conculcate**, *v. a.* पादेन सम्मृद् (c. 9. -मृद्नाति -मर्द्दितुं) or अवमृद् or प्रमृद् or प्रमन्थ् (c. 9. -मथ्नाति -मन्थितुं).

Concupiscence, *s.* कामः, कामिता, कामुकत्वं, कामाग्निः *m.*, रतार्थित्वं, अभिलाषः.

Concupiscent, *a.* कामी -मिनी -मि (न्), कामुकः -का -कं, रतार्थी -र्थिनी -र्थि (न्), व्यवायी -यिनी -यि (न्), अभिलाषुकः -का -कं, लालुकः -का -कं, कामुकः -का -कं.

To **concur**, *v. n.* (Meet in one point) एकत्र सङ्गम् (c. 1. -गच्छति -गन्तुं) or समागम् or मिल् (c. 6. मिलति, मेलितुं).—(Join in one action) अन्येन सह कृ or सम्भूय कृ.—(Agree, concur with) सम्मन् (c. 4. -मन्यते -मन्तुं), अनुमन्, अनुवद् (c. 1. -वदति -दितुं), उपगम् (c. 1. -गच्छति -गन्तुं), एकचित्तीभू, स्वीकृ.

Concurred, *p. p.* सम्मतः -ता -तं, अनुमतः -ता -तं, सम्प्रतिपन्नः -न्ना -न्नं.

Concurrence, *s.* सम्मतिः *f.*, सम्मतं, अनुमतिः *f.*, अनुवादः -दनं, अनुवर्त्तनं, सम्प्रतिपत्तिः *f.*, समनुज्ञानं, स्वीकारः, परिग्रहः, इच्छा.—(Sameness of opinion) ऐकमत्यं, मतैक्यं; 'mutual concurrence,' परस्परानुमतिः *f.*; 'without the concurrence,' अनिच्छया, असम्मत्या, अगोचरेण; 'with his concurrence,' तस्य सम्मत्या or इच्छया or इच्छातस्; 'without his concurrence,' तस्य सम्मतिव्यतिरेकेण.

Concurrent, *a.* अनुवादकः -का -कं, अनुवादी -दिनी -दि (न्), आनुमतिकः -की -कं, सम्प्रतिपन्नः -न्ना -न्नं, एकचित्तः -त्ता -त्तं.—(Acting in conjunction) सहकारी -रिणी -रि (न्), सम्भूयकारी -रिणी -रि (न्).—(Concomitant) अनुषङ्गी -ङ्गिणी -ङ्गि (न्), सङ्गी -ङ्गिनी -ङ्गि (न्).

Concurrently, *adv.* सम्मतिपूर्व्वं, अनुमतिपूर्व्वं, सम्मत्या, अनुमत्या, सम्प्रतिपन्नं.

Concussion, *s.* संक्षोभः, सङ्घट्टः, क्षोभः, विक्षोभः, विकम्पः, मन्थनं, विधुवनं.

To **condemn**, *v. a.* (Find guilty) दोषीकृ, दोषिणं -षिणीं -षि कृ, सदोषं -षां -षं कृ, अपराधिनं -धिनीं -धि कृ, अपराध (nom. अपराधयति -यितुं), अपराधनिश्चयं कृ, अपराधनिर्णयं कृ.—(Doom to punishment) दण्ड् (c. 10. दण्डयति -यितुं).—(Condemn to death) वधदण्डार्हं -र्हां -र्हं ज्ञा (c. 9. जानाति, ज्ञातुं), हन्तुम् आदिश् (c. 6. -दिशति -देष्टुं), वधदण्डाज्ञां कृ.—(Censure) निन्द् (c. 1. निन्दति -न्दितुं), प्रतिषिध्, प्रत्यादिश् (c. 6. -दिशति -देष्टुं).—(Condemn to pay) दा in caus. (दापयति -यितुं); 'to be condemned,' दण्डं प्राप्तुं.

Condemned, *p. p.* (Found guilty) दोषीकृतः -ता -तं, अपराधितः -ता -तं, निर्णीतापराधः -धा -धं, निर्णीतदोषः -षा -षं.—(Doomed to punishment) दण्डितः -ता -तं, प्राप्तदण्डः -ण्डा -ण्डं, दण्डार्हः -र्हा -र्हं; 'condemned to death,' वध्यः -ध्या -ध्यं; 'condemned to pay,' दापितः -ता -तं; 'cast in a suit,' शापितः -ता -तं.

Condemnable, *a.* दण्डनीयः -या -यं, दण्ड्यः -ण्ड्या -ण्ड्यं, निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, अपराधी -धिनी -धि (न्), गर्हणीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं.

Condemnation, *s.* दण्डः, दण्डनं, दण्डकरणं, दण्डयोगः, दण्डाज्ञा, दोषीकरणं, अपराधनिर्णयः, अपराधनिश्चयः.

Condemnatory, *a.* दण्डवादी -दिनी -दि (न्), निन्दकः -का -कं, अपवादकः -का -कं.

Condemner, *s.* दण्डप्रणेता *m.* (तृ), दोषग्राही *m.* (न्), अपराधनिर्णेता *m.* (तृ), निन्दकः.

Condensable, *a.* घनीकरणीयः -या -यं, स्थूलीकर्त्तुं शक्यः -क्या -क्यं.

Condensation, *s.* घनीकरणं, स्थूलीकरणं, सान्द्रीकरणं, निबिडीकरणं.

To **condense**, *v. a.* घनीकृ, स्थूलीकृ, सान्द्रीकृ, निबिडं -डां -डं कृ.

To **condense**, *v. n.* घनीभू, स्थूलीभू, सान्द्रीभू, पीवरः -रा -रं भू.

Condense, *a.* घनः -ना -नं, स्थूलः -ला -लं, सान्द्रः -न्द्रा -न्द्रं, निबिडः -डा -डं, निरन्तरः -रा -रं, दृढसन्धिः -न्धिः -न्धि, नीरन्ध्रः -न्ध्रा -न्ध्रं, अविरलः -ला -लं.

Condensed, *p. p.* घनीकृतः -ता -तं, घनीभूतः -ता -तं, स्थूलीभूतः -ता -तं.

Condensity, *s.* घनता -त्वं, स्थूलता, सान्द्रता, नैबिड्यं, पीवरत्वं.

To **Condescend**, *v. n.* (Lay aside dignity, yield, stoop) गर्व्वं or गौरवं or दर्पम् अपास् (c. 4. -अस्यति -असितुं), मानं or अभिमानं त्यज् (c. 1. त्यजति, त्यक्तुं), or उत्सृज् (c. 6. -सृजति -स्रष्टुं), नम्रीभू, आनतगर्व्वः

-ङ्गी -ङ्गं भू, अल्पगौरवः -वा -वं भू.—(Submit) वशीभू.—(Consent, concur with) अनुमन् (c. 4. -मन्यते -मन्तुं), उपगम् (c. 1. -गच्छति -गन्तुं), अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं). The 2d or 3d pers. pres. of the rt. अर्ह् is used in such phrases as, 'condescend to speak to me,' मां वक्तुम् अर्हसि or अर्हति भवान्.

Condescending, *a.* अल्पगर्व्वः -र्व्वी -र्व्वं, अल्पदर्पः -र्पा -र्पं, न्यस्तगौरवः -वा -वं, नम्रः -म्रा -म्रं, आनतः -ता -तं, अनुरोधी -धिनी -धि (न्), वशानुगः -गा -गं, वशवर्त्ती -र्त्तिनी -र्त्ति (न्), अनुविधायी -यिनी -यि (न्).

Condescendingly, *adv.* अगर्व्वं, गर्व्वं विना, गौरवं विना, अल्पगर्व्वं, नम्रतया.

Condescension, *s.* गर्व्वापासनं, दर्पापासनं, अभिमानोत्सर्जनं, गौरवत्यागः, नम्रता, आनतिः *f.*, अनुरोधः, अनुवर्त्तनं.

Condign, *a.* यथार्हः -र्हा -र्हं, योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं, अनुगुणः -णा -णं, समुचितः -ता -तं, 'condign punishment,' यथायोग्यदण्डः, यथोपयुक्तशिष्टिः *f.*

Condignly, *adv.* यथार्हं -र्हतस्, यथायोग्यं, यथोचितं, अनुगुणं.

Condignness, *s.* यथार्हत्वं, योग्यता, उपयुक्तता, याथातथ्यं, उपपत्तिः *f.*

Condiment, *s.* उपस्करः, उपकरणं, व्यञ्जनं, वेसवारः, वेशवारः, प्रहितं, तेमनं, निष्ठानं, सन्धितं, अग्निवर्द्धनः, मिष्टान्नं, मोदकं.

Condisciple, *s.* सहाध्यायी *m.* (न्), एकगुरुः *m.*, सतीर्थः, सब्रह्मचारी *m.* (न्).

To condite, *v. a.* उपस्कृ, सन्धा (c. 3. -दधाति -धातुं), मिष्टीकृ.

Condite, *a.* सन्धितः -ता -तं, मिष्टः -ष्टा -ष्टं, सुस्वादुः -द्वी -दु.

Condition, *s.* (State) अवस्था, भावः, दशा, स्थितिः *f.*, वृत्तिः *f.*, संस्थितिः *f.*, दशास्थितिः *f.*, गतिः *f.*, रूपं; 'natural condition,' स्वभावः, स्वरूपं; 'calamitous condition,' विपद्दशा; 'ill condition,' दुःस्थितिः *f.*; 'good condition,' सुस्थितिः *f.*; 'in good condition,' सुस्थितः -ता -तं; 'in bad condition,' दुःस्थः -स्था -स्थं; 'in such a condition,' तथाविधः -धा -धं, एवंविधः -धा -धं, इत्थम्भूतः -ता -तं, इत्थम्भूतः -ता -तं. Obs. The condition or state of any thing is often expressed by the affixes त्व and ता, as, 'the condition of a worm,' कृमित्वं; 'of a Śúdra,' शूद्रता; 'of a wife,' पत्नीत्वं.—(Circumstances) वृत्तिः *f.*, अर्थः, स्थितिः *f.*—(Rank) पदं, आस्पदं, अधिकारः, वृत्तिः *f.*—(Stipulation) नियमः, समयः, नियमवाक्यं, प्रतिज्ञा, पणः, उद्देशः.—(State of body) शरीरस्थितिः *f.*; 'in good condition of body,' हृष्टपुष्टाङ्गः -ङ्गा -ङ्गं.—(Temperament) प्रकृतिः *f.*, भावः.—(Quality) गुणः.—(Attribute) उपाधिः *m.* विशेषणं.

To condition, *v. n.* (Stipulate) समयम् उपगम् (c. 1. -गच्छति -गन्तुं), नियमं कृ.

Conditional, *a.* सामयिकः -की -कं, नैयमिकः -की -कं, सनियमवाक्यः -क्या -क्यं, नियमितः -ता -तं, नियतः -ता -तं, पणनिश्चितः -ता -तं, निबद्धः -द्धा -द्धं, सोपाधिकः -की -कं, सनियमः -मा -मं.—(In grammar) संशयवाचकं क्रियापदविशेषणं.

Conditionally, *adv.* नियमवाक्यपूर्व्वं, समयतस्, नियमतस्, समयपुरःसरं.

Conditioned, *p. p.* (Circumstanced) स्थितः -ता -तं, स्थः स्था स्थं in comp., भूतः -ता -तं, वर्त्ती -र्त्तिनी -र्त्ति (न्); 'ill-conditioned,' दुःस्थः -स्था -स्थं; 'well-conditioned,' सुस्थितः -ता -तं, सुस्थः -स्था -स्थं.

To condole, *v. n.* अन्येन सह शुच् (c. 1. शोचति -चितुं) or अनुशुच्, परदुःखं दृष्ट्वा or ज्ञात्वा विलप् (c. 1. -लपति -पितुं) or परिदेव् (c. 1. -देवते -वितुं) or परिखिद् in pass. (-खिद्यते) or परितप् in pass. (-तप्यते), शोकार्त्तं समशोकेन परिशान्त्व् (c. 10. -शान्त्वयति -यितुं), परदुःखभागित्वात् शोकम् अपनुद् (c. 6. -नुदति -नोत्तुं), अन्येन समं शोकं कृ, कुल्यं कृ, परस्य समदुःखः -खा -खं भू.

Condolence, *s.* अन्येन सह शोचनं or अनुशोचनं or शोककरणं, परदुःखार्थं विलपनं or परिदेवनं, समशोककरणं, कुल्यं, कुल्यकरणं.

Condoler, *s.* समदुःखः, परशोकसंविभागी *m.* (न्), परदुःखभागी *m.* (न्), समशोककारी *m.* (न्).

Condonation, *s.* क्षमा, क्षान्तिः *f.*, मार्जना, अपराधक्षमा, अपराधमार्जना.

To conduce, *v. n.* (Lead to) नी (c. 1. नयति, नेतुं), आनी, गम् in caus. (गमयति -यितुं).—(Bring about) आवह् (c. 1. -वहति -वोढुं).—(Promote) प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं), सम्पद् in caus. (-पादयति -यितुं), जन् in caus. (-जनयति -यितुं).

Conducive, *a.* आवहः -हा -हं, प्रवर्त्तकः -का -कं, सम्पादकः -का -कं, प्रतिपादकः -का -कं, प्रयोजकः -का -कं, जनकः -का -कं, उपयिकः -का -कं; 'conducive to wealth,' अर्थावहः -हा -हं or अर्थोत्पादकः -का -कं; 'to satisfaction,' तृप्तिजनकः -का -कं; 'to virtue,' धर्म्मनिबन्धी -न्धिनी -न्धि (न्); 'to longevity,' आयुष्यः -ष्या -ष्यं; 'to beatitude,' आपवर्ग्यः -र्ग्या -र्ग्यं.

Conduct, *s.* (Management) नयः, प्रणयनं, निर्वाहः -हणं, नायः, प्रयोगः; 'conduct of affairs,' कर्म्मनिर्वाहः, क्रियाविधिः *m.*—(Behaviour) चरितं, चरित्रं, चारित्र्यं, व्यवहारः, चेष्टितं, आचारः, आचरणं, कर्म्म *n.* (न्), क्रिया, वृत्तिः *f.*, प्रवृत्तिः *f.*, वृत्तं, रीतिः *f.*, गतिः *f.*, स्थितिः *f.*, चर्य्या; 'good conduct,' सुचरितं, सुवृत्तं, सुकर्म्म *n.* (न्), शीलः -लं; 'bad conduct,' दुश्चरितं, दुर्वृत्तं, कुचर्य्या, कुकर्म्म *n.* (न्), दुश्चेष्टितं; 'improper course of conduct,' उन्मार्गः, विमार्गः; 'proper course,' सुमार्गः, सन्मार्गः.—(Act of leading) समानयनं.—(Convoy, guard) परिचरः.

Curer, *s.* चिकित्सकः, रोगशामकः, रोगहारी *m.* (न्), रोगहा *m.* (न्), भिषक्.

Curfew, *s.* अग्निप्रदीपा निर्व्वापयितव्या इति पुरा निर्देशार्थं प्रदोषकाले वादिता घण्टा, प्रदोषकाले घण्टाशब्दः.

Curiosity, *s.* (Inquisitiveness) कौतूहलं, कुतूहलं, कौतुकं, कुतुकं, दिदृक्षा, जिज्ञासाकुतूहलं, पिपृच्छिषा, अनुसन्धानेच्छा, असति प्रयोजने जिज्ञासा; 'one whose curiosity is excited,' उत्पन्नकौतूहलः.—(A rarity) दुर्लभद्रव्यं, दुष्प्राप्यद्रव्यं, बहुमूल्यद्रव्यं, विचित्रद्रव्यं, अद्भुतद्रव्यं.

Curious, *a.* (Inquisitive) कुतूहली -लिनी -लि (न्), कौतूहलान्वितः -ता -तं, कौतूहलपरः -रा -रं, कौतुकाविष्टः -ष्टा -ष्टं, जिज्ञासुः -सुः -सु, पिपृच्छिषुः -षुः -षु, अनुसन्धानेच्छुः -च्छुः -च्छु.—(Skilled in) अभिज्ञः -ज्ञा -ज्ञं, विचक्षणः -णा -णं.—(Exact, nice) सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मदर्शी -र्शिनी -र्शि (न्).—(Worthy of being seen, rare) दर्शनार्हः -र्हा -र्हं, दर्शनीयः -या -यं, दुर्लभः -भा -भं, दुष्प्राप्यः -प्या -प्यं, बहुमतः -ता -तं.—(Strange, wonderful) अद्भुतः -ता -तं, चित्रः -त्रा -त्रं, विचित्रः -त्रा -त्रं, आश्चर्य्यः -र्य्या -र्य्यं, अपूर्व्वः -र्व्वा -र्व्वं.

Curiously, *adv.* (Inquisitively) कौतूहलात्, कुतूहलेन, कौतुकेन, जिज्ञासया.—(Skilfully, nicely, strangely) निपुणं, सूक्ष्मं, अद्भुतं.

To **curl**, *v. a.* (Turn the hair in curls) अलककरूपेण केशान् कुच् (c. 1. कुचति -चितुं or c. 10. कुचयति -यितुं), अलकान् कृ or रच् (c. 10. रचयति -यितुं).—(Twist) कुच्, आकुच्, व्यावृत् in caus. (-वर्त्तयति -यितुं).—(Raise in waves) तरङ्ग (nom. तरङ्गयति -यितुं), बन्धुरीकृ, उन्नतानतीकृ.

To **curl**, *v. n.* अलककरूपेण कुच् in pass. (कुच्यते) or आकुच् in pass., व्यावृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Rise in waves) तरङ्ग (nom. तरङ्गायते), तरल (nom. तरलायते), बन्धुरीभू, उन्नतानतीभू.

Curl, *s.* अलकः, आवर्त्तः -र्त्तका, कुरलः, कर्कराल: -लं, खङ्कुरः, काकपक्षः, वक्रीरीकः?, चूर्णकुन्तलः, [illegible], भ्रमरकः; 'row of curls,' अलकसंहतिः *f.*—(Undulation) ऊर्म्मिः *f.*, तरङ्गः.

Curlew, *s.* क्रौञ्चः, क्रुङ्, कलिङ्कः, कालिङ्कः, कालीकः, अतिजागरः.

Curmudgeon, *s.* कृपणः, कदर्य्यः, स्वल्पव्ययी *m.* (न्), मत्सरः, गाढमुष्टिः.

Currant, *s.* (The tree) अङ्गूरफलविशिष्टः क्षुद्रवृक्षः.—(A small dried grape) शोषितरसा क्षुद्रद्राक्षा.

Currency, *s.* (Circulation, general reception) प्रचारः, प्रचरः, प्रचलनं, चलनं, हस्ताद्धस्तं चलनं, व्यवहारः, सर्व्वसाधारणव्यवहारः, सर्व्वग्रहणं, सर्व्वसम्मानं.—(Continuous flow or course) प्रवाहः, प्रसरः.—(Easiness of utterance) सुखोच्चारणं, सुखोच्चार्य्यता.—(Current coin) प्रचलमुद्रा, प्रचारितमुद्रा.

Current, *a.* (Circulatory, generally received) प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचलन् -लन्ती -लत् (त्), प्रचरितः -ता -तं, प्रचरन् -रन्ती -रत् (त्), चलमानः -ना -नं, परिचालितः -ता -तं, सञ्चारितः -ता -तं, सर्व्वसम्मतः -ता -तं, सर्व्वगृहीतः -ता -तं.—(Common, general, popular) सर्व्वसाधारणः -णी -णं, सर्व्वसामान्यः -न्या -न्यं, लोकप्रसिद्धः -द्धा -द्धं, लोकविश्रुतः -ता -तं, व्यावहारिकः -की -कं, आचारिकः -की -कं, लौकिकः -की -कं.—(Received as authority, allowable) प्रचलितः -ता -तं, प्रामाणिकः -की -कं, ग्राह्यः -ह्या -ह्यं.—(What is now passing) वर्त्तमानः -ना -नं, विद्यमानः -ना -नं; 'the current year,' वर्त्तमानवत्सरः; 'current moment,' आपातः; 'current report,' लोकप्रवादः, जनवादः.

Current, *s.* (A running stream) स्रोतः *n.* (स्), स्रवन्ती, स्रोतस्वती, स्रोतस्विनी.—(The flow or course of water) वेला, वेगः, रयः, प्रवाहः, उदकप्रवाहः, धारः -रा, स्रोतः *n.* (स्), ओघः, प्रवेगः -वर्त्म, संसृतिः *f.*, प्रवृत्तिः *f.*, पाथस्संस्कारः, अनुपद्धतिः *f.*, पाथःसञ्चारः, रयभाटी, ऊर्म्मी, कूलङ्कषः, पुटेदिः *m.*; 'current of the Ganges,' गाङ्गौघः; 'against the current,' प्रतिस्रोतस्.

Currently, *adv.* (Generally, popularly) सामान्यतस्, साधारणतस्, लोकतस्, प्रसिद्धं; 'it is currently reported,' इति लोकप्रवादः श्रूयते; 'it is currently known,' लोकप्रसिद्धम् अस्ति.

Curricle, *s.* रथः, क्रीडारथः, केलिरथः, अश्वद्वयसञ्चारितो रथः.

Currier, *s.* चर्म्मकारः -री *m.* (न्), चर्म्मच्छेदनकारी *m.*, चर्म्मोपकारी *m.* (न्), कुरटः.

Currish, *a.* कुक्कुराचारः -रा -रं, श्वशीलः -ला -लं, शौवः -वी -वं, दुःशीलः -ला -लं, शौवापदः -दी -दं; 'a currish man,' श्वनरः.

To curry, *v. a.* (Dress leather) चर्म्म परिष्कृ.—(Beat) तड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं).—(Rub a horse with a curry-comb) अश्वलोम लोहकङ्कतेन मृज् (c. 2. मार्ष्टि, मार्ष्टुं).—(Curry favour) आराध् in caus. (-राधयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं), लल् in caus. (लालयति -यितुं).

Curry, *s.* (The dish) अन्नमिश्रणीयो or भक्तेन सह खाद्यो व्यञ्जनविशेषः.

Curry-comb, *s.* अश्वलोममार्जनार्थं लोहकङ्कतः, अश्वमार्जनी.

To curse, *v. a.* शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्, शापं or अभिशापं दा or कृ; अमङ्गलं or अनिष्टम् आशंस् (c. 1. -शंसते -सितुं); आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), गर्ह् (c. 1. गर्हते -र्हितुं), धिक्कृ, भर्त्स् (c. 10. भर्त्सयति -यितुं).

To curse, *v. n.* शप् (c. 1. शपते, शप्तुं), शपथं or शापं वद् (c. 1. वदति -दितुं) or ब्रू (c. 2. ब्रवीति, वक्तुं); 'to curse and swear,' शपथाभिशापौ कृ.

Curse, *s.* (Malediction) शापः, अभिशापः, शपथः, शपः -पनं, परिशापः, आक्रोशनं, अपक्रोशः, भर्त्सनं, अभिषङ्गः, अभीषङ्गः, गालिः *m.*, मन्दवाञ्छा; 'under a curse,' शापग्रस्तः -स्ता -स्तं.—(A pest) कण्टकः, दूषकः, अपकारकः. The following are forms of curses answering to 'confusion seize you,' &c., अजीवनिस्ते भूयात्, अकरणिस्तेऽस्तु, निग्राहस्ते भूयात्, अवग्राहस्ते स्यात्, अजननिर् अस्तु तव.

Cursed, *p. p.* शप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, शापार्हः -र्हा -र्हं, गर्हितः -ता -तं, गर्हणीयः -या -यं, घृणार्हः -र्हा -र्हं, धिक्कृतः -ता -तं, अपध्वस्तः -स्ता -स्तं.

Cursedly, *adv.* गर्हितं, गर्हणीयप्रकारेण, दुष्टं, दुष्ठु.

Curship, *s.* कुक्कुरत्वं, श्वशीलता, दुःशीलता, अधमाचारत्वं.

Cursitor, *s.* महाविचारणसभासम्बन्धी लेखकविशेषः.

Cursorily, *adv.* ईषदवेक्षया, ईषन्मनोयोगेन, चुम्बकवत्, ईषद्दर्शनेन, सत्वरं, अनवधानेन, अनपेक्षया.

Cursory, *a.* त्वरितः -ता -तं, असावधानः -ना -नं, अनवहितः -ता -तं, अयत्नपूर्व्वः -र्व्वा -र्व्वं, शीघ्रः -घ्रा -घ्रं; 'cursory view,' ईषद्दर्शनं, अर्द्धवीक्षणं.

Curst, *a.* कर्कशः -शा -शं, नृशंसः -सा -सं, दुष्टचेताः -ताः -तः (स्).

Curt, *a.* ह्रस्वः -स्वा -स्वं, खर्व्वः -र्व्वा -र्व्वं, संक्षिप्तः -प्ता -प्तं.

To curtail, *v. a.* ह्रस् in caus. (ह्रासयति -यितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), अवच्छिद्, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संहृ (c. 1. -हरति -हर्त्तुं).

Curtailed, *p. p.* ह्रसितः -ता -तं, छिन्नः -न्ना -न्नं, संक्षिप्तः -प्ता -प्तं, क्षीणः -णा -णं, अवरोपितः -ता -तं, अल्पीकृतः -ता -तं.

Curtain, *s.* तिरस्करिणी, व्यवधानं, आवरणं, तिरोधानं, आवरणपटः, प्रच्छदपटः, अपटी, यवनिका, नीशारः; 'bed-curtain,' चतुष्की, मशहरी.

To curtain, *v. a.* आवरणपटेन परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or प्रच्छद् (c. 10. -छादयति -यितुं).

Curtain-lecture, *s.* रात्रिकाले शय्यागतपतिमुद्दिश्य भार्य्योक्तं निन्दावाक्यं or भर्त्सनवाक्यं or तर्ज्जनं.

Curtsy, *s.* स्त्रीलोकेन कृतः प्रणामः or अङ्गप्रणामः or नमस्कारः.

Curvated, *a.* नतः -ता -तं, आनतः -ता -तं, प्रणतः -ता -तं, परिणतः -ता -तं, भुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, विभुग्नः -ग्ना -ग्नं, कुञ्चितः -ता -तं, आकुञ्चितः -ता -तं.

Curvation, *s.* वक्रीकरणं, नम्रीकरणं, कुञ्चनं, आकुञ्चनं, अवकुञ्चनं.

Curvature, *s.* नतिः *f.*, आनतिः *f.*, वक्रता, वक्रिमा *m.* (न्), वक्रीभावः, जिह्मता, कुटिलता, कौटिल्यं, नतत्वं, रुग्णता; 'of the spine,' अभ्यन्तरायामः.

Curve, *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, नतः -ता -तं, कुटिलः -ला -लं, नम्रः -म्रा -म्रं, जिह्मः -ह्मा -ह्मं, भुग्नः -ग्ना -ग्नं, कुञ्चितः -ता -तं.

Curve, *s.* नतिः *f.*, नतं, भुजः, कुटिः *m.*, वक्रता, वक्रिमा *m.* (न्), कुञ्चनं, अवकुञ्चनं; 'a curve line,' धनुर्मार्गः, वक्ररेखा.

To curve, *v. a.* नम् in caus. (नामयति -यितुं), आनम्, अवनम्; नम्रीकृ; वक्रीकृ; आवृज् in caus. (-वर्जयति -यितुं), कुच् (c. 1. कुचति -चितुं), कुटिलीकृ, अञ्च् (c. 1. अञ्चति -ञ्चितुं), जिह्म (nom. जिह्मयति -यितुं).

Curved, *p. p.* नतः -ता -तं, नामितः -ता -तं, वक्रीभूतः -ता -तं, कुटिलीकृतः -ता -तं, जिह्मितः -ता -तं, विभुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, सम्भुग्नः -ग्ना -ग्नं, रुग्णः -ग्णा -ग्णं, कुञ्चितः -ता -तं, वृजिनः -ना -नं, प्रवणः -णा -णं.

To curvet, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्.

Curvet, *s.* प्लुतं, प्लवः, वल्गितं, लङ्घनं, उत्फालः, झम्पः.

Curvilinear, *a.* वक्ररेखः -खा -खं, धनुर्मार्गाकारः -रा -रं, वक्रः -क्रा -क्रं.

Curule, *a.* (Chair) पूर्व्वं रोमनगरे विचारकर्त्तॄणाम् आसनं.

Cushion, *s.* उपधानं -नीयं, पीठोपधानं, बालिशं, विष्टरः, विस्तरः, आस्तरणं, पीठास्तरणं, पीठगर्भुः *m. f.*, उपबर्हः, पीठाजिनं, अजिनं, चर्म्म *n.* (न्).

Cushioned, *a.* उपधानसंविष्टः -ष्टा -ष्टं, अजिनशयानः -ना -नं, बालिशनिषण्णः -ण्णा -ण्णं.

Cusp, *s.* अर्द्धचन्द्रकोणः, अर्द्धेन्दुशिखा, अर्द्धचन्द्राग्रं, कलाग्रं, कलाकोणः.

Cuspated, cuspidated, *a.* सूक्ष्माग्रः -ग्रा -ग्रं, सूच्यग्रः -ग्रा -ग्रं.

Custard, *s.* अण्डक्षीरादिमयं मिष्टलेह्यं.

Custody, *s.* (Imprisonment) रोधः, निरोधनं, बन्धनं, स्थानासेधः, आसेधः, कारागारे निरोधः.—(Care, charge) गुप्तिः *f.*, रक्षा, रक्षणं.—(Defence) रक्षणं, पालनं, त्राणं.

Custom, *s.* (Habit, established manner, fashion) आचारः, व्यवहारः, व्यवहृतिः *f.*, प्रचारः, समाचारः, रीतिः *f.*, नियमः, अभ्यासः, नित्यकृत्यं, धारा, मार्गः, स्थितिः *f.*, अनुसारः, आवृत्तिः *f.*, चर्य्या, चरितं, क्रमः, सम्प्रदायः, व्यापारः, शीलः; 'according to custom,' यथाव्यवहारं.—(Practice of buying of one person) एकपण्यविक्रेतुः सदाक्रयः or नित्यक्रयः.—(Tribute, toll) शुल्कः -ल्कं, करः, राजस्वं, राजग्राह्यभागः, शौल्किकः.

Customable, *a.* व्यावहारिकः -की -कं, आचारिकः -की -कं, लोकसिद्धः -द्धा -द्धं.

Customably, *adv.* व्यवहारानुसारेण, व्यवहारतस्, आचारानुरूपं.

Customarily, *adv.* यथाव्यवहारं, यथारीति, रीत्यनुसारात्, प्रायशस्.

Customary, *a.* आचारिकः -की -कं, व्यावहारिकः -की -कं or व्यवहारिकः, व्यवहारानुसारी -रिणी -रि (न्), आचारानुयायी -यिनी -यि (न्), आचरितः -ता -तं, प्रचरितः -ता -तं, प्रचलः -ला -लं, प्रचलितः -ता -तं, नैयमिकः -की -कं, रीत्यनुसारी &c., यौगिकः -की -कं.—(Habitual) आभ्यासिकः -की -कं, नित्यः -त्या -त्यं.—(Usual) प्रायिकः -की -कं, लोकसिद्धः -द्धा -द्धं, लौकिकः -की -कं, प्रसिद्धः -द्धा -द्धं.

Customer, *s.* क्रेता *m.* (तृ), क्रयी *m.* (न्), नित्यक्रेता *m.*, सदाक्रयी.

Custom-house, *s.* शुल्कग्रहणशाला, शुल्कस्थानं, करसञ्चयगृहं.

Custom-house-officer, *s.* शौल्कः, शौल्किकः, करग्राही *m.* (न्).

To cut, *v. a.* कृत् (c. 6. कृन्तति, कर्त्तितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), संछिद्, लू (c. 9. लुनाति, लवितुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं), छो (c. 4. छ्यति, छातुं), दो or दा (c. 4. द्यति, c. 2. दाति -तुं).—(Cut in two) द्विधा छिद् or कृ, द्विखण्डीकृ.—(Divide) भिद् (c. 7. भिनत्ति, भेत्तुं), खण्ड् (c. 10. खण्डयति -यितुं).—(Pierce) व्यध् (c. 4. विध्यति,

कृत्), छिद् (c. 10. छेदयति -यितुं), निर्भिद्, खन् (c. 1. खनति -नितुं), छिद्.—(Carve, make by sculpture) तक्ष् (c. 1. तक्षति -क्षितुं).—(Hew) छिद्; विशस् (c. 1. -शसति -सितुं).—(Intersect) परिच्छिद्.—(Scratch) क्षुर् (c. 6. क्षुरति, क्षोरितुं).—(Cut away) अवकृत्, निकृत्, उच्छिद्.—(Cut down) अपकृत्, प्रकृत्, अवच्छिद्, अवभञ्ज् (c. 7. -भनक्ति -भंक्तुं), निभञ्ज्, प्रभञ्ज्; अवपत् in caus. (-पातयति -यितुं).—(Cut off) छिद्, अवच्छिद्, निकृत्, अवकृत्, लू; 'destroy,' उच्छिद्, उद्धृ (c. 1. -हरति -हर्तुं), उन्मूल् (c. 10. -मूलयति -यितुं); 'rescind,' लुप् (c. 6. लुम्पति, लोप्तुं); 'take away,' अपनी (c. 1. -नयति -नेतुं), अपहृ; 'intercept,' विच्छिद्, उच्छिद्, अवरुध् (c. 7. -रुणद्धि -रोद्धुं); 'interrupt,' विच्छिद्, खण्ड् (c. 10. खण्डयति -यितुं); 'preclude,' निवृ in caus. (-वारयति -यितुं), निरुध्; 'obviate,' परिच्छिद्; 'cut off a limb,' अङ्गं छिद्.—(Cut out) उत्कृत्, निष्कृत्; 'shape,' क्लृप् (c. 10. कल्पयति -यितुं), परिक्लृप्; 'contrive,' मनसा चिन्त् (c. 10. चिन्तयति -यितुं), परिक्लृप्; 'adapt,' युज् in caus. (योजयति -यितुं); 'outdo,' अतिभू, विशिष् in pass. (-शिष्यते); 'cut off a letter,' लुप्.—(Cut short, abridge) संहृ, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उच्छिद्, लुप्; 'interrupt abruptly,' सहसा विच्छिद्.—(Cut up) व्यवच्छिद्, विनिकृत्, निकृत्; 'eradicate,' उच्छिद्.—(Cut the hair) केशान् छिद् or वापय् in caus. (-वापयति -यितुं) or परिवप्.—(Cut to the heart) मर्म भिद् or छिद् or व्यध्.

To cut, *v. n.* (Make way by dividing) उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, स्फुट् (c. 6. स्फुटति -टितुं), उत्पद् in pass. (-पद्यते), प्रभू.

Cut, *p. p.* छिन्नः -न्ना -न्नं, कृत्तः -त्ता -त्तं, कर्त्तितः -ता -तं, लूनः -ना -नं, छातः -ता -तं, दातः -ता -तं, छितः -ता -तं, दितः -ता -तं, वृक्णः -क्णा -क्णं, खण्डितः -ता -तं, त्रुटितः -ता -तं, कृत्तः -त्ता -त्तं, तष्टः -ष्टा -ष्टं, परिशातितः -ता -तं; 'cut up,' व्यवच्छिन्नः -न्ना -न्नं, छिन्नभिन्नः -न्ना -न्नं, निकृत्तः -त्ता -त्तं; 'cut off,' in grammar, लुप्तः -प्ता -प्तं.

Cut, *s.* (The blow of a sharp instrument) प्रहारः, आघातः; 'a sword-cut,' खड्गप्रहारः, खड्गाघातः; 'cut with a whip,' कशाघातः.—(Impression made by an edge) छेदः, लूनकः, छेदनचिह्नं.—(Channel or canal) खातं, कुल्या, कृत्रिमा सरित्.—(Part cut off from the rest) खण्डः -ण्डं, छेदः, भिन्नं, भित्तिः *f.*, दलं.—(Small particle) लवः, कणः, लेशः.—(A direct road) ऋजुमार्गः, अविमार्गः, अदीर्घपथः.—(Print) मुद्रा, पत्रे मुद्रिता प्रतिमा or प्रतिमूर्त्तिः *f.*—(Fashion, form) रीतिः *f.*, रूपं, आकारः, विधानं, संस्कारः, संस्थानं.

Cutaneous, *a.* त्वाचः -ची -चं, चार्म्मिकः -की -कं, चर्म्मी -र्म्मिणी -र्म्मि (न्), त्वक्सम्बन्धी -न्धिनी -न्धि (न्); 'cutaneous disease,' त्वग्रोगः, चर्म्मदूषिका; 'cutaneous eruption,' दद्रुः *m.*, दद्रूः *m.*

Cuticle, *s.* अधस्त्वक्, बाह्यत्वक् *f.* (च्), बाह्यचर्म्म *n.* (न्).

Cuticular, *a.* त्वाचः -ची -चं, बाह्यत्वक्सम्बन्धी -न्धिनी -न्धि (न्).

Cutis, *s.* (The true skin) वेदनी.

Cutlass, *s.* कर्त्तरिका, खड्गः, कृपाणः, पृथुपर्णः खड्गः.

Cutler, *s.* छुरिकाकारः, शस्त्रकारः, छुरिकाविक्रेता *m.* (तृ), शस्त्रमार्जः.

Cutlet, *s.* खण्डः -ण्डं, पशुका, पार्श्वास्थि *n.*; 'of mutton,' मेषमांसखण्डः.

Cutpurse, *s.* ग्रन्थिभेदः -दकः, चौरः, अपहारकः, तस्करः.

Cutter, *s.* (One who cuts) छेत्ता *m.* (तृ), छेदकः, छिद् in comp.; 'wood-cutter,' काष्ठच्छिद्.—(Cutting instrument) कर्त्तरिका, कृपाणं, छिन्दरः.—(A nimble boat) लघुनौका.—(Front-teeth) छेदकदन्ताः *m. pl.*, राजदन्ताः *m. pl.*

Cut-throat, *s.* घातकः, गुप्तघातकः, प्राणघातकः, आततायी *m.* (न्).

Cut-throat, *a.* वधोद्यतः -ता -तं, मारात्मकः -का -कं, क्रूरः -रा -रं.

Cutting, *s.* (Piece cut off) विदलं, खण्डः -ण्डं, तष्टं, भित्तिः *f.* शकलं, भिन्नं.—(Act of cutting) छेदनं, कर्त्तनं, प्रवृश्चनं, खण्डनं, छिदा, छित्तिः *f.*, लूनिः *f.*, लावः, दातिः *f.*, दानं.

Cutting, *a.* छिन्दरः -रा -रं, छिदुरः -रा -रं.—(Caustic) खरः -रा -रं, अरुन्तुदः -दा -दं, मार्म्मिकः -की -कं, मर्म्मभेदी -दिनी -दि (न्).

Cuttle, *s.* (A fish, or its bone) फेनः -नकः, समुद्रफेनः, सिन्धुकफः, अब्धिकफः, हिण्डीरः, हिण्डिरः, पिण्डीरः, श्वेतधामा *m.* (न्), सुफेनं, मलं.—(A foul-mouthed fellow) मुखरः, वाग्दुष्टः, दुर्मुखः.

Cuvera, *s.* *See* Kuvera.

Cycle, *s.* चक्रं, कालचक्रं, आवृत्तिः *f.*, कालावृत्तिः *f.*, कालावर्त्तः, परिवृत्तिः *f.*, परिवर्त्तः, पर्य्यायः, आवलिः *f.*; 'of the seasons,' ऋतुपर्य्यायः.

Cyclopædia, *s.* ज्ञानचक्रं, विद्याचक्रं, विद्यापर्य्यायः, विद्याहारावलिः *f.*

Cycloptic, cyclopean, *a.* क्रूराकारः -रा -रं, दारुणः -णा -णं, पशुप्रहारः -रा -रं, अतिमहान् -हती -हत् (त्).

Cygnet, *s.* हंसशावकः, बालहंसः, युवहंसः, हंसापत्यं.

Cylinder, *s.* गोलः, नलः, स्तम्भः, शलाका, निघः.

Cylindrical, *a.* वर्त्तुलः -ला -लं, गोलाकारः -रा -रं, स्तम्भाकारः -रा -रं.

Cymbal, *s.* घनं, झल्लरी, झल्लकं, झिञ्झिः *f.*, झर्झरी, भेरी, करतालं.

Cynegetics, *s.* मृगव्यं, मृगया, मृगव्यविद्या, आखेटविद्या.

Cynic, *s.* (A misanthrope) सर्व्वाभिसन्धकः -न्धी *m.* (न्), पुरुषद्वेषी *m.* (न्).

Cynical, *a.* सदावक्रः -क्रा -क्रं, अपरिचयी -यिनी -यि (न्), निरानन्दः -न्दा -न्दं, कुटिलभावः -वा -वं, निन्दाशीलः -ला -लं, चिरदुःखी -खिनी -खि (न्), अनालाप्यः -प्या -प्यं, परश्रीकातरः -रा -रं.

Cynosure, *s.* ध्रुवः, नक्षत्रनेमिः *m.*, ध्रुतिकरः, ज्योतीरथः.

Cypher, *s.* अङ्कः, शून्यं, गुणनिका. *See* Cipher.

Cyphering, *s.* अङ्कनं, अङ्कविद्या, गणनविद्या. *See* Ciphering.

Cypress-tree, *s.* श्मशानरोपितः शोकलक्षणिकस् तिष्ठन्त्यो वृक्षः.

D.

To dab, *v. a.* आर्द्रद्रव्यलघ्वाघातेन सिच् (c. 6. सिञ्चति, सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -क्षितुं), सिक्तद्रव्येण लघु आहन् (c. 2. -हन्ति -हन्तुं).

Dab, *s.* (Small lump) क्षुद्रपिण्डः, पिण्डः, क्षुद्रखण्डः.—(Blow with something moist) सिक्तद्रव्येण लघुप्रहारः or लघ्वाघातः, सेचनं, निषेकः.—(Something muddy thrown upon one) मलसेचनं, क्षिप्तपङ्कः.—(A man expert at something) निपुणः, पटुः, कुशलः, दक्षः.

To dabble, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्, निषिच्, लिप् (c. 6. लिम्पति, लेप्तुं), उक्ष् (c. 1. उक्षति -क्षितुं), प्रोक्ष्, क्लिद् in caus. (क्लेदयति -यितुं).

To dabble, *v. n.* (Play in water) जले or पङ्के क्रीड् (c. 1. क्रीडति -डितुं).—(Dabble in books, read superficially) शास्त्राणि चुष् (c. 1. चुषति -षितुं).

Dabbler, *s.* (One that plays in water or mud) जलक्रीडः, पङ्कक्रीडः.—(Superficial reader) शास्त्रचुषकः, शास्त्रलगकः, किञ्चिज्ज्ञः, अल्पमात्रविद्.

Dace, *s.* नदीचरः क्षुद्रमत्स्यभेदः.

Dactyl, *s.* चरणः -णं, भगणः, छन्दःशास्त्रेषु असमानपदं.

Dad, daddy, *s.* बालकभाषायां पितृसमानार्थः शब्दः, बाबा, तातः.

Dædal, *a.* विचित्रविचित्रः -त्रा -त्रं, नानाप्रकारः -रा -रं, बहुविधः -धा -धं.

Daffodil, daffodowndilly, *s.* उत्पलजातीयः पुष्पप्रभेदः.

Dagger, *s.* कट्टारः, कृपाणी, छुरिका, शङ्कुः *m.*, असिपुत्रिका, कर्त्तरी.

To daggle, *v. a.* मलेन or पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं).

To daggle, *v. n.* पङ्के or कर्दमे लुट् (c. 6. लुठति -ठितुं).

Daggletail, *a.* मलपङ्की -ङ्किनी -ङ्कि (न्), मलदूषितः -ता -तं.

Daily, *a.* आह्निकः -की -कं, दैनिकः -की -कं, दैनः -नी -नं, दैवसिकः -की -कं, प्रात्यहिकः -की -कं, दिवातनः -नी -नं, अन्वाहिकः -की -कं, नैत्यिकः -की -कं, अवश्यकः -का -कं; 'daily occupation,' आह्निकं, नित्यकृत्यं.

Daily, *adv.* प्रतिदिनं, प्रतिदिवसं, प्रत्यहं, प्रतिवासरं, अनुदिनं, अन्वहं, दिवसे दिवसे, दिने दिने, अहनि अहनि, अहरहः.

Daintily, *adv.* ललितं, सलालित्यं, सलौल्यं, सुकुमारं, कोमलं, विलासेन.

Daintiness, *s.* (Delicacy, softness) सौकुमार्यं, कोमलता, मृदुता.—(Elegance, nicety) लालित्यं, लौल्यं, लावण्यं, विलासः, सूक्ष्मता, विनीतता.—(Deliciousness) सुस्वादुता, सुरसत्वं, सौरस्यं.

Dainty, *a.* (Delicious) स्वादुः -दुः -द्वी -दु or सुस्वादुः, सुरसः -सा -सं, रसिकः -का -कं, सरसः -सा -सं, मिष्टः -ष्टा -ष्टं, स्वादुकारः -रा -रं, सुखाद्यः -द्या -द्यं.—(Delicate, nice) सुकुमारः -रा -रं, कोमलः -ला -लं, मृदुः -द्वी -दु, विनीतः -ता -तं, सूक्ष्मः -क्ष्मा -क्ष्मं.—(Over-nice, ceremonious) अतिविनीतः -ता -तं, अतिसभ्यः -भ्या -भ्यं.

Dainty, *s.* सुरसः, स्वाद्वन्नं, स्वादुभोजनं, विशिष्टान्नं, भोजनविशेषः, सुखाद्यं.

Dairy, *s.* क्षीरमन्थनशाला, दधिमन्थनगृहं, गोदुग्धागारं, पयोरक्षणस्थानं.

Dairy-maid, *s.* गोदोहिनी, क्षीरमन्थिनी, गोदुग्धरक्षिका, गोपी, आभीरी.

Daisy, *s.* वसन्तसमये यवसप्ररोही शुक्लदलः क्षुद्रपुष्पभेदः.

Dale, *s.* दरी -रा, दरीभृः *f.*, कन्दरः -री, अद्रिद्रोणी, उपत्यका, प्रान्तरं.

Dalliance, *s.* (Act of fondness) कामचेष्टा, हावः, ललितं, लालसा, रमणं, रमण्यं, विलासः, विलसितं.—(Delay) विलम्बः, कालयापः.

To dally, *v. n.* (Sport, play, trifle) क्रीड् (c. 1. क्रीडति -डितुं), प्रक्रीड्; रम् (c. 1. रमते, रन्तुं), लल् (c. 1. ललति -लितुं), विलस् (c. 1. -लसति -सितुं), कुड् (c. 6. कुडति -डितुं).—(Caress a woman) स्त्रिया सह रम् or विलस्, कामचेष्टां कृ.—(Delay) विलम्ब् (c. 1. -लम्बते -म्बितुं).

Dam, *s.* (Mother, said of animals) जननी, जनिका, प्रजनिका, प्रजायिनी, प्रसूः *f.*, जनयित्री, अम्बा, माता *f.* (तृ).—(Bank to confine water) सेतुः *m.*, सेतुबन्धः, जलबन्धकः, धरणं, पिण्डनः, आलिः *f.*

To dam up, *v. a.* सेतुना जलं बन्ध् (c. 9. बध्नाति, बन्द्धुं) or संस्तम्भ् (c. 9. -स्तभ्नाति -स्तम्भितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

Damage, *s.* क्षतिः *f.*, क्षतं, अपचयः, अपायः, हानिः *f.*, नाशः, दोषः, दूषणं, क्षयः, उपक्षयः, अपकारः, अपकृतं, हिंसा, द्रोहः, ध्वंसः, प्रध्वंसः, भ्रंशः, अनिष्टं.—(Damages in law) क्षतिपूरणं, दण्डः, पारितोषिकं, प्रतिफलं, निष्कृतिः *f.*, प्रायश्चित्तं.

To damage, *v. a.* हिंस् (c. 7. हिनस्ति c. 1. हिंसति -सितुं), उपहिंस्, विहिंस्, दुष् in caus. (दूषयति -यितुं); अपकृ; अर्द् in caus. (अर्दयति -यितुं); क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्; नश् in caus. (नाशयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं).

Damageable, *a.* हिंसनीयः -या -यं, दूष्यः -ष्या -ष्यं, अपचयक्षमः -मा -मं.—(Mischievous) हिंस्रः -स्रा -स्रं, दूषकः -का -कं, अपकारकः -का -कं.

Damaged, *p. p.* क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, दूषितः -ता -तं, सदोषः -षा -षं, अर्दितः -ता -तं, कृतापकारः -रा -रं, अपकृतः -ता -तं.

Damask, *s.* पुष्पादिमूर्त्तिकर्म्मालङ्कृतं दमस्कनाम चित्रदुकूलं.

To damask, *v. a.* (Adorn stuffs with flowers) दुकूलं मूर्त्तिकर्म्मद्वारा पुष्पादिना अलङ्कृ.—(Variegate) चित्र् (c. 10. चित्रयति -यितुं), कर्बुरीकृ.

Damask-rose, *s.* हेमपुष्पं, रक्तपुष्पो जवाप्रभेदः.

Dame, *s.* (Lady) आर्य्या, भाविनी.—(Woman) स्त्री, वधूः, गृहिणी.

To damn, *v. a.* (Doom to hell or eternal torments) नरकं गम्या इति शापं वद् (c. 1. वदति -दितुं); अनन्तदण्डं or नरकदण्डं प्राप्या इति ब्रू (c. 2. ब्रवीति, वक्तुं), अनन्तदुःखं or अनन्तयातना ते भूयाद् इति धिक्, स नरकं प्रव्रजतु or अधो ऽधो निरये पततु इति शापं कृ, नरकदण्डार्हं ज्ञा (c. 9. जानाति, ज्ञातुं), नरके निपत् in caus. (-पातयति -यितुं).—(Condemn) दण्ड् (c. 10. दण्डयति -यितुं), दण्डार्हं ज्ञा.—(Hiss any public performance) रङ्गे नाटकं प्रेक्ष्य कर्कशशब्देद् अप्रसादं सूच् (c. 10. सूचयति -यितुं).

Damnable, *a.* अनन्तदण्डार्हः -र्हा -र्हं, नरकदण्डार्हः -र्हा -र्हं, नरके पतनार्हः -र्हा -र्हं.—(Odious) गर्हितः -ता -तं, गर्हणीयः -या -यं.

Damnably, *adv.* यथा नरकदण्डार्हो भवति तथा, गर्हितं.

Damnation, *s.* अनन्तदण्डः, नरकदण्डः, अनन्तयातना, नरकयातना, नरके पतनं, नरकगमनं, अधोगमनं, अभिसम्पातः, ईश्वरकृपावहिष्करणं.

Damned, *p. p.* नरकगतः -ता -तं, नरकपतितः -ता -तं, नरकस्थः -स्था -स्थं, नारकी -किणी -कि (न्), नैरयः -यी -यं, नरकप्राप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, गर्हितः -ता -तं, गर्हणीयः -या -यं, घृणार्हः -र्हा -र्हं.

Damnific, *a.* क्षतिकारकः -का -कं, अपकारी -रिणी -रि (न्), दूषकः -का -कं.

To damnify, *v. a.* दुष् in caus. (दूषयति -यितुं), अपकृ, क्षतं -तां -तं कृ.

Damp, dank, *a.* (Moist) आर्द्रः -र्द्रा -र्द्रं, सार्द्रः -र्द्रा -र्द्रं, जलार्द्रः -र्द्रा -र्द्रं, क्लिन्नः -न्ना -न्नं, तिमितः -ता -तं, स्तिमितः -ता -तं, उन्नः -न्ना -न्नं, समुन्नः -न्ना -न्नं, सरसः -सा -सं, जलसिक्तः -क्ता -क्तं, अनूपः -पा -पं, समुक्षितः -ता -तं, वोदः -दा -दं, उत्तः -त्ता -त्तं.—(Dejected) म्लानः -ना -नं, म्लानमनाः -नाः -नः, विषण्णः -ण्णा -ण्णं.

Damp, *s.* (Moisture) क्लेदं, संक्लेदः, क्लेमः, तेमः -मनं, समुन्दनं, जलावसेकः, चिक्लिदं.—(Fog, vapour) वाष्पः, सवाष्पः, धूमः -मिका, स्वेदः.—(Dejection) विषादः, ग्लानिः *f.*; 'to be damp,' क्लिद् (c. 4. क्लिद्यति) तिम् (c. 4. तिम्यति or तीम्यति).

To damp, *v. a.* (Moisten) क्लिद् in caus. (क्लेदयति -यितुं), परिक्लिद्; सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्; उक्ष् (c. 1. उक्षति -क्षितुं), समुक्ष्; उन्द् (c. 7. उनत्ति, उन्दितुं), आर्द्रीकृ.—(Dispirit) मनो खण्ड् (c. 10. खण्डयति -यितुं), खण्डिताशंसं -सां -सं कृ, भग्नाशं -शां -शं कृ, म्लानाशं -शां -शं, कृ.

Dampish, *a.* ईषदार्द्रः -र्द्रा -र्द्रं, ईषत्स्तिमितः -ता -तं, आक्लिन्नः -न्ना -न्नं.

Dampness, *s.* आर्द्रता, सार्द्रता, जलार्द्रत्वं, क्लिन्नता, जलसिक्तत्वं, अनूपता.

Dampy, *a.* विषादी -दिनी -दि (न्), अवसन्नः -न्ना -न्नं, उद्विग्नः -ग्ना -ग्नं.

Damsel, *s.* कन्या, कुमारी -रिका, कन्यका, युवतिः *f.* -ती, यूनी, बाला -लिका, अविवाहिता स्त्री; 'damsel's child,' कानीनः -नी.

Damson, *s.* दाम्सन्नामकः कृष्णवर्णः क्षुद्रफलप्रभेदः.

To dance, *v. n.* नृत् (c. 4. नृत्यति, नर्त्तितुं), प्रनृत्, उपनृत्, समानृत्, नट् (c. 1. नटति -टितुं), नृत्यं कृ, नर्त्तकवद् हस्तपादादि सञ्चल् in caus. (-चालयति -यितुं); 'to dance attendance,' उपास् (c. 2. -आस्ते -आसितुं).

To dance, *v. a.* नृत् in caus. (नर्त्तयति -यितुं), चल् in caus. (चालयति -यितुं).

Dance, *s.* नृत्यं, नाट्यं, ताण्डवं, लास्यं, चारणं, नाट्यस्यासः, गुलसिक्का.

Dancer, *s.* नर्त्तकः -की *f.*, नटः -टी *f.*, कुशीलवः, लासकः -की *f.*, लासिका *f.*, चारणः, चारणदाराः *f. pl.*, शैलाली *m.* (न्), शैलूषः, नाटकः -की *f.*, कृशाश्वी *m.* (न्), नर्त्तनकृतः *m.-f.*, नृत्यकुशलः, भरतः, भारतः, भारताजीवः, तालावचरः.

Dancing, *s.* नृत्यं, नर्त्तनं, ताण्डवं, नटनं, प्रनर्त्तनं, लास्यं, लासः, ताण्डवं.

कौशीलव्यं, चारणत्वं, गुणनिका, हस्तपादादिसञ्चालनं.

DANCING-MASTER, s. नृत्याचार्य्यः, नृत्यशिक्षकः, नृत्यगुरुः m.

DANCING-SCHOOL, s. नृत्यशिक्षणशाला, नृत्यशाला, नृत्यशिक्षावेश्म n. (न्).

DANDELION, s. सिंहपर्णी, सिंहदन्तसदृशपत्रः क्षुद्रौषधिभेदः.

DANDIPRAT or DAPPERLING, s. बालकः, पृथुकः, माणवकः, वामनः.

To DANDLE, v. a. जानुदेशे बालकं धृत्वा लल् in caus. (लालयति -यितुं).

DANDLED, p. p. लालितः -ता -तं, सान्त्वकरणार्थं जानुदेशे धृतः -ता -तं.

DANDRIFF, DANDRUFF, s. मज्जा, शिरोमध्ये पिण्डितस्नेहः, शिरोमलं.

DANDY, s. सुवेशी m. (न्), सुवसनः, दर्शनीयमानी m. (न्), छेकः.

DANGER, s. भयं, भयहेतुः m., संशयः, शङ्का, सन्देहः, विकल्पः, आतङ्कः, आपद् f., विपद् f., अपायः, विपत्तिः f., उत्पातः, बाधा, व्याघातः; 'any thing exposed to danger,' भयस्थानं, संशयस्थानं, शङ्कास्पदं; 'danger of life,' जीवितसंशयः, प्राणनाशसंशयः, प्राणबाधः; 'we are in danger of being led to justice,' अस्माकं विचारस्थाने आनयनशङ्का विद्यते; 'in danger of punishment,' दण्डयोग्यः -ग्या -ग्यं; 'brought into danger,' संशयितः -ता -तं; 'an act attended with danger,' सन्दिग्धकर्म्म n. (न्).

To DANGER, v. a. संशयस्थं -स्थां -स्थं कृ, शङ्कास्पदं कृ, सन्देहस्थं -स्थां -स्थं कृ; 'one who dangers his life,' संशयितजीवितः.

DANGEROUS, a. भयङ्करः -रा -रं, भयानकः -की -कं, भयहेतुकः -का -कं, सन्दिग्धः -ग्धा -ग्धं, सांशयिकः -की -कं, संशयस्थः -स्था -स्थं, संशयापन्नः -न्ना -न्नं, शङ्काक्रान्तः -न्ता -न्तं, भयाक्रान्तः -न्ता -न्तं, भयजनकः -का -कं, भैरवः -वी -वं, विपज्जनकः -का -कं; 'a dangerous illness,' सन्निपातकः.

DANGEROUSLY, adv. यथा संशयः or भयहेतुर् उत्पद्यते तथा, भैरवं, शङ्कापूर्व्वकं, भयानकं, सन्दिग्धं; 'dangerously ill,' सन्निपातकरोगग्रस्तः.

DANGEROUSNESS, s. भयानकत्वं, सन्दिग्धता, सांशयिकत्वं, शङ्काक्रान्तत्वं.

To DANGLE, v. n. लुट् (c. 6. लुटति -टितुं), चल् (c. 1. चलति -लितुं), लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, लुल् (c. 1. लोलति -ते -लितुं).

DANGLER, s. स्त्रीणाम् उपासने or स्त्रीभिः सह विलासकरणे कालक्षेपकः.

DANGLING, a. चलन् -लन्ती -लत् (त्), लोलः -ला -लं, लोलमानः -ना -नं, लुठन् -ठन्ती -ठत् (त्), लम्बमानः -ना -नं, अवलम्बितः -ता -तं, लुलितः -ता -तं.

DAPPER, a. विनीतः -ता -तं, शुद्धाकारः -रा -रं, ललितरूपः -पा -पं.

To DAPPLE, v. a. चित्र् (c. 10. चित्रयति -यितुं), चित्रविचित्रीकृ, कर्ब्बुरीकृ.

DAPPLED, a. चित्रितः -ता -तं, कर्ब्बुरितः -ता -तं, नानावर्णः -र्णा -र्णं.

To DARE, v. n. धृष् (c. 5. धृष्णोति, धर्षितुं), साहसं कृ, साहसेन व्यवसो (c. 4. -स्यति -सातुं); 'I dare not ask him,' न तं प्रष्टुं धृष्णोमि.

To DARE, v. a. (Challenge) आह्वे (c. 1. -ह्वयति -ह्वातुं), समाह्वे, नियुद्धार्थम् आह्वे, स्पर्द्ध् (c. 1. स्पर्द्धते -र्द्धितुं), आक्रन्द् (c. 1. -क्रन्दति -न्दितुं).

DARE, s. आह्वानं, समाह्वानं, योधसंरावः, क्रन्दितं, अभिग्रहः.

DARED, p. p. (Challenged) आहूतः -ता -तं, समाहूतः -ता -तं.

DARING, s. साहसं, प्रतिभा, धार्ष्ट्यं; 'act of daring,' आपाहितं.

DARING, a. साहसी -सिनी -सि (न्), साहसिकः -की -कं, धृष्टः -ष्टा -ष्टं, धृष्णुः -ष्णुः -ष्णु, प्रगल्भः -ल्भा -ल्भं, वीरः -रा -रं, प्रवीरः -रा -रं, शूरः -रा -रं, निर्भयः -या -यं, अभीतः -ता -तं, निर्विशङ्कः -ङ्का -ङ्कं, अकुतोभयः -या -यं, विक्रान्तः -न्ता -न्तं, पराक्रमी -मिणी -मि (न्), प्रतिभानवान् -वती -वत् (त्), प्रतिभान्वितः -ता -तं.

DARINGLY, adv. साहसेन -सात्, साहसपूर्व्वकं, धृष्टं, धृष्टत्वात्, सशौर्य्यं, प्रगल्भं, निर्भयं, निर्विशङ्कं, सविक्रमं, सप्रतिभानं, वीरवत्.

DARINGNESS, s. साहसं, साहसिकत्वं, धृष्टता, धृष्णुता, धार्ष्ट्यं, प्रगल्भता, प्रगल्भत्वं, प्रतिभानं, निर्भयत्वं, वीरता, शौर्य्यं, धैर्य्यं, विक्रमः.

DARK, a. तामसः -सी -सं -सिकः -की -कं, तमस्वी -स्विनी -स्वि (न्), सान्धकारः -रा -रं, अन्धकारयुक्तः -क्ता -क्तं, सतिमिरः -रा -रं, तिमिरयुक्तः -क्ता -क्तं, तमोवृतः -ता -तं, तमोमयः -यी -यं, तमोभूतः -ता -तं, निरालोकः -का -कं, निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, हतज्योतीः -तीः -तिः (स्).—(Obscure) गूढः -ढा -ढं, निगूढः -ढा -ढं, दुर्ज्ञेयः -या -यं, अस्पष्टः -ष्टा -ष्टं, दुर्दर्शः -र्शा -र्शं.—(Dark-coloured) कृष्णः -ष्णा -ष्णं, श्यामः -मा -मं, कालेयः -यी -यं, मेचकः -का -कं, नीलः -ला -लं, सितेतरः -रा -रं,—(Opaque) अस्वच्छः -च्छा -च्छं; 'a dark night,' तामसी, तमिस्रा, नष्टचन्द्रा रात्रिः.

DARK, s. तमः n. (स्), अन्धकारः, तिमिरं, तमिस्रं, अन्धं.

To DARKEN, v. a. तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, अन्धीकृ.

To DARKEN, v. n. तमस्वी -स्विनी -स्वि भू, तिमिरीभू, अन्धीभू.

DARKENED, p. p. तमोवृतः -ता -तं, तिमिरीकृतः -ता -तं, सतमसः -सा -सं.

DARKISH, a. तमस्कल्पः -ल्पा -ल्पं, ईषत्तामसः -सी -सं.—(In colour) ईषत्कृष्णः -ष्णा -ष्णं, आकालः -ला -लं, आनीलः -ला -लं.

DARKLING, a. तमोवर्त्ती -र्त्तिनी -र्त्ति (न्) or अन्धकारवर्त्ती.

DARKLY, adv. अस्पष्टं, अप्रकाशं, अव्यक्तं, सान्धकारं, अन्धवत्, अन्धं.

DARKNESS, s. अन्धकारः, तमः n. (स्), तिमिरं, तमिस्रं, तमसं, ध्वान्तं, निरालोकता, सान्धकारत्वं, निष्प्रभता, अन्धं, शार्वरं, रात्रिवासः n. (स्), निशाचर्म्म n. (न्), भूच्छाया, खलुक् m. (ज्); 'slight darkness,' अवतमसं; 'great darkness,' अन्धतमसं, तमस्ततिः f.; 'universal darkness,' सन्तमसं.

DARKSOME, s. तमस्वी -स्विनी -स्वि (न्), तमस्कल्पः -ल्पा -ल्पं, निष्प्रभः -भा -भं.

DARLING, s. प्रियः -या, हृदयप्रियः -या, दयितः -ता, स्नेहपात्रं.

DARLING, a. हृदयप्रियः -या -यं, सुप्रियः -या -यं, प्रियतमः -मा -मं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, इष्टः -ष्टा -ष्टं, इष्टतमः -मा -मं.

DARN, s. वस्त्रयोन्यनुकृतं जीर्णवस्त्रसीवनं, वस्त्रसन्धिः m.

To DARN, v. a. जीर्णवस्त्राणि सिव् (c. 4. सीव्यति, सेवितुं) or सूक्ष्मसूचिकर्म्मद्वारा सन्धा (c. 3. -धत्ते -धातुं).

DARNEL, s. कक्षः, शस्यघ्नतृणः कक्षभेदः.

DART, s. शूलः -लं, प्रासः, शल्यं, शङ्कुः m., विपाठः m., पाणिमुक्तं, करमुक्तं, मुक्तकं, बाणः, अस्त्रं, सर्भिकं, दूरवेधी m. (न्).

To DART, v. a. अस् (c. 4. अस्यति, असितुं), प्रास्, क्षिप् (c. 6. क्षिपति, क्षेप्तुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), ईर् (c. 10. ईरयति -यितुं), पत् in caus. (पातयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं).

To DART, v. n. (As lightning) स्फुर् (c. 6. स्फुरति -रितुं).—(Dart upon one) आपत् (c. 1. -पतति -तितुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं).

To DASH, v. a. (Throw or strike any thing suddenly or forcibly against another) सहसा or प्रसभं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or प्रक्षिप् or अस् (c. 4. अस्यति, असितुं) or प्रास् or पत् in caus. (पातयति -यितुं), or अभिहन् (c. 2. -हन्ति -न्तुं), or अभ्याहन् or प्रतिहन् or प्रहृ (c. 1. -हरति -हर्त्तुं).—(Break by collision, dash in pieces) मृद् (c. 9. मृद्नाति, मर्द्दितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), प्रभञ्ज् (c. 7. -भनक्ति, -भंक्तुं), विघट्ट् (c. 10. -घट्टयति -यितुं), भूमौ प्रक्षिप्य खण्डं खण्डं कृ or खण्डशः कृ or लवशः कृ or चूर्ण् (c. 10. चूर्णयति -यितुं).—(Bespatter, besprinkle) अवकॄ (c. 6. -किरति -करितुं -रीतुं), अभ्यवकॄ, समवकॄ; उक्ष् (c. 1. उक्षति -क्षितुं), अभ्युक्ष्, प्रोक्ष्; अवसिच् (c. 6. -सिञ्चति -सेक्तुं).—(Mingle, adulterate) मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, संसृज् (c. 6. -सृजति -स्रष्टुं).—(Confound) मुह् in caus. (मोहयति -यितुं), विनश् in caus. (-नाशयति -यितुं).—(Obliterate) आमृज् (c. 2. -मार्ष्टि -मार्ष्टुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विलुप्

in caus. (-श्लोपयति -यितुं); 'dash one's hopes,' आशा भञ्ज् or खण्ड् (c. 10. खण्डयति -यितुं); 'dash out the brains,' मस्तकं निर्भिद्.

To DASH, *v. n.* (Rush against with a violent motion) प्रपत् (c. 1. -पतति -तितुं), प्रोत्पत्, आपत्, प्रस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), प्लु (c. 1. -प्लवते -प्लोतुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं).—(Be dashed in pieces), प्रभञ्ज् in pass. (-भज्यते).

DASH, *s.* (Collision) सङ्घट्टः -ट्टनं, समाघातः, प्रतिघातः, अभिघातः, परस्पराघातः, प्रभङ्गः, सम्मर्द्दः, मर्द्दनं, निष्पेषः.—(Infusion, admixture) प्रक्षेपः, मिश्रणं, सम्पर्कः, संसर्गः; 'a dash, a slight quantity,' किञ्चित्, ईषत्.—(A line in writing to denote a pause or omission) लिखने विरामसूचनार्थं or लोपसूचनार्थं क्षुद्ररेखा.—(Blow) प्रहारः, आघातः, आहतिः *f.*

DASTARD, *s.* कापुरुषः, कुपुरुषः, हतकः, क्लीबः, कातरः, कृपणः, भीरुः.

To DASTARD or DASTARDISE, *v. a.* त्रस् in caus. (त्रासयति -यितुं), सन्त्रस्; भी in caus. (भाययति or भीषयति -यितुं), हीनचेतसं -सां -सं कृ.

DASTARDLY, *a.* अमनुष्यः -ष्या -ष्यं, कातरः -रा -रं, निर्वीरः -रा -रं, क्लीबः -बा -बं, अपौरुषेयः -यी -यं, दीनमनस्कः -स्का -स्कं.

DASTARDY, *s.* कापुरुषत्वं, अमनुष्यता, अपौरुषं, कातर्य्यं, क्लैब्यं, दीनता.

DATA, DATUM, *s.* तत्त्वानि *n. pl.*, सत्यानि *n. pl.*, सद्भावानुमतं तत्त्वं, उपन्यासः.

DATE, *s.* (Time at which a letter, &c. is written) लिखनकालः, लिखनदिवसः, दिवसः, दिनं, तिथिः *m. f.*—(Time at which a thing was done) कालः, कालिकता, तत्कालः.—(Period, term) अवधिः *m.*, कालावधिः *m.*, परिमाणं.—(Fruit) खर्ज्जूरः, काठिनः; 'out of date,' अव्यवहारितः -ता -तं, निरूढः -ढा -ढं.

To DATE, *v. a.* कालं or दिवसं or दिनं or तिथिं लिख् (c. 6. लिखति, लेखितुं).

DATED, *p. p.* कालसम्पन्नः -न्ना -न्नं, सकालः -ला -लं, कृतकालः -ला -लं.

DATE-TREE, *s.* खर्ज्जूरः, तृणद्रुमः, यनामयः; 'marshy date-tree,' हिन्तालः, हीन्तालः, हिमहासकः.

DATIVE, *a.* (Case) सम्प्रदानं, सम्प्रदानकारकः, चतुर्थी विभक्तिः.

To DAUB, *v. a.* लिप् (c. 6. लिम्पति, लेप्तुं), आलिप्, उपलिप्, समालिप्; अञ्ज् (c. 7. अनक्ति, अंक्तुं or caus. अञ्जयति -यितुं), दिह् (c. 2. देग्धि -ग्धुं), प्रदिह्.—(Cover over) छद् (c. 10. छादयति -यितुं), प्रच्छद्.

DAUB, *s.* लेपः, विलेपः.—(Bad painting) कुचित्रं, कुचित्रलेखा, मन्दचित्रं.

DAUBED, *p. p.* लिप्तः -प्ता -प्तं, उपलिप्तः -प्ता -प्तं, विलिप्तः -प्ता -प्तं, अक्तः -क्ता -क्तं, अभ्यक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं, निदिग्धः -ग्धा -ग्धं.

DAUBER, *s.* लेपकः, लेपकरः, प्रलेपकः.—(Coarse painter) अनभिज्ञचित्रकरः, कुचित्रलिख् *m.* (ख्), चित्रकरदेशीयः, चित्रकरपाशः.

DAUBY, *a.* श्यानः -ना -नं, श्लीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, लेप्यः -प्या -प्यं.

DAUGHTER, *s.* दुहिता *f.* (तृ), पुत्री, पुत्रिका, पुत्रका, सुता, सूनुः -नूः *f.*, आत्मजा, स्वजा, अङ्गजा, कन्या, तनया, कन्यकाजनः, जाता, दारिका, प्रसूतिः *f.*, पितृ *f.* (श्च); 'legitimate daughter,' औरसी, धर्म्मजा; 'daughter in law,' स्नुषा, जनी, पुत्रवधूः *f.*, वधूः *f.*, वधूटी, कुलजी; 'adopted daughter,' करणीसुता, पुत्रिका, पोष्यपुत्री, क्रीतपुत्री; 'daughter's husband,' जामाता *m.* (तृ), दुहितुःपतिः *m.*

To DAUNT, *v. a.* त्रस् in caus. (-त्रासयति -यितुं), सन्त्रस्, भी in caus. (भाययति or भीषयति -यितुं), भयं जन् in caus. (जनयति -यितुं), मनो भञ्ज् (c. 7. भनक्ति, भंक्तुं), मनोहतं -तां -तं कृ.

DAUNTLESS, *a.* निर्भयः -या -यं, अशङ्कः -ङ्का -ङ्कं, विशङ्कः -ङ्का -ङ्कं, अभीतः -ता -तं, अकुतोभयः -या -यं, अपभीः -भीः -भि, निःसाध्वसः -सा -सं.

DAUNTLESSNESS, *s.* निर्भयत्वं, अभीतिः *f.*, अभयं, अभीरुता, विशङ्कता.

DAUPHIN, *s.* युवराजः, ज्येष्ठो राजपुत्रः, राज्ञः पूर्व्वजपुत्रः.

To DAWDLE, *v. n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

DAWDLER, *s.* विलम्बी *m.* (न्), कालक्षेपकः, दीर्घसूत्री *m.* (न्).

To DAWN, *v. n.* प्रभा (c. 2. -भाति -तुं), उषस् (nom. उषस्यति), उष् (c. 1. उच्छति, ओषितुं), व्युष्, समुष्, प्रभातीभू.

DAWN, *s.* अरुणः, प्रभातं, उषः -षः *n.* (स्), प्रत्युषः -षः *n.* (स्), प्रत्यूषः -षः *n.* (स्), अरुणोदयः, व्युष्टं, विभातं, भातः, उदयः, प्रातःकालः, कल्यं, काल्यं, पूर्व्वसन्ध्या, प्राक्सन्ध्या, सन्ध्या, दिवसमुखं, अहर्मुखं, दिनारम्भः, दिनादिः *m.*, निशावसानं, निशान्तं, क्षपान्तः, रात्रिविगमः, गोसर्गः, प्रावोधिकः; 'at dawn,' प्रभाते, उषा, प्रातःकाले, प्रातर्; 'belonging to the dawn,' उषस्यः -स्या -स्यं, प्रभातीयः -या -यं, प्रातःकालीनः -ना -नं.

DAY, *s.* दिवसः -सं, दिनं, अहः *m.* (न्), वासरः, वारः, द्यु *n.*, घस्रः, वास्रः; 'a lunar day,' तिथिः *m. f.* -थी; 'to day,' अद्य; 'by day,' दिवा, अह्नाय; 'day by day,' प्रतिदिनं, प्रतिदिवसं, प्रतिवासरं, प्रत्यहं, दिवसे दिवसे, अहन्यहनि, अहरहः, दिने दिने; 'day and night,' अहोरात्रं, अहर्निशं, दिवानिशं, दिवारात्रं, नक्तंदिवं, द्युनिशं, द्युनिशी; 'from day to day,' दिनाद्दिनं, वारं वारं; 'one day,' एकदा; 'a former day,' पूर्व्वेद्युस्; 'a future day,' उत्तरेद्युस्; 'another day,' अन्येद्युस्; 'next day,' परेद्युस्, परेद्यवि; 'the day before yesterday,' अपरेद्युस्; 'the day after to-morrow,' परश्वस्, अपरेद्युस्; 'a night and two days or a day and two nights,' पक्षिणी; 'a day of Brahma,' ब्राह्मः; 'a day of the gods,' दैवतः; 'a rainy day,' दुर्द्दिनं, वार्द्दलं; 'day's hire,' दिनिका, दैनिकी.

DAY-BOOK, *s.* महाजनस्य दैनिकपुस्तकं, वाणिजपुस्तकं यस्मिन् दिवसे दिवसे यथायथावृत्तान्तो लिख्यते or आरोप्यते.

DAY-BREAK, *s.* अरुणोदयः, उदयकालः, उषः, प्रत्युषः, प्रभातं, प्रभातकालः, दिवसमुखं, अहर्मुखं, दिनारम्भः, दिनादिः *m.*, रात्र्यवसानं, निशान्तं.

DAY-LABOUR, *s.* भ्रातं, दैनिककर्म्म *n.* (न्), आह्निकक्रिया, दिवाकर्म्म *n.*

DAY-LABOURER, *s.* भ्रातीनः, भ्रातकरः, भ्रातव्यापृतः, दैनिककर्म्मकारः.

DAY-LIGHT, *s.* दिनज्योतिः *n.* (स्), सूर्य्यकालः, सूर्य्यरश्मिः *m.*, दिनालोकः, दीप्तिः *f.*

DAY-SPRING, *s.* अरुणोदयः, उदयः, सूर्य्योदयः, दिवसमुखं, दिनारम्भः.

DAY-STAR, *s.* प्रभातनक्षत्रं, प्रभातीयतारा, प्रातरुदयिनी तारा, शुक्रतारा.

DAY-TIME, *s.* दिवसकालः, सूर्य्यकालः, सूर्य्यसमयः, दिनकालः, रविकालः.

DAY-WORK, *s.* दिवसकर्म्म *n.* (न्), दिवाकर्म्म, आह्निकक्रिया, भ्रातं.

To DAZZLE, *v. a.* अतिशयतेजसा दृष्टिं तप् in caus. (-तापयति -यितुं) or उपहन् (c. 2. -हन्ति -न्तुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

To DAZZLE, *v. n.* अतिदीप्त्युपहतत्वात् संतापितदृष्टिः -ष्टिः -ष्टि भू.

DAZZLED, *p. p.* उपहतदृष्टिः -ष्टिः -ष्टि or [illegible] -ता -तं.

DAZZLING, *a.* अतितेजसः -सी -सं, उज्ज्वलः -ला -लं, दृष्टिसन्तापकः -का -कं, दुरालोकः -का -कं, दुर्निरीक्ष्यः -क्ष्या -क्ष्यं, दुर्दर्शः -र्शा -र्शं, नयनोपघाती -तिनी -ति (न्).

DEACON, *s.* उपपुरोहितः, उपधर्म्माध्यापकः, पुरोहितसहायः, सहकारी *m.* (न्).

DEACONESS, *s.* पूर्व्वकाले ख्रीष्टीयधर्म्मे पुरोहितसहकारिणी स्त्री.

DEACONRY, DEACONSHIP, *s.* उपपुरोहितपदं or अधिकारः or धर्म्म *n.* (न्).

DEAD, *a.* and *p.* मृतः -ता -तं, प्रेतः -ता -तं, परेतः -ता -तं, [illegible] -ता -तं, प्रेतीभूतः -ता -तं, अतीतः -ता -तं, [illegible]

निमतः -ता -तं, अजीवः -वा -वं, निर्जीवः -वा -वं, व्यापन्नः -न्ना -न्नं, विपन्नः -न्ना -न्नं, संस्थितः -ता -तं, मृतः -ता -तं, प्रमीतः -ता -तं, गतः -ता -तं, उपरतः -ता -तं, अपसन्नः -न्ना -न्नं, गतजीवनः -ना -नं, गतजीवितः -ता -तं, त्यक्तदेहः -हा -हं, गतप्राणः -णा -णं, गतासुः -सुः -सु or उज्झितासुः, परासुः -सुः -सु, प्राप्तपञ्चत्वः -त्वा -त्वं, अभिप्रयातः -ता -तं, नामशेषः -षा -षं, कीर्त्तिशेषः -षा -षं, कथाशेषः -षा -षं, दिष्टङ्गतः -ता -तं, प्रस्थानः -ना -नं; 'gone to heaven,' स्वर्यातः -ता -तं, स्वर्गगतः -ता -तं; 'half-dead,' मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं, मुमूर्षुः -र्षुः -र्षु.—(Inanimate) अप्राणी -णिनी -णि (न्), विचेतनः -ना -नं, असुः -सुः -सु, प्राणहीनः -ना -नं.—(Motionless) निष्पन्दः -न्दा -न्दं, निश्चेष्टः -ष्टा -ष्टं, निश्चलः -ला -लं.—(Empty) शून्यः -न्या -न्यं.—(Dull) मन्दः -न्दा -न्दं, निस्तेजाः -जाः -जः (स्).—(Obtuse) जडः -डा -डं, अतीक्ष्णः -क्ष्णा -क्ष्णं.—(Vapid) विरसः -सा -सं, निस्सारः -रा -रं, निस्सारः -रा -रं, क्लीवः -वा -वं.—(Useless) विफलः -ला -लं.—(Numbed) स्तब्धः -ब्धा -ब्धं, सुप्तः -प्ता -प्तं.—(Dead body) मृतशरीरं, मृतकं, शवः -वं, कुणपः -पं.

Dead, *s.* (Of night) अर्धरात्रः, महारात्रः, महानिशा, अर्द्धरात्रः, अर्द्धनिशा, निशीथः; 'in the dead of night,' रात्रिमध्ये; 'of winter,' शीतकालमध्ये.

To **deaden**, *v. a.* दुर्बलीकृ, निर्बलीकृ, ग्लानीकृ, शिथिलीकृ, विरसीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं) or उपहन् (c. 2. -हन्ति -न्तुं), शम् in caus. (शमयति -यितुं).

To **deaden**, *v. n.* क्षै (c. 1. क्षायति, क्षातुं), क्षि in pass. (क्षीयते), शिथिलीभू.

Deadened, *p. p.* हृततेजाः -जाः -जः (स्) or ग्लानतेजाः or मन्दतेजाः, क्षीणशक्तिः -क्तिः -क्ति, शिथिलबलः -ला -लं, उपहतशक्तिः -क्तिः -क्ति.

Deadly, *a.* मारात्मकः -का -कं, व्यापादकः -का -कं, घातविधः -धी -धं, प्राणान्तिकः -की -कं or प्राणान्तकः or जीवान्तकः, प्राणहारी -रिणी -रि (न्) or प्राणापहारी, प्राणघातकः -का -कं, मृत्युजनकः -का -कं, निधनकारी -रिणी -रि (न्), विषतुल्यः -ल्या -ल्यं, सविषः -षा -षं, कालकल्पः -ल्पा -ल्पं, प्राणनाशकः -का -कं, मर्म्मान्तिकः -की -कं.—(Implacable) अशाम्यः -म्या -म्यं; 'deadly hatred,' बद्धवैरं; 'deadly poison,' मृत्युजनकगरलं.

Deadly, *adv.* (In a manner like the dead) मृतवत्, प्रेतवत्, शववत्.—(Mortally) मारात्मकं, प्राणान्तिकं; 'deadly wounded,' भिन्नमर्म्मा *m.* (न्); 'deadly pale,' शववर्णः -र्णा -र्णं.

Deadness, *s.* (Coldness, want of affection) निःस्नेहता, विरक्तिः *f.*, वैरस्यं.—(Languor, weakness) ग्लानिः *f.*, म्लानिः *f.*, अवसादः, मान्द्यं, निर्बलता, दौर्बल्यं, अशक्तिः *f.*, बलशैथिल्यं, शिथिलता.—(Want of motion) निष्पन्दता, निश्चलता.—(Want of spirit) तेजोहीनता, निस्तब्धता, वैरस्यं, जडत्वं.—(Numbness) सुप्तिः *f.*, स्तब्धता.—(Barrenness) वन्ध्यता, वैफल्यं.

Dead-reckoning, *s.* नौका कियद्दूरं गता इति निश्चयार्थं कृता गणना.

Deaf, *a.* बधिरः -रा -रं, एडः -डा -डं, अकर्णः -र्णा -र्णं, अश्रुतः -ता -तं, श्रोत्रविकलः -ला -लं, श्रवणेन्द्रियविकलः -ला -लं, श्रवणशक्तिरहितः -ता -तं, श्रुतिवर्जितः -ता -तं; 'deaf and dumb,' एडमूकः -का -कं, कल्लः -ल्ला -ल्लं.

To **deafen**, *v. a.* बधिरीकृ, बधिर (nom. बधिरयति -यितुं), कर्णौ उपहन् (c. 2. -हन्ति -न्तुं), श्रवणशक्तिं हृ (c. 1. हरति, हर्त्तुं).

Deafened, *p. p.* उपहतकर्णः -र्णा -र्णं, बधिरीकृतः -ता -तं.

Deafening, *a.* कर्णोपघाती -तिनी -ति (न्), श्रवणशक्तिहारी -रिणी -रि (न्).

Deafish, *a.* ईषद्बधिरः -रा -रं, ईषदेडः -डा -डं, अल्पश्रवणः -णा -णं.

Deafly, *adv.* बधिरवत्, एडवत्, अश्रवणपूर्व्वं, अस्पष्टं.

Deafness, *s.* बधिरत्वं -ता, एडता, अकर्णत्वं, अश्रवणं, श्रवणहीनता, श्रवणेन्द्रियवैकल्यं, श्रवणाक्षमता.

Deal, *s.* (Quantity) बाहुल्यं, बहुत्वं, प्राचुर्य्यं, प्रायः; 'a deal of, much,' बहुः -हुः -ह्वी -हु, भूरिः -रिः -रि, प्रचुरः -रा -रं, अनल्पः -ल्पा -ल्पं, अनेकः -का -कं; 'a deal of money,' बहुधनं; 'a good deal,' बहु, भृशं, अतिशयं, निर्भरं, गाढं, अत्यन्तं, अनल्पं, अति or सु prefixed; 'a good deal vexed,' सुदुःखितः.—(Fir wood) दारु *n.*, देवदारु, देवकाष्ठं, इन्द्रदारुः *m.*, किलिमं.

To **deal**, *v. a.* (Distribute) कृप् (c. 10. कल्पयति -यितुं), परिकृप्, पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं) or विन्यस् (c. 4. -अस्यति -असितुं) or वंस् (c. 10. -वंसयति -यितुं) or विधा (c. 3. -दधाति -धातुं), वण्ट् (c. 10. वण्टयति -यितुं).—(Scatter) विकॄ (c. 6. -किरति -करितुं -रीतुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अस्; 'to deal blows,' मुष्टिं or दण्डं पत् in caus. (पातयति -यितुं).

To **deal**, *v. n.* (Transact business, trade) पण् (c. 1. पणते -णितुं or पणायति -यितुं), पणायां कृ, व्यवहृ (c. 1. -हरति -हर्त्तुं), व्यापृ (c. 6. -प्रियते), क्रयविक्रयं कृ.—(Behave, act) चर् (c. 1. चरति -रितुं), आचर्, समाचर्; वृत् (c. 1. वर्त्तते -र्त्तितुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), विधा (c. 3. -दधाति -धातुं).

To **deal with**, *v. a.* (Treat in any manner) विधा (c. 3. -दधाति -धातुं), आचर् (c. 1. -चरति -रितुं), समाचर्; व्यवहृ (c. 1. -हरति -हर्त्तुं), 'he deals honourably with me,' मयि यथान्यायं वृत्तिं वर्त्तते.—(Contend with) प्रतिकृ, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं), 'how can one deal with such a monarch?' ईदृशे नृपे कुतो वर्त्तितव्यं. (Manage) प्रणी (c. 1. -णयति -णेतुं), विधा, घट् (c. 1. घटते -टितुं), 'an easy man to deal with,' विधेयः, प्रणेयः, वश्यः, गृह्यकः, अभिगम्यः, विनेयः; 'a hard man to deal with,' दुर्धर्षः.

Dealer, *s.* (One who has to do with any thing) व्यापारी *m.* (न्), व्यवसायी *m.* (न्), व्यवहर्त्ता *m.* (र्तृ), व्यवहारी *m.* (न्), कर्म्मकारी *m.* (न्).—(Trader) क्रयविक्रयिकः, विपणी *m.* (न्), वाणिजिकः, प्रापणिकः, पणिकः, वणिक् *m.* (ज्), वाणिजः, विक्रयिकः, विक्रेता *m.* (तृ).

Dealing, *s.* (Practice, mode of treatment) व्यापारः, व्यवहारः, व्यवसायः, कर्म्म *n.* (न्), क्रिया, कार्य्यं, चेष्टा, विचेष्टितं, प्रवृत्तिः *f.*, विधानं, आचारः, आचरणं, चरितं, वृत्तं, कर्म्मविधिः *m.*—(Intercourse) व्यवहारः, सङ्गतिः *f.*, सङ्गः, संसर्गः.—(Traffic) क्रयविक्रयः, विपणः, पणाया, पणः, पणनं, वाणिज्यं -ज्या, वणिक्पथः, महाजनकर्म्म *n.* (न्), निगमः, सत्यानृतं.

Dealt with, *p. p.* व्यवहारितः -ता -तं, आचरितः -ता -तं, पणायितः -ता -तं.

Deambulation, *s.* बहिर्गमनं, बहिर्भ्रमणं, परिक्रमः, पर्य्यटनं, भ्रमणं, विहारः.

Dean, *s.* प्रधानधर्म्माध्यक्षाधिकारे द्वितीयपदस्थः, महापूजाशालासम्बन्धीयमठप्रधानमध्यक्षः, धर्मपुरोहिताधिपतिः *m.*—(In a college) विद्यालये विनयाध्यक्षः.

Deanery, *s.* (House of a dean) पुरोहिताधिपतेर् गृहं or वेश्म *n.* (न्) or निवासः.

Deanship, *s.* पुरोहिताधिपतेः पदं or अधिकारः or व्यापारः.

Dear, *a.* (Beloved) प्रियः -या -यं, सुप्रियः -या -यं, हृदयप्रियः -या -यं, दयितः -ता -तं, इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, प्रीतः -ता -तं, प्रेष्ठः -ष्ठा -ष्ठं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, अभीप्सितः -ता -तं, सुभगः -गा -गं,

कान्तः -न्ता -न्तं, प्रियतमः -मा -मं, इष्टतमः -मा -मं; 'a dear friend,' प्रियसुहृद् m. 'dear as one's life,' असुसमः -मा -मं, प्राणाधिकः -का -कं, प्राणेर गरीयान् यसी यः (स) —(Of high price, costly) दुर्मूल्यः -ल्या -ल्यं, बहुमूल्यः -ल्या -ल्यं, महामूल्यः -ल्या -ल्यं, महार्घः -र्घा -र्घं, दुष्क्रेयः -या -यं, बहुधनव्ययेन क्रेयः -या -यं, गुरुः -र्वी -रु, महार्हः -र्हा -र्हं, अर्घ्यः -र्घ्या -र्घ्यं, उत्कृष्टः -ष्टा -ष्टं.

DEAR, s. (Word of endearment) प्रियः -या, दयितः -ता, कान्तः -न्ता, दयितः -ता, वत्सः -त्सा; 'my dear,' प्रिय voc. c. m., प्रिये voc. c. f.

DEAR, adv. (Oh dear!) अहो, अहोबत, कष्टं, आ, हा, हन्त, अहह.

DEAR-BOUGHT, a. दुष्क्रीतः -ता -तं, बहुमूल्येन क्रीतः -ता -तं.

DEARLY, adv. (With great fondness) प्रियं, सुप्रियं, प्रीत्या, सुप्रीत्या. 'dearly beloved,' अतिप्रियः -या -यं, प्रियतमः -मा -मं. —(At a high price) बहुमूल्येन, दुर्मूल्येन, महार्घेण, गुरु, गुरुमूल्येन.

DEARNESS, s. (Fondness) प्रियता, इष्टता, अभीष्टता, प्रीतिः f.—(High price) दुर्मूल्यं, बहुमूल्यं, महार्घ्यं, महार्घता, महार्घः, मूल्यगुरुता, गुरुत्वं.

DEARTH, s. (Famine) दुर्भिक्षं, दुष्कालः, अन्नाकालं, दुर्भव्यं, नीवाकः, प्रयामः, उपद्रवः, 'dearth of provisions,' आहारविरहः —(Want, need) अभावः, अप्राप्तिः f., विरहः, असम्भवः, दौर्लभ्यं, वैरल्यं, 'dearth of money,' धनाभावः.

To DEARTICULATE, v. a. विसन्धीकृ, सन्धिमोटनं कृ, खण्डीकृ.

DEARTICULATED, p. p. विसन्धितः -ता -तं, त्रुटितसन्धिः -न्धिः -न्धि.

DEATH, s. मृत्युः m., मरणं, निधनं, पञ्चत्वं -ता, अत्ययः, अन्तः, अन्तकालः, अन्तकः, अपगमः, नाशः, विनाशः, प्रलयः, संस्थानं, संस्थितिः f., अवसानं, निःसरणं, उपरतिः f., अपायः, प्रयाणं, जीवनत्यागः, तनुत्यागः, जीवोत्सर्गः, देहक्षयः, प्राणवियोगः, मृतं, मृतिः f., मरिमा m. (न्), महानिद्रा, दीर्घनिद्रा, कालः, कालधर्म्मः, कालदण्डः, कालान्तकः, नरान्तकः, दिष्टान्तः, व्यापद् f., हान्दं, कथाशेषता, कीर्त्तिशेषः, लोकान्तरप्राप्तिः f. —(Murder) वधः, घातः, मारणं.—(Death personified) यमः, कालः, कृतान्तः, 'a violent death,' अपघातः, अपमृत्युः m., 'death by lightning,' वज्रवधः, 'deserving of death,' वध्यः -ध्या -ध्यं, वधार्हः -र्हा -र्हं or प्रमापणार्हः, 'desire for death,' मुमूर्षा, 'desirous of death,' मुमूर्षुः -र्षुः -र्षु, 'at the point of death,' आसन्नमृत्युः, मुमूर्षुः, मृतप्रायः, मृतकल्पः, 'fearing death,' विवशः -शा -शं, अरिष्टदुष्टधीः -धीः -धि, 'put to death,' हतः -ता -तं, व्यापादितः -ता -तं, मारितः -ता -तं, 'to put to death,' हन् (c. 2. हन्ति -न्तुं), प्राणदण्डं कृ, 'angel of death,' यमदूतः, 'death-drum,' वध्यडिण्डिमः, 'hour of death,' मृत्युकालः, प्रयाणकालः, 'voluntary death by fasting,' प्रायः -यं, 'after death,' प्रेत्य.

DEATH-BED, s. मृत्युशय्या, मरणशय्या, मृत्युशयनं, मुमूर्षुशयनं.

DEATHFUL, a. मारात्मकः -का -कं, प्राणान्तिकः -की -कं, मृत्युमयः -यी -यं, मृत्युजनकः -का -कं, प्राणान्तकः -का -कं, अन्तकरः -री -रं, घातुकः -का -कं.

DEATHLESS, a. अमरः -री -रं, मृत्युवर्जितः -ता -तं, अमरणीयः -या -यं, अमर्त्यः -र्त्या -र्त्यं, अनन्तः -न्ता -न्तं, निरपायः -या -यं, अनश्वरः -रा -रं.

DEATHLIKE, a. मृत्युसदृशः -शी -शं or कालसदृशः, कालकल्पः -ल्पा -ल्पं.

DEATH'S-DOOR, s. मृत्युद्वारं, यमद्वारं, यमालयद्वारं, यमपुरद्वारं.

DEATH'S-HEAD, s. शवशिरः n. (स्), मृतशरीरमस्तकः, कुणपमस्तकः, कपालः, नृकपालः.

DEATH'S-MAN, s. वध्यपुरुषः, घातुकपुरुषः, वधकर्म्माधिकारी m. (न्), दण्डपाशिकः, मृतपाः m. (पा), घातकजनः.

DEATH-WATCH, s. मरणसूचकशब्दकारी कीटविशेषः.

To DEAURATE, v. a. रस (c. 10. रसयति -यितुं), सुवर्ण (nom. सुवर्णयति -यितुं).

DEAURATE, a. रसितः -ता -तं, सुवर्णान्वितः -ता -तं, सुवर्णबद्धः -द्धा -द्धं.

To DEBAR, v. a. बाध् (c. 1. बाधते -धितुं), निरस् (c. 4. -अस्यति -असितुं), निराकृ, अपाकृ, बहिष्कृ, वृज् in caus. (वर्जयति -यितुं), निषिध् (c. 1. -षेधति -षेद्धुं), वृ in caus. (वारयति -यितुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं); 'is debarred,' परिहीयते.

DEBARRED, p. p. निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, बाधितः -ता -तं, निवारितः -ता -तं, विघ्नितः -ता -तं, रुद्धः -द्धा -द्धं.

To DEBARK, v. a. उत्तृ (c. 1. -तरति -रितुं -रीतुं), प्रप्लु, नौकाया अवरुह् (c. 1. -रोहति -रोढुं) or अवतृ.

DEBARKATION, s. उत्तरणं, प्रप्लुतरणं, नौकाया अवतरणं or अवरोहणं.

To DEBASE, v. a. अपकृष् (c. 1. -कर्षति -क्रष्टुं), अपदात् पत् in caus. (पातयति -यितुं) or भ्रंश् in caus. (भ्रंशयति -यितुं) or अपध्वंस् in caus. (-ध्वंसयति -यितुं) or च्यु in caus. (-च्यावयति -यितुं), अवसद् in caus. (-सादयति -यितुं), न्यूनीकृ, अधःकृ, कन (nom. कनयति -यितुं). —(Make despicable) अवमानास्पदं कृ, अलीकृ, लघूकृ, तुच्छीकृ.

DEBASED, p. p. अपकृष्टः -ष्टा -ष्टं, स्थानभ्रष्टः -ष्टा -ष्टं, पातितः -ता -तं, अधःपातितः -ता -तं, पदच्युतः -ता -तं, अपध्वस्तः -स्ता -स्तं, अपशोपहतः -ता -तं, भग्नदर्पः -र्पा -र्पं.

DEBASEMENT, s. (Act of) अपकर्षः -र्षणं, पातनं, पदभ्रंशनं, अपध्वंसः, अभिभवः, अवमानना, लघूकरणं, अलीकरणं.—(State of) अपकृष्टता, निकृष्टता, पतितत्वं, पातित्यं, अपमानभावः, न्यूनीभावः, अधोगतिः f., अधोभावः, भ्रष्टता, वृषलत्वं.

DEBATABLE, a. विवदनीयः -या -यं, विचार्यः -र्या -र्यं, वितर्क्यः -र्क्या -र्क्यं, विचारणीयः -या -यं, सन्दिग्धः -ग्धा -ग्धं.

DEBATE, s. विवादः, वादानुवादः, वादप्रतिवादः, संवादः, विसंवादः, वादः, हेतुवादः, वादयुद्धं, विचारः, विरोधोक्तिः f., वाग्युद्धं, वाक्कलहः, विप्रलापः, विप्रतिपत्तिः f., विवक्षा, वितर्कः, तर्कः, वाक्यविरोधः, वाक्यं, जल्पः, वाक्कलिः m.—(Contest) कलहः, विग्रहः, विरोधः, कलिः m., 'matter of debate,' विवादास्पदं.

To DEBATE, v. a. and n. विवद् (c. 1. -वदति -ते -दितुं), विसंवद्, विचर् in caus. (-चारयति -यितुं), विवादास्पदीकृ, वादानुवादं कृ, वितर्क् (c. 10. -तर्कयति -यितुं), विप्रलप् (c. 1. -लपति -पितुं), वितक्ष् (c. 1. -तक्षते -क्षितुं), कलह (nom. कलहायते), वैर (nom. वैरायते), वाक्कलहं कृ, जप् (c. 1. जपति -पितुं).

DEBATED, p. p. विचारितः -ता -तं, वादग्रस्तः -स्ता -स्तं, जल्पितः -ता -तं.

DEBATEFUL, a. विवादी -दिनी -दि (न्), विवादशीलः -ला -लं, विवादशील विनी -वि (न्), कलहकारी -रिणी -रि (न्), वाक्कलहप्रियः -या -यं, वाग्युद्धप्रियः -या -यं, वाक्कलिप्रियः -या -यं, कलहप्रियः -या -यं, विरोधी -धिनी -धि (न्).

DEBATER, s. विवादी m. (न्), विचारकः, विवादकृत्, तर्की m. (न्), वादी m. (न्), हेतुवादी, वितण्डावादी m. (न्), न्यायी m. (न्), सांवादिकः.

To DEBAUCH, v. a. दुष् in caus. (दूषयति -यितुं), अपप्लु, परिप्लु, दुर्वृत्तीकृ; अष्टीकृ, भ्रष्टीकृ; नश् in caus. (नाशयति -यितुं); कुमार्गं नी -नेतुं कृ; धर्म्मभ्रष्टं -ष्टां -ष्टं कृ, धर्म्मच्युतं -तां -तं कृ, धिक्; 'to debauch a maiden,' कन्यां दुष् or धृष् in caus. (धर्षयति -यितुं), कन्याभङ्गं कृ.

DEBAUCH, s. मद्यसेवा, कामसेवा, व्यसनसेवा, अनीतिः f., दुर्नीतिः f., मद्योत्सवं, केलिः m. f., अतिमात्रमद्यपानभोजनादि उत्सवः.

DEBAUCHED, p. p. दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं; 'woman,' दूषिता, भ्रष्टयोनिः.

DEBAUCHEE, s. व्यसनी m. (न्), व्यसनीयः, लम्पटः, विषयी m. (न्), कामी m. (न्), विषयासक्तः, विषयानुरागी m. (न्), कामासक्तः,

भोगासक्तः, दुराचारः, सन्मार्गेतरतः, पानरतः, मागदः, विटः.

Debaucher, s. दूषकः, भूषकः, दूषयिता m. (तृ), भ्रंशकारी m. (न्), नाशकः.

Debauchery, s. लम्पटता, लाम्पट्यं, व्यसनं -निता, इन्द्रियासंयमः, विषयित्वं, विषयासक्तत्वं, अनवस्थितिः f., धर्म्मापेतत्वं, कामासक्तिः f., भोगासक्तिः f., दुष्कर्म्म n. (न्).

Debauchment, s. दूषणं, प्रतिदूषणं, भ्रष्टीकरणं, नाशनं.

To debilitate, v. a. युद्धे पराजि (c. 1. -जयति -जेतुं), दम् (c. 10. दमयति -यितुं).

Debenture, s. प्रतिज्ञापत्रकं, लेख्यप्रसङ्गः, लेख्यपत्रं, पत्रलेख्यं, ऋणशोधनप्रतिज्ञापत्रं, ऋणमार्गणपत्रं.

Debile, a. दुर्बलः -ला -लं, अल्पबलः -ला -लं, अल्पशक्तिः -क्तिः -क्ति, शिथिलबलः -ला -लं, शिथिलशक्तिः -क्तिः -क्ति, शिथिलः -ला -लं, अल्पवीर्य्यः -र्य्या -र्य्यं, अल्पतेजाः -जाः -जः (स्), अल्पसत्त्वः -त्त्वा -त्त्वं, तनुः -नुः -नु, क्षीणशक्तिः -क्तिः -क्ति, म्लानः -ना -नं, कृशः -शा -शं, विगततेजाः -जाः -जः (स्), अवसन्नः -न्ना -न्नं, क्षामः -मा -मं, क्लीबः -बा -बं, क्षीणशक्तिः -क्तिः -क्ति.

To debilitate, v. a. दुर्बलीकृ, शिथिलीकृ, अल्पबलीकृ, म्लानीकृ, क्षामीकृ, क्षीणीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं), क्लीब् in caus. (क्लीबयति -यितुं), कृश (nom. कृशयति -यितुं), क्षीणं -णां णं कृ.

Debilitation, s. दुर्बलीकरणं, शिथिलीकरणं, क्षीणीकरणं, तेजोहरणं, म्लानीकरणं.

Debility, s. दौर्बल्यं, बलशैथिल्यं, शिथिलता, शक्तिशैथिल्यं, क्षीणशक्तित्वं, ग्लानिः f., म्लानिः f., अवसादः, अवसन्नता, विस्रंसः -सा, तेजोहीनता, अतेजः n. (स्), वीर्य्यहानिः f., क्षामता, क्लैब्यं, कार्श्यं, सत्त्वहानिः f., मान्द्यं.

To debit, v. a. ऋणकर्त्तुः or क्रेतुः or द्रव्यग्रहीतुर् नाम पुस्तके समारुह् in caus. (-रोपयति -यितुं).

Debonair, a. सभ्यः -भ्या -भ्यं, सुशीलः -ला -लं, मृदुशीलः -ला -लं, शिष्टः -ष्टा -ष्टं, कोमलस्वभावः -वा -वं, प्रियवादी -दिनी -दि (न्), अग्राम्यः -म्या -म्यं.

Debonairly, adv. सुशीलवत्, सभ्यवत्, मृदु, सुविनीतं, साधुजनवत्.

Debt, s. ऋणं, भारः -रता, उद्धारः, प्रामीत्यं, प्रामीत्यं, अपमित्यकं, पर्य्युदञ्चनं; 'in debt,' ऋणी -णिनी -णि (न्), ऋणवान् -वती -वत् (त्), ऋणग्रस्तः -स्ता -स्तं; 'out of debt, free from debt,' अनृणः -णा -णं, अनृणी -णिनी -णि (न्) or अनृणी; 'to run into debt,' ऋणं कृ or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं); 'to pay a debt,' ऋणं दा or शुध् in caus. (शोधयति -यितुं), आनृण्यं गम् (c. 1. गच्छति, गन्तुं); 'payment or discharge of a debt,' ऋणदानं, ऋणमुक्तिः f., ऋणमोक्षः, ऋणशोधनं, ऋणापनयनं, ऋणापाकरणं, ऋणापनोदनं, आनृण्यं; 'recovery of a debt,' ऋणादानं, ऋणोद्ग्रहणं; 'a debt at gambling,' ग्लहः.

Debtor, s. अधमर्णः -र्णी m. (न्) -र्णिकः, ऋणी m. (न्), ऋणिकः, ऋणवान् m. (त्), ऋणकर्त्ता m. (र्त्तृ), धारणकः, धारकः, ऋणग्रस्तः.

Decacuminated, a. छिन्नाग्रभागः -गा -गं, छिन्नमस्तकः -का -कं, कबन्धः.

Decade, s. दशकः -कं, दशत्वं, दशता; 'decade of years,' दशवर्षं.

Decadency, s. अपचयः, अवसादः, सादः, विस्रंसा, क्षयः, ध्वंसः, भ्रंशः.

Decagon, s. दशकोणः -णं, दशभुजः, दशाङ्गं -ङ्गी, दशकोणा मूर्त्तिः f.

Decalogue, s. ईश्वरोक्ता दशाज्ञाः m. pl. or दशनिदेशाः m. pl., दशविधानं.

To decamp, v. n. कटकसन्निवेशनात् प्रया (c. 2. -याति -तुं) or प्रस्था (c. 1. -तिष्ठति -स्थातुं) or यात्रां कृ, कटकं त्यक्त्वा स्थानान्तरे निविश् (c. 6. -विशति -वेष्टुं), शिबिरं or अभिद्रवं त्यज् (c. 1. त्यजति, त्यक्तुं).—(Move off) अपक्रम् (c. 1. -क्रामति -क्रमितुं), अपसृप् (c. 1. -सर्पति -सर्प्तुं), पलाय् (c. 1. पलायते -यितुं), निष्पत् (c 1. -पतति -तितुं), वह् (c. 1. वहति -हितुं).

Decampment, s. कटकसन्निवेशनात् प्रयाणं or प्रस्थानं or प्रगमनं or प्रस्थितिः f. or यात्राकरणं, कटकत्यागः, अपसरणं, अपसर्पणं, पलायनं, अपगमः, व्यपगमः.

To decant, v. a. महाभाजनम् ईषदवनाम्य मलं विमलपात्रे शनैः शनैः सृज् in caus. (-सर्जयति -यितुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or निविश् in caus. (-वेशयति -यितुं) यथा भाजनाधःस्थं मलं नोद्विगच्छति.

Decantation, s. यथोक्तं काचपात्रे or काचकूप्यां मद्यसावणं.

Decanter, s. काचकूपी, काचपात्रं, कूपी, कुतूः f., काचभाजनं, पुटग्रीवः.

To decapitate, v. a. विमस्तक (nom. विमस्तकयति -यितुं), शिरः or मस्तकं छिद् (c. 7. छिनत्ति, छेत्तुं) or कृत् (c. 6. कृन्तति, कर्त्तितुं).

Decapitated, p. p. छिन्नमस्तकः -का -कं, छिन्नशिराः -राः -रः (स्) or कर्त्तितशिराः, विमस्तकितः -ता -तं, कबन्धः.

Decapitation, s मस्तकच्छेदनं, शिरश्छेदः, शीर्षच्छेदः, शिरःकर्त्तनं, कबन्धता; 'meriting it,' शीर्षच्छेद्यः -द्या -द्यं, वध्यः -ध्या -ध्यं.

To decay, v. n. क्षि in pass. (क्षीयते), सद् (c. 1. सीदति, सत्तुं), अवसद्, व्यवसद्; ग्लै (c. 1. ग्लायति, ग्लातुं), जॄ (c. 4. जीर्य्यति, जरितुं -रीतुं), विशॄ in pass. (-शीर्य्यते), नश् (c. 4. नश्यति, नशितुं), विनश्, प्रणश्; ध्वंस् (c 1 ध्वंसते -सितुं), विध्वंस्, प्रली (c. 4. लीयते -लेतुं -लातुं), शद् (c. 6. शीयते, शत्तुं), क्षै (c. 1. क्षायति, क्षातुं), ह्रस् (c. 1. ह्रसति -सितुं), स्रंस् (c. 1. स्रंसते -सितुं), विस्रंस्, गल् (c. 1. गलति लितुं), म्लै (c. 1. म्लायति, म्लातुं).

To decay, v. a. क्षि in caus. (क्षययति, क्षपयति -यितुं), अवसद् in caus. (-सादयति -यितुं), नश् in caus. (नाशयति -यितुं), ध्वंस् in caus. (ध्वंसयति -यितुं), ह्रस् in caus. (ह्रासयति -यितुं), विशीर्णीकृ, म्लानीकृ.

Decay, s. क्षयः, क्षिया, क्षीणता, परिक्षयः, संक्षयः, सादः, अवसादः, अवसन्नता, जीर्णिः f., जीर्णता त्वं, जरठः, शीर्णता, विशीर्णता, ग्लानिः f., प्रलयः, नाशः, विनाशः, प्रणाशः, ध्वंसः, विध्वंसः, विस्रंसः, म्लानिः f., हानिः f., ह्रासः, अपचयः, व्ययः, क्षामता, न्नकर्म; 'of the teeth,' दन्तव्यसनं, कृमिदन्तकः.

Decayed, p. p. क्षीणः णा -णं, जीर्णः -र्णा -र्णं, जीर्णवान् -वती -वत् (त्), शीर्णः -र्णा -र्णं, विशीर्णः -र्णा -र्णं, म्लानः -ना -नं, नष्टः -ष्टा -ष्टं, गलितः -ता -तं, विगलितः -ता -तं, प्रलीनः -ना -नं, ध्वस्तः -स्ता -स्तं, क्षामः -मा -मं, विस्रस्तः -स्ता -स्तं, सन्नः -न्ना -न्नं, अवसन्नः -न्ना -न्नं, दीनः -ना -नं, हीनः -ना -नं.

Decaying, a. क्षयी -यिणी -यि (न्), क्षयिष्णुः -ष्णुः -ष्णु, क्षीयमाणः -णा -णं, विशीर्य्यमाणः -णा -णं, परिजीर्य्यन् -र्य्यन्ती -र्य्यत् (त्).

Decease, s. मरणं, अपगमः, संस्थानं, अत्ययः, प्रयाणं, निःसरणं, अपायः, जीवनत्यागः, तनुत्यागः, जीवोत्सर्गः.

To decease, v. n. मृ (c. 6. म्रियते, मर्त्तुं), प्रे (c. 2. एति -तुं, with प्र, प्रैति), देहं or जीवनं त्यज् (c. 1. त्यजति, त्यक्तुं) or उत्सृज् (c. 6. -सृजति -स्रष्टुं).

Deceased, p. p. मृतः -ता -तं, प्रेतः -ता -तं, प्रेतीभूतः -ता -तं, अतीतः -ता -तं, व्यतीतः -ता -तं, संस्थितः -ता -तं, विपन्नः -न्ना -न्नं, प्रमीतः -ता -तं.

Deceit, s. कपटः -टं, छलं -लना, वञ्चनं -ना, प्रवञ्चना, व्याजः, कैतवं, माया, कूटः -टं; कौटं, छद्म n. (न्), दम्भः, प्रलम्भः, विप्रलम्भः, अतिसन्धानं, अभिसन्धिः m. -न्धानं, प्रपञ्चः, प्रतारणं -णा, कुहकः, उपधिः m., व्याकृतिः f., दशाजिनं, संधत् n., कैतव n., निकृतिका.

Deceitful, a. कपटी -टिनी -टि (न्), कापटिकः -की -कं, छली -लिनी -लि (न्), छलप्रायरः -रा -रं, वञ्चकः -का -कं, वञ्चनः -ना -नं, प्रवञ्चकः -का -कं, मायी -यिनी -यि (न्), द्रोही -हिनी -हि (न्), मायान्वितः -ता -तं, कौटिकः -की -कं, प्रतारकः -का -कं, वाञ्चिकः -की -कं, दाम्भिकः

-री -कं, प्रलम्भकः -का -कं, विप्रलम्भकः -का -कं, कूटकपटः -टा -टं, सव्याजः -जा -जं, विपश्चिकुः -कुः -कु, विजिह्मः -ह्मा -ह्मं, उपधिकः -का -कं, दाम्भिकः -की -कं, नकिलः -ला -लं, वञ्चनशीलः -ला -लं, शठः -ठा -ठं, भ्रान्तिजनकः -का -कं.

Deceitfully, *adv.* सकपटं, सव्याजं, सकैतवं, छलेन, समायं, मायया, प्रलम्भात्, विप्रलम्भेन, दम्भात्, वञ्चनार्थं, धूर्त्तवत्, कितववत्, सकूटं.

Deceitfulness, *s.* कपटता, कापट्यं, कूटता, वञ्चकत्वं, शठता, सव्याजता.

Deceivable, *a.* वञ्चनीयः -या -यं, प्रतारणीयः -या -यं, मोहनीयः -या -यं.

To **deceive,** *v. a.* वञ्च् in caus. (वञ्चयते -ति -यितुं), परिवञ्च्, प्रवञ्च्; प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्; छल् (c. 10. छलयति -यितुं), प्रतॄ in caus. (-तारयति -यितुं), मुह् in caus. (मोहयति -यितुं), भ्रम् in caus. (भ्रमयति -यितुं), भ्रान्तिं जन् in caus. (जनयति -यितुं), प्रलुभ् in caus. (-लोभयति -यितुं), अतिसन्धा (c. 3. -दधाति -धातुं), अभिसन्धा, विनिकृ, क्षिप् (c. 6. क्षिपति, क्षेप्तुं), दम्भ् (c. 5. दभ्नोति, दम्भितुं).

Deceived, *p. p.* वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं, प्रवञ्चितः -ता -तं, मोहितः -ता -तं, विमोहितः -ता -तं, अतिसंहितः -ता -तं, प्रलोभितः -ता -तं, विलोभितः -ता -तं.

Deceiver, *s.* वञ्चकः, प्रतारकः, प्रवञ्चकः, विप्रलम्भकः, कपटी *m.* (न्), मायी *m.* (न्), दम्भी *m.* (न्), दम्भकः, कितवः, कूटकारः, कुहकः, मारकीटः, दाम्भिकः.

December, *s.* आग्रहायणः -णिकः, अग्रहायणः, मार्गशीर्षः, मार्गशिरः, मार्गः -र्गकः, मृगः, सहाः *m.* (स्), शोभनमासः, पौषः, सहस्यः, तैषः, वत्सरस्य द्वादशमासः or शेषमासः.

Decempedal, *a.* दशपादपरिमाणः -णा -णं.

Decemvirate, *s.* [illegible] अधिकारः or आधिपत्यं.

Decemviri, *s.* पूर्व्वकाले रोमीयदेशाधिष्ठातारो दशजनाः *m. pl.*, राज्यधुर्य्या दशाधिकारः *m. pl.*

Decence, decency, *s.* विनयः, विनीतत्वं -ता, मर्य्यादा, लज्जा, अनतिक्रमः, इतिकर्त्तव्यता, युक्तिः *f.*, उपपत्तिः *f.*, सामञ्जस्यं, याथातथ्यं, उपयुक्तता, याथार्थ्यं, औचित्यं, शिष्टता, संस्था, स्थितिः *f.*, अभेदः, अभ्रंशः, शालीनत्वं, शिष्टाचारानुसारः.

Decennial, *a.* दशवर्षीयः -या -यं, दशवर्षीणः -णा -णं, दशवत्सरी -रिणी -रि (न्), दशवार्षिकः -की -कं, दशाब्दिकः -की -कं, दशवर्षस्थायी -यिनी -यि (न्), दशवत्सरवर्त्ती -र्त्तिनी -र्त्ति (न्).

Decent, *a.* विनीतः -ता -तं, विनयवान् -वती -वत् (त्), विनयोपेतः -ता -तं, अनतिक्रान्तमर्य्यादः -दा -दं, इतिकर्त्तव्यः -व्या -व्यं, सविनयः -या -यं, समर्य्यादः -दा -दं, सलज्जः -ज्जा -ज्जं, लज्जान्वितः -ता -तं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उचितः -ता -तं, समुचितः -ता -तं, सभ्यः -भ्या -भ्यं, उपपन्नः -न्ना -न्नं, शिष्टाचारानुसारी -रिणी -रि (न्), शिष्टः -ष्टा -ष्टं.

Decently, *adv.* सविनयं, विनीतवत्, विनयतस्, विनयात्, समर्य्यादं, युक्तं, उपयुक्तं, यथोचितं, समुचितं, सलज्जं, शिष्टाचारानुसारात्, लज्जापूर्व्वं.

Deceptible, *a.* वञ्चनीयः -या -यं, प्रतारणीयः -या -यं, प्रलभ्यः -भ्या -भ्यं.

Deception, *s.* वञ्चनं -ना, प्रवञ्चना, छलना, प्रतारणं -णा, प्रलम्भः, विप्रलम्भः, कपटः -टं, छलं, व्याजः, माया, छद्म *n.* (न्), दम्भः, कूटः -टं.

Deceptious, deceptive, *a.* मायी -यिनी -यि (न्), मोही -हिनी -हि (न्), वञ्चकः -का -कं, भ्रान्तिजनकः -का -कं, ऐन्द्रजालिकः -की -कं, भिक्षुः -क्षुः -क्षु. *See* **Deceitful.**

Decerpt, *a.* अवच्छिन्नः -न्ना -न्नं, अपकर्षितः -ता -तं, अवलूनः -ना -नं.

Decerptible, *a.* अवच्छेद्यः -द्या -द्यं, अपकर्षणीयः -या -यं, लाव्यः -व्या -व्यं.

Decerption, *s.* अवच्छेदः -दनं, अपकर्षणं, अवचयः, अवलूनिः *f.*, लावः.

Decession, *s.* अपगमः, अपगमः, गमनं, अपासरणं, विगमः, अपायः.

To **decharm,** *v. a.* मन्त्रं or अभिचारं प्रतिकृ, विमन्त्र् (c. 10. विमन्त्रयति -यितुं).

To **decide,** *v. a.* and *n.* निश्चि (c. 5. -चिनोति -चेतुं), निर्णी (c. 1. -णयति -णेतुं), व्यवसो (c. 4. -स्यति -सातुं), व्यवस्था in caus. (-स्थापयति -यितुं), साध् in caus. (साधयति -यितुं), सिद्धीकृ, निष्पद् in caus. (-पादयति -यितुं), निष्पत्तिं कृ, निश्चयं कृ, निर्णयं कृ, तीर् (c. 10. तीरयति -यितुं), विचर् in caus. (-चारयति -यितुं).

Decided, *p. p.* निश्चितः -ता -तं, निर्णीतः -ता -तं, सिद्धः -द्धा -द्धं, निष्पन्नः -न्ना -न्नं, व्यवसितः -ता -तं, नियतः -ता -तं, व्यवस्थापितः -ता -तं, व्यवस्थितः -ता -तं, तीरितः -ता -तं, विचारितः -ता -तं.

Decidence, *s.* पतनशीलत्वं, पातः, अवपातः, निपातः, पतनं, विध्वंसः.

Decider, *s.* निर्णेता *m.* (तृ), निश्चायकः, निश्चयकारी *m.* (न्), निर्णयकृत्, विचारकर्त्ता *m.* (र्त्तृ), प्रमाणपुरुषः, मध्यस्थः, निष्पत्तिकारकः.

Deciduous, *a.* पतयालुः -लुः -लु, पातुकः -का -कं, पतनशीलः -ला -लं, क्षयी -यिणी -यि (न्), एकवर्षस्थायी -यिनी -यि (न्) or अचिरस्थायी or अस्थायी, विध्वंसी -सिनी -सि (न्); 'an annual plant,' ओषधिः *f.* -धी.

Decimal, *a.* दशकः -का -कं, दशगुणितः -ता -तं, दशसंख्यकः -का -कं.

To **decimate,** *v. a.* (Take the tenth) दशभागं or दशमभागं or दशमांशं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or हृ (c. 1. हरति, हर्त्तुं).—(Select by lot every tenth soldier for punishment) गुटिकापातपूर्व्वं सर्व्वसैन्यमध्याद् दशमं दशमं सैनिकं यथार्थम् ह्रृ (c. 1. -हरति -हर्त्तुं).

Decimation, *s.* दशमभागग्रहणं, दशमांशहरणं, यथोक्तं सर्व्वसैन्यमध्याद् दशके दशके एकसैनिकोद्धारः.

To **decipher,** *v. a.* (Explain occult characters) गूढाक्षराणि or बीजाक्षराणि व्याख्या (c. 2. -ख्याति -तुं) or व्याकृ or व्याहृ (c. 1. -हरति -हर्त्तुं) or व्याचक्ष् (c. 2. -चष्टे) or प्रकाश् in caus. (-काशयति -यितुं) or स्पष्टीकृ or परिशुध् in caus. (-शोधयति -यितुं), स्पष्ट (nom. स्पष्टयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).

Decipherer, *s.* व्याख्याता *m.* (तृ), स्पष्टीकर्त्ता *m.* (र्त्तृ), विवरणकृत्, निरूपकः.

Deciphering, *s.* व्याख्यानं, व्याकरणं, विवृतिः *f.*, स्पष्टीकरणं, निरूपणं.

Decision, *s.* निश्चयः, निर्णयः -यनं, निश्चितं, निष्पत्तिः *f.*, सिद्धिः *f.*, व्यवसायः, व्यवस्थितिः *f.*, व्यवस्थापनं, सम्प्रधारणा, तीरणं, तीरितं.

Decisive, decisory, *a.* निश्चायकः -का -कं, निर्णायकः -का -कं, निर्णयकः -का -कं, निष्पत्तिकारकः -का -कं, साधकः -का -कं, सिद्धिकारकः -का -कं, प्रमाणीकारकः -का -कं, विचारकः -का -कं, सिद्धिकः -का -कं, निष्पादकः -का -कं.

Decisively, *adv.* निश्चितं, सुनिश्चितं, सनिश्चयं, निर्णयपूर्व्वं, सनिर्णयं.

Decisiveness, *s.* निश्चायकत्वं, निर्णायकत्वं, साधकत्वं, विचारकत्वं, निष्पादकता.

To **deck,** *v. a.* (Cover) छद् (c. 10. छादयति -ते -यितुं), आच्छद्, आस्तॄ (c. 9. -स्तृणाति -स्तरितुं -रीतुं); 'to deck a ship,' नौकां [illegible] आस्तॄ.—(Adorn) भूष् (c. 1. भूषति -षितुं, c. 10. भूषयति -यितुं), विभूष्, परिभूष्; शुभ् in caus. (शोभयति -यितुं), अलङ्कृ, समलङ्कृ, परिष्कृ, मण्ड् (c. 10. मण्डयति -यितुं).

Deck, *s.* (Of a ship) नौकापृष्ठं, नौपृष्ठं, नौकाच्छदः, नौकातलं, नौतलं, नौकातलं.—(Pack of cards) [illegible] *f.*

Decked, *p. p.* भूषितः -ता -तं, अलङ्कृतः -ता -तं, शोभितः -ता -तं.

To **declaim,** *v. n.* [illegible] वाक्यं वद् (c. 1. [illegible] -दितुं), [illegible] or [illegible] वाक्यं ब्रू (c. 2. ब्रवीति, वक्तुं), [illegible] (c. 10. [illegible]); 'to declaim

against,' समाक्षालङ्कारम् अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Declamation, *s.* विस्मयोत्पादनार्थं वाक्यं, इन्द्रियमोहनार्थं वाक्यं, अलङ्कारमयं वाक्यं, रसिकवाक्यं, वर्णनवाक्यं, भारती, करुणावाक्यं, वक्तृत्वं, शब्दचातुर्य्यं, सुप्रलापः, सारस्वतवाक्यं.

Declamator, declaimer, *s.* वक्ता *m.* (क्तृ), वाक्पटुः *m.*, वागीशः, वाग्विदग्धः, प्रवचनपटुः *m.*, वर्णनकृत्, वाक्यङ्कारेण विस्मयोत्पादकः or इन्द्रियमोहकः.

Declamatory, *a.* वागलङ्कारमयः -यी -यं, वाङ्मयः -यी -यं.—(Appealing to the passions) विस्मयोत्पादकः -का -कं, इन्द्रियमोहकः -का -कं.

Declarable, *a.* आख्येयः -या -यं, अभिधेयः -या -यं.—(Capable of proof) साध्यः -ध्या -ध्यं, सूच्यः -च्या -च्यं, प्रमेयः -या -यं.

Declaration, *s.* आख्यानं, ख्यापनं, निवेदनं, आवेदनं, ज्ञापनं, विज्ञापनं, विज्ञप्तिः *f.*, बोधनं, अभिधानं, अभिहितत्वं, प्रवचनं, वचनं, वादः, कथनं, कीर्त्तनं, अनुकीर्त्तनं, प्रकीर्त्तनं, प्रकाशनं, घोषणा, प्रतिज्ञा; 'repeated declaration,' वचनशतं; 'declaration of war,' प्रत्युत्क्रमः -मणं, प्रत्युत्क्रान्तिः *f.*

Declarative, declaratory, *a.* ख्यापकः -का -कं, ज्ञापकः -का -कं, विज्ञापकः -का -कं, बोधकः -का -कं, आवेदकः -का -कं, निवेदकः -का -कं, वाचकः -का -कं, अभिधायकः -का -कं, प्रकाशकः -का -कं, कथकः -का -कं.

Declaratorily, *adv.* प्रवचनपूर्व्वं, निवेदनपूर्व्वं, व्यक्तं, सुव्यक्तं.

To **declare**, *v. a.* (Tell, make known) आख्या (c. 2. -ख्याति -तुं), समाख्या; ख्या in caus. (ख्यापयति -यितुं), ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा, विद् in caus. (वेदयति -यितुं), निविद्, आविद्, समाविद्, विनिविद्; कथ् (c. 10. कथयति -यितुं), वद् (c. 1. वदति -दितुं), प्रवच् (c. 2. -वक्ति -क्तुं), अभिधा (c. 3. -दधाति -धातुं), सूच् (c. 10. सूचयति -यितुं).—(Proclaim) प्रख्या in caus., कृत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्, परिकृत्, अनुकृत्, घुष् in caus. (घोषयति -यितुं), विघुष्, आघुष्, उच्चर् in caus. (-चारयति -यितुं), प्रकाश् in caus. (-काशयति -यितुं), प्रकटीकृ, व्यक्तीकृ.

To **declare**, *v. n.* निवेदनं कृ, मतं or अभिप्रायं or सङ्कल्पं ज्ञा in caus. (ज्ञापयति -यितुं), साक्ष्यं or प्रमाणं दा, स्वीकृ.

Declared, *p.p* ख्यातः -ता -तं, आख्यातः -ता -तं, प्रोक्तः -क्ता -क्तं, उक्तः -क्ता -क्तं, आवेदितः -ता -तं, निवेदितः -ता -तं, कथितः -ता -तं, सूचितः -ता -तं, ज्ञापितः -ता -तं, विज्ञप्तः -प्ता -प्तं, अभिहितः -ता -तं, कीर्त्तितः -ता -तं, प्रकीर्त्तितः -ता -तं, परिकीर्त्तितः -ता -तं, विघुष्टः -ष्टा -ष्टं, आघोषितः -ता -तं, उच्चारितः -ता -तं, उदितः -ता -तं, प्रकाशितः -ता -तं, विज्ञापितः -ता -तं, व्यवसितः -ता -तं.

Declension, *s.* (Falling off) भ्रंशः, ध्वंसः, विध्वंसः, सादः, क्षयः, च्युतिः *f.*—(Inflexion of nouns) विभक्तिः *f.*, रूपं, रूपकरणं, शब्दविकारः, पदसाधनं, शब्दाख्यानं.

Declinable, *a.* वाच्यः -च्या -च्यं, विकारी -रिणी -रि, आख्येयः -या -यं.

Declination, *s.* (Falling off, decay, descent) च्युतिः *f.*, भ्रंशः, क्षयः, अवसादः, विध्वंसा, अवपातः, अवतारः, अधोगतिः *f.*, अवनतिः *f.*—(Obliquity) वक्रता.—(Deviation) उत्क्रमः, भेदः, विक्रिया.—(In astronomy) क्रान्तिः *f.*, क्रान्तः, अपमः.

Decline, *s.* क्षयः, परिक्षयः, उपक्षयः, अपक्षयः, क्षिया, भ्रंशः, सादः, अवसादः, ध्वंसः, विध्वंसः, अपचयः, ह्रासः, विशीर्णता, नाशः, अधःपतनं, अवपातः, च्युतिः *f.*, न्यूनता, अत्ययः, अस्तं, ग्लानिः *f.*, हानिः *f.*—(Consumption) देहक्षयः, क्षयरोगः, क्षयथुः *m.*, यक्ष्मकासः, राजयक्ष्मा, अपचितिः, शरीरशोषः.—(Decline of the sun, or of good fortune, &c.) अस्तः; 'decline of life,' जीवितक्षयः.

To **decline**, *v. a.* (Bend downwards) नम् in caus. (नामयति -यितुं), अवनम्; अवपीड् (c. 10. -पीडयति -यितुं), अपकृष् (c. 1. -कर्षति -क्रष्टुं), पत् in caus. (पातयति -यितुं).—(Refuse, shun) प्रत्याख्या (c. 2. -ख्याति -तुं), अनादृत्य, अतिक्रम्य, अपलप् (c. 1. -लपति -पितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपह्नु (c. 2. -ह्नुते -ह्नोतुं), निह्नु, अस्वीकृ; निरस् (c. 4. -अस्यति -असितुं), अपास्; वृज् in caus. (वर्जयति -यितुं), परिहृ (c. 1. -हरति -हर्त्तुं).—(In grammar) आख्या (c. 2. -ख्याति -तुं), रूप् (c. 10. रूपयति -यितुं), शब्दरूपं कृ.

To **decline**, *v. n.* (Lean downwards) नम् (c. 1. नमति, नन्तुं), अवनम्, आनम्, नम्रीभू; 'as the sun,' अस्तं गम् (c. 1. गच्छति, गन्तुं), लम्ब् (c. 1. लम्बते -म्बितुं); 'declining towards the south,' दक्षिणाप्रवणः -णा -णं, दक्षिणादिगवनतः -ता -तं.—(Deviate) भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), च्यु (c. 1. च्यवते, च्योतुं), विच्यु, विचल् (c. 1. -चलति -लितुं), पत् (c. 1. पतति -तितुं).—(Avoid) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, हा (c. 3. जहाति, हातुं).—(Desist from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Decay) क्षि in pass. (क्षीयते), परिक्षि, सद् (c. 6. सीदति, सत्तुं), अवसद्; भ्रंश्; ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, विस्रंस् (c. 1. -स्रंसते -सितुं), अपचि in pass. (-चीयते), ग्लै (c. 1. ग्लायति, ग्लातुं), ह्रस् (c. 1. ह्रसति -सितुं), क्षयीभू, न्यूनीभू, विशॄ in pass. (-शीर्य्यते).

Declined, *p. p.* (Refused) प्रत्याख्यातः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, अस्वीकृतः -ता -तं.—(Deviated) भ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, पतितः -ता -तं.—(Decayed) क्षीणः -णा -णं, सन्नः -न्ना -न्नं, अवसन्नः -न्ना -न्नं, ग्लानः -ना -नं, अस्तगतः -ता -तं, अपचितः -ता -तं, विशीर्णः -र्णा -र्णं.—(Inflected) आख्यातः -ता -तं.

Declivity, *s.* पातुकः, पातुकभूमिः *f.*, प्रवणभूमिः, प्रवः, उत्सङ्गः, निम्नता.

Declivous, *a.* क्रमशः पातुकः -की -कं or प्रवणः -णा -णं.

To **decoct**, *v. a.* क्वथ् (c. 1. क्वथति -थितुं), निष्क्वथ्; पच् (c. 1. पचति, पक्तुं), निष्पच्.

Decocted, *p. p.* निष्पक्वः -क्वा -क्वं, क्वथितः -ता -तं, निष्क्वथितः -ता -तं.

Decoction, *s.* (Act of) क्वाथः, क्वथनं, निष्क्वाथः, पाचनं.—(Preparation made by decocting) निर्य्यासः, निर्यूहः, कषायः -यं, यमरसः, फाण्टं.

Decollation, *s.* शिरश्छेदनं, शीर्षच्छेदः, मस्तकच्छेदः, शीर्षघातः.

To **decompose**, *v. a.* (Analyze a compound body) समस्तद्रव्यं पृथक्कृ or व्याकृ, विली in caus. (-लाययति -लापयति -यितुं), विद्रु in caus. (-द्रावयति -यितुं), विश् in caus. (वेशयति -यितुं), उपोद्घातं कृ.

Decomposed, *p.p.* व्याकृतः -ता -तं, विद्रावितः -ता -तं, विलीनः -ना -नं.

Decomposite, *a.* (Twice compounded) द्विमिश्रितः -ता -तं, पुनर्मिश्रितः.

Decomposition, *s.* (Compounding twice) द्विमिश्रणं, पुनर्मिश्रणं.—(Resolution of parts, dissolution) उपोद्घातः, पृथक्करणं, विद्रावणं, विलयः, प्रलयः, परिक्षयः.

To **decompound**, *v. a.* (Compound a second time) पुनर् or द्विवारं मिश्र् (c. 10. मिश्रयति -यितुं) or सम्मिश्र्.—(Resolve, into parts). *See* **Decompose**.

To **decorate**, *v. a.* भूष् (c. 10. भूषयति -यितुं), विभूष्; अलङ्कृ, परिष्कृ, समलङ्कृ, संस्कृ; मण्ड् (c. 10. मण्डयति -यितुं); शुभ् in caus. (शोभयति -यितुं), उपशुभ्, परिकर्म्म (nom. परिकर्म्मयति -यितुं).

Decorated, *p. p.* भूषितः -ता -तं, विभूषितः -ता -तं, अलङ्कृतः -ता -तं, परिष्कृतः -ता -तं, संस्कृतः -ता -तं, मण्डितः -ता -तं, शोभितः -ता -तं, सालङ्कारः -रा -रं, कृतालङ्कारः -रा -रं, कृताभरणः -णा -णं, कृतशोभः

-आ -अं, सवेशः -शा -शं, रञ्जितः -ता -तं, प्रसाधितः -ता -तं.

DECORATION, s. अलङ्कारः, अलङ्क्रिया, भूषणं, विभूषणं, भरणं, आभरणं, प्रसाधनं, परिष्कारः, परिष्कृतिः f., परिकर्म्म n. (न्), प्रतिकर्म्म, संस्कारः, मण्डनं, शोभा -भनं, रञ्जनं, कल्पना, तल्पं, सज्जा, वेशः; 'stage decorations,' नेपथ्यं, आहार्य्यः.

DECORATOR, s. प्रसाधकः, भूषकः, शोभाकारी m. (न्), अलङ्कारकल्पकः.

DECOROUS, a. विनीतः -ता -तं, विनयी -यिनी -यि (न्), सविनयः -या -यं, अनतिक्रान्तः -न्ता -न्तं, अनतिक्रान्तमर्य्यादः -दा -दं, समर्य्यादः -दा -दं, शिष्टाचारानुसारी -रिणी -रि (न्), सुशीलः -ला -लं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, यथायोग्यः -ग्या -ग्यं, उचितः -ता -तं, यथोचितः -ता -तं, समञ्जसः -सा -सं.

DECOROUSLY, adv. सविनयं, समर्य्यादं, अनतिक्रान्तं, युक्तं, यथोचितं.

To DECORTICATE, v. a. त्वच (nom. त्वचयति -यितुं), निस्त्वच; निस्त्वचीकृ; निर्वल्क (nom. निर्वल्कयति -यितुं); निस्तुष (nom. निस्तुषयति -यितुं), तुषीकृ, निस्तुषीकृ; त्वक्ष् (c. 1. त्वक्षति -क्षितुं), वल्कलं or त्वचम् उत्कृष् (c. 1. -कर्षति -क्रष्टुं) or निष्कृष्.

DECORTICATION, s. निस्त्वचीकरणं, निस्तुषीकरणं, त्वक्परिपुटनं, निर्वल्कलीकरणं.

DECORUM, s. विनयः, विनीतता -त्वं, मर्य्यादा, अनतिक्रमः, शिष्टाचारानुसारः, सदाचारता, सुशीलता, सभ्यता, शिष्टता, सुरीतिः f., सुनीतिः f., सुचरित्रं, सच्चरित्रं, युक्तता, उपयुक्तत्वं, औचित्यं, न्यायः -यता.

To DECOY, v. a. छलेन or कौटेन प्रलुभ् in caus. (-लोभयति -यितुं) or आकृष् (c. 1. -कर्षति -क्रष्टुं) or प्रवञ्च् in caus. (-वञ्चयते -यितुं) or प्रतॄ in caus. (-तारयति -यितुं).—(Entrap) जाले बन्ध् (c. 9. बध्नाति, बन्धुं).

DECOYED, p. p. प्रलोभितः -ता -तं, जालबद्धः -द्धा -द्धं, पाशबद्धः -द्धा -द्धं.

DECOY-BIRD, s. आकर्षकपक्षी m. (न्), शाकुनिकैर् अन्यपक्षिप्रलोभने शिक्षितः पक्षी.

To DECREASE, v. n. क्षि in pass. (क्षीयते), परिक्षि, परिहा in pass. (-हीयते), ह्रस् (c. 1. ह्रसते -सितुं), अल्पीभू, न्यूनीभू, ऊनीभू, अवसद् (c. 6. -सीदति -सत्तुं).

To DECREASE v. a. अल्पीकृ, ह्रस् in caus. (ह्रासयति -यितुं), ऊन् (c. 10. ऊनयति -यितुं), न्यूनीकृ, कन (nom. कनयति -यितुं), लघ (nom. लघयति -यितुं), क्षि in caus. (क्षपयति -यितुं).

DECREASE, DECREMENT, s. क्षयः, क्षिया, क्षितिः f., ह्रासः, न्यूनत्वं -ता, न्यूनभावः, अवसादः, अपचयः, हानिः f.; 'of the moon,' इन्दुक्षयः.

To DECREE, v. n. व्यवस्थाद्वारेण or आज्ञापत्रद्वारेण निष्पन्नं or सिद्धं or निर्णीतं कृ, व्यवस्थां कृ, आज्ञां कृ or दा, शासनं कृ, निष्पत्तिं कृ, निश्चयं कृ.

To DECREE, v. a. व्यवस्था in caus. (-स्थापयति -यितुं), प्रणी (c. 1. -णयति -णेतुं), आज्ञा in caus. (-ज्ञापयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), समादिश्, निर्दिश्, विधा (c. 3. -दधाति -धातुं), प्रक्लृप् (c. 10. -कल्पयति -यितुं).

DECREE, s. व्यवस्था, व्यवस्थापत्रं, शासनं, शासनपत्रं, आज्ञापत्रं, राजाज्ञा, आज्ञा, विधानं, नियमः, नियोगः, निदेशः, आदेशः.

DECREED, p. p. व्यवस्थितः -ता -तं, व्यवस्थापितः -ता -तं, प्रणीतः -ता -तं, विहितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, प्रकल्पितः -ता -तं, आज्ञप्तः -प्ता -प्तं.

DECREPIT, a. जरी -रिणी -रि (न्), जीर्णः -र्णा -र्णं, जरातुरः -रा -रं, जराग्रस्तः -स्ता -स्तं, जरापरिणतः -ता -तं, जरठः -ठा -ठं, अतिवृद्धः -द्धा -द्धं.

DECREPITATION, s. भृष्टाग्निवेशितलवणस्य वह्निसम्पर्कात् स्फुटकारशब्दः.

DECREPITUDE, s. जरा, जीर्णिः f., जीर्णता, जरावस्था, जरठः, जीर्णावस्था, अतिवृद्धभावः, अतिवार्धक्यं, विस्रसा, ग्लानिः f., प्रातिका.

DECRESCENT, a. क्षयी -यिणी -यि (न्), क्षीयमाणः -णा -णं, अपचीयमानः -ना -नं,

DECRETAL, a. व्यवस्थाविषयः -या -यं, व्यवस्थापकः -का -कं, नैयमिकः -की -कं.

DECRETAL, s. (Body of laws or edicts) धर्म्मसंहिता, व्यवस्थासंग्रहः —(Collection of the pope's decrees) रोमनगरे महाधर्म्माध्यक्षप्रकाशितानां शासनपत्राणां संहिता.

DECRETORY, a. निश्चायकः -का -कं, प्रमापकः -ना -नं, निष्पादकः -का -कं.

DECRIAL, s. अपवादः, परीवादः, उपक्रोशः, उच्चैःस्वरेण कृता निन्दा.

To DECRY, v. a. अपवद् (c. 1. -वदति -दितुं), परिवद्, उच्चैःस्वरेण निन्द् (c. 1. निन्दति -न्दितुं) or अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or तिरस्कृ or दोषीकृ.

DECUMBENCE, s. शयनं, शय्यागमनं, पतनं, संवेशः, उपवेशनं.

DECUMBENT, a. शयानः -ना -नं, शयने संविष्टः -ष्टा -ष्टं, शयितः -ता -तं, निषण्णः -ण्णा -ण्णं, निलीनः -ना -नं, उपविष्टः -ष्टा -ष्टं.

DECUMBITURE, s. रोगार्त्तस्य शय्यावर्त्तनकालः, रोगावधिर् यत्पर्य्यन्तं शयने वर्त्तते रोगी.

DECUPLE, a. दशगुणः -णा -णं, दशगुणीकृतः -ता -तं, दशविधः -धा -धं.

DECURION, s. दशाध्यक्षः, दशसैन्याधिपतिः m., दशयोधनायकः.

DECURSION, s. अधःपतनं, अधोगमनं, अवतरणं, अवधावनं, अधोद्रावः.

DECURTATION, s. उच्छेदः -दनं, विच्छेदः, ह्रस्वीकरणं, संक्षेपः -पणं.

DECUSSATION, s. अन्योन्यच्छेदकरेखाव्यायामः, कोणाकोणि छेदनं.

To DEDECORATE, v. a. अकीर्त्तिं or अपयशः कृ, लाघवं -वां -वं कृ, कुख्यातिं जन् (c. 10. जनयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं).

DEDECORATION, s. अकीर्त्तिकरणं, अपयशस्करणं, कलङ्ककरणं, अपमानं.

DEDECOROUS, a. अकीर्त्तिकरः -री -रं, अयशस्यः -स्या -स्यं, कलङ्ककरः -री -रं, लज्जाकरः -री -रं, अपमानजनकः -का -कं, वाच्यः -च्या -च्यं.

To DEDICATE, v. a. (Appropriate to a sacred use) धर्म्मार्थं प्रयुज् (c. 7. -युनक्ति -योक्तुं) or विनियुज् or निर्दिश् (c. 6. -दिशति -देष्टुं), धर्म्ममुद्दिश्य दा or उत्सर्गं कृ.—(Consecrate) प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), संस्कृ, अभिसंस्कृ, प्रणी (c. 1. -णयति -णेतुं), उपक्लृप् in caus. (-कल्पयति -यितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), निविद् in caus. (-वेदयति -यितुं), सम् in caus. (-अर्पयति -यितुं), अभिमन्त्र् (c. 10. -मन्त्रयति -यितुं), सङ्कल्पं कृत्वा दा.—(Dedicate a book) उपकारकजनस्य प्रथमपत्रे नामलिखनात् सधन्यवादं ग्रन्थं सम् in caus., or निविद् in caus. or समर्पीकृ.

DEDICATED, p. p. प्रतिष्ठितः -ता -तं, सुप्रतिष्ठितः -ता -तं, विनियोजितः -ता -तं, प्रणीतः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, निर्दिष्टः -ष्टा -ष्टं, उपक्लृप्तः -प्ता -प्तं, संस्कृतः -ता -तं, अभिसंस्कृतः -ता -तं, कृतसङ्कल्पः -ल्पा -ल्पं, निवेदितः -ता -तं, समर्पितः -ता -तं.—(As a book) उपकारकजनस्य प्रथमपत्रे नामलिखनात् समर्पितः -ता -तं or निवेदितः -ता -तं, उपकारकजननामसंज्ञितः -ता -तं, समर्पीकृतः -ता -तं.

DEDICATION, s. प्रतिष्ठा, सुप्रतिष्ठा, प्रतिष्ठाकरणं, निवेदनं, समर्पणं, विनियोगः, उत्सर्गः, सङ्कल्पकरणं, संस्कारः; 'of a book,' उपकारकजनस्य प्रथमपत्रे नामलिखनाद् ग्रन्थनिवेदनं, ग्रन्थस्य निवेदनपत्रं; 'of a temple,' प्रासादप्रतिष्ठा; 'of one's person,' आत्मनिवेदनं, देहविनियोगः.

DEDICATOR, s. उपकारकजनस्य प्रथमपत्रे नाम लिखित्वा ग्रन्थनिवेदक or ग्रन्थसमर्पकः, अनुग्राहकजनद्वारा ग्रन्थप्रकाशकः, प्रतिष्ठाकारी m. (न्).

DEDICATORY, a. निवेदनपत्रलिखनविषयः -या -यं, ग्रन्थानुग्राहकानुग्राहकः -का -कं, ग्रन्थोपकारकप्रशंसाकरः -री -रं, स्तुतिमयः -यी -यं.

DEDITION, s. समर्पणं, उत्सर्जनं, प्रदानं, प्रोत्सारणं, विसर्जनं, त्यागः.

To DEDUCE, v. a. अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते), ऊह् (c. 1. ऊहते -हितुं), अपोह्; निर्णी (c. 1. -णयति -णेतुं), अवगम् (c. 1. -गच्छति -गन्तुं) अधिगम्, अपवह् (c. 1. -वहति -वोढुं).

Deduced, *p. p.* अनुमितः -ता -तं, निर्णीतः -ता -तं, अवगतः -ता -तं, समधिगतः -ता -तं, अपोढः -ढा -ढं, अपोहितः -ता -तं.

Deducement, *s.* अनुमानं, अनुमितिः *f.*, ऊहनं, निर्णयः, अपवाहः, अपोहः -हनं.

Deducible, *a.* अनुमेयः -या -यं, ऊहनीयः -या -यं, आनुमानिकः -की -कं, उपलक्ष्यः -क्ष्या -क्ष्यं, अवगम्यः -म्या -म्यं, समधिगम्यः -म्या -म्यं, यौक्तिकः -की -कं.

To deduct, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), अपकल् (c. 10. -कलयति -यितुं), ऊन् (c. 10. ऊनयति -यितुं), अवछिद् (c. 7. -छिनत्ति -छेत्तुं), पृथक्कृ.

Deducted, *p. p.* उद्धृतः -ता -तं, अपकलितः -ता -तं, अवच्छिन्नः -न्ना -न्नं; 'having a part deducted,' उद्धृतोद्धारः -रा -रं.

Deduction, *s.* (Inference, consequence) अनुमा -मानं -मितिः *f.*, ऊहनं, ऊहा, अपवाहः, अपोहः -हनं, अभ्यूहः, उपलक्षणं, युक्तिः *f.*, प्रयुक्तिः *f.*, अन्वयः, अनुषङ्गः, अनुभवः, निर्णयः, परामर्शः.—(Part deducted) उद्धारः, उद्धृतभागः.

Deductive, *a.* आनुमानिकः -की -कं, आनुषङ्गिकः -की -कं, यौक्तिकः -की -कं.

Deductively, *adv.* प्रयोगतस्, प्रयुक्तं, अनुमानतस्, अनुषङ्गेण.

Deed, *s.* (Action) कर्म्म *n.* (न्), क्रिया, कार्य्यं, कृतं, कृत्यं, कृत्या, चेष्टा, प्रवृत्तिः *f.*, विधानं.—(Exploit) चेष्टितं, विचेष्टितं, चरित्रं, अद्भुतकर्म्म *n.* (न्), आश्चर्य्यकर्म्म *n.*—(Written evidence of any legal act) लेख्यपत्रं, लेख्यप्रमाणं, लिखितं, साधनपत्रं; 'deed of conveyance,' दानपत्रं; 'deed of sale,' विक्रयपत्रं, क्रयलेख्यं; 'title-deed,' आगमः, पट्टोलिका, पांशुकूलं, कूटकीला.—(Fact) वस्तु *n.*, भूतं, अर्थः, तत्त्वं; 'indeed,' तत्त्वतस्, सत्यं, वस्तुतस्, अवश्यं, अर्थतस्, परमार्थतस्; 'in very deed,' सत्यमेव.

To deem, *v. a.* and *n.* मन् (c. 4. मन्यते, मन्तुं), विचर् in caus. (-चारयति -यितुं), सम्भू in caus. (-भावयति -यितुं), वितर्क् (c. 10. -तर्कयति -यितुं), अनुमा (c. 2. -माति -तुं), अवगम् (c. 1. -गच्छति -गन्तुं), निर्णी (c. 1. -णयति -णेतुं).

Deemed, *p. p.* मतः -ता -तं, भूतः -ता -तं, अवगतः -ता -तं, अनुमितः -ता -तं.

Deep, *a.* (Having length downwards, profound) गम्भीरः -रा -रं, गभीरः -रा -रं, अगाधः -धा -धं, दीर्घः -र्घा -र्घं, गहनः -ना -नं, गाढः -ढा -ढं, अवगाढः -ढा -ढं, अधोगतः -ता -तं.—(Low) निम्नः -म्ना -म्नं, नीचः -चा -चं.—(Excessive) गाढः -ढा -ढं; 'deep grief,' गाढशोकः.—(Entering deep) मर्म्मभेदी -दिनी -दि (न्).—(Not obvious) गम्भीरार्थः -र्था -र्थं or निगूढार्थः, परमगहनः -ना -नं, अगम्यः -म्या -म्यं, दुर्ज्ञेयः -या -यं, रहस्यः -स्या -स्यं.—(Sagacious) गम्भीरबुद्धिः -द्धिः -द्धि, विदग्धः -ग्धा -ग्धं, दीर्घदृष्टिः -ष्टिः -ष्टि, धर्षः -र्षा -र्षं.—(Full of contrivance) उपायज्ञः -ज्ञा -ज्ञं.—(Grave in sound) गम्भीरः -रा -रं, मन्द्रः -न्द्रा -न्द्रं or आमन्द्रः, घनः -ना -नं, धीरः -रा -रं; 'a deep sound,' गम्भीरध्वनिः *m.*, गम्भीरशब्दः, घनध्वनिः.—(Dark coloured) घनः -ना -नं; 'deep red,' घनारुणः -णा -णं, सुरक्तः -क्ता -क्तं; 'deep blue,' घननीलः -ला -लं.—(Very deep) पातालस्पर्शी -र्शिनी -र्शि, अस्थागः -गा -गं, अस्थाघः -घा -घं, अस्थागः -गा -गं, अतलः -ला -लं; 'deep sleep,' सुषुप्तिः *f.*, सुनिद्रा, सुषुप्तावस्था, गाढनिद्रा, तन्द्रिका; 'deep darkness,' घनान्धकारः, अन्धतमसं; 'deep sigh,' दीर्घनिश्वासः; 'knee-deep,' जानुदघ्नः -घ्ना -घ्नं, जानुद्वयसः -सा -सं, जानुमात्रः -त्रा -त्रं.

Deep, *s.* (The sea) समुद्रः, सागरः, महोदधिः *m.*, महार्णवः, जलधिः *m.*, अम्बुनिधिः *m.*, अम्बुराशिः *m. f.*, वारिराशिः; 'deep of night,' निशीथः, महारात्रः, गम्भीररात्रः, घोररात्रः.

To deepen, *v. a.* गम्भीरीकृ, अधिकगम्भीरं -रां -रं कृ, अगाधीकृ, घनतरं -रां -रं कृ, निम्नीकृ.—(Darken) तिमिर (nom. तिमिरयति -यितुं).

Deeply, *adv.* गम्भीरं, गभीरं, गाढं, प्रगाढं, निर्भरं, अत्यन्तं, नितान्तं, भृशं, दीर्घं; 'deeply grieving,' शोकमग्नः -ग्ना -ग्नं, शोकसागरमग्नः -ग्ना -ग्नं, शोकावगाढः -ढा -ढं; 'deeply sighing,' दीर्घनिश्वस्य; 'deeply rooted,' बद्धमूलः -ला -लं or दीर्घमूलः.

Deep-mouthed, *a.* गम्भीरनादी -दिनी -दि (न्), घनध्वनिः -निः -नि.

Deep-musing, *a.* चिन्तापरः -रा -रं, ध्यानमग्नः -ग्ना -ग्नं, चिन्ताकुलः -ला -लं.

Deep-read, *a.* सर्व्वशास्त्रपारगः -गा -गं, स्वधीतः -ता -तं, सर्व्वविषयज्ञः -ज्ञा -ज्ञं, सर्व्वशास्त्रनिष्ठितः -ता -तं.

Deepness, *s.* (Profundity) गम्भीरता, गाम्भीर्य्यं, अगाधता, निम्नता, अधोगतत्वं, घनता, गाढता, नीचत्वं.—(Craft) विदग्धता, वैदग्ध्यं.

Deer, *s.* मृगः, हरिणः, कृष्णसारः, रुरुः, कुरङ्गः -ङ्गकः -ङ्गमः, रुरुः *m.*, रोहितः, रोहित् *m.*, पृषतः, पृषत् *m.* (त्), समूरुः *m.*, चमूरुः *m.*, चमरः, ऋश्यः, रिश्यः, रिष्यः, रङ्कुः *m.*, न्यङ्कुः *m.*, रौहिषः, शम्बरः, शबरः, समीची, चीनः, कदली, कन्दली, प्रियकः, मृडीकः, गोकर्णः, भीतहृदयः, वातप्रमीः, पवनवाहः, वातायुः *m.*—(Deer-skin) मृगाजिनं, मृगचर्म्म *n.* (न्).—(Deer-killer) मृगवधाजीवः, मृगयुः *m.*

To deface, *v. a.* नश् in caus. (नाशयति -यितुं), विनश्; उद्धृ (c. 1. -हरति -हर्त्तुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विलुप् in caus. (-लोपयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं), अपमृज् (c. 2. -मार्ष्टि -मार्ष्टुं), प्रमृज्, दुष् in caus. (दूषयति -यितुं), विरूपीकृ, विकृ.

Defaced, *p. p.* विनाशितः -ता -तं, उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं.

Defacement, *s.* लोपः, विलोपनं, उच्छेदः, दूषणं, विनाशः, व्यामर्षः.

Defacer, *s.* दूषकः, विनाशकः, उद्धर्त्ता *m.* (र्त्तृ), उन्मूलकः, उत्पाटकः.

To defalcate, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), ऊन् (c. 10. ऊनयति -यितुं), न्यूनीकृ, ह्रस् in caus. (ह्रासयति -यितुं), अल्पीकृ, लोपं कृ.

Defalcation, *s.* न्यूनता, हीनता, हानिः *f.*, उद्धारः, लोपः, ह्रासः, क्षीणता, अल्पत्वं, अपचयः, विच्छित्तिः *f.*, अवच्छेदः, ऊनकरणं.

Defamation, *s.* अपवादः, परिवादः, अभिशंसनं, अभिशापः, आक्षेपः, पिशुनवाक्यं, कलङ्कः, कलङ्ककरणं, असूया, निन्दा, परिभाषणं, वाग्दोषः, मौखर्य्यं, अकीर्त्तिकरणं, अयशस्करणं.

Defamatory, *a.* अपवादकः -का -कं, अभिशंसकः -का -कं, कुवादः -दा -दं, कलङ्ककरः -री -रं, अकीर्त्तिकरः -री -रं, अयशस्करः -री -रं, वाग्दुष्टः -ष्टा -ष्टं, पिशुनः -ना -नं, अभ्यसूयकः -का -कं, गुणापवादकः -का -कं, मुखरः -रा -रं.

To defame, *v. a.* अपवद् (c. 1. -वदति -दितुं), परिवद्, परगुणान् अपवद्, अभिशंस् (c. 1. -शंसति -सितुं), कलङ्क (nom. कलङ्कयति -यितुं), असूय (nom. असूयति -यितुं), निन्द् (c. 1. निन्दति -न्दितुं), अपयशः कृ, अकीर्त्तिं कृ.

Defamer, *s.* अपवादी *m.* (न्), परिवादी *m.*, गुणापवादकः, असूयकः, अभ्यसूयकः, गुणघाती *m.* (न्), कलङ्ककरः, कुवादः, अभिशंसकः, परवादी *m.* (न्), पिशुनः, सूचकः, आक्षेपकः.

To defatigate, *v. a.* खिद् in caus. (खेदयति -यितुं), श्रम् in caus. (श्रामयति -यितुं), श्रान्तीकृ, श्रमार्त्तं -र्त्तां -र्त्तं कृ, क्लान्तं -न्तां -न्तं कृ.

Defatigation, *s.* श्रान्तिः *f.*, क्लान्तिः *f.*, श्रमः, परिश्रमः, ग्लानिः *f.*, खेदः.

Default, *s.* (Omission) परित्यागः, अननुष्ठानं, परिलोपः, भ्रंशः.—(Want, failure) अभावः, असम्भवः, अविषयः, विरहः, अप्राप्तिः *f.*, न्यूनता.—(Defect) दोषः, अगुणः, वैकल्यं, व्यतिक्रमः.—(Non-appearance) अदर्शनं, अनुपस्थानं; 'in default of evidence,' साक्ष्यभावे.

Defaulter, *s.* नियमव्यभिचारी *m.* (न्), नियमलङ्घी *m.* (न्), रुद्धः, ऋणशोधनार्थं निरूपितदिवसे विचारसभायाम् अनुपस्थायी *m.* (न्).

Defeasance, *s.* अनुशयः, विप्रतिपत्तिः *f.*, लोपः, नियमभङ्गः, नियमलोपः.

Defeasible, *a.* अनुशयितव्यः -व्या -व्यं, लोप्यः -प्या -प्यं, लोपनीयः -या -यं.

Defeat, *s.* पराजयः, पराभवः, परिभवः, अभिभवः, अभिभूतिः *f.*, अपजयः, व्यसनं, बलव्यसनं, भङ्गः, भेदः, नाशः, विनाशः, ध्वंसः.

To defeat, *v. a.* (Overthrow) जि (c. 1. जयति, जेतुं), पराजि, विजि; अभिभू (c. 1. -भवति -वितुं), पराहन् (c. 2. -हन्ति -न्तुं), परास् (c. 4. -अस्यति -असितुं), विद्रु in caus. (-द्रावयति -यितुं), धृष् (c. 10. धर्षयति -यितुं), प्रधृष्; पर्य्यामृश् (c. 6. -मृशति -म्रष्टुं), वशीकृ.—(Frustrate) व्याहन्, खण्ड् (c. 10. खण्डयति -यितुं), वृथाकृ, विफलीकृ.

Defeated, *p. p.* जितः -ता -तं, पराजितः -ता -तं, पराभूतः -ता -तं, अभिभूतः -ता -तं, पराहतः -ता -तं, परास्तः -स्ता -स्तं, कृतध्वंसः -सा -सं.

Defecate, *a.* अपकर्षितमलः -ला -लं, शोधितः -ता -तं, हृतमलः -ला -लं, निर्म्मलीकृतः -ता -तं, पवित्रीकृतः -ता -तं, परिष्कृतः -ता -तं.

To defecate, *v. a.* मलं हृ (c. 1. हरति, हर्त्तुं) or अपकृष् (c. 1. -कर्षति -क्रष्टुं), निर्म्मलीकृ, विमलीकृ, शुध् in caus. (शोधयति -यितुं), पवित्रीकृ, परिष्कृ.

Defecation, *s.* मलापकर्षणं, निर्म्मलीकरणं, विमलीकरणं, शोधनं.

Defect, *s.* (Fault) दोषः, अपराधः, छिद्रं, अगुणः, कलङ्कः, दूषणं, वैकल्यं, मन्तुः *m.*—(Want) अभावः, विरहः, न्यूनता.

Defectibility, *s.* न्यूनता, वैकल्यं, हीनता, दोषित्वं, ह्रासता, अपूर्णत्वं.

Defectible, *a.* न्यूनः -ना -नं, दोषिकः -की -कं, अपूर्णः -र्णा -र्णं.

Defection, *s.* त्यागः, परित्यागः, च्युतिः *f.*, भ्रंशः, भ्रष्टता, पतनं, परिवर्त्तः.

Defective, *a.* न्यूनः -ना -नं, विकलः -ला -लं, दोषी -षिणी -षि (न्), दोषवान् -वती -वत् (त्), सदोषः -षा -षं, हीनः -ना -नं, सापराधः -धा -धं, सच्छिद्रः -द्रा -द्रं, कलङ्की -ङ्किनी -ङ्कि (न्), अपूर्णः -र्णा -र्णं, अपरिपूर्णः -र्णा -र्णं, असम्पूर्णः -र्णा -र्णं, अपर्य्याप्तः -प्ता -प्तं, अङ्गहीनः -ना -नं, अल्पोनः -ना -नं, ऊनः -ना -नं, असमग्रः -ग्रा -ग्रं.

Defectiveness, *s.* न्यूनता, हीनत्वं, असम्पूर्णत्वं, असमग्रता, वैकल्यं.

Defence, *s.* (Protection) रक्षणं, रक्षा, त्राणं, पालनं, रक्षणः, शरणं, आश्रयः, संश्रयः, गुप्तिः *f.*, गोपनं, अभ्युपपत्तिः *f.*, अवनं.—(Apology) उत्तरं, प्रतिवादः, व्यपदेशः, छलकरणं, शुद्धिः *f.*, शोधनं.—(In law) उत्तरं, प्रत्युत्तरं, निवेदनं.

Defenceless, *a.* अरक्षितः -ता -तं, रक्षाहीनः -ना -नं, अशरणः -णा -णं, निराश्रयः -या -यं, अनाश्रयः -या -यं, अप्रतिकारः -रा -रं.—(Unarmed) निरायुधः -धा -धं, अस्त्रहीनः -ना -नं, विशस्त्रः -स्त्रा -स्त्रं.

To defend, *v. a.* (Protect) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्; त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै; पा or पाल् in caus. (पालयति -यितुं or c. 2. पाति -तुं), अनुपा, परिपा, प्रतिपा, सम्पा, अभिपा; गुप् (c. 1. गोपायति, गोप्तुं or caus. गोपयति -यितुं), अनुगुप्, अभिगुप्, प्रगुप्, अभिसङ्गुप्; अव् (c. 1. अवति -वितुं), पर्य्याप् in des. (-ईप्सति -प्सितुं), परिप्राप् in des.—(Vindicate) रक्ष्, अनुपाल्, उत्तरं दा, पक्षपातं कृ; 'defend another,' परस्य सपक्षो भू, परार्थम् उत्तरं वद् (c. 1. वदति -दितुं).—(Prohibit) निवृ in caus. (-वारयति -यितुं), निषिध् (c. 1. -षेधति -षेद्धुं).

Defendable, *a.* रक्षणीयः -या -यं, रक्ष्यः -क्ष्या -क्ष्यं, गोपनीयः -या -यं, गोप्यः -प्या -प्यं, पालनीयः -या -यं, अवनीयः -या -यं.

Defendant, *s.* (Person sued) अभियुक्तः, प्रत्यर्थी *m.* (न्), प्रतिपक्षः, कार्य्यी *m.* (न्).—(Advocate) प्रतिवादी *m.* (न्), उत्तरवादी *m.* (न्), पक्षपाती *m.* (न्).

Defended, *p. p.* रक्षितः -ता -तं, अभिरक्षितः -ता -तं, पालितः -ता -तं, उपपालितः -ता -तं, गुप्तः -प्ता -प्तं, त्रातः -ता -तं, अवितः -ता -तं, गोपायितः -ता -तं.

Defender, *s.* रक्षकः, रक्षिता *m.* (तृ), रक्षी *m.* (न्), परिरक्षी *m.*, पालकः, पालः -ली *m.* (न्), पः in comp., त्राता *m.* (तृ), गोपः -पकः, गोपायकः, गोपी *m.* (न्), गोपिलः.

Defensible, *a.* रक्षणीयः -या -यं, अनुपालनीयः -या -यं, परिशुद्धिक्षमः -मा -मं.

Defensive, *a.* रक्षकः -का -कं, पालकः -का -कं, पाली -लिनी -लि (न्), वारकः -का -कं, प्रतिघाती -तिनी -ति (न्).

Defensive, *s.* आत्मरक्षा, रक्षावस्था, प्रतिघातः, परित्राणं, सावधानता.—(In war) शत्रुवारणं, युद्धनिवारणार्थं, शत्रोः or युद्धात् सावधानता.

To defer, *v. a.* (Put off, delay) विलम्ब् (c. 1. -लम्बते -म्बितुं), आकालान्तरात् कार्य्यं त्यज् (c. 1. त्यजति, त्यक्तुं) or या in caus. (यापयति -यितुं).—(Refer to another) कार्य्यनिर्णयं परस्मिन् अर्पृ in caus. (-अर्पयति -यितुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or न्यस् (c. 4. -अस्यति -असितुं).

To defer, *v. n.* (Delay) विलम्ब् (c. 1. -लम्बते -म्बितुं), मन्द (nom. मन्दायते), चिर (nom. चिरयति -रायति -यितुं), कालं या in caus. (यापयति -यितुं) or क्षिप् (c. 6. क्षिपति, क्षेप्तुं).—(Pay regard to another's opinion) परमतम् आश्रि (c. 1. -श्रयति -यितुं) or आदृ (c. 6. -द्रियते -दर्त्तुं) or प्रती (प्रति with इ, प्रत्येति -तुं) or उपगम् (c. 1. -गच्छति -गन्तुं).

Deference, *s.* (Regard) आदरः, समादरः, अनुनयः, मानं, सम्मानं, मान्यत्वं, आग्रहः, प्रश्रयः, प्रणयः, प्रतीतिः *f.*, अनुवर्त्तनं.—(Submission) अधीनता, वश्यता, नम्रता.

Deferred, *p. p.* विलम्बितः -ता -तं, आकालान्तरात् त्यक्तः -क्ता -क्तं.

Deferring, *s.* विलम्बः -म्बनं, यापनं, कालयापः, आकालान्तरात् कार्य्यत्यागः.

Defiance, *s.* युद्धार्थम् आह्वानं, समाह्वयः -ह्वानं, क्रन्दनं, क्रन्दितं, स्पर्द्धा, आस्पर्द्धा, हूतिः *f.*, हवः, अभिग्रहः, नासीरं, योधसंरावः.

Deficience, deficiency, *s.* न्यूनता, हीनता -त्वं, हानिः *f.*, अभावः, विरहः, रहितत्वं, अपूर्णता, असम्पूर्णत्वं, ह्रासः, ह्रसितत्वं, अल्पत्वं, क्षीणता, वैकल्यं, लोपः, लुप्तत्वं.—(Defect) दोषः, छिद्रं; 'deficiency of intellect,' बुद्धिहीनत्वं; 'of any organ of sense,' इन्द्रियवैकल्यं.

Deficient, *a.* न्यूनः -ना -नं, हीनः -ना -नं, विकलः -ला -लं, अपूर्णः -र्णा -र्णं, असम्पूर्णः -र्णा -र्णं, असमग्रः -ग्रा -ग्रं, क्षीणः -णा -णं, रहितः -ता -तं, विरहितः -ता -तं, लुप्तः -प्ता -प्तं, ह्रसितः -ता -तं, ऊनः -ना -नं; 'deficient in intellect,' न्यूनधीः -धीः -धि, विकलान्तःकरणः -णा -णं, अल्पधीः -धीः -धि; 'in any organ of sense,' न्यूनेन्द्रियः -या -यं or विकलेन्द्रियः.

Defied, *p. p.* आहूतः -ता -तं, समाहूतः -ता -तं, स्पर्द्धितः -ता -तं.

Defier, *s.* आह्वायकः, समाह्वाता *m.* (तृ), आस्पर्द्धी *m.* (न्), कृताह्वानः.

To defile, *v. a.* दुष् in caus. (दूषयति -यितुं), प्रदुष्, सन्दुष्; मलिन (nom. मलिनयति -यितुं), मलिनीकृ, कलुष (nom. कलुषयति -यितुं), अपवित्रीकृ, अमेध्यं -ध्यां -ध्यं कृ, लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, दिह् (c. 2. देग्धि -ग्धुं), आविल (nom. आविलयति -यितुं), मलीमसीकृ; 'defile a virgin,' कन्यां दुष्.

To defile, *v. n.* (March file by file) एकव्यूहेन or श्रेणीव्यूहेन यात्रां कृ.

Defile, *s.* (Narrow passage) सङ्कटं, सङ्कटपथः, दुर्गमार्गः, दुर्गं, सञ्चरः, सञ्चारः, कन्दरः -री, आयामः, दरी, रन्ध्रं, गुहा, पर्व्वतमध्ये सङ्कटपथः.

Defiled, *p. p.* दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं, मलिनितः -ता -तं, कलुषितः

-ता -तं, मलदूषितः -ता -तं, मलीमसः -सा -सं, अमेध्याक्तः -क्ता -क्तं, अमेध्यलिप्तः -प्ता -प्तं; 'virgin,' क्षतयोनिः, दूषिता.

Defilement, s. (The act) दूषणं.—(The state) मालिन्यं, मलिनत्वं, मलं, समलता, अशुचित्वं, अशौचं -चत्वं, अपवित्रता, कलुषं, कल्मषं, अमेध्यत्वं, दुष्टता.

Defiler, s. दूषकः, दूषणः, कलुषकारी m. (न्), मलावहः, अशौचकृत्.

Definable, a. निर्वचनीयः -या -यं, निरूपणीयः -या -यं, निर्देश्यः -श्या -श्यं, उद्देश्यः -श्या -श्यं, व्याख्येयः -या -यं, निर्धारणीयः -या -यं.

To define, v. a. (Explain a thing by its qualities) लक्षणानि or गुणान् व्याख्या (c. 2. -ख्याति -तुं) or निरूप् (c. 10. -रूपयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or समुद्दिश् or निर्वच् (c. 2. -वक्ति -वक्तुं).—(Circumscribe) परिमा (c. 2. -माति -तुं).—(Mark out) लक्ष् (c. 10. लक्षयति -यितुं) लक्षीकृ, चिह्न् (c. 10. चिह्नयति -यितुं).—(Determine) निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), निर्धृ in caus. (-धारयति -यितुं).

Defined, p. p. निरुक्तः -क्ता -क्तं, निरूपितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, समुद्दिष्टः -ष्टा -ष्टं, उद्दिष्टः -ष्टा -ष्टं, लक्षितः -ता -तं, उपलक्षितः -ता -तं, कृतलक्षणः -णा -णं, लक्षीकृतः -ता -तं, व्याख्यातः -ता -तं, परिमितः -ता -तं.

Definer, s. निर्वक्ता m. (क्तृ), निर्देष्टा m. (ष्टृ), लक्षणव्याख्याता m. (तृ), गुणनिरूपकः.

Definite, a. (Settled, determined) नियतः -ता -तं, निश्चितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, निबद्धः -द्धा -द्धं, निर्णीतः -ता -तं, निर्धारितः -ता -तं, व्यवस्थापितः -ता -तं, सिद्धः -द्धा -द्धं.—(Limited) मितः -ता -तं, परिमितः -ता -तं, समर्यादः -दा -दं, सावधिकः -का -कं.

Definition, s. लक्षणं, निर्वचनं, निरुक्तिः f., निर्देशः, निदेशः, समुद्देशः, व्याख्या, लक्षणव्याख्या, गुणनिरूपणं.

Definitive, a. नियतः -ता -तं, निश्चायकः -का -कं, निर्णायकः -का -कं, ऐकान्तिकः -की -कं, आवश्यकः -का -कं or अवश्यकः.

Definitively, adv. नियतं, अवश्यमेव, निश्चितं, सुनिश्चितं, व्यक्तं, मुख्यतः.

Deflagrable, a. दाह्यः -ह्या -ह्यं, दहनीयः -या -यं, ज्वलनीयः -या -यं.

Deflagration, s. दाहः -हनं, अग्निदाहात् अशेषेण विनाशः.

To deflect, v. n. च्यु (c. 1. च्यवते, च्योतुं), विच्यु; भ्रंश् (c. 1. भ्रंशति, भ्रंशितुं), पत् (c. 1. पतति -तितुं), विचल् (c. 1. -चलति -लितुं), व्यभिचर् (c. 1. -चरति -रितुं).

Deflection, s. च्युतिः f., भ्रंशः, विचलनं, व्यभिचारः, उत्क्रमः, भेदः, भ्रमः, विपथगमनं, विमार्गगमनं, उत्पथगमनं, सत्पथत्यागः.

To deflour, v. a. (A virgin) कुमारीं धृष् (c. 10. धर्षयति -यितुं) or अभिगम् (c. 1. -गच्छति -गन्तुं), सतीत्वं or कुमारीत्वं हृ (c. 1. हरति, हर्तुं) or नश् in caus. (नाशयति -यितुं), योनिक्षतिं कृ, भ्रष्टां कृ.—(Take away the beauty of any thing) शोभां or कान्तिं हृ or नश्.

Defloured, p. p. (Virgin) क्षता, क्षतयोनिः f., धर्षिता, सङ्कारी, प्रमादिका.

Deflourer, s. कुमारीगामी m. (न्), सतीत्वनाशकः, कन्याप्रमाथी m. (न्).

Defluous, a. अभिष्यन्दी -न्दिनी -न्दि (न्) or अवस्यन्दी, अधःप्रसारी -रिणी -रि (न्).

Defluxion, s. अभिष्यन्दः, अवस्यन्दः, प्रस्रवणं, अधःप्रवाहः, क्षरणं.

Defoedation, s. दूषणं, मलकरणं, अशौचकरणं, अपवित्रीकरणं.

To deform, v. a. विरूप् (c. 10. -रूपयति -यितुं), विरूपीकृ, अपरूपीकृ, कुरूपीकृ, विकलीकृ, विकृ, कदाकारीकृ, व्यङ्गीकृ.

Deformed, p. p. विरूपः -पा -पी -पं, कुरूपः -पी -पं, अपरूपः -पी -पं, विकृतः -ता -तं, विकृताङ्गः -ङ्गी -ङ्गं, विकृताकारः -रा -रं, विकृताकृतिः -तिः -ति, विकलाङ्गः -ङ्गी -ङ्गं, व्यङ्गः -ङ्गी -ङ्गं, व्याकारः -रा -रं, कदाकारः -रा -रं, कुतनुः -न्वी -नु, कुवेरः -रा -रं, पोगण्डः -ण्डा -ण्डं or अपोगण्डः,

कुब्जः -ब्जा -ब्जं.

Deformation, s. विरूपकरणं, अपरूपीकरणं, विकलीकरणं, व्यङ्गीकरणं.

Deformedly, adv. कुरूपेण, विकृताकारेण, कदाकारेण, विकलं.

Deformity, s. विरूपता, वैरूप्यं, कुरूपता, अपरूपता, वैकृत्यं, वैकृतं, व्याकारः, व्यङ्गता, कुदृश्यत्वं, पोगण्डत्वं, कुत्सितत्वं.

To defraud, v. a. (Cheat) वञ्च् in caus. (वञ्चयते -ति -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, प्रतॄ in caus. (-तारयति -यितुं), छल् (c. 10. छलयति -यितुं), अन्यायं कृ.—(Deprive by fraud) छलेन or अन्यायेन or प्रतारणाद्वारा हृ (c. 1. हरति, हर्तुं) or स्वत्वलोपं कृ.

Defraudation, s. छलेन or अन्यायेन or प्रतारणापूर्व्वं हरणं or स्वत्वलोपः.

Defrauded, p. p. वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, अतिसंहितः -ता -तं.

Defrauder, s. वञ्चकः, वञ्चुकः, प्रतारकः, अन्यायकृत्, छली m. (न्).

To defray, v. a. धनव्ययं or व्ययशोधनं or व्ययापाकरणं स्वीकृ, परार्थं धनव्ययं कृ or व्ययशोधनं कृ, व्ययम् उपगम् (c. 1. -गच्छति -गन्तुं) or शुध् in caus. (शोधयति -यितुं) or अपाकृ or साध् in caus. (साधयति -यितुं).

Defrayer, s. व्ययशोधकः, व्ययापाकर्त्ता m. (र्तृ), परार्थं व्ययस्वीकारी m. (न्).

Defrayment, defraying, s. व्ययशोधनं, व्ययस्वीकारः, व्ययापाकरणं, व्ययमुक्तिः f., व्ययमोक्षः, व्ययापनयनं, व्ययसिद्धिः f., व्ययोपगमः.

Deft, a. (Neat) विनीतः -ता -तं.—(Dexterous) दक्षः -क्षा -क्षं.

Deftly, adv. विनीतं, सदाक्ष्यं, सूक्ष्मं, क्षिप्रं, चतुरं, युक्तिपूर्व्वं.

Defunct, a. मृतः -ता -तं, प्रेतः -ता -तं, परेतः -ता -तं, अतीतः -ता -तं, अपगतः -ता -तं, संस्थितः -ता -तं, विपन्नः -न्ना -न्नं, त्यक्तजीवितः -ता -तं.

Defunction, s. मरणं, मृत्युः m., अपगमः, देहत्यागः, संस्थितिः f., विपत्तिः f.

To defy, v. a. युद्धार्थम् आह्वे (c. 1. -ह्वयति -ते -ह्वातुं), समाह्वे, स्पर्द्ध् (c. 1. स्पर्द्धते -र्द्धितुं), आक्रन्द् (c. 1. -क्रन्दति -न्दितुं), अभियुज् (c. 7. -युनक्ति -योक्तुं).—(Disdain, slight) अवज्ञा (c. 9. -जानाति -ज्ञातुं), कदर्थीकृ, पराकृ, लघूकृ, निराकृ.

Defy, s. आह्वानं, युद्धार्थं समाह्वानं, समाह्वयः, स्पर्द्धा.

Defier, s. युद्धार्थम् आह्वायकः, समाह्वाता m. (तृ), अभियोक्ता m. (क्तृ).

Degeneracy, degenerateness, s. क्षीणपुण्यत्वं, कुलधर्म्मभ्रंशः, पैतृकधर्म्मच्युतिः f., कुलाचारत्यागः, कुलमर्य्यादाभ्रष्टता, मर्य्यादाहानिः f., सन्मार्गापगमः, धर्म्मत्यागः, दुष्टता.

Degenerate, a. क्षीणपुण्यः -ण्या -ण्यं, क्षीणधर्म्मा -र्म्मा -र्म्म or नष्टधर्म्मा, कुलधर्म्मभ्रष्टः -ष्टा -ष्टं, त्यक्तकुलमर्य्यादः -दा -दं, पैतृकाचारच्युतः -ता -तं, धर्म्मविच्युतः -ता -तं, धर्म्मपतितः -ता -तं, परिभ्रष्टः -ष्टा -ष्टं, दुष्टः -ष्टा -ष्टं.

To degenerate, v. n. कुलधर्म्मात् भ्रंश् (c. 1. भ्रश्यति, भ्रंशितुं) or च्यु (c. 1. च्यवते, च्योतुं) or पत् (c. 1. पतति -तितुं), दुष् (c. 4. दुष्यति, दोष्टुं).

Deglutition, s. गरणं, निगरणं, निगारः, गरा, गीर्णिः f., गिरिः f., ग्रसनं.

Degradation, s. (Deprivation or loss of office, disgrace) पदभ्रंशः, पदच्युतिः f., अधिकारभ्रंशः, अधिकारनिराकरणं, अधिकारच्युतिः f., पदलोपः, स्थानभ्रंशः, स्थानापकर्षः, अपकर्षः, अपमानं, अवध्वंसः, पतितत्वं, पातित्यं.—(Degeneracy, baseness) भ्रष्टता, अपकृष्टता, मर्य्यादाक्षयः, मर्य्यादानाशः, दुष्टता, वृषलत्वं, अधोगतिः f., निकृष्टता.

To degrade, v. a. पदात् or अधिकारात् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or निराकृ or अपकृष् (c. 1. -कर्षति -क्रष्टुं).—(Lessen the value) मूल्यं or अर्घम् अल्पीकृ or ऊन (nom. ऊनयति -यितुं) or ह्रस् in caus. (ह्रासयति -यितुं) or लघु (nom. लघयति -यितुं), लघूकृ, अल्पीकृ.

Degraded, p. p. (Dismissed from office, disgraced) पदभ्रष्टः -ष्टा -ष्टं, पदच्युतः -ता -तं, अधिकारपतितः -ता -तं, पतितः -ता -तं, स्थानभ्रष्टः -ष्टा -ष्टं, अपकृष्टः -ष्टा -ष्टं, लघूकृतः -ता -तं.—(Dege-

nerate) भ्रष्टः -ष्टा -ष्टं, परिभ्रष्टः -ष्टा -ष्टं, अपकृष्टः -ष्टा -ष्टं, निकृष्टः -ष्टा -ष्टं, अधमः -मा -मं, नीचः -चा -चं, निर्विण्णः -ण्णा -ण्णं.

Degrading, *a.* लाघवकारी -रिणी -रि (न्) or अपमानकारी, अकीर्त्तिकरः -रा -रं, अपयशस्करः -री -रं.

Degree, *s.* (Station, rank) पदं, स्थानं, आस्पदं, पदविः *f.* -वी, वृत्तिः *f.*, प्रतिपत्तिः *f.*; 'high degree,' परमपदं.—(State in which a thing is) अवस्था, भावः, दशा, स्थितिः *f.*, वृत्तिः *f.*, गतिः *f.*—(Step to any thing) क्रमः, पदं.—(Order of lineage) आवलिः *f.*, श्रेणी; 'of high degree,' महाकुलप्रसूतः.—(Measure, extent) परिमाणं, प्रमाणं, पर्य्यन्तं, मात्रं; 'to what degree'? कियत् प्रमाणं, कियत् पर्य्यन्तं, किं पर्य्यन्तं; 'in some degree,' किञ्चित्, ईषत्, कतिपयेन -यात्.—(Class, order) गणः, पंक्तिः *f.*, श्रेणी, वर्गः.—(Degree of latitude, &c.) भागः, अंशः, अक्षभागः, अक्षांशः.—(In arithmetic) अङ्कत्रयं.—(By degrees) क्रमशस्, क्रमेण, क्रमे क्रमे, पदे पदे, पदशस्, प्रतिपदं, अनुपदं, पदात्पदं, शनैः, शनैः शनैः.

To dehort, *v. a.* उपदेशपूर्व्वं or प्रत्यादेशपूर्व्वं भयहेतुं सूचयित्वा निवृत् in caus. (-वर्त्तयति -यितुं), मैवं कार्षीः or मैवं कृथा इति मन्त्रं कृ, विपरीतम् उपदिश् (c. 6. -दिशति -देष्टुं), प्रत्यादिश्, अन्तःख्या (c. 2. -ख्याति -तुं).

Dehortation, *s.* विपरीतमन्त्रणं, प्रत्यादेशपूर्व्वं निवर्त्तनं, मैवं कार्षीर् इति मन्त्रकरणं, उद्यमभङ्गार्थः प्रबोधः, निषेधार्थकः परामर्शः.

Dehortatory, *a.* प्रत्यादेशकः -का -कं, निषेधार्थकः -का -कं, मैवं कार्षीर् इत्युपदेशकः -का -कं, निवृत्तिकारकः -का -कं.

Dehorter, *s.* प्रत्यादेशपूर्व्वं निवर्त्तयिता *m.* (तृ), प्रत्यादेष्टा *m.* (ष्टृ).

To deject, *v. a.* (Cast down) पत् in caus. (पातयति -यितुं), अधःपत् in caus.—(Dispirit, make sad) अवसद् in caus. (-सादयति -यितुं), विषण्णीकृ, अवसन्नीकृ, विषादं जन् in caus. (जनयति -यितुं), ग्लानीकृ, पीड् (c. 10. पीडयति -यितुं), व्यथ् in caus. (व्यथयति -यितुं).

Deject, dejected, *a.* विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, विषादी -दिनी -दि (न्), अवसादितः -ता -तं, उद्विग्नमनाः -नाः -नः (स्) or दीनमनाः or विमनाः or दुर्मनाः or सन्नमनाः, अवनतः -ता -तं, निर्विण्णः -ण्णा -ण्णं, दीनमनस्कः -स्का -स्कं, दीनचेतनः -ना -नं, क्लान्तः -न्ता -न्तं, ग्लानः -ना -नं, म्लानः -ना -नं.—(In countenance) अधोमुखः -खी -खं or नतमुखः, विषण्णवदनः -ना -नं.

Dejectedly, *adv.* सविषादं, सावसादं, विषण्णं, सोद्वेगं, उद्विग्नमनसा.

Dejectedness, dejection, *s.* विषादः, अवसादः, विषण्णता, अवसन्नता, उद्वेगः, निर्विण्णता, क्लान्तिः *f.*, ग्लानिः *f.*, म्लानिः *f.*, दीनता.

Dejecture, *s.* उच्चारः, उच्चरितं, अवस्करः, शोधनं, शकृत् *m.*, पुरीषं.

Deification, *s.* (Union with Brahma) ब्रह्मत्वं, ब्रह्मभूयं, ब्रह्मनिर्व्वाणं, ब्रह्मसायुज्यं.—(Inferior deification) देवत्वं, देवभूयं, सुरभूयं.—(Act of making a god) देवकरणं, देवत्वदानं.

Deified, *p. p.* देवभूतः -ता -तं, सुरभूतः -ता -तं, ब्रह्मभूतः -ता -तं, प्राप्तदेवत्वः -त्वा -त्वं, देवत्वमापन्नः -न्ना -न्नं.

Deiform, *a.* देवरूपी -पिणी -पि (न्), देवाकारः -रा -रं, देवाकृतिः -तिः -ति.

To deify, *v. a.* देवं कृ, देवीकृ, देवं ज्ञात्वा पूज् (c. 10. पूजयति -यितुं).

To deign, *v. n.* (Vouchsafe) अर्ह् (c. 1. अर्हति -र्हितुं); as, 'Deign thou to enter my house,' त्वं मम गृहं प्रवेष्टुम् अर्हसि; प्रसद् (c. 6. -सीदति -सत्तुं) or प्रसादं कृ or प्रसन्नो भूत्वा कृ; as, 'deign to cast a look on us,' प्रसीद नो दृष्टिम् कुरु or दृष्टिप्रसादं कुरु or प्रसन्नो भूत्वा दृष्टिं कुरु.

To deign, *v. a.* अनुदा (c. 3. -ददाति -दातुं), प्रदा, अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुमन् (c. 4. -मन्यते -मन्तुं).

To deintegrate, *v. a.* खण्डखण्डात् ह्रस् (c. 1. -ह्रसति -ह्रसितुं) or अपनी (c. 2. -नयति -नेतुं), ह्रस् in caus. (ह्रासयति -यितुं), न्यूनीकृ.

Deism, *s.* आस्तिकता, आस्तिक्यं, अद्वैतं, अद्वैतवादः, एकात्मवादः.

Deist, *s.* आस्तिकः, अद्वैतवादी *m.* (न्), ब्रह्मवादी *m.*, एकात्मवादी.

Deity, *s.* (A god) देवः, देवता, सुरः, विबुधः, ठक्कुरः, पूजिलः, अमरः, स्वर्गः *m.*, नाकसद् *m.*, नाकी *m.* (न्), सुपर्व्वा *m.* (न्), त्रिदशः, अनिमिषः, दैत्यारिः *m.*, दानवारिः *m.*, गीर्व्वाणः, निलिम्पः.—(Divine state) देवत्वं -ता.

Delaceration, *s.* दारणं, विदारणं, खण्डं खण्डं करणं or छेदनं or कर्त्तनं.

Delactation, *s.* (Weaning) स्तन्यत्यागः, स्तन्यपानत्यागकरणं.

Delapsed, *p. p.* अधःपतितः -ता -तं, अपपतितः -ता -तं, च्युतः -ता -तं.

To delate, *v. a.* वह् (c. 1. वहति, वोढुं), अभिवह्, आनी (c. 1. -नयति -नेतुं).—(Accuse) अभियुज् (c. 7. -युनक्ति -योक्तुं).

Delation, *s.* वाहनं, आनयनं.—(Accusation) अभियोगः.

Delator, *s.* अभियोगी *m.* (न्) -योक्ता *m.* (क्तृ), अपवादकः, सूचकः.

To delay, *v. a.* विलम्ब् (c. 1. -लम्बते -म्बितुं or caus. -लम्बयति -यितुं), चिर (nom. चिरयति -यितुं), आकालान्तरात् त्यज् (c. 1. त्यजति, त्यक्तुं) or या in caus. (यापयति -यितुं) or क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or अपनुद् in caus. (-नोदयति -यितुं), स्थगितं -तां -तं कृ, दीर्घीकृ.—(Hinder) रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, वृ in caus. (वारयति -यितुं), निवृ; बाध् (c. 1. बाधते -धितुं), स्तम्भ् in caus. (स्तम्भयति -यितुं), विष्टम्भ्.

To delay, *v. n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), मन्द (nom. मन्दायते), चिर (nom. चिरयति -यितुं or चिरायति), कालं या in caus. (यापयति -यितुं) or क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विकॢप् (c. 1. -कल्पते -ल्पितुं), विचर् in caus. (-चारयति -यितुं), दीर्घीभू; 'he delays coming,' विलम्बेन or विलम्बाद् आगच्छति.

Delay, *s.* विलम्बः -म्बनं, कालयापः, कालक्षेपः, क्षेपः, विकल्पः, दीर्घसूत्रता, दीर्घीकरणं; 'a short delay,' क्षणक्षेपः.—(Stay, stop) स्तम्भः, अन्तरायः, व्याघातः, बाधा; 'without delay,' अविलम्बितं, अविलम्बं -म्बेन, अचिरं -रात् -रेण, आचिरं.

Delayed, *p. p.* विलम्बितः -ता -तं, चिरायितः -ता -तं, यापितः -ता -तं.

Delayer, *s.* विलम्बी *m.* (न्), विलम्बकारी *m.* (न्), कालयापकः, कालक्षेपकः.

Delectable, *a.* रमणीयः -या -यं, रम्यः -म्या -म्यं, सुभगः -गा -गं, मनोहरः -रा -रं, मनोरमः -मा -मं, मनोज्ञः -ज्ञा -ज्ञं, कमनीयः -या -यं, मनआपः -पा -पं, अभिरामः -मा -मं, हर्षकः -का -कं, सुखदः -दा -दं, मोदकः -का -कं, आह्लादजनकः -का -कं, अभिलषणीयः -या -यं, काम्यः -म्या -म्यं.

Delectableness, *s.* रमणीयता, रम्यत्वं, कमनीयता, मनोरमत्वं, सुभगत्वं.

Delectably, *adv.* रमणीयं, रम्यं, कमनीयं, सुभगं, मनोरमं.

Delectation, *s.* आह्लादः, प्रह्लादः, आनन्दः, हर्षः, प्रमोदः, अभिरुचिः *f.*

To delegate, *v. a.* नियुज् (c. 7. -युनक्ति -योक्तुं or caus. -योजयति -यितुं), समादिश् (c. 6. -दिशति -देष्टुं), आदिश्, प्रतिनिदिश्, प्रस्था in caus. (-स्थापयति -यितुं); प्रेर् (c. 10. -ईरयति -यितुं), न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्; प्रतिपद् in caus. (-पादयति -यितुं), अर्प् in caus. (अर्पयति -यितुं), सम् in caus.; परिदा.

Delegate, *s.* नियोगी *m.* (न्), नियुक्तः, अधिकारवान् *m.* (त्), प्रतिपुरुषः, प्रतिनिधिः *m.*, प्रणिधिः.

Delegated, *s.* [illegible] नियुक्तः -क्ता -क्तं or अधिकृतः -ता -तं, प्रेरितः -ता -तं, समादिष्टः -ष्टा -ष्टं.

Delegation, *s.* नियोजनं, प्रेरणं, अधिकारदानं, समादेशः, न्यासः.

To delete, *v. a.* अपमृज् (c. 2. -मार्ष्टि -र्ष्टुं), अपमृज्, निर्मृज्, लोपं कृ.

DELETERIOUS, DELETORY, *a.* विनाशकः -का -कं, नाशी -शिनी -शि (न्) or प्रणाशी, घाती -तिनी -ति (न्) or विघाती, घातुकः -का -कं, क्षयकरः -री -रं, सूदनः -नी -नं, हिंस्रः -स्रा -स्रं, शातकः -का -कं.

DELETION, *s.* व्यामर्षः, लोपः, विलोपनं, उच्छेदः, विनाशः, नाशः.

DELF, DELFE, *s.* (Mine) आकरः, खनिः *f.*, खानिः *f.*—(Earthenware) मृन्मयभाण्डं, मृद्भाण्डं, कौलालकं, मार्त्तिकभाण्डं, मृन्मयद्रव्यं.

To DELIBERATE, *v. n.* मन्त्र् (c. 10. मन्त्रयते -ति -यितुं), सम्मन्त्र्, विचर् in caus. (-चारयति -यितुं), मनसा विचर्, चिन्त् (c. 10. चिन्तयति -यितुं), सञ्चिन्त्, विचिन्त्; विगण् (c. 10. -गणयति -यितुं), वितर्क् (c. 10. -तर्कयति -यितुं); विमृश् (c. 6. -मृशति -म्रष्टुं), परामृश्, विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं), विनिश्चि (c. 5. -चिनोति -चेतुं), सम्भू in caus. (-भावयति -यितुं), मनसा विवेचनं कृ.

DELIBERATE, *a.* विमृश्यकारी -रिणी -रि (न्) or समीक्ष्यकारी or अक्षिप्रकारी, सावहितः -ता -तं, कृतावधानः -ना -नं, कार्य्यचिन्तकः -का -कं, अव्यग्रः -ग्रा -ग्रं, अप्रमत्तः -त्ता -त्तं, अत्वरितः -ता -तं, अचतुरः -रा -रं, परिणामदर्शी -र्शिनी -र्शि (न्).

DELIBERATED, *p. p.* चिन्तितः -ता -तं, सञ्चिन्तितः -ता -तं, सुचिन्तितः -ता -तं, मन्त्रितः -ता -तं, विचारितः -ता -तं, विगणितः -ता -तं, मथितः -ता -तं.

DELIBERATELY, *adv.* विमृश्य, समीक्ष्य, सुविमृश्य, मन्दतरम्, अवधानतस्, अपेक्षया, अत्वरितं, अव्यग्रं, असहसा, अप्रमत्तं, बुद्धिपुरःसरं, मनःपूर्व्वकं, बुद्धिपूर्व्वकं, बुद्ध्या, मतिपूर्व्वं; 'walking deliberately,' मितक्रमः.

DELIBERATENESS, *s.* समीक्ष्यकारित्वं, विमृश्यकारित्वं, अक्षिप्रकारिता, सावधानता, विचारशीलता, सतर्कता, अव्यग्रता, अप्रमादः, परिणामदर्शनं.

DELIBERATION, *s.* मन्त्रणा -णं, सम्मन्त्रणं, विचारः -रणं -णा, सुविचारः, चिन्ता, सुचिन्ता, सञ्चिन्तनं, विमर्शः, परामर्शः, विवेचना -नं, वितर्कः -र्कणं, समीक्षा -क्षणं, प्रसमीक्षा, चर्चा, विगणनं, सम्प्रधारणा, भावना, विकल्पः, समर्थनं.

DELIBERATIVE, *a.* विचारकः -का -कं, विचारी -रिणी -रि (न्), चिन्तकः -का -कं, विमर्शी -र्शिनी -र्शि (न्), मन्त्रकरः -री -रं, विचारशीलः -ला -लं.

DELICACY, *s.* (Daintiness) स्वादुता, सुस्वादुत्वं, सुरसत्वं, सौरस्यं, सुस्वादत्वं, मिष्टता.—(Softness) सौकुमार्य्यं, सुकुमारत्वं, कोमलता, मृदुता.—(Elegance) लालित्यं, लौल्यं, लावण्यं, विलासः.—(Nicety) सूक्ष्मत्वं -ता, सौक्ष्म्यं, शुद्धता, स्वच्छता.—(Slenderness, tenuity) तनुता, लघुता, लाघवं, अस्थूलता, क्षीणता.—(Scrupulousness, politeness) आदरः, सभ्यता, विनयः, सुशीलता.—(Weakness of constitution) शरीरमृदुता, अङ्गमृदुता, प्रकृतिदौर्बल्यं.—(Choice food) स्वाद्वन्नं, विशिष्टान्नं, भोजनविशेषः, सुखाद्यं.

DELICATE, *a.* (Dainty, of an agreeable taste) स्वादुः -दुः -द्वी -दु or सुस्वादुः, सुरसः -सा -सं, मिष्टः -ष्टा -ष्टं, सुस्वादः -दा -दं, स्वादुकारः -री -रं.—(Elegant) ललितः -ता -तं, चारुः -र्वी -रु.—(Soft) सुकुमारः -रा -रं, कोमलः -ला -लं, मृदुः -द्वी -दु.—(Nice, slender, fine, not coarse) सूक्ष्मः -क्ष्मा -क्ष्मं, तनुः -नुः -न्वी -नु or वितनुः or प्रतनुः, लघुः -घुः -घ्वी -घु, श्लक्ष्णः -क्ष्णा -क्ष्णं, पेलवः -वा -वं, क्षीणः -णा -णं, अस्थूलः -ला -लं, विरलः -ला -लं.—(Choice) विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं, उत्तमः -मा -मं.—(Polite) सभ्यः -भ्या -भ्यं, विनीतः -ता -तं.—(Weak in constitution) मृदङ्गः -ङ्गी -ङ्गं, मृदुशरीरः -रा -रं, अल्पशक्तिः -क्तिनी -क्ति (न्); 'a delicate woman,' तन्वी, लघ्वी, सुकुमारा.

DELICATELY, *adv.* ललितं, सलालित्यं, सुकुमारं, कोमलं, मृदु, तनु.

DELICATES, *s.* स्वाद्वन्नं, स्वादुभोजनं, मिष्टान्नं, सुखाद्यः, विशिष्टान्नं.

DELICIOUS, *a.* स्वादुः -दुः -द्वी -दु or सुस्वादुः, मधुरः -रा -रं, मिष्टः -ष्टा -ष्टं, सुस्वादुः -दुः -द्वी -दु, सुरसः -सा -सं, मनोहरः -रा -रं, मनोरमः -मा -मं, रम्यः -म्या -म्यं, रमणीयः -या -यं, मोदकः -का -कं, सुभगः -गा -गं, कमनीयः -या -यं.

DELICIOUSLY, *adv.* सुस्वादु, मधुरं, मनोरमं, रमणीयं, सुभगं.

DELICIOUSNESS, *s.* सुस्वादुता, माधुर्य्यं, सौरस्यं, रम्यता, रमणीयता.

DELIGHT, *s.* हर्षः, आनन्दः, आह्लादः, प्रह्लादः, ह्लादः, मुदा, मुद् *f.*, प्रमोदः, मोदः, आमोदः, प्रीतिः *f.*, तुष्टिः *f.*, सुखं, सौख्यं, नन्दः, नन्दथुः *m.*, मदः, प्रमदः, मादः, रतिः *f.*, परितोषः, सन्तोषः, रभसः, अभिरुचिः *f.*, कुतूहलं, चित्तप्रसन्नता, महोत्सवः; 'thrill of delight,' रोमहर्षणं, पुलकः, रोमाञ्चः.—(That which gives delight) नन्दनः -नं, आनन्दनं, आनन्ददः, हर्षकः, हर्षकरः, प्रीतिदः.

To DELIGHT, *v. a.* नन्द् in caus. (नन्दयति -यितुं), आनन्द्, अभिनन्द्; हृष् in caus. (हर्षयति -यितुं), प्रहृष्, परिहृष्; ह्लाद् in caus. (ह्लादयति -यितुं), प्रह्लाद्, आह्लाद्; सुख् (c. 10. सुखयति -यितुं), रम् in caus. (रमयति -यितुं), प्रमुद् in caus. (-मोदयति -यितुं), परितुष् in caus. (-तोषयति -यितुं), सन्तुष्; तृप् in caus. (तर्पयति -यितुं), प्री (c. 9. प्रीणाति or caus. प्रीणयति -यितुं), उल्लस् in caus. (-लासयति -यितुं), हर्षं कृ, आनन्दं दा.

To DELIGHT, *v. n.* नन्द् (c. 1. नन्दति -न्दितुं), आनन्द्, अभिनन्द्, विनन्द्; हृष् (c. 4. हृष्यति, हर्षितुं), प्रहृष्, संहृष्, सम्प्रहृष्; ह्लाद् (c. 1. ह्लादते -दितुं), रम् (c. 1. रमते, रन्तुं), अभिरम्, आरम्, संरम्, उपरम्, प्री (c. 4. प्रीयते), मुद् (c. 1. मोदते -दितुं), प्रमुद्; तुष् (c. 4. तुष्यति, तोष्टुं), परितुष्, प्रतुष्, सन्तुष्; रुच् (c. 1. रोचते -चितुं), अभिरुच्, उल्लस् (c. 1. -लसति -सितुं), विलस्; तृप् (c. 4. तृप्यति, तर्प्तुं).

DELIGHTED, *p. p.* हृष्टः -ष्टा -ष्टं, हर्षितः -ता -तं, आह्लादितः -ता -तं, प्रह्लादितः -ता -तं, ह्लादितः -ता -तं, आनन्दितः -ता -तं, आनन्दी -न्दिनी -न्दि (न्), प्रमोदितः -ता -तं, प्रमोदी -दिनी -दि (न्), मुदान्वितः -ता -तं, प्रीतिमान् -मती -मत् (त्), सन्तुष्टः -ष्टा -ष्टं, उल्लसितः -ता -तं or उल्लासितः, अभिरुचितः -ता -तं, प्रीतः -ता -तं, सुखी -खिनी -खि (न्), प्रहृष्टमनाः -नाः -नः (स्) or प्रीतमनाः, हृष्टचित्तः -त्ता -त्तं, आनन्दः -न्दा -न्दं; 'exquisitely delighted,' पुलकितः -ता -तं, परमहृष्टः -ष्टा -ष्टं, रोमरोमाञ्चितः -ता -तं.

DELIGHTFUL, *a.* रम्यः -म्या -म्यं, रमणीयः -या -यं, मनोरमः -मा -मं, मनोहरः -रा -रं, सुभगः -गा -गं, हर्षकः -का -कं, हर्षकरः -री -रं, हर्षणः -णा -णी -णं, नन्दकः -का -कं, नन्दनः -ना -नं, आनन्दनः -ना -नं, आनन्ददः -दा -दं, प्रीतिदः -दा -दं, मोदकः -का -कं, प्रमोदी -दिनी -दि (न्), रमणः -णा -णं, आनन्दमयः -यी -यं, सुखी -खिनी -खि (न्), सुखदः -दा -दं, परितोषजनकः -का -कं, रामणीयकः -का -कं, कमनीयः -या -यं, रुचिरः -रा -रं.

DELIGHTFULLY, *adv.* रम्यं, रमणीयं, मनोरमं, सुभगं, सुखेन, कमनीयं.

DELIGHTFULNESS, *s.* रम्यता, रमणीयता, मनोरमत्वं, कमनीयता, रामणीयकता.

To DELINEATE, *v. a.* (Sketch) लिख् (c. 6. लिखति, लेखितुं), आलिख्, विलिख्; रूप् (c. 10. रूपयति -यितुं); अङ्क् (c. 10. अङ्कयति -यितुं).—(Paint) चित्र् (c. 10. चित्रयति -यितुं).—(Describe) वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, उपवर्ण्, संवर्ण्.

DELINEATED, *p. p.* आलिखितः -ता -तं, चित्रलिखितः -ता -तं, चित्रगतः -ता -तं, चित्रितः -ता -तं, वर्णितः -ता -तं, निरूपितः -ता -तं.

DELINEATION, *s.* आलेख्यं, आलेखनं, चित्रं, चित्रारम्भः, पाण्डुलेख्यं, वर्णनं -ना, उपवर्णनं, अङ्कनं, आदर्शः.

DELINQUENCY, *s.* दोषः, अपराधः, पापं, व्यतिक्रमः, अपक्रिया, अपकर्म्म *n.* (न्), अपचारः, दुष्कर्म्म *n.* (न्), दुष्कृतं, कुकर्म्म *n.*, दुश्चरितं, पापकर्म्म *n.*, पापकृतं.

DELINQUENT, *s.* पापी *m.* (न्), पापकारी *m.* (न्), पापकृत्, अपराधी *m.* (न्), दोषी *m.* (न्), कृतापराधः, कुकर्म्मकारी *m.* (न्), दुष्कृती *m.* (न्).

To DELIQUATE, *v. n.* विली (c. 4. -लीयते -लेतुं -लातुं), प्रविली; विद्रु (c. 1. -द्रवति -द्रोतुं), द्रवीभू, विगल् (c. 1. -गलति -लितुं), परिगल्.

DELIQUATION, *s.* द्रवः -वणं -वत्वं, विलयः -यनं, द्रवीकरणं, गलनं.

DELIQUIUM, *s.* मूर्छा -र्छनं -ना, प्रलयः, प्रमोहः, नष्टचेष्टता, निर्वेशः.

DELIRIOUS, *s.* चैतन्यरहितः -ता -तं, भ्रान्तचित्तः -त्ता -त्तं, नष्टचेतनः -ना -नं, रोगोपहतज्ञानः -ना -नं. चित्तविभ्रमात् प्रलापकारी -रिणी -रि (न्).

DELIRIUM, *s.* चित्तविभ्रमः, ज्ञानभ्रान्तिः *f.*, चैतन्यनाशः, अचैतन्यं, चित्तविप्लवः, चित्तवैकल्यं, प्रलापः.

To DELIVER, *v. a.* (Consign) प्रतिपद् in caus. (-पादयति -यितुं), ऋ in caus. (अर्पयति -यितुं), समृ, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्, न्यासीकृ; निविद् in caus. (-वेदयति -यितुं), सङ्क्रम् in caus. (-क्रामयति -यितुं), प्रतिज्ञा in caus. (-ज्ञापयति -यितुं), आरुह् in caus (-रोपयति -यितुं), समाविश् in caus. (-वेशयति -यितुं).—(Give up, yield) प्रदा (c. 3. -ददाति -दातुं c. 1. -यच्छति), परिदा, सम्प्रदा, उत्सृज् (c. 6. -सृजति -स्रष्टुं), प्रोत्सृ in caus. (-सारयति -यितुं), वितृ (c. 1. -तरति -रितुं -रीतुं).—(Release, rescue) मुच् (c. 6. मुञ्चति, मोक्तुं or caus. मोचयति -यितुं), विमुच्, प्रविमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ; निस्तृ in caus. (-तारयति -यितुं), सन्तृ, उत्तृ; त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै; रक्ष् (c. 1. रक्षति -क्षितुं).—(Utter, pronounce) वाक्यम् ईर् (c. 10. ईरयति -यितुं), उदीर्, उच्चर् in caus. (-चारयति -यितुं), उदाहृ (c. 1. -हरति -हर्त्तुं), व्याहृ, वद् (c. 1. वदति -दितुं).—(Deliver a message, &c.) निविद् in caus. (-वेदयति -यितुं), विज्ञा in caus. (-ज्ञापयति -यितुं), आख्या (c. 2. -ख्याति -तुं).—(Assist in childbirth) सु in caus. (सावयति -यितुं), प्रसवं कृ in caus. (कारयति -यितुं).

DELIVERED, *p. p.* (Consigned) प्रतिपादितः -ता -तं, अर्पितः -ता -तं, समर्पितः -ता -तं, निक्षिप्तः -प्ता -प्तं, न्यस्तः -स्ता -स्तं, प्रणिहितः -ता -तं.—(Given up) प्रदत्तः -त्ता -त्तं, उत्सृष्टः -ष्टा -ष्टं, निसृष्टः -ष्टा -ष्टं, प्रोत्सारितः -ता -तं, वितीर्णः -र्णा -र्णं.—(Released, rescued) मुक्तः -क्ता -क्तं, मोचितः -ता -तं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं, रक्षितः -ता -तं, त्रातः -ता -तं, त्राणः -णा -णं, निस्तारितः -ता -तं, उत्तीर्णः -र्णा -र्णं.—(Uttered) उच्चारितः -ता -तं.—(As a message) निवेदितः -ता -तं, निरादिष्टः -ष्टा -ष्टं.—(Of a child) प्रसूता.

DELIVERANCE, *s.* (Rescue, release) रक्षा -क्षणं, परिरक्षणं, त्राणं, परित्राणं, उद्धारः, उद्धरणं, निस्तारः, निस्तरणं, तारणं, मुक्तिः *f.*, मोक्षः, मोचनं, मोक्षणं, परिमोक्षणं.

DELIVERER, *s.* (Rescuer) त्राता *m.* (तृ), रक्षकः, मोचकः, मोक्षकः, मुक्तिदाता *m.* (तृ), उद्धर्त्ता *m.* (र्तृ), समुद्धर्त्ता *m.*, निस्तारकः, निस्तारयिता *m.* (तृ), तारकः.—(Announcer) निवेदकः, निवेदनकृत् *m.*, आख्यायकः, विज्ञापकः.

DELIVERY, *s.* (Rescue) मुक्तिः *f.*, त्राणं, रक्षणं. *See* DELIVERANCE.—(Consignment, giving up) अर्पणं, समर्पणं, प्रतिपादनं, निवेदनं, न्यसनं, उपन्यासः, आरोपणं, प्रदानं, परिदानं, सम्प्रदानं, विधायकत्वं—(Of a message, &c.) निवेदनं, निरादेशः, विज्ञापनं.—(Utterance) उच्चारणं, उदाहरणं, व्याहरणं, व्याहारः.—(Childbirth) प्रसवः, प्रसूतिः *f.*, सूतिः *f.*, सूः *f.*, प्रसवकरणं, गर्भच्युतिः *f.*, जातकर्म्म *n.* (न्); 'a woman near her delivery,' आसन्नप्रसवा.

DELL, *s.* दरी -रा, कन्दरः -री, दरीभृः *f.*, द्रोणी, अद्रिद्रोणी, गुहा.

DELUDABLE, *a.* मोहनीयः -या -यं, प्रवञ्चनीयः -या -यं, प्रतारणीयः -या -यं.

To DELUDE, *v. a.* मुह् in caus. (मोहयति -यितुं), सम्मुह्, व्यामुह्, वञ्च् in caus. (वञ्चयते -यितुं), प्रवञ्च्, परिवञ्च्; प्रलभ् (c. 1. -लभते -लब्धुं); प्रतॄ in caus. (-तारयति -यितुं), प्रलुभ् in caus. (-लोभयति -यितुं).

DELUDED, *p. p.* मोहितः -ता -तं, सम्मोहितः -ता -तं, विमोहितः -ता -तं, वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं, प्रलोभितः -ता -तं.

DELUDER, *s.* मोही *m.* (न्), वञ्चकः, प्रवञ्चकः, प्रतारकः, भ्रामकः.

DELUGE, *s.* भूतसम्प्लवः, जलाप्लावनं, जलप्लावनं, आप्लावः, जलप्लवः, जलवेगः, तोयविप्लवः, सलिलोपप्लवः, परिप्लवः, जलोच्छ्वासः, परीवाहः, वन्या, ओघः.—(Universal deluge) एकार्णवं.—(Of rain) धारासारः, धारासम्पातः, अतिवृष्टिः *f.*, महती वृष्टिः.—(Overflow of a river) वानं.—(Sudden calamity) उत्पातः, विनिपातः.

To DELUGE, *v. a.* प्लु in caus. (प्लावयति -यितुं), आप्लु, परिप्लु, सम्प्लु; मस्ज् in caus. (मज्जयति -यितुं), निमज्ज्; 'This place is deluged by the tide,' एतत् स्थानं समुद्रवेलया प्लाव्यते.

DELUGED, *p. p.* आप्लावितः -ता -तं, आप्लुतः -ता -तं, परिप्लुतः -ता -तं, सम्प्लुतः -ता -तं, अभिप्लुतः -ता -तं, अभिपरिप्लुतः -ता -तं, समभिप्लुतः -ता -तं.

DELUSION, *s.* (Illusion, error) मोहः, माया, भ्रमः, भ्रान्तिः *f.*, व्यामोहः, विभ्रमः, मतिविभ्रमः, परिभ्रमः, आभासः, प्रपञ्चः, इन्द्रजालं, मिथ्यामतिः *f.*, विवर्त्तः, आवरणं.—(Cheating, beguiling) वञ्चना, मोहनं, प्रलोभनं, विलोभः, कूटः -टं, प्रतारणा.

DELUSIVE, DELUSORY, *a.* मोही -हिनी -हि (न्), मायी -यिनी -यि (न्), मायिकः -की -कं, मायामयः -यी -यं, जाली -लिनी -लि (न्), भ्रान्तिजनकः -का -कं, इन्द्रजालिकः -की -कं or ऐन्द्रजालिकः, भङ्गुरः -रा -रं.

To DELVE, *v. a.* खन् (c. 1. खनति -नितुं), अभिखन्, खनित्रेण गर्त्तं कृ.

DELVE, *s.* खातं -तकं, खातभूः *f.*, खेयं, गर्त्तः, विवरं, बिलं, अवटः.

DELVER, *s.* खनिता *m.* (तृ), खातकः, आखनिकः, खनकः.

DEMAGOGUE, *s.* प्राकृतजननायकः, अल्पलोकनेता *m.* (तृ), पृथग्जनपुरोगमः, प्रजानायकः, प्रजोपकारकः, हीनवर्णसपक्षः, अधमवर्णपक्षपाती, उत्तमाधमवर्णमध्ये कलहकारी *m.* (न्).

DEMAIN, DEMESNE, *s.* स्वाधीना भूमिः *f.*

DEMAND, *s.* (Claim) अभियोगः, प्रार्थना, अभ्यर्थना, अर्थना, अभियानं, याच्ञा, याचना, मार्गणं; 'false demand,' मिथ्याभियोगः.—(Question) अनुयोगः, पर्य्यनुयोगः, प्रश्नः, सम्प्रश्नः, पृच्छा, जिज्ञासा, अन्वेषणा, अनुसरणं.—(Calling for in order to purchase) क्रयार्थम् अन्वेषणा.

To DEMAND, *v. a.* (Claim) याच् (c. 1. याचति -चितुं), अर्थ् (c. 10. अर्थयति -ते -यितुं), प्रार्थ्; ममेति or मदीयमिति or मम दातव्यमिति वद् (c. 1. वदति -दितुं), स्वाधिकारं ज्ञा in caus. (ज्ञापयति -यितुं), अभियोगं कृ, स्वीकृ.—(Question) अनुयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), ज्ञा in des. (जिज्ञासते -सितुं), प्रच्छ् (c. 6. पृच्छति, प्रष्टुं).

DEMANDABLE, *a.* अभियोक्तव्यः -व्या -व्यं, याचनीयः -या -यं, प्रार्थनीयः -या -यं.

DEMANDANT, *s.* अभियोक्ता *m.* (क्तृ), अर्थी *m.* (न्), प्रार्थयिता *m.* (तृ).

DEMANDED, *p. p.* याचितः -ता -तं, प्रार्थितः -ता -तं, अभियुक्तः -क्ता -क्तं, अनुयुक्तः -क्ता -क्तं, पृष्टः -ष्टा -ष्टं, जिज्ञासितः -ता -तं, मार्गितः -ता -तं.

DEMANDER, *s.* अभियोगी *m.* (न्), याचिता *m.* (तृ), प्रार्थकः, प्रष्टा *m.* (ष्टृ).

DEMARCATION, *s.* सीमा, परिसीमा, मर्य्यादा, अवच्छेदः, विच्छेदः.

To DEMEAN ONE'S SELF, *v. n.* व्यवहृ (c. 1. -हरति -ते -हर्त्तुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), चर् (c. 1. चरति -रितुं), आचर्, समाचर्; वृत्तिम् अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं).

DEMEANOUR, *s.* वृत्तिः *f.*, व्यवहारः, आचारः, आचरणं, गतिः *f.*, स्थितिः *f.*, चलनं, रीतिः *f.*, चरितं, चरित्रं, चेष्टितं.

To DEMENTATE, *v. a.* उन्मद् in caus. (-मादयति -यितुं), मुह् in caus. (मोहयति -यितुं).

DEMENTATE, *a.* उन्मत्तः -त्ता -त्तं, नष्टचित्तः -त्ता -त्तं, मूढबुद्धिः -द्धिः -द्धि.

Dementation, *s.* उन्मत्तीकरणं, मोहनं, वातुलीकरणं, भ्रान्तिकरणं.

Demerit, *s.* अगुण: -णता, वैगुण्यं, निर्गुणत्वं, दोष:, अपुण्यं, गुणाभाव:.

To **demerit**, *v. a.* दोषं कृत्वा निन्दां or दण्डम् अर्ह् (c. 1. अर्हति -र्हितुं).

Demi, *a.* अर्द्ध: -र्द्धा -र्द्धं, आर्द्धिक: -की -कं, सामि indec.

Demi-devil, *s.* अर्द्धपिशाच:, नरपिशाच:, अर्द्धेन भूतोऽर्द्धेन पिशाच:.

Demi-god, *s.* नरदेव:, देवमानुष:, देवयोनि: *m.*, उपदेवता, अर्द्धदेव:. The following are different sorts of demi-gods or super-human beings: यक्ष:, सिद्ध:, पिशाच:, किन्नर:, विद्याधर:, रक्ष: *n.* (स्), गन्धर्व:, गुह्यक:.

Demi-man, *s.* अर्द्धनर:, अर्द्धपुरुष:, अर्द्धमानुष:, किन्नर:.

Demigration, *s.* देशत्याग:, स्थानत्याग:, उत्क्रमणं, देशान्तरगमनं.

Demise, *s.* (Of a king) राजमृत्यु:, राजमरणं, उपरम:, उपरति: *f.*

To **demise**, *v. a.* मरणकाले नियमपत्रेण प्रदा (c. 1. -यच्छति, c. 3. -ददाति -दातुं) or सम् in caus. (-अर्पयति -यितुं) or प्रतिपद् in caus. (-पादयति -यितुं).

Demission, *s.* अपकर्ष: -र्षणं, अध:पातनं, अधोगति: *f.*, अवसादनं, भङ्ग:.

Democracy, *s.* सर्वप्रजाधिपत्यं, सर्ववर्णप्रभुत्वं, प्रजाप्रभुत्वं, प्रजापालितं राज्यं, राज्यविशेषो यत्र साधारण्येन सर्वलोकेषु न्यस्तो राज्यभार:.

Democrat, *s.* प्रजाप्रभुत्वावलम्बी *m.* (न्), प्रजाधिपत्योपकारक:, प्रजाधिपत्यानुग्राही *m.* (न्), प्रजोपकारक:, प्रजानाथ:.

Democratical, *a.* प्रजाप्रभुत्वसम्बन्धी -न्धिनी -न्धि (न्), सार्व्वलौकिक: -की -कं, सार्व्ववर्णिक: -की -कं.

To **demolish**, *v. a.* नश् in caus. (नाशयति -यितुं), विनश्, उद्धृ (c. 1. -हरति -हर्तुं), संहृ; ध्वंस् in caus. (ध्वंसयति -यितुं), प्रध्वंस्, विध्वंस्; अध:पत् in caus. (-पातयति -यितुं); उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उन्मूल् (c. 10. -मूलयति -यितुं), साध् in caus. (साधयति -यितुं), अवसद् in caus. (-सादयति -यितुं), उत्सद्.

Demolished, *p. p.* नाशित: -ता -तं, विनाशित: -ता -तं, उद्धृत: -ता -तं, संहृत: -ता -तं, उच्छिन्न: -न्ना -न्नं, उन्मूलित: -ता -तं, भग्न: -ग्ना -ग्नं, सादित: -ता -तं, चूर्णित: -ता -तं, विघटित: -ता -तं, विपाटित: -ता -तं.

Demolisher, *s.* विनाशक:, विनाशकारी *m.* (न्), ध्वंसकारी, प्रलयकारी, उच्छेदक:, उन्मूलक:.

Demolition, *s.* नाश:, विनाश:, प्रलय:, ध्वंस:, प्रध्वंस:, उच्छेद:, समुच्छेद:, उद्धरणं, संहार:, समूलोद्धरणं, उत्पाटनं.

Demon, *s.* पिशाच:, भूत:, राक्षस:, असुर:, दानव:, निशाट:, निशाचर:, यक्षारि: *m.*, यातु: *m.*, यातुधान:, विघुर:, कर्बुर:, कर्बुर:, कर्बूर:, प्रेत:, उपपादुक:.

Demoniac, *s.* भूताविष्ट:, भूतग्रस्त:, भूतोपहत:, प्रेतबाधित:.

Demoniac, **demoniacal**, *a.* भौत: -ती -तं, भौतिक: -की -कं, पैशाच: -ची -चं -चिक: -की -कं, आसुर: -री -रं, राक्षस: -सी -सं; 'demoniacal possession,' भूतावेश:.

Demonology, *s.* भूतप्रेतादिविषया विद्या, वेतालपिशाचादिविषयका विद्या.

Demonstrable, *a.* साध्य: -ध्या -ध्यं, उपपादनीय: -या -यं, सूच्य: -च्या -च्यं, प्रतिपादनीय: -या -यं, प्रमेय: -या -यं, मीमांस्य: -स्या -स्यं.

Demonstrably, *adv.* प्रत्यक्षतस् -क्षेण, सुस्पष्टं, सुव्यक्तं, को ऽत्र सन्देह:.

To **demonstrate**, *v. a.* साध् in caus. (साधयति -यितुं), उपपद् in caus. (-पादयति -यितुं), प्रमाणीकृ, प्रमाण (nom. प्रमाणयति -यितुं) भू in caus. (भावयति -यितुं), विभू, सूच् (c. 10. सूचयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, विनिर्दिश्, निर्णी (c. 1. -णयति -णेतुं); दृश् in caus. (दर्शयति -यितुं).

Demonstrated, *p. p.* सिद्ध: -द्धा -द्धं, साधित: -ता -तं, उपपादित: -ता -तं, उपपन्न: -न्ना -न्नं, प्रतिपादित: -ता -तं, प्रमाणित: -ता -तं, प्रमाणीकृत: -ता -तं, विभावित: -ता -तं.

Demonstration, *s.* सिद्धि: *f.*, साधनं, सिद्धसाध्यं, उपपत्ति: *f.*, उपपादनं, सिद्धान्त:, राद्धान्त:, प्रमाणं, प्रामाण्यं, निर्देश:, निर्णय:, निर्णीतत्वं; 'ocular demonstration,' प्रत्यक्षप्रमाणं, चाक्षुषज्ञानं; 'written,' लेख्यप्रमाणं.

Demonstrative, *a.* निर्णायक: -का -कं, निश्चायक: -का -कं, निर्देशक: -का -कं, प्रामाणिक: -की -कं, सिद्धान्तकरण: -णा -णं, उपपादक: -का -कं, विभावक: -का -कं.

Demonstratively, *adv.* सप्रमाणं, सिद्धिपूर्व्वं, सुव्यक्तं, निर्विवादं.

Demonstrator, *s.* निर्देष्टा *m.* (ष्टृ), सिद्धान्ती *m.* (न्) प्रमाणकर्त्ता *m.* (र्त्तृ).

Demoralization, *s.* धर्म्मभ्रष्टता, धर्म्मविभ्रम:, आचारदुष्टता, व्यवहारदुष्टता.

To **demoralize**, *v. a.* आचारान् or व्यवहारान् दुष् in caus. (दूषयति -यितुं); धर्म्माद् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं), भ्रष्टीकृ, दुर्वृत्त -त्तां -त्तं कृ.

Demulcent, *a.* शमक: -का -कं, शान्तिक: -की -कं, उपशायी -यिनी -यि (न्), स्निग्ध: -ग्धा -ग्धं, स्नेहवान् -वती -वत् (त्), चिक्कण: -णा -णं.

To **demur**, *v. a.* or *n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), शङ्क् (c. 1. शङ्कते -ङ्कितुं), विशङ्क्, आशङ्क्; विचर् in caus. (-चारयति -यितुं), विकृप् (c. 1. -कल्पते -ल्पितुं or caus. -कल्पयति -यितुं), चिर (nom. चिरयति -यितुं), सन्दिह् (c. 2. -देग्धि -ग्धुं), मनसा आन्दोल (nom. आन्दोलयति -यितुं).

Demur, *s.* विलम्ब:, सन्देह:, संशय:, विकल्प:, शङ्का, आशङ्का, वितर्क:, विचारणं; 'without demur,' अविचारितं, अविलम्बितं.

Demure, *a.* एकान्तविनीत: -ता -तं, अतिविनयवान् -वती -वत् (त्), सगौरव: -वा -वं, गम्भीर: -रा -रं, धीर: -रा -रं, शान्त: -न्ता -न्तं, व्रीडित: -ता -तं, लज्जित: -ता -तं, ह्रीमान् -मती -मत् (त्), मन्दास्य: -स्या -स्यं.

Demurely, *adv.* सविनयं, सगौरवं, एकान्तविनयेन, सलज्जं, सव्रीडं.

Demureness, *s.* विनय:, अतिविनय:, गौरवं, गाम्भीर्य्यं, धीरता, धैर्य्यं, मन्दता, शान्ति: *f.*, लज्जा, सव्रीडता, त्रपा, शालीनत्वं.

Demurrage, *s.* नौकाया विहितकालादधिकं स्थाने or तीरोपान्ते भृत्वा वाणिजेन नौपतये दत्तं पारितोषिकं.

Demurrer, *s.* अभ्रस्थे विषये विलम्ब: or विराम: or विरति: *f.*, अर्थनिर्णये प्राड्विवाकैर् आशल्यच्छेदनाद् विचारत्याग:.

Den, *s.* विवरं, बिलं, श्वभ्रं, गह्वरं, कन्दर: -रा, गर्त्त:, रन्ध्रं, कुहरं, गुहा, गुहागृहं, खातं, दरी, निर्दरि: *m.*

Deniable, *a.* प्रत्याख्येय: -या -यं, अस्वीकार्य्य: -र्य्या -र्य्यं, खण्डनीय: -या -यं.

Denial, *s.* अपह्नव:, अपह्नुति: *f.*, निह्नव:, निह्नुति: *f.*, प्रत्याख्यानं, अपवाद:, अपलाप:, प्रत्यादेश:, निरसनं, निषेध:, प्रतिषेध:, अवधीरणा, प्रत्यवहृति: *f.*, अपाकृति: *f.*, अस्वीकार:, अननुज्ञा; 'self-denial,' आत्मपरित्याग:, संयम:, संयमनं.

Denied, *p. p.* अपह्नुत: -ता -तं, निह्नुत: -ता -तं, प्रत्याख्यात: -ता -तं, अपवादित: -ता -तं, प्रत्यादिष्ट: -ष्टा -ष्टं, निरस्त: -स्ता -स्तं, अननुज्ञात: -ता -तं.

Denier, *s.* अपह्नोता *m.* (तृ), निह्नोता *m.*, अपलापी *m.* (न्), अपवादी *m.* (न्).

To **denigrate**, *v. a.* कृष्ण (nom. कृष्णायते, कृष्णयति -यितुं), कृष्णीकृ, श्यामीकृ.

Denigration, *s.* कृष्णीकरणं, श्यामीकरणं, कालीकरणं.

Denizen, *s.* नगरस्थ:, पौर:, पौरजन:, नागर:, नगरजन:, नगरवासी *m.* (न्), स्वाधीन:, स्वतन्त्र:, स्ववश:, मुक्त:, नगरस्य सामाजिकजन:.

To **denizen**, *v. a.* पौरीकृ, नागरीकृ, स्वाधीनीकृ, स्वतन्त्रीकृ, स्ववशीकृ.

To **denominate**, *v. a.* अभिधा (c. 3. -दधाति -धातुं), आख्या (c. 2. -ख्याति -तुं), कृत् (c. 10. कीर्त्तयति -यितुं), संकृत्, सङ्कृत्; प्रवच् (c. 2.

-चष्टे), उदाहृ (c. 1. -हरति -हर्तुं), भण् (c. 1. भणति -णितुं), नाम कृ.

Denominated, *p. p.* प्रोक्तः -क्ता -क्तं, अभिहितः -ता -तं, संज्ञितः -ता -तं, स्मृतः -ता -तं, उदाहृतः -ता -तं, परिकीर्त्तितः -ता -तं, आख्यातः -ता -तं, अनूक्तः -क्ता -क्तं. The following occur at the end of compounds: अभिधः -धा -धं, अभिधानः -ना -नं, नामा -मा -म (न्), नामधेयः -या -यं, आख्यः -ख्या -ख्यं.

Denomination, *s.* नाम *n.* (न्), नामधेयः -यं, अभिधा -धानं -धेयं, संज्ञा, आख्या, अभिख्या, अभिवचनं, लक्षणं, उपाधिः *m.*, ख्यातिः *f.*

Denominative, *a.* अभिधायी -यिनी -यि (न्) -यिकः -का -कं, अभिधेयः -या -यं, नामकारी -रिणी -रि (न्), आख्यायकः -का -कं, संज्ञादायकः -का -कं.

Denominator, *s.* (Giver of a name) नामदाता *m.* (तृ), नामकृत्.—(Of a fraction) हरः, हारः -रकः, हारकाङ्कः; 'reduced to a common denominator,' सवर्णितः -ता -तं.

Denotation, *s.* निर्देशः -शनं, सूचनं, संसूचनं, उपलक्षणं, चिह्नकरणं.

To denote, *v. a.* सूच् (c. 10. सूचयति -यितुं), संसूच्; निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, प्रदिश्, विनिर्दिश्; लक्ष् (c. 10. लक्षयति -यितुं), लक्षीकृ, दृश् in caus. (दर्शयति -यितुं).

Denoted, *p. p.* सूचितः -ता -तं, संसूचितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, लक्षितः -ता -तं, उपलक्षितः -ता -तं, दर्शितः -ता -तं, प्रदर्शितः -ता -तं.

Denoting, denotative, *a.* सूचकः -का -कं, दर्शकः -का -कं, वाचकः -का -कं.

Denouement, *s.* (Of a drama) कार्य्यं, निर्वहणं, निष्ठा.

To denounce, *v. a.* प्रकाशं भर्त्स् (c. 10. भर्त्सयति -यितुं), घोषणापूर्व्वं तर्ज्ज् (c. 1. तर्ज्जति -र्ज्जितुं) or आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं) or अभिशप् (c. 1. -शपति -शप्तुं); अमङ्गलं प्रकाश् in caus. (-काशयति -यितुं); अनिष्टं ख्या in caus. (ख्यापयति -यितुं) or विद् in caus. (वेदयति -यितुं).

Denouncement, *s.* प्रकाशभर्त्सनं, प्रकाशतर्ज्जनं, घोषणापूर्व्वं तर्ज्जनं or आक्रोशनं or अभिशापः, अनिष्टख्यापनं, अमङ्गलघोषणा.

Denouncer, *s.* अनिष्टावेदकः, अनिष्टख्यापकः, अमङ्गलप्रकाशकः, प्रकाशं भर्त्सयिता *m.* (तृ) or तर्ज्जनकृत् or अभिशापकः.

Dense, *a.* घनः -ना -नं, स्थूलः -ला -लं, सान्द्रः -न्द्रा -न्द्रं, पीवरः -रा -रं, सुसंहतः -ता -तं, अविरलः -ला -लं, निविडः -डा -डं, निरन्तरः -रा -रं -रालः -ला -लं, अनन्तरः -रा -रं, दृढसन्धिः -न्धिः -न्धि, निर्व्विवरः -रा -रं, दृढः -ढा -ढं.

Density, *s.* घनता -त्वं, स्थूलता, स्थौल्यं, सान्द्रता, पीवरत्वं, संहतत्वं, निविडत्वं, नैविड्यं, नैरन्तर्य्यं, दृढता, दार्ढ्यं.

Dent, *s.* प्रहारचिह्नं, आघातचिह्नं, भङ्गः, ऊर्म्मिः *f.* *See* Dint.

Dental, *a.* दन्त्यः -न्त्या -न्त्यं, दान्तः -न्ती -न्तं, दन्ती -न्तिनी -न्ति (न्).—(Letter) दन्त्यं, दन्तद्वारा उच्चारितम् अक्षरं.

Dentated, dented, denticulated, *a.* दन्ती -न्तिनी -न्ति (न्), दन्तुरः -रा -रं, अनुक्रकचः -चा -चं, भङ्गुरः -रा -रं.

Dentifrice, *s.* दन्तपवनं, दन्तशोधनं, दन्तधावनं, दन्तशाणं, माधवी, मिशिः *f.*

Dentist, *s.* दन्तचिकित्सकः, दन्तवैद्यः, दन्तचिकित्साजीवी *m.* (न्), दन्तरोगविद्.

Dentition, *s.* दन्तोद्भेदः, दन्तोद्भेदकालः, दन्तवृद्धिः *f.*

To denudate or denude, *v. a.* नग्नीकृ, विवस्त्र (nom. विवस्त्रयति -यितुं), विकोष (nom. विकोषयति -यितुं), उच्छद् (c. 10. -छादयति -यितुं) हृ (c. 1. हरति, हर्त्तुं), शून्यीकृ, रिक्तीकृ; 'a tree of its leaves,' निष्पत्र (nom. निष्पत्रयति -यितुं).

Denudation, *s.* नग्नीकरणं, विवस्त्रीकरणं, विकोषीकरणं, हरणं.

Denuded, *p. p.* नग्नीकृतः -ता -तं, विकोषः -षा -षं, हृतः -ता -तं.

Denunciation, denunciator, *s.* *See* Denouncement, denouncer.

To deny, *v. a.* निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपह्नु, प्रत्याख्या (c. 2. -ख्याति -तुं), अनाख्या, अतिख्या; अपवद् (c. 1. -वदति -दितुं), अपलप् (c. 1. -लपति -पितुं), अपवच् (c. 2. -वक्ति -क्तुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), निरस् (c. 4. -अस्यति, असितुं), अपज्ञा (c. 9. -जानीते -ज्ञातुं), अपदीकृ.

To deobstruct, *v. a.* प्रतिबन्धान् हृ (c. 1. हरति, हर्तुं) or विनी (c. 1. -नयति -नेतुं), निर्व्विघ्न (nom. निर्व्विघ्नयति -यितुं), निर्व्विघ्नीकृ, मुच् (c. 6. मुञ्चति, मोक्तुं), विशुध् in caus. (-शोधयति -यितुं).

Deodand, *s.* ईश्वराय देयं, देवदेयं, देवोपहारः, अपमृत्युप्रायश्चित्तं.

To deoppilate, *v. a.* प्रतिबन्धं or नाहं हृ (c. 1. हरति, हर्तुं), विशोधनं कृ.

Deoppilation, *s.* प्रतिबन्धहरणं, नाहहरणं, विशोधनं, निबन्धनाशनं.

Deoppilative, *a.* नाहघ्नः -घ्नी -घ्नं, प्रतिबन्धहारी -रिणी -रि (न्).

Deosculation, *s.* चुम्बनं, परिरंसा, निन्सणं, निमित्तकं.

To depaint, *v. a.* वर्ण् (c. 10. वर्णयति -यितुं), चित्र् (c. 10. चित्रयति -यितुं).

To depart, *v. n.* (Go away) अपगम् (c. 1. -गच्छति -गन्तुं), व्यपगम्, गम्; अपया (c. 2. -याति -तुं), व्यपया, प्रया, अपे (c. 2. -एति -तुं with अप, अपैति -तुं), व्यपे, विप्रे, वी (व्येति -तुं), अपसृ (c. 1. -सरति -सर्तुं), अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, उत्क्रम्, अपसृप् (c. 1. -सर्पति -सर्प्तुं), चल् (c. 1. चलति -लितुं), प्रस्था (c. 1. -तिष्ठति -स्थातुं), विप्रस्था, सम्प्रस्था, दूरीभू, उज्झ् (c. 6. उज्झति -ज्झितुं).—(Desist from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Die) प्रे (c. 2. -एति -तुं with प्र, प्रैति -तुं), देहम् उत्सृज् (c. 6. -सृजति -स्रष्टुं) or त्यज् (c. 1. त्यजति, त्यक्तुं), शरीराद् अपगम्, विपद् (c. 4. -पद्यते -पत्तुं), लोकान्तरं गम्.

To depart, *v. a.* उत्सृज् (c. 6. -सृजति -स्रष्टुं), त्यज् (c. 1. त्यजति, त्यक्तुं).—(Separate, distribute) वियुज् (c. 7. -युनक्ति -योक्तुं), विभज् (c. 1. -भजति -भक्तुं).

Depart, *s.* अपगमः, व्यपगमः, विगमः, प्रयाणं.—(Death) अपगमः, संस्थितिः *f.*

Departed, *p. p.* गतः -ता -तं, अपगतः -ता -तं, व्यपगतः -ता -तं, निर्गतः -ता -तं, अपेतः -ता -तं, व्यपेतः -ता -तं, प्रयातः -ता -तं, प्रस्थितः -ता -तं, अपसारितः -ता -तं, अपासृतः -ता -तं; 'one who has departed from virtue,' धर्म्मव्यपेतः -ता -तं.—(Dead) प्रेतः -ता -तं, प्रमीतः -ता -तं, व्यतीतः -ता -तं, संस्थितः -ता -तं, निर्वाणः -णा -णं, लोकान्तरगतः -ता -तं, अपविद्धलोकः -का -कं.

Departer, *s.* पृथक्करणद्वारा धातुशोधकः, परिच्छेदेन धातुपरीक्षकः.

Department, *s.* (Allotment, division) विभागः, प्रविभागः, परिच्छेदः, विच्छेदः, भागः.—(Division of science, literature, &c.) देशः, अङ्गं, विषयः, प्रकरणं.—(Office, business) अधिकारः, नियोगः, कर्म्म *n.* (न्).—(Province) देशः, विषयः, मण्डलं, ग्रामजालं.

Departure, *s.* अपगमः, व्यपगमः, विगमः, गमनं, अपायः, प्रयाणं, अपयानं, प्रस्थानं, सम्प्रस्थानं, अपासरणं, अपसरणं, अपक्रमः -मणं, उत्क्रमणं, अत्ययः, निर्गमः, विसर्गः, वियोगः.—(Death) अपगमः, अत्ययः, संस्थितिः *f.*, तनुत्यागः, जीवोत्सर्गः, प्रयाणं.—(Abandonment) त्यागः, निवृत्तिः *f.*, प्रोज्झनं.

To depasture, *v. a.* भक्ष् (c. 10. -भक्षयति -यितुं), संखाद् (c. 1. -खादति -दितुं).

To depauperate, *v. a.* दरिद्रीकृ, कृपणीकृ, कृश (nom. कृशयति -यितुं), कृशीकृ, क्षि in caus. (क्षपयति -यितुं), क्षीणीकृ, दीनं -नां -नं कृ.

Depectible, *a.* श्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, दुःखच्छेद्यः -द्या -द्यं.

To depend, *v. n.* (Hang from) लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, प्रलम्ब्.—(Be dependent on, rest on, rely on) अवलम्ब्, समालम्ब्; आश्रि (c. 1. -श्रयति -ते -यितुं), संश्रि, समाश्रि, उपाश्रि; अधीनः -ना -नं or आयत्तः -त्ता -त्तं अस्, आश्रितीभू; 'The mind depends on the body,' बुद्धिः शरीरम् आश्रयति.—(Be connected with)

सम्बन्ध् in pass. (-बध्यते).—(Depend on another for support) उपजीव् (c. 1. -जीवति -वितुं), अनुजीव्.—(Be in suspense) दोल (nom. दोलायते), विलम्ब्; 'I depend entirely on you,' सर्वं त्वयि समर्पयामि.

Dependance, dependence, *s.* (Reliance) आश्रयः, उपाश्रयः, संश्रयः, समाश्रयः, अयणं, आयः, अवलम्बनं, निष्ठा, तन्त्रता, आशयः, विश्वासः, प्रत्ययः, विश्रम्भः, समाश्वासः; 'mutual dependence,' अन्योन्याश्रयः.—(State of being at the disposal of another) पराधीनता, परायत्तत्वं, पराश्रितत्वं, परवशित्वं, परवशता, परतन्त्रत्वं, पारतन्त्र्यं, अस्वातन्त्र्यं, भक्तिः *f.*—(Connexion) सम्बन्धः -न्धित्वं, अभिसम्बन्धः, प्रबन्धः, प्रसङ्गः, प्रसक्तिः *f.*, अनुषङ्गः, समन्वयः, सम्पर्कः.—(Persons or things of which one has the disposal) भृत्यः, उपजीवी *m.* (न्), स्वद्रव्यं, स्वं.

Dependant, dependent, *a.* (Depending on) आश्रितः -ता -तं, संश्रितः -ता -तं, उपाश्रितः -ता -तं, अवलम्बी -म्बिनी -म्बि (न्), अवलम्बितः -ता -तं, अधीनः -ना -नं, अभ्यधीनः -ना -नं, आयत्तः -त्ता -त्तं, वशः -शा -शं, तन्त्रः -न्त्रा -न्त्रं, निघ्नः -घ्ना -घ्नं, सम्बद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं; 'dependent on kings,' राजसंश्रयः -या -यं; 'dependent on riches,' अर्थनिबन्धनः -ना -नं; 'a king's fortune is dependent on his minister,' सचिवायत्ता राजश्रीः.—(At the disposal of another) पराधीनः -ना -नं, पराश्रितः -ता -तं, परायत्तः -त्ता -त्तं, परतन्त्रः -न्त्रा -न्त्रं, परवशः -शा -शं, परवान् -वती -वत् (त्), उपजीवी -विनी -वि (न्), नाथवान् -वती -वत् (त्), गृह्यकः -का -कं, अस्वतन्त्रः -न्त्रा -न्त्रं.—(Hanging down) लम्बितः -ता -तं, प्रलम्बः -म्बा -म्बं, विलम्बमानः -ना -नं.

Dependant, *s.* आश्रितः, अनुजीवी *m.* (न्), उपजीवी *m.*, भाक्तिकः, भृत्यः, सम्भाव्यः, परिवारः, परायत्तजनः.

Deperdition, *s.* नाशः, विनाशः, क्षयः, अपायः, अपचयः, क्षतिः *f.*, ध्वंसः.

To **depict,** *v. a.* वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, उपवर्ण्, संवर्ण्; विलिख् (c. 6. -लिखति -लेखितुं), आलिख्; निर्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्.

Depicted, *p. p.* वर्णितः -ता -तं, आलिखितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

Depilation, *s.* लोमहरणं, रोमहरणं, निष्केशीकरणं, उत्लुञ्चनं.

Depilatory, *a.* लोमहृत् *m.f.n.*, रोमहारी -रिणी -रि (न्), केशनाशकः -का -कं.

Depilous, *a.* रोमहीनः -ना -नं, लोमरहितः -ता -तं, अकेशः -शा -शं.

Depletion, *s.* शून्यीकरणं, शून्यत्वं -ता, रिक्तता, अपूर्णता, अपूरणं.

Deplorable, *a.* शोचनीयः -या -यं, शोच्यः -च्या -च्यं, विलपनीयः -या -यं, अनुकम्प्यः -म्प्या -म्प्यं, क्रन्दनीयः -या -यं, शोकमयः -यी -यं, दैवोपहतः -ता -तं.

Deplorableness, *s.* शोचनीयता, शोच्यत्वं, दौर्गत्यं, दैवोपहतत्वं.

Deplorably, *adv.* शोचनीयं, अनुकम्पनीयं, शोच्यप्रकारेण, कृपणं.

Deploration, *s.* शोचनं, विलपनं, परिदेवनं, क्रन्दनं, रोदनं, शुक्.

To **deplore,** *v. a.* शुच् (c. 1. शोचति -चितुं), अनुशुच्; विलप् (c. 1. -लपति -पितुं), परिदेव् (c. 1. -देवति -ते -वितुं), क्रन्द् (c. 1. क्रन्दति -न्दितुं), आक्रन्द्; रुद् (c. 2. रोदिति -तुं), अभिक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

Deplorer, *s.* अनुशोचकः, विलापकारी *m.* (न्), परिदेवकः, रोदनकृत्.

To **deploy,** *v. a.* (Troops) सैन्यव्यूहान् विस्तृ in caus. (-स्तारयति -यितुं).

Deplumation, *s.* पक्षोत्पाटनं, पर्णोत्पाटनं, पक्षहरणं, निष्पक्षीकरणं.

To **deplume,** *v. a.* पक्षान् or पर्णान् उत्पट् in caus. (-पाटयति -यितुं) or हृ (c. 1. हरति, हर्तुं), निष्पक्षीकृ, पक्षोलुञ्चनं कृ.

To **depone,** *v. a.* न्यस् (c. 4. -अस्यति -असितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Deponent, *s.* (In law) साक्षी *m.* (न्), प्रमाता *m.* (तृ).—(Verb) अकर्तरि क्रिया, अकर्मकक्रिया, आत्मनेपदे क्रिया.

To **depopulate,** *v. a.* निर्जनीकृ, विजनीकृ, शून्यं कृ, अरण्यं कृ, शून्यारण्यं कृ, नरशून्यं -न्यां -न्यं कृ, उपपीड् (c. 10. -पीडयति -यितुं), बाध् (c. 1. बाधते -धितुं), प्रबाध्, निर्दह् (c. 1. -दहति -दग्धुं), अभिमृद् (c. 1. -मर्दति -र्दितुं).

Depopulation, *s.* निर्जनीकरणं, नरशून्यकरणं, अरण्यकरणं, विप्लवः, उपप्लवः, उपपीडनं, अवमर्दः, उच्छेदनं.

Depopulator, *s.* उपपीडकः, बाधकः, विप्लवकारी *m.* (न्), उच्छेदकः.

To **deport one's self,** *v. a.* चर् (c. 1. चरति -रितुं), आचर्, व्यवहृ (c. 1. -हरति -हर्तुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), वृत्तिम् अनुष्ठा (-तिष्ठति -ष्ठातुं).

Deport, deportment, *s.* वृत्तिः *f.*, व्यवहारः, आचारः, आचरणं, रीतिः *f.*, गतिः *f.*, स्थितिः *f.*, चेष्टितं, चरित्रं, चरितं, उत्साहः.

Deportation, *s.* प्रवासनं, विवासनं, विवासकरणं, प्रव्राजनं.

Deposal, *s.* राज्यभ्रंशः, राज्यप्रभ्रंशः, राज्यभङ्गः, राज्यपातनं.

To **depose,** *v. a.* (Lay down) न्यस् (c. 4. -अस्यति -असितुं), निधा (c. 3. -दधाति -धातुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Degrade from a high station) पदात् or अधिकारात् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or पत् in caus. (पातयति -यितुं).—(In law) स्वयं वद् (c. 1. वदति -दितुं), साक्ष्यं दा (c. 3. ददाति, दातुं), प्रमाणं दा.

Deposed, *p. p.* भ्रष्टराज्यः -ज्या -ज्यं, राज्यभ्रष्टः -ष्टा -ष्टं, राज्यच्युतः -ता -तं.

To **deposit,** *v. a.* न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्, सन्न्यस्, प्रतिन्यस्; निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपनिक्षिप्, विनिक्षिप्; निधा (c. 3. -दधाति -धातुं), आधा, पण् (c. 1. पणते -णितुं), ऋ in caus. (अर्पयति -यितुं), स्था in caus. (स्थापयति -यितुं), न्यासीकृ, आधीकृ.

Deposit, *s.* न्यासः, निक्षेपः, उपन्यासः, उपनिक्षेपः, उपनिधिः *m.*, उपनिधानं, औपनिधिकं, आधिः *m.*, आधानं, अन्वाधिः *m.*, विन्यासः, पणः; 'return of a deposit,' प्रतिदानं.—(Sediment) खलं, किट्टं, शेषः.—(Of a river) कालुष्यं.

Depositary, *s.* न्यासधारी *m.* (न्), न्यासग्राही *m.* (न्), निक्षेपधारी *m.*—(Object of trust) विश्वासस्थानं, विश्वासपात्रं, विश्वासभूमिः *f.*

Deposited, *p. p.* न्यस्तः -स्ता -स्तं, निक्षिप्तः -प्ता -प्तं, उपन्यस्तः -स्ता -स्तं, विन्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, उपनिहितः -ता -तं, आहितः -ता -तं, उपहितः -ता -तं, अर्पितः -ता -तं, स्थापितः -ता -तं, अधिश्रितः -ता -तं, आधीकृतः -ता -तं.

Deposition, *s.* (In law) स्वयमुक्तिः *f.*, साक्ष्यं, साक्षित्वं, प्रमाणं.—(Degradation from sovereignty, &c.) राज्यभ्रंशः, छत्रभङ्गः, राज्यच्युतिः *f.*, पदात् or अधिकारात् प्रभ्रंशनं or पातनं.

Depositor, *s.* निक्षेप्ता *m.* (तृ), न्यासकर्त्ता *m.* (र्त्तृ), आधीकर्त्ता *m.*, स्थापकः.

Depository, *s.* आधारः, निधिः *m.*, निधानं, आशयः, आस्पदं, अधिश्रयः.

Dépôt, *s.* आगारं, युद्धसामग्र्यागारं, सैन्यागारं, सैन्यनिवासस्थानं.

Depravation, *s.* (Act of depraving) दूषणं, भ्रष्टीकरणं.—(State) दुष्टता.

To **deprave,** *v. a.* दुष् in caus. (दूषयति -यितुं), सन्दुष्, प्रतिदुष्; नश् in caus. (नाशयति -यितुं), भ्रंश् in caus. (भ्रंशयति -यितुं), भ्रष्टीकृ; च्यु in caus. (च्यावयति -यितुं), शठीकृ, विकृ; 'to become depraved,' दुष् (c. 4. दुष्यति).

Depraved, *p. p.* दुष्टः -ष्टा -ष्टं, सन्दुष्टः -ष्टा -ष्टं, विप्रदुष्टः -ष्टा -ष्टं, भ्रष्टः -ष्टा -ष्टं, दुर्भावः -वा -वं, दुर्मतिः -तिः -ति, दुराचारः -रा -रं, दुरात्मा -त्मा त्म (न्), पापचेताः -ताः -तः (स्), नष्टधीः -धीः -धि, शठः -ठा -ठं, खलः -ला -लं.

Depraver, *s.* दूषकः, प्रतिदूषकः, दूषणः, नाशकः, भ्रंशकारी *m.* (न्).

Depravity, depravedness, *s.* दुष्टता, विप्रदुष्टता, सन्दुष्टता, दुर्भावता,

दौरात्म्यं, भ्रष्टता, दुराचारत्वं, शाठ्यं, शठता, कुमतिः *f.*, नष्टत्वं, दौर्जन्यं, स्वभावदौर्जन्यं, अधमाचारत्वं.

To DEPRECATE, *v. a.* प्रार्थनाद्वारेण निवृ in caus. (-वारयति -यितुं) or अपवृत् in caus. (-वर्त्तयति -यितुं) or निवृत् in caus.; मा भूयात् or मा भूद् इति प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अमुकदुःखाद् मुक्तिर् भूयाद् इति प्रार्थ्.—(Beg for pardon) मे क्षन्तुम् अर्हसीति प्रार्थ्.

DEPRECATION, *s.* (Prayer against evil) दुःखनिवारणार्थं प्रार्थना or याञ्ञा, मा भूदिति प्रार्थना.—(Begging pardon) क्षमस्व or क्षमेथा इति प्रार्थना.

DEPRECATIVE, DEPRECATORY, *a.* दुःखनिवारणार्थप्रार्थनविशिष्टः -ष्टा -ष्टं, मा भूद् इत्यर्थप्रार्थनाकारी -रिणी -रि (न्), अनिष्टनिवारकः -का -कं.

To DEPRECIATE, *v. a.* अपकृष् (c. 1. -कर्षति -क्रष्टुं), अवमन् (c. 4. -मन्यते -मन्तुं), लघु मन्, लघूकृ, मूल्यं न्यूनीकृ or न्यून (c. 10. -ऊनयति -यितुं) or कन (nom. कनयति -यितुं), or अल्पीकृ, अल्पमूल्यं -ल्यां -ल्यं कृ.

DEPRECIATION, *s.* अपकर्षः -र्षणं, लघूकरणं, न्यूनीकरणं, अवमानं, ह्रासः.

To DEPREDATE, *v. a.* उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिद्रु, उपप्लु (c. 1. -प्लवते -प्लोतुं), विप्लु, अपहृ (c. 1. -हरति -हर्त्तुं), लुण्ट् (c. 1. लुण्टति -ण्टितुं c. 10. लुण्टयति -यितुं), लुठ् (c. 10. लोठयति -यितुं), लोप्त्रं हृ.

DEPREDATION, *s.* उपद्रवः, विप्लवः, उपप्लवः, अपहारः, हरणं, लोप्त्रग्रहणं.

DEPREDATOR, *s.* उपद्रवी *m.* (न्), विप्लवकारी *m.* (न्), अपहारकृत्, हारकः.

To DEPREHEND, *v. a.* (Catch) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्त्तुं), अकस्माद् आसद् (c. 10. -सादयति -यितुं) or उपस्था (c. 1. -तिष्ठति -स्थातुं).—(Find out) ज्ञा (c. 9. जानाति, ज्ञातुं), विद् (c. 2. वेत्ति, वेदितुं), निरूप् (c. 10. -रूपयति -यितुं).

DEPREHENSIBLE, *a.* ग्रहणीयः -या -यं, धरणीयः -या -यं, धीगम्यः -म्या -म्यं.

DEPREHENSION, *s.* अकस्माद्धरणं, अकस्माद्ग्रहणं, अकस्मादासादनं.

To DEPRESS, *v. a.* अवनम् in caus. (-नामयति -यितुं), अपकृष् (c. 1. -कर्षति -क्रष्टुं), अवपीड् (c. 10. -पीडयति -यितुं), पत् in caus. (पातयति -यितुं), अधःपत्; अवसद् in caus. (-सादयति -यितुं), भ्रंश in caus. (भ्रंशयति -यितुं), अवध्वंस् in caus. (-ध्वंसयति -यितुं), अधःकृ, नम्रीकृ.—(Dispirit) विषण्णीकृ, म्लानीकृ, विषद् in caus.

DEPRESSED, *p. p.* अपकृष्टः -ष्टा -ष्टं, अवनामितः -ता -तं, अवसादितः -ता -तं, पातितः -ता -तं, अवगाढः -ढा -ढं, निम्नः -म्ना -म्नं.—(In spirits) विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, विषादी -दिनी -दि (न्), खिन्नः -न्ना -न्नं, दीनमनस्कः -स्का -स्कं.

DEPRESSION, *s.* अपकर्षः -र्षणं, अवनामः, पातनं, अधःपातनं, अपध्वंसः, अवपीडनं.—(Of spirits) विषादः, अवसादः, अवसन्नता, उद्वेगः, खेदः, ग्लानिः *f.*, म्लानिः *f.*, औत्सुक्यं.

DEPRESSOR, *s.* अवनामकः, अपकर्षकः, अवसादकः, अवपीडकः, पातकः.

DEPRIVATION, *s.* हरणं, अपहारः, वियोगः, लोपः, भ्रंशः, हानिः *f.*, अपायः, क्षतिः *f.*, क्षयः, उपक्षयः, अपचयः, च्युतिः *f.*, ध्वंसः, परित्यागः, नाशः.

To DEPRIVE, *v. a.* हृ (c. 1. हरति, हर्त्तुं), अपहृ; भ्रंश् in caus. (भ्रंशयति -यितुं) with abl. of the thing. च्यु in caus. (च्यावयति -यितुं) with abl. c., वियुज् in caus. (-योजयति -यितुं), विप्रयुज् with abl. c.; अपनी (c. 1. -नयति -नेतुं), लुप् (c. 6. लुम्पति, लोप्तुं, caus. लोपयति -यितुं), विनाकृ; 'to be deprived of,' हा in pass. (हीयते), परिहा in pass. with inst. c., भ्रंश (c. 4. भ्रश्यति, भ्रंशितुं) with abl. c., च्यु (c. 1. च्यवते, च्योतुं) with abl. c., वियुज् in pass. (-युज्यते) with inst. c.

DEPRIVED, *p. p.* हृतः -ता -तं, अपहृतः -ता -तं, हीनः -ना -नं, परिहीणः -णा -णं, प्रहीणः -णा -णं, वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, लुप्तः -प्ता -प्तं, रहितः -ता -तं, विरहितः -ता -तं, वर्ज्जितः -ता -तं, विनाकृतः -ता -तं, परित्यक्तः -क्ता -क्तं; 'deprived of one's right,' हृताधिकारः -रा -रं; 'deprived of reason,' नष्टबुद्धिः -द्धिः -द्धि, अपहृतविज्ञानः -ना -नं, लुप्तप्रतिभः -भा -भं; 'deprived of life,' प्रहीणजीवितः -ता -तं.

DEPTH, *s.* गम्भीरता -त्वं, गाम्भीर्य्यं, गभीरता, अगाधता -त्वं, निम्नता, अधोगतत्वं, घनता, नीचता.—(Deep place) गम्भीरस्थानं, नीचपदं, अगाधः, उदरं, गह्वरं; 'depth of hell,' पातालोदरं.—(Abyss) अगाधदरी, अतलस्पर्शरन्ध्रं, नरकः.—(Deep sea) महोदधिः *m.*—(In measurement) वेधः -धनं; 'mean depth,' समवेधः.—(Depth of winter) शिशिरमध्यं, मध्यशिशिरं; 'in the depth of winter,' शीतकालमध्ये.

To DEPURATE, DEPURE, *v. a.* निर्म्मलीकृ, विमलीकृ, शुध् in caus. (शोधयति -यितुं), पू (c. 9. पुनाति, पवितुं), पवित्रीकृ, शुचीकृ, परिष्कृ.

DEPURATE, *a.* निर्म्मलः -ला -लं, विमलः -ला -लं, पूतः -ता -तं, पवित्रः -त्रा -त्रं, शोधितः -ता -तं, शुचिः -चिः -चि, धूतकल्मषः -षा -षं.

DEPURATION, *s.* निर्म्मलीकरणं, मलापकर्षणं, पवित्रीकरणं, शोधनं.

DEPUTATION, *s.* (Act of deputing) नियोजनं, विनियोगः, प्रेरणं.—(Persons deputed) नियोगिनः *m. pl.*, नियुक्ताः *m. pl.*, नियोगिनां समूहः or गणः.

To DEPUTE, *v. a.* नियुज् (c. 7. -युनक्ति -योक्तुं caus. -योजयति -यितुं), विनियुज्, प्रेर् (c. 10. -ईरयति -यितुं), समादिश् (c. 6. -दिशति -देष्टुं), आदिश्.

DEPUTED, *p. p.* नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, विनियुक्तः -क्ता -क्तं, विनियोजितः -ता -तं, प्रेरितः -ता -तं, समादिष्टः -ष्टा -ष्टं.

DEPUTY, *s.* प्रतिनिधिः *m.*, प्रतिपुरुषः, नियोगी *m.* (न्), नियुक्तः, प्रतिहस्तः -स्तकः.

To DERACINATE, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), उत्पट् (c. 10. -पाटयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उत्खन् (c. 1. -खनति -नितुं), समूलोद्धरणं कृ.

To DERAIGN, *v. a.* प्रमाणीकृ, सत्याकृ, स्थिरीकृ, दृढीकृ, उपपद् in caus. (-पादयति -यितुं).

DERAIGNMENT, *s.* प्रमाणीकरणं, सत्यापनं, उपपादनं.—(Apostacy) धर्म्मत्यागः.

To DERANGE, *v. a.* पर्य्यस् (c. 4. -अस्यति -असितुं), व्यस्, विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विक्षुभ् in caus. (-क्षोभयति -यितुं), क्रमं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or उपहन् (c. 2. -हन्ति -न्तुं) or विलुप् (c. 6. -लुम्पति -लोप्तुं), सङ्करीकृ, आकुलीकृ, विभ्रम् in caus. (-भ्रमयति -यितुं).

DERANGED, *p. p.* व्यस्तः -स्ता -स्तं, विक्षिप्तः -प्ता -प्तं, असंस्थितः -ता -तं, अनवस्थितः -ता -तं, अव्यवस्थितः -ता -तं, व्यापन्नः -न्ना -न्नं, भग्नक्रमः -मा -मं, अस्वस्थः -स्था -स्थं, अस्तव्यस्तः -स्ता -स्तं.—(In mind) विपरीतचेताः -ताः -तः (स्), भ्रान्तमनाः -नाः -नः (स्), उन्मत्तः -त्ता -त्तं.

DERANGEMENT, *s.* उत्क्रमः, व्युत्क्रमः, भग्नप्रक्रमः, अक्रमः, असंस्थानं, अव्यवस्था, अनवस्थितत्वं, वैलक्षण्यं, व्यस्तता, विसूचता, विप्लवः, विक्षिप्तता.—(Of mind) चित्तविप्लवः, चित्तविभ्रमः, मतिविपर्य्ययः.

DERELICTION, *s.* त्यागः, परित्यागः, उत्त्यागः, विरहः, उत्सर्जनं, अपायः.

To DERIDE, *v. a.* अवहस् (c. 1. -हसति -सितुं), अपहस्, उपहस्; अपहास्यास्पदीकृ, अवहासभूमिं कृ; भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), उत्स्मि (c. 1. -स्मयते -स्मेतुं), अवगर्ह् (c. 1. -गर्हते -र्हितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

DERIDED, *p. p.* उपहसितः -ता -तं, अवहसितः -ता -तं, विगर्हितः -ता -तं.

DERIDER, *s.* उपहासकः, परिहासकर्त्ता *m.* (र्त्तृ), अवक्षेपकः.

Deridingly, *adv.* परिहासेन, उपहासेन, साक्षेपं, हास्यपुरःसरं.

Derision, *s.* उपहासः, अवहासः, अपहासः, परिहासः, हास्यं, आक्षेपः, उत्प्रासनं, अवज्ञा, अवहेला, अवमानं, अवज्ञा, व्यङ्ग्यं.

Derisive, *a.* परिहासकः -का -कं, हासकरः -रा -रं, अवक्षेपकः -का -कं.

Derivable, *a.* प्रापणीयः -या -यं, आनयनीयः -या -यं, उत्पादनीयः -या -यं, व्युत्पादनीयः -या -यं, निष्पादनीयः -या -यं, यौगिकः -की -कं.

Derivation, *s.* आनयनं, उत्पत्तिः *f.*, व्युत्पत्तिः *f.*, निष्पत्तिः *f.*, अपवाहः. —(Origin) योनिः *f.*, उद्भवः, सम्भवः, प्रभवः, निर्गमः, मूलं.—(Of a word) शब्दोत्पत्तिः *f.*, धातुव्युत्पत्तिः, शब्दयोनिः *f.*

Derivative, *a.* व्युत्पन्नः -न्ना -न्नं, यौगिकः -की -कं, औत्सर्गिकः -की -कं.

Derivative, *s.* व्युत्पन्नशब्दः, उत्पन्नशब्दः, मूलाद् आनीतं यत्किञ्चित्.

To **derive**, *v. a.* मूलाद् आनी (c. 1. -नयति -नेतुं) or निर्णी or नी or अपवह् (c. 1. -वहति -वोढुं), निष्कृष् (c. 1. -कर्षति -क्रष्टुं); उत्पत्तिं कृ, व्युत्पत्तिं कृ; निर्गम् in caus. (-गमयति -यितुं), उद्भू in caus. (-भावयति -यितुं), सम्भू in caus.; निःसृ in caus. (-सारयति -यितुं), जन् in caus. (जनयति -यितुं).—(Communicate by transmission) सञ्चर् in caus. (-चारयति -यितुं).

To **derive**, *v. n.* उत्पद् (c. 4. -पद्यते -पत्तुं), व्युत्पद्, समुत्पद्; जन् (c. 4. जायते, जनितुं), प्रजन्; प्रभू (c. 1. -भवति -वितुं), उद्भू, सम्भू; प्रसृ (c. 1. -सरति -सर्तुं), उद्गम् (c. 1. -गच्छति -गन्तुं), निर्गम्.

Derived, *p. p.* उत्पन्नः -न्ना -न्नं, व्युत्पन्नः -न्ना -न्नं, आनीतः -ता -तं.

Deriver, *s.* व्युत्पत्तिकारकः, आनयनकर्त्ता *m.* (र्तृ), जन्मदाता *m.* (तृ).

To **derogate**, *v. a.* न्यूनीकृ, ऊन् (c. 10. ऊनयति -यितुं), अल्पीकृ, कन (nom. कनयति -यितुं), लघ (nom. लघयति -यितुं), लघूकृ, ह्रस् in caus. (ह्रासयति -यितुं), असूय (nom. असूयति -यितुं).

Derogation, *s.* न्यूनीकरणं, अल्पीकरणं, लघूकरणं, ह्रासः, अपचयः, असूया, अभ्यसूया, अपवादः, विगानं.

Derogatorily, *adv.* असूयया, अभ्यसूयया, सापवादं, अकीर्त्तिकरं.

Derogatory, *a.* लघूकारकः -का -कं, असूयकः -का -कं, अभ्यसूयकः -का -कं, अपवादकः -का -कं, अपयशस्करः -री -रं, अकीर्त्तिकरः -रा -रं, ह्रासकः -का -कं.

Dervise, **dervish**, *s.* तुरुष्कदेशीयः सन्न्यासी or योगी *m.* (न्).

Descant, *s.* (Song) विगीतं, सङ्गीतं, गीतं.—(Discourse) वादः, वार्त्ता, प्रवादः, प्रवचनं, वचनं, अनुकथनं, सङ्कथा, वचनक्रमः, भाषितं.

To **descant**, *v. n.* (Sing) विगै (c. 1. -गायति -गातुं), अनुगै, सङ्गै.—(Discourse at large) सुविस्तरेण वद् (c. 1. वदति -दितुं) or प्रवद्, सुविस्तरं व्याख्या (c. 2. -ख्याति -तुं) or विवरणं कृ.

To **descend**, *v. n.* (Come down) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अवया (c. 2. -याति -तुं), अधो या, अवपत् (c. 1. -पतति -तितुं), अधो गम् (c. 1. गच्छति गन्तुं).—(Fall) पत्, निपत्, प्रपत्, च्यु (c. 1. च्यवते, च्योतुं), प्रच्यु.—(Make hostile incursion) आक्रम् (c. 1. -क्रामति -क्रमितुं), आसद् (c. 10. -सादयति -यितुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं), अभिधाव् (c. 1. -धावति -वितुं).—(Arrive, enter) आगम्, अभिगम्, उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रविश् (c. 6. -विशति -वेष्टुं).—(Be derived from) उत्पद् (c. 4. -पद्यते -पत्तुं), प्रसृ (c. 1. -सरति -सर्त्तुं), प्रभू, निर्गम्.—(Devolve by inheritance) वंशक्रमेण or अन्वयक्रमेण आगम् or आया, पितृसकाशात् प्राप् in pass. (-प्राप्यते -प्तुं).—(Descend into particulars) विस्तरशः or विभागशः or उपवर्णनेन वद् (c. 1. वदति -दितुं), विस्तरेणविवरणं कृ, अनुक्रमेण कृ.

To **descend**, *v. a.* (Make to come down) अवतॄ in caus. (-तारयति -यितुं), अवरुह् in caus. (-रोहयति -यितुं), अवपत् in caus. (-पातयति -यितुं); 'he descends the tree,' द्रुमात् or तरोर् अवतरति or अवरोहति.

Descendant, *s.* सन्तानः -नं, सन्ततिः *f.*, अपत्यं, प्रवरं, प्रजा, सूनुः *m.*, प्रसवः, प्रसूतिः *f.*, तनुः *m.*; 'descendants,' पुत्रपौत्राः *m. pl.*, कुलसन्ततिः *f.*, अपत्यानि *n. pl.*, कुलं, वंशः; 'male descendant,' पुत्रसन्तानः.

Descended, *p. p.* अवतीर्णः -र्णा -र्णं, अवरूढः -ढा -ढं, अधोगतः -ता -तं; 'lineally descended or inherited,' वंशक्रमागतः -ता -तं or क्रमागतः, क्रमायातः -ता -तं, पितृप्राप्तः -प्ता -प्तं, अन्वयागतः -ता -तं.

Descendent, *a.* अवरोही -हिणी -हि (न्), अधोगामी -मिनी -मि (न्), नीचगः -गा -गं, पातुकः -का -कं, अधःपाती -तिनी -ति (न्), नीचाभिमुखः -खा -खं.

Descension, *s.* अवपातः, अधोगतिः *f.*, पातः, पतनं, अधःपतनं, अधःसरणं.

Descent, *s.* (Going downwards) अधोगतिः *f.*, अधोगमः -मनं, अवपातः, अवतारः, अवपतनं, अवतरणं, अवरोहः -हणं, अधोयानं.—(Hostile incursion) अभिक्रमः, अवस्कन्दः, आक्रान्तिः *f.*, प्रयाणं, अभिनिर्याणं.—(Transmission by succession) क्रमागमः, वंशक्रमागमः, क्रमागतत्वं, अन्वयागमः.—(Birth extraction) जन्म *n.* (न्), उत्पत्तिः *f.*, उद्भवः, सम्भवः, वंशः.—(Lineage) सन्ततिः *f.*, अन्वयः, आवलिः *f.*; 'consanguineous descent,' एकशरीरान्वयः, एकशरीरावयवत्वं.

Describable, *a.* वर्णनीयः -या -यं, निर्देश्यः -श्या -श्यं, निर्वचनीयः -या -यं, व्याख्येयः -या -यं, वर्णयितुं शक्यः -क्या -क्यं.

To **describe**, *v. a.* वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, उपवर्ण्, संवर्ण्; निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, समुद्दिश्; विवृ (c. 5. -वृणोति -वरितुं -रीतुं), कथ् (c. 10. कथयति -यितुं), सङ्कथ्; कॄत् (c. 10. कीर्त्तयति -यितुं), अनुकॄत्; निर्वच् (c. 2. -वक्ति -वक्तुं); व्याख्या (c. 2. -ख्याति -तुं), विब्रू (c. 2. -ब्रवीति -वक्तुं), निरूप् (c. 10. -रूपयति -यितुं).

Described, *p. p.* वर्णितः -ता -तं, उपवर्णितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः -ष्टा -ष्टं, समुद्दिष्टः -ष्टा -ष्टं, निरुक्तः -क्ता -क्तं, व्याख्यातः -ता -तं, कथितः -ता -तं, निरूपितः -ता -तं, विवृतः -ता -तं.

Description, *s.* वर्णनं -ना, उपवर्णनं, विवरणं, विवृतिः *f.*, निर्देशः, समुद्देशः, निरुक्तिः *f.*, निर्वचनं, व्याख्या -ख्यानं, निरूपणं, कथनं, यथार्थकथनं.

Descriptive, *a.* निर्देशकः -का -कं, समुद्देशकः -का -कं, वर्णनकृत् *m. f. n.*, वाचकः -का -कं, विवरणकारी -रिणी -रि (न्), यथार्थकथकः -का -कं.

To **descry**, *v. a.* (Perceive at a distance; see) दूरात् आलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं) or अवलोक्, दृश् (c. 1. पश्यति, द्रष्टुं), अनुदृश्, प्रदृश्, परिदृश्; ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, अभिवीक्ष्, प्रेक्ष्, वीक्ष्, निर्वर्ण् (c. 10. -वर्णयति -यितुं), आलक्ष् (c. 10. -लक्षयति -यितुं), उपलक्ष्.—(Find out, discover) ज्ञा (c. 9. जानाति, ज्ञातुं), अवगम् (c. 1. -गच्छति -गन्तुं), निरूप् (c. 10. -रूपयति -यितुं), सूच् (c. 10. सूचयति -यितुं).

Descry, *s.* दूराद् आलोकितं यत्किञ्चिद्, दूरादृष्टं वस्तु.

To **desecrate**, *v. a.* प्रतिष्ठालोपं कृ, संस्कारदूषणं कृ, संस्कारहीनं -नां -नं कृ, अपुण्यं -ण्यां -ण्यं कृ, अपवित्रीकृ, पुण्यत्वं लुप् (c. 6. लुम्पति, लोप्तुं or caus. लोपयति -यितुं), दुष् in caus. (दूषयति -यितुं), व्यभिचर् (c. 1. -चरति -रितुं), कलङ्क (nom. कलङ्कयति -यितुं), मलिनीकृ.

Desecrated, *p. p.* लुप्तप्रतिष्ठः -ष्ठा -ष्ठं, भग्नसंस्कारः -रा -रं, भ्रष्टपुण्यत्वः -त्वा -त्वं.

Desecration, *s.* प्रतिष्ठालोपः, संस्कारदूषणं, पुण्यत्वदूषणं, अपवित्रीकरणं, व्यभिचारः, कलङ्ककरणं, अपुण्यकरणं.

Desert, *s.* (A wilderness) मरुः *m.*, मरुस्थलं -ली, मरुभूमिः *f.*, जङ्गलं, अरण्यं, वनं, ईरिणं, इरिणं, धन्वा *m.* (न्), रोधणं, निर्दर्भः, उसुरं -रूरं.

DES

DESERT, *a.* (Wild) आरण्यः -ण्यी -ण्यं -ण्यकः -का -कं, जङ्गलः -ला -लं, जाङ्गलः -ली -लं, वन्यः -न्या -न्यं, इरिणः -णा -णं, ईरिणः -णा -णं, निर्जनः -ना -नं, निर्जलः -ला -लं, निरालयः -या -यं, शून्यः -न्या -न्यं, खिलः -ला -लं.

Doggish, *a.* श्वशीलः -ला -लं, शौवः -वी -वं, कुक्कुराचारः -रा -रं, श्ववृत्तिः -त्तिः -त्ति, श्वापदः -दी -दं, शौवापदः -दी -दं; 'a doggish fellow,' श्वनरः; 'a doggish life,' श्ववृत्तिः *f.*

Doggishness, *s.* शौवं, श्वशीलता, कुक्कुराचारः, श्वाचारः, पशुता.

Dog-grass, *s.* तृणभेदः, तृणं, कक्षः, घासविशेषः.

Dog-hearted, *a.* श्वहृदयः -या -यं, कुक्कुरहृदयः -या -यं, कठिनहृदयः -या -यं.

Dog-hole, *s.* श्वविलं, श्वगर्त्तः, कुक्कुरगर्त्तः, श्वविवरं, श्वभ्रं, अधमस्थानं.

Dog-keeper, *s.* श्वपालकः, श्वयान् *m.* (त्), श्वागणिकः, श्वपचः.

Dog-kennel, *s.* कुक्कुरालयः, श्वगृहं, कुक्कुरगृहं, कुक्कुरागारं.

Dog-louse, *s.* श्वयूका, कुक्कुरयूका, श्वकीटः, कुक्कुरकीटः.

Dogma, *s.* मतं, तत्त्वं, सूत्रं, विधिः *m.*, सम्मतं, नियमः, आदेशः, निर्देशः, व्यवस्था.

Dogmatic, **dogmatical**, *a.* आदेशकः -का -कं or निर्देशकः, स्वमताभिमानी -निनी -नि (न्), सधर्षं स्वमतवादी -दिनी -दि (न्) or स्वमतावलम्बी -म्बिनी -म्बि (न्), मतसंस्थापनः -ना -नं, नैयमिकः -की -कं, वैधिकः -की -कं, सौत्रः -त्री -त्रं.

Dogmatically, *adv.* आदेशकप्रकारेण, सनिर्देशं, दृढनिश्चयपूर्व्वं, सधर्षं.

Dogmatism, *s.* स्वमताभिमानं, स्वमतसंस्थापनं, सधर्षं स्वमतवादः or स्वमतावलम्बनं, दृढोक्तिः *f.*

Dogmatist, **dogmatiser**, *s.* धर्षपूर्व्वं or गर्व्वपूर्व्वं स्वमतवादी *m.* (न्) or स्वमताभिमानी *m.* (न्) or तत्त्ववादी.

To **dogmatise**, *v. n.* सधर्षं or सगर्व्वं स्वमतं वद् (c. 1. वदति -दितुं), दृढोक्त्या स्वमतं संस्था in caus. (-स्थापयति -यितुं), तत्त्वानि धर्षेण वद.

Dog's ear, *s.* कुक्कुरकर्णः, श्वकर्णः, पुस्तकपत्रकोणे श्वकर्णाकारः पुटः.

Dog-sick, *a.* कुक्कुरवद् वमनकारी -रिणी -रि (न्).

Dog's-meat, *s.* श्वमांसं, कुक्कुरमांसं, विमांसं, कुक्कुराहारः, उच्छिष्टान्नं.

Dog-star, *s.* कुक्कुरसंज्ञा तारा यस्याम् उदितायाम् अत्युष्णकालो भवति.

Dog's-tooth, *s.* श्वादन्तः, श्वदंष्ट्रा, कुक्कुरदन्तः.

Dog-trick, *s.* श्ववृत्तं, श्वचेष्टितं, श्वकर्म्म *n.* (न्), दुश्चेष्टितं, कुचेष्टा.

Dog-weary, *a.* कुक्कुरवत् परिश्रान्तः -न्ता -न्तं, अतिक्लान्तः -न्ता -न्तं.

Doings, *s. pl.* (Things done) चरित्रं, चरितं, चेष्टितं, विचेष्टितं, कृतं, कर्म्म *n.* (न्), विधानं, व्यापारः, चेष्टा, वृत्तं.—(Conduct) व्यवहारः, आचारः, आचरितं, चारित्र्यं, वृत्तिः *f.*, चर्य्या, प्रवृत्तिः *f.*, रीतिः *f.*

Dole, *s.* (That which is dealt, a part, share) भागः, अंशः, विभागः, भाजितं, भाज्यं, उद्धारः, उपहारः, खण्डं, छेदः, भिन्नं, वण्टः.—(Gratuity) पारितोषिकं.—(Grief) शोकः, दुःखं.

To dole, *v. a.* पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं), विभागशः or अंशांशि दा.

Doleful, dolesome, *a.* सशोकः -का -कं, शोचनः -ना -नं, शोकार्त्तः -र्त्ता -र्त्तं, दुःखी -खिनी -खि (न्), समन्युः -न्युः -न्यु, विषादी -दिनी -दि (न्), उद्विग्नः -ग्ना -ग्नं, उग्रः ग्रा -ग्रं.

Dolefully, *adv.* सशोकं, सविषादं, सोद्वेगं, सदुःखं, सोत्कण्ठं, सखेदं, उग्रं.

Dolefulness, dolesomeness, *s.* शोकः, दुःखं, विषादः, विषण्णता, मन्युः *m.*, खेदः, उद्वेगः, अनाह्लादः, उग्रत्वं, उद्विग्नता, ग्लानिः *f.*, मनोग्लानिः *f.*, दुःखित्वं.

Doll, *s.* पुत्रिका, दारुपुत्रिका, पाञ्चालिका, पाञ्चलिका, पाञ्चाली, पुत्तली, दारुगर्भा, दारुस्त्री, शालभञ्जी -ञ्जिका, शालाङ्की, कुरुण्टी, यापा, अञ्जलिकारिका.

Dollar, *s.* (A silver coin) रूप्यमुद्रा, रौप्यमुद्रा.

Dolorific, *a.* दुःखकरः -री -रं, व्यथाकरः -री -रं, पीडाकरः -री -रं.

Dolorous, *a.* सशोकः -का -कं, शोकमयः -यी -यं, दुःखमयः -यी -यं, शोकान्वितः -ता -तं, समन्युः -न्युः -न्यु, खेदान्वितः -ता -तं.

Dolour, dolor, *s.* शोकः, दुःखं, खेदः, मन्युः *m.*, क्लेशः.

Dolphin, *s.* (Kind of sea-fish) समुद्रीयमत्स्यभेदः.—(The constellation) श्रविष्ठा, धनिष्ठा.

Dolt, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, मन्दबुद्धिः, मूर्खः, मूढः, जडः.

Doltish, *a.* जडबुद्धिः -द्धिः -द्धि, मन्दमतिः -तिः -ति, स्थूलः -ला -लं.

Doltishly, *adv.* मूढवत्, जडवत्, मूर्खवत्, जाड्येन, बर्ब्बरवत्.

Doltishness, *s.* स्थूलबुद्धित्वं, मन्दमतित्वं, जडता -त्वं, जाड्यं, मूढता, मूर्खता, निर्बुद्धिता, अविज्ञता.

Domain, *s.* (Territory governed) राष्ट्रं, विषयः, देशः, प्रदेशः.—(Empire) राज्यं.—(Estate, possession) भूमिः *f.*, अधिकारः, आधिकारण्यं, रिक्थं.

Dome, *s.* (Cupola) अर्द्धगोलाकारं प्रासादशृङ्गं or हर्म्यशिखरं.

Domestic, *s.* (One who lives in the family) गृहवासी *m.* (न्), अन्तेवासी *m.* (न्), आन्तर्वेश्मिकः.—(Servant) भृत्यः, भृतकः, अनुजीवी *m.* (न्), गृहदासः, प्रेष्यः, कर्म्मकरः, सेवकः, परिचरः; 'female domestic,' दासी, प्रेष्या.

Domestic, *a.* (Belonging to one's house or family) गृह्यः -ह्या -ह्यं, गृहसम्बन्धी -न्धिनी -न्धि (न्), आन्तर्वेश्मिकः -की -कं, गृहजः -जा -जं, गृहजातः -ता -तं, भृत्यः -त्या -त्यं, आवसथिकः -का -कं; 'domestic affairs,' गृहकार्य्यं, गृहव्यापारः; 'domestic chaplain,' कुलाचार्य्यः, कुलविप्रः; 'domestic contentions,' गृहछिद्रं, गृहभेदः, गृहकलहः; 'domestic duties,' कुलाचारः; 'domestic slave,' गृहदासः -सी; 'bewildered with domestic cares,' गृहमूढधीः.—(Not wild) गृह्यकः -का -कं, ग्राम्यः -म्या -म्यं, ग्रामवासी -सिनी -सि (न्); 'a domestic cock,' गृहकुक्कुटः, ग्रामकुक्कुटः; 'a domestic pigeon,' गृहकपोतकः.—(Staying much at home) गृहासक्तचेताः *m.* (स्), गेहशूरः, गृहप्रियः, गृहवासी *m.* (न्).—(Pertaining to one's country) दैशिकः -की -कं, देश prefixed in comp., अभिन्नदेशीयः -या -यं; 'intestine broil,' जनपदभेदः.

To domesticate, *v. a.* गृह्यकं -कां -कं कृ, गृहे पुष् (c. 10. पोषयति -यितुं).

Domesticated, *p. p.* गृह्यकः -का -कं, गृहपुष्टः -ष्टा -ष्टं, छेकः -का -कं, ग्राम्यः -म्या -म्यं, संस्थः -स्था -स्थं.

Domicile, *s.* गृहं, वासस्थानं, वसतिः *f.*, निवासः, आवासः, अधिवासः, समावासः, अवस्थानं, वेश्म *n.* (न्), आलयः, निलयः, आयतनं.

Domiciled, *p. p.* कृतवासः -सा -सं, कृतालयः -या -यं, समावासितः -ता -तं.

Dominant, *a.* प्रभूतः -ता -तं, प्रभवः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, प्रधानः -ना -नं, प्रबलः -ला -लं, अतिरेकी -किणी -कि (न्), सातिशयः -या -यं, प्रकृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, अधिष्ठाता -त्री -तृ (तृ), अग्रस्थः -स्था -स्थं.

To dominate, *v. n.* प्रभू, अतिरिच् in pass. (-रिच्यते), उद्रिच्, व्यतिरिच्, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अध्यास् (c. 2. -आस्ते -आसितुं), प्रशास् (c. 2. -शास्ति -शासितुं).

Domination, *s.* प्रभुत्वं, प्रभविष्णुता, प्राधान्यं, आधिपत्यं, ईशत्वं, ऐश्वर्य्यं, अधिकारः, राजत्वं, राज्यं, शासनं, प्रशासनं, प्रबलता.

To domineer, *v. n.* धर्षेण शास् (c. 2. शास्ति, शासितुं) or ईश् (c. 2. ईष्टे, ईशितुं), भर्त्सनपूर्व्वम् आधिपत्यं कृ, धृष् (c. 5. धृष्णोति, धर्षितुं).

Domineering, *a.* धर्षी -र्षिणी -र्षि (न्), धृष्टः -ष्टा -ष्टं, भर्त्सनकारी -रिणी -रि (न्), मदोद्धतः -ता -तं, मदोदग्रः -ग्रा -ग्रं, उत्सिक्तः -क्ता -क्तं.

Dominical, *a.* प्रभुदिवसविषयकः -का -कं, विश्रामवारसम्बन्धी -न्धिनी -न्धि (न्); 'dominical letter,' प्रभुवारलाक्षणिको वर्णः, विश्रामवारसूचकम् अक्षरं.

Dominical, *s.* (The Lord's-day) ईश्वरदिवसः, प्रभुदिनं, विश्रामवारः, रविवारः, भट्टारकवारः.

Dominican, *s.* डामिनिकमतावलम्बी सन्यासिविशेषः, योगी *m.* (न्), तपस्वी *m.* (न्).

Dominion, *s.* ऐश्वर्य्यं, राज्यं, राजत्वं, प्रभुत्वं, ईशत्वं, अधिकारः, आधिपत्यं, शासनं.—(Country governed) राष्ट्रं, विषयः, देशः, प्रदेशः.

Domino, *s.* (A long cloak used as a disguise) विडम्बनयोग्यो दीर्घप्रावारः.—(An oblong piece of ivory) शलाका, दन्तादिमयो दीर्घचतुरस्रः.

Don, *s.* आर्य्यः, महाशयः, सुजनः, महानुभावः, प्रधानलोकः, शिष्टलोकः.

Donary, *s.* धर्म्मार्थं दत्तं, ईश्वराय दत्तं वस्तु or द्रव्यं.

Donation, *s.* दानं, प्रदानं, दत्तं, प्रदेयं, सम्प्रदानं, दायः, उपहारः, उपायनं, वितरणं, विसर्ज्जनं, उत्सर्ज्जनं, त्यागः, विश्राणनं, अंहतिः *f.*, प्रदा, दादः, दा, दं, हरणं, प्रतिपादनं, विहापितं, स्पर्शनं.

Donative, *s.* दानं, प्रदानं, वितरणं, विसर्ज्जनं, पारितोषिकं.

Done, *p. p.* कृतः -ता -तं, अनुष्ठितः -ता -तं, आचरितः -ता -तं, निष्पन्नः -न्ना -न्नं, वृत्तः -त्ता -त्तं, सम्पादितः -ता -तं.

Donee, *s.* दानग्राही *m.* (न्), दानग्रहीता *m.* (तृ), देयी *m.* (न्).

Dongeon or donjon, *s.* दुर्गमध्ये सुगुप्तस्थानं, दुर्गगुप्तिः *f.*, दुर्गकोटिः *f.*; दुर्गशिखरं. *See* Dungeon.

Donkey, *s.* गर्द्दभः, खरः, रासभः; 'donkey-cart,' खरयानं; 'bray of a donkey,' खरनादः, खाकारः.

Donor, *s.* दाता *m.* (तृ), प्रदाता, दायकः, दाकः, दादी *m.* (न्), दानकर्त्ता *m.* (तृ).

Doodle, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, दुर्मतिः *m.* अपण्डितम्मन्यः *m.* (न्).

To doom, *v. a.* (Condemn to punishment) दण्ड् (c. 10. दण्डयति -यितुं).—(To death) वधदण्डार्हं -र्हां -र्हं ज्ञा (c. 9. जानाति, ज्ञातुं), वधदण्डाज्ञां कृ.—(Consign) ऋ in caus. (अर्पयति -यितुं), सम्, प्रतिपद् in caus. (-पादयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), नियुज्

(c. 7. -युनक्ति -योक्तुं).—(Destine) प्रकॢप् (c. 10. -कल्पयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं).—(Judge) विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -णयति -णेतुं).

Doom, *s.* (Judgment) विचारः, अन्तिमविचारः.—(Sentence) निर्णयः, आधर्षणं.—(Condemnation) दण्डः -ण्डनं, दण्डाज्ञा, दण्डयोगः.—(State to which one is destined) भवितव्यता, विधिः *m.*, कालनियोगः, विहितदशा, दिष्टं, नियतिः *f.*—(Ruin) अन्तं, क्षयः, नाशः.

Doomed, *p. p.* दण्डितः -ता -तं, प्रकल्पितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, विचारितः -ता -तं, निर्णीतः -ता -तं, नियुक्तः -क्ता -क्तं or कालनियुक्तः.

Doomsday, *s.* विचारदिनं, महाविचारदिनं, सर्व्वलोकविचारणदिवसः.

Doomsday-book, domesday-book, *s.* पूर्व्वकाले ग्लेतद्वीपराजाज्ञया लिखितं सर्व्वक्षेत्रपरिसंख्याकरं पुस्तकं, क्षेत्रसङ्ग्रहपुस्तकं.

Door, *s.* द्वारं, द्वाः *f.* (र्), कपाटः -टं, कवाटः -टं, अररः -री -रिः *m.* अलारः, गृहमुखं, प्रतिहारः, प्रतीहारः.—(Entrance) प्रवेशः -शनं, मुखं, वेशिका, प्रतिहारणं.—(Passage) पथः; 'principal door,' सिंहद्वारं; 'private door,' अन्तर्द्वारं, प्रच्छन्नद्वारं, प्रच्छन्नं; 'back door,' पक्षद्वारं, पक्षकः; 'in doors,' गृहस्थितः; 'out of doors,' गृहबहिःस्थः, स्थानान्तरगतः; 'next door to,' निकटस्थः -स्था -स्थं, अनन्तरवर्त्ती -र्त्तिनी -र्त्ति (न्); 'leaf of a door,' द्वारशाखा.

Door-case, *s.* द्वारपरिगतं काष्ठादि, द्वारमण्डकः.

Door-keeper, *s.* द्वारपालः, द्वारस्थः, द्वाररक्षकः, द्वारी *m.*(न्), द्वाःस्थः, द्वाःस्थितः, द्वाराध्यक्षः, प्रतिहारः, प्रतीहारः -री *f.*

Door-post, *s.* द्वारस्तम्भः, द्वारस्थूणा, द्वारकाष्ठं, द्वारदारु *m.*

Door-sill, *s.* द्वारपिण्डी, देहलिः *f.* -ली, गृहतटी, गृहावग्रहणी, रुण्डिका, उम्बुरः, उदुम्बरः.

Doric, *a.* (Architecture) गृहनिर्म्माणे विशेषमार्गः or रीतिविशेषः.

Dormant, *a.* सुप्तः -प्ता -प्तं, प्रसुप्तः -प्ता -प्तं, शयितः -ता -तं, शयानः -ना -नं, निद्रितः-ता-तं,निद्राणः-णा-णं.—(Concealed)प्रच्छन्नः-न्ना-न्नं,गुप्तः-प्ता-प्तं.

Dormitory, *s.* शय्यागृहं, शयनगृहं, शयनशाला, निद्राशाला, स्वप्ननिकेतनं, विश्रामशाला, शयनागारः.—(Burial-place) श्मशानं, प्रेतवनं, पितृवनं.

Dormouse, *s.* अतिनिद्रालुः क्षुद्रमूषिकभेदः, अतिस्वप्नशीलो मूषिकः.

Dorsal, *a.* पृष्ठ्यः -ष्ठ्या -ष्ठ्यं, पृष्ठसम्बन्धी -न्धिनी -न्धि (न्).

Dorsel, dorser, dosser, *s.* पृष्ठेन वाहनयोग्यः पिटकः or पेटकः or करण्डः.

Dose, *s.* यद् भेषजम् एकवारे रोगिणे देयं or रोगिणा पेयं or निगरणीयं, भेषजमात्रा, औषधमात्रा, रोगियोग्य औषधभागः, देयं, पेयं, पानं; 'a small dose of medicine,' औषधस्य अल्पभागः.

To dose, *v. a.* रोगिणा निगरणीयम् औषधभागं दा, (c. 3. ददाति, दातुं), भेषजं दा, भिषज् (nom. भिषज्यति -ज्यितुं), औषधीकृ.

Dossil, *s.* (Pledget of lint on a sore) विकेशिका.

Dot, *s.* बिन्दुः *m.*, शून्यं, विप्रुट् *f.* (ष्) or विप्रुट्, खं, कणः, अङ्कः.

To dot, *v. a.* बिन्दुना अङ्क् (c. 10. अङ्कयति -यितुं) or चिह्न् (c. 10. चिह्नयति -यितुं).

Dotage, *s.* बालिशबुद्धित्वं, बालिशता, बालिश्यं, बुद्धिनाशः, बुद्धिवैकल्यं, हतबुद्धित्वं, बुद्धिक्षीणता, ज्ञानहानिः *f.*, बुद्धिलोपः, दौर्बल्यं, जीर्णावस्था.—(Excessive fondness) अत्यन्तानुरागः, अत्यन्तप्रेम *n.* (न्).

Dotal, *a.* यौतुकसम्बन्धी -न्धिनी -न्धि (न्), औद्वाहिकः -की -कं, शौल्कः -ल्की -ल्कं, शौल्किकः -की -कं, स्त्रीधनविषयः -या -यं.

Dotard, *s.* बालिशमतिः *m.*, जरातुरः, हतबुद्धिः *m.*, क्षीणबुद्धिः *m.*, बालिशः, अतिवृद्धः.

To dote, *v. n.* (Be silly through age) अतिवृद्धत्वाद् बालिशबुद्धिः -द्धिः -द्धि भू or मुह् (c. 4. मुह्यति, मोहितुं).—(Love to excess) अत्यनुरागवान् -वती -वत् or अत्यन्तानुरक्तः -क्ता -क्तं भू or अस्. 'I dote upon her,' तया अत्यनुरागवान् अस्मि.

Doting, *a.* अत्यनुरागवान् -वती -वत् (त्), अत्यनुरक्तः -क्ता -क्तं.

Dotingly, *adv.* अत्यनुरागेण, अत्यनुरागपूर्व्वं. सात्यनुरागं, सातिस्नेहं.

Dotted, *p. p.* चिह्नितः -ता -तं, अङ्कितः -ता -तं, चित्रितः -ता -तं.

Double, *a.* द्विगुणः -णा -णं, द्वैधः -धी -धं, द्विकः -का -कं, द्विविधः -धा -धं, द्विप्रकारः -रा -रं, द्विगुणसंख्यः -ख्या -ख्यं, द्विगुणपरिमाणः -णा -णं, उभयः -ये *sing.* and *pl.* only, द्वि in comp., as, 'having double leaves,' द्विपर्णः -र्णा -र्णं; 'having a double row of teeth,' उभयतोदन् -दती -दत् (त्) or द्विदन्; 'for a double object,' उभयार्थं.—(Deceitful) विजिह्मः -ह्मा -ह्मं, अनृजुः -जुः -जु, वञ्चकः -का -कं.

Double, *s.* (Twice the quantity) द्विगुणं, द्वैधं, द्विकं, द्वितम्, द्विकृत्वम्.—(Trick) छलं, कपटः -टं, उपायः, माया, व्यपदेशः.—(A turn) विपरिवर्त्तनं.

To double, *v. a.* द्विगुणीकृ, द्विगुण (nom. द्विगुणयति -यितुं), गुणीकृ.—(Fold) पुटीकृ, पुट (nom. पुटयति -यितुं); 'to double a cape,' अन्तरीपं परितो नौकया वह् in pass. (उह्यते); 'to double the fist,' मुष्टिं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To double, *v. n.* द्विगुणीभू.—(Turn in running) विपरिवृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Play tricks) मायां कृ, कुहकं कृ, कपटं कृ, व्यपदिश् (c. 6. -दिशति -देष्टुं).

Doubled, *p. p.* द्विगुणितः -ता -तं, द्विगुणीकृतः -ता -तं, गुणीकृतः -ता -तं. (Folded) पुटितः -ता -तं, पुटीकृतः -ता -तं.

Double-dealer, *s.* द्विव्यापारी *m.* (न्), द्विव्यवहारी *m.* (न्), उभयविधः, द्विकर्म्मा *m.* (न्), मायी *m.* (न्), कपटी *m.* (न्), कापटिकः, असरलः.

Double-dealing, *s.* द्विव्यापारः, द्विव्यवहारित्वं, कपटः, छलं, माया, असारल्यं, शठता, व्याजः, वैदग्ध्यं.

Double-dyed, *p. p.* द्विरञ्जितः -ता -तं, द्विरक्तः -क्ता -क्तं, द्विकषायितः -ता -तं.

Double-edged, *a.* द्विधारः -रा -रं, उभयतस्तीक्ष्णः -क्ष्णा -क्ष्णं.

Double-faced, *a.* द्विमुखः -खी -खं, द्विवदनः -नी -नं, उभयतोमुखः -खी -खं.

Double-formed, *a.* द्विरूपः -पी -पं, द्व्याकारः -रा -रं, द्विप्रकारः -रा -रं.

Double-headed, *a.* द्विशीर्षकः -का -कं, द्विशिराः -राः -रः (स्), द्विमूर्द्धा -र्द्धी -र्द्धं.

Double-meaning, *s.* द्व्यर्थः, सन्दिग्धार्थः, द्विरूपः, उपादानं.

Double-minded, *a.* द्विमनस्कः -स्का -स्कं, द्विमनाः -नाः -नः (स्).

Double-natured, *a.* द्विभावः -वा -वं, द्विधातुः -तुः -तु.

Double-tongued, *a.* द्विजिह्वः -ह्वा -ह्वं, द्विरसनः -ना -नं, मिथ्यावादी -दिनी -दि (न्) or असत्यवादी, अनृतवाक् *m. f. n.*

Doubleness, *s.* द्वैगुण्यं, द्वित्वं, द्वैतं, द्वैविध्यं, उभयत्वं.

Doubler, *s.* द्विगुणकारी *m.* (न्), द्विगुणकृत्, द्विविधकर्त्ता *m.* (र्तृ).

Doublet, *s.* अन्तरीयं, उरोवस्त्रं, उरश्छदः, परिधानं, उरोरक्षणी.

Doubloon, *s.* विदेशीयस्वर्णमुद्राविशेषः.

Doubly, *adv.* उभयतस्, उभयथा, द्विधा, द्विगुणं, द्विविधं.

To doubt, *v. n.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), अभिशङ्क्, आशङ्क्, विशङ्क्, परिशङ्क्, सन्दिह् (c. 2. -देग्धि -ग्धुं), विकॢप् (c. 1. -कल्पते -ल्पितुं c. 10. -कल्पयति -यितुं), संशी (c. 2. -शेते -शयितुं), विचर् in caus. (-चारयति -यितुं), मनसा दोल (nom. दोलायते -यितुं) or आन्दोल (आन्दोलयति -यितुं), सन्देहं कृ.

To doubt, *v. a.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), परिशङ्क्, न विश्वस् (c. 2. -श्वसिति -तुं), न प्रती (c. 2. प्रत्येति -तुं rt. इ), उद्विज् (c. 6. -विजते -जितुं).

Doubt, *s.* सन्देहः, संशयः, शङ्का, आशङ्का, विकल्पः, विकल्पितं, वितर्कः, विशयः, द्वैधं, विचिकित्सा, द्वापरः.—(Uncertainty of mind) चित्त-

विक्षेपः, चित्तान्दोलनं, चित्तविभ्रमः, व्यस्तता, विप्रतिपत्तिः f., अस्थैर्य्यं, अनिर्णयः.—(Suspicion, distrust, fear) शङ्का, अविश्वासः, अप्रत्ययः, भयं.—(Difficulty) शल्यं, दुर्गं, कृच्छ्रं, कष्टं, विषमं, बाधा.—(Objection) बाधः -धकं, उद्ग्राहः; 'case of doubt,' सन्देहपदं; 'cause of doubt,' शङ्कास्पदं; 'in doubt,' दोलायमानः -ना -नं, संशयापन्नः -न्ना -न्नं, शङ्कान्वितः -ता -तं, सशङ्कः -ङ्का -ङ्कं; 'without doubt,' असंशयं.

DOUBTED, *p. p.* सन्दिग्धः -ग्धा -ग्धं, संशयितः -ता -तं, शङ्कितः -ता -तं.

DOUBTER, *s.* संशयिता *m.* (तृ), संशयात्मा *m.* (न्), सन्दिग्धमतिः *m.*, संशयालुः *m.*, सन्देग्धा *m.* (ग्धृ), सन्देहकर्त्ता *m.* (र्त्तृ); संशयकृत्.

DOUBTFUL, *a.* सन्दिग्धः -ग्धा -ग्धं, सांशयिकः -की -कं, शङ्कनीयः -या -यं, सशङ्कः -ङ्का -ङ्कं, ससंशयः -या -यं, संशयापन्नः -न्ना -न्नं, शङ्कान्वितः -ता -तं, संशयस्थः -स्था -स्थं, संशयात्मकः -का -कं, शङ्कामयः -यी -यं, सन्दिहानः -ना -नं, वैकल्पिकः -की -कं, सविकल्पकः -का -कं, विशयी -यिनी -यि (न्).—(Ambiguous) सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः -र्था -र्थं.—(Questionable) आशङ्कनीयः -या -यं, वितर्क्यः -र्क्या -र्क्यं, मीमांस्यः -स्या -स्यं; 'to render doubtful,' सन्दिह् in caus. (-देहयति -यितुं).

DOUBTFULLY, *adv.* ससंशयं, सशङ्कं, सन्देहेन, शङ्कया, सविकल्पं, सवितर्कं.

DOUBTFULNESS, *s.* सन्दिग्धता, सांशयिकत्वं, ससंशयता, शङ्कनीयत्वं.

DOUBTINGLY, *adv.* साशङ्कं, शङ्कापूर्व्वं, शङ्कया, अविश्वासेन, अप्रत्ययात्.

DOUBTLESS, *a.* असंशयः -या -यं, असन्दिग्धः -ग्धा -ग्धं, निःसन्देहः -हा -हं.

DOUBTLESS, DOUBTLESSLY, *adv.* असंशयं, निःसंशयं, निःसन्देहेन, संशयं विना, कः सन्देहः, सुनिश्चितं.

DOUCEUR, *s.* पारितोषिकं, उपप्रदानं, उपायनं, उत्कोचः.

DOUGH, *s.* गुडिका, जलघटितः शक्तुः *m.*, जलसंसृष्टः शक्तुः, मर्द्दितशक्तुः, पिष्टकः, अपूपः.

DOUGHTY, *a.* वीरः -रा -रं, शूरः -रा -रं, विक्रान्तः -न्ता -न्तं, प्रगल्भः -ल्भा -ल्भं.

To DOUSE, *v. a.* जले मज्ज् in caus. (मज्जयति -यितुं) or निमज्ज् or निविश् in caus. (-वेशयति -यितुं).—(Put out) निर्वा in caus. (-वापयति -यितुं).

DOVE, *s.* कपोतः, कपोतिका, पारावतः, कलरवः, कलध्वनिः *m.*, कलकण्ठः.

DOVE-COT, DOVE-HOUSE, *s.* कपोतपालिका, विटङ्कः, कपोतागारः, पारावतालयः.

DOVE-TAIL, *s.* काष्ठसन्धिः *m.*, दारुसीवनं, काष्ठग्रन्थनं, कपोतबालाकारः काष्ठसन्धिः *m.*

DOWAGER, *s.* मृतभर्तृधनभागिनी विधवा, निर्नाथा, रण्डा, मृतभर्तृका.

DOWDY, *s.* (Woman) विरूपी -पिणी, दुर्वेशिनी, दुर्मना, स्थूलरूपी.

DOWER, DOWRY, *s.* (Jointure) स्त्रीधनं, विधवाधनं, स्त्रीवृत्तिः *f.*, स्वामिदत्तं.—(Wife's portion) यौतुकं, यौतकं, युतकं, शुल्कः, औद्वाहिकं, अध्यावाहनिकं.

DOWERED, *a.* यौतुकवती, शुल्किनी, यौतुकप्राप्ता, मृतभर्तृधनभागिनी.

DOWERLESS, *a.* यौतुकहीनः -ना -नं, शुल्कहीनः -ना -नं, निर्धनः -ना -नं.

DOWLAS, *s.* (Coarse cloth) स्थूलपट्टं, स्थूलशाटकः, वराशिः *m.*

DOWN, *s.* (Soft feather) मृदुपक्षः, सुकुमारपक्षः, स्निग्धपर्णः, सुखस्पर्शः पर्णः.—(Fine hair) मृदुलोम *n.* (न्), स्निग्धलोम, सुकुमारलोम.—(Down of the body) अङ्गरुहं, तनुरुहं, लोम *n.* (न्), रोम *n.* (न्), अङ्कुरः.—(Down of plants) तृणलोम, तृणकेशः; 'down of the gourd,' अलाबूकटं.—(Poor hilly land for pasturing sheep) अविप्रचारयोग्यं पर्व्वतीयमरुस्थलं, तृणासपर्व्वतः, निम्नेनपर्व्वतः.

DOWN, *prep.* अव, अधस्; 'thrown down,' अवपातितः -ता -तं, अधःपातितः -ता -तं, अवक्षिप्तः -प्ता -प्तं, अधःक्षिप्तः -प्ता -प्तं; 'put down,' अधःकृतः -ता -तं; 'fallen down,' अधःपतितः -ता -तं; 'gone down,' अधोगतः -ता -तं; 'laid down,' अवतारितः -ता -तं; 'hanging down,' अवलम्बमानः -ना -नं; 'to sit down,' उपविश् (c. 6 -विशति -वेष्टुं); 'down to,' पर्य्यन्तं, यावत् affixed, as, 'down to the present time,' अधुना यावत्.

DOWN, *adv.* अधस्, अधस्तात्, नीचैः, अधोऽधस् अधोभागं प्रति.—(Tending down) अवाक्, अवाचीनं, अवकटं.—(At the bottom) अधःस्थः -स्था -स्थं; 'ups and downs,' पातोत्पाताः *m. pl.*

DOWN-CAST, *a.* अवसन्नः -न्ना -न्नं, विषण्णः -ण्णा -ण्णं, विषण्णवदनः -ना -नं, अवनतः -ता -तं, नतमुखः -खी -खं, अधोमुखः -खी -खं, अधोवदनः -ना -नं, अवाङ्मुखः -खी -खं, अधोदृष्टिः -ष्टिः -ष्टि, दीनमुखः -खी -खं, विमुखः -खा -खं, दीनमनाः -नाः नः (स्), दीनचेतनः -ना -नं.

DOWNFALL, *s.* ध्वंसः, प्रध्वंसः, क्षयः, परिक्षयः, नाशः, विनाशः, अत्ययः, व्ययः, उच्छेदः, उत्पाटनं, अधःपतनं.

DOWNFALLEN, *a.* अधःपतितः -ता -तं, परिक्षीणः -णा -णं, ध्वंसितः -ता -तं.

DOWNHEARTED, *a.* विषण्णः -ण्णा -ण्णं, दीनमनाः -नाः -नः (स्) or उद्विग्नमनाः or दुर्मनाः, दीनमनस्कः -स्का -स्कं, दीनचेतनः -ना -नं, म्लानः -ना -नं, खिद्यमानः -ना -नं, उत्साहहीनः -ना -नं.

DOWNHILL, *s.* प्रवणभूमिः *f.*, पातुकभूमिः, उत्सङ्गः, स्थानं क्रमशोऽधोगम्यं.

DOWNLOOKED, *a.* अधोदृष्टिः -ष्टिः -ष्टि, अधोमुखः -खी -खं, अधोवदनः -ना -नं, अवाङ्मुखः -खी -खं, नम्रमुखः -खी -खं, नतमूर्द्धा -र्द्धा -र्द्ध (न्).

DOWNLYING, *s.* शयनकालः, शय्यागमनसमयः, विश्रामकालः.

DOWNLYING, *a.* प्राप्तप्रसवकाला, आसन्नप्रसववेदना, प्राप्तशयनकाला.

DOWNRIGHT, *adv.* (Straight down) अवक्रं, अजिह्मं, अकुटिलं, अविलोमं, अधोऽधस्, अवाक्.—(Plainly) व्यक्तं, सुव्यक्तं, भिन्नार्थं, स्पष्टं.—(Completely) सु or अति prefixed, सम्यक्, सर्व्वतस्, अखिलेन.

DOWNRIGHT, *a.* (Plain) स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, सुस्पष्टः -ष्टा -ष्टं, सुव्यक्तः -क्ता -क्तं.—(Direct) अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, अकुटिलः -ला -लं.

DOWNSITTING, *s.* उपवेशः -शनं, समुपवेशनं, विश्रामः.

DOWNWARD, *a.* अधस्तनः -नी -नं, अधोगामी -मिनी -मि (न्), अवाङ् -वाची -वाक् (च्), अवाचीनः -ना -नं, अवकटः -टा -टं.—(Declivous) प्रवणः -णा -णं, पातुकः -की -कं.

DOWNWARD, DOWNWARDS, *adv.* अव prefixed, अधस्, अधोऽधस् अधस्तात्, अवाक्, अवाचीनं, अवकटं; 'looking downwards,' अधोदृष्टिः *m. f.*; 'going downwards,' अधोगामी -मिनी -मि (न्).

DOWNY, *a.* (Covered with down or soft hair) मृदुलोमवान् -वती -वत् (त्), मृदुलोमा -मा -म (न्), स्निग्धपर्णः -र्णा -र्णं.—(Soft) सुखस्पर्शः -र्शा -र्शं, कोमलः -ला -लं, मृदुः -द्वी -दु, सुकुमारः -रा -रं.

DOWRY, *s.* यौतुकं, शुल्कः. *See* DOWER.

DOWSE, *s.* आस्फोटः -टनं, चपेटिका, तलप्रहारः, कराघातः, चपेटाघातः.

To DOZE, *v. n.* निद्रा (c. 2. -द्राति -तुं), स्वप् (c. 2. स्वपिति, स्वप्तुं), प्रस्वप्, निमील् (c. 1. -मीलति -लितुं), शी (c. 2. शेते, शयितुं), निद्रां कृ, अल्पनिद्रां कृ, ईषन्निद्रां कृ.

DOZEN, *s.* and *a.* द्वादश *m. f. n.* (न्), द्वादशकः -का -कं, द्वादशसंख्यकः -का -कं.

DOZER, *s.* निद्रालुः, निद्रायमाणः, ईषन्निद्राकृत् *m.*, शायी *m.* (न्).

DOZINESS, *s.* निद्रा, निद्राशीलत्वं, शिशयिषा, निद्रालुत्वं, शयालुता.

DOZY, *a.* निद्रालुः -लुः -लु, शिशयिषुः -षुः -षु, स्वप्नशीलः -ला -लं, निद्राशीलः -ला -लं, सुषुप्सुः -प्सुः -प्सु, तन्द्रः -न्द्री -न्द्रं, निद्रालसः -सा -सं.

DRAB, *s.* (Low woman) बन्धकी, कुलटा, वेश्या, भ्रष्टा, व्यभिचारिणी.—(Brown cloth) कपिशवस्त्रं.

DRAB, *a.* (Dun-coloured) कपिशः -शा -शं, कपिलः -ला -लं, पिङ्गलः -ला -लं.

Drachm, drachma, *s.* (Silver coin) रूप्यमुद्राविशेषः.—(Eighth part of a particular weight) विशेषपरिमाणस्य पादार्द्धं.

Draff, *s.* उच्छिष्टं, शेषं, भुक्तावशेषं, शेषान्नं, मलं, खलं, किट्टं, असारः.

Draffish, draffy, *a.* मलिनः -ना -नं, खली-लिनी-लि(न्), असारः -रा -रं.

Draft, *s.* (Order for money) हुण्डिका, हुण्डिकापत्रं. *See* Draught.

To **drag**, *v. a.* कृष् (c. 1. कर्षति c. 6. कृषति, क्रष्टुं, कर्ष्टुं), आकृष्, हृ (c. 1. हरति -ते, हर्त्तुं).—(Drag off, drag away) अपकृष्, अवकृष्, व्यपकृष्, अपहृ, व्यपहृ.—(Drag out) उत्कृष्, निष्कृष्, उद्धृ, निर्हृ, उत्पट् in caus. (-पाटयति -यितुं).

To **drag**, *v. n.* कृष् in pass. (कृष्यते), आकृष्.—(Proceed slowly) विलस् (c. 1. -लसते -सितुं).

Drag, *s.* (Instrument for dragging) आकर्षणी, आकर्षणयन्त्रं.—(Car) रथः, क्रीडारथः, चक्रयानं.

Dragged, *p. p.* कृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं, अपकृष्टः -ष्टा -ष्टं, हृतः -ता -तं.

To **draggle**, *v. a.* पङ्केन दुष् in caus. (दूषयति -यितुं), कर्द्दमे लुठ् in caus. (लोठयति -यितुं), कर्द्दमान्तरेण कृष् (c. 1. कर्षति, क्रष्टुं).

To **draggle**, *v. n.* कर्द्दमे लुठ् (c. 6. लुठति -ठितुं), कर्द्दमलोठनाद् मलिनीभू, पङ्कान्तरेण कृष् in pass. (कृष्यते).

Draggle-tail, *s.* अपरिष्कृता स्त्री, अविनीतवेशिनी.

Drag-net, *s.* आकर्षकजालं, आकर्षणी, नदीतले आकर्षणयोग्यं जालं.

Dragon, *s.* नागः, व्यालः, अहिः *m.*, भुजङ्गमः, पन्नगः, पक्षयुक्तः सर्पः.

Dragon-like, *a.* नागरूपः -पी -पं, व्यालवद् उग्रस्वभावः -वा -वं.

Dragoon, *s.* अश्वारूढः सैन्यः, अश्वारोही योद्धा *m.* (द्धृ), सादी *m.* (न्).

To **dragoon**, *v. a.* देशम् अश्वारूढसैन्येन विप्लुतं कृ.

Drain, *s.* जलनिर्गमः, जलमार्गः, नालः, प्रणालः, नाली, प्रणाली, परीवाहः, परिवाहः, सारणिः *f.* -णी, जलोच्छ्वासः, उदकगमनमार्गः, जलवाहनी, कर्द्दमाटकः, सङ्करः, भ्रमः, वाहसः; 'a village drain,' ग्रामसङ्करः.

To **drain**, *v. a.* (Draw off gradually) क्रमशो निःसृ in caus. (-सारयति -यितुं) or निर्गम् in caus. (-गमयति -यितुं) or निष्कृष् (c. 1. -कर्षति -क्रष्टुं) or आकृष् or अपवह् (c. 1. -वहति -वोढुं) or परिवह् or स्रु in caus. (स्रावयति -यितुं) or निःस्रु or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Dry up, exhaust) शुष् in caus. (शोषयति -यितुं), उच्छुष्, विशुष्, संशुष्, शुष्कीकृ.—(Drink up) आपा (c. 1. -पिबति -पातुं), प्रपा, परिपा.

Drained, *p. p.* शोषितः -ता -तं, उच्छोषितः -ता -तं, परिवाहितः -ता -तं, आपीतः -ता -तं, शुष्कीकृतः -ता -तं, रेचितः -ता -तं, नीरसीकृतः -ता -तं.

Drake, *s.* हंसः, कलहंसः, राजहंसः, कादम्बः, वरटः, कारण्डवः.

Dram, *s.* (A small quantity) अल्पिका, अल्पभागः.—(A draught of spirituous liquor) सुरापानं, शुण्डामात्रा, सुरामात्रा.—(Drink to give courage) वीरपाणं.—(Spirituous liquor) शुण्डा, शीधुः *m.* -धु *n.* सुरा, वारुणी, मदिरा, हाला; 'dram-shop,' शुण्डापानं; 'keeper of one,' शौण्डिकः -की *f.*

Dram-drinker, *s.* सुरापः -पी *f.*, शुण्डापायी -यिनी *f.* (न्), शीधुपः -पी.

Drama, *s.* नाटकः, प्रकरणं, रूपं -पकं, यात्रा. The following are various kinds: भाणः, व्यायोगः, समवाकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनं.—(Minor drama) उपरूपकं. The following are various kinds: नाटिका, त्रोटकं, गोष्ठी, सट्टकं, नाट्यरासकः, प्रस्थानं, उल्लाप्यः, काव्यं, प्रेङ्खणं, रासकं, संलापकं, श्रीगदितं, शिल्पकं, विलासिका, लासिका, दुर्मल्लिका, प्रकरणिका, हल्लीशं, भाणिका.—(The science or art of acting) नाट्यं, नटचर्य्या.

Dramatic, dramatical, *a.* नाटकीयः -या -यं, नाटकविषयः -या -यं, काव्यशास्त्रीयः -या -यं, यात्रिकः -की -कं; 'dramatic language,' नाट्योक्तिः *f.*; 'dramatic rules,' नाट्यधर्म्मिका; 'dramatic representation,' नटचर्य्या.

Dramatically, *adv.* नाट्यधर्म्मानुसारात्, नाटकरूपेण, काव्यशास्त्रानुसारेण.

Dramatis-personæ, *s.* नटनामानि *n. pl.*, नटानां नामावलिः *f.*

Dramatist, *s.* नाटकरचकः, नाटककर्त्ता *m.* (र्त्तृ), काव्यशास्त्रज्ञः, रूपकनिबन्धा *m.* (न्धृ).

Drap, *s.* वस्त्रं, वसनं, पटः, चेलः -लं, चैलं, शाटकः -कं.

Draper, *s.* वस्त्रविक्रेता *m.* (तृ), पटविक्रयी *m.* (न्), वस्त्रवाणिज्यकारी *m.* (न्).

Drapery, *s.* (The trade) वस्त्रादिक्रयविक्रयः, वस्त्रकर्म्म *n.* (न्), वस्त्रवाणिज्यं.—(Cloth) वस्त्रं, पटः, वासः *n.* (स्).—(Dress of a picture, &c.) प्रच्छदपटः, परिच्छदः, वसनं, अम्बरं.

Draught, *s.* (Act of drinking) पानं.—(Quantity drunk at once) पीतं, पेयं, पानं, एकपानं; 'a draught of milk,' पयःपानं.—(Abstract) सङ्ग्रहः, सारः, वस्तु, वस्तुमात्रं.—(Delineation, sketch) आलेख्यं, आलेखनं, पाण्डुलेख्यं, चित्रारम्भः, वस्तुमात्रं.—(Picture drawn, resemblance) चित्रं, उपमा -मानं, प्रतिमानं, प्रतिमूर्त्तिः *f.*—(Detachment from the main army) महासैन्यमध्याद् आनीतः सैन्यगुल्मः.—(Sewer, drain) सङ्करः, कर्द्दमाटकः.—(Draught of a ship) यत् जलपरिमाणं नावं प्लावयति.—(Order for money), *See* Draft. (Act of drawing) आकर्षणं, आकृष्टिः *f.*; 'a draught ox,' शाकटः, प्रासङ्ग्यः, प्राग्भारः.

Draught-board, *s.* अष्टापदं, शारिफलं -लकं, नयपीठी, पञ्चनी, पञ्चमी, पञ्चारी.

Draught-horse, *s.* शाकटः -टिकः -टीनः, रथ्यः, प्रवहणवाजी *m.* (न्).

Draughts, *s.* अष्टापदक्रीडा, शारिक्रीडा; 'a piece at draughts,' शारिः *m.*, शारः, सारिः *m.*, सारः, सारिका, जतुपुत्रकः, खेलनी -लिनी, नयः; 'moving a piece at draughts,' परिणायः, परीणायः.

Draughtsman, *s.* लेखकः, आलेख्यकारः, चित्रकारः, चित्रकरः.

To **draw**, *v. a.* (Pull along) कृष् (c. 1. कर्षति c. 6. कृषति -ते, क्रष्टुं, कर्ष्टुं), आकृष्, समाकृष्, परिकृष्, प्रतिकृष्, संकृष्.—(Drag forcibly) हृ (c. 1. हरति, हर्त्तुं).—(Attract) आकृष्, समाकृष्, प्रतिकृष्, समुपकृष्; अभिप्रणी (c. 1. -णयति -णेतुं); 'she draws the eyes of all,' सर्व्वचक्षूंषि मुष्णाति.—(Lead, induce) आनी, अनुनी.—(Win conciliate) आराध् (c. 10. -राधयति -यितुं), अभिराध्, अनुरञ्ज् (c. 10. -रञ्जयति -यितुं).—(Receive, take) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), लभ् (c. 1. लभते, लब्धुं), उपलभ्, आदा, उपादा.—(Cause liquid to flow) स्रु in caus. (स्रावयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं c. 10. मोचयति -यितुं) or मोक्ष् (c. 10. मोक्षयति -यितुं) or अवसिच् (c. 6. -सिञ्चति -सेक्तुं); 'draw blood,' रक्तं स्रु.—(Close curtains) तिरस्करिणीं or यवनिकां संवृ (c. 5. -वृणोति -वृणुते -वरितुं -रीतुं) or सम्पुटीकृ.—(Unclose curtains) तिरस्करिणीं विवृ or विततीकृ.—(Represent, form a picture) लिख् (c. 6. लिखति, लेखितुं), आलिख्, अभिलिख्; चित्र् (c. 10. चित्रयति -यितुं).—(Describe) वर्ण् (c. 10. वर्णयति -यितुं).—(Unsheath a sword) खड्गं विकोष (nom. -कोषयति -यितुं) or कोषाद् निःसृ in caus. (-सारयति -यितुं) or विकोषीकृ.—(Inhale) श्वस् (c. 2. श्वसिति -तुं), आश्वस्, प्राण् (c. 2. प्राणिति -तुं, rt. अन् with प्र).—(Suck the breast) स्तनं पा (c. 1. पिबति, पातुं), धे (c. 1. धयति, धातुं).—(Extract) निष्कृष्, उत्कृष्, निर्हृ.—(Extend, lengthen) तन् (c. 8. तनोति -नितुं), विस्तृ in caus. (-स्तारयति -यितुं), द्राघ् nom. (द्राघयति -यितुं).—(Utter drawlingly) दीर्घोच्चारणं कृ.—(Bend a bow) धनुर् विस्फुर् in caus. (-स्फारयति

-यितुं) or आयम् (c. 1. -यच्छति -यन्तुं).—(Derive) आनी, निष्कृष्, अपवह् (c. 1. -वहति -वोढुं).—(Cause to come out) निःसृ in caus. (-सारयति -यितुं), निर्गम् in caus. (-गमयति -यितुं), उद्भू in caus. (-भावयति -यितुं).—(Draw water) जलम् उत्तुल् (c. 10. -तोलयति -यितुं).

To DRAW-AWAY, *v. a.* अपकृष्, अपाकृष्, व्यपकृष्, व्यपाकृष्, अवकृष्, विकृष्, अपनी (c. 1. -नयति -नेतुं), व्यपनी, अपहृ (c. 1. -हरति -हर्त्तुं).

To DRAW-BACK, *v. a.* प्रतिकृष्, प्रत्यादा, प्रत्याहृ (c. 1. -हरति -हर्त्तुं), प्रतिसंहृ, प्रतिनी (c. 1. -नयति -नेतुं), प्रत्यानी.

To DRAW-DOWN, *v. a.* (Bring on, produce) आवह् (c. 1. -वहति -वोढुं), उत्पद् in caus. (-पादयति -यितुं), जन् (c. 10. जनयति -यितुं).

To DRAW-IN, *v. a.* संहृ (c. 1. -हरति -हर्त्तुं), प्रतिसंहृ, प्रत्याहृ, उपसंहृ.

To DRAW-OFF, *v. a.* अपकृष्, अपाकृष्, व्यपकृष्, अवकृष्, विकृष्, अपहृ, व्यपहृ, अपनी, व्यपनी, विनी.—(Cause liquid to flow) स्रु in caus. (स्रावयति -यितुं), मुच् (c. 6. मुञ्चति, मोक्तुं).

To DRAW-ON, *v. a.* आकृष्, समाकृष्, समुपकृष्, आनी, अभिप्रणी.—(Bring on, cause) आवह् (c. 1. -वहति -वोढुं), उत्पद् in caus. (-पादयति -यितुं).

To DRAW-OVER, *v. a.* (Induce) अनुनी, आकृष्, प्रोत्सह् in caus. (-साहयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं).

To DRAW-OUT, *v. a.* (Extract) निष्कृष्, उत्कृष्, आकृष्, निर्हृ, उद्धृ, उद्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), निर्दुह् (c. 2. -दोग्धि -ग्धुं).—(Extend, lengthen) तन् (c. 8. तनोति -नितुं), वितन्, व्यातन्, विततीकृ, विस्तृ in caus. (-स्तारयति -यितुं), दीर्घीकृ, द्राघ (nom. द्राघयति -यितुं).—(Beat out metal) उद्वर्त्तनं कृ.—(Array an army) सैन्यं व्यूह् (c. 1. -ऊहते -हितुं), व्यूहेन रच् (c. 10. रचयति -यितुं), पंक्तिक्रमेण रच्.

To DRAW-TOGETHER, *v. a.* समाहृ, संहृ, सङ्ग्रह्, एकीकृ, समानी, समूह् (c. 1. ऊहते -हितुं).

To DRAW-UP, *v. a.* (Lift, raise) उत्तुल् (c. 10. -तोलयति -यितुं), उद्धृ, उत्कृष्, उद्वह् (c. 1. -वहति -वोढुं).—(Compose in writing) लिख् (c. 6. लिखति, लेखितुं), रच् (c. 10. रचयति -यितुं), विरच्, निबन्ध् (c. 9. -बध्नाति -बन्धुं).

To DRAW, *v. n.* (As a beast of burden) कृष् (c. 1. कर्षति c. 6. कृषति -ते, क्रष्टुं).—(As a weight) कृष्, आकृष्.—(Contract) सङ्कुच् in pass. (-कुच्यते), सङ्कोचम् इ (c. 2. एति -तुं), संहृ in pass. (-ह्रियते), संक्षिप् in pass. (-क्षिप्यते).—(Cause suppuration) पूयं or पूयत्वं or पाकं जन् in caus. (जनयति -यितुं) or उत्पद् in caus. (-पादयति -यितुं).

To DRAW-BACK, DRAW-OFF, *v. n.* अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, अपसृ (c. 1. -सरति -सर्त्तुं), अपया (c. 2. -याति -तुं), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रतिनिवृत्, पार्श्वे परिवृत्, परावृत्, पलाय् (c. 1. पलायते -यितुं), अवस्था (c. 1. -तिष्ठति -स्थातुं).

To DRAW-NEAR, DRAW-ON, *v. n.* (Approach) उपस्था (c. 1. -तिष्ठति -स्थातुं), उपवृत् (c. 1. -वर्त्तते -र्त्तितुं), आगम् (c. 1. -गच्छति -गन्तुं), उपागम्, आया (c. 2. -याति -तुं).

DRAWBACK, *s.* (Deduction) उद्धारः, उद्धृतभागः, भागप्रतिदानं.—(Loss of advantage) हानिः *f.*, क्षतिः *f.*, अपचयः, अपचितिः *f.*, अपायः.

DRAW-BRIDGE, *s.* जङ्गमसेतुः *m.*, चलसेतुः *m.*, लघुसेतुः यो विक्रमम् उत्तोलयितुं वा शक्यते.

DRAWER, *s.* कर्षकः, आकर्षकः.—(A sliding case) चलकोष्ठः, चलकोष्ठकं, सम्पुटः -टकः, भाजनं.

DRAWERS, *s. pl.* (For the legs) कञ्चुकः, शाटकः, कटिवस्त्रं, कटीपटः, जङ्घापरिधानं.

DRAWING, *s.* (Act of pulling) कर्षः -र्षणं, कृष्टिः *f.*, आकर्षः -र्षणं, आकृष्टिः *f.*; 'drawing of water,' जलोत्तोलनं.—(Representation) चित्रं, चित्रलेखा -लिखनं, चित्रफलकः, आलेख्यं, वर्त्तिकारेखा, प्रतिमानं, प्रतिमा, प्रतिरूपं.—(Art of drawing) चित्रकर्म्म *n.* (न्), चित्रविद्या.

DRAWING-MASTER, *s.* चित्रकर्म्मविद् *m.* चित्रविद्योपदेशकः. चित्रलिखनविद्याज्ञः.

DRAWING-ROOM, *s.* दर्शनशाला, दर्शनगृहं, उपवेशनशाला.—(Of a king) राजदर्शनं.

To DRAWL, *v. n.* दीर्घोच्चारणेन वद् (c. 1. वदति -दितुं), दीर्घोदाहरणं कृ, मन्दं मन्दं वाक्यानि उच्चर् in caus. (-चारयति -यितुं).

DRAWLING, *s.* दीर्घोच्चारणं, दीर्घोदाहरणं, मन्दोच्चारणं, दीर्घव्याहरणं.

DRAWN, *p. p.* (Pulled) कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं.—(Delineated) आलिखितः -ता -तं, अभिलिखितः -ता -तं, चित्रितः -ता -तं.—(Unsheathed) विकोषः -षा -षं, विकोषीकृतः -ता -तं, उल्लसितः -ता -तं, कोषान्निःसारितः -ता -तं.—(Drawn up, lifted) उत्तोलितः -ता -तं, उद्वाहितः -ता -तं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं. (Drawn up in array) व्यूढः -ढा -ढं, विन्यस्तः -स्ता -स्तं, व्यूहेन रचितः -ता -तं, श्रेणीबद्धः -द्धा -द्धं.—(Equal) समानः -ना -नं, तुल्यबलः -ला -लं; 'a cart drawn by a horse,' अश्वयुक्तः or अश्वप्रयुक्तः शकटः; 'a chariot drawn by white horses,' श्वेतहयैर् युक्तो रथः.

DRAW-WELL, *s.* गम्भीरकूपः, जलकूपी, उदकाधारः.

DRAY, *s.* शकटः -टं, गन्त्री, गन्त्रीरथः, चक्रयानं, यातुरं, अड्डगवं.

DRAY-HORSE, *s.* शाकटः, शाकटिकवाजी *m.* (न्), शकटाश्वः.

DRAY-MAN, *s.* शकटवाहकः, शाकटिकः, गन्त्रीवाहकः, यातुरिकः.

DREAD, *s.* त्रासः, सन्त्रासः, साध्वसं, भयं, भीतिः *f.*, भीष्मं, भीषणं.

DREAD, *a.* त्रासकरः -री -रं, भीषणः -णा -णं, भीमः -मा -मं.

To DREAD, *v. a.* and *n.* भी (c. 3. बिभेति, भेतुं) with abl. or gen. c. So also प्रभी, विभी, त्रस् (c. 4. त्रस्यति, त्रसितुं), वित्रस्, उद्विज् (c. 6. -विजते -जितुं).

DREADFUL, *a.* भयङ्करः -री -रं, भयानकः -का -कं, दारुणः -णा -णं, घोरः -रा -रं, भीमः -मा -मं, भयावहः -हा -हं, त्रासकरः -रा -रं, उग्रः -ग्रा -ग्रं, भीरुमयः -यी -यं, भैरवः -वा -वं, सुभैरवः -वा -वं, रौद्रः -द्री -द्रं, घोरदर्शनः -ना -नं, उद्वेजनीयः -या -यं.

DREADFULLY, *adv.* दारुणं, घोरं, भयानकं, उग्रं, भैरवं, रौद्रं.

DREADFULNESS, *s.* घोरत्वं, दारुणता, दारुण्यं, उग्रत्वं, रौद्रता.

DREADLESS, *a.* त्रासहीनः -ना -नं, निःसाध्वसः -सा -सं, निर्भयः -या -यं.

DREAM, *s.* स्वप्नः, स्वप्नदर्शनं, स्वप्नसृष्टिः *f.*, स्वप्नप्रपञ्चः, सुप्तज्ञानं, सुप्तविज्ञानं, स्वापः, दर्शनं, स्वप्नकल्पितं, निद्रा, संवेशः.—(Vain fancy) मृषार्थकं, वृथावासना, अनर्थकवासना, मिथ्यावासना, असम्भवकल्पना, दुर्वासना, अनर्थकचिन्ता, आभासः, अनर्थकभावना; 'like a dream,' स्वप्नवत्.

To DREAM, *v. n.* (See images in sleep) स्वप्ने दृश् (c. 1. पश्यति, द्रष्टुं), स्वप्न (nom. स्वप्नायते), उत्स्वप्न, स्वप्नकल्पितं दृश्.—(Imagine, think) चिन्त् (c. 10. चिन्तयति -यितुं), भू in caus. (भावयति -यितुं), मनसि or मनसा कॢप् (c. 10. कल्पयति -यितुं).—(Think idly) अनर्थकचिन्तां कृ, वृथावासनां कृ, असम्भवकल्पनां कृ.

To DREAM *v. a.* (See in a dream) स्वप्ने दृश् (c. 1. पश्यति, द्रष्टुं).

DREAMER, *s.* स्वप्नदर्शकः.—(A fanciful man) वृथावासनाकारी *m.* (न्), दुर्वासनाकृत्, अनर्थकचिन्ताकरः, असम्भवकल्पयिता *m.* (तृ).

DREAMY, *a.* स्वप्नवान् -वती -वत् (त्), स्वप्नमयः -यी -यं.

DREARINESS, *s.* शून्यता, निर्जनत्वं, निर्मनुष्यता, निरानन्दता, घोरता.

DREARY, DREAR, *a.* (Uninhabited, gloomy, wild) निर्जनः -ना -नं,

निर्मनुष्यः -ष्या -ष्यं, शून्यः -न्या -न्यं, तमस्वी -स्विनी -स्वि (न्), तामसः -सी -सं, निष्प्रभः -भा -भं, आकुलः -ली -लं, आरण्यकः -का -कं.—(Joyless) निरानन्दः -न्दा -न्दं.

Dredge, *s.* (Drag-net) आकर्षणजालं, आकर्षणी, आकर्षणयन्त्रं.

To **dredge**, *v. a.* (Catch with a dredge) आकृष् (c. 1. -कर्षति -क्रष्टुं). —(Scatter flour on meat when roasting) पच्यमानमांसे चूर्णं क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

Dreggish, dreggy, *a.* मलिनः-ना-नं, समलः-ला-लं, खली-लिनी-लि (न्).

Dregs, *s.* मलं, खलं, किट्टं, उच्छिष्टं, शेषं, कलङ्कः, अमेध्यं, अवस्करः, अपस्करः, कल्कं, असारः, विनीयः.

To **drench**, *v. a.* क्लिद् in caus. (क्लेदयति -यितुं), सिच् (c. 6. सिञ्चति सेक्तुं), समुक्ष् (c. 1. -उक्षति -क्षितुं), अभ्युक्ष्, जलेन प्लु in caus. (प्लावयति -यितुं), समाप्लु.

Drench, *s.* (A draught) पानं, पेयं.—(Medicine for horses, &c.) अश्वादिना निगरणीयम् औषधं.

Drenched, *p. p.* सिक्तः -क्ता -क्तं, समाप्लुतः -ता -तं, प्रक्लिन्नः -न्ना -न्नं.

Dress, *s.* वेशः, वेषः, वस्त्रं, वासः *n.* (स्), वसनं, परिधानं, भरणं, आभरणं, परिच्छदः, अम्बरं, भूषणं, विभूषणं, अलङ्कारः, प्रसाधनं, आच्छादनं, प्रतिकर्म्म *n.* (न्), सज्जा, संस्कारः, नेपथ्यं, आकल्पः.

To **dress**, *v. a.* (Clothe) वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, प्रवेष्ट्; आच्छद् (c. 10. -छादयति -यितुं), प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं), संव्ये (c. 1. -व्ययति -व्यातुं), वस्त्र (nom. वस्त्रयति -यितुं), परिधा in caus. (-धापयति -यितुं), प्रसाध् in caus. (-साधयति -यितुं), वस in caus. (वासयति -यितुं), विवस्, प्रतिवस्.—(Clothe one's self) वस् (c. 2. वस्ते, वसितुं), प्रवस्, विवस्, परिधा (c. 3. -धत्ते -धातुं), वस्त्राणि परिधा or आच्छद् or आमुच् (c. 6. -मुञ्चति -मोक्तुं).—(Adorn) भूष् (c. 1. भूषति -षितुं c. 10. भूषयति -यितुं); विभूष्, परिभूष्, अलङ्कृ, समलङ्कृ, परिष्कृ. —(Prepare) कॢप् (c. 10. कल्पयति -यितुं), उपकॢप्; संस्कृ, उपस्कृ, सज्जीकृ.—(Prepare food) अन्नं or मांसं पच् (c. 1. पचति, पक्तुं) or संस्कृ, or श्रा in caus. (श्रपयति -यितुं) or सिद्धीकृ or सन्धा (c. 3. -दधाति -धातुं).—(Dress the hair) केशान् रच् (c. 10. रचयति -यितुं).—(Trim, put in order) रच्, विरच्, विधा, सज्जीकृ, विन्यस् (c. 4. -अस्यति -असितुं).—(Curry a horse) अश्वलोम मृज् (c. 2. मार्ष्टि -र्ष्टुं) or सम्मृज्.—(Dress leather) चर्म्म परिष्कृ.—(Cleanse) शुध् in caus. (शोधयति -यितुं), प्रक्षल् (c. 10. -क्षालयति -यितुं), निर्णिज् (c. 3. -नेनेक्ति -नेक्तुं).—(Dress a wound) क्षतं परिष्कृ, औषधं प्रतिसृ in caus. (-सारयति -यितुं).

Dressed, *p. p.* (Clothed) आच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, वेष्टितः -ता -तं, वस्त्रवेष्टितः -ता -तं, वासितः -ता -तं, सवेशः -शा -शं, सचेलः -ला -लं, सवासाः -साः -सः (स्), संवीतः -ता -तं, प्रावृतः -ता -तं, परिहितः -ता -तं, वेशी -शिनी -शि (न्), वस्त्रान्वितः -ता -तं, अनग्नः -ग्ना -ग्नं, अलङ्कृतः -ता -तं, भूषितः -ता -तं; 'well-dressed,' सुवेशः -शा -शं, सुवसनः -ना -नं, सुवः *m. f. n.* (स्); 'ill-dressed,' दुर्वासाः -साः -सः (स्); 'dressed as a herdsman,' गोपवेशः or गोपवासाः; 'dressed as a hermit,' मुनिवेशः; 'dressed in yellow,' पीताम्बरः -रा -रं.—(Cooked) पक्वः -क्वा -क्वं, सिद्धः -द्धा -द्धं, संस्कृतः -ता -तं, श्राणः -णा -णं, शृतः -ता -तं, अर्पितः -ता -तं, प्रणीतः -ता -तं, उपसम्पन्नः -न्ना -न्नं, राद्धः -द्धा -द्धं; 'dressed food,' सिद्धान्नं; 'half dressed,' आपक्वः -क्वा -क्वं; 'half-dressed grain,' पौलिः *m.*, अभ्युषः, अभ्यूषः, अभ्योषः.—(As a wound) प्रतिसारितः -ता -तं.

Dresser, *s.* (One who dresses) आच्छादकः, प्रसाधकः -का, परिधानकृत्, कल्पकः.—(Of hair) केशरचकः.—(Table for dressing food) अन्नसंस्कारफलकं, पाकफलकः

Dressing, *s.* (Putting on clothes) वस्त्राच्छादनं, वस्त्रपरिधानं, अङ्गसंस्कारः, कल्पना, वस्त्रमाल्यादिविन्यासः.—(Of food) अन्नसंस्कारः, पाकः, पाकनिष्पत्तिः *f.*—(Of a wound) प्रतिसारणं, लेपः, प्रलेपः, विलेपः, उपदेहः, उपनाहः.—(Chastisement) शास्तिः *f.*, दण्डनं, वेत्राघातः.

Dressing-gown, *s.* अङ्गसंस्कारकाले भृतो लघुप्रावारः.

Dressing-room, *s.* वस्त्रपरिधानशाला, आच्छादनशाला, विभूषणागारः, नेपथ्यं, अङ्गसंस्कारगृहं.

Dress-maker, *s.* स्त्रीवेशकारिणी, स्त्रीवस्त्रकृत् *f.*, स्त्रीवेशनिर्म्माणोपजीविनी.

Dressy, *a.* दर्शनीयः -या -यं, दर्शनीयवेशी -शिनी -शि (न्).

To **drib**, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), अवछिद् (c. 7. -छिनत्ति -छेत्तुं).

To **dribble**, *v. n.* लवशः or विन्दुक्रमेण स्यन्द् (c. 1. स्यन्दते -न्दितुं) or प्रस्यन्द्, शनैः शनैः क्षर् (c. 1. क्षरति -रितुं) or री (c. 4. रीयते, रेतुं) or स्रु (c. 1. स्रवति, स्रोतुं).

To **dribble**, *v. a.* लवशः or विन्दुक्रमेण स्रु in caus. (स्रावयति -यितुं).

Dribblet, *s.* कणः, कणिका, लवः, लेशः, स्तोकः, खण्डं, अल्पभागः; 'in dribblets,' लवशस्, अल्पाल्पं, स्तोकशस्.

Dried, *p. p.* शुष्कः -ष्का -ष्कं, शोषितः -ता -तं, विशोषितः -ता -तं, उच्छुष्कः -ष्का -ष्कं, गतरसः -सा -सं, अवानः -ना -नं, वसुः -सुः -सु; 'dried flesh,' शुष्कमांसं, वल्लूरं; 'dried fruit,' विप्रदहः; 'dried up,' उच्छोषितः -ता -तं.

Drier, *s.* शोषणः, शोषकः, उच्छोषणः -णी -णं, शुष्ककृत्.

Drift, *s.* (Tendency, aim) प्रवृत्तिः *f.*, प्रवाहः, तात्पर्य्यं, अन्वयः, अभिप्रायः, अभिप्रेतं, आशयः, उद्देशः, प्रावण्यं, अभिसन्धिः *m.*, आकांक्षा. —(Impulse) वेगः, प्रेरणं, प्रणोदः.—(Heap) राशिः *m. f.*, पुञ्जः, चितिः *f.*, सञ्चयः, निकरः; 'of snow,' हिमराशिः, हिमसंहतिः *f.*—(Shower of any thing) सम्पातः, [illegible] वर्षः.

To **drift**, *v. a.* प्रवह in caus. (-वाहयति -यितुं), सम्पत in caus. (-पातयति -यितुं), प्रेर् (c. 10. प्रेरयति -यितुं rt. ईर्), राशीकृ, पुञ्जीकृ, पिण्डीकृ, एकत्रीकृ.

To **drift**, *v. n.* वातबलेन राशीभू, वायुवेगात् पुञ्जीभू.—(Be carried away by the current) सलिलवेगेन संवह in pass. (समुह्यते) or अपवह in pass.

Drifted, *p. p.* वातप्रेरितः -ता -तं, वायुवेगराशीकृतः -ता -तं.

To **drill**, *v. a.* (Perforate) व्यध् (c. 4. विध्यति, व्यद्धुं), छिद्र (c. 10. छिद्रयति -यितुं), शुषिरीकृ.—(Exercise troops) सैन्यान् अभ्यस् (c. 4. -अस्यति -असितुं), सैन्यान् रणशिक्षां or अस्त्रशिक्षां शिक्ष् (c. 10. शिक्षयति -यितुं), युद्धविद्यां शिक्ष्, सैन्यव्यायामं कृ.—(Sow seed in rows) पंक्तिक्रमेण वीजानि वप् (c. 1. वपति, वप्तुं).

Drill, *s.* (Boring tool) आविधः, वेधनी, वेधनिका, आस्फोटनी.—(Act of training soldiers) शस्त्राभ्यासः, अस्त्रशिक्षा, सैन्यव्यायामः. —(Baboon) वानरः, कपिः *m.*

To **drink**, *v. a.* पा (c. 1. पिबति, पातुं), आपा, निपा, परिपा, चम् (c. 1. चमति -मितुं), आचम् (c. 1. आचामति); 'to drink up,' आपा; 'drink in,' निपा; 'drink together,' सम्पा; 'drink after,' अनुपा; 'to give to drink,' पा in caus. (पाययति -यितुं).

To **drink**, *v. n.* पा (c. 1. पिबति, पातुं).—(Be a drunkard) पानरतः -ता -तम् अस्.—(Feast with liquors) सम्पीतिं कृ, सपीतिं कृ.—(Salute in drinking) चषकग्रहणकाले मङ्गलप्रार्थनां कृ or शुभं भूयाद् इति वद् (c. 1. वदति -दितुं).

Drink, *s.* पानं, पानीयं, पेयं, पयः *n.* (स्), आचमनीयं, मद्यं, मदिरा.

Drinkable, *a.* पेयः -या -यं, पानीयः -या -यं, प्रपाणीयः -या -यं, आचमनीयः -या -यं, पानयोग्यः -ग्या -ग्यं, पानोपयुक्तः -क्ता -क्तं.

Drinker, *s.* पाता *m.* (तृ), पायी *m.* (न्), पानरतः, पानप्रसक्तः, मद्यपीतः.

Drinking, *s.* पानं, पीतिः *f.*, निपानं, आचमनं; 'drinking together,' सम्पीतिः *f.*, सपीतिः *f.*

Drinking-vessel, *s.* पानपात्रं, पानभाजनं, पानयोग्यभाजनं, आचमनोपयुक्तपात्रं, चषकः, सरकः, चन्द्रुतषं -षेयं.

To **drip**, *v. n.* कणशः or लवशः or विन्दुक्रमेण स्यन्द् (c. 1. स्यन्दते -न्दितुं) or प्रस्यन्द्, शनैः शनैः क्षर् (c. 1. क्षरति -रितुं) or री (c. 4. रीयते, रेतुं) or स्रु (c. 1. स्रवति, स्रोतुं).

To **drip**, *v. a.* कणशः or शनैः शनैः स्रु in caus. (स्रावयति -यितुं).

Drip, *s.* (Edge of a roof) पटलप्रान्तः, वलिकः -कं, नीध्रं.

Dripping, *part.* (Trickling) स्यन्दी -न्दिनी -न्दि (न्), स्यन्नः -न्ना -न्नं, निस्यन्दमानः -ना -नं, क्षरन् -रन्ती -रत् (त्), रीणः -णा -णं, स्रुतः -ता -तं.

Dripping, *s.* (Act of trickling) क्षरणं, स्रवणं, श्रवणं, प्रस्रवणं, स्रवः, श्रवः, स्रावः, स्यन्दनं.—(Fat which falls from roasting meat) पच्यमानमांसघृतं, मांसवसा, मांसस्नेहः, मांसनिर्गतसारः.

Dripping-pan, *s.* पच्यमानमांसात् प्रस्रुतघृतस्य भाजनं, मांसस्नेहाधारः.

To **drive**, *v. a.* (Impel, compel) प्रेर् (c. 10. -ईरयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं), प्रचुद् (c. 10. -चोदयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), चल् in caus. (चालयति -यितुं) नियुज् in caus. (-योजयति -यितुं), कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्.—(Urge or guide horses) अश्वान् प्रेर् or प्रणुद् or प्रचुद् or यम् (c. 1. यच्छति, यन्तुं).—(Drive a carriage) रथं वह् in caus. (वाहयति -यितुं), or चल् in caus.—(Drive a nail) कीलम् आहत्य प्रविश् in caus. (-वेशयति -यितुं).—(Drive away) अपानुद्, व्यपानुद्, निराकृ, अपाकृ, निरस् (c. 4. -अस्यति -असितुं), अपास्, अपवह् (c. 1. -वहति -वोढुं), व्यपवह्, अपवह् in caus., निर्धू (c. 5. -धूनोति -धवितुं), विधू, निःसृ in caus. (-सारयति -यितुं), बाध् (c. 1. बाधते -धितुं), हृ (c. 1. हरति, हर्तुं), अपहृ, परिहृ.

To **drive**, *v. n.* (Be impelled) प्रेरितः -ता -तं भू, अपवह् in pass. (अपोह्यते rt. वह्), संवह् in pass. चल् in caus. pass. (चाल्यते) कृष् in pass. (कृष्यते).—(Rush against) आपत् (c. 1. -पतति -तितुं), अभिपत्.—(In a carriage) क्रीडारथेन विहारं कृ.—(Aim at) अभिसन्धा (c. 3. -दधाति -धातुं), उद्दिश् (c. 6. -दिशति -देष्टुं), अभिप्रे (c. 2. अभिप्रेति -तुं rt. इ).

Drive, *s.* क्रीडारथेन भ्रमणं or विहारः or परिक्रमः.

To **drivel**, *v. n.* लालां or श्लेष्माणं मुखात् स्रु in caus. (स्रावयति -यितुं) or पत् in caus. (पातयति -यितुं) or निःसृ in caus. (-सारयति -यितुं).—(Be idiotic, childish) बुद्धिविकलः -ला -लं भू, बालिशीभू, जडीभू.

Drivel, *s.* लाला, मुखस्रावः, वक्त्रासवः, वदनासवः, स्यन्दिनी, द्राविका, सृणिका, लसिका, मुखनिःसारितं जलं.

Driveller, *s.* लालास्रावकः.—(Idiot) जडः, मूढः, बुद्धिविकलः.

Driven, *p. p.* प्रेरितः -ता -तं, प्रणोदितः -ता -तं, प्रणुन्नः -न्ना -न्नं, प्रवर्त्तितः -ता -तं, प्रचोदितः -ता -तं; 'driven away,' अपनोदितः -ता -तं, निराकृतः -ता -तं, अपाकृतः -ता -तं, निरस्तः -स्ता -स्तं, निर्धूतः -ता -तं, विधूतः -ता -तं, अवधूतः -ता -तं, अपोढः -ढा -ढं, व्यपोढः -ढा -ढं, व्याधितः -ता -तं.

Driver, *s.* प्रेरकः, प्रणोदकः.—(Of a carriage) रथवाहकः, यन्ता *m.* (न्तृ), नियन्ता *m.*, प्राजकः, प्राजिता *m.* (तृ), प्रवेता *m.* (तृ), याता *m.* (तृ).—(Of horses) अश्वप्रणोदकः, हयकृषः.—(Of an elephant) महामात्रः, आधोरणः, हस्तिपः -पकः.—(Of cattle) पशुप्रेरकः.

Driving, *s.* प्रेरणं, प्रणोदः.—(Of cattle) पशुप्रेरणं, उदजः; 'driving away,' अपनोदनं, निरसनं, निराकरणं.

To **drizzle**, *v. n.* शीकर (nom. शीकरायते), शीक् (c. 1. शीकते -कितुं).

To **drizzle**, *v. a.* शीकरं वृष् (c. 1. वर्षति -र्षितुं), सूक्ष्मविन्दून् वृष्.

Drizzling, *s.* शीकरवर्षः, शीकरपातः, सूक्ष्मविन्दुवर्षः.

Drizzly, *a.* शीकरीयः -या -यं, शीकरविशिष्टः -ष्टा -ष्टं.

Droll, *a.* हासकरः -री -रं, हास्यः -स्या -स्यं, उपहास्यः -स्या -स्यं, रसिकः -का -कं, विनोदी -दिनी -दि (न्), कौतुकी -किनी -कि (न्), असङ्गतः -ता -तं, अपरूपः -पा -पं.

Droll, *s.* परिहासवेदी *m.* (न्), वैहासिकः, विदूषकः, भण्डः, नर्म्मसचिवः.

To **droll**, *v. n.* भण्ड् (c. 1. भण्डते -ण्डितुं), भण्डवत् परिहासं कृ.

Drollery, *s.* हास्यत्वं, हास्यं, परिहासः, नर्म्म *n.* (न्), उपहास्यता, विहासः, वैहासिककर्म्म *n.* (न्), भाण्डं, लालिका, विनोदः.

Dromedary, *s.* एककुद्, द्विककुद्मान् *m.* (त्), उष्ट्रविशेषः, क्रमेलः.

Drone, *s.* (Male bee) पुन्मधुकरः, पुम्भृङ्गः.—(Idler) अलसः, निष्कर्म्मा *m.* (न्), निरुत्साहः, आलस्यशीलः, मन्दगतिः *m.*, तन्द्रालुः.

To **drone**, *v. n.* अलसः -सा -सं अस्, आलस्यं कृ, मन्दीभू.

Dronish, *a.* आलस्यशीलः -ला -लं, तन्द्रालुः -लुः -लु, निरुद्योगः -गा -गं.

To **droop**, *v. n.* म्लै (c. 1. म्लायति, म्लातुं), परिम्लै, सद् (c. 1. सीदति, सत्तुं), अवसद्, विषद्, व्यवसद्, क्षि in pass. (क्षीयते), ग्लै (c. 1. ग्लायति, ग्लातुं), ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, क्लम् (c. 4. क्लाम्यति, क्लमितुं), परिक्लम्, स्रंस् (c. 1. स्रंसते -सितुं), विस्रंस्, गल् (c. 1. गलति -लितुं), तम् (c. 4. ताम्यति, तमितुं), शिथिलीभू.

Drooping, *a.* म्लानः -ना -नं, परिम्लानः -ना -नं, सन्नः -न्ना -न्नं, अवसन्नः -न्ना -न्नं, संसमानः -ना -नं, स्रंसी -सिनी -सि (न्), विषादी -दिनी -दि (न्), ग्लायन् -यन्ती -यत् (त्), ध्वंसी -सिनी -सि (न्) or विध्वंसी, क्लान्तः -न्ता -न्तं, शिथिलः -ला -लं, आगलितः -ता -तं.

Drop, *s.* विन्दुः *m.*, कणः, विप्रुट् *f.* (ष्), विप्रुट्, पृषत् *n.*, पृषतः, पृषन्ति *n.* लवः, लेशः, स्तोकः, गडः, धारा, कणिका, शीकरः, स्फाटकः, पुष्वा, 'drop of water,' जलविन्दुः *m.*, अम्बुकणः -णा, अम्बुलवः, जलरवः, पयोगडः.—(Ear-ring) लोलकः, कुण्डलं; 'drop by drop,' लवशस् विन्दुक्रमेण.

To **drop**, *v. a.* (Pour out in drops) लवशस् or विन्दुक्रमेण स्रु in caus. (स्रावयति -यितुं) or पत् in caus. (पातयति -यितुं).—(Let fall) पत् in caus., स्रंस् in caus. (स्रंसयति -यितुं), भ्रंश् in caus. (भ्रंशयति -यितुं), च्यु in caus. (च्यावयति -यितुं), ध्वंस् in caus. (ध्वंसयति -यितुं).—(Let go) मुच् (c. 6. मुञ्चति, मोक्तुं), सृज् (c. 6. सृजति, स्रष्टुं, c. 10. सर्ज्जयति -यितुं), विसृज्.—(Leave off) त्यज् (c. 1. त्यजति, त्यक्तुं), अपास् (c. 4. -अस्यति -असितुं), निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl.—(Utter a word casually) अकस्मात् or अनपेक्षितं वाक्यं वद् (c. 1. वदति -दितुं).

To **drop**, *v. n.* (Distill in drops) स्यन्द् (c. 1. स्यन्दते -न्दितुं), प्रस्यन्द्, स्रु (c. 1. स्रवति, स्रोतुं), प्रस्रु, च्युत् or श्च्युत् (च्योतति, श्च्योतति -तितुं), क्षर् (c. 1. क्षरति -रितुं), री (c. 4. रीयते, रेतुं).—(Fall) स्रंस् (c. 1. स्रंसते -सितुं), आस्रंस्, विस्रंस्, पत् (c. 1. पतति -तितुं), भ्रंश् (c. 4. भ्रश्यति, c. 1. भ्रंशते, भ्रंशितुं), परिभ्रंश्, गल् (c. 1. गलति -लितुं), अवगल्, समागल्, विगल्, च्यु (c. 1. च्यवते, च्योतुं), ध्वंस् (c. 1. ध्वंसते -सितुं), लम्ब् (c. 1. लम्बते -म्बितुं).—(Die) मृ (c. 6. म्रियते, मर्त्तुं).—(Sink) सद् (c. 1. सीदति, सत्तुं), अवसद्, विषद्, म्लै (c. 1. म्लायति, म्लातुं).—(Faint) मुर्छ्

(c. 1. मूर्च्छति -र्च्छितुं).

Droplet, *s.* सूक्ष्मबिन्दुः *m.*, क्षुद्रबिन्दुः, सूक्ष्मकणः, कणिका.

Dropped, *p. p.* स्रस्तः -स्ता -स्तं, पतितः -ता -तं, निपतितः -ता -तं, भ्रष्टः -ष्टा -ष्टं, गलितः -ता -तं, विगलितः -ता -तं, च्युतः -ता -तं, ध्वस्तः -स्ता -स्तं.

Dropping, *s.* स्यन्दं, स्यन्दनी, स्रावः, स्रवणं, स्रुतं, च्युतं, रीणं.

Dropping, *part.* or *a.* स्यन्दी -न्दिनी -न्दि (न्), स्यन्दमानः -ना -नं, स्रवन् -वन्ती -वत् (त्), स्रुतः -ता -तं, क्षरन् -रन्ती -रत् (त्), स्यन्नः -न्ना -न्नं, रीणः -णा -णं.

Dropsical, *a.* जलोदरी -रिणी -रि (न्) or उदरी, जठरामयग्रस्तः -स्ता -स्तं.

Dropsy, *s.* जलोदरं -री, उदरी, उदकोदरं, जठरामयः.

Dross, *s.* (Of metals) मलं, धातुमलं, अयोमलं, कलङ्कः, अयोमण्डं, धातुमण्डं, मण्डूरं, किट्टालः, सिंहाणं, सिंहानं, घूर्णं.—(Refuse matter) मलं, खलं, किट्टं, अमेध्यं, कल्कं, उच्छिष्टं, अवस्करः, अपस्करः, असारः.

Drossy, *a.* समलः -ला -लं, मलिनः -ना -नं, कलङ्की -ङ्किनी -ङ्कि (न्).

Drought, *s.* अनावृष्टिः *f.*, अवर्षणं, जलशोषः, अवग्रहः -ग्राहः, शुष्ककालः, वृष्टेरभावः, जलाभावः, पानीयाभावः.

Droughty, *a.* अनावृष्टिः -ष्टिः -ष्टि, निर्वृष्टिः -ष्टिः -ष्टि, वृष्टिशून्यः -न्या -न्यं, निर्जलः -ला -लं, शुष्कः -ष्का -ष्कं, जलशून्यः -न्या -न्यं, निरुदकः -का -कं.

Drove, *s.* (Collection of cattle driven) गोपालेन प्रेरितः पशुगणः or पशुसमूहः.—(Any herd) कदम्बकं, यूथं, गणः, सङ्घः, वृन्दं, कुलं, सङ्घातः, संहतिः *f.*

Drover, *s.* पशुप्रेरकः, पशुप्रणोदकः, गोचारकः, पशुपालः.

To **drown**, *v. a.* (Immerge in water) जले or अप्सु मज्ज् in caus. (मज्जयति -यितुं) or निमज्ज् or प्रविश् in caus. (-वेशयति -यितुं).—(Kill by immersion) जले मज्जयित्वा व्यापद् in caus. (-पादयति -यितुं).—(Deluge, inundate) प्लु in caus. (प्लावयति -यितुं), आप्लु, परिप्लु, सम्प्लु.

To **drown**, *v. n.* जले मज्ज् (c. 1. मज्जति -ज्जितुं or मंक्तुं) or निमज्ज or प्रमज्ज्, जले मंक्त्वा नश् (c. 4. नश्यति, नशितुं) or व्यापद् (c. 4. -पद्यते -पत्तुं) or पञ्चत्वं गम् (c. 1. गच्छति, गन्तुं).

Drowned, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः -ग्ना -ग्नं, प्रमग्नः -ग्ना -ग्नं, जलेमग्नः -ग्ना -ग्नं, प्लावितः -ता -तं, आप्लावितः -ता -तं, परिप्लुतः -ता -तं, समाप्लुतः -ता -तं.

Drowner, *s.* मंक्ता *m.* (क्तृ), निमंक्ता *m.*, मज्जयिता *m.* (तृ), प्लावकः.

Drowning, *s.* मज्जनं, निमज्जनं, आप्लावः, प्लावनं, परिप्लवः.

To **drowse**, *v. n.* निद्रा (c. 2. -द्राति -तुं), स्वप् (c. 2. स्वपिति, स्वप्तुं), निमील् (c. 1. -मीलति -लितुं), स्वप् in des. (सुषुप्सति -प्सितुं).

Drowsily, *adv.* सुषुप्सुवत्, निद्रालुवत्, निद्रालसवत्, आलस्येन.

Drowsiness, *s.* निद्रा, निद्रालुत्वं, तन्द्रा, तन्द्रिः *f.*, तन्द्रिका, सुषुप्सुत्वं, शिशयिषा, आलस्यं, अलसत्वं, परासुता, स्वापः, स्वप्नशीलत्वं, शयालुता.

Drowsy, *a.* निद्रालुः -लुः -लु, सुषुप्सुः -प्सुः -प्सु, शिशयिषुः -षुः -षु, नैद्रः -द्री -द्रं, निद्राशीलः -ला -लं, निद्रालसः -सा -सं, स्वप्नशीलः -ला -लं.

To **drub**, *v. a.* वेत्रेण तड् (c. 10. ताडयति -यितुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

Drubbing, *s.* ताडनं, आघातः, वेत्राघातः, यष्ट्याघातः.

To **drudge**, *v. n.* अविरतं or अतिदेहक्लेशेन आयस् (c. 4. -यस्यति -यसितुं) or श्रम् (c. 4. श्राम्यति, श्रमितुं) or परिश्रम्, निरन्तरायासं कृ, अतिशरीरायासेन नीचकर्म्म कृ or व्रातं कृ.

Drudge, *s.* निरन्तरायासी *m.* (न्), अविरतायासी *m.*, अतिक्लेशेन नीचकर्म्मकारी *m.* (न्), अपकर्म्मकृत्, श्रमणः, व्रातीनः, हीनवृत्तिः *m.*, कृतायासः.

Drudgery, *s.* निरन्तरायासः, अविरतायासः, शरीरायासः, कायक्लेशः, नित्यश्रमः, नित्यक्लेशः, नित्यकष्टं, नीचकर्म्म *n.* (न्), दास्यं, दासत्वं, व्रातं.

Drudgingly, *adv.* अतिक्लेशेन, अतिश्रमेण, नित्यकष्टपूर्व्वं, साविरतायासं.

Drug, *s.* औषधं, भेषजं, अगदः, औषधीयद्रव्यं, रसः, भैषज्यं, रोगिवल्लभः, व्यवायी *m.* (न्), जायुः *m.*, जारी, जाली.—(Unsaleable commodity) अपण्यं, अविक्रेयं, अविक्रेयद्रव्यं.

To **drug**, *v. a.* (Tincture with drugs, &c.) औषधादिना मिश्र् (c. 10. मिश्रयति -यितुं) or संसृज् (c. 6. -सृजति -स्रष्टुं).—(With something unwholesome) अपथ्यद्रव्येण or विरुद्धद्रव्येण मिश्र्.—(Dose with drugs) औषधीकृ, भिषज् (nom. भिषज्यति).

Drugget, *s.* स्थूलपटः, स्थूलपट्टः, स्थूलशाटकः -टिका -टिः *m.* वराशिः *m.*, चित्रास्तरणवाणं, चित्रपटावरणं.

Druggist, *s.* औषधविक्रेता *m.* (तृ), भेषजविक्रयी *m.* (न्), औषधीयद्रव्यक्रयविक्रयिकः, औषधकारः, भेषजकारः.

Drum, *s.* मृदङ्गः, पटहः, मर्द्दलः, दुन्दुभिः *m.*, डिण्डिमः, मुरजः, भेरी, आनकः, झल्लरी, झर्झरी, आनद्धं, अवनद्धं, ढक्का, आडम्बरः, मड्डुः *m.*; 'military drum,' सङ्ग्रामपटहः, विजयमर्द्दलः, महादुन्दुः *m.*—(Of the ear) कर्णोदरं, श्रवणोदरं, कर्णदुन्दुभिः *m.*

To **drum**, *v. n.* मर्द्दलं or डिण्डिमं तड् (c. 10. ताडयति -यितुं), पटहम् आहन् (c. 2. -हन्ति -न्तुं).—(Beat) स्पन्द् (c. 1. स्पन्दते -न्दितुं).

Drummer, *s.* मार्द्दङ्गिकः, मार्द्दङ्गः, मौरजिकः, पटहताडकः, पाणिवादः, पाणिघः, माड्डुकः, झार्झरः.

Drumstick, *s.* कोणः, शारिका, रणः, मृदङ्गताडनार्थं काष्ठं.

Drunk, **drunken**, *a.* मत्तः -त्ता -त्तं, पानादिना उन्मत्तः -त्ता -त्तं, मदोन्मत्तः -त्ता -त्तं, मद्यपीतः -ता -तं, क्षीवः -वा -वं, शौण्डः -ण्डा -ण्डं, परिक्षीवः -वा -वं, मदयित्नुः -त्नुः -त्नु, मदोद्धतः -ता -तं, समदः -दा -दं, प्रक्षीवितः -ता -तं, उत्कटः -टा -टं.—(Drenched) रक्तः -क्ता -क्तं; 'to be drunk,' मद् (c. 4. माद्यति, मदितुं): 'to make drunk,' मद् in caus. (मादयति -यितुं).

Drunkard, *s.* पानरतः, पानप्रसक्तः, मद्यपानासक्तः, पानशौण्डः.

Drunkenness, *s.* मत्तत्वं, उन्मत्तता, मद्योन्मत्तत्वं, मादः, मदः, क्षैव्यं, क्षीवता, शौण्डत्वं, परिक्षीवता, उत्कटः, मद्यपानजन्यावस्थाविशेषः.

Dry, *a.* शुष्कः -ष्का -ष्कं, परिशुष्कः -ष्का -ष्कं, संशुष्कः -ष्का -ष्कं, उच्छुष्कः -ष्का -ष्कं, निर्जलः -ला -लं, निरुदकः -का -कं, नीरसः -सा -सं, निःसलिलः -ला -लं, अतिमितः -ता -तं, अक्लिन्नः -न्ना -न्नं, अपरिक्लिन्नः -न्ना -न्नं, अस्निग्धः -ग्धा -ग्धं, निःस्नेहः -हा -हं, निस्नेहः -हा -हं, स्नेहरहितः -ता -तं, अट्टः -ट्टा -ट्टं, वानः -ना -नं, कार्कलः -ला -लं, रूक्षः -क्षा -क्षं, रूक्षः -क्षा -क्षं.—(Flat as style) अरसिकः -का -कं, अरसः -सा -सं.—(Sarcastic) अरुन्तुदः -दा -दं.—(Thirsty) उदकार्थी -र्थिनी -र्थि (न्), तृषार्त्तः -र्त्ता -र्त्तं; 'dry soil,' मरुः *m.*, मरुस्थलं -ली; 'the dry ground,' स्थलं; 'dry flesh,' शुष्कमांसं.

To **dry**, *v. a.* शुष् in caus. (शोषयति -यितुं), विशुष्, संशुष्, परिशुष्, उपशुष्, शुष्कीकृ, निर्जलीकृ, नीरसीकृ; स्नेहं or क्लेदं or रसं हृ (c. 1. हरति, हर्त्तुं) or अपनी (c. 1. -नयति -नेतुं) or निष्कृष् (c. 1. -कर्षति -क्रष्टुं); ओख् in caus. (ओखयति -यितुं); 'to dry up,' उच्छुष् in caus. (उच्छोषयति -यितुं rt. शुष्).

To **dry**, *v. n.* शुष् (c. 4. शुष्यति, शोष्टुं), परिशुष्, विशुष्, संशुष्, उपशुष्, शुष्कीभू, निर्जलीभू, नीरसीभू; ओख् (c. 1. ओखति -खितुं), व्यथ् (c. 1. व्यथते -थितुं), आश्यै (c. 1. -श्यायते -श्यातुं).

Dryad, *s.* वनदेवता, वनाधिष्ठात्री देवता, वन्यस्त्री.

Dryer, *s.* शोषकः, शोषणः, उच्छोषणः, परिशोषकः, शुष्ककृत्.

Dry-eyed, *a.* निरश्रुलोचनः -ना -नं, निःसलिलनयनः -ना -नी -नं.

Drying, *s.* शोषः -षणं, परिशोषणं, विशोषणं, उच्छोषणं, शुष्ककरणं.

DRYLY, *adv.* शुष्कं, परिशुष्कं, शुष्कतया, अरसं.—(Sarcastically) अरुन्तुदत्वेन.

DRYNESS, *s.* शुष्कता -त्वं, परिशुष्कता, संशुष्कता, शोषः, निर्जलत्वं, नीरसत्वं, निःस्नेहता, अक्लिन्नता, स्नेहराहित्यं.—(Of style, expression) अरसिकत्वं, अरुन्तुदत्वं.

DRY-NURSE, *s.* स्तन्यदानव्यतिरेकेण बालकप्रतिपालिका, बालकपोष्ट्री, अङ्कपाली, शिशुपालिका.

To DRY-NURSE, *v. a.* स्तन्यदानव्यतिरेकेण बालकं पाल् (c. 10. पालयति-यितुं) or प्रतिपाल् or पुष् (c. 10. पोषयति-यितुं) or उपचर् (c. 1. -चरति-रितुं).

DRY-SHOD, *a.* शुष्कपादः -दा -दं -दुकः -का -कं, शुष्कचरणः -णा -णं.

DUAL, *a.* द्विवाचकः -का -कं, द्विकः -का -कं, द्विवचनान्तः -न्ता -न्तं, द्विसंख्यकः -का -कं; 'the dual number,' द्विवचनं.

DUALITY, *s.* द्वित्वं, द्वैतं, द्वैधं, द्वैगुण्यं.

To DUB, *v. a.* नवपदे नियुज् (c. 7. -युनक्ति -योक्तुं), नवोपाधिं दा, नवनाम दा, नूतनपदवीं दा; 'dub a knight,' सादिपदं दा.

DUBIOUS, *a.* सन्दिग्धः -ग्धा -ग्धं, संशयी -यिनी -यि (न्), संशयस्थः -स्था -स्थं, ससंशयः -या -यं, सांशयिकः -की -कं, संशयापन्नः -न्ना -न्नं, शङ्कनीयः -या -यं, शङ्कान्वितः -ता -तं, सशङ्कः -ङ्का -ङ्कं, शङ्कामयः -यी -यं, संशयालुः -लुः -लु, संशयापन्नमानसः -सा -सं, सन्दिहानः -ना -नं, वैकल्पिकः -की -कं, विशयी -यिनी -यि (न्), अनिश्चितः -ता -तं, अस्थिरः -रा -रं.—(Not clear) अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, अप्रकाशः -शी -शं, अप्रत्यक्षः -क्षा -क्षं.

DUBIOUSLY, *adv.* सन्दिग्धं, ससंशयं, सशङ्कं, सन्देहेन, शङ्कया, शङ्कापूर्वं.

DUBIOUSNESS, *s.* सन्दिग्धता, ससंशयत्वं, सांशयिकत्वं, अनिश्चयः, अनैश्चित्यं.

DUBITABLE, *a.* वितर्क्यः -र्क्या -र्क्यं, मीमांस्यः -स्या -स्यं, आशङ्कनीयः -या -यं.

DUBITATION, *s.* सन्देहः, संशयः, शङ्का, आशङ्का, विकल्पः, वितर्कः.

DUCAL, *a.* प्रधानकुलीनपदसम्बन्धी -न्धिनी -न्धि (न्), परमपदसम्बन्धी.

DUCAT, *s.* प्रधानकुलीनजनमुद्राङ्कितो मुद्राविशेषः.

DUCHESS, *s.* प्रधानकुलीनजनस्य पत्नी or भार्य्या.

DUCK, *s.* (Bird) हंसः, वरटः -टा -टी, प्लवः, कलहंसः, चक्रवाकः, कादम्बः; 'wild duck,' कामिकः.—(Sudden inclination of the head) अकस्मात् शिरोनम्रीकरणं or मस्तकानतिः *f.*—(Stone thrown obliquely on the water) जले तिर्य्यक्क्षिप्तः प्रस्तरः.—(Word of endearment) प्रियः -या, दयितः -ता, वत्सः -त्सा, हृदयप्रियः -या.

To DUCK, *v. a.* (Plunge in water) जले मस्ज् in caus. (मज्जयति -यितुं) or निमस्ज् or अवगाह् in caus. (-गाहयति -यितुं) or आप्लु in caus. (-प्लावयति -यितुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Bow the head suddenly) मस्तकम् अकस्मात् नम् in caus. (नामयति, नमयति -यितुं) or नम्रीकृ.

To DUCK, *v. n.* (Dip) मस्ज् (c. 6. मज्जति, मंक्तुं, मज्जितुं), निमस्ज्, अवगाह् (c. 1. -गाहते -हितुं).—(Bow the head suddenly) मस्तकम् अकस्मात् नम् (c. 1. नमति, नन्तुं), अकस्मात् नम्रीभू.

DUCKED, *p. p.* जलमग्नः -ग्ना -ग्नं, जलाप्लुतः -ता -तं, प्रमग्नः -ग्ना -ग्नं.

DUCKER, *s.* मज्जयिता *m.* (तृ), मंक्ता *m.* (क्तृ), आप्लावकः, प्लवः.

DUCKING, *s.* मज्जनं, निमज्जनं, अवगाहः, प्लावः, प्लवनं, आप्लावः -प्लवनं.

DUCKLING, *s.* हंसशावकः, वरटशावकः, वरटशिशुः *m.*

DUCT, *s.* (Canal, passage) नाली, प्रणालः -ली -लिका, सरणिः *f.*, पथः, मार्गः, सङ्क्रमः, गमनागमनपथः.—(Of the body) नालः -ली -ला, नालिः *f.*, नाडिः *f.* -डी, शिरा, सिरा, धमनिः *f.* -नी, तन्त्री.

DUCTILE, *a.* (Tractable) सुविनेयः -या -यं, सुप्रयोज्यः -या -यं, विधेयः -या -यं, वश्यः -श्या -श्यं, आकर्षणीयः -या -यं, सुखकर्षणीयः -या -यं.—(Pliable) आयम्यः -म्या -म्यं, आनम्यः -म्या -म्यं, मृदुः -द्वी -दु, द्रवः -वा -वं.—(As metal) उद्वर्त्तनीयः -या -यं, उद्वर्त्तनयोग्यः -ग्या -ग्यं.

DUCTILENESS, DUCTILITY, *s.* सुविनेयत्वं, आयम्यता, आनम्यता, मृदुत्वं, द्रवत्वं, सुकर्षणीयता.—(Of metals) सुखोद्वर्त्तनीयता, उद्वर्त्तनयोग्यता.

DUDGEON, *s.* (Anger) मन्युः *m.*, कोपः, क्रोधः, रोषः, अमर्षः, द्वेषः, दुष्टभावः.—(Small dagger) क्षुद्रकृपाणी, असिपुत्रिका.

DUE, *a.* (That ought to be paid or received) देयः -या -यं, प्रतिदेयः -या -यं, दानीयः -या -यं, दातव्यः -व्या -व्यं, शोध्यः -ध्या -ध्यं, शोधनीयः -या -यं, संशोध्यः -ध्या -ध्यं, परिशोधनीयः -या -यं, प्राप्यः -प्या -प्यं, प्राप्तव्यः -व्या -व्यं, ग्राह्यः -ह्या -ह्यं.—(Fit, becoming) योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, यथायोग्यः -ग्या -ग्यं, उचितः -ता -तं, यथोचितः -ता -तं, उपयुक्तः -क्ता -क्तं, यथार्हः -र्हा -र्हं, अनुरूपः -पा -पं; 'in due time,' उपयुक्ते समये, समया; 'in due form,' विधिवत्, यथाविधि.

DUE, *s.* (That which ought to be paid or received) देयं, प्रतिदेयं, दानीयं, शोधनीयं, ग्राह्यं, प्राप्यं, प्राप्तव्यं.—(Debt) ऋणं.—(That which ought to be done) कर्त्तव्यं; 'respect is due to parents,' मातापितरौ पूजनीयौ.—(Tribute) शुल्कः -ल्कं, करः, तारिकं, तार्य्यं, राजग्राह्यभागः.—(Right) अधिकारः, स्वाधिकारः.

DUE, *adv.* (Directly) अवक्रं, अजिह्मं, अविलोमं, समरेखं.

DUEL, *s.* द्वन्द्वयुद्धं, द्वन्द्वसम्प्रहारः, द्वन्द्वं, नियुद्धं, मल्लयुद्धं.

To DUEL, *v. n.* द्वन्द्वयुद्धं कृ, द्वन्द्वसम्प्रहारं कृ, द्वन्द्वं कृ.

DUELLER, DUELLIST, *s.* द्वन्द्वयोद्धा *m.* (द्धृ), मल्लयोद्धा *m.*, द्वन्द्वकृत्.

DUG, *s.* (Of an animal) स्तनः, कुचः, कुचतटं; 'of a cow,' गोस्तनः.

DUG, *p. p.* खातः -ता -तं, खनितः -ता -तं, निखातः -ता -तं, उत्खातः -ता -तं.

DUKE, *s.* कुलीनपदानां मध्ये प्रधानपदभाक् *m.* (ज्), उत्तमकुलीनपदस्थः.—(Chief, prince) अधिपतिः *m.*, राजा *m.* (न्), ईश्वरः.

DUKEDOM, *s.* उत्तमकुलीनपदं, पूर्व्वोक्तकुलीनजनस्य आधिपत्यं or अधिकारः.

DULCET, *a.* (Sweet to the taste) स्वादुः -द्वी -दु, मिष्टः -ष्टा -ष्टं, सुरसः -सा -सं.—(To the ear) श्रुतिसुखः -खा -खं, सुस्वरः -रा -रं, मधुरः -रा -रं.

DULCIFICATION, *s.* मधुरीकरणं, मधुसात्करणं, निरम्लीकरणं.

To DULCIFY OR DULCORATE, *v. a.* मधुरीकृ, मधुसात्कृ, स्वादूकृ, मिष्टीकृ.

DULCIMER, *s.* वाद्ययन्त्रविशेषः, तन्त्री *m.* (न्), वल्लकी, विपञ्चिका.

DULL, *a.* (Stupid) मन्दः -न्दा -न्दं, मन्दबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडः -डा -डं, मूढः -ढा -ढं.—(Blunt) अतीक्ष्णः -क्ष्णा -क्ष्णं, अतीव्रः -व्रा -व्रं, अतेजाः -जाः -जः (स्) or निस्तेजाः, तेजोहीनः -ना -नं, धाराहीनः -ना -नं.—(Not bright) मन्दकान्तः -न्ता -न्तं, मन्दतेजाः -जाः -जः (स्), मन्दद्युतिः -तिः -ति, मन्दच्छायः -या -यं, निस्तेजाः -जाः -जः (स्), निष्प्रभः -भा -भं, अप्रभः -भा -भं, मलिनः -ना -नं.—(Sluggish) मन्दः -न्दा -न्दं, मन्थरः -रा -रं, मन्दगतिः -तिः -ति, मन्दगामी -मिनी -मि (न्), मन्थरः -रा -रं, अलसः -सा -सं.—(Gross) स्थूलः -ला -लं, घनः -ना -नं.—(Sad) विषण्णः -ण्णा -ण्णं, विषादी -दिनी -दि (न्), क्लान्तः -न्ता -न्तं, ग्लानः -ना -नं, दीनमनाः -नाः -नः (स्).—(Flat, insipid) अरसः -सा -सं, अरसिकः -का -कं.—(Tedious, troublesome) कष्टकरः -रा -रं, विषमः -मा -मं.—(Cheerless) निरानन्दः -न्दा -न्दं.—(Dull of hearing) श्रोत्रविकलः -ला -लं, श्रवणेन्द्रियविकलः -ला -लं; 'a dull day,' दुर्दिनं; 'a dull boil,' दुष्टव्रणः.

To DULL, *v. a.* (Stupefy) जडीकृ, मूढीकृ, मन्दीकृ, मुह् in caus. (मोहयति -यितुं).—(Blunt) अतीक्ष्णीकृ, अतीव्रं -व्रां -व्रं कृ, घनीकृ, स्थूलीकृ.—(Make dim) मन्दीकृ, निष्प्रभीकृ, मलिन (nom. मलिनयति -यितुं), तेजो हृ (c. 1. हरति, हर्त्तुं).—(Dispirit) मनो व्यथ् (c. 10.

खरडयति -यितुं), ग्लानीकृ, विषण्णीकृ, विषद् in caus. (-षादयति -यितुं).

Dull-witted, *a.* मन्दमतिः -तिः -ति, मन्दबुद्धिः -द्धिः -द्धि, स्थूलबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडमतिः &c., जडबुद्धिः &c., दुर्मतिः &c.

Dully, *adv.* मन्दं, मन्दं मन्दं, तेजो विना, सविषादं, रसं विना.

Dulness, *s.* (Stupidity) मन्दता, मान्द्यं स्थूलता, बुद्धिमान्द्यं, स्थूलबुद्धित्वं, मूढता, अविदग्धता.—(Bluntness) अतीक्ष्णता, घनत्वं, अतीव्रता, धाराहीनता.—(Sluggishness) गतिमन्दता, आलस्यं.—(Dimness) तेजोमान्द्यं, निष्प्रभता, प्रभाहानिः *f.*, प्रतिभाहानिः *f.*, अप्रकाशत्वं, अप्रतापः, अतेजः *n.* (स्), अस्पष्टता.

Duly, *adv.* (Fitly) यथायोग्यं, युक्तं, यथार्हं -र्हतस्, यथोचितं, सम्यक्, यथातथं, यथान्याय्यं.—(In proper time) उपयुक्तसमये, समया.

Dumb, *a.* मूकः -का -कं, जडवाक् *m.f.n.* (च्), स्तब्धवाक् *m.f.n.*, जडः -डा -डं, अवाक् *m.f.n.*, वाग्रहितः -ता -तं, वागिन्द्रियविकलः -ला -लं, वाक्शक्तिहीनः -ना -नं, मुद्रितमुखः -खा -खं, निःशब्दः -ब्दा -ब्दं, निर्वचनः -ना -नं, अनालापः -पा -पं.

Dumbly, *adv.* मूकं, जडं, निःशब्दं, मौक्यपूर्वं, तूष्णीं.

Dumbness, *s.* मूकता, मौक्यं, वाक्स्तम्भः, वाग्जडता, वाग्जाड्यं, वाक्स्तम्भता, वागिन्द्रियवैकल्यं, वाग्राहित्यं, अवाक्त्वं, नीरवता.

Dumb-show, *s.* वाग्व्यतिरेकेण हस्तपादादिसञ्चालनं.

To dumfounder, *v. a.* मुह् in caus. (मोहयति -यितुं), विमुह्, आकुलीकृ, व्याकुलीकृ.

Dumpish, *a.* विषादी -दिनी -दि (न्), उद्विग्नमनाः -नाः -नः (स्) or दुर्मनाः.

Dumpling, *s.* (Apple) अन्नफलगर्भः क्षुद्रपोलिका.—(Currant) पिष्टापूपः.

Dumps, *s. pl.* विषादः, विषण्णता, चित्तोद्वेगः, खेदः, क्लान्तिः *f.*, ग्लानिः *f.*

Dumpy, *a.* ह्रस्वस्थूलः -ला -लं, खर्वघनः -ना -नं, दृढखर्वः -र्वा -र्वं.

Dun, *a.* (Dark-coloured) कपिशः -शा -शं, श्यावः -वा -वं, श्यामः -मा -मं, पिङ्गलः -ला -लं, ताम्रवर्णः -र्णा -र्णं, कृष्णवर्णः -र्णा -र्णं.

To dun, *v. a.* (For a debt) अतिनिर्बन्धेन ऋणदानं प्रार्थ् (c. 10. -र्थयति -ते -यितुं).

Dun, *s.* अतिनिर्बन्धेन ऋणप्रार्थकः, सनिर्बन्धो धनार्थी *m.* (न्).

Dunce, *s.* दुर्बुद्धिः *m.*, अनभिज्ञः, अज्ञः, निर्बोधः, अव्युत्पन्नः, मेधाहीनः.

Dunderhead, *s.* स्थूलबुद्धिः *m.*, स्थूलमतिः *m.*, वटुकः, बर्बरः.

Dung, *s.* पुरीषं, शकृत् *n.*, विष्ठा, विट् *f.* (ष्), पशुचरितं, पशूच्चारः, गूथः -थं, अमेध्यं, शोधनं, पूतिकं, अवस्करः, अपस्करः, शारीरं, शमलं, वर्चस्कः -स्कं, दूष्यं, कल्कं, मलं, सारः, भूमिलेपनं; 'cow-dung,' गोमयः -यं, गोकृतं, गोहनं.

To dung, *v. a.* पुरीषेण लिप् (c. 6. लिम्पति, लेप्तुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं).

To dung, *v. n.* पुरीषम् उत्सृज् (c. 6. -सृजति -स्रष्टुं), पुरीषोत्सर्गं कृ.

Dungeon, *s.* कारा, कारागारं, कारावेश्म *n.* (न्), बन्धनागारं, गुप्तिः *f.*, अन्धकूपः.

Dunghill, *s.* पुरीषराशिः *m.f.*, शकृद्राशिः, अमेध्यस्थानं, अशुचिस्थानं.

Dunghill, *a.* कलुषयोनिः -निः -नि, विहीनयोनिः -निः -नि, हीनजातिः -तिः -ति.

Dupe, *s.* सुखवञ्चनीयः, सुप्रतारणीयः, वञ्चितः, दम्भास्पदं, कपटास्पदं.

To dupe, *v. a.* वञ्च् in caus. (वञ्चयति -ते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्; छल् (c. 10. छलयति -यितुं), प्रतॄ in caus. (-तारयति -यितुं), दम्भ् (c. 5. दभ्नोति, दम्भितुं).

Duped, *p. p.* वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

Duplicate, *a.* द्विगुणः -णा -णं; 'a duplicate,' प्रतिरूपं, प्रतिलिपिः *f.*

To duplicate, *v. a.* (Double) द्विगुणीकृ.—(Fold) पुटीकृ, पुट (nom. पुटयति -यितुं).

Duplication, *s.* द्विगुणीकरणं, पुटीकरणं, द्वैगुण्यं, द्वैतं.

Duplicature, *s.* (Fold) पुटः, व्यावर्त्तनं, ऊर्म्मिका, भङ्गः.

Duplicity, *s.* वैदग्ध्यं, विदग्धता, कपटः, माया, छलं, असारल्यं.

Durability, *s.* चिरस्थायित्वं, स्थिरता, ध्रौव्यं, ध्रुवता, अक्षयता, स्थायित्वं, स्थितिः *f.*, संस्थितिः *f.*, स्थावरत्वं, अनपायः.

Durable, *a.* स्थायी -यिनी -यि (न्) or चिरस्थायी or दीर्घकालस्थायी, स्थिरः -रा -रं, स्थावरः -रा -रं, चिरकालिकः -का -कं, ध्रुवः -वा -वं, अक्षयः -या -यं, स्थितिमान् -मती -मत् (त्), संस्थः -स्था -स्थं, नित्यः -त्या -त्यं, अनपायः -या -यं -यी -यिनी -यि (न्), अजरः -रा -रं.

Durably, *adv.* स्थिरं, ध्रुवं, ध्रौव्येण, अक्षयं, अनपायेन.

Dura mater, *s.* मस्तिष्कस्य बाह्यवेष्टनं or आवेष्टनत्वक् *f.* (च्).

Durance, *s.* आसेधः, स्थानासेधः, रोधः, निरोधनं, सम्प्रतिरोधकः, बन्धनं, प्रतिबन्धनं, कारागारे निरोधः or बन्धनं.

Duration, *s.* स्थितिः *f.*, संस्थितिः *f.*; 'duration of an eclipse,' उपसर्गस्थितिः *f.*—(Space of time) परिमाणं, प्रमाणं; 'duration of day and night,' अहोरात्रस्य परिमाणं.—(Long duration) स्थायित्वं, स्थिरता, स्थावरत्वं, ध्रुवता, ध्रौव्यं, अविरामः.

Durgá, *s.* (The goddess) दुर्गा, जगन्माता *f.* (तृ), दक्षजा, श्यामा. *See* Bhavání.

During, *prep.* यावत्, पर्य्यन्तं, मध्ये, अन्तरे affixed; 'during life,' जीवनपर्य्यन्तं or यावज्जीवं or by prefixing आ with abl.; as, आजीवनान्तात्, आमरणात् (*i. e.* 'until death'); 'during the performance of the vow,' आसमापनाद् व्रतस्य (*i. e.* 'until the completion of the vow'); 'during three fortnights,' पक्षत्रयमध्ये.

Dusk, *a.* ईषत्तामसः -सी -सं, तमस्कल्पः -ल्पा -ल्पं, ईषत्तमस्वी -स्विनी -स्वि (न्), ईषत्तिमिरावृतः -ता -तं, प्रादोषिकः -की -कं, वैकालिकः -की -कं, सान्ध्यः -न्ध्यी -न्ध्यं.—(A little black) [illegible] -ला -लं, ईषत्कृष्णः -ष्णा -ष्णं, आनीलः -ला -लं.

Dusk, *s.* (Twilight) सन्ध्या, सन्ध्याकालः -लं, सन्ध्यासमयः, विकालः, अह्नान्तं, प्रदोषः, सायङ्कालः.

Duskily, *adv.* ईषदन्धकारेण, ईषत्तमसा, अस्पष्टं, अप्रकाशं.

Duskiness, *s.* ईषदन्धकारः, ईषत्तमिस्रं, ईषत्तिमिरं, अपतमसं.

Dusky or duskish, *a.* ईषत्तामसः -सी -सं, ईषत्तमस्वी -स्विनी -स्वि (न्), ईषदन्धकारयुक्तः -क्ता -क्तं, अस्पष्टः -ष्टा -ष्टं, ईषत्कृष्णः -ष्णा -ष्णं, श्यामः -मा -मं. *See* Dusk.

Dust, *s.* रेणुः *m.f.*, पांशुः *m.*, रजः *n.* (स्), धूलिः *m.f.* -ली *f.*, क्षोदः -दितं, भूरेणुः *m.f.*, अवकरः, अवस्करः, सङ्करः, सङ्कारः, वातकेतुः *m.*, वायुकेतुः *m.*, क्षितिकणः -णा, परागः, मेदिनीद्रवः, तुत्थं, तूस्तं, पांसुः *m.*, रजः *m.*; 'dust of the feet,' चरणजं, पदारः; 'dust of a flower,' परागः, पुष्परेणुः *m.*, सुमनोरजः *n.* (स्); 'dust of gold,' काञ्चनभूः *f.*; 'free from dust,' नीरजाः -जाः -जः (स्), नीरजस्यः -स्या -स्यं, निर्धूलिः -लिः -लि.

To dust, *v. a.* (Free from dust) नीरजीकृ, निर्धूलीकृ, रेणुम् अपमृज् (c. 2. -मार्ष्टि -र्ष्टुं, c. 1. -मार्जति -र्जितुं) or अवमृज्, रेणुदूषितं यत्किञ्चित् शुध् (c. 10. शोधयति -यितुं), पांशुपरिष्कारं कृ.

Dusted, *p. p.* नीरजीकारितः -ता -तं, मार्जितः -ता -तं, सम्मृष्टः -ष्टा -ष्टं, हृतपांशुः -शुः -शु, नीरेणुः -णुः -णु, निष्पांशूकृतः -ता -तं.

Duster, *s.* नक्तकः, मार्ज्जनी, मार्ज्जनपटः, अपस्कारकः, रेणुपरिष्कारकः.

Dust-hole, *s.* अवस्करः, गृहमार्जितपांश्वादिनिचयस्थानं, सङ्करस्थानं, उच्छिष्टप्रक्षेपणार्थं गर्त्तः.

DUST-MAN, *s.* अवस्करकः, मलाकर्षी *m.* (न्), खलपूः *m.*, अमेध्यहारी *m.* (न्).

DUSTY, *a.* पांशुलः -ला -लं, पांशुरः -रा -रं, रेणुदूषितः -ता -तं, रेणुरूषितः -ता -तं, भूरेणुरूक्षः -क्षा -क्षं, रजस्वलः -ला -लं, धूल्यवलुण्ठितः -ता -तं.

DUTCH, *a.* हलन्नदेशसम्बन्धी -न्धिनी -न्धि (न्).

DUTIFUL, *a.* भक्तः -क्ता -क्तं, भक्तिमान् -मती -मत् (त्), भक्तियुक्तः -क्ता -क्तं, दृढभक्तिः -क्तिः -क्ति, वश्यः -श्या -श्यं, वशवर्त्ती -र्त्तिनी -र्त्ति (न्), धर्म्मचारी -रिणी -रि (न्), धर्म्मज्ञः -ज्ञा -ज्ञं, धर्म्मपालकः -का -कं, धर्म्मसेवी -विनी -वि (न्), आज्ञापालकः -का -कं, वशानुगः -गा -गं, शुश्रूषुः -षुः -षु, दृढव्रतः -ता -तं, विदितधर्म्मा -र्म्मा -र्म्म (न्), आदृतः -ता -तं, उपयुक्तः -क्ता -क्तं.—(To a parent) पितृभक्तः -क्ता -क्तं, पैतृकधर्म्मपालकः, पितृवशाधीनः -ना -नं.—(To a husband) पतिव्रता.—(To a master) प्रभुभक्तः.

DUTIFULLY, *adv.* भक्तवत्, भक्त्या, धर्म्मपालकवत्, सधर्म्मपालनं.

DUTIFULNESS, *s.* भक्तिः *f.*, भक्तिमत्त्वं, वश्यता, धर्म्मपालनं, आज्ञानुवर्त्तनं, शुश्रूषा, अधीनता, आदरः, प्रणिपातः; 'to parents,' पितृभक्तिः *f.*, पितृसम्मानं, पितृसेवा; 'to a husband,' पतिसेवा.

DUTY, *s.* (That which a person is bound to do) धर्म्मः, स्वधर्म्मः, कर्त्तव्यं, स्वकर्त्तव्यं, कर्त्तव्यता, कार्य्यं, कृत्यं, क्रिया, स्वकर्म्म *n.* (न्), न्याय्यकर्म्म, नियमः, यमः, व्रतं, धूः *f.* (धुर्), धुरा, तपः *n.* (स्).—(Appointed duty, office) नियोगः, अधिकारः, पदं, स्थानं, आस्पदं; 'perpetual duty,' नित्यकृत्यं, नित्यकर्म्म *n.* (न्), यमः; 'voluntary duty,' नियमः; 'fulfilment of duty,' धर्म्मनिष्पत्तिः *f.*, कृतकृत्यता; 'one who has done his duty,' कृतकृत्यः, कृतक्रियः; 'morning duty,' प्रातःकृत्यं; 'a woman's peculiar duty,' स्त्रीनिबन्धनं; 'charged with weighty duties,' धुरीणः, धुरीयः, धुर्वहः.—(Reverence) भक्तिः *f.*, मानं, सम्मानं, नमस्कारः, आदरः.—(Impost) शुल्कः -ल्कं, करः, तारिकं, तार्य्यं, राजग्राह्यभागः; 'duty paid at ferries, &c.,' घट्टादिदेयं.

DWARF, *s.* वामनः -नी *f.*, खर्व्वः -र्व्वा, खर्व्वः -र्व्वा, ह्रस्वकायः, अतनुशरीरः, अतुङ्गः, कुब्जः, खट्टरकं.

To DWARF, *v. a.* ह्रस् in caus. (ह्रासयति -यितुं), वामनीकृ, खर्व्वीकृ.

DWARFISH, *a.* वामनः -ना -नं, ह्रस्वः -स्वा -स्वं, खर्व्वः -र्व्वा -र्व्वं or निखर्व्वः, अतुङ्गः -ङ्गा -ङ्गं, वामनाकृतिः -तिः -ति, खर्व्वाकारः -रा -रं, ह्रस्वमूर्त्तिः -र्त्तिः -र्त्ति, वामनतनुः -नुः -नु, क्षुद्रतनुः -नुः -नु, स्तोककायः -या -यं, खट्टरकः -का -कं.

DWARFISHLY, *adv.* वामनवत्, खर्व्वयत्, अतुङ्गवत्, वामनरूपेण.

DWARFISHNESS, *s.* वामनता -त्वं, खर्व्वता, ह्रस्वता, क्षुद्रता, अतुङ्गता.

To DWELL, *v. n.* वस् (c. 1. वसति, वस्तुं), निवस्, अधिवस्, आवस्, प्रतिवस्, अध्यावस्, समावस्, अधिनिवस्, सन्निवस्; वृत् (c. 1. वर्त्तते -र्त्तितुं), स्था (c. 1. तिष्ठति -ते, स्थातुं), अधिष्ठा, आस् (c. 2. आस्ते, आसितुं), अध्यास्, आश्रि (c. 1. -श्रयति -ते -यितुं) with acc., सेव् (c. 1. सेवते -वितुं), निषेव्, उपसेव् with acc., जुष् (c. 6. जुषते, जोषितुं) with acc., निली (c. 4. -लीयते -लेतुं), संली, अधिशी (c. 2. -शेते -शयितुं), वासं कृ.—(Dwell together) संवस्.—(Dwell abroad) प्रवस्.—(Dwell on a subject) अतिप्रसङ्गं कृ, प्रपञ्चं कृ, दीर्घसूत्रतां कृ; 'on a note in singing,' दीर्घस्वरं कृ.

DWELLER, *s.* वासी *m.* -सिनी *f.* (न्), निवासी *m.* -सिनी *f.* (न्), निलायी *m.* -यिनी *f.*, वासकृत्.

DWELLING, *s.* वासः, वासस्थानं, वसतिः *f.*, निलयः -यनं, आलयः, गृहं, गेहः -हं, वेश्म *n.* (न्), निवेशनं, आयतनं, निकेतः -तनं, आगारः, भवनं, वसितं, निवासः, निवसतिः *f.*, समावासः, अवस्थानं, संवासः, आवसथः, वास्तुः *n.*, स्थानं, ओकः *n.* (स्), धाम *n.* (न्).

DWELLING, *part.* (Residing) वासी -सिनी -सि (न्), निवासी, &c., वर्त्ती -र्त्तिनी -र्त्ति (न्), स्थः स्था स्थं, स्थायी -यिनी -यि (न्), कृतालयः -या -यं, आश्रितः -ता -तं, समाश्रितः -ता -तं, सेवी -विनी -वि (न्), अधिशयानः -ना -नं.

DWELLING-HOUSE, *s.* निवासगृहं, वासगेहः -हं, वासागारः, निवासवेश्म *n.* (न्).

DWELLING-PLACE, *s.* वासस्थानं, निवासस्थानं, निवासभूमिः *f.*, निवासभूयं.

DWELT, *p. p.* उषितः -ता -तं, अध्युषितः -ता -तं, आश्रितः -ता -तं.

To DWINDLE, *v. n.* अल्पीभू, न्यूनीभू, ह्रस् (c. 1. ह्रसते -सितुं), क्षि in pass. (क्षीयते), परिक्षि, अपचि in pass. (-चीयते), सद् (c. 1. सीदति, सत्तुं).

To DWINDLE, *v. a.* अल्पीकृ, न्यूनीकृ, ह्रस् in caus. (ह्रासयति -यितुं).

DWINDLED, *p. p.* अल्पीभूतः -ता -तं, अल्पीकृतः -ता -तं, क्षीणः -णा -णं, न्यूनीभूतः -ता -तं, ह्रसितः -ता -तं, अपचितः -ता -तं, विशीर्णः -र्णा -र्णं.

DYE, *s.* रागः, रङ्गः, वर्णः, कषायः -यं; 'red dye,' लाक्षा, राक्षा; 'blue dye,' नीलं; 'plants used for dye,' लोध्रः, कुसुम्भं, कुङ्कुमः, कषायकृत्.

To DYE, *v. a.* रञ्ज् in caus. (रञ्जयति -यितुं), अभिरञ्ज्, वर्ण् (c. 10. वर्णयति -यितुं), चित्र् (c. 10. चित्रयति -यितुं), सरागं -गां -गं कृ, कषाय (nom. कषायति), कषायीकृ, कुङ्कुमादिना अञ्ज् (c. 7. अनक्ति, अंक्तुं); 'to dye clothes,' कुसुम्भादिना वस्त्राणि रञ्ज् or वस्त्ररागं कृ.

DYED, *p. p.* रञ्जितः -ता -तं, रक्तः -क्ता -क्तं, रागी -गिणी -गि (न्), सरागः -गा -गं, रागान्वितः -ता -तं, कषायितः -ता -तं, कषायचित्रः -त्रा -त्रं, चित्रितः -ता -तं, वर्णितः -ता -तं; 'with saffron,' कुङ्कुमाक्तः -क्ता -क्तं; 'dyed red,' अरुणितः -ता -तं.

DYEING, *s.* रञ्जनं, रागकरणं, वर्णनं, चित्रकरणं, कषायीकरणं; 'of clothes,' वस्त्ररागकरणं, वस्त्ररञ्जनं.

DYER, *s.* रञ्जकः, रागकृत् *m.*, वस्त्ररागकृत्, रागी *m.* (न्), रजकः, वस्त्राणां नीलकुसुम्भादिना रागकारकः.

DYING, *part.* (About to die) म्रियमाणः -णा -णं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं, कण्ठगतप्राणः -णा -णं, गतायुः -युः -युः (स्); 'dying first,' पूर्व्वमारी -रिणी -रि (न्).

DYKE, *s.* सेतुः *m.*, जलसेतुः, जलबन्धकः. *See* DIKE.

DYNASTY, *s.* आवलिः *f.*—(Of kings) राजावलिः *f.* -ली, राजवंशः, राजसन्ततिः *f.*, राजकुलं, राजश्रेणी; 'former dynasty,' प्राग्वंशः.

DYSENTERIC, *a.* (Having dysentery) अतिसारी -रिणी -रि (न्), सातिसारः -रा -रं.

DYSENTERY, *s.* अतिसारः, आमातिसारः, सारणः, प्रवाहिका, ग्रहणी, विरेकः, आमरक्तः, प्रस्कन्दनं -न्दिका, उदरामयः, उदरभङ्गः, वमनः.

DYSPEPSIA, *s.* अजीर्णं, अजीर्णिः *f.*, अजीर्णता, अपक्तिः *f.*, अपाकः, पाककृच्छ्रं, मन्दाग्निः *m.*, तीक्ष्णाग्निः, अप्रदीप्ताग्निः, अवष्टम्भः, कुपित्तं, अन्नविकारः, आमयावित्वं, परिणामशूलः.

DYSPEPTIC, *a.* मन्दाग्निपीडितः -ता -तं, आमयावी -विनी -वि (न्).

DYSPNOEA, *s.* दुःश्वासः, श्वासावरोधः, श्वासकृच्छ्रं, श्वासस्तम्भः.

E

EACH, *a.* (All) सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, सकलः -ला -लं; 'Each' is usually expressed by प्रति or अनु prefixed; as, 'each day,' प्रतिदिनं, प्रतिदिवसं, अनुदिनं, अन्वहं; 'each night,' प्रतिरात्रं; 'each month,' प्रतिमासं; 'each one,' प्रत्येकं. 'Or by doubling the word; as, 'each day,' दिने दिने, दिवसे दिवसे, अहरहः; 'in each house,' गृहे गृहे; 'each one,' एकैकः -का -कं, एकैकशस्, पृथक् पृथक्; 'each other,' परस्परं -रां, अन्योन्यं, इतरेतरं; 'each

man,' एकैकजनः, प्रतिजनं; 'in each direction,' प्रतिदिशं, सर्व्वदिक्षु; 'each man related his own dream,' एकैको जनः स्वं स्वं स्वप्नम् अकथयत्.

EAGER, *a.* अतीच्छः -च्छा -च्छं, अत्यभिलाषी -षिणी -षि (न्), अत्याकांक्षी -क्षिणी -क्षि (न्), कुतूहली -लिनी -लि (न्), कौतूहलान्वितः -ता -तं, व्यग्रः -ग्रा -ग्रं, उत्सुकः -का -कं, तीक्ष्णः -क्ष्णा -क्ष्णं, सरभसः -सा -सं, उद्युक्तः -क्ता -क्तं, सचेष्टः -ष्टा -ष्टं, व्यवसितः -ता -तं, आसक्तः -क्ता -क्तं, अत्यासक्तः -क्ता -क्तं, रतः -ता -तं, उत्कः -त्का -त्कं, शीघ्रकर्म्मा -र्म्मा -र्म्म (न्), उच्चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उत्तप्तः -प्ता -प्तं.

EAGERLY, *adv.* अत्यभिलाषेण, अतीच्छया, अतिस्पृहातस्, कौतूहलेन, कुतूहलात्, कौतुकेन, अतिवाञ्छया, ईहातस्, सतैक्ष्ण्यं, सरभसं, व्यवसितं.

EAGERNESS, *s.* कौतूहलं, कुतूहलं, कौतुकं, अत्यभिलाषः, अतिस्पृहा, अतिवाञ्छा, अतिशयेच्छा, तैक्ष्ण्यं, तीक्ष्णता, उत्तापः, उच्चण्डता, प्रचण्डता, व्यग्रता, औत्सुक्यं, उद्योगः, प्रौढिः *f.*, रभसः, आग्रहः, गर्द्धः, उष्मः.

EAGLE, *s.* उत्क्रोशः, कुररः -रा -री, गृध्रः, खरः, समुत्क्रोशः, पक्षिराजः, राजपक्षी *m.* (न्).

EAGLE-EYED, *a.* उत्क्रोशदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदृष्टिः -ष्टिः -ष्टि.

EAGLET, *s.* उत्क्रोशशावकः, कुररशावकः, उत्क्रोशपोतकः, कुररशिशुः *m.*

EAR, *s.* कर्णः, श्रोत्रं, श्रुतिः *f.*, श्रवः -वणं, श्रोतः *n.* (स्), श्रवणपथः, शब्दग्रहः, ध्वनिग्रहः, शब्दाधिष्ठानं, पैञ्जूषः, कुहरं.—(Organ of hearing) श्रवणेन्द्रियं; 'outer ear,' श्रुतिमण्डलं, वेष्टनं; 'tip of the ear,' पालिः *f.*; 'lobe of the ear,' कर्णलतिका; 'root of the ear,' श्रुतिमूलं, कर्णजाहं; 'hollow of the ear,' श्रवणोदरं; 'ringing in the ear,' कर्णनादः, कर्णक्ष्वेडः; 'boring the ear,' कर्णवेधः; 'having the ears pricked up,' स्तब्धकर्णः -र्णा -र्णं; 'this noise splits the ear,' अयं शब्दः श्रुतिं छिनत्ति; 'he gives ear,' कर्णं ददाति.—(Ear of corn) कणिशः -शं, धान्यशीर्षकं, शस्यमञ्जरी.—(Handle) कर्णः, वारङ्गः.

EAR-ACHE, *s.* कर्णशूलं, कर्णवेदना, कर्णव्यथा.

EAR-BORED, *a.* विद्धकर्णः -र्णा -र्णं, छिद्रितकर्णः -र्णा -र्णं, छिन्नकर्णः -र्णा -र्णं.

EAR-BORER, *s.* कर्णवेधनिका -नी, कर्णारा.

EARED, *a.* (Having ears) कर्णी -र्णिनी -र्णि (न्), कर्णवान् -वती -वत् (त्), कर्णिलः -ला -लं -र्णिकः -का -कं.—(Having spikes) मञ्जरितः -ता -तं, सकणिशः -शा -शं.

EARLAP, *s.* कर्णपालिः *f.*, श्रवणपालिः *f.*, कर्णलतिका, कर्णशष्कुली.

EAR-PICK, *s.* कर्णकण्डूयनकः, कर्णनिर्घर्षणकः, कर्णशोधनी.

EAR-PIERCING, *a.* कर्णवेधी -धिनी -धि (न्), कर्णभेदी -दिनी -दि (न्).

EAR-RING, *s.* कुण्डलं, कर्णिका, अवतंसः, कर्णालङ्कारः, कर्णालङ्कृतिः *f.*, कर्णाभरणं, कर्णवेष्टनं, कर्णवेष्टकं, कर्णेन्दुः *f.*, उत्तंसः, कर्णान्दुः *f.*, तुट्टः *m.*; 'wearing ear-rings,' कुण्डली -लिनी -लि (न्), कुण्डलधारी -रिणी -रि (न्), अवतंसितः -ता -तं.

EAR-SHOT, *s.* कर्णगोचरः -रा -रं, कर्णविषयः -या -यं, श्रुतिपर्य्यन्तं.

EAR-WAX, *s.* कर्णमलः -लं, कर्णगूथः, कर्णविट् *f.* (ष्), तोक्मं, वारुण्डः -ण्डं.

EAR-WIG, *s.* कर्णकीटी, कर्णजलूका, कर्णजलौका *f.* -का: *f.* (स्), कर्णदुन्दुभिः *f.*

EAR-WITNESS, *s.* श्रुतसाक्षी *m.* (न्), स्वकर्णेन श्रुत्वा साक्ष्यं ददाति यः.

EARL, *s.* कुलीनपदानां मध्ये तृतीयपदभाक् *m.* (ज्), तृतीयकुलीनपदस्थः.

EARLDOM, *s.* तृतीयकुलीनपदं, तृतीयकुलीनपदस्थितस्य आधिपत्यं or अधिकारः.

EARLINESS, *s.* शीघ्रता, क्षिप्रता, अविलम्बः, पूर्व्वत्वं, प्राक्त्वं, प्राग्भावः, अग्रत्वं, प्रत्यग्रत्वं, सद्यस्त्वं, अचिरत्वं.—(Early maturity) प्राग्विहितकालात् पक्कता or परिणतत्वं.—(Of the day) सुप्रभातं, अतिप्रभातं, अतिप्रत्यूषः.

EARLY, *a.* (Forward, prior in time) पूर्व्वः -र्व्वा -र्व्वं, अग्रः -ग्रा -ग्रं, प्रत्यग्रः -ग्रा -ग्रं, प्राक्तनः -ना -नं, सद्यस्कः -स्का -स्कं, सद्यस्कालीनः -ना -नं, अचिरः -रा -रं.—(Mature before the time) अपूर्णकालः -ला -लं, प्राग्विहितकालात् or नियमितकालात् पूर्व्वं परिणतः -ता -तं or पक्कः -क्का -क्कं; 'early decrepitude,' युवजरा.—(Early in the day) प्रगेतनः -नी -नं, अतिप्रगेतनः -नी -नं, पूर्व्वाह्णेतनः -नी -नं, प्रातःकालीनः -ना -नं, प्रभातीयः -या -यं, औषसिकः -की -कं, उपस्यः -स्या -स्यं, औषसः -सी -सं, वैयुष्टः -ष्टी -ष्टं.

EARLY, *adv.* (Soon) सद्यस्, अचिरेण, आशु, झटिति.—(In advance) अग्रे, प्राक्, पूर्व्वं, पूर्व्वं.—(Betimes in the morning) प्रभाते, अतिप्रभाते, प्रगे, अतिप्रगे, प्रत्यूषे, अतिप्रत्यूषे, प्रातर्, प्रातःकाले, सकाले, उषा, प्राह्णे, पूर्व्वाह्णे, प्राक्, व्युष्टं, समया, समये, वेलायां.

To EARN, *v. a.* अर्ज् (c. 10. अर्जयति -यितुं), उपार्ज्, लभ् (c. 1. लभते, लब्धुं), उपलभ्, प्राप् (c. 5. -आप्नोति -आप्तुं), अवाप्, अधिगम् (c. 1. -गच्छति -गन्तुं), अश् (c. 5. अश्नुते, अशितुं), उपाश्; आदा (c. 3. -ददाति -दत्ते -दातुं), उपादा, निर्विश् (c. 6. -विशति -वेष्टुं), कृप् (c. 10. कल्पयति -यितुं); 'to earn money by labour,' श्रमेण धनम् उपार्जे; 'earn wages,' वेतनम् अर्ह् (c. 1. अर्हति -र्हितुं).

EARNED, *p. p.* अर्जितः -ता -तं, उपार्जितः -ता -तं, श्रमेणोपार्जितः -ता -तं, लब्धः -ब्धा -ब्धं, उपात्तः -त्ता -त्तं, निर्विष्टः -ष्टा -ष्टं.

EARNEST, *a.* (Zealous) व्यग्रः -ग्रा -ग्रं, उद्युक्तः -क्ता -क्तं, उद्योगी -गिनी -गि (न्), आसक्तचेताः -ताः -तः (स्), समुद्यतः -ता -तं, उत्सुकः -का -कं, प्रयत्नवान् -वती -वत्, महोद्यमः -मा -मं, कृतप्रयत्नः -त्ना -त्नं, सचेष्टः -ष्टा -ष्टं, प्रचण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, उत्साही -हिनी -हि (न्), व्यवसायी -यिनी -यि (न्), तीक्ष्णः -क्ष्णा -क्ष्णं, अत्यनुरागी -गिणी -गि (न्).—(Intent) निविष्टः -ष्टा -ष्टं, अभिनिविष्टः -ष्टा -ष्टं, निविष्टमनाः -नाः -नः (स्), आसक्तः -क्ता -क्तं, कृतनिश्चयः -या -यं, अनन्यविषयात्मा -त्मा -त्म (न्), एकाग्रचित्तः -त्ता -त्तं [illegible] desire,' अतिस्पृहा, कौतूहलं, गाढाभिलाषः, अतिशयेच्छा.

EARNEST, *s.* (Seriousness, not jest) गौरवं, अलाघवं, धीरत्वं, अपरिहासः; 'in earnest,' अपरिहासेन, सगौरवं, अलाघवेन, सधैर्य्यं.—(Part paid beforehand) पूर्व्वदत्तभागः, पूर्व्वदत्तमूल्यं.—(Foretaste) पूर्व्वभुक्तिः *f.*—(Pledge) उपनिधिः *m.*, उपन्यासः, आधिः *m.*, निक्षेपः.

EARNESTLY, *adv.* यत्नतस्, यत्नात्, साग्रहं, महायत्नपूर्व्वं, महोद्यमपूर्व्वं, आसक्तचेतसा, व्यग्रं, निविष्टमनसा, अभिनिवेशेन, निर्बन्धेन, सोद्योगं, उत्सुकं, ईहातस्, अत्यनुरागेण; 'earnestly desiring,' अतीच्छः -च्छा -च्छं, अत्यभिलाषी -षिणी -षि (न्).

EARNESTNESS, *s.* व्यग्रता, निवेशः, अभिनिवेशः, मनोनिवेशः, चित्तासक्तिः *f.*, उद्युक्तता, उद्योगः, मनोनिर्बन्धः, उच्चण्डता, औत्सुक्यं, उत्साहः, चेष्टा, अनुरागः, उग्रत्वं, तैक्ष्ण्यं, आत्मैकाग्र्यं, अभियुक्तता.

EARNINGS, *s. pl.* उपार्जनं, उपार्जितं, अर्जनं, लब्धिः *f.*, लभ्यं, लभ्यांशः, वेतनं, वर्त्तनं, निर्वेशः, कर्म्मण्या, भरण्यं, निष्क्रयः.

EARTH, *s.* (The globe) पृथिवी, पृथ्वी, भूः *f.*, धरणी, मही, वसुधा, धरित्री, धरा, मेदिनी, भूमिः *f.*, क्षितिः *f.*, अवनिः *f.* -नी, जगती, उर्व्वी, क्ष्मा, क्षोणी -णिः *f.*, क्षौणिः *f.*, वसुन्धरा, वसुमती, धारिणी, धात्री, भूगोलः, भूमण्डलं, भूलोकः, भूर्लोकः, रसा, गौः *f.* (गो), ज्या, स्थिरा, अचला, निश्चला, अनन्ता, कुः *f.*, मर्त्यः, काश्यपी, विश्वम्भरा, भूतधात्री, विश्वधारिणी, धारयित्री, सर्व्वंसहा, संसारः, गोत्रा, इला, इलिका, भूरिक् or भूरिक् *f.* (ज्), भुवनं, विष्टपः -पं, पिण्डभं, सागरमेखला, उदधिमेखला, समुद्राम्बरा, इलागोलं, रत्नसू, व्योमस्थली, रत्नगर्भा, गिरिकर्णिका, बीजसूः *f.* (-सू), नराधारा, दैत्यमेदजा, विश्वगन्धा, नृगः *m.*

—(Ground, surface of the earth) भूमिः *f.*, भूतलं, पृथिवीतलं, क्षितितलं, महीतलं, क्ष्मातलं.—(Particles of earth, soil) मृद् *f.* मृत्तिका, मृदा, मृत्खण्डं, क्षितिखण्डः.

To EARTH, *v. a.* भूमौ निविश् in caus. (-वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or सम् in caus. (-अर्पयति -यितुं), भूमिगुप्तं -प्तां -प्तं कृ.

To EARTH, *v. n.* भूमिं निविश् (c. 6. -विशति -वेष्टुं), भूमौ गर्त्तं or विवरं कृ.

EARTH-BORN, *a.* भूमिजः -जा -जं, क्षितिजः -जा -जं, भूमिसम्भवः -वा -वं, स्थलजः -जा -जं, महीजः -जा -जं.

EARTHEN, *a.* (Made of earth) मार्त्तिकः -की -कं, मृण्मयः -यी -यं, मृत्तिकामयः-यी-यं, मृत्तिकानिर्म्मितः-ता-तं, महीमयः-यी-यं, माहेयः-यी-यं.

EARTHEN-WARE, *s.* मृण्मयभाण्डं, मृद्भाण्डानि *n. pl.*, कौलालकं, मार्त्तिकं.

EARTHINESS, *s.* मार्त्तिकत्वं, भौमत्वं, पार्थिवत्वं, माहेयता, स्थूलता.

EARTHLING, *s.* मर्त्यः, पृथिवीस्थः, पृथिवीवासी *m.* (न्), संसारी *m.* (न्), विषयी *m.* (न्), भूजन्तुः *m.*

EARTHLY, *a.* पार्थिवः -वी -वं, भौमः -मी -मं -मिकः -की -कं, लौकिकः -की -कं, ऐहलौकिकः -की -कं, माहेयः -यी -यं, सांसारिकः -की -कं, ऐहिकः -की -कं.

EARTHLY-MINDED, *a.* विषयासक्तचेताः -ताः -तः (स्), संसारासक्तमनाः -नाः -नः (स्), विषयोपभोगव्यग्रः -ग्रा -ग्रं.

EARTHQUAKE, *s.* भूकम्पः, भूमिकम्पः, धरणीचलनं, भूमिचलनं, भूचलं, भूक्ष्मायितं; 'to quake, as the earth,' क्ष्माय् (c. 1. क्ष्मायते -यितुं).

EARTH-WORM, *s.* भूजन्तुः *m.*, क्षितिजन्तुः *m.*, भूलता, महीलता कृमिः *m.*, येराटः, किञ्चुलुकः.—(Mean person) नीचजनः, तुच्छजनः.

EARTHY, *a.* पार्थिवः -वी -वं, भौमः -मी -मं. *See* EARTHEN, EARTHLY.

EASE, *s.* सुखं, सौख्यं, अनायासः, विश्रामः, विश्रान्तिः *f.*, शमः, उपशमः, निर्वृत्तिः *f.*, निवृत्तिः *f.*, विरतिः *f.*, शान्तिः *f.*, स्वास्थ्यं, सुस्थता, सुस्थितिः *f.*; अकष्टं, अदुःखं, अक्लेशः, निरुद्वेगः, प्रसादः.—(Facility) सौकर्य्यं, सुकरत्वं, अनायासः, सौगम्यं; 'love of ease,' सुखेच्छा; 'at ease,' सुखेन, यथासुखं, निर्वृतः -ता -तं, निरुद्विग्नः -ग्ना -ग्नं.

To EASE, *v. a.* (Free from pain) दुःखं हृ (c. 1. हरति, हर्त्तुं) or शम् (c. 10. शमयति -यितुं), क्लेशं or उद्वेगं हृ.—(Alleviate) शम्, प्रशम्, उपशम्; शान्त्व् or सान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्; लघ (nom. लघयति -यितुं), लघूकृ, शान्तिं दा.—(Free from labour, remove a burden) निरायासं -सां -सं कृ, भारं हृ or उद्धृ or अपनी (c. 1. -नयति -नेतुं).—(Free from any thing) मुच् (c. 6. मुञ्चति, मोक्तुं).

EASEL, *s.* चित्रफलकः, चित्रमञ्चः, चित्राधारः, चित्रलेखापादपः.

EASEMENT, *s.* सुखं, सौख्यं, उपकारः -करणं, साहाय्यं.—(Evacuation) मलविसर्गः, मलशुद्धिः *f.*

EASILY, *adv.* (Without difficulty) सुखेन, सुखं, यथासुखं, अनायासेन, अनायासं, निरायासं, सुकरं, सौकर्य्येण, अयत्नेन, अयत्नतस्, अदुःखेन, अकष्टेन, अक्लेशेन, अश्रमेण, दुःखं विना, क्लेशं विना, हेलया. Often expressed by सु or सुख prefixed; as, 'easily borne,' सुसहः -हा -हं; 'easily obtained,' सुलभः -भा -भं; 'easily cut,' सुखच्छेद्यः -द्या -द्यं; 'easily attained,' सुखसाध्यः -ध्या -ध्यं; 'easily done,' अनायासकृतः -ता -तं; 'doing easily,' सुखकरः -रा -रं.—(With tranquillity) सविश्रामं, शान्त्या, शमेन, निरुद्विग्नं, स्वास्थ्येन.—(Leisurely) सावकाशं.—(Readily) कामं.

EASINESS, *s.* (Facility) सौकर्य्यं, सुकरत्वं -ता, सौगम्यं, सुगमत्वं, सुखत्वं, सुसाध्यता, अनायासः, निरायासत्वं.—(Readiness to comply) अनुकूलता, आनुकूल्यं, अनुरोधः.—(Freedom from pain) स्वास्थ्यं, शान्तिः *f.*, सुस्थता, अक्लेशः; 'easiness of circumstances,' द्रव्यानुकूल्यं.

EAST, *s.* (Eastern quarter) पूर्व्वदिक् *f.* (श्), प्राची, पूर्व्वा, प्राचीनदिक् (श्), पूर्व्वकाष्ठा, पूर्व्वाशा, सूर्य्योदयस्थानं; 'the eastern country प्राच्यः, प्राग्देशः, पूर्व्वदेशः.

EAST, EASTERLY, EASTERN, *a.* प्राङ् प्राची प्राक् (च्), प्राच्यः -च्या -च्यं, पूर्व्वः -र्व्वा -र्व्वं, प्राचीनः -ना -नं, पूर्व्वदिश्यः -श्या -श्यं, पूर्व्वदेशीयः -या -यं, पूर्व्वदिक्स्थः -स्था -स्थं, पूर्व्वदेशजः -जा -जं, पूर्व्वजः -जा -जं; 'facing the east,' प्राङ्मुखः -खा -खी -खं, पूर्व्वमुखः -खा -खं; 'Madhyadesha is east of Vinashana,' मध्यदेशो विनशनात् पूर्व्वः; 'as far as the eastern ocean,' आपूर्व्वसमुद्रात्; 'the eastern mountain,' उदयः, उदयगिरिः *m.*, उदयाचलः, उदयशैलः, पूर्व्वपर्व्वतः, पूर्व्वाद्रिः *m.* दिनमूर्द्धा *m.* (न्), पूर्व्वाचलः.

EASTER, *s.* ख्रीष्टपुनरुत्थानदिवसमुद्दिश्य महोत्सवः, ख्रीष्टपुनरुत्थानपर्व्व *n.* (न्)

EASTERLY, EASTWARD, *adv.* पुरस्तात्, पूर्व्वेण, पुरस्, प्राक्, पूर्व्वं, पूर्व्वदिशि पूर्व्वदेशे, सूर्य्योदयं प्रति, पुरा, पूर्व्वपार्श्वे.

EASY, *a.* (Not difficult to be done) निरायासः -सा -सं, निरायासकृतः -ता -तं, अनायासी -सिनी -सि (न्), सुखः -खा -खं, सुकरः -रा -री -रं, सुसाध्यः -ध्या -ध्यं or सुखसाध्यः, सुगमः -मा -मं, लघुः -घुः -घ्वी -घु, अकष्टः -ष्टा -ष्टं, अकठिनः -ना -नं, अविषमः -मा -मं, सुखेन कार्य्यः -र्य्या -र्य्यं.—(Intelligible) सुबोधः -धा -धं, सुगम्यः -म्या -म्यं, सुग्राह्यः -ह्या -ह्यं, अव्याख्येयः -या -यं.—(Free from pain, quiet) स्वस्थः -स्था -स्थं, सुस्थः -स्था -स्थं, शान्तः -न्ता -न्तं, सुखी -खिनी -खि (न्), दुःखहीनः -ना -नं, निरुद्वेगः -गा -गं, निर्वृतः -ता -तं; 'an easy, happy character,' सुखिस्वभावः.—(Complying) अनुकूलः -ला -लं; 'easy of utterance,' सुखोच्चार्य्यः -र्य्या -र्य्यं; 'easy of acquisition,' सुलभः -भा -भं, सुप्राप्यः -प्या -प्यं, सुखलभ्यः -भ्या -भ्यं or सुखेन लभ्यः; 'easy in its paces,' सुखायनः -ना -नं, सुखचारः -रा -रं; 'an easy case,' निश्शल्योऽर्थः.

To EAT, *v. a.* and *n.* खाद् (c. 1. खादति -दितुं), सङ्खाद्; अद् (c. 2. अत्ति -त्तुं), समद्; भक्ष् (c. 10. भक्षयति -यितुं), सम्भक्ष्, अश् (c. 9. अश्नाति, अशितुं), समश्, पर्य्यश्, प्राश्, भुज् (c. 7. भुंक्ते, भोक्तुं), उपभुज्, जक्ष् (c. 2. जक्षिति -तुं), ग्रस् (c. 1. ग्रसते -सितुं), घस् (c. 1. घसति, घस्तुं), प्सा (c. 2. प्साति -तुं), चम् (c. 1. चमति -मितुं), आस्वद् or आस्वाद् (c. 1. -स्वदते -स्वादते -दितुं), गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, चर्व् (c. 1. चर्वति -र्वितुं), अभ्यवहृ (c. 1. -हरति -हर्त्तुं), अभ्याहृ, प्रत्यालिह् (c. 2. -लेढि -ढुं), प्रत्यवसो (c. 4. -स्यति -सातुं), उपयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), वल्भ् (c. 1. वल्भते -ल्भितुं), आहारं कृ; 'he bid them eat and drink,' अश्नीत पिबतेति तान् अवदत्.

EATABLE, *a.* खाद्यः -द्या -द्यं, खादनीयः -या -यं, भक्ष्यः -क्ष्या -क्ष्यं, भक्षणीयः -या -यं, भोज्यः -ज्या -ज्यं, भोजनीयः -या -यं, आद्यः -द्या -द्यं, अदनीयः -या -यं, आहार्य्यः -र्य्या -र्य्यं, अभ्यवहरणीयः -या -यं, अभ्याहार्य्यः -र्य्या -र्य्यं.

EATABLE, *s.* भक्ष्यं, भोज्यं, भोजनं, खाद्यद्रव्यं, भक्ष्यवस्तु *n.*, चाद्यं, प्राशितं, अशितम्भवं, आहार्य्यं, अभ्याहार्य्यः -र्य्यं.

EATEN, *p. p.* भक्षितः -ता -तं, खादितः -ता -तं, भुक्तः -क्ता -क्तं, अन्नः -न्ना -न्नं, जग्धः -ग्धा -ग्धं, अशितः -ता -तं, प्राशितः -ता -तं, आशितः -ता -तं, अभ्यवहृतः -ता -तं, प्सातः -ता -तं, आस्वादितः -ता -तं, स्वदितः -ता -तं, चर्वितः -ता -तं, गिलितः -ता -तं, प्रत्यवसितः -ता -तं, लिप्तः -प्ता -प्तं, प्रत्यालीढः -ढा -ढं, ग्रसितः -ता -तं, उपयुक्तः -क्ता -क्तं, वल्भितः -ता -तं.

EATER, *s.* खादकः, भक्षकः, अत्ता *m.* (त्तृ), भोक्ता *m.* (क्तृ), भक्षयिता *m.* (तृ), भोजी *m.* (न्), आशी *m.* (न्); 'great eater,' बह्वाशी *m.* बहुभुक् *m.* (ज्).

EATING, *s.* (Act of) भक्षणं, खादनं, भोजनं, चर्वणं, अशनं, प्राशनं,

अभ्यवहरणं, अभ्यवहारः, अभ्याहारः, ग्रसनं, भक्षणं, जग्धिः *f.*, आस्वादः -दनं, प्रत्यवसानं, गिलनं, प्सा, प्सानं, वल्भनं; 'eating together,' सहभोजनं, सग्धिः *f.*; 'eating of every thing,' सर्व्वान्नभोजी -जिनी -जि (न्), सर्व्वान्नीनः -ना -नं.

Eating-house, *s.* पक्वान्नविक्रयस्थानं, सिद्धान्नागारः, पक्वान्नपण्यशाला.

Eaves, *s.* पटलप्रान्तः, वलिकः -कं, नीध्रं, पटलान्तः.

Eaves-dropper, *s.* गूढश्रोता *m.* (तृ), प्रच्छन्ने स्थित्वा द्वयोः संलापं कौतुकभावात् शृणोति यः, प्रच्छन्नश्रावी *m.* (न्).

Ebb, *s.* पश्चाद्वेला, विपरीतवेला, परावेला, पश्चात्प्रवाहः, विपरीतप्रवाहः, समुद्रवेलाया विपरीतगतिः *f.*, समुद्रजलस्य पुनरावर्त्तः or प्रत्यावर्त्तनं or परावर्त्तः or विपरिवर्त्तनं, वेलापरिवर्त्तनं; 'ebb and flow,' वेला.

To ebb, *v. n.* वेलावत् परावृत् (c. 1. -वर्त्तते -र्त्तितुं) or विपरिवृत् or परिवृत् or पुनरावृत्, विपरीतं गम् (c. 1. गच्छति, गन्तुं), पश्चात्प्रवाहं कृ.—(Decline) क्षि in pass. (क्षीयते); 'a place whence water has ebbed,' परापः -पा -पं.

Ebony, *s.* कोविदारः, कुद्दालः, क्षितिसारकः, केन्दुः *m.*, युगपत्रकः, स्फूर्जकः, तिन्दुकः, कालस्कन्धः, कुलकः, चमरिकः.

Ebriety, *s.* मादः, उन्मादः, उन्मत्तता, मद्यपानजो-वस्थाविशेषः.

Ebriosity, *s.* उन्मादशीलता, सदोन्मत्तता, क्षीवता, नित्यक्षीवता.

Ebullition, *s.* उत्सेचनं, उत्सेकः, फुत्कारः, फेनकरणं, फेनता.—(Internal agitation) अन्तर्वेगः, अन्तःक्षोभः.

Eccentric, *a.* (Deviating from the centre) केन्द्रापगामी -मिनी -मि (न्) or मध्यस्थानात् अपगामी, केन्द्रभ्रष्टः -ष्टा -ष्टं.—(From usual custom) लोकाचारविरुद्धः -द्धा -द्धं, व्यवहारविरुद्धः -द्धा -द्धं, नियमवहिर्गतः -ता -तं, उत्क्रान्तमर्य्यादः -दा -दं, विपथगामी -मिनी -मि (न्), उत्सूत्रः -त्रा -त्रं, व्यभिचारी -रिणी -रि (न्), अव्यवस्थितः -ता -तं, विषमः -मा -मं, विलक्षणः -णा -णं, लोकबाह्यः -ह्या -ह्यं, त्यक्तलोकमार्गः -र्गा -र्गं.

Eccentricity, *s.* लोकाचारविरोधः, उत्क्रमः, विधिविरुद्धता, लोकमर्य्यादाव्यभिचारः, वैषम्यं, उत्सूत्रता.

Ecclesiastic, *a.* पौरोहितः -ती -तं, मण्डलीसम्बन्धी -न्धिनी -न्धि (न्) or पौरोहित्यसम्बन्धी, धर्म्मोपदेशविषयः -या -यं, याजकीयः -या -यं.

Ecclesiastic, *s.* पुरोहितः, धर्म्माध्यापकः, धर्म्मशास्त्रोपदेशकः, आचार्य्यः, याजकः, धर्म्मशास्त्रव्यवसायी *m.* (न्).

Echo, *s.* प्रतिध्वनिः *f.*, प्रतिशब्दः, प्रतिस्वनः, प्रतिरवः, प्रतिश्रुत् *f.*, प्रतिध्वानः, प्रतिवचनं, ग्रहणं, अनुनादः, प्रतिगर्ज्जनं, व्यनुनादः, ध्वनिः *f.*, स्वानं.

To echo, *v. n.* and *a.* ध्वन् (c. 1. ध्वनति -नितुं), प्रध्वन्, प्रतिध्वन्, स्वन् (c. 1. स्वनति -नितुं), प्रतिस्वन्, स्तन् (c. 1. स्तनति -नितुं), प्रतिध्वनिं कृ, प्रतिशब्दं कृ, प्रतिरवं कृ; 'to cause to echo,' अनुनद् in caus. (-नादयति -यितुं), व्यनुनद्.

Echoing, *part.* अनुनादयन् -यन्ती -यत् (त्), प्रतिगर्जन् -र्जन्ती -र्जत् (त्); 'echoing with,' अनुनादः -दा -दं, निर्घुष्टः -ष्टा -ष्टं, परिसङ्कुष्टः -ष्टा -ष्टं; 'with the sound of the lute,' सवीणानुनादः -दा -दं.

Eclaircissement, *s.* परिशोधनं, विवरणं, विवृतिः *f.*, व्याख्या, स्पष्टीकरणं.

Eclat, *s.* प्रशंसा, स्तुतिः *f.*, श्लाघा, कीर्त्तिः *f.*, ख्यातिः *f.*, सुख्यातिः *f.*, यशः *n.* (स्), विश्रुतिः *f.*, विश्रावः, प्रतिष्ठा, शोभा, प्रभा; 'causing eclat,' कीर्त्तिकरः -री -रं.

Eclectic, *a.* उद्धारकः -का -कं, उद्धरणः -णा -णं, वरणकृत्, चूर्णिकृत्.

Eclipse, *s.* ग्रहः -हणं, उपरागः, उपसर्गः, उपप्लवः, राहुग्रासः, ग्रहपीडनं, राहुसंस्पर्शः, औपग्रहिकः, औपप्लविकः, विमर्द्दनं, परागः; 'solar eclipse,' सूर्य्यग्रहः, सूर्य्योपरागः; 'lunar eclipse,' चन्द्रग्रहणं.

To eclipse, *v. a.* (Darken) तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, अन्धीकृ, मलिनीकृ, प्रछद् (c. 10. -छादयति -यितुं), आछद्.—(To be eclipsed as the sun, &c.) उपरञ्ज् in pass. (-रज्यते), उपसृज् in pass. (-सृज्यते); 'Ráhu eclipsed the sun,' राहुः सूर्य्यम् उपाग्रसत्.

Eclipsed, *p. p.* (As the sun, &c.) उपसृष्टः -ष्टा -ष्टं, उपरक्तः -क्ता -क्तं, ग्रस्तः -स्ता -स्तं, राहुग्रस्तः -स्ता -स्तं, राहुयुक्तः -क्ता -क्तं, उपप्लुतः -ता -तं, सोपप्लवः -वा -वं.—(Obscured) तिमिरावृतः -ता -तं, तमोवृतः -ता -तं, आच्छन्नः -न्ना -न्नं, प्रच्छन्नः -न्ना -न्नं, उपच्छन्नः -न्ना -न्नं, मलिनः -ना -नं, मलिनप्रभः -भा -भं.

Ecliptic, *s.* क्रान्तिमण्डलं, क्रान्तिः *f.*, क्रान्तिकक्षः, रविमार्गः.

Eclogue, *s.* गोमेषपशुपालनादिविषयं क्षुद्रकाव्यं, ग्राम्यकविता.

Economic, economical, *a.* (Pertaining to the management of household concerns) गृहकर्म्मनिर्वाहसम्बन्धी -न्धिनी -न्धि (न्).—(Frugal) परिमितव्ययः -या -यं, स्वल्पव्ययः -या -यं, अव्ययः -या -यं, अमुक्तहस्तः -स्ता -स्तं, व्ययपराङ्मुखः -खी -खं, अबहुदः -दा -दं.

Economically, *adv.* परिमितव्ययेन, स्वल्पव्ययेन, अमुक्तहस्तेन.

Economics, *s.* गृहकार्य्यं, गृहव्यापारः, गृहकर्म्मनिर्व्वाहविद्या.

Economist, *s.* परिमितव्ययी *m.* (न्).—(Political economist) नीतिज्ञः, नीतिविद्याकुशलः, नीतिशास्त्रवित् *m.*

To economize, *v. n.* परिमितव्ययेन गृहकार्य्याणि निर्वह् in caus. (-वाहयति -यितुं).

Economy, *s.* (Management of a household) गृहकार्य्यनिर्वाहः, गृहकर्म्मनयः, गार्हस्थ्यं.—(Frugality) परिमितव्ययः, स्वल्पव्ययः, अमुक्तहस्तत्वं.—(Management) नयः, नीतिः *f.*, प्रणयनं, निर्वाहः.—(Arrangement) विन्यासः, विरचनं, संविधानं, कल्पना.—(System) स्थितिः *f.*, संस्थानं, मार्गः.—(Political economy) नीतिः *f.*, नीतिविद्या, राजनीतिः *f.*, राज्यकर्म्मनिर्वाहविद्या.

Ecstasied, *a.* सम्मोहितः -ता -तं, हर्षमोहितः -ता -तं, हर्षोन्मत्तः -त्ता -त्तं, प्रहर्षितः -ता -तं, आनन्दमग्नः -ग्ना -ग्नं, पुलकितः -ता -तं, रोमाञ्चितः -ता -तं.

Ecstasy, *s.* प्रमदः, उन्मदः, मादः, प्रहर्षः, मोहः, सम्मोहः, आनन्दः, परमानन्दः, हर्षोन्मत्तता, रोमहर्षः, अत्यन्ताह्लादः, अत्यानन्दः.

Ecstatic, ecstatical, *a.* मादनः -ना -नी -नं, उन्मादनः -ना -नं, मोहनः -ना -नी -नं, सम्मोही -हिनी -हि (न्), परमानन्ददः -दा -दं, परमाह्लादजनकः -का -कं, पुलकजनकः -का -कं.

Ecstatically, *adv.* सपरमानन्दं, सानन्दं, समदं, परमाह्लादेन.

Ecumenical, *a.* सार्व्वलौकिकः -की -कं, सर्व्वसाधारणः -णी -णं.

Edacious, *a.* भक्षकः -का -कं, खादकः -का -कं, भोजी -जिनी -जि (न्), अद्मरः -रा -रं, घस्मरः -री -रं, प्रघसः -सा -सं, बहुभुक् *m.* (ज्), बह्वाशी -शिनी -शि (न्), भोजनलुब्धः -ब्धा -ब्धं.

Edacity, *s.* घस्मरता, अतिभोजनं, गृध्नुता, जिघत्सा.

Eddy, *s.* जलावर्त्तः, जलगुल्मः, आवर्त्तिका, आवर्त्तिनी, भ्रमिः *m.*, भ्रमः, भ्रमरकः, अवघूर्णः, दर्दुरिः *m.*, आरणिः *m.*, कूलहुण्डकः, कूलन्धयः, तालूरः.

Edentated, *a.* निर्दशनः -ना -नं, नीरदः -दा -दं, अदंष्ट्री -ष्ट्रिणी -ष्ट्रि (न्).

Edge, *s.* (Border, margin) प्रान्तः, अन्तः -न्तं, उपान्तं, समन्तः, पर्य्यन्तं, सीमा, परिसरः, कच्छः, उत्सङ्गः, कोटिः *f.*, धारः.—(Edge or point of a blade) धारा -रं, कोटिः *f.*, अश्रिः *f.*, पालिः *f.*, पाली, पालिका, अणिः *m.*, आणिः *m. f.*, शिखरः -रं, कोणः, अग्रं.—(Edge of a brook) कच्छः, तीरं, तटं, कूलं, कच्छान्तः; 'edge of a wood,' वनान्तं; 'edge of a mountain,' उत्सङ्गः, टङ्कः, धारा; 'edge of a roof,' पटलप्रान्तः, वलिकः, नीध्रं; 'two-edged,' द्विधारः -रा -रं, उभयतस् तीक्ष्णः -क्ष्णा -क्ष्णं; 'red-edged,' रक्तकोटिः -टिः -टि; 'state

of being set on edge (the teeth),' दन्तहर्षः.—(Keenness) तैक्ष्ण्यं, तीक्ष्णता, तेजः n. (स्); 'of appetite,' अग्निः m., रुचिः f.

To EDGE, *v. a.* (Border) प्रान्त (nom. प्रान्तयति -यितुं), समन्त, (समन्तयति-यितुं),पर्य्यन्तं कृ.—(Sharpen) तिज् (c. 10. तेजयति -यितुं),तीक्ष्णीकृ, निशो (c. 4. -श्यति -शातुं).

EDGED, *a.* (Having an edge) धारी -रिणी -रि (न्), धाराधरः -रा -रं, कोटिमान् -मती -मत् (त्).—(Sharp-edged) तीक्ष्णधारः -रा -रं, शितधारः -रा -रं, तीक्ष्णाग्रः -ग्रा -ग्रं, लविः -विः -वि; 'two-edged sword,' द्विधारखड्गः.

EDGELESS, *a.* धाराहीनः -ना -नं, कोटिरहितः -ता -तं, अतीक्ष्णः -क्ष्णा -क्ष्णं.

EDGING, *s.* कोटिः *f.*—(Of a garment) अञ्चलः, वस्त्राञ्चलः -लं.

EDIBLE, *a.* खाद्यः -द्या -द्यं, खादनीयः -या -यं, भोज्यः -ज्या -ज्यं, भक्ष्यः -क्ष्या -क्ष्यं, भक्षणीयः -या -यं, भोजनीयः -या -यं, आद्यः -द्या -द्यं, अदनीयः -या -यं, आहार्य्यः -र्य्या -र्य्यं.

EDICT, *s.* राजाज्ञा, राजशासनं, शासनं, धर्म्मकीलः; 'written order,' आज्ञापत्रं, शासनपत्रं, पट्टः.

EDIFICATION, *s.* ज्ञाननिष्ठा, निष्ठा, ज्ञानवृद्धिः *f.*, ज्ञानप्राप्तिः *f.*, शिक्षा, समुत्थानं, उपदेशः, ज्ञानदानं.

EDIFICE, *s.* हर्म्यं, शाला, भवनं, मन्दिरं, धाम *n.* (न्), सौधं, अट्टालिका, प्रासादः, सदनं, गृहं, वरणः, वास्त्रं, प्राकारः.

EDIFIED, *p. p.* शिक्षितः -ता -तं, प्राप्तज्ञानः -ना -नं, वृद्धज्ञानः -ना -नं, लब्धज्ञानः -ना -नं, गृहीतज्ञानः -ना -नं, उपदिष्टः -ष्टा -ष्टं.

To EDIFY, *v. a.* निष्ठां कृ or जन् (c. 10. जनयति -यितुं), शिक्ष (c. 10. शिक्षयति -यितुं), उपदिश् (c. 6. -दिशति -देष्टुं), ज्ञानं वृध् in caus. (वर्धयति -यितुं).

EDIFYING, *a.* निष्ठावर्धकः -का -कं, ज्ञानवर्धकः -का -कं, उपदेशकः -का -कं.

To EDIT, *v. a.* ग्रन्थं शोधयित्वा प्रकाश् (c. 10. -काशयति -यितुं), प्रकटीकृ.

EDITED, *p. p.* प्रकाशितः -ता -तं, शोधितः -ता -तं, शुद्धीकृतः -ता -तं.

EDITION, *s.* (Publication) प्रकाशनं, प्रकाशकरणं, प्रकटीकरणं.—(Number of copies printed at once) एकवारं मुद्रितो ग्रन्थसमूहः.

EDITOR, *s.* प्रकाशकः, ग्रन्थप्रकाशकः, ग्रन्थशोधकः.

To EDUCATE, *v. a.* विनी (c. 1. -नयति -नेतुं), अनुनी, शिक्ष् (c. 10. शिक्षयति -यितुं), अनुशिक्ष्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, अधी in caus. (अध्यापयति -यितुं, rt. इ), उपदिश् (c. 6. -दिशति -देष्टुं), पुष् (c. 10. पोषयति -यितुं), पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, अभ्यस् (c. 4. -अस्यति -असितुं), संवृध् in caus. (-वर्धयति -यितुं), विद्यां दा.

EDUCATED, *p. p.* शिक्षितः -ता -तं, कृतविद्यः -द्या -द्यं, लब्धविद्यः -द्या -द्यं, गृहीतविद्यः -द्या -द्यं, कृताभ्यासः -सा -सं, कृतबुद्धिः -द्धिः -द्धि, कृतधीः -धीः -धि, अनुनीतः -ता -तं, विनीतः -ता -तं, शिष्टः -ष्टा -ष्टं, संवर्धितः -ता -तं, पोषितः -ता -तं, व्युत्पन्नः -न्ना -न्नं, संस्कृतः -ता -तं; 'well-educated,' सुशिक्षितः -ता -तं.

EDUCATION, *s.* शिक्षा, अध्यापनं, विनयः, अनुनयः, शिष्टिः *f.*, शास्तिः *f.*, शासनं, अनुशासनं, उपदेशः, विद्यादानं, अभ्यासः, पोषः -षणं, पुष्टिः *f.*, पालनं, प्रतिपालनं, संवर्धनं, विद्याप्राप्तिः *f.*, विद्यालब्धिः *f.*, विद्याग्रहणं, विद्यार्ज्जनं, व्युत्पत्तिः *f.*

EEL, *s.* जलव्यालः, कुञ्चिका, अन्धाहिः *m. f.*, पङ्कगतिः *f.*

EFFABLE, *a.* कथनीयः -या -यं, वाच्यः -च्या -च्यं, निर्वचनीयः -या -यं.

To EFFACE, *v. a.* अपमृज् (c. 2. -मार्ष्टि -ष्टुं), व्यामृज्, प्रमृज्, अवमृज्, उन्मृज्; व्यामृश् (c. 6. -मृशति -म्रष्टुं), अवमृश्; अवमृद् (c. 9. -मृद्नाति -मर्दितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विनश् in caus. (-नाशयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, उन्मूल् (c. 10. -मूलयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, अवमर्षं कृ, व्यामर्षं कृ.

EFFACED, *p. p.* अपमृष्टः -ष्टा -ष्टं, उन्मृष्टः -ष्टा -ष्टं, व्यामृष्टः -ष्टा -ष्टं, उच्छिन्नः -न्ना -न्नं, अवमृदितः -ता -तं, मृदितः -ता -तं, लुप्तः -प्ता -प्तं.

EFFACEMENT, *s.* मार्जना, अपमार्जना, व्यामर्षः, अवमर्षः, लोपः.

EFFECT, *s.* (That which is produced by an agent) उत्पन्नं, निष्पन्नं, उद्भूतं, सिद्धिः *f.*, उत्पत्तिः *f.*, कार्य्यं, वृत्तं, अनुवृत्तं, घटना.—(Consequence) फलं, कर्म्मफलं, फलानुसारं, प्रयोगः, प्रयुक्तिः *f.*, उत्तरं, अनुसारः, परिणामः, अन्तः -न्तं, वृत्तान्तः, शेषः, अनुषङ्गः, कार्य्यं, अन्वयः, योगः, अनुभवः, भव्यं, फलोदयः, प्रतिफलं, उदर्कः, प्रत्ययः.—(Purpose) अर्थः, प्रयोजनं, अभिप्रायः; 'to what effect?' किमर्थं; 'he spoke to that effect,' इत्युवाच.—(Advantage, validity) फलं, प्रयोजनं, अर्थः, प्रभावः; 'of no effect,' निष्फलः -ला -लं, निरर्थकः -का -कं, निष्प्रयोजनः -ना -नं; 'to destroy the effect of any thing,' निष्फल (nom. निष्फलयति -यितुं), मोघीकृ.—(Completion) निष्पत्तिः *f.*, सिद्धिः *f.*—(Fact) वस्तु *n.*, अर्थः; 'in effect,' वस्तुतस्, अर्थतस्, तत्त्वतस्.—(Effects, goods) द्रव्याणि *n. pl.*, वस्तूनि *n. pl.*, सामग्र्यं, सामग्री, विभवः, रिक्थं.

To EFFECT, *v. a.* उत्पद् in caus. (-पादयति -यितुं), सम्पद्, निष्पद्, उपपद्, समुत्पद्; साध् in caus. (साधयति -यितुं), संसाध्, सिद्धीकृ, जन् in caus. (जनयति -यितुं), सञ्जन्; कृ (c. 8. करोति, कर्त्तुं), सङ्कृ, तन् (c. 8. तनोति -नितुं), निर्मा (c. 2. -माति -तुं).

EFFECTED, *p. p.* सिद्धः -द्धा -द्धं, सम्पादितः -ता -तं, उत्पादितः -ता -तं, उपपादितः -ता -तं, निष्पादितः -ता -तं, समुत्पादितः -ता -तं, निष्पन्नः -न्ना -न्नं, सम्पन्नः -न्ना -न्नं, उत्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, कृतः -ता -तं, साधितः -ता -तं, सिद्धीकृतः -ता -तं, राद्धः -द्धा -द्धं, अनुराद्धः -द्धा -द्धं; 'one who has effected his object,' कृतार्थः, कृतार्थीभूतः.

EFFECTIBLE, *a.* साध्यः -ध्या -ध्यं, साधनीयः -या -यं, प्रसाध्यः -ध्या -ध्यं, निष्पाद्यः -द्या -द्यं, उपपाद्यः -द्या -द्यं, सम्पादनीयः -या -यं, करणीयः -या -यं, कर्त्तुं or उत्पादयितुं शक्यः -क्या -क्यं.

EFFECTIVE, *a.* साधकः -का -कं, साधिकः -का -कं, कार्य्यसाधकः -का -कं, प्रसाधकः -का -कं, सम्पादकः -का -कं, निष्पादकः -का -कं, प्रतिपादकः -का -कं, उत्पादकः -का -कं, निष्पादनः -ना -नं, कारकः -का -कं, कारी -रिणी -रि (न्), फलोत्पादकः -का -कं.

EFFECTIVELY, *adv.* अमोघं, सफलं, निष्पत्तिपूर्व्वं, निष्पादकप्रकारेण, अव्यर्थं, सबलं, प्रभावेन.

EFFECTLESS, *a.* निष्फलः -ला -लं, व्यर्थः -र्था -र्थं, मोघः -घा -घं, अनुपपन्नः -न्ना -न्नं, निर्बलः -ला -लं, निर्गुणः -णा -णं, निष्प्रयोजनः -ना -नं.

EFFECTUAL, *a.* अमोघः -घा -घं, फलोत्पादकः -का -कं, सफलः -ला -लं, अव्यर्थः -र्था -र्थं, अव्यर्थयत्नः -त्ना -त्नं, प्रबलः -ला -लं, बलवान् -वती -वत् (त्), शक्तिमान् -मती -मत् (त्), सप्रयोजनः -ना -नं, सार्थकः -का -कं, अनिरर्थकः -का -कं, समर्थः -र्था -र्थं, उपयोगी -गिनी -गि (न्).

EFFECTUALLY, *adv.* अमोघं, अव्यर्थं, सफलं, सप्रयोजनं, बलवत्.

To EFFECTUATE, *v. a.* साध् (c. 10. साधयति -यितुं), सम्पद् (c. 10. -पादयति -यितुं).

EFFEMINACY, *s.* स्त्रीत्वं, स्त्रीता, स्त्रैणं, क्लैब्यं, क्लीबता, सौकुमार्य्यं, कोमलता, मृदुता, स्त्रीव्यवहारित्वं, स्त्रीधर्म्मसेवा.

EFFEMINATE, *a.* स्त्रैणः -णी -णं, स्त्रीधर्म्मा -र्म्मा -र्म्म (न्), स्त्रीधर्म्मी -र्म्मिणी -र्म्मि (न्), स्त्रीव्यवहारी -रिणी -रि (न्), स्त्रीवदाचारी -रिणी -रि (न्), क्लीबः -बा -बं, सुकुमारः -रा -रं, कोमलः -ला -लं; 'an effeminate person,' विमुरुषः, कापुरुषः, गेहशूरः.

To EFFEMINATE, *v. a.* क्लीबीकृ, क्लीबवत् कृ, निष्पुरुषीकृ, कोमलीकृ.

EFFEMINATELY, *adv.* स्त्रीवत्, निष्पुरुषवत् कापुरुषवत्, क्लीबवत्, नारीरूपेण, स्त्रीधर्म्मानुसारात्.

To EFFERVESCE, *v. n.* फेन (nom. फेनायते) उत्सेचनं कृ, फेनलः -ला -लं भू, फेनलीभू, फुत् कृ, बुद्बुद (nom. बुद्बुदायते), फुत्कारेण वृध् (c. 1. वर्धते -र्धितुं) or उच्छूनीभू, or उग्रीभू or आलोडितः -ता -तं भू.

EFFERVESCENCE, *s.* फेनता, फेनलत्वं, फेनवत्त्वं, उत्सेकः, उत्सेचनं, उच्छूनीभावः, फेनभावः, उग्रत्वं, उत्तापः, अन्तःक्षोभः, आलोडनं.

EFFERVESCING, *a.* फेनलः -ला -लं, फेनायमानः -ना -नं, फेनवान् -वती -वत् (त्), फेनिलः -ला -लं, बुद्बुदायमानः -ना -नं.

EFFETE, *a.* (Barren) बन्ध्यः -न्ध्या -न्ध्यं, अप्रसवी -विनी -वि (न्), निष्फलः -ला -लं, शुष्कः -ष्का -ष्कं.—(Worn out) जीर्णः -र्णा -र्णं.

EFFICACIOUS, *a.* प्रबलः -ला -लं, बलवान् -वती -वत् (त्), सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, शक्तिमान् -मती -मत् (त्), प्रतापी -पिनी -पि (न्), समर्थः -र्था -र्थं, क्षमः -मा -मं, गुणवान् -वती -वत् (त्), अलन्तमः -मा -मं, कार्य्यसाधकः -का -कं, सिद्धिकरः -री -रं, गुणकारी -रिणी -रि (न्), अमोघः -घा -घं, अव्यर्थः -र्था -र्थं, बलवान् -वती -वत् (त्), तेजोवान् -वती -वत् (त्).

EFFICACIOUSLY, *adv.* प्रभावेण, अमोघं, प्रबलं, अलन्तमं, अलन्तरां, सफलं.

EFFICACY, *s.* प्रभावः, प्राबल्यं, बलं, शक्तिः *f.*, सामर्थ्यं, तेजः *n.* (स्), प्रभविष्णुता, प्रतापः, बलवत्त्वं, अमोघता, फलवत्त्वं, फलोत्पादनं.

EFFICIENCY, *s.* कार्य्यसिद्धिक्षमता, कार्य्यसम्पादकत्वं, कार्य्यकारित्वं, कर्म्मक्षमता, कर्म्मसामर्थ्यं, कार्य्योपयुक्तता. *See* EFFICACY.

EFFICIENT, *a.* कार्य्यसाधकः -का -धिका -कं, कार्य्यसम्पादकः -का -कं, कार्य्यसिद्धिक्षमः -मा -मं, कार्य्योपयुक्तः -क्ता -क्तं, कार्य्यक्षमः -मा -मं, कर्म्मक्षमः -मा -मं, अलङ्कर्म्मीणः -णा -णं, फलोत्पादकः -का -कं. *See* EFFICACIOUS.

EFFICIENTLY, *adv.* सिद्धिपूर्व्वं, अमोघं, सप्रभावं, यथा कर्म्म सिध्यते तथा.

EFFIGY, *s.* प्रतिमा -मानं, मूर्त्तिः *f.*, प्रतिकायः, प्रतिरूपं, प्रतिकृतिः *f.*, रूपं, आकृतिः *f.*, आकारः, वपुः *n.* (स्).

EFFLORESCENCE, *s.* पुष्पोत्पादनं, पुष्पोत्पत्तिः *f.*, प्रस्फोटनं.—(Eruption on the skin) दद्रुः *m.*, उदर्द्दः, पुष्पाकारस्फोटोत्पत्तिः *f.*

EFFLUENCE, *s.* निःसारः -रणं, निःस्रावः, प्रस्रवः -वणं, प्रवृत्तिः *f.*, प्रवाहः, उत्पत्तिः *f.*, निर्गमः.

EFFLUVIUM, EFFLUVIA, *s.* उद्गारः, वासः, बाष्पः.—(Bad odour) दुर्गन्धः, कुत्सितगन्धः, पूतिगन्धः.

EFFLUX, EFFLUXION, *s.* निःस्रावः, प्रस्रावः, प्रस्रवणं, उत्सेकः, प्रसेकः, निःसारः -रणं, संस्रावः, प्रवाहः, प्रवृत्तिः *f.*, उत्पत्तिः *f.*

EFFORT, *s.* यत्नः, प्रयत्नः, चेष्टा, चेष्टितं, विचेष्टितं, उत्साहः, उद्यमः, उद्योगः, व्यवसायः, अध्यवसायः, चेष्टनं, प्रवृत्तिः *f.*, व्यापारः, आयासः, प्रयासः, घटनं -ना, घटा, ग्रहः, गुरणं, गूरणं, गोरणं, उपक्रमः, कर्म्मयोगः, प्रयोगः, व्यायामः; 'to make effort,' यत् (c. 1. यतते -तितुं), प्रयत्, चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं).

EFFRONTERY, *s.* धार्ष्ट्यं, धृष्टता, प्रागल्भ्यं, प्रगल्भता, निर्लज्जत्वं, प्रतिभानं.

EFFULGENCE, *s.* उज्ज्वलता, तेजः *n.* (स्), दीप्तिः *f.*, द्युतिः *f.*, बृहद्द्युतिः *f.*, प्रतापः, प्रभा.

EFFULGENT, *a.* तेजस्वी -स्विनी -स्वि (न्), उज्ज्वलः -ला -लं, अतिशोभनः -ना -नं, सुप्रभः -भा -भं, अतिदीप्तिमान् -मती -मत् (त्), तैजसः -सी -सं.

To EFFUSE, *v. a.* पत् in caus. (पातयति -यितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, स्कन्द् in caus. (स्कन्दयति -यितुं), उत्सिच् (c. 6. -सिञ्चति -सेक्तुं), अवसिच्, निषिच्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, स्रु in caus. (स्रावयति -यितुं), प्रस्रु, आवृत् in caus. (-वर्त्तयति -यितुं).

EFFUSED, *p. p.* स्कन्दितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, स्रावितः -ता -तं.

EFFUSION, *s.* उत्सर्गः, निषेकः, उत्सेकः, स्कन्दनं, स्रावः, अवसेचनं, पातः -तनं, मोचनं, मोक्षणं, विसर्गः, निक्षेपः.

EGG, *s.* अण्डं, डिम्बः, डिम्भः, कोशः, कोषः -षकः, पेशिः *f.*, पेशी; 'fowl's egg,' कुक्कुटाण्डं; 'egg-born,' अण्डजः -जा -जं.

To EGG ON or EDGE, *v. a.* प्रेर् (c. 10. प्रेरयति -यितुं, rt. ईर्), उत्सह in caus. (-साहयति -यितुं), प्रोत्सह्, चुद् (c. 10. चोदयति -यितुं), उत्तिज (c. 10. -तेजयति -यितुं).

EGG-PLANT, *s.* हिङ्गुलीरः, हिङ्गुली, वङ्गनः, वार्त्ताकुः *m.* -की, भण्टाकी, वातिगः, दुःप्रधर्षणी, चित्रफला, कुकुटं.

EGLANTINE, *s.* जवापुष्पो वन्यलताभेदः, अरण्यजपा.

EGOTISM, *s.* अहङ्कारः, अहङ्क्रिया, अहङ्कृतिः *f.*, अहन्ता, अहमहमिका, अहम्मतिः *f.*, ममता, आत्माभिमानं, आत्मश्लाघा, आत्मस्तुतिः *f.*

EGOTIST, *s.* अहङ्कारी *m.* (न्), अहंयुः *m.*, आत्माभिमानी *m.* (न्), ममतायुक्तः.

EGOTISTICAL, *a.* अहङ्कारी -रिणी -रि (न्), अहङ्कारवान् -वती -वत् (त्) or अहङ्क्रियावान्, अहंयुः -युः -यु, मामकः -की -कं, आत्मनीनः -ना -नं.

EGREGIOUS, *a.* (Eminent) विशिष्टः -ष्टा -ष्टं, ख्यातः -ता -तं, प्रसिद्धः -द्धा -द्धं, उत्कृष्टः -ष्टा -ष्टं, अधिकः -का -कं, प्रमुखः -खा -खं, उत्तमः -मा -मं.—(Great) अत्यन्तः -न्ता -न्तं, अति prefixed; 'an egregious fool,' अतिमूर्खः, प्रतिनिविष्टमूर्खः, अत्यन्तविनष्टचित्तः; 'an egregious rascal,' ख्यातगर्हणः, अत्यन्तदुष्टः, अतिगर्हितः.

EGREGIOUSLY, *adv.* अत्यन्तं, अति, अतीव, अतिशयेन, भृशं, अतिमात्रं.

EGRESS, EGRESSION, *s.* निःसारः -रणं, निःसरणं, अपसारः, निर्गमः, निर्गतिः *f.*, बहिर्गमनं, निष्क्रमणं, निर्याणं, विनिर्गमः.

EGYPT, *s.* (The country) मिसरदेशः.

EGYPTIAN, *s.* and *a.* मिसरदेशजः, मिसरदेशीयः -या [illegible]

EIGHT, *a.* अष्ट or अष्टौ *m. f. n.* (अष्टन्) [illegible] -का -कं, अष्टसंख्यकः -का -कं.

EIGHTEEN, *a.* अष्टादश *m. f. n.* (न्), अष्टादशसंख्यकः -का -कं.

EIGHTEENTH, *a.* अष्टादशः -शी -शं.

EIGHTFOLD, *a.* अष्टगुणः -णा -णं, अष्टविधः -धा -धं, अष्टकः -का -कं, अष्टाङ्गः -ङ्गा -ङ्गं, अष्टप्रकारः -रा -रं, अष्टधा.

EIGHTH, *a.* अष्टमः -मी -मं, अष्टकः -का -कं; 'one-eighth,' अष्टमांशः, अष्टमभागः, पादार्द्धं.

EIGHTIETH, *a.* अशीतः -ती -तं, अशीतितमः -मा -मं.

EIGHTHLY, *adv.* अष्टमस्थले, अष्टमपदे, अष्टमस्थाने.

EIGHTY, *a.* अशीतिः *f. sing.*, अशीतिसंख्यकः -का -कं; 'eighty years old,' अशीतिकः -का -कं; 'eighty-one,' एकाशीतिः *f.*; 'eighty-two,' द्व्यशीतिः *f.*; 'eighty-three,' त्र्यशीतिः *f.*

EITHER, *pron. distrib.* (Of two) अन्यतरः -रा -रत्.—(Of many) अन्यतमः -मा -मत्; 'either of two days,' अन्यतरेद्युस्.

EITHER, *conj.* वा placed after a word, अथवा, वापि, किंवा; 'either a friend or an enemy,' मित्रं वा अथवा शत्रुः.

To EJACULATE, *v. a.* उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं).—(Utter a sudden prayer) आकस्मिकप्रार्थनाम् उदीर् (c. 10. -ईरयति -यितुं), अकस्मात्, प्रार्थनाम् उदाहृ (c. 1. -हरति -हर्त्तुं).

EJACULATION, *s.* उद्गारः, उद्गिरणं, उत्क्षेपः, उदीरणं, उदाहरणं.—(Utterance of a sudden prayer) आकस्मिकप्रार्थनोदीरणं.

EJACULATORY, *a.* उत्क्षेपकः -का -कं, अकस्माद् उदीरितः -ता -तं, आकस्मिकः -की -कं.

To EJECT, *v. a.* अपास् (c. 4. -अस्यति -असितुं), निःसृ in caus. (-सार-

यति -यितुं), निराकृ, बहिष्कृ, बहिःकृ, दूरीकृ, उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रतिक्षिप्, समाक्षिप्, निष्कस् in caus. (-कासयति -यितुं).—(From office) अधिकारात् or साचिव्याद् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं).—(Vomit up) उत्क्षिप्, उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं).

Ejected, *p. p.* निःसारितः -ता -तं, निरस्तः -स्ता -स्तं, अपास्तः -स्ता -स्तं, निराकृतः -ता -तं, बहिष्कृतः -ता -तं, बहिःकृतः -ता -तं, उत्क्षिप्तः -प्ता -प्तं, अपसारितः -ता -तं, अपविद्धः -द्धा -द्धं.—(From office) च्युताधिकारः -रा -रं, अधिकाराद्भ्रंशितः -ता -तं, निर्भिन्नः -न्ना -न्नं.

Ejection, *s.* निरसनं, निःसारणं, अपसारणं, उत्क्षेपः, बहिष्करणं, अपासनं, निर्वासनं, निराकरणं, अपसर्ज्जनं, प्रवासनं, निष्कासनं.

Ejectment, *s.* राजाज्ञापत्रेण क्षेत्रगृहादेर् निराकरणं.

Ejulation, *s.* विलपनं, परिदेवनं, कोलाहलः, क्रुष्टं, क्रन्दनं, हाहाकारः, आर्त्तनादः, हा हतोऽस्मीति उत्क्रोशनं.

To eke, *v. a.* (Enlarge) वृध् in caus. (वर्धयति -यितुं), विस्तॄ in caus. (-स्तारयति -यितुं), प्रसॄ in caus. (-सारयति -यितुं).—(Lengthen) द्राघ (nom. द्राघयति -यितुं), तन् (c. 8. तनोति -नितुं), दीर्घीकृ.

To elaborate, *v. a.* संस्कृ, परिष्कृ, महायत्नेन or बहुश्रमेण साध् in caus. (साधयति -यितुं) or सिद्धीकृ or निष्पद् in caus. (-पादयति -यितुं) or निर्मा (c. 2. -माति -तुं) or कॢप् (c. 10. कल्पयति -यितुं) or विधा (c. 3. -दधाति -धातुं).

Elaborate, elaborated, *a.* or *p. p.* संस्कृतः -ता -तं, परिष्कृतः -ता -तं, महायत्नेन कल्पितः -ता -तं or विरचितः -ता -तं or सिद्धीकृतः -ता -तं.

Elaborately, *adv.* महायत्नेन, महायासेन, सपरिष्कारं, बहुश्रमेण, बहुप्रयासेन, परिष्कारपूर्व्वं.

Elaboration, *s.* परिष्कारः, परिष्कृतिः *f.*, संस्कारः, महायत्नेन साधनं or निष्पादनं or निर्माणं or कल्पनं or विरचनं.

To elance, *v. a.* अस् (c. 4. अस्यति, असितुं), प्रास्, क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, सृज् (c. 6. सृजति, स्रष्टुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्.

To elapse, *v. n.* अती (c. 2. अत्येति -तुं, rt. इ), व्यती, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं), गम् (c. 1. गच्छति, गन्तुं); 'a long time elapsed,' अतिचक्राम सुमहान् कालः; 'ten days having elapsed,' अतिक्रान्ते दशाहे.

Elapsed, *p. p.* अतीतः -ता -तं, व्यतीतः -ता -तं, अतिक्रान्तः -न्ता -न्तं, गतः -ता -तं, भूतः -ता -तं.

Elastic, *a.* स्थितिस्थापकः -का -कं, प्रकृतिप्रापकः -का -कं, वर्द्धनक्षमः -मा -मं, सुखाकुञ्चनीयः -या -यं, विततीकरणीयः -या -यं, विस्तारयितुं शक्यः -क्या -क्यं, स्वप्रकृतिं प्रति निवर्त्तनशीलः -ला -लं.

Elasticity, *s.* स्थितिस्थापकं -कत्वं -कता, वर्धनक्षमता, प्रकृतिप्रापकत्वं, स्वप्रकृतिं प्रति निवर्त्तनशीलता, सुखाकुञ्चनीयता.

Elate, elated, *a.* उद्धतः -ता -तं, समुद्धतः -ता -तं, उद्धतमनस्कः -स्का -स्कं, प्रहृष्टमनाः -नाः -नः (स्), हृष्टचित्तः -त्ता -त्तं, उल्लासितः -ता -तं, उन्नद्धचेताः -ताः -तः (स्), समुन्नतचित्तः -त्ता -त्तं, प्रमुदितः -ता -तं, प्रफुल्लः -ल्ला -ल्लं, दर्पाध्मातः -ता -तं; 'elated with victory,' जयगर्वितः -ता -तं.

To elate, *v. a.* दृप् in caus. (दर्पयति -यितुं), प्रहृष् in caus. (-हर्षयति -यितुं), उल्लस् in caus. (-लासयति -यितुं), प्रमुद् in caus. (-मोदयति -यितुं).

Elation, *s.* उद्धतिः *f.*, चित्तसमुन्नतिः *f.*, उद्धतमनस्कत्वं, हर्षः, प्रहर्षः, दर्पः, प्रमोदः, गर्व्वः; 'from conquest,' जयगर्व्वः.

Elbow, *s.* अरत्निः *m.*, कफोणिः *m. f.* -णी, कूर्परः, कफणिः *m. f.* -णी, कीलः.—(Of a river) वङ्कः, वक्रं, भङ्गुरः, पुटभेदः.—(Corner) कोणः.

To elbow, *v. a.* अरत्निना ताडयित्वा बहिष्कृ, अरत्निना आहन् (c. 2. -हन्ति -न्तुं).

Elbow-chair, *s.* अरत्निधारणयोग्यः पीठविशेषः.

Elbow-room, *s.* (Room for motion) प्रसरः, अवकाशः.

Elder, *a.* ज्यायान् -यसी -यः (स्), ज्येष्ठः -ष्ठा -ष्ठं, वयोज्येष्ठः -ष्ठा -ष्ठं, पूर्व्वजः -जा -जं, अग्रजः -जा -जं, वरः -रा -रं, वरीयान् -यसी -यः (स्), वरिष्ठः -ष्ठा -ष्ठं, अधिकवयाः -याः -यः (स्), वरवयाः &c., अधिकवयस्कः -स्का -स्कं, वर्षीयान् -यसी -यः (स्), वर्षिष्ठः -ष्ठा -ष्ठं, अग्रिमः -मा -मं, अग्रियः -या -यं, अकनिष्ठः -ष्ठा -ष्ठं.

Elder, *s.* (Venerable person) गुरुः *m.*, गुरुजनः, आर्य्यजनः, वृद्धः; 'elders,' वृद्धाः *m. pl.*, प्राचीनाः *m. pl.*, प्राचीनलोकाः *m. pl.*, पूर्व्वपुरुषाः *m. pl.*, प्राञ्चः *m. pl.*

Elderly, *a.* अधिकवयाः -याः -यः (स्), मध्यमवयस्कः -स्का -स्कं, अतिक्रान्तयौवनः -ना -नं, ईषद्वृद्धः -द्धा -द्धं.

Eldership, *s.* ज्येष्ठता -त्वं, ज्यैष्ठ्यं, अधिकवयस्कता, गुरुत्वं.

Eldest, *a.* ज्येष्ठः -ष्ठा -ष्ठं or सर्व्वज्येष्ठः, अग्रिमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं. *See* Elder.

To elect, *v. a.* वृ (c. 5. वृणोति -णुते, c. 9. वृणाति -णीते, c. 1. वरति -रितुं -रीतुं, c. 10. वरयति -यितुं), आवृ, उद्वृ, प्रवृ; उद्धृ (c. 1. -हरति -हर्त्तुं), वावृत् (c. 4. वावृत्यते), अनुरुच् in caus. (-रोचयति -यितुं), मनोनीतं -तां -तं कृ.—(Take) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), उद्ग्रह्, आदा.—(Appoint) नियुज् (c. 10. -योजयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).—(Prefer) पुरोधा (c. 3. -दधाति -धातुं); 'they elect a god to rule over them,' देवं राज्ये वरयन्ति; 'she elects him as a husband,' सा तं पतित्वे वरयति.

Elect, elected, *a.* and *p. p.* मनोनीतः -ता -तं, वृतः -ता -तं, वावृत्तः -त्ता -त्तं, वृत्तः -त्ता -त्तं, उद्धृतः -ता -तं, गृहीतः -ता -तं, उद्गृहीतः -ता -तं, पुरोहितः -ता -तं; 'to any office,' पदे नियुक्तः -क्ता -क्तं.

Election, *s.* वृतिः *f.*, वरः -रणं, उद्धारः, उद्धरणं, उद्ग्रहणं, ग्रहणं, आदानं, नियोजनं, मनोनयः.

Electioneering, *s.* पदप्रेप्सुसंवर्द्धनार्थं पराश्रयप्रार्थनं.

Elective, *a.* पराश्रयाधीनः -ना -नं, पराग्रहाधीनः -ना -नं, वरणाधिकारविशिष्टः -ष्टा -ष्टं, वरणकारी -रिणी -रि (न्).

Elector, *s.* वरणकारी *m.* (न्), वरयिता *m.* (तृ), वरणकृत् *m.*, वरणाधिकारवान् *m.* (त्).

Electoral, *a.* वरणाधिकारसम्बन्धी -न्धिनी -न्धि (न्), वरयितृपदसम्बन्धी.

Electorate, *s.* वरयितुः or वरणकारिणः पदं or अधिकारः.

Electre, electrum, *s.* (Amber) तैलस्फटिकः, शुक्लापुट्टः.—(Mixed metal) मिश्रितधातुः *m.*, कांस्यं, पीतलोहं.

Electric, electrical, *a.* वैद्युतः -ती -तं, विद्युत्वान् -त्वती -त्वत् (त्), तडित्वान् -त्वती -त्वत् (त्), विद्युन्मयः -यी -यं, विद्युद्विषयः -या -यं.

Electricity, *s.* विद्युत् *f.*, तडित् *f.*, विद्युद्वस्तु *n.*, वैद्युतशक्तिः *f.*, वज्रस्फुलिङ्गः.—(The science) विद्युद्विद्या, वज्रस्फुलिङ्गविद्या.

Electuary, *s.* लेहः, अवलेहः, अपलेहः, अवलेहौषधं.

Eleemosynary, *a.* भिक्षादानसम्बन्धी -न्धिनी -न्धि (न्), दरिद्रपालनार्थः -र्था -र्थं, दरिद्रोपकारी -रिणी -रि (न्), दरिद्रपोषणार्थं दत्तः -त्ता -त्तं.

Elegance, elegancy, *s.* चारुता, सौन्दर्य्यं, विनीतत्वं, विलासः, लावण्यं, शोभा, लालित्यं; 'of form,' रूपलावण्यं; 'of speech,' वाग्विलासः.

Elegant, *a.* विलासी -सिनी -सि (न्), चारुः -र्व्वी -रु, सुललितः -ता -तं, ललितः -ता -तं, विनीतः -ता -तं, लावण्यवान् -वती -वत् (त्), लीला-

वान् &c., सुन्दरः -रा -री -रं, सुरूपः -पी -पं, रोचिष्णुः -ष्णुः -ष्णु, सुवेशः -शा -शं, भाविष्णुः -ष्णुः -ष्णु, विभ्राट् *m.f.n.* (ज्), शीलः -ला -लं, शुभगः -गा -गं, अयास्यः -स्या -स्यं; 'an elegant woman,' रूपवती, सुमध्यमा.—(As composition) सुरसः -सा -सं.

Elegantly, *adv.* सविलासं, विलासतया, सलावण्यं, सुललितं, चारु.

Elegiac, *a.* कारुणिकः -की -कं, करुणामयः -यी -यं, शोकसूचकः -का -कं.

Elegy, *s.* करुणं, कारुणिकगीतं, शोकगानं, शोकसूचकगीतं.

Element, *s.* (First or constituent principle) मूलवस्तु *n.*, मूलं, भूतं, बीजं, अधिभूतं, मात्रं, विषयः, भूतमात्रं -त्रा, तन्मात्रं, अवयवः; 'the five elements,' पञ्चभूतं, पृथिव्यादि *n.*—(Of a science, &c.) तत्त्वं, सूत्रं.—(Letter) अक्षरं.—(Rudiments) आरम्भः, प्रारम्भः.—(Outline) वस्तुमात्रं, वस्तु.—(Ingredient) अंशः, भागः, अवयवः; 'elementary substance,' अव्याकृतं; 'elementary property,' कारणगुणः.

Elemental, *a.* भौतः -ती -तं, भौतिकः -की -कं, आधिभौतिकः -की -कं, भूतभावः -वा -वं, पाञ्चभौतिकः -की -कं.

Elementary, *a.* (Simple, uncompounded) अव्याकृतः -ता -तं, निरवयवः -वा -वं.—(Primary) मूलिकः -की -कं, मौलः -ली -लं.—(Rudimental) आरम्भकः -का -कं, प्रारम्भकः -का -कं.

Elephant, *a.* हस्ती *m.* (न्), गजः, करी *m.* (न्), दन्ती *m.* (न्), द्विपः, वारणः, मातङ्गः, मतङ्गः, कुञ्जरः, नागः, द्विरदः, इभः, रदी *m.* (न्), द्विपायी *m.* (न्), अनेकपः, विषाणी *m.* (न्), करेणुः *m.f.*, लम्बकर्णः, पद्मी *m.* (न्), शुण्डालः, कर्णिकी *m.* (न्), दन्तावलः, स्तम्बेरमः, दीर्घवक्त्रः, द्रुमारिः *m.*, दीर्घमारुतः, विलोमजिह्वः, शङ्खी *m.* (न्), पीलुः *m.*, महामृगः, मतङ्गजः, षष्टिहायनः; 'female elephant,' हस्तिनी, करिणी, पद्मिनी, धेनुका, वशा, 'young elephant,' कलभः -भी *f.*, करिशावकः, करेणुशिशुः *m.*, दिक्कः; 'a large elephant,' गजपुङ्गवः, करेणुवर्य्यः; 'wild elephant,' वनगजः; 'furious elephant,' मत्तः, प्रभिन्नः, गर्जितः; 'rutting elephant,' मदोत्कटः, मदकलः; 'elephant out of rut,' उद्वान्तः, निर्मदः; 'leader of a herd of elephants,' यूथनाथः, यूथपः; 'herd of elephants,' यूथः -थं, हास्तिकं, गजता, गजव्रजं; 'troop of war-elephants,' घटा, घटना; 'elephants of the quarters,' ऐरावतः, पुण्डरीकः, वामनः, कुमुदः, अञ्जनः, पुष्पदन्तः, सार्वभौमः, सुप्रतीकः; 'their females,' अभ्रमुः *f.*, कपिला, पिङ्गला, अनुपमा, ताम्रकर्णी, शुभ्रदन्ती, अञ्जना, अञ्जनावती; 'elephant's trunk,' शुण्डा; 'his temples,' गण्डः, कटः; 'his frontal globes,' कुम्भौ; 'the hollow between them,' विदुः; 'his forehead,' ललाटं, अवग्रहः; 'his eye-ball,' इषीका, ईषिका; 'corner of his eye,' निर्य्याणं, निर्याणनं; 'root of his ear,' चूलिका; 'of his tail,' पेचकः; 'his withers,' स्कन्धदेशः, आसनं; 'his side,' पक्षभागः, पार्श्वभागः; 'his thigh,' गात्रं, अवरं; 'juice from his temples,' मदः, दानं; 'water emitted from his trunk,' वमथुः *m.*, करशीकरः; 'his roaring,' करिगर्जितं, बृंहितं; 'elephant-breaking,' हस्तिशिक्षा; 'elephant-breaker,' हस्तिशिक्षाजीवी *m.* (न्); 'elephant-stable,' वारणशाला; 'master of the elephants,' गजाध्यक्षः.

Elephant-driver, *s.* हस्तिपः -पकः -पालः, महामात्रः, हस्तिचारी *m.* (न्), हस्त्यारोहः, निषादी *m.* (न्), आधोरणः.

Elephantiasis, *s.* (Disease of the skin) वल्मीकः, त्वग्रोगः, दुष्कर्मं.

Elephantine, *a.* हास्तेयकः -की -कं, ऐभः -भी -भं; 'as big as an elephant,' हस्तिद्वयसः -सी -सं, गजमात्रः -त्री -त्रं.

To Elevate, *v. a.* उन्नम् in caus. (-नमयति -यितुं), उच्छ्रि (c. 1. उच्छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि, उद्यम् (c. 1. -यच्छति -यन्तुं), उच्चीकृ, ऊर्द्ध्वीकृ, उत्स्था in caus. (-थापयति -यितुं, rt. स्था), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उन्नी (c. 1. -नयति -नेतुं), उद्धन् (c. 2. -हन्ति -न्तुं), उद्धृ (c. 1. -हरति -हर्त्तुं), अधिरुह् in caus. (-रोपयति -यितुं), उन्नतिं कृ. —(To a high office) उत्कृष्टपदे नियुज् (c. 7. -युनक्ति -योक्तुं) or प्रतिपद् in caus. (-पादयति -यितुं).

Elevated, *p. p.* उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, अभ्युच्छ्रितः -ता -तं, उत्कृष्टः -ष्टा -ष्टं, उद्यतः -ता -तं, समुद्यतः -ता -तं, उत्थापितः -ता -तं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं, अभ्युत्थितः -ता -तं, उद्गतः -ता -तं, अधिरोपितः -ता -तं, अधिरूढः -ढा -ढं, आरूढः -ढा -ढं, अध्यारूढः -ढा -ढं, उन्नतः -ता -तं, उद्ग्रः -ग्रा -ग्रं, उद्वहितः -ता -तं, उत्तुङ्गः -ङ्गा -ङ्गं, सोच्छ्रायः -या -यं, आहितगौरवः -वा -वं, कृतोच्चैस् ind., उच्छ्रायी -यिणी -यि (न्).

Elevation, *s.* उन्नतिः *f.*, समुन्नतिः *f.*, उत्कर्षः, उत्कृष्टता, उच्छ्रयः, समुच्छ्रयः, उच्छ्रायः, समुच्छ्रायः, उच्छ्रितिः *f.*, उत्थापनं, अभ्युत्थानं, उत्थितिः *f.*, उत्सेधः, समुत्सेधः, उद्धृतिः *f.*, उत्तुङ्गता, औत्कर्ष्यं, उन्नयता, उत्तोलनं, ऊर्द्ध्वत्वं, अधिरोहः, उन्नयः -यनं, उन्नामः, उन्नमनं, उपचयः, प्रतिपत्तिः *f.*, उच्चता, उदयः.

Eleven, *a.* एकादश *m. f. n. pl.* (न्), एकादशसंख्यकः -का -कं.

Eleventh, *a.* एकादशः -शी -शं.

Elf, *s.* विद्याधरः, अपदेवता, वेतालः, भूतः, राक्षसः, पिशाचः.

Elf-lock, *s.* जटा, जटिः *f.*, सटा.

Elfish, *a.* पैशाचिकः -की -कं, भौतिकः -की -कं, राक्षसः -सी -सं.

To Elicit, *v. a.* निर्णी (c. 1. -णयति -णेतुं), निष्कृष् (c. 1. -कर्षति -क्रष्टुं), उत्कृष्; निर्हृ (c. 1. -हरति -हर्त्तुं), उद्धृ, उत्पद् in caus. (-पादयति -यितुं), बहिर्निं कृ, निर्गम् in caus. (-गमयति -यितुं), निःसृ in caus. (-सारयति -यितुं), उद्भू in caus. (-भावयति -यितुं), निर्ग्रह् (c. 9 -गृह्णाति -ग्रहीतुं), उद्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अपवह् (c. 1. -वहति -वोढुं).

Elicitation, *s.* निर्हारः, उद्धारः, उत्पादनं, निष्कर्षः, निर्णयनं.

Elicited, *p. p.* निर्हृतः -ता -तं, उद्धृतः -ता -तं, उत्पादितः -ता -तं.

To Elide, *v. a.* (Cut off a syllable) लुप् (c. 6. लुम्पति, लोप्तुं).

Eligibility, *s.* वरणीयता, वार्य्यत्वं, ग्राह्यत्वं, ग्रहणीयता, योग्यता.

Eligible, *a.* वरणीयः -या -यं, वार्य्यः -र्य्या -र्य्यं, वृत्यः -त्या -त्यं, ग्राह्यः -ह्या -ह्यं, ग्रहणीयः -या -यं, आदेयः -या -यं, योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं.

Elimination, *s.* (Turning out of doors) गृहाद् बहिष्करणं or निराकरणं. —(In algebra) नाशः, मध्यमनाशः, मध्यमाहरणं, मध्यमापनयनं.

Elision, *s.* (Cutting off of a syllable) लोपः, अक्षरत्यागः.

Elixir, *s.* (Medicine prolonging life) रसायनं, तेजोवर्धनं.

Elk, *s.* चतुष्पदजन्तुविशेषः, हरिणप्रभेदः.

Ell, *s.* वस्त्रमापने प्रयुक्तः परिमाणविशेषः.

Ellipse, *s.* (An oval figure) अण्डाकारः, अण्डाकृतिः *m.*

Ellipsis, *s.* (Figure of rhetoric) शेषः, व्यञ्जना -नं, व्यङ्ग्यः, लक्षणा, उपलक्षणं, व्यञ्जकः; 'supplying an ellipsis,' अध्याहारः, अभ्यूहः, ऊहः.

Elliptic, elliptical, *a.* (Oval) अण्डाकारः -रा -रं, अण्डाकृतिः -तिः -ति.—(Requiring something to be supplied) अध्याहार्य्यः -र्य्या -र्य्यं, ऊह्यः -ह्या -ह्यं, अभ्यूह्यः -ह्या -ह्यं, आनुषङ्गिकः -की -कं.

Elm, *s.* वनपादपविशेषः, वन्यवृक्षप्रभेदः.

Elocution, *s.* (Pronunciation) उच्चारणं, उदाहरणं, व्याहारः, वाणी. —(In rhetoric) शब्दचातुर्य्यं, वाक्चातुर्य्यं, वक्तृता, वक्तृत्वशक्तिः *f.*, वाक्पटुता.

To Elongate, *v. a.* दीर्घीकृ, द्राघ (nom. द्राघयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), प्रतन् (c. 8. -तनोति -नितुं), वितन्, विततीकृ.

ELONGATED, *p. p.* प्रसृतः -ता -तं, आयामितः -ता -तं, आयतः -ता -तं, व्यायतः -ता -तं, आयतिमान् -मती -मत् (त्), लम्बितः -ता -तं.

ELONGATION, *s.* आयतिः *f.*, दीर्घीकरणं, तानं, प्रसारणं, द्राघिमा *m.* (न्).

To ELOPE, *v. n.* गूढविवाहार्थं मातृपितृस्वजनाद्यगोचरेण पलाय् (c. 1. पलायते -यितुं) or मातृपितृस्वजनादीनाम् आश्रयं त्यज् (c. 1. त्यजति, त्यक्तुं), व्यपसृप् (c. 1. -सर्पति -सर्प्तुं).

ELOPEMENT, *s.* गूढविवाहार्थं मातृपितृस्वजनाद्यगोचरेण पलायनं or विपलायनं or मातृपित्राश्रयत्यागः.

ELOQUENCE, *s.* वाक्पटुता, वाक्पाटवं, पटुत्वं, पाटवं, वाग्विभवः, वक्तृत्वं, वक्तृत्वशक्तिः *f.*, वाक्शक्तिः *f.*, सद्वक्तृता, वाग्मित्वं, वाग्विदग्धता, शब्दचातुर्य्यं, सुप्रलापः, सुभाषितं, सुवचनं, वाचाशक्तिः *f.*

ELOQUENT, *a.* वाक्पटुः -टुः -टु, वाग्मी -ग्मिनी -ग्मि (न्), वाक्यविशारदः -दा -दं, वाग्विद् *m. f. n.*, प्रवचनपटुः -टुः -टु, पटुः -टुः -टु, सद्वक्ता -क्त्री -क्तृ (तृ), वागीशः -शा -शं, वाक्पतिः -तिः -ति, सुवचाः -चाः -चः (स्), वाग्विदग्धः -ग्धा -ग्धं, शब्दचतुरः -रा -रं, सारस्वतः -ती -तं, सुमुखः -खी -खं.

ELOQUENTLY, *adv.* पाटवेन, सपाटवं, वाग्विभवेन, शब्दचातुर्य्येण.

ELSE, *a.* अन्यः -न्या -न्यत्, इतरः -रा -रं, परः -रा -रं, व्यतिरिक्तः -क्ता -क्तं, भिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, अपरः -रा -रं; 'any thing else,' किञ्चिद् अन्यत्; 'what else can he do,' पुनः किं करोति; 'any thing else but this,' एतद्भिन्नं किञ्चित्, अस्मात् परं किञ्चित्, or एतद्व्यतिरिक्तं किञ्चित्.

ELSE, *conj.* (Otherwise) अन्यथा, अथवा, नो चेत्, न चेत्, इतरथा, इतरतस्, अन्यतस्, परतस्, अन्यत्, किंवा, एतद्विना, एतद्व्यतिरेकेण.

ELSEWHERE, *adv.* अन्यत्र, इतरत्र, परत्र, अन्यतस्, अपरतस्, इतरतस्, स्थानान्तरे, अन्यस्थाने, भिन्नस्थाने; 'gone elsewhere,' स्थानान्तरं गतः -ता -तं.

To ELUCIDATE, *v. a.* स्पष्टीकृ, सुस्पष्टीकृ, स्पष्ट (nom. स्पष्टयति -यितुं), प्रकाश् in caus. (-काशयति -यितुं), व्याख्या (c. 2. -ख्याति -तुं), व्यक्तीकृ, व्याकृ, परिशुध् in caus. (-शोधयति -यितुं), दृष्टान्तीकृ, दृष्टान्तेन or निदर्शनेन व्याख्या.

ELUCIDATED, *p. p.* स्पष्टीकृतः -ता -तं, व्याख्यातः -ता -तं, प्रकाशितः -ता -तं.

ELUCIDATION, *s.* स्पष्टीकरणं, व्याख्या, प्रकाशनं, दृष्टान्तेन व्याकरणं.

ELUCIDATOR, *s.* प्रकाशकः, व्याख्याता *m.* (तृ), उद्देशकः, निदर्शनकारकः.

To ELUDE, *v. a.* छलेन अपक्रम् (c. 1. -क्रामति -क्रमितुं) or व्यपक्रम् or पलाय् (c. 1. पलायते -यितुं) or व्यपसृप् (c. 1. -सर्पति -सर्प्तुं), निर्गम् (c. 1. -गच्छति -गन्तुं), पलायित्वा परिहृ (c. 1. -हरति -हर्त्तुं), निस्तॄ (c. 1. -तरति -रितुं -रीतुं); 'It eludes the grasp by reason of its subtilty,' सूक्ष्मत्वाद् ग्रहीतुं न शक्यते; 'eluding the senses,' इन्द्रियागोचरः -रा -रं.

ELUMBATED, *a.* श्रोणिविकलः -ला -लं, क्षीणकटिबलः -ला -लं.

ELUSION, *s.* छलेन पलायनं or अपक्रमः -मणं, निर्गतिः *f.*, निर्गमः.

ELUSIVE, *a.* पलायनपरायणः -णा -णं, विपलायी -यिनी -यि (न्).

ELUSORY, *a.* छली -लिनी -लि (न्), मायी -यिनी -यि (न्), छाद्मिकः -की -कं.

ELYSIAN, *a.* स्वर्गीयः -या -यं, स्वर्ग्यः -र्ग्या -र्ग्यं, परमानन्ददः -दा -दं.

ELYSIUM, *s.* नन्दनं, स्वर्गः, आनन्दस्थानं, सुखाधारः, सुखदं, वैकुण्ठं.

To EMACIATE, *v. a.* कृश (nom. कृशयति -यितुं), क्षि in caus. (क्षपयति -यितुं), क्षीणं -णां -णं कृ, ग्लै in caus. (ग्लपयति -यितुं), मांसक्षयं कृ, शुष्कीकृ.

To EMACIATE, *v. n.* क्षि in pass. (क्षीयते), कृशीभू, विशॄ in pass. (-शीर्य्यते), क्षै (c. 1. क्षायति, क्षातुं), ग्लै (c. 1. ग्लायति, ग्लातुं), शुष् (c. 4. शुष्यति, शोष्टुं), शुष्कीभू.

EMACIATED, *p. p.* or *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, शुष्कमांसः -सा -सं, शुष्काङ्गः -ङ्गी -ङ्गं, क्षामः -मा -मं, ग्लानः -ना -नं, शीर्णः -र्णा -र्णं, विशीर्णः -र्णा -र्णं, अमांसः -सा -सं, ग्लासुः -सुः -सु; 'by hunger,' क्षुत्क्षामः -मा -मं.

EMACIATION, *s.* कार्श्यं, कृशत्वं -ता, कृशाङ्गत्वं, क्षामता, शीर्णता, शरीरक्षीणता, शरीरशोषणं, शरीरपाकः, मांसशुष्कता, मांसक्षयः, शोषः.

EMANANT, EMANATIVE, *a.* प्रसृतः -ता -तं, निःसृतः -ता -तं, विनिःसृतः -ता -तं, उत्पन्नः -न्ना -न्नं, उद्भूतः -ता -तं, प्रवृत्तः -त्ता -त्तं, निर्गतः -ता -तं.

To EMANATE, *v. n.* (Flow from) स्रु (c. 1. स्रवति, स्रोतुं), प्रस्रु, निःस्रु, विस्रु.—(Proceed from) उत्पद् in pass. (-पद्यते), निःसृ (c. 1. -सरति -सर्त्तुं), विनिःसृ, प्रसृ; निर्गम् (c. 1. -गच्छति -गन्तुं), बहिर्गम्, उद्गम्, उदि (c. 1. -अयति -एतुं), उद्भू, प्रभू.

EMANATION, *s.* निःस्रावः, निःसारः -सरणं, उत्पत्तिः *f.*, निर्गमः -मनं, उद्गमः, उद्भवः, उद्भावः, उदयनं, प्रवृत्तिः *f.*

To EMANCIPATE, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, उद्धृ (c. 1. -हरति -हर्त्तुं), विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्ज्जयति -यितुं), निस्तॄ in caus. (-तारयति -यितुं), त्रै (c. 1. त्रायते, त्रातुं), परित्रै.

EMANCIPATED, *p. p.* मुक्तः -क्ता -क्तं, विमोचितः -ता -तं, मोक्षितः -ता -तं, उद्धृतः -ता -तं, निस्तारितः -ता -तं, विसृष्टः -ष्टा -ष्टं, परित्राणः -णा -णं, रक्षितः -ता -तं, उत्तीर्णः -र्णा -र्णं.—(From worldly existence) मुक्तः -क्ता -क्तं, निर्वृतः -ता -तं, निर्वाणः -णा -णं, सिद्धः -द्धा -द्धं.

EMANCIPATION, *s.* मुक्तिः *f.*, मोचनं, मोक्षः -क्षणं, विमोक्षः -क्षणं, विमुक्तिः *f.*, विमोचनं, परिमोक्षणं, वैमुक्तं, उद्धारः, उद्धरणं, निस्तारः, त्राणं, परित्राणं, विसर्गः, तारणं.—(From worldly existence) मुक्तिः *f.*, निर्वाणं, निर्वृतिः *f.*, अपवर्गः -वर्ज्जनं, सिद्धिः *f.*, सद्गतिः *f.*, परमागतिः *f.*, श्रेयः *n.* (स्), निःश्रेयः *n.* (स्), निःश्रेयसं, निर्याणं, पुनर्जन्मजयः, कैवल्यं; 'desirous of it,' मुमुक्षुः -क्षुः -क्षु, तितीर्षुः -र्षुः -र्षु.

EMANCIPATOR, *s.* मोचकः, मोक्षकः, उद्धर्त्ता *m.* (र्तृ), त्राता *m.* (तृ).

To EMASCULATE, *v. a.* वृषणौ or वृषणद्वयम् उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), अण्डच्छेदं कृ, पुंस्त्वं हृ (c. 1. हरति, हर्त्तुं), विफलीकृ, शण्डीकृ, निष्पुरुषीकृ, क्लीबीकृ.

EMASCULATED, *p. p.* छिन्नवृषणः -णा -णं, मुष्कशून्यः -न्या -न्यं, विफलीकृतः -ता -तं, विफलः -ला -लं, हृतपौरुषः -षा -षं, शण्डः, षण्ढः, क्लीबः, नपुंसकः.

EMASCULATION, *s.* वृषणच्छेदः, वृषणोत्पाटनं, पुंस्त्वहरणं, शण्डता.

To EMBALE, *v. a.* द्रव्यकूर्चं कृ, कूर्चीकृ, भाण्डं कृ, पोटलिकां कृ.

To EMBALM, *v. a.* मृतशरीरं तद्रक्षणाय सुगन्धिद्रव्याक्तं कृ or तद्रक्षार्थं तिक्तौषधव्यञ्जनादिना पॄ in caus. (पूरयति -यितुं).

EMBANKMENT, *s.* सेतुः *m.*, सेतुबन्धः, मृत्तिकाचयः, धरणः, पिण्डलः, वप्रः.

To EMBAR, *v. a.* निरुध् (c. 7. -रुणद्धि -रोद्धुं), निवृ in caus. (-वारयति -यितुं).

EMBARGO, *s.* निषेधः, निरोधः, अवरोधः, बाधा, वारणं, नावो गमनागमननिषेधः or वाणिज्यकर्म्मनिषेधः.

To EMBARK, *v. a.* नौकाम् आरुह् in caus. (-रोपयति -यितुं) or प्रविश् in caus. (-वेशयति -यितुं) or निविश् in caus., नौकायां समृ in caus. (-र्पयति -यितुं).

To EMBARK, *v. n.* नौकां or पोतम् आरुह् (c. 1. -रोहति -रोढुं) or प्रविश् (c. 6. -विशति -वेष्टुं) or निविश्.—(Undertake) आरभ् (c. 1. -रभते -रब्धुं).

EMBARKATION, *s.* नौकारोहणं, नौकारोपणं, नौकाप्रवेशनं, पोतनिवेशनं, नौकासमर्पणं.

Embarked, *p. p.* नौकारूढः -ढा -ढं, तरणिम् आरूढः -ढा -ढं, पोतारोपितः -ता -तं, नौकाप्रविष्टः -ष्टा -ष्टं, पोतनिवेशितः -ता -तं, नौकासमर्पितः -ता -तं.

To **embarrass,** *v. a.* मुह् in caus. (मोहयति -यितुं), विमुह्, व्यामुह्, आकुलीकृ, व्याकुलीकृ, व्याकुल (nom. व्याकुलयति -यितुं), व्यग्रीकृ, सङ्कटीकृ, बाध् (c. 1. बाधते -धितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), क्लेशं दा, दुःखं दा, शल्यं कृ, रुध् (c. 7. रुणद्धि, रोद्धुं).

Embarrassed, *p. p.* मोहितः -ता -तं, विमोहितः -ता -तं, व्याकुलः -ला -लं, आकुलितः -ता -तं, व्यग्रः -ग्रा -ग्रं, समाकुलः -ला -लं, कातरः -रा -रं, कृच्छ्रगतः -ता -तं, बाधितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, विपन्नः -न्ना -न्नं, आपन्नः -न्ना -न्नं, उपरुद्धः -द्धा -द्धं, दुःस्थः -स्था -स्थं.

Embarrassment, *s.* व्याकुलता, आकुलत्वं, व्यग्रता, मोहः, व्यामोहः, कातरता, व्यस्तता, सम्भ्रमः, क्लेशः, दुःखं, शल्यं, बाधः -धा, कार्य्यसन्देहः.

Embassador, *s.* दूतः, राजदूतः, राजप्रेरितः, राजप्रस्थापितः, राजप्रतिनिधिः *m.*, राजकर्म्मकरः, राजकार्य्यकृत्.

Embassadress, *s.* दूती -तिः *f.*, दूतिका, राजदूती, राजदूतस्य पत्नी or भार्य्या.

Embassage, embassy, *s.* दूत्यं, दौत्यं, दूतक्रिया, दूतधर्म्मः; 'sent on an embassy,' प्रस्थापितः -ता -तं, प्रेरितः -ता -तं, दूतः -ता -तं.

To **embattle,** *v. a.* व्यूह् (c. 1. -ऊहते -हितुं), सैन्यं युद्धार्थं व्यूहेन रच् (c. 10. रचयति -यितुं) or सज्जीकृ or व्यवस्था in caus. (-स्थापयति -यितुं).

Embedded, *p. p.* or *a.* निहितः -ता -तं, न्यस्तः -स्ता -स्तं, निविष्टः -ष्टा -ष्टं.

To **embellish,** *v. a.* भूष् (c. 10. भूषयति -यितुं), विभूष्, अलङ्कृ, समलङ्कृ, परिष्कृ, संस्कृ, शुभ् in caus. (शोभयति -यितुं), उपशुभ्, मण्ड् (c. 10. मण्डयति -यितुं), परिकर्म्म (nom. परिकर्म्मयति -यितुं), रञ्ज् (c. 10. रञ्जयति -यितुं).

Embellished, *p. p.* भूषितः -ता -तं, विभूषितः -ता -तं, अलङ्कृतः -ता -तं, परिष्कृतः -ता -तं, संस्कृतः -ता -तं, शोभितः -ता -तं, उपशोभितः -ता -तं, कृतशोभः -भा -भं, मण्डितः -ता -तं, प्रसाधितः -ता -तं, सालङ्कारः -रा -रं, कृतालङ्कारः -रा -रं.

Embellishment, *s.* अलङ्कारः, अलङ्करणं, अलङ्क्रिया, भूषणं, विभूषणं, भरणं, आभरणं, परिष्कारः, परिष्कृतिः *f.*, संस्कारः, अङ्गसंस्कारः, परिकर्म्म *n.* (न्), प्रतिकर्म्म, प्रसाधनं, मण्डनं, शोभा -भनं, कल्पना, सज्जा, रञ्जनं, आकल्पः, वेशः.—(Of a book) पत्ररञ्जनं.—(Theatrical dress) नेपथ्यं, वर्णः, आहार्य्यः.

Ember-days, *s. pl.* यथापर्य्यायं वत्सरे वत्सरे चत्वार उपवाससमयाः, पुण्यदिनानि, पुण्याहानि.

Embers, *s. pl.* भस्म *n.* (न्), भसितं, तप्ताङ्गारोच्छिष्टं, अग्नेरुच्छिष्टं, अङ्गारशेषं, भूतिः *f.*

To **embezzle,** *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), निक्षिप्तद्रव्यं निह्नवेन स्वीयं कृ or स्वीकृ, न्यस्तधनादि छलेन स्वकीयं कृत्वा उपयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), परविसृष्टम् अपह्नवेन स्वाधीनं कृत्वा हृ (c. 1. हरति, हर्त्तुं) or अपहृ, अपह्नु (c. 2. -ह्नुते -ह्नोतुं), निह्नु.

Embezzled, *p. p.* ग्रस्तः -स्ता -स्तं, निह्नुतः -ता -तं, अपह्नवेन or छलेन स्वीकृतः -ता -तं or उपयुक्तः -क्ता -क्तं or हृतः -ता -तं or अपहृतः -ता -तं.

Embezzlement, *s.* ग्रसनं, अपह्नवेन or निह्नवेन हरणं or अपहारः, निक्षिप्तधनादेः or परविसृष्टस्य छलेन उपयोगः or प्रयोगः, अपह्नवः, निह्नवः, अभिलाषः.

To **emblaze** or **emblazon,** *v. a.* कुलीनपदचिह्नानि लिखित्वा शुभ् in caus. (शोभयति -यितुं), कुलीनपदचिह्नैर् अलङ्कृ, रञ्ज् (c. 10. रञ्जयति -यितुं).

Emblazoned, *p. p.* कुलीनपदचिह्नशोभितः -ता -तं, उद्द्योतितः -ता -तं.

Emblem, *s.* चिह्नं, लक्षणं, व्यञ्जनं, लिङ्गं, लाञ्छनं, निदर्शनं, आदर्शः, दृष्टान्तः, संज्ञा, प्रतिमा, प्रतिरूपं, सङ्केतः, केतुः *m.*, ध्वजः, पताका.

Emblematic, emblematical, *a.* उद्बोधकः -का -कं, लाक्षणिकः -की -कं, चिह्नकारी -रिणी -रि (न्) or निदर्शनकारी, लिङ्गी -ङ्गिनी -ङ्गि (न्).

Emblematically, *adv.* निदर्शनक्रमेण, लाक्षणिकप्रकारेण, उद्बोधनार्थं.

Emblic myrobalan, *s.* (A plant) तिष्यफला, आमलकः -की, अमृता, वयस्था, वयःस्था, कायस्था.

Embodied, *p. p.* शरीरी -रिणी -रि (न्), शरीरवान् -वती -वत् (त्), देही -हिनी -हि (न्), देहवान् -वती -वत् (त्), सविग्रहः -हा -हं, सशरीरः -रा -रं, सवपुः -पी -पं, जातरूपः -पी -पं, जातशरीरः -रा -रं, सन्निपतितः -ता -तं.

Embodiment, *s.* शरीरवत्त्वं, देहवत्त्वं, सशरीरता, सन्निपातः, समाहारः, एकशरीरीकरणं.

To **embody,** *v. a.* सशरीरं -रां -रं कृ, एकशरीरीकृ, एकाङ्गीकृ, देहवन्तं -वतीं -वत् कृ.—(Collect into a mass) सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), एकीभावीकृ, एकत्र कृ, एकीकृ.

To **embolden,** *v. a.* आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, निर्भयं -यां -यं कृ.

Emboldened, *p. p.* आश्वासितः -ता -तं, गतभीः -भीः -भि, वीतभयः -या -यं.

To **emboss,** *v. a.* राजतभाण्डादीनि उच्चरेखादिना अलङ्कृ or उपस्कृ or गण्डाकारेण परिष्कृ or समुत्सेधेन तक्ष् (c. 1. तक्षति -क्षितुं).

Embossment, *s.* राजतभाण्डादीनाम् उच्चरेखादिना अलङ्करणं, गण्डाकारेण or उच्चैःप्रकारेण तक्षणं, समुत्सेधेन तक्षणं, प्रतिच्छाया.

To **embowel,** *v. a.* नाडीः or अन्त्राणि बहिष्कृ or निर्हृ (c. 1. -हरति -हर्त्तुं).

To **embrace,** *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्; आश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), संश्लिष्, समाश्लिष्, उपश्लिष्; स्वञ्ज् (c. 1. स्वजते, स्वंक्तुं), परिष्वञ्ज्, सम्परिष्वञ्ज्, उपगुह् (c. 1. -गूहति -हितुं), परिरभ् (c. 1. -रभते -रब्धुं), पीड् (c. 10. पीडयति -यितुं), क्रोडीकृ, क्रोडे कृ.—(Comprise) परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), परिसमाप् (c. 5. -आप्नोति -आप्तुं), प्रतिसंहृ (c. 1. -हरति -हर्त्तुं).—(Encompass) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

Embrace, *s.* आलिङ्गनं -ङ्गितं, आश्लेषः, संश्लेषः, श्लेषः, परिष्वङ्गः, परिरम्भः, उपगूढं, उपगूहनं, अवगूहनं, अङ्कपाली -लिका, अङ्कपालिः *m.*, श्लिषा, लोः *f.*, अङ्कः, कोलः, लयः, क्रोडीकरणं, क्रोडीकृतिः *f.*

Embraced, *p. p.* आलिङ्गितः -ता -तं, श्लिष्टः -ष्टा -ष्टं, आश्लिष्टः -ष्टा -ष्टं, संश्लिष्टः -ष्टा -ष्टं, परिष्वक्तः -क्ता -क्तं, परिरब्धः -ब्धा -ब्धं, परिमृष्टः -ष्टा -ष्टं, उपगूढः -ढा -ढं, पीडितः -ता -तं, अभिलीनः -ना -नं, लीनः -ना -नं, निलीनः -ना -नं, क्रोडीकृतः -ता -तं.

Embrasure, *s.* प्राकारे छिद्रं or रन्ध्रं, आकाशजननी *m.* (न्), जालकः.

To **embrocate,** *v. a.* अङ्गम् औषधीयजलेन लिप् (c. 6. लिम्पति, लेप्तुं) or आलिप् or उपलिप् or अनुलिप् or औषधीयजलेन आर्द्रीकृत्य मृद् (c. 9. मृद्नाति, मर्द्दितुं) or सम्मृद् or घृष् (c. 1. घर्षति -र्षितुं).

Embrocation, *s.* आलेपनं, लेपः, विलेपः, उपदेहः, औषधीयजलं, पूरणः.

To **embroider,** *v. a.* सूचीद्वारेण पुष्पाद्यलङ्कारान् सिव् (c. 4. सीव्यति, सेवितुं) or निषिव् or चित्र् (c. 10. चित्रयति -यितुं), कार्म्मिकवस्त्रं कृ.

Embroidered, *p. p.* सूचिकर्म्मद्वारेण पुष्पाद्यलङ्कृतः -ता -तं, चित्रितः -ता -तं, कार्म्मिकः -की -कं; 'embroidered cloth,' कार्म्मिकवस्त्रं.

Embroiderer, *s.* सूचीशिल्पविद् *m. f.*, सूचीशिल्पोपजीवी *m.* -विनी *f.* (न्), कार्म्मिकवस्त्रकृत् *m. f.*

Embroidery, *s.* सुवर्णसूत्रादिना पुष्पाद्यलङ्कारसीवनं, सूचिता, सूचीकर्म्म *n.* (न्), सूचीशिल्पं; 'embroidered cloth,' कार्म्मिकवस्त्रं.

To **embroil,** *v. a.* सङ्कटीकृ, सङ्कुलीकृ, संक्षुभ् in caus. (-क्षोभयति -यितुं), सङ्कॄ (c. 6. -किरति -करितुं -रीतुं), अस्तव्यस्तीकृ, आकुलीकृ, व्याकुलीकृ,

भेदं or वैरभावं जन् (c. 10. जनयति -यितुं) or कृ.

EMBROILED, *p. p.* संक्षुब्धः -ब्धा -ब्धं, जातभेदः -दा -दं, जातविरागः -गा -गं.

EMBROILMENT, *s.* सङ्कुलीकरणं, संक्षोभः, साङ्कुर्य्यं, विप्रतिपत्तिः *f.*, भेदकरणं.

EMBRYO, EMBRYON, *s.* भ्रूणः, गर्भः, कललं, कललः -लं, र्भ, गर्भस्थबालकस्य प्रथमावयवः, पुत्रनः.—(Rudiments of any thing) आरम्भः, प्रारम्भः.

EMENDABLE, *a.* शोधनीयः -या -यं, संशोध्यः -ध्या -ध्यं, समाधेयः -या -यं.

EMENDATION, *s.* शोधनं, शुद्धिः *f.*, संशुद्धिः *f.*, विशोधनं, समाधानं, प्रतिसमाधानं.

EMENDATOR, *s.* शोधकः, संशोधकः, शोधनकृत्, समाधाता *m.* (तृ).

EMENDED, *p. p.* शोधितः -ता -तं, शुद्धीकृतः -ता -तं, संशुद्धः -द्धा -द्धं.

EMERALD, *s.* मरकतः, अश्मगर्भं, हरिन्मणिः *m.*, रौहिणेयं, गारुत्मतं *n.*, गारुडः, गरुडाश्मा *m.* (न्), गरुडाङ्कितं, गरुडोत्तीर्णं, राजनीलः, सुनीलकः, मसारः, आपनिकः; 'of the colour of an emerald,' मारकतः -ती -तं.

To EMERGE, *v. n.* (From the water, &c.) सलिलाद् उन्मज्ज् (c. 6. -मज्जति -मंक्तुं -मज्जितुं) or उत्था (c. 1. -तिष्ठति -थातुं, rt. स्था) or बहिर्गम् (c. 1. -गच्छति -गन्तुं) or निर्गम् or निःसृ (c. 1. -सरति -सर्तुं) or उन्नह् (c. 4. -नह्यति -नद्धुं).—(Rise into view) उदि (c. 1. उदयति, उदेतुं, rt. इ), प्रादुर्भू, आविर्भू, बहिर्भू, प्रभू, उत्पद् (c. 4. -पद्यते -पत्तुं), प्रकाश् (c. 1. -काशते -शितुं), प्रकाशं निर्गम्, उद्भा (c. 2. -भाति -तुं), निर्भा, प्रकाशो or प्रत्यक्षं दृश् in pass. (दृश्यते), दृष्टिगोचरः -रा -रं भू.—(Re-appear) पुनर्दृश् in pass.

EMERGENCE, EMERGENCY, *s.* प्रयोजनं, अवसरः, प्रस्तावः, समयः, कार्य्यं, आवश्यकता, आवश्यकत्वं, अकस्मादुत्पन्नं, अकस्माद्भूतं, अकस्माद्भूतं, आकस्मिकसम्भवः, अनिश्चितविषयः, अभ्युदयः, समुदयः, समुत्पत्तिः *f.*, आपद् *f.*, विपद् *f.*; 'according to the emergency,' यथावसरं, यथाप्रयोजनं, प्रस्तावसदृशं, कार्य्यवशात्, यथाकार्य्यं, यथासम्भवं, प्रसङ्गवशात्; 'in this emergency,' इहसमये.

EMERGENT, *a.* उन्मज्जन् -ज्जन्ती -ज्जत् (त्).—(Unexpected) अकस्मादुत्पन्नः -न्ना -न्नं, आकस्मिकः -की -कं.—(Urgent) आवश्यकः -की -कं.

EMERY, *s.* महालोहं, उत्तमलोहः, अयस्कान्तः, लोहपरिष्कारको धातुः.

EMETIC, *s.* वमनं, वान्तिकृत्, वमनोत्पादकम् औषधं.

EMETIC, EMETICAL, *a.* वान्तिदः -दा -दं, वमनकारी -रिणी -रि (न्).

EMIGRANT, *s.* स्वदेशं त्यक्तुकामः, देशान्तरम् अधिवियासुः, दूरदेशे विवत्सुः.

To EMIGRATE, *v. n.* स्वदेशं त्यक्त्वा देशान्तरे or दूरदेशे or प्रदेशे वस् (c. 1. वसति, वस्तुं) or अधिवस् with acc. c., or अध्यास् (c. 2. -आस्ते -आसितुं) with acc. c., दूरदेशे विवत्सया स्वदेशं त्यज् (c. 1. त्यजति, त्यक्तुं).

EMIGRATION, *s.* दूरदेशाधिवासनार्थं स्वदेशत्यागः, देशान्तराधिवासनं, प्रदेशाधिवासनं, देशत्यागः.

EMINENCE, *s.* (Exaltation, distinction) उत्कर्षः, उत्कृष्टता, प्रमुखत्वं, औत्कर्ष्यं, विशिष्टता, वैशिष्ट्यं, उन्नतिः *f.*, समुन्नतिः *f.*, प्रधानत्वं, प्रकर्षः, प्रकृष्टत्वं, परमपदं, परपदं, अधिकत्वं, आधिक्यं, शिष्टता, श्रेष्ठत्वं, महोदयः, मुख्यातिः *f.*, विख्यातिः *f.*, सेव्यता.—(Height) उच्छ्रयः, उच्छ्रायः, समुच्छ्रयः, उत्सेधः, समुत्सेधः, उच्चत्वं, उत्तुङ्गता, ऊर्द्ध्वत्वं; 'a rising ground,' उन्नतभूभागः, उच्चस्थानं.

EMINENT, *a.* उत्कृष्टः -ष्टा -ष्टं, प्रमुखः -खा -खं, विशिष्टः -ष्टा -ष्टं, शिष्टः -ष्टा -ष्टं, उन्नतः -ता -तं, समुन्नतः -ता -तं, उत्तमः -मा -मं, परमः -मा -मं, परः -रा -रं, श्रेष्ठः -ष्ठा -ष्ठं, अधिकः -का -कं, मुख्यः -ख्या -ख्यं, अग्रियः -या -यं, प्रधान prefixed in comp., प्रवरः -रा -रं, वरेण्यः -ण्या -ण्यं, प्रबर्हः -र्हा -र्हं, उच्चः -च्चा -च्चं, उच्छ्रितः -ता -तं.—(Celebrated) विश्रुतः -ता -तं, ख्यातः -ता -तं, महायशस्कः -स्का -स्कं, प्रथितः -ता -तं; 'of eminent endowments,' महाभागः -गा -गं, गुणाढ्यः -ढ्या -ढ्यं; 'to be eminent,' विशिष् in pass. (-शिष्यते). *See* EXCELLENT.

EMINENTLY, *adv.* अत्यन्तं, अतिशयेन, अत्यर्थं, भृशं, अधिकं, निर्भरं, अति prefixed.

EMISSARY, *s.* दूतः, वार्त्तायनः, चारः, चरः, वार्त्ताहरः, सन्देशहरः, कार्य्यङ्करः प्रयोज्यः, आख्यायकः.—(Secret agent) गूढपुरुषः, गुप्तदूतः, गुप्तचरः -चारी *m.* (न्), गुप्तगतिः *m.*, रहस्याख्यायी *m.* (न्), प्रणिधिः *m.*, प्रतिष्कः -ष्कशः -ष्कसः.

EMISSION, *s.* निरसनं, उत्सर्गः, उत्सर्जनं, उत्क्षेपः -पणं, विसर्गः, उद्गारः, उच्चारः, स्रावः, आस्रावः, मोक्षणं, मोचनं, प्रमोचनं, उदीरणं, उद्वमनं, उत्सारः, ऊर्द्धशोधनं.

To EMIT, *v. a.* उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, निरस् (c. 4. -अस्यति -असितुं), निःसृ in caus. (-सारयति -यितुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं), उदीर् (c. 10. -ईरयति -यितुं), समुदीर्, समीर्, उच्चर् in caus. (-चारयति -यितुं), उद्वम् (c. 1. -वमति -मितुं), स्रु in caus. (स्रावयति -यितुं), प्रस्रु, स्कन्द् (c. 10. स्कन्दयति -यितुं), निर्गम् in caus. (-गमयति -यितुं); 'to emit blood,' रक्तं स्रु in caus.; 'to emit saliva,' श्लेष्मनिरसनं कृ; 'to emit heat,' उष्माणम् उद्वम्.

EMITTED, *p. p.* उत्सृष्टः -ष्टा -ष्टं, उत्क्षिप्तः -प्ता -प्तं, उदीरितः -ता -तं, निरस्तः -स्ता -स्तं, स्कन्दितः -ता -तं, उच्चारितः -ता -तं, उद्वान्तः -न्ता -न्तं.

EMMENAGOGUE, *s.* स्त्रीणाम् ऋतुवर्धकम् औषधं.

EMMET, *s.* पिपीलिका, पुत्तिका.

To EMMEW, *v. a.* पिञ्जरे or सङ्कटस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं).

EMOLLIENT, *a.* स्नेही -हिनी -हि (न्), स्निग्धः -ग्धा -ग्धं, स्नेहवान् -वती -वत्, चिक्कणः -णा -णं, शान्तिकरः -री -रं, शान्तिदः -दा -दं, स्निग्धकारी -रिणी -रि (न्).

EMOLLIENT, *s.* स्नेहनं, अभ्यञ्जनं, अभ्यङ्गः, आलेपः, उपदेहः.

EMOLUMENT, *s.* लाभः, फलं, लब्धिः *f.*, प्राप्तिः *f.*, फलोदयः, आयः, प्रतिपत्तिः *f.*, अर्थः, लभ्यं, आगमः, उदयः, वेतनं, वर्द्धनं.

EMOTION, *s.* (Passion, feeling) रसः, भावः, विकारः, मनोविकारः, रागः, चित्तवृत्तिः *f.*, चित्तविकारः, विभ्रमः.—(Agitation of mind) उत्कम्पः, उत्तापः, अन्तःक्षोभः, चित्तक्षोभः, अन्तर्वेगः, अभितापः, मनस्तापः; 'under emotion,' अन्यथावृत्तिः -त्तिः -त्ति.

To EMPALE, *v. a.* (Enclose with a row of stakes or stockade) युद्धे सैन्यरक्षार्थं वाटेन or शङ्कुपंक्त्या परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).—(Put to death by fixing on a stake) शूले or कीले or तीक्ष्णशूलम् आरुह् in caus. (-रोपयति -यितुं) or समारुह् in caus., or निविश् in caus. (-वेशयति -यितुं), कील (nom. कीलयति -यितुं).

EMPALED, *p. p.* कीलितः -ता -तं, शूलारोपितः -ता -तं, शूलनिवेशितः -ता -तं, प्रोतः -ता -तं.

EMPALEMENT, *s.* शूलारोपः -पणं, शूलनिवेशनं; 'deserving empalement,' शूल्यः -ल्या -ल्यं; 'stake for empalement,' शूलः, कीलः.

To EMPANNEL, EMPARLANCE, EMPASSION. *See To* IMPANNEL, &c.

EMPEROR, *s.* राजाधिराजः, महाराजाधिराजः, अधिराजः, अधीश्वरः, राजराजः, महाराजः, सम्राट् *m.* (ज्) or अधिराट् *m.*, मण्डलेश्वरः, चक्रवर्त्ती *m.* (न्), सार्वभौमः, सर्वेश्वरः, अधिराज्यभाक् *m.* (ज्).

EMPHASIS, *s.* अवधारणं, गुरूच्चारणं, दीर्घोच्चारणं, गौरवं.

EMPHATIC, *a.* (Impressive) गुरुः -र्वी -रु.—(Requiring emphasis) अवधारणीयः -या -यं, अवधार्य्यः -र्य्या -र्य्यं.—(Uttered with emphasis) गौरवेण or अवधारणेन उच्चारितः -ता -तं.

EMPHATICALLY, *adv.* अवधारणेन, सावधारणं, गौरवेण, सगौरवं.

EMPIRE, *s.* आधिराज्यं, अधिराज्यं, साम्राज्यं, राज्यं, राजत्वं, आधिपत्यं,

ऐश्वर्य्यं, ईशत्वं, राजाधिकारः, प्रभुत्वं.—(Region governed) राष्ट्रं, विषयः.

EMPIRIC, *s.* (A quack) दुश्चिकित्सकः, मिथ्याचिकित्सकः, छद्मवैद्यः, आयुर्वेदानभिज्ञः.—(One who makes experiments) परीक्षकः.

EMPIRICAL, *a.* (Charlatanical) आयुर्वेदविरुद्धः -द्धा -द्धं, मिथ्याचिकित्सासम्बन्धी -न्धिनी -न्धि (न्), छाद्मिकः -की -कं, कापटिकः -की -कं.—(Experimental) परीक्षकः -का -कं.

EMPIRICALLY, *adv.* आयुर्वेदविरुद्धं, दुश्चिकित्सकवत्, परीक्षाक्रमेण.

EMPIRICISM, *s.* मिथ्याचिकित्सा, दुश्चिकित्सा -त्सनं, आयुर्वेदानभिज्ञता, आयुर्वेदविरुद्धा चिकित्सा, परीक्षा -क्षणं.

EMPLASTIC, *a.* लेप्यः -प्या -प्यं, श्यानः -ना -नं, चिक्कणः -णा -णं, सान्द्रः -न्द्रा -न्द्रं.

To EMPLOY, *v. a.* (Use) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), उपयुज्, सेव् (c. 1. सेवते -वितुं), विधा (c. 3. -दधाति -धातुं), उपभुज् (c. 7. -भुनक्ति -भुंक्ते -भोक्तुं), अभ्यस् (c. 4. -अस्यति -असितुं), व्यवहृ in caus. (-हारयति -यितुं), धृ in caus. (धारयति -यितुं), वाह् in caus. (वाहयति -यितुं).—(Occupy, give employment) व्यापृ in caus. (-पारयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रयुज्.—(Engage, appoint) नियुज्, विनियुज्, अधिकृ, प्रकृ; 'is employed,' विधीयते; 'having employed,' अधिकृत्य, आस्थाय, आश्रित्य; 'employing,' वाहयन् -यन्ती -यत् (त्).

EMPLOYED, *p. p.* (Used) प्रयुक्तः -क्ता -क्तं, प्रयोजितः -ता -तं, उपयुक्तः -क्ता -क्तं, व्यवहृतः -ता -तं, व्यवहारितः -ता -तं, उपभुक्तः -क्ता -क्तं, सेवितः -ता -तं.—(Appointed) नियुक्तः -क्ता -क्तं, विनियुक्तः -क्ता -क्तं, युक्तः -क्ता -क्तं.—(Occupied) व्यापृतः -ता -तं, व्यापारितः -ता -तं, व्यापारी -रिणी -रि (न्), व्यवसायी -यिनी -यि (न्).

EMPLOYER, *s.* प्रयोजयिता *m.* (तृ), प्रयोजकः, व्यापारयिता *m.* (तृ), प्रवर्त्तकः.

EMPLOYMENT, *s.* (Use) प्रयोगः, प्रयोजनं, उपयोगः, उपभोगः, व्यवहारः, अभ्यासः.—(Occupation, business, profession) व्यापारः, कार्य्यं, कर्म्म *n.* (न्), व्यवसायः, व्यवहारः, वृत्तिः *f.*, प्रवृत्तिः *f.*, प्रवर्त्तनं, कार्य्योद्योगः, वर्त्तनं, वृत्तं, वृत्तिता, जीविका.—(Appointment) नियोगः, नियोजनं, नियुक्तिः *f.*, विनियोगः; 'out of employment,' निर्वृत्तिः -त्तिः -त्ति, क्षीणवृत्तिः -त्तिः -त्ति.

To EMPOISON, *v. a.* (Administer poison) विषं or तीक्ष्णरसं दा, विषप्रयोगं कृ, विषप्रयोगेण नश् in caus. (नाशयति -यितुं).—(Taint with poison) विषेण दिह् (c. 2. देग्धि -ग्धुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं).

EMPOISONED, *p. p.* विषदिग्धः -ग्धा -ग्धं, विषाक्तः -क्ता -क्तं, विषयुक्तः -क्ता -क्तं.

EMPOISONMENT, *s.* विषप्रयोगः, विषदानं, विषेण नाशनं or मारणं.

EMPORIUM, *s.* वाणिज्यस्थानं, लोकयात्रायोग्या or महाजनकर्म्मयोग्या नगरी.

To EMPOVERISH, EMPOVERISHMENT. *See* IMPOVERISH, &c.

To EMPOWER, *v. a.* शक्तिं or सामर्थ्यं or अधिकारित्वं दा, नियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), समर्थं -र्थां -र्थं कृ, अनुमन् (c. 4. -मन्यते -मन्तुं), क्षमताम् ऋ in caus. (अर्पयति -यितुं).

EMPRESS, *s.* राजाधिराजस्य पत्नी, राज्ञी, अधीश्वरी, महाराजपत्नी.

EMPTIED, *p. p.* रेचितः -ता -तं, विरेचितः -ता -तं, शून्यीकृतः -ता -तं, गततोयः -या -यं, गतजलः -ला -लं; 'poured out,' पातितः -ता -तं, अवतारितः -ता -तं.

EMPTINESS, *s.* शून्यत्वं -ता, रिक्तता -त्वं, रिक्तं, असारता, निःसारता, विरसता, नीरसता, रसाभावः, अपूर्णत्वं, वितानत्वं, तुच्छत्वं, फल्गुता.

EMPTION, *s.* क्रयः, क्रयणं, क्रयकरणं.

EMPTY, *a.* रिक्तः -क्ता -क्तं, रिक्तकः -का -कं, शून्यः -न्या -न्यं, शून्यमध्यः -ध्या -ध्यं, विरसः -सा -सं, नीरसः -सा -सं, असारः -रा -रं, निःसारः -रा -रं, निःसत्त्वः -त्त्वा -त्त्वं, सारहीनः -ना -नं, वितानः -ना -नं, अपूर्णः -र्णा -र्णं, वशिकः -का -कं, तुच्छः -च्छा -च्छं.

To EMPTY, *v. a.* रिच् (c. 7. रिणक्ति, रेक्तुं), विरिच्, रिक्तीकृ, शून्यीकृ, विरसीकृ, निःसारीकृ, सारं हृ (c. 1. हरति, हर्त्तुं).—(Pour out water, &c.) तोयम् अवतॄ in caus. (-तारयति -यितुं) or पत् in caus. (पातयति -यितुं) or प्रस्रु in caus. (-स्रावयति -यितुं); 'the river empties itself into the sea,' नदी समुद्रं विशति.

EMPTY-HANDED, *a.* रिक्तहस्तः -स्ता -स्तं, रिक्तपाणिः -णिः -णि, शून्यहस्तः -स्ता -स्तं.

EMPTY-HEADED, *a.* शून्यमस्तकः -का -कं, निर्बोधः -धा -धं, अल्पबुद्धिः -द्धिः -द्धि.

To EMPURPLE, *v. a.* धूम्रीकृ, लोहितीकृ, अरुणीकृ, धूम्रवर्णं -र्णां -र्णं कृ, धूम्रवर्णेन रञ्ज् in caus. (रञ्जयति -यितुं).

EMPYREAL, *a.* आग्नेयः -यी -यं, उपर्य्युपरिगगणसम्बन्धी -न्धिनी -न्धि (न्).

EMPYREAN, *s.* उपर्य्युपरिस्थगगणं, उत्तमस्वर्गः, सूक्ष्माग्निस्थानं.

To EMULATE, *v. a.* स्पर्ध् (c. 1. स्पर्धते -र्धितुं), विस्पर्ध्, आस्पर्ध्, प्रतिस्पर्ध् with inst. c.: जि in des. (जिगीषति -षितुं), संघृष् (c. 1. -घर्षति -र्षितुं), परम् अभिभवितुं यत् (c. 1. यतते -तितुं), पराभिभवनाय उद्योगं कृ, अहम्पूर्व्वम् अहम्पूर्व्वमिति वद् (c. 1. वदति -दितुं); 'he emulates Indra,' शक्रेण सह स्पर्धते.

EMULATION, *s.* स्पर्द्धा, आस्पर्द्धा, प्रतिस्पर्द्धा, जिगीषा, विजिगीषा, सङ्घर्षः, पराभिभवेच्छा, पराभिभवनाय उद्योगः, अहम्पूर्व्विका, सापत्न्यं.

EMULATIVE, EMULOUS, *a.* स्पर्द्धी -र्द्धिनी -र्द्धि (न्), प्रतिस्पर्द्धी &c., जिगीषुः -षुः -षु, जिगीषन् -षन्ती -षत् (त्), विजिगीषुः -षुः -षु, जयेच्छुः -च्छुः -च्छु, पराभिभवेच्छुः -च्छुः -च्छु, बीभत्सुः -त्सुः -त्सु.

EMULATOR, *s.* स्पर्द्धाकारी *m.* (न्), जिगीषुः *m.*, सङ्घर्षकारी *m.*, सपत्नः.

To EMULGE, *v. a.* निर्दुह् (c. 2. -दोग्धि -ग्धुं, c. 10. -दोहयति -यितुं), नीरसीकृ.

EMULGENT, *a.* निर्दोहनकारी -रिणी -रि (न्), [illegible] -ग्ध्री -ग्धृ (ग्धृ).

EMULSION, *s.* पयसिसकम औषधं, पायसं, पयस्य.

EMUNCTORY, *s.* शरीरमल[illegible] शरीरमलपथः, देहोत्सर्गपथः.

To ENABLE, *v. a.* शक्तिं or सामर्थ्यं [illegible] क्षमतां दा, समर्थं -र्थां -र्थं कृ, शक्तं -क्तां -क्तं कृ, क्षमं -मां -मं कृ, समर्थीकृ, कॢप् in caus. (कल्पयति -यितुं).

To ENACT, *v. a.* (Act, perform) कृ, विधा [illegible] -दधाति -धातुं), प्रयुज् (c. 7. -युंक्ते -योक्तुं), निष्पद् in caus. (-पादयति -यितुं), सम्पद् in caus.—(Decree) व्यवस्थाद्वारेण or शासनद्वारेण निष्पन्नं कृ or सिद्धं कृ, व्यवस्थां कृ, शासनं कृ, व्यवस्था in caus. (-स्थापयति -यितुं), प्रशास् (c. 2. -शास्ति -शासितुं), प्रकॢप् (c. 10. -कल्पयति -यितुं).—(Represent in action) नट् (c. 10. नाटयति -यितुं), अभिनी (c. 1. -नयति -नेतुं).

ENACTED, *p. p.* व्यवस्थापितः -ता -तं, निष्पन्नः -न्ना -न्नं, प्रशासितः -ता -तं.

ENACTMENT, *s.* शासनं, प्रशासनं, व्यवस्था -स्थापनं, नियमः, शासनपत्रं, आज्ञापत्रं, राजाज्ञा, विधानं, निदेशः, आदेशः.

ENAMEL, *s.* सुवर्णालङ्कारचित्रकरणे प्रयुक्तं काचवत् सुविलयं मणिवत् सुतेजनीयं स्निग्धद्रव्यं.

To ENAMEL, *v. a.* पृष्ठोक्तस्निग्धद्रव्येण सुवर्णालङ्कारान् चित्र् (c. 10. चित्रयति -यितुं) or चित्रविचित्रीकृ.

To BE ENAMOURED, *v. n.* अनुरागवान् -वती -वत् or अनुरक्तः -क्ता -क्तं or आसक्तः -क्ता -क्तं भू or अस् with inst. c. or loc. c., अनुरञ्ज् in pass. (-रज्यते) आसञ्ज् in pass. (-सज्यते), with loc. c., मुह्

(c. 4. मुह्यति, मोहितुं); 'he is enamoured with her,' तया अनुरागवान् अस्ति.

Enamoured, *p. p.* अनुरागवान् -वती -वत् (त्), अनुरागी -गिणी -गि (न्), अनुरक्तः -क्ता -क्तं, आसक्तः -क्ता -क्तं, कामासक्तः -क्ता -क्तं, जातमन्मथः -था -थं.

To encage, *v. a.* पिञ्जरे प्रविश् in caus. (-वेशयति -यितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं) or अवरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To encamp, *v. n.* निविश् (c. 6. -विशते -वेष्टुं), उपविश् (-विशति), बलेन or सैन्येन उपविश्, कटके or शिविरे वस् (c. 1. वसति, वस्तुं) or समावस् or अध्यास् (c. 2. -आस्ते -आसितुं).

To encamp, *v. a.* सैन्यं निविश् in caus. (-वेशयति -यितुं), कटकं समावस् in caus. (-वासयति -यितुं), शिविरं स्था in caus. (स्थापयति -यितुं).

Encamped, *p. p.* निविष्टः -ष्टा -ष्टं, उपविष्टः -ष्टा -ष्टं, समावासितः -ता -तं, समावासितकटकः -का -कं, निवेशितसैन्यः -न्या -न्यं, अध्यासितः -ता -तं.

Encampment, *s.* (Act of encamping) निवेशनं, वाहिनीनिवेशनं, बलोपवेशनं, समावासः.—(Camp) निवेशः, शिविरं, कटकः, मन्दिरं, स्कन्धावारः, बलस्थितिः *f.*, पटकः.

To encase, *v. a.* *See* Incase.

To encave, *v. a.* कन्दरे or कुहरे or विवरे गुह् (c. 1. गूहति, गोढुं), गर्त्ते गोपनं कृ.

Enceinte, *a.* गर्भिणी, गर्भवती, पूर्णगर्भा, ससत्त्वा, आपन्नसत्त्वा.

To enchafe, *v. a.* तप् in caus. (तापयति -यितुं), परितप्, कुप् in caus. (कोपयति -यितुं), प्रकुप्, रुष् in caus. (रोषयति -यितुं), बाध् (c. 1. बाधते -धितुं).

To enchain, *v. a.* निगडेन or शृङ्खलया बन्ध् (c. 9. बध्नाति, बन्द्धुं), निगड (nom. निगडयति -यितुं), शृङ्खल (nom. शृङ्खलयति -यितुं).

To enchant, *v. a.* (Subdue by spells) मन्त्रद्वारेण वशीकृ or मुह् in caus. (मोहयति -यितुं), अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्; अभिचर् (c. 10. -चारयति -यितुं), मायां कृ.—(Charm the mind) मनो हृ (c. 1. हरति, हर्त्तुं) or रम् (c. 10. रमयति -यितुं), हृष् (c. 10. हर्षयति -यितुं), प्रहृष्, परमहर्षं जन् (c. 10. जनयति -यितुं).

Enchanted, *p. p.* (With joy) हृष्टमानसः -सी -सं, हृतमानसः -सी -सं, परमहृष्टः -ष्टा -ष्टं, हृष्टचित्तः -त्ता -त्तं, परमानन्दितः -ता -तं, पुलकितः -ता -तं.—(By spells) अभिमन्त्रितः -ता -तं, मन्त्रमोहितः -ता -तं. *See* Charmed.

Enchanter, *s.* मायी *m.* (न्), अभिचारी *m.* (न्), अभिचारविद्, मायाकारः, मायाकृत् *m.*, मायिकः, मोही *m.* (न्), ऐन्द्रजालिकः, योगी *m.* (न्), योगेश्वरः.

Enchanting, *a.* मनोहरः -रा -रं, परमहर्षकरः -री -रं, परमानन्ददः -दा -दं, मोही -हिनी -हि (न्). *See* Charming.

Enchantingly, *adv.* मायया, सुरमणीयं, यथा परमहर्षो जायते तथा.

Enchantment, *s.* माया, अभिचारः, वशक्रिया, योगः, सम्प्रयोगः, अभिमन्त्रणं, इन्द्रजालं, जालं, कुहकः, मोहः, मन्त्रमोहनं, संवदनं -ना, मूलकर्म्म *n.* (न्), चित्रकर्म्म *n.*, कार्म्मणं, कुसृतिः *f.*

Enchantress, *s.* मायिनी, योगिनी, अभिचारिणी, मोहिनी, कुहककारी.

To enchase, *v. a.* (A gem in gold) मणिं सुवर्णे प्रणिधा (c. 3. -दधाति -धातुं) or खच् (c. 10. खचयति -यितुं).—(Adorn silver vessels, &c., by embossed work) राजतभाण्डादीनि उच्चरेखादिना अलङ्कृ or उपस्कृ.

To encircle, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), उपवेष्ट्, संवेष्ट्, परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), परिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), परिगम् (c. 1. -गच्छति -गन्तुं), परिसृ (c. 1. -सरति -सर्त्तुं), मण्डल (nom. मण्डलयति -यितुं).—(Embrace) परिष्वञ्ज् (c. 1. -ष्वजते -ष्वंक्तुं)

Encircled, *p. p.* वलयितः -ता -तं, मण्डलितः -ता -तं, परिमण्डलितः -ता -तं, परिगतः -ता -तं, परिवेष्टितः -ता -तं, आवृतः -ता -तं, व्याप्तः -प्ता -प्तं.

Encirclet, *s.* वलयः, मण्डलं, परिमण्डलं, चक्रवालं, परिवेष्टनं.

Epicurism, *s.* विषयोपसेवा, विषयासक्तिः *f.*, शारीरिकसुखानुरागः.

Epicycle, *s.* (In astronomy) प्राक् चक्रं, परिधिः *m.*

Epidemic, **epidemical**, *a.* देशसाधारणः -णा -णी -णं, सर्व्वगः -गा -गं, बहुजनसामान्यः -न्या -न्यं; 'disease,' मारी, मारः -रिः *f.*, महामारी, मरकः, मारकः, आतङ्कनं, सन्निपातकः, उपसर्गः.

Epidermis, *s.* बाह्यत्वक् *f.* (च्), बहिस्त्वक्, बाह्यचर्म्म *n.*, (न्), अवभासिनी.

Epiglottis, *s.* उपजिह्वा, अलिजिह्वा, प्रतिजिह्वा, घण्टिका, शुण्डिका.

Epigram, *s.* अबहुश्लोकपरिमाणं रसिककाव्यं, सरसं लघुकाव्यं.

Epigrammatical, *a.* पूर्व्वोक्तलघुकवितायोग्यः -ग्या -ग्यं, रसिककवितासम्बन्धी -न्धिनी -न्धि (न्).—(Pointed) रसिकः -का -कं, रसवान् -वती -वत् (त्), सरसः -सा -सं.

Epigrammatist, *s.* पूर्व्वोक्तरसिककविताकर्त्ता *m.* (र्तृ), लघुकाव्यरचकः.

Epilepsy, *s.* अपस्मारः, ग्रहामयः, भ्रामरं, भूतविक्रिया, प्रतानः, मूर्च्छावायुः *m.*

Epileptic, *a.* अपस्मारी -रिणी -रि (न्), भ्रामरी -रिणी -रि (न्), वातग्रस्तः -स्ता -स्तं, वायुग्रस्तः -स्ता -स्तं, ग्रहामयपीडितः -ता -तं, आकृष्टः -ष्टा -ष्टं.

Epilogue, *s.* अन्तवाक्यं, शेषवाक्यं, अन्त्यवचनं, समापकवाक्यं, समापनवचनं.

Epinicion, *s.* जयगीतं, जयशब्दः.

Epiphany, *s.* ख्रीष्टप्रकाशनं, ख्रीष्टप्रकाशनमुद्दिश्य ख्रीष्टजन्मपर्व्वणः परं द्वादशदिने सेवितो महोत्सवः, ख्रीष्टप्रकाशनपर्व्व *n.* (न्).

Episcopacy, *s.* धर्म्माध्यक्षता -त्वं, धर्म्माध्यक्षाधिपत्यं, धर्म्माध्यक्षाधिकारः, धर्म्माध्यक्षकर्तृका ख्रीष्टीयसमाजनीतिः *f.*

Episcopal, **episcopalian**, *a.* धर्म्माध्यक्षसम्बन्धी -न्धिनी -न्धि (न्), धर्म्माध्यक्षशासितः -ता -तं, धर्म्माध्यक्षपालितः -ता -तं.

Episcopate, *s.* धर्म्माध्यक्षाधिकारः, धर्म्माध्यक्षाधिपत्यं, धर्म्माध्यक्षपदं.

Episode, *s.* उपाख्यानं, उपकथा, प्रसङ्गवाक्यं, प्रासङ्गिकवाक्यं, पताका, मूलविषयबहिर्गता कथा.

Episodic, **episodical**, *a.* प्रासङ्गिकः -की -कं, मूलविषयानन्वितः -ता -तं, प्रस्तुतविषयबहिर्गतः -ता -तं, अनन्वितः -ता -तं, अप्रस्तुतः -ता -तं.

Epispastic, *a.* त्वक्स्फोटोत्पादकः -का -कं, स्फोटकारी -रिणी -रि (न्).

Epistle, *s.* पत्रं, लेखः, लेख्यं, पत्रिका, पत्री, संवादपत्रं, सन्देशपत्रं, लिपिः *f.*

Epistolary, *a.* पत्री -त्रिणी -त्रि (न्), पत्रीयः -या -यं, लेख्यकः -का -कं.

Epitaph, *s.* चैत्यस्य उपरिलिखितं मृतजनमुद्दिश्य स्तुतिवाक्यं, चैत्योपरि लिखिता तत्रैव निखातजनमुद्दिश्य गुणस्तुतिः, चैत्यलिपिः *f.*, चैत्योपरिस्था लिपिः.

Epithalamium, *s.* वैवाहिकगीतं, औद्वाहिकगीतं, विवाहसमये माङ्गलिकगीतं.

Epithem, *s.* उत्कारिका, उपदेहः, उपनाहः, प्रलेपः, लेपः.

Epithet, *s.* विशेषणं -षकः -कं, संज्ञाविषयः, अनुवृद्धिः *f.*, उपाधिः *m.*, गुणागुणवाचकः शब्दः.

Epitome, *s.* संक्षेपः -पणं, सङ्ग्रहः, सारसङ्ग्रहः, सारः, संहिता, प्रत्याहारः, समाहारः, समाहृतिः *f.*, समसनं.

To **epitomize**, *v. a.* संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संहृ (c. 1. -हरति -हर्तुं), उपसंहृ.

Epitomized, *p. p.* संक्षिप्तः -प्ता -प्तं, सांक्षेपिकः -की -कं, समस्तः -स्ता -स्तं, सामासिकः -की -कं, संहृतः -ता -तं, उपसंहृतः -ता -तं, चुम्बकः -का -कं.

Epitomizer, **epitomist**, *s.* संक्षेप्ता *m.* (प्तृ), सङ्ग्रहकर्त्ता *m.* (र्तृ), सारलेखकः.

Epoch, **epocha**, *s.* (A fixed era from which computation of years begin) ध्रुवः, शाकः, शकः, संवत् indec. The era of Śáliváhana is called शाकः, that of Vikramáditya, संवत्.—(Any period or fixed time) कालः, कालावधिः *m.*, अवधिः *m.* निर्णीतकालः.

Epode, *s.* उपगीतं, उपगानं, अधिगीतं, अपरगीतं, गीतानुबन्धः.

Epopee, *s.* महाकाव्यं, वीरचरित्रविषयं काव्यं.

Epulation, *s.* उत्सवकरणं, उत्सवः, मिष्टान्नभोजनं.

Equable, *a.* समानः -ना -नं, निर्व्विकारः -रा -रं.—(In motion) समानगतिः -तिः -ति.—(In temper) समभावः -वी -वं, समवृत्तिः -त्तिः -त्ति समचित्तः -त्ता -त्तं.

Equal, *a.* समः -मा -मं, समानः -ना -नं, तुल्यः -ल्या -ल्यं, समीयः -या -यं सदृशः -शी -शं, ईदृशः -शी -शं.—(Not inferior) अनवरः -रा -रं अनवमः -मा -मं.—(Even, uniform) समानः -ना -नं, समस्थः -स्था -स्थं, निर्व्विकारः -रा -रं, अन्यूनः -ना -नं; 'of equal extent or size,' सम्मितः -ता -तं, सममात्रः -त्रा -त्रं, तुल्यपरिमाणः -णा -णं; 'equal to all,' सर्व्वसमः -मा -मं; 'of equal strength,' तुल्यबलः -ला -लं 'equal in glory,' समानतेजाः -जाः -जः (स्); 'this is equal to a sixteenth part of that,' एतत् तस्य षोडशांशेन समं.

Equal, *s.* (Of the same age) समानवयस्कः, समवयस्कः, सवयाः *m.* (स्), तुल्यवयाः *m.* (स्), समानजन्मा *m.* (न्), वयस्यः.—(Of the same rank) समानपदस्थः, तुल्यपदस्थः.

To **equal**, *v. a.* समीकृ, समानीकृ, तुल्यीकृ, समान (nom. समानयति -यितुं), समानं -नां -नं कृ, तुल्यं -ल्यां -ल्यं कृ.

Equality, *s.* समता, साम्यं, समानता, तुल्यता -त्वं, सामान्यं, साम्यता प्रतियोगिता.—(In rank) समानपदं, तुल्यपदं.—(In tribe) सवर्णता.

Equalization, *s.* समीकरणं, समानीकरणं, तुल्यत्वं, समानता.

To **equalize**, *v. a.* समीकृ, समानीकृ, तुल् (c. 10. तुलयति -यितुं) *See* *To* **equal**.

Equalized, *p. p.* समीकृतः -ता -तं, समानीकृतः -ता -तं, तुलितः -ता -तं.

Equally, *adv.* समं, समानं, समानतस्, तुल्यवत्, साम्यतस्, सामान्येन.

Equanimity, *s.* समचित्तत्वं, समबुद्धिता, समभावः, समानवृत्तिः *f.*, सर्व्वसमता, सत्त्वसम्पन्नता, सत्त्वं, सम्पदापदोर् हर्षविषादराहित्यं.

Equanimous, *a.* समचित्तः -त्ता -त्तं, समबुद्धिः -द्धिः -द्धि, समभावः -वी -वं, समवृत्तिः -त्तिः -त्ति, सत्त्वसम्पन्नः -न्ना -न्नं, सत्त्वसम्पन्नः -न्ना -न्नं, सम्पदापदोर् हर्षविषादरहितः -ता -तं, निर्व्विकारः -रा -रं.

Equation, *s.* (In algebra) समीक्रिया, समीकरणं, साम्यं, फलं; 'of unknown quantity,' अव्यक्तसाम्यं; 'unlimited equation,' एकवर्णसमीकरणं.

Equator, *s.* निरक्षः, भूचक्रं, भूपरिधिः *m.*, भूगोलरेखा; 'equatorial region,' निरक्षदेशः; 'celestial equator,' नाडिमण्डलं, नाडीमण्डलं *See* **Equinoctial line**.

Equatorial, *a.* निरक्षसम्बन्धी -न्धिनी -न्धि (न्), भूचक्रसम्बन्धी, &c.

Equery, **equerry**, *s.* राजाश्वपालः, राजाश्वशालाध्यक्षे नियुक्तो जनः. —(Stable for horses) अश्वशाला, वाजिशाला.

Equestrian, *a.* आश्वः -श्वी -श्वं, आश्विकः -की -कं, अश्वीयः -या -यं, तुरगी -गिणी -गि (न्); 'person on horseback,' अश्वारूढः, अश्वारोही *m.* (न्).

Equiangular, *a.* समकोणः -णा -णं, समानाङ्गः -ङ्गा -ङ्गं, तुल्यकोणः -णा -णं.

Equidistant, *a.* समानान्तरः -रा -रं, तुल्यान्तरः -रा -रं, समानान्तरस्थः -स्था -स्थं.

EQUILATERAL, *a.* समभुजः -जा -जं, समानबाहुः -हुः -हु, समपार्श्वः -र्श्वा -र्श्वं; 'an equilateral triangle,' समत्रिभुजः.

EQUILIBRIUM, *s.* तुल्यता, भारतुल्यता, समतोलत्वं, तुल्यबलत्वं, परिमाणतुल्यता, समता, साम्यं.

EQUINOCTIAL, *a.* विषुवीयः -या -यं, विषुवसम्बन्धी -न्धिनी -न्धि (न्); 'equinoctial line,' विषुवच्चक्रं, विषुमण्डलं, विषुवद्वृत्तं, विषुवरेखा, भूचक्रं, भूपरिधिः *m.*, नाडीमण्डलं; 'equinoctial point,' अयनं.

EQUINOX, *s.* विषुवं, विषुवत् *n.*, विष्वक् *n.*, विषुपं; 'the vernal equinox,' महाविषुवं, हरिपदं; 'autumnal,' विषुपदं; 'day of the equinox,' विषुवदिनं.

EQUINUMERANT, *a.* समसंख्यः -ख्या -ख्यं, समानसंख्यः -ख्या -ख्यं.

To EQUIP, *v. a.* सज्जीकृ, सज्ज् (c. 1. सज्जति -ज्जितुं), ससज्जं -ज्जां -ज्जं कृ, सर्व्वोपकरणैः or सोपकारद्रव्यैः समायुज् in caus. (-योजयति -यितुं) or युज्, सर्व्वोपकारद्रव्याणि उपकॢप् (c. 10. -कल्पयति -यितुं) or सम्प्रकॢप् or उपस्था in caus. (-स्थापयति -यितुं), or उपपद् in caus. (-पादयति -यितुं) or सम्भृ (c. 1. -भरति -भर्त्तुं) or उपस्कृ or पुरस्कृ or सिद्धीकृ or प्रस्तुतीकृ, द्रव्यसम्भारं कृ, उपकरणसम्भारं कृ.—(With arms) शस्त्रैः or शस्त्रैः सज्जीकृ, सन्नह् (c. 4. -नह्यति -नद्धुं), संवर्म्म् (nom. -वर्म्मयति -यितुं).—(Fit out a ship) नावं समुद्रयानार्थं or युद्धार्थं सज्जीकृ.—(With clothes) वस्त्रैर् वेष्ट् (c. 1. वेष्टते -ष्टितुं) or भूष् (c. 10. भूषयति -यितुं) or अलङ्कृ.

EQUIPAGE, *s.* (Implements, materials) उपकरणं, साधनं, सामग्र्यं -ग्री, सम्भारः, उपस्करः.—(Paraphernalia) सज्जा, परिच्छदः, सन्नाहः, अलङ्क्रिया.—(Of war) युद्धसज्जा, युद्धोपकरणं, वाहिनी.—(Retinue) परिबर्हः, बर्हः, तन्त्रं.—(Vehicle) वाहनं, विमानं.

EQUIPMENT, *s.* (Act of equipping) सज्जीकरणं, सज्जनं -ना, सज्जकर्म्म *n.* (न्), सज्जा, साधनं, सम्भारः, सम्भृतिः *f.*, आयोजनं, उपाकर्म्म *n.* (न्), पुरस्कारः, पुरस्करणं. *See* EQUIPAGE.

EQUIPOISE, *s.* तुल्यता, भारतुल्यता, तुल्यभारत्वं, समतोलत्वं, तुल्यबलत्वं, समता, साम्यं, तुल्यपरिमाणं, परिमाणतुल्यता.

To EQUIPOISE, *v. a.* समीकृ, तुल्यीकृ, तुल्यबलीकृ, समतोलीकृ.

EQUIPOISED, *p. p.* तुलितः -ता -तं, समीकृतः -ता -तं, समतोलः -ला -लं.

EQUIPOLLENCE, *s.* तुल्यबलत्वं, बलसमता, तुल्यशक्तित्वं, शक्तिसाम्यं.

EQUIPOLLENT, *a.* तुल्यबलः -ला -लं, तुल्यशक्तिः -क्तिः -क्ति, तुल्यौजाः -जाः -जः (स्).

EQUIPONDERANCE, *s.* तुल्यता, भारतुल्यता, समतोलत्वं, तुल्यबलत्वं.

EQUIPONDERANT, *a.* समतोलः -ला -लं, तुल्यबलः -ला -लं, तुल्यपरिमाणः -णा -णं.

EQUIPPED, *p. p.* सज्जीकृतः -ता -तं, सज्जितः -ता -तं, सज्जः -ज्जा -ज्जं, सोपकारद्रव्ययुक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, समन्वितः -ता -तं, सोपकारः -री -रं, सन्नद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, संहितः -ता -तं.

EQUITABLE, *a.* समदर्शी -र्शिनी -र्शि (न्), धर्म्मकारी -रिणी -रि (न्), न्यायकारी &c., न्यायी -यिनी -यि (न्), धार्म्मिकः -की -कं, न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), यथान्यायः -या -यं, अपक्षपाती -तिनी -ति (न्), विपक्षपातः -ता -तं, पक्षपातरहितः -ता -तं, सर्व्वसमः -मा -मं, उभयसाधारणः -णा -णी -णं, निरपेक्षी -क्षिणी -क्षि (न्).

EQUITABLENESS, *s.* साम्यं, समता, सर्व्वसमता, अपक्षपातः, न्यायता.

EQUITABLY, *adv.* न्यायतस्, यथान्यायं, न्यायवत्, पक्षपातं विना, साम्येन.

EQUITY, *s.* न्यायः, धर्म्मः, न्यायता, अपक्षपातः, साम्यं, समता, उभयसामान्यं, सर्व्वसमता, युक्तिः *f.*, याथार्थ्यं, विचारः.—(Qualification of the severity of law) दण्डनैष्ठुर्य्यशमनं, धर्म्मनैष्ठुर्य्यशमनं; 'court of equity,' दण्डनैष्ठुर्य्यशमनका महाविचारणसभा.

EQUIVALENT, *a.* सममूल्यः -ल्या -ल्यं, तुल्यमूल्यः -ल्या -ल्यं, समानमूल्यः -ल्या -ल्यं, तुल्यबलः -ला -लं, तुल्यार्थः -र्था -र्थं, समार्थः -र्था -र्थं, समानबलः -ला -लं, समशक्तिः -क्तिः -क्ति, तुल्यशक्तिः -क्तिः -क्ति, तुल्यः -ल्या -ल्यं, समः -मा -मं, समानः -ना -नं.

EQUIVALENT, *s.* समानमूल्यकं द्रव्यं, तुल्यद्रव्यं, तुल्यवस्तु *n.*, प्रतिक्रिया, प्रतीकारः, प्रतिकृतिः *f.*, प्रत्युपकारः, निस्तारः, प्रतिफलं, परिवर्त्तः, तुल्यत्वं, साम्यं, समानत्वं.

EQUIVOCAL, *a.* सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः -र्था -र्थं, द्व्यर्थः -र्था -र्थं, वक्रः -क्रा -क्रं, वक्रार्थः -र्था -र्थं, अस्पष्टः -ष्टा -ष्टं, विकल्पार्थकः -का -कं.

EQUIVOCALLY, *adv.* सन्दिग्धार्थतस्, द्व्यर्थतस्, वक्रोक्त्या, अस्पष्टं, अव्यक्तं.

EQUIVOCALNESS, *s.* सन्दिग्धार्थः, द्व्यर्थः, अर्थसन्देहः, अर्थसन्दिग्धता, अर्थवक्रिमा *m.* (न्), अस्पष्टता, सन्दिग्धता, वक्रता.

To EQUIVOCATE, *v. n.* वक्रं or सवक्रार्थं or अर्थवक्रतया or द्व्यर्थतो वद् (c. 1. वदति -दितुं), वक्रोक्तिं कृ, अस्पष्टं वद.

EQUIVOCATING, *a.* वक्रोक्तिमान् -मती -मत् (त्), वाक्छलान्वितः -ता -तं.

EQUIVOCATION, *s.* वक्रोक्तिः *f.*, वक्रवाक्यं, वक्रभणितं, वक्रवचनं, वाक्यवक्रता, वाक्छलं, वक्रता, वक्रिमा *m.* (न्), अर्थवैकल्यं, अपदेशः, व्यपदेशः.

EQUIVOCATOR, *s.* द्व्यर्थवक्ता *m.* (क्तृ), द्व्यर्थवादी *m.* (न्), वक्रवाक्यवादी *m.*

EQUIVOQUE, *s.* वक्रोक्तिः *f.*, कूटोक्तिः *f.*, कैतववादः, लालिका, अर्थापत्तिः *f.*

ERA, *s.* कालः, युगः, शाकः, शकः, संवत् indec. The era of Śáliváhana is called शाकः, that of Vikramáditya, संवत्.

To ERADIATE, *v. a.* स्फुर् (c. 6. स्फुरति -रितुं), रश्मीन् or किरणान् पत् in caus. (पातयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

ERADICABLE, *a.* उन्मूल्यः -ल्या -ल्यं, उन्मूलनीयः -या -यं, उत्पाटनीयः -या -यं, मूल्यः -ल्या -ल्यं.

To ERADICATE, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, उत्पट् (c. 10. -पाटयति -यितुं), मूलात् or समूलं or समूलम् उद्धृ (c. 1. -हरति -हर्त्तुं) or समुद्धृ or उच्छिद् (c. 7. -छिनत्ति -छेत्तुं) or उत्खन् (c. 1. -खनति -नितुं), व्यपरुह् in caus. (-रोपयति -यितुं), उद्वृह् (c. 6. -वृहति -वर्हितुं).

ERADICATED, *p. p.* उन्मूलितः -ता -तं, उत्पाटितः -ता -तं, उच्छिन्नः -न्ना -न्नं, उद्धृतः -ता -तं, उत्खातः -ता -तं, व्यपरोपितः -ता -तं, आवर्हितः -ता -तं, उद्वर्हितः -ता -तं.

ERADICATION, *s.* उत्पाटनं, उच्छेदः, उद्धरणं, उन्मूलनं, समूलोत्पाटनं, समूलोद्धरणं, मूलादुद्धरणं, व्यपरोपणं, समूलघातं, निष्कोषणं, विनाशः.

ERADICATIVE, *a.* उच्छेदी -दिनी -दि (न्), उत्पाटनकारी -रिणी -रि (न्).

ERADICATOR, *s.* उद्धर्त्ता *m.* (र्त्तृ), उन्मूलयिता *m.* (तृ), उच्छेदी *m.* (न्).

To ERASE, *v. a.* (Rub out) व्यामृज् (c. 2. -मार्ष्टि -र्ष्टुं), अपमृज्, उन्मृज्, व्यामृश् (c. 6. -मृशति -म्रष्टुं), लुप् (c. 6. लुम्पति, लोप्तुं), विलुप् (c. 10. -लोपयति -यितुं), लोपं कृ.—(Destroy) उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उद्धृ (c. 1. -हरति -हर्त्तुं), विनश् in caus. (-नाशयति -यितुं).

ERASED, *p. p.* व्यामृष्टः -ष्टा -ष्टं, लुप्तः -प्ता -प्तं, उच्छिन्नः -न्ना -न्नं.

ERASTIAN, *s.* ख्रीष्टीयसमाजो राज्यरीतिसम्बद्धो भवति or राज्यरीत्यधीनो भवति इति मन्यते यो जनः.

ERASURE, *s.* व्यामर्षः, लोपः, विलोपनं, उच्छेदः, विनाशः.

ERE, *adv.* or *prep.* प्राक्, पूर्व्वं, पुरा, अग्रे; 'ere he could come,' तस्य आगमनात् पूर्व्वं or पुरा; 'ere the time appointed,' प्राग् विहितकालात्; 'ere twelve years are over,' प्राग् द्वादशसमाः; or, expressed by loc. absolute; as, 'ere my child die,' मम पुत्रे न मृते सति.

Erelong, *adv.* अचिरेण, अचिरात्, न चिरेण, न चिरात्, पुरा.

Erenow, *adv.* अधुना पूर्वं, अद्य पूर्वं, प्राग् इहसमयात्.

To erect, *v. a.* (Set up) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, अवस्था, संस्था, अधिष्ठा, अधिरुह् in caus. -रोपयति -यितुं), निरुह्, रुह्.—(Raise, elevate) उत्था (rt. स्था with उत्), उन्नम् in caus. (-नमयति -यितुं), उच्छ्रि (c. 1. -छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि; उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उद्धृ (c. 1. -हरति -हर्तुं), उन्नी (c. 1. -नयति -नेतुं), उद्बृह् (c. 6. -बृहति -बर्हितुं), उन्नतीकृ, ऊर्द्ध्वीकृ, उच्चैः कृ; 'to erect the hair,' पुलक (nom. पुलकयति -यितुं).

Erect, *a.* उन्नतः -ता -तं, समुन्नतः -ता -तं, अनतः -ता -तं, ऋजुः -जुः -जु, उच्छ्रितः -ता -तं, उत्तानः -ना -नं, अजिह्मः -ह्मा -ह्मं, उच्चः -च्चा -च्चं, उच्छ्रितः -ता -तं.—(Having the head or countenance erect) उन्नतशिराः -राः -रः (स्), प्रकटशीर्षः -र्षा -र्षं, ऊर्द्ध्वमुखः -खी -खं, उत्पक्ष्मलः -ला -लं; 'having the hair erect,' पुलकितः -ता -तं, रोमाञ्चितः -ता -तं.

Erected, *p. p.* प्रतिष्ठापितः -ता -तं, प्रतिष्ठितः -ता -तं, अधिष्ठितः -ता -तं, उत्थापितः -ता -तं, उच्छ्रितः -ता -तं, उन्नमितः -ता -तं, उन्नतः -ता -तं, उद्धृतः -ता -तं, उद्यतः -ता -तं, उद्बर्हितः -ता -तं, उन्नीकृतः -ता -तं, उद्गूर्णः -र्णा -र्णं, उद्वृक्तः -क्ता -क्तं, उद्बर्हितः -ता -तं.

Erection, *s.* (Establishing) प्रतिष्ठापनं, संस्थापनं, अवस्थापनं.—(Raising) उत्थापनं, उच्छ्रयः, उच्छ्रायः, उच्छ्रितिः *f.*, समुच्छ्रयः, उन्नतिः *f.*, उन्नमनं, उन्नयः -यनं, उन्नामः, उन्नायः, उत्क्षेपः, उद्यमः, उद्धर्षणं; 'of the hair of the body,' पुलकः, पुलकोद्गमः, उद्धर्षणं, रोमहर्षणं, रोमाञ्चः च्चनं, रोमोद्गमः, रोमोद्भेदः, उद्धूषणं.

Erectness, *s.* अनतता, उन्नतता, उत्तानत्वं, उच्चता, ऋजुता.

Eremite, *s.* अरण्यवासी *m.* (न्), वनवासी *m.*, वनस्थायी *m.* (न्), वानप्रस्थः

Ermine, *s.* नकुलजातीयो हिमवद्देशजः शुक्ललोमा क्षुद्रजन्तुः.

Erotic, *a.* कामी -मिनी -मि (न्), शृङ्गारी -रिणी -रि (न्), कामविषयः -या -यं.

To err, *v. n.* भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), विभ्रम्, परिभ्रम्, भ्रान्तिं कृ, अपराध् (c. 4. -राध्यति, c. 5. -राध्नोति -राद्धुं), अपराधं कृ, दोषं कृ, प्रमद् (c. 4. -माद्यति -मदितुं), सत्पथात् or यथोचिताद् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) or च्यु (c. 1. च्यवते, च्योतुं) or विच्यु or विचल् (c. 1. -चलति -लितुं), उत्क्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, व्यभिचर् (c. 1. -चरति -रितुं); उत्पथेन or उन्मार्गेण गम् (c. 1. गच्छति, गन्तुं), मुह् (c. 4. मुह्यति, मोहितुं), प्रमादं कृ.

Errand, *s.* सन्देशः, सन्दिष्टं, शासनं, शास्तिः *f.*, आदेशः, आज्ञा, निर्देशः, समाचारः, वाचिकं, दूत्यं, दौत्यं, कार्य्यं, कृत्यं, कर्त्तव्यं; 'sending on an errand,' प्रतिशासनं.

Errant, *a.* भ्रमी -मिणी -मि (न्), परिभ्रमी &c., पर्य्यटनकारी -रिणी -रि (न्), इतस्ततो भ्रमणकारी &c., अवनिचरः -रा -रं.

Errantry, *s.* भ्रमणं, परिभ्रमणं, अटनं, पर्य्यटनं, चक्राटनं.

Errata-list, *s.* शुद्धिपत्रं, शोधनपत्रं, अशुद्धशोधनपत्रं.

Erratic, *a.* परिभ्रमी -मिणी -मि (न्), भ्रमणशीलः -ला -लं, चरः -रा -रं, चलनः -ना -नं, जङ्गमः -मा -मं, अस्थिरः -रा -रं, चञ्चलः -ला -लं. *See* Errant

Erratum, *s.* अशुद्धं, अशुद्धिः *f.*, अशोधनं.

Errhine, *a.* नस्यः -स्या -स्यं, क्षुत्करः -री -रं, छिक्कः -का -कं.

Erroneous, *a.* भ्रान्तिमान् -मती -मत् (त्), अशुद्धः -द्धा -द्धं, अयथार्थः -र्था -र्थं, अतथ्यः -थ्या -थ्यं, वितथः -था -थं, अनृतः -ता -तं, असत्यः -त्या -त्यं, भ्रमजनकः -का -कं, भ्रमात्मकः -का -कं, भ्रमोत्पादकः -का -कं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्). Often expressed by मिथ्या or मृषा prefixed; as, 'an erroneous opinion,' मिथ्यामतिः *f.*; 'an erroneous statement,' मिथ्यावादः, मृषावादः; 'erroneous conclusion,' अपसिद्धान्तः.

Erroneously, *adv.* मिथ्या, मृषा, अन्यथा, अयथार्थं, अयथावत्, वृथा, अतथ्यं, वितथं, अनृतं, असत्यं, प्रमादेन, सप्रमादं.

Erroneousness, *s.* अयाथार्थ्यं, असत्यता, अयथार्थता, अतथ्यता, वितथत्वं, भ्रान्तिमत्त्वं, प्रमादवत्त्वं.

Error, *s.* (Mistake) भ्रमः, भ्रान्तिः *f.*, मतिभ्रमः, मतिभ्रान्तिः *f.*, विभ्रमः, मतिविभ्रमः, प्रमादः, मिथ्यामतिः *f.*, परिभ्रमः, भ्रामः, प्रपञ्चः, मोहः, व्यामोहः, विपर्य्ययः, विचिकित्सा.—(Irregular course, deviation) उन्मार्गः, उन्मार्गगमनं, विमार्गगमनं, उत्पथः, सत्पथभ्रंशः, यथोचिताद्भ्रंशः, उत्क्रमः, व्यतिक्रमः, व्यभिचारः, भ्रेषः.—(Fault, sin) दोषः, अपराधः, पापं; 'in error,' अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं; 'I am not in error,' नाहम् अपराद्धः.

Erst, *adv.* पुरा, पूर्व्वं, पूर्व्वतस्, पूर्व्वकाले, प्राक्, प्राक्काले.

Erubescence, *s.* अरुणीभावः, अरुणिमा *m.* (न्), मुखारुणिमा *m.*, कपोलरागः.

Erubescent, *a.* ईषदरुणवदनः -नी -नं, ईषदरुणितकपोलः -ला -लं.

To eruct, *v. a.* उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं), उद्वम् (c. 1. -वमति -मितुं).

Eructation, *s.* उद्गारः, उद्गिरणं, उद्वमः -मनं, उत्क्षेपः -पणं, उद्गमः, उद्गारः; 'sour eructation,' अम्लोद्गारः.

Erudite, *a.* पण्डितः -ता -तं, विद्यावान् -वती -वत् (त्), ज्ञानवान् &c., कृतधीः -धीः -धि, व्युत्पन्नः -न्ना -न्नं, विपश्चित् *m. f. n.*, शिक्षितः -ता -तं.

Erudition, *s.* पाण्डित्यं, विद्या, ज्ञानं, व्युत्पत्तिः *f.*, शिक्षा, वैदुष्यं.

Eruginous, *a.* ताम्रमलसमभावः -वी -वं, ताम्रकलङ्करूपः -पी -पं.

Eruption, *s.* (Bursting forth, emission) उद्भेदः, प्रोद्भेदः, उद्गारः, उद्गिरणं, उत्सर्गः, उत्क्षेपः, उद्गमः, स्फोटनं, निःसरणं, निर्गमः.—(On the skin) दद्रुः *m.*, कच्छूः *f.*, स्फोटोत्पत्तिः *f.*, विस्फोटः, वरटी, वरण्डकः.

Eruptive, *a.* उद्भेदी -दिनी -दि (न्), स्फोटविशिष्टः -ष्टा -ष्टं.

Erysipelas, *s.* उदर्दः, विसर्पः, दद्रुः *m.*, दद्रूः *m.*

Escalade, *s.* लङ्घनं, दुर्गलङ्घनं, अवस्कन्दः -न्दनं, उल्लङ्घनं.

To escape, *v. n.* and *a.* पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्; निस्तॄ (c. 1. -तरति -रितुं -रीतुं), उत्तॄ; अपक्रम् (c. 1. -क्रामति -क्रमितुं), निर्गम् (c. 1. -गच्छति -गन्तुं), प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु; प्रधाव् (c. 1. -धावति -वितुं), अपधाव्, उत्पत् (c. 1. -पतति -तितुं), निष्पत्, अपसृप् (c. 1. -सर्पति -सर्प्तुं), क्षेमं or त्राणं or रक्षां लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति -आप्तुं).—(Avoid) परिहृ (c. 1. -हरति -हर्तुं), प्रोज्झ् (c. 6. -उज्झति -ज्झितुं), त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्; 'escaping,' निस्तीर्य्य, पलायित्वा, पलायमानः -ना -नं; 'one who has escaped danger,' भयमुक्तः -क्ता -क्तं, भयविमुक्तः -क्ता -क्तं, भयत्रातः -ता -तं, क्षेमप्राप्तः -प्ता -प्तं; 'he escapes blame,' दोषेण विमुच्यते.

Escape, *s.* निस्तारः, निस्तरणं, उत्तरणं, निर्गमः, निर्गतिः *f.*, पलायनं, प्रपलायनं, विपलायनं, अपक्रमः, अपयानं, प्रद्रावः, विद्रवः, उद्रावः, आत्ययः, अपायः, क्षेमप्राप्तिः *f.*, त्राणं, मोक्षः, मुक्तिः *f.*, शेषः; 'from punishment,' दण्डभङ्गः, दण्डमोक्षः; 'desire of escaping with life,' प्राणपरीप्सा.

Escaped, *p. p.* निस्तीर्णः -र्णा -र्णं, उत्तीर्णः -र्णा -र्णं, पलायितः -ता -तं, निर्गतः -ता -तं, द्रुतः -ता -तं, परिभ्रष्टः -ष्टा -ष्टं, प्रभ्रष्टः -ष्टा -ष्टं.

Eschalot, *s.* लशुनजातीयः क्षुद्रकन्दः, तीक्ष्णकन्दभेदः.

Escharotic, *a.* मांसदाहकः -का -कं, मांसविलयनकृत्.

Escharotic, *s.* विलयनं, अवसादनं, मांसदाहकः प्रलेपः.

ESCHEAT, *s.* उत्तराधिकारिणो ऽभावाद् भूस्वामिहस्तगतं भूमिक्षेत्रादि or भूस्वामिना प्राप्तं क्षेत्रादि.

To ESCHEAT, *v. n.* उत्तराधिकारिणाम् अभावाद् भूस्वामिन आधिकारण्ये परावृत् (c. 1. -वर्त्तते -र्त्तितुं) or भूस्वामिहस्तं गम् (c. 1. गच्छति, गन्तुं) or भूस्वामिना पुनः प्राप् in pass. (प्राप्यते).

To ESCHEW, *v. a.* वृज् (c. 10. वर्जयति -यितुं), हा (c 3. जहाति, हातुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), त्यज् (c. 1. त्यजति, त्यक्तुं), प्रोज्झ् (c. 6. -उज्झति -ज्झितुं).

ESCORT, *s.* (Body of men for protection) रक्षार्थं सैनिकगुल्मः or सैन्यदलं, रक्षकाः *m. pl.*, परिचराः *m. pl.*, अनुचराः *m. pl.*, परिवारः. —(Protection, safeguard) रक्षा -क्षणं, आश्रयः, शरणं.—(Attendance for defence) रक्षार्थम् अनुव्रजनं, अनुव्रज्या.

To ESCORT, *v. a.* (Attend by way of defence) रक्षार्थम् अनुव्रज् (c. 1. -व्रजति -जितुं) or अनुया (c. 2. -याति -तुं), अध्वनि रक्ष् (c. 1. रक्षति -क्षितुं), सञ्चर् in caus. (-चारयति -यितुं).

ESCORTED, *p. p.* अनुयातः -ता -तं, अध्वनि रक्षितः -ता -तं, सञ्चारितः -ता -तं.

ESCRITOIR, *s.* लिपिसज्जाधारः, लेखसाधनाधारः.

ESCULENT, *a.* खाद्यः -द्या -द्यं, खादनीयः -या -यं, भक्षणीयः -या -यं.

ESCUTCHEON, *s.* कुलचिह्नपत्रं, वंशमर्य्यादालक्षणपत्रं.

ESOPHAGUS, *s.* अन्नवाहिस्रोतः *n.* (स्). निगरणस्रोतः *n.* (स्).

ESOTERIC, *a.* गूढः -ढा -ढं, अलौकिकः -की -कं, अन्तर्भूतः -ता -तं.

ESPALIER, *s.* वातावरणार्थम् उद्यानपरितो रोपिता क्षुद्रवृक्षपंक्तिः *f.*, वृक्षजालं.

ESPECIAL, *a.* (Particular) विशेषकः -का -कं, सविशेषः -षा -षं, विशेष्यः -ष्या -ष्यं, विशेष in comp., as, 'especial duty,' विशेषधर्म्मः.—(Principal) उत्तमः -मा -मं, परमः -मा -मं, मुख्यः -ख्या -ख्यं, अधिकः -का -कं.

ESPECIALLY, *adv.* विशेषतस्, सविशेषं, प्रधानतस्, मुख्यशस्, परमं.

ESPIED, *p. p.* दृष्टः -ष्टा -ष्टं, आलोकितः -ता -तं, आलक्षितः -ता -तं.

ESPIONAGE, *s.* पैशुन्यं, चारकर्म्म *n.* (न्), गूढान्वेषणं, चारचक्षुः *n.* (स्).

ESPLANADE, *s.* तृणास्तीर्णः समभूभागः, तृणविशिष्टः समस्थलीकृतः क्रीडाप्रदेशः.

ESPOUSAL, *s.* वाग्दानं, कन्याप्रदानं, वाग्निश्चयः, विवाहसम्बन्धः.—(Adoption) परिग्रहः, सङ्ग्रहः, ग्रहणं, अनुपालनं; 'of another's cause,' पक्षपातः.

To ESPOUSE, *v. a.* (Betroth) वाग्दानं कृ, विवाहप्रतिज्ञां कृ.—(Marry a wife) कन्यां विवह् (c. 1. -वहति -वोढुं) or उद्वह् or परिणी (c. 1. -णयति -णेतुं) or परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(Take to one's self, adopt, maintain) स्वीकृ, आत्मसात्कृ, अङ्गीकृ, सङ्ग्रह्, परिग्रह्, संवृध् in caus. (-वर्धयति -यितुं), अनुपाल् (c. 10. -पालयति -यितुं); 'the cause of another,' परस्य सपक्षो भू or पक्षपातं कृ or पक्षपाती भू; 'of a follower,' भक्ताभिमानं कृ.

ESPOUSED, *p. p.* वाग्दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, प्रतिज्ञाविवाहितः -ता -तं, विवाहितः -ता -तं, परिणीतः -ता -तं, ऊढः -ढा -ढं.

To ESPY, *v. a.* (See at a distance) दूराद् आलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं) or अवलोक् or दृश् (c. 1. पश्यति, द्रष्टुं) or ईक्ष् (c. 1. ईक्षते -क्षितुं) or समीक्ष् or प्रेक्ष् or आलक्ष् (c. 10. -लक्षयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).

ESQUIRE, *s.* (Armour-bearer) शस्त्रहिनकः.—(Gentleman) महाशयः, आर्य्यः. In cases where esquire is affixed to a name out of respect, श्री may be prefixed.

To ESSAY, *v. a.* परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ, यत् (c. 1. यतते -तितुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उपक्रम् (c. 1. -क्रमते -मितुं), व्यवसो (c. 4. -स्यति -सातुं), आरभ् (c. 1. -रभते -रब्धुं).

ESSAY, *s.* परीक्षा -क्षणं, उद्योगः, चेष्टा, उद्यमः, समुद्यमः, आरम्भः, प्रवृत्तिः *f.*, उपक्रमः.—(A composition on any thesis) अमुकपक्षविषयो लेख्यबन्धः or निबन्धः or लेख्यप्रसङ्गः, लेख्यं, लेख्यपत्रं.

ESSAYIST, *s.* लेख्यनिबन्धा *m.* (न्धृ), निबन्धकृत् *m.*, लेखकः.

ESSENCE, *s.* (Constituent substance or nature) सारः -रता, वस्तु *n.*, मूलवस्तु *n.*, भावः, पदार्थः, मूलं, अधिभूतं.—(Pith, extract) सारः, निष्कर्षः, निर्यासः, कषायः, निर्गलितार्थः, मण्डः, रसः.—(Perfume) वासः, आमोदः, सुगन्धिद्रव्यं, सौरभं.

ESSENTIAL, *a.* (Constituent) वास्तवः -वी -वं, सारः -रा -रं, सारभूतः -ता -तं, सारवान् -वती -वत् (त्), स्वाभाविकः -की -कं; 'essential nature,' सारता.—(Important or necessary in the highest degree) आवश्यकः -की -कं, अत्यावश्यकः -का -कं, गुर्वर्थः -र्था -र्थं, बह्वर्थः -र्था -र्थं, अतिप्रयोजनार्हः -र्हा -र्हं.

ESSENTIAL, *s.* (First principle) तत्त्वं.—(Constituent principle) वस्तु, मूलं, पदार्थः.—(Important point) परमार्थः, गुर्वर्थः, प्रधानार्थः.

ESSENTIALLY, *adv.* सारतस्, वस्तुतस्, अर्थतस्, भावतस्, भावेन, तत्त्वतस्, पदार्थतस्; 'essentially necessary to be done,' अवश्यकार्य्यः -र्य्या -र्य्यं.

To ESTABLISH, *v. a.* (Set up, settle) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, अवस्था, संस्था, रुह् in caus. (रोपयति -यितुं), निरुह्; प्रतिनिधा (c. 3. -दधाति -धातुं).—(Ordain, enact) व्यवस्था in caus. विधा, प्रक्लृप् (c. 10. -कल्पयति -यितुं), परिक्लृप्, प्रतिपद् in caus. (-पादयति -यितुं), नियुज् (c. 7. -युनक्ति -योक्तुं).—(Make firm, ratify) स्थिरीकृ, दृढीकृ, सुस्थिरं -रां -रं कृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं); 'by fresh evidence,' प्रमाणीकृ, भू in caus. (भावयति -यितुं), विभू, उपपद् in caus. सत्याकृ.

ESTABLISHED, *p. p.* स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, प्रतिष्ठितः -ता -तं, संस्थापितः -ता -तं, व्यवस्थितः -ता -तं, व्यवस्थापितः -ता -तं, स्थितः -ता -तं, स्थायरः -रा -रं, विहितः -ता -तं, प्रकल्पितः -ता -तं, प्रतिपादितः -ता -तं, निश्चितः -ता -तं, स्थिरीकृतः -ता -तं, उपन्यस्तः -स्ता -स्तं.—(Proved) प्रमाणीकृतः -ता -तं, निर्णीतः -ता -तं, सिद्धः -द्धा -द्धं, उपपन्नः -न्ना -न्नं; 'established custom,' कृतानुसारः.

ESTABLISHMENT, *s.* (Act of establishing) प्रतिष्ठापनं, संस्थापनं, अवस्थापनं, स्थापनं, व्यवस्थापनं, नियोजनं.—(Confirmation) स्थिरीकरणं, दृढीकरणं, संस्तम्भः, सत्यापनं, सत्याकृतिः *f.*—(System) स्थितिः *f.*, संस्थानं.

ESTATE, *s.* (Condition) अवस्था, स्थितिः *f.*, भावः, दशा, वृत्तिः *f.*—(Property, possession) रिक्थं, दायः, धनं, अधिकारः, भूमिः *f.*; 'paternal estate,' पैतृकभूमिः *f.*—(Rank) पदं, स्थानं, पदविः *f.*—(Degree, order) वर्गः, गणः.

To ESTEEM, *v. a.* (Value) मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्; पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, आदृ (c. 6. -द्रियते -दर्त्तुं); 'to esteem highly,' बहु मन्.—(Consider, think) मन्, भू in caus. (भावयति -यितुं), विभू, विगण् (c. 10. -गणयति -यितुं).

ESTEEM, *s.* (Opinion) मतं, मतिः *f.*—(Regard, respect) मानं, सम्मानं, आदरः, पूजा, मान्यत्वं; 'high esteem,' बहुमानं, बहुमतिः *f.*

ESTEEMED, *p. p.* मतः -ता -तं, सम्मानितः -ता -तं, आदृतः -ता -तं, पूजितः -ता -तं; esteemed highly,' बहुमतः -ता -तं.—(Considered) स्मृतः -ता -तं.

ESTIMABLE, *a.* मान्यः -न्या -न्यं, सम्मान्यः -न्या -न्यं, अर्घ्यः -र्घ्या -र्घ्यं, अर्घार्हः -र्हा -र्हं, आदरणीयः -या -यं, पूजनीयः -या -यं; 'highly

estimable,' परमनाय्यः -य्या -य्यं.—(To be reckoned) गणनीयः -या -यं, अनुमेयः -या -यं.

To ESTIMATE, *v. a.* विगण् (c. 10. -गणयति -यितुं), परिगण्, प्रगण्, गण्; संख्या (c. 2. -ख्याति -तुं), परिसंख्या, कल् (c. 10. कलयति -यितुं), सङ्कल्, अर्घं or मूल्यं संख्या or निर्णी (c. 1. -णयति -णेतुं) or निरूप् (c. 10. -रूपयति -यितुं); विभू in caus. (-भावयति -यितुं); 'to estimate worth,' गुणं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं); 'to estimate highly,' बहु मन् (c. 4. मन्यते, मन्तुं).

ESTIMATE, *s.* (Computation) विगणनं -ना, परिसंख्यानं, गणना.—(Valuation) मूल्यपरिसंख्या, मूल्यनिरूपणं, मूल्यविज्ञापनं, अर्घविज्ञप्तिः *f.*; 'rough estimate,' स्थूलमानं, आकारः.

ESTIMATED, *p. p.* विगणितः -ता -तं, विभावितः -ता -तं, निर्णीतमूल्यः -ल्या -ल्यं, निरूपितमूल्यः -ल्या -ल्यं, सङ्कलितः -ता -तं, परिसंख्यातः -ता -तं.

ESTIMATION, *s.* (Calculation) विगणना, गणना, संख्या, परिसंख्यानं.—(Esteem, regard) मानं, सम्मानं, आदरः; 'high estimation,' बहुमानं, बहुमतिः *f.*

ESTIMATOR, *s.* गणकः, विगणकः, गुणकारः, संख्याता *m.* (तृ), मूल्यनिरूपकः.

ESTIVAL, *a.* नैदाघः -घी -घं. ग्रीष्मकालसम्बन्धी -न्धिनी -न्धि (न्).

ESTRADE, *s.* समभूमिः *f.*, समानभूमिः, समस्थलं, समस्थानं.

To ESTRANGE, *v. a.* विरञ्ज् in caus. (-रञ्जयति -यितुं), वैरक्त्यं जन् (c. 10. जनयति -यितुं), विरक्तीकृ, स्नेहं निवृत् in caus. (-वर्त्तयति -यितुं) or भिद् (c. 7. भिनत्ति, भेत्तुं), स्नेहच्छेदं कृ, स्नेहविच्छेदं कृ, स्नेहभेदं कृ, द्वैधीकृ, द्वैधं जन्, विक्षिप् in caus. (-क्षेपयति -यितुं), दूरीकृ.

ESTRANGED, *p. p.* विरक्तः -क्ता -क्तं. जातविरागः -गा -गं, विकृतः -ता -तं, विकारितः -ता -तं, विकृतबुद्धिः -द्धिः -द्धि, निवृत्तस्नेहः -हा -हं, दूरीभूतः -ता -तं.

ESTRANGEMENT, *s.* विरक्तिः *f.*, वैरक्त्यं, विरागः, वैराग्यं, विकृतिः *f.*, विकारः, बुद्धिविकारः, स्नेहनिवृत्तिः *f.*, स्नेहविच्छेदः, स्नेहभेदः, स्नेहच्छेदः, वियोगः, विप्रयोगः, विक्षेपः, दूरीभावः, पृथग्भावः.

ESTUARY, *s.* समुद्रशाखा, समुद्रवङ्कः.—(Mouth of a river) सम्भेदः, सङ्गमः.

To ESTUATE, *v. n.* फेन (nom. फेनायते), उत्सेचनं कृ, वेला (nom. वेलायते).

ET-CÆTERA. Expressed by आदि -दि in the *m.* or *n.* gender and in the *plur.* or *sing.* numb.; as, 'parrots, starlings, &c.,' शुकसारिकादयः; 'Indra, Kuvera, &c.,' इन्द्रकुवेरादयः; 'Of Agni, Pavana, &c.,' अग्निपवनादीनां; 'the nose, eyes, &c.,' नासचक्षुरादीनि; 'peace, war, &c.' सन्धिविग्रहादि; 'by liberality, &c.,' दानादिना; 'from liberality, &c.,' दानादेः (for दानादिनः). Sometimes इति is prefixed to आदि; as, 'the word chitralig, &c.,' चित्रलिगित्यादि. Sometimes आदिकः -का -कं, आद्यः -द्या -द्यं and प्रभृति are used for आदि; as, 'gifts, &c.,' दानादिकं; 'Indra, &c.,' इन्द्राद्याः, or इन्द्रप्रभृतयः *pl.*

To ETCH, *v. a.* लिख् (c. 6. लिखति, लेखितुं), आलिख्, चित्र् (c. 10. चित्रयति -यितुं).

ETCHING, *s.* चित्रलिखनं, चित्रं, आलेख्यं, वर्त्तिकारेखा.

ETERNAL, *a.* नित्यः -त्या -त्यं, अनन्तः -न्ता -न्तं -न्तकः -का -कं, सनातनः -नी -नं, शाश्वतः -ती -तं, अनादिः -दिः -दि, अनाद्यन्तः -न्ता -न्तं, अनाद्यः -द्या -द्यं, सदातनः -नी -नं, अनन्तकालस्थायी -यिनी -यि (न्), सर्व्वकालीनः -ना -नं, नैत्यिकः -की -कं, अनन्यः -न्या -न्यं, ध्रुवः -वा -वं, सन्ततः -ता -तं, सततः -ता -तं, अभीक्ष्णः -क्ष्णा -क्ष्णं, निरपायः -या -यं, निरन्तरः -रा -रं, अविच्युतः -ता -तं, अविसर्गी -र्गिणी -र्गि (न्), अविरतः -ता -तं, अमरः -रा -रं.

ETERNALLY, *adv.* नित्यं, नित्यदा, नित्यशस्, शाश्वतं, शश्वत्, सततं, सन्ततं, अनन्तं, अनाद्यन्तं, सदा, अजस्रं, अनिशं, अभीक्ष्णं, निरन्तरं, अविरतं, अश्रान्तं, अनारतं, सर्व्वकालं.

ETERNITY, *s.* नित्यता, नैत्यं, अनन्तता -न्त्यं, आनन्त्यं, अनन्त्यं, अनन्तकालः, अनाद्यन्तता, ध्रुवता, ध्रौव्यं, अनन्तभावः, नैरन्तर्य्यं, अमरता.

To ETERNIZE, *v. a.* अनन्त (nom. अनन्तयति -यितुं), अनन्तीकृ, शाश्वतीकृ.

ETESIAN, *a.* सांवत्सरिकः -की -कं, प्रतिवार्षिकः -की -कं, सामयिकः -की -कं.

ETHER, *s.* आकाशः, खं, शून्यं, वायुः *m.*, निर्म्मलवायुः, अन्तरीक्षोपरिस्थः सूक्ष्मवायुः, नभः *n.* (स्), गगनं, विहायः *n.* (स्).

ETHERIAL, *a.* आकाशीयः -या -यं, आकाशजः -जा -जं, आकाशसम्भवः -वा -वं, आकाशस्थः -स्था -स्थं, खसम्भवः -वा -वं, वायवः -वी -वं, वैहायसः -सी -सं.

ETHIC, ETHICAL, *a.* वैनयिकः -की -कं, नीतिविषयः -या -यं, नीतिविद्याविषयकः -का -कं, नीतिशास्त्रसम्बन्धी -न्धिनी -न्धि (न्), नीतिशास्त्रीयः -या -यं.

ETHICALLY, *adv.* नीतिशास्त्रवत्, नीतिशास्त्रानुसारेण.

ETHICS, *s.* नीतिविद्या, नीतिः *f.*, नीतिशास्त्रं, विनयः, विनयविद्या, अर्थशास्त्रं, दण्डनीतिः *f.*, शीलविद्या, आन्वीक्षिकी.—(As invented by Vrihaspati) बार्हस्पत्यं.

ETHNIC, ETHNICAL, *a.* (Relating to the Gentiles) अन्यदेशीयः -या -यं, भिन्नदेशीयः -या -यं, देवार्च्चकसम्बन्धी -न्धिनी -न्धि (न्), देवपूजकसम्बन्धी &c.

ETHNOLOGY, *s.* नृकुलविद्या, नृजातिविद्या, नृवंशविद्या.

ETIQUETTE, *s.* सदाचारविधिः *m.*, आर्य्यव्यवहारविधिः, सुजनाचारविधिः, विनयविधिः, विनयरीतिः *f.*, आदरविधिः *m.*, सौजन्यं, मर्य्यादा, सुनीतिः *f.*, सभ्यता, सच्चरित्रं, न्यायः.

ETYMOLOGICAL, *a.* शब्दव्युत्पत्तिविषयः -या -यं, पदभञ्जनविषयः -या -यं, शब्दशास्त्रसम्बन्धी -न्धिनी -न्धि (न्), शब्दसाधनविद्यासम्बन्धी &c.

ETYMOLOGIST, *s.* शब्दव्युत्पत्तिकुशलः, पदभञ्जनविद्याज्ञः, शब्दशास्त्रज्ञः.

To ETYMOLOGIZE, *v. n.* शब्दव्युत्पत्तिं कृ, पदभञ्जनं कृ, शब्दसाधनं कृ.

ETYMOLOGY, *s.* व्युत्पत्तिः *f.*, शब्दव्युत्पत्तिः *f.*, शब्दव्युत्पत्तिविद्या, पदभञ्जनं, शब्दसाधनं, शब्दसाधनविद्या.

EUCHARIST, *s.* ख्रीष्टमृत्युस्मरणार्थकं भोजनं, ख्रीष्टभोजनं, ख्रीष्टप्रकल्पितभोजनं.—(Giving thanks to God) ईश्वरस्य धन्यवादकरणं or कुशलवादः.

EULOGIST, *s.* प्रशंसकः, गुणश्लाघकः, स्तुतिपाठकः, बन्दी *m.* (न्).

EULOGISTIC, *a.* स्तुतिमयः -यी -यं, प्रशंसाकरः -री -रं, वन्दारुः -रुः -रु.

To EULOGIZE, *v. a.* प्रशंस् (c. 1. -शंसति -सितुं), स्तु (c. 2. स्तौति, स्तोतुं), अभिष्टु, संस्तु, श्लाघ् (c. 1. श्लाघते -घितुं), गुणान् कृत् (c. 10. कीर्त्तयति -यितुं) or उत्कृत्.

EULOGIZED, *p. p.* प्रशंसितः -ता -तं, प्रशस्तः -स्ता -स्तं, श्लाघितः -ता -तं, स्तुतः -ता -तं.

EULOGY, *s.* प्रशंसा -सनं, गुणप्रशंसा, स्तुतिः *f.*, गुणस्तुतिः *f.*, स्तवः, श्लाघा, गुणश्लाघा, स्तुतिवादः, स्तुतिवाक्यं, गुणोत्कीर्त्तनं, स्तोत्रं, शंसा, यशोवर्णना, वर्णना, वन्दना, वन्दिपाठः, गुणगानं, भोगावली.

EUNUCH, *s.* क्लीवः, षण्ढः, षण्डः, शण्ढः, शण्डः, मुष्कशून्यः, छिन्नवृषणः, छिन्नमुष्कः, निर्मुष्कः, नपुंसकः, पोगण्डः, पण्डः, तृतीयप्रकृतिः *m.*, तृतीयाप्रकृतिः, अफलः, विफलः, वर्षवरः, तूबरः.—(Guard of the women's apartments) स्थापत्यः, कञ्चुकी *m.* (न्), शुद्धान्तपालकः, शुद्धान्तजनः.

EUPHONIC, *a.* सुस्वरः -रा -रं, सुशब्दः -ब्दा -ब्दं, सुश्राव्यः -व्या -व्यं, श्रुतिसुखः -खा -खं, सुखाल्हलनः -ना -नं, अकर्कशः -शा -शं.

EUPHONY, *s.* सुस्वरः, सुशब्दः, सुस्वनः, सुश्राव्यशब्दः, अकटुत्वं, अकर्कशत्वं.

EUPHORBIA, *s.* बहुदुग्धिका, सम्मन्दुग्धा, सीहुण्डः, वज्रद्रुः *m.*, स्नुक् *f.* (ह्).

जुही, गुडा.

EUROPEAN, *s.* उरोपीयः, उरोप्नामकदेशजः, तातमुखः,

To EVACUATE, *v. a.* शून्यीकृ, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, विरिच् (c. 7. -रिणक्ति -रिंक्ते -रेक्तुं), रिच्, उच्चर् (c. 1. -चरति -रितुं), निश्चर् in caus. (-चारयति -यितुं), शुध् (c. 10. शोधयति -यितुं); 'the bowels,' मलोत्सर्गं कृ, मलविसर्गं कृ, मलशुद्धिं कृ.

EVACUATED, *p. p.* रेचितः -ता -तं, विरेचितः -ता -तं, शोधितः -ता -तं, रिक्तः -क्ता -क्तं, विरिक्तः -क्ता -क्तं, विसृष्टः -ष्टा -ष्टं.

EVACUATION, *s.* (Of the bowels) मलविसर्गः, मलोत्सर्गः, समुत्सर्गः, मलशुद्धिः *f.*, मलशोधनं, विरेकः, विरेचनं, रेकः, रेचनं, मलोच्चारः, उच्चारः, शोधनं, उत्थानं, निर्हारः, निश्चारकः, अधोभागहरं.

To EVADE, *v. a.* छलेन पलायित्वा परिहृ (c. 1. -हरति -हर्तुं) or प्रोज्झ् (c. 6. -उज्झति -ज्झितुं).—(Elude by sophistry) वक्रोक्त्या छल् (c. 10. छलयति -यितुं), अपलप् (c. 1. -लपति -पितुं), अपह्नु (c. 2. -ह्नुते -ह्नोतुं), निह्नु, अपदिश् (c. 6. -दिशति -देष्टुं), व्यपदिश्.

To EVADE, *v. n.* (Escape) छलेन पलाय् (c. 1. पलायते -यितुं, rt. इ) or निस्तॄ (c. 1. -तरति -रितुं -रीतुं) or अपक्रम् (c. 1. -क्रामति -क्रमितुं) or अपधाव् (c. 1. -धावति -वितुं) or अपसृप् (c. 1. -सर्पति -सर्प्तुं), or उत्पत् (c. 1. -पतति -तितुं) or निष्पत्.—(Practice artifice) वाक्छलं कृ, वक्रोक्तिं कृ, व्यपदेशं कृ, अपह्नवं कृ.

EVADED, *p. p.* छलेन or व्यपदेशेन परिहृतः -ता -तं or प्रोज्झितः -ता -तं, निह्नुतः -ता -तं, अपह्नुतः -ता -तं, निस्तीर्णः -र्णा -र्णं.

EVAGATION, *s.* भ्रमणं, परिभ्रमणं, विभ्रान्तिः *f.*, भ्रान्तिः *f.*, विचलनं, व्यभिचारः,

EVANESCENCE, *s.* अन्तर्द्धानं, तिरोधानं, अन्तर्हितत्वं, अदर्शनं.

EVANESCENT, *a.* तिरोधेयः -या -यं, अन्तर्हितः -ता -तं, अदृष्टरूपः -पी -पं, अदृश्यः -श्या -श्यं, अप्रत्यक्षः -क्षा -क्षं, परोक्षः -क्षा -क्षं.—(Fleeting) भङ्गुरः -रा -रं, क्षणभङ्गुरः -रा -रं, क्षणमात्रस्थायी -यिनी -यि (न्), अशाश्वतः -ती -तं.

EVANGELICAL, *a.* सुसंवादानुसारी -रिणी -रि (न्), ख्रीष्टीयधर्म्मानुयायी -यिनी -यि (न्), ख्रीष्टप्रचारितः -ता -तं, ख्रीष्टीयधर्म्मपुस्तकान्तर्गतः -ता -तं.

EVANGELIST, *s.* (Writer of the life of Christ) ख्रीष्टचरित्ररचकः, ख्रीष्टसमाचाररचकः, सुसंवादलेखकः, मङ्गलसमाचारलेखकः.—(Preacher of the Gospel) सुसंवादप्रचारकः, ख्रीष्टीयधर्म्मप्रवक्ता *m.* (तृ).

To EVANGELIZE, *v. a.* and *n.* सुसंवादं प्रचर् in caus. (-चारयति -यितुं), ख्रीष्टीयधर्म्मं प्रवच् (c. 2. -वक्ति -क्तुं) or उपदिश् (c. 6. -दिशति -देष्टुं) or ग्रह् in caus. (-ग्राहयति -यितुं), ख्रीष्टीयधर्म्मं प्रवृत् in caus. (-वर्त्तयति -यितुं).

To EVAPORATE, *v. n.* वाष्प (nom. वाष्पायते), धूम (nom. धूमायते) वाष्पसाद्भू, वाष्पीभू, वाष्परूपेण उत्पत् (c. 1. -पतति -तितुं) or उद्गम् (c. 1. -गच्छति -गन्तुं), धूमरूपेण विद्रु (c. 1. -द्रवति -द्रोतुं) or नश् (c. 4. नश्यति, नशितुं) or प्रणश् or अन्तर्धा in pass. (-धीयते) or क्षि in pass. (क्षीयते).—(Dry up) आतपेन परिशुष् (c. 4. -शुष्यति -शोष्टुं), शुष्कीभू.

To EVAPORATE, *v. a.* वाष्पसात्कृ, धूमसात्कृ, वाष्पीकृ, वाष्परूपेण विद्रु in caus. (-द्रावयति -यितुं), आतपेन परिशुष् in caus. (-शोषयति -यितुं) or शुष्कीकृ.

EVAPORATED, *p. p.* आतपशुष्कः -ष्का -ष्कं, परिशुष्कः -ष्का -ष्कं, शोषितरसः -सा -सं, वाष्परूपेण उद्गतरसः -सा -सं, वाष्पसात्कृतः -ता -तं, वाष्पीभूतः -ता -तं.

EVAPORATION, *s.* (Drying up) परिशोषः -षणं, शोषः -षणं, उच्छोषणं.—(Conversion to vapour) वाष्पसात्करणं, धूमसात्करणं, वाष्पभावः, वाष्परूपेण उत्पतनं or उद्गमः or नाशः, वाष्पीभूतत्वं.

EVASION, *s.* (Artifice to elude) अपदेशः, व्यपदेशः, छद्म *n.* (न्), छलं, कपटः -टं, अपह्नवः, निह्नवः.—(Equivocation) वक्रोक्तिः *f.*, वक्रता, वक्रवाक्यं, वाक्छलं, अपलापः, कैतववादः, प्रतीपवचनं.—(Escape) निस्तारः, उत्तरणं, निर्गमः, निर्गतिः *f.*, पलायनं, अपक्रमः.

EVASIVE, *a.* छली -लिनी -लि (न्), छलान्वितः -ता -तं, व्यपदेशकः -का -कं, वञ्चकः -का -कं, निह्नवकारी -रिणी -रि (न्).—(Equivocating) वक्रः -क्रा -क्रं, वाक्छलान्वितः -ता -तं; 'an evasive answer,' निह्नवोत्तरं, वक्रोत्तरं.

EVASIVELY, *adv.* वाक्छलेन, वक्रोक्त्या, निह्नवेन, सनिह्नवं, वक्रं.

EVE, *s.* (The fast to be observed on the evening before a holiday) महापर्व्वणः पूर्व्वदिनान्ते सेवनीय उपवासः, पुण्यदिवसस्य पूर्व्वप्रदोषः.—(Decline of day). *See* EVENING.—'To be on the eve of happening,' उपस्था (c. 1. -तिष्ठति -स्थातुं).

EVEN, *s.* सायः, सायङ्कालः, प्रदोषः, प्रदोषकालः. *See* EVENING.

EVEN-TIDE, *s.* सन्ध्याकालः, सन्ध्यासमयः, सायङ्कालः, प्रदोषकालः, प्रदोषसमयः.

EVEN, *a.* (Level, flat) समः -मा -मं, समानः -ना -नं, समस्थः -स्था -स्थं, सपाटः -टा -टं, घनाघनः -ना -नं; 'even ground,' समभूमिः *f.*, समस्थलं, खाजिः *f.*, पाटः.—(Straight) समरेखः -खा -खं, अवक्रः -क्रा -क्रं, अभुग्नः -ग्ना -ग्नं, निर्भुग्नः -ग्ना -ग्नं, ऋजुः -जुः -जु, अञ्जसः -सा -सं.—(Smooth) श्लक्ष्णः -क्ष्णा -क्ष्णं, अकर्कशः -शा -शं.—(Uniform, equal) तुल्यः -ल्या -ल्यं, समतुल्यः -ल्या -ल्यं, उभयपार्श्वयोः समानः -ना -नं, निर्विकारः -रा -रं; 'in temper,' समभावः -वी -वं, समवृत्तिः -त्तिः -त्ति.—(Not odd) युग्मः -ग्मा -ग्मं, युगलः -ला -लं, समः -मा -मं; 'an even number,' युग्मं, युगलं; 'with both feet even,' समपदं.

To EVEN, *v. a.* समस्थलीकृ, समीकृ, समानीकृ, समान (nom. समानयति -यितुं).

EVEN, *adv.* अपि, एव, वा, वापि, सम, 'even though,' यद्यपि, यद्यपि स्यात्, तथापि; 'even so,' एवं, एवमेव, तथा, तथापि, तथैव; 'even as,' यथैव, यद्वदेव, यत्प्रकारेण; 'even now,' अद्यापि, अद्यैव; 'not even,' नापि, नैव.

EVEN-HANDED, *a.* उभयसमः -मा -मं, समदर्शी -र्शिनी -र्शि (न्), विपक्षपातः -ता -तं.

EVENING, *s.* प्रदोषः, प्रदोषकालः, सायः, सायङ्कालः, सायाह्नः, अपराह्णः, सन्ध्या, सन्ध्याकालः, विकालः -लकः, वैकालः, दिनान्तः, दिनावसानं, दिवसावसानं, दिवसात्ययः, अहःशेषः, दिनशेषः, रजनीमुखं, निशादिः *f.*, रात्र्यारम्भः, उत्सूरः, अह्नः पञ्चमो भागः; 'in the evening,' सायं, सायं, दिनान्ते, अभिसायं, अनुसन्ध्यं; 'good evening to you,' शुभस्ते प्रदोषः.

EVENING, *a.* प्रादोषिकः -की -कं, वैकालिकः -की -कं, सान्ध्यः -न्ध्यी -न्ध्यं, सायन्तनः -नी -नं, अपराह्णेतनः -नी -नं or अपराह्णतनः.

EVENLY, *adv.* समं, समानं, समानतस्, अञ्जसा, तुल्यं; 'evenly matched,' तुल्यबलः -ला -लं, तुल्यवीर्य्यः -र्य्या -र्य्यं, समतोलः -ला -लं.

EVEN-MINDED, *a.* समचित्तः -त्ता -त्तं, समबुद्धिः -द्धिः -द्धि, समभावः -वा -वं, सत्त्वसम्पन्नः -न्ना -न्नं, सत्यसम्पन्नः -न्ना -न्नं, सम्पदापदोर् हर्षविषादरहितः -ता -तं.

EVENNESS, *s.* समता, समानता -त्वं, साम्यं, साम्यता, सामञ्जस्यं, तुल्यता, ऋजुता, निर्भुग्नता; 'of temper,' समचित्तत्वं, समानवृत्तिः *f.*, समभावः.

EVENT, *s.* वृत्तं, सम्भवः, उत्पन्नं, समुत्पत्तिः *f.*, समुत्पन्नं, समुद्भवः, सङ्गतं, गतं, सङ्गतिः *f.*, घटना, समुपागतं, उपागमः, समुपस्थितं.—(Consequence, conclusion) उद्वृत्तं, अनुवृत्तं, अनुवर्त्तनं, परिणामः, निष्पन्नं, सिद्धिः *f.*

To EVENTERATE, *v. a.* निरन्त्रीकृ, अन्त्राणि विदॄ in caus. (-दारयति-यितुं).

EVENTFUL, *a.* गुरुघटनाविशिष्टः -ष्टा -ष्टं, गुरुसङ्गतिविशिष्टः -ष्टा -ष्टं, बहुवृत्तविशिष्टः -ष्टा -ष्टं, बहुसमुदयवान् -वती -वत् (त्), बहुघटनामयः -यी -यं.

To EVENTILATE, *v. a.* वीज् (c. 10. वीजयति -यितुं), विधू (c. 5. -धूनोति, c. 6. -धुवति -धवितुं), निष्पावं कृ.

EVENTUAL, *a.* (Consequential) अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), आनुषङ्गिकः -की -कं, अनुसारी -रिणी -रि (न्), अनुभूतः -ता -तं, परः -रा -रं.—(Ultimate) अन्तिमः -मा -मं, अन्त्यः -न्त्या -न्त्यं.

EVENTUALLY, *adv.* अन्ततस्, अन्ते, शेषे, शेषतस्, परतस्, प्रयोगतस्.

EVER, *adv.* (At any time) कदाचित्, कदापि, कदाचन, कर्हिचित्, जातु.—(Always, at all times) सदा, सर्व्वदा, सततं, नित्यदा, अनुक्षणं, प्रतिक्षणं; 'for ever,' नित्यं, सर्व्वकालं, अनन्तकालं, शाश्वतीः समाः, अजस्रं, शश्वत्, निरन्तरं, सना; 'ever and anon,' वारं वारं, काले काले, अनुकालं; 'ever since,' यतः प्रभृति; 'ever so little,' मनाक्, ईषत्, किञ्चित्, कियत्.—(As a word of enforcement) एव; 'ever young,' नित्ययौवनः -ना -नं; 'ever happy,' सदानन्दः -न्दा -न्दं.

EVERGREEN, *a.* अशीर्णपत्रः -त्रा -त्रं, अम्लानपर्णः -र्णा -र्णं, अशुष्कपर्णः -र्णा -र्णं.

EVERLASTING, *a.* अनन्तः -न्ता -न्तं, अनन्तकालस्थायी -यिनी -यि (न्), नित्यस्थायी &c., शाश्वतः -ती -तं, अक्षयः -या -यं, अनाश्यः -श्या -श्यं, अजरः -रा -रं. *See* ETERNAL.

EVERLASTINGLY, *adv.* शाश्वतं, अनन्तकालं, शाश्वतीः समाः, नित्यं, अजस्रं.

EVERLIVING, *a.* नित्यजीवी -विनी -वि (न्), अनन्तकालजीवी &c. *See* ETERNAL.

EVERMORE, *s.* अनन्तकालं, सर्व्वकालं, शाश्वतीः समाः, शाश्वतं, शश्वत्, नित्यं, नित्यकालं, सततं, अजस्रं, सना. *See* ETERNALLY.

EVER-RESTLESS, *a.* नित्यगतिः -तिः -ति, सदागतिः -तिः -ति, सततगतिः -तिः -ति.

EVERSION, *s.* पर्य्यासः, पराक्षेपः, परिवर्त्तनं, नाशः, विनाशः.

To EVERT, *v. a.* पर्यस् (c. 4. -अस्यति -असितुं), पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अधः कृ.

EVERY, *a.* सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, सकलः -ला -लं, सर्व्वकः -का -कं; 'every art,' सर्व्वकर्म्म *n.* (न्); 'knowing every thing,' सर्व्वज्ञः; 'every road,' सर्व्वपथः; 'the maker of every thing,' सर्व्वभूतकृत्, सर्व्वकर्त्ता *m.* (र्तृ), विश्वकृत्; 'enduring every thing,' सर्व्वंसहः, विश्वसहः; 'every one,' सर्व्वजनाः *m. pl.*, विश्वजनं; 'dear to every one,' सर्व्वप्रियः; 'sustaining every thing,' विश्वम्भरः. 'Every,' may often be expressed by प्रति or अनु prefixed; as, 'every day,' प्रतिदिनं, प्रतिदिवसं, अनुदिनं, अन्वहं, प्रत्यहं; 'every night,' प्रतिरात्रं; 'every month,' प्रतिमासं; 'every moment,' अनुक्षणं; 'to every one,' प्रत्येकं. Or by doubling the word; as, 'every day,' दिने दिने, दिवसे दिवसे, अहरहः; 'in every house,' गृहे गृहे; 'every one,' एकैकः -का -कं, एकैकशस्, पृथक् पृथक्; 'every man,' एकैकजनः, प्रतिजनं; 'in every direction,' प्रतिदिशं, सर्व्वदिक्षु, सर्व्वपर्य्यीणः -णा -णं; 'on every side,' सर्व्वतस्, समन्ततस्, समन्तात्, विश्वतस्, परितस्.

EVERYWHERE, *adv.* सर्व्वत्र, सर्व्वतस्, विश्वतस्, विश्वक्, सर्व्वके, प्रतिदिशं; 'going everywhere,' सर्व्वगः -गा -गं, सर्व्वगः -गा -गं, विश्वव्यापी -पिनी -पि (न्).

To EVICT, *v. a.* निर्णयपादानन्तरं or व्यवहारदर्शनानन्तरम् अधिकाराद् भ्रंश् (c. 10. भ्रंशयति -यितुं) or निराकृ or वहिष्कृ or अधिकारं or स्वत्वं हृ (c. 1. हरति, हर्तुं).

EVICTED, *p. p.* व्यवहारसभासकाशाद् आज्ञया हृताधिकारः -रा -रं, साधितः -ता -तं.

EVICTION, *s.* व्यवहारसभासकाशाद् आज्ञानुसारेण अधिकारनिराकरणं or वहिष्करणं or स्वत्वहरणं, साधनं.

EVIDENCE, *s.* (Testimony) साक्ष्यं, साक्षिता, प्रमाणं, साधनं, प्रामाण्यं, प्रमात्व *m.* (तृ), क्रियानिर्देशः, साधननिर्देशः; 'written evidence,' लेखप्रमाणं, लिखितं, साधनपत्रं; 'ocular evidence,' प्रत्यक्षप्रमाणं, साक्षात्प्रमाणं, चाक्षुषज्ञानं; 'false evidence,' कौटसाक्ष्यं, कूटसाक्ष्यं; 'want of evidence,' साक्ष्यभावः, प्रमाणाभावः.—(Witness) साक्षी *m.* (न्), प्रमाता *m.* (तृ); 'having evidence,' साक्षिमान् -मती -मत् (त्).

To EVIDENCE, *v. a.* प्रमाण (nom. प्रमाणयति -यितुं), प्रमाणीकृ, साक्षिणा or साक्ष्येण or प्रमाणेन साध् (c. 10. साधयति -यितुं) or भू in caus. (भावयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or उपपद् in caus. (-पादयति -यितुं).

EVIDENCED, *p. p.* साक्षिभावितः -ता -तं, साक्षिलक्षणः -णा -णं, स्पष्टीकृतः -ता -तं.

EVIDENT, *a.* स्पष्टः -ष्टा -ष्टं, सुस्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं or प्रव्यक्तः or अभिव्यक्तः, प्रत्यक्षः -क्षा -क्षं, प्रकाशः -शा -शं, सुप्रकाशः -शा -शं, समक्षः -क्षी -क्षं, स्फुटः -टा -टं, उल्बणः -णा -णं; 'to make evident,' स्पष्टीकृ, व्यक्तीकृ, प्रकाश् (c. 10. -काशयति -यितुं), प्रकटीकृ, प्रत्यक्षीकृ, आविष्कृ, प्रादुष्कृ; 'to be evident,' स्पष्टीभू, आविर्भू, प्रादुर्भू, प्रादुरस्, प्रकाश् (c. 1. -काशते -शितुं); 'made evident,' स्पष्टीकृतः -ता -तं, प्रादुष्कृतः -ता -तं, प्रकाशितः -ता -तं, प्रत्यक्षभूतः -ता -तं.

EVIDENTLY, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, स्पष्टरूपेण, प्रत्यक्षतस्, प्रत्यक्षेण, साक्षात्, प्रकाशं, स्फुटं, प्रादुस्, समक्षं, नाम.

EVIL, *a.* दुष्टः -ष्टा -ष्टं, पापः -पा -पं, पापी -पिनी -पि (न्), खलः -ला -लं, अभद्रः -द्रा -द्रं, असाधुः -धुः -धु, असत् -सती -सत् (त्), निर्गुणः -णा -णं, शठः -ठा -ठं, मन्दः -न्दा -न्दं, अधमः -मा -मं, कुत्सितः -ता -तं, कदर्य्यः -र्य्या -र्य्यं, अधार्म्मिकः -की -कं. 'Evil,' is often expressed by दुर् or कु, or अप prefixed; as, 'an evil man,' दुर्ज्जनः; 'evil thought,' कुचिन्ता, अपध्यानं; 'evil conduct,' दुर्णयः; 'evil deed,' कुकर्म्म *n.* (न्), दुष्कर्म्म *n.*, अपकर्म्म *n.*, पापकर्म्म *n.*, असत्कर्म्म *n.*, दुष्कृतं; 'evil course,' कुमार्गः, उन्मार्गः, विमार्गः; 'evil destiny,' दुर्भाग्यं, दुर्दैवं.

EVIL, *s.* (Wickedness) पापं, दुष्टता, दोषः, व्यसनं -निता, शाठ्यं, दौष्ट्यं, असाधुता, अधर्म्मः, व्यभिचारः, दौरात्म्यं, दौर्जन्यं, कुवृत्तिः *f.*, निकारः.—(Injury) अपकारः, अपकृतं, अपायः, द्रोहः, हिंसा, क्षतिः *f.*—(Misfortune, distress) अपायः, अशुभं, दुर्गतिः *f.*, दौर्गत्यं, अकुशलं, अभद्रं, अरिष्टं, अनिष्टं, अहितं, दुःखं, दुरवस्था, दुर्दशा, व्यसनं, उत्पातः, आपद् *f.*, विपद् *f.*, विपत्तिः *f.*, अनिष्टपातः, अनयः, क्लेशः, कष्टं.

EVIL, *adv.* दुष्टु; expressed by दुर्, वि, दुष्ट, पाप &c., prefixed; 'evil-intentioned,' दुष्टबुद्धिः -द्धिः -द्धि, दुराशयः -या -यं, पापाशयः -या -यं; 'evil-affected,' विरक्तः -क्ता -क्तं, अहितः -ता -तं; 'evil-natured,' दुष्प्रकृतिः -तिः -ति; 'evil-fated,' दैवोपहतः -ता -तं, उपहतकः -का -कं, दुर्दैवग्रस्तः -स्ता -स्तं; 'evil-favoured,' कुरूपः -पी -पं.

EVIL-DOER, *s.* पापकारी *m.* (न्), पापकर्त्ता *m.* (र्तृ), पापकरः, पापकृत् *m.*, पापकर्म्मा *m.* (न्), असत्कर्म्मा, कुकर्म्मा, दुष्कृती *m.* (न्), कुकर्म्मकारी *m.*, मन्दचरित्रः, मन्दकारी *m.*, दुर्वृत्तः, दुष्टचारी *m.* (न्), अधर्म्मचारी *m.* (न्), व्यसनी *m.* (न्).

EVIL-EYE, *s.* कुदृष्टिः *f.*, असदृष्टिः *f.*, दुरीक्षणा, क्रूरदृष्टिः *f.*; evil-eyed,' क्रूरदृक् *m. f. n.* (श्), असदृक् *m. f. n.* पापदृष्टिः -ष्टिः -ष्टि.

EVIL-MINDED, *a.* पापमतिः -तिः -ति, पापबुद्धिः -द्धिः -द्धि, पापचेतनः -ना -नं, दुष्टचित्तः -त्ता -त्तं, दुष्टबुद्धिः -द्धिः -द्धि, दुष्टमतिः -तिः -ति, दुरात्मा

-त्मा -त्म (न्), अधर्मशीला &c., पापात्मा &c., पापस्वभावः -वा -वं, दुष्टान्तःकरणः -णा -णं, दुर्हृदयः -या -यं.

EVIL-SPEAKING, *s.* दुरालापः, अपवादः, वाग्दोषः, पिशुनवाक्यं, मौखर्य्यं.

To EVINCE, *v. a.* स्पष्टीकृ, व्यक्तीकृ, प्रकाश् (c. 10. -काशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, दृश् in caus. (दर्शयति -यितुं), प्रमाणीकृ.

EVINCIBLE, *a.* सूच्यः -च्या -च्यं, साध्यः -ध्या -ध्यं, निर्देशनीयः -या -यं.

EVINCIBLY, *adv.* स्पष्टं, सुस्पष्टं, सुव्यक्तं, असंशयं, अत्र न सन्देहः.

To EVISCERATE, *v. a.* निरन्त्रीकृ, निरन्त्र (nom. निरन्त्रयति -यितुं), नाडीर् वहिष्कृ.

EVITABLE, *a.* परिहरणीयः -या -यं, हेयः -या -यं, वर्ज्जनीयः -या -यं.

EVOCATION, *s.* (Calling upon) आह्वानं, प्रह्वायः, अनुकर्षणं.—(Appealing) पुनराह्वानं, पुनर्विचारप्रार्थना, अन्यप्राड्विवाकसाक्षाद् आह्वानं.

To EVOKE, *v. a.* आह्वे (c. 1. -ह्वयति -ह्वातुं), प्रह्वे, अनुकृष् (c. 1. -कर्षति -क्रष्टुं).—(From one tribunal to another) अन्यविचारसभासाक्षाद् आह्वे.

EVOLUTION, *s.* (Unfolding) विस्तारः -रणं, प्रसारणं, प्रकटीकरणं, विवारः, विवृतिः *f.*—(In arithmetic) प्रादुर्भावः.—(Series) श्रेणी, श्रेढी.

To EVOLVE, *v. a.* विस्तृ in caus. (-स्तारयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), अपावृ, वितन् (c. 8. -तनोति -नितुं), विततीकृ.

EVOLVED, *p. p.* विस्तारितः -ता -तं, प्रसारितः -ता -तं, विवृतः -ता -तं.

EVULSION, *s.* उत्पाटनं, उत्कर्षणं, विकर्षणं, उल्लुञ्चनं, अवलुञ्चनं.

EWE, *s.* मेषी -षिका, एडका, उरणी, भेडी, अविला; 'ewe's milk,' अविसोढं, अविदूसं, अविमरीसं.

EWER, *s.* घटी, उदकपात्रं, उदपात्रं, कुम्भः, पुटग्रीवः, कमण्डलुः *m.*

To EXACERBATE, *v. a.* प्रकुप् in caus. (-कोपयति -यितुं), उत्तिज् in caus. (-तेजयति -यितुं), तीक्ष्णीकृ, तिग्मतरं -रां -रं कृ, तीव्रतरं -रां -रं कृ, उग्रतरं -रां -रं कृ.

EXACERBATION, *s.* प्रकोपः -पनं, उत्तेजनं, समुत्तेजनं, उग्रत्वं, कोपज्वलनं, कोपवर्धनं, रोगवृद्धिः *f.*

EXACT, *a.* (Accurate, correct) यथार्थः -र्था -र्थं, याथार्थिकः -की -कं, समञ्जसः -सा -सं, अञ्जसः -सा -सं, सत्यः -त्या -त्यं, ऋतः -ता -तं, तथ्यः -थ्या -थ्यं, यथातथः -था -थं, शुचिः -चिः -चि, शुद्धः -द्धा -द्धं, निर्दोषः -षा -षं, दोषरहितः -ता -तं, स्पष्टः -ष्टा -ष्टं.—(Careful) सयत्नः -त्ना -त्नं, अवहितः -ता -तं, अप्रमादी -दिनी -दि (न्).—(Nice, precise) सूक्ष्मः -क्ष्मा -क्ष्मं.—(Not different) समानः -ना -नं, निर्विशेषः -षा -षं, अनन्यः -न्या -न्यं -न्यत्, समसमानः -ना -नं.—(Neither more nor less) नाधिको न च न्यूनः; 'the exact state,' तारतम्यं; 'exact measurement,' सूक्ष्ममानं.

To EXACT, *v. a.* (Compel to pay) दा in caus. (दापयति -यितुं), विहा in caus. (-हापयति -यितुं); 'exact tribute,' बलिं or शुल्कम् आहृ in caus. (-हारयति -यितुं) or अपहृ.—(Take forcibly) बलात् or बलेन ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं).—(Demand) याच् (c. 1. याचति -चितुं), प्रार्थ् (c. 10. -अर्थयति -ते -यितुं).—(Enforce) कृ in caus. (कारयति -यितुं) with 2 acc.; 'exact punishment,' दण्डं प्रणी (c. 1. -णयति -णेतुं).

To EXACT, *v. n.* बाध् (c. 1. बाधते -धितुं), बाधं कृ, उपद्रवं कृ, उपधिं कृ.

EXACTED, *p. p.* बलाद्गृहीतः -ता -तं, अवहारितः -ता -तं, आहारितः -ता -तं, आकारितः -ता -तं, विहापितः -ता -तं.

EXACTER, *s.* बलात्कारपूर्व्वं परस्वादायी *m.* (न्) or परस्वग्राहकः, उपधिकः, औपधिकः, बाधकः, आहारकः, अवहारकः, हारकः.

EXACTING, *a.* बाधकः -का -कं, विप्रलुम्पकः -का -कं, प्रार्थकः -का -कं.

EXACTION, *s.* बलेन ग्रहणं or आदानं or हरणं, भर्त्सनपूर्व्वं प्रार्थनं or याचना, बाधः -धनं, उपद्रवः, विप्लवः, उपधिकरणं, परस्वादानं, अर्कग्रहं.

EXACTLY, *adv.* यथार्थं, यथावत्, सम्यक्, अञ्जसा, समञ्जसं, यथातथं, तथ्यं, सत्यं, ऋतं, सूक्ष्मत्वेन, सूक्ष्मतया; 'neither more nor less,' नाधिकं न च न्यूनं; 'exactly so,' एवमेव, तथैव; 'exactly alike,' समसमानः -ना -नं.

EXACTNESS, *s.* (Accuracy) याथार्थ्यं, यथार्थता, सम्यक्त्वं, याथातथ्यं, सत्यता, तथ्यं, सामञ्जस्यं, शुद्धता.—(Niceness, precision) सूक्ष्मता, सौक्ष्म्यं.—(Carefulness) अवहितत्वं, अप्रमादः, यत्नः, आस्था.—(Regularity, method) पारिपाट्यं, समता, अनुक्रमणं, क्रमानुसारः, न्यायः.

To EXAGGERATE, *v. a.* अत्युक्त्या or अतिशयोक्त्या वृध् (c. 10. वर्धयति -यितुं) or विस्तृ in caus. (-स्तारयति -यितुं) or अधिकीकृ, or उपचि (c. 5. -चिनोति -चेतुं), अतिशयेन वर्ण् (c. 10. वर्णयति -यितुं), अतिवर्णनं कृ, अत्युक्तिं कृ, वाग्विस्तारं कृ.

EXAGGERATED, *p. p.* वर्धितः -ता -तं, अधिकीकृतः -ता -तं, विस्तारितः -ता -तं, उपचितः -ता -तं, अत्युक्तिपूर्व्वं वर्णितः -ता -तं or प्रपञ्चितः -ता -तं.

EXAGGERATION, *s.* अत्युक्तिः *f.*, अतिशयोक्तिः *f.*, अधिकं, वागाधिक्यं, अधिकीकरणं, वागुपचयः, वाक्यबाहुल्यं, चित्रोक्तिः, अतिवर्णना, अतिप्रपञ्चः.

To EXAGITATE, *v. a.* विक्षुभ् in caus. (-क्षोभयति -यितुं). *See* AGITATE.

EXPERT, *a.* कुशलः -ला -लं, निपुणः -णा -णं, दक्षः -क्षा -क्षं, विज्ञः -ज्ञा -ज्ञं, अभिज्ञः -ज्ञा -ज्ञं, प्रवीणः -णा -णं, चतुरः -रा -रं, पक्कः -क्का -क्कं, परिपक्कः -क्का -क्कं, सुप्रयोगवान् -वती -वत् (त्), पटुः -टुः -ट्वी -टु, विचक्षणः -णा -णं, कृती -तिनी -ति (न्), पेशलः -ला -लं, युक्तिमान् -मती -मत् (त्), विशारदः -दा -दं, विदग्धः -ग्धा -ग्धं, चतुरः -रा -रं; 'expert in arms,' शस्त्रकुशलः -ला -लं, शस्त्रविद् *m. f. n.*, शस्त्रज्ञः -ज्ञा -ज्ञं.

EXPERTLY, *adv.* निपुणं, चतुरं, सुप्रयोगेण, युक्त्या, सपाटवं, विज्ञवत्.

EXPERTNESS, *s.* दक्षता, दाक्ष्यं, चातुर्य्यं, चतुरता, नैपुण्यं, निपुणता, पटुत्वं, पाटवं, कौशल्यं, प्रवीणता, प्रावीण्यं, युक्तिः *f.*, सुप्रयोगः -गता, विज्ञता, अभिज्ञता, वैचक्षण्यं, योग्यता, विदग्धता, वैदग्ध्यं; 'of hand,' हस्तकौशल्यं, हस्तलाघवं, करदक्षता; 'of hands, feet, &c.,' हस्तपादादिक्षिप्रता.

EXPIABLE, *a.* शोधनीयः -या -यं, शोध्यः -ध्या -ध्यं, निष्करणीयः -या -यं, शोचनीयः -या -यं, मार्ज्जनीयः -या -यं, शमनीयः -या -यं, शम्यः -म्या -म्यं, प्रायश्चेयः -या -यं.

To EXPIATE, *v. a.* पापप्रायश्चित्तं कृ, पापनिष्कृतिं कृ, पापं निष्कृ or अपनुद् (c. 6. -नुदति -नोत्तुं) or शम् (c. 10. शमयति -यितुं) or हृ (c. 1. हरति, हर्त्तुं) or मृज् (c. 2. मार्ष्टि -र्ष्टुं), प्रायश्चित्तेन पापात् शुध् (c. 10. शोधयति -यितुं) or परिशुध् or विशुध् or मुच् (c. 6. मुञ्चति, मोक्तुं) or पू (c. 9. पुनाति, पवितुं) or पवित्रीकृ, पापकर्म्म साध् (c. 10. साधयति -यितुं); 'it is expiated,' प्रायश्चित्तीयते.

EXPIATED, *p. p.* निष्कृतः -ता -तं, शोधितः -ता -तं, मृष्टः -ष्टा -ष्टं, निर्णिक्तः -क्ता -क्तं, पवित्रीकृतः -ता -तं, पावितः -ता -तं, परिपूतः -ता -तं, शान्तः -न्ता -न्तं.

EXPIATION, *s.* प्रायश्चित्तं, निष्कृतिः *f.*, शुद्धिः *f.*, शोधनं, मुक्तिः *f.*, मोचनं, शान्तिः *f.*, उपशान्तिः *f.*, प्रतीकारः, पावनं, अपनुत्तिः *f.*, अपनोदनं, पापशोधनं, पापविशुद्धिः *f.*, पापशान्तिः *f.*, पापनिर्हरणं, अघनाशनं, पापापनुत्तिः *f.*, पापप्रक्षालनं, पापनिर्णेजनं, पापमार्जना, निर्णिक्तकर्म्मः.

EXPIATORY, *a.* शोधकः -का -कं, पावकः -का -कं, पापघ्नः -घ्नी -घ्नं, अघमर्षणः -णी -णं, अघनाशकः -का -कं, अघनाशनः -ना -नं, शमकः -का -कं, शान्तिकः -की -कं.

EXPIRATION, *s.* (Breathing out) निश्वासः, निःश्वसनं, निःश्वासः, प्रश्वासः, प्राणोद्गारः, प्राणोत्क्षेपः, प्राणत्यागः.—(Exhalation) उद्गारः.—(Cessation, close) अवसानं, अन्तं, निवृत्तिः *f.*, विरतिः *f.*, उपरमः, समाप्तिः *f.*, शेषः, पर्य्यवसानं, अत्ययः, क्षयः.

To EXPIRE, *v. a.* (Breathe out) निःश्वस् (c. 2. -श्वसिति -तुं), निश्वस्, प्रश्वस्, प्राणं or श्वासम् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or उद्गम् in caus. (-गमयति -यितुं) or निर्गम् or उदीर् (c. 10. -ईरयति -यितुं).—(Exhale) उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं), प्रवा (c. 2. -वाति -तुं), प्रमुच् (c. 6. -मुञ्चति -मोक्तुं).

To EXPIRE, *v. n.* (Breathe the last, die) प्राणत्यागं कृ, प्राणान् हा (c. 3. जहाति, हातुं) or त्यज् (c. 1. त्यजति, त्यक्तुं), श्वासत्यागं कृ, शेषप्राणं कृ, मृ (c. 6. म्रियते, मर्त्तुं), जीवनोत्सर्गं कृ, पञ्चत्वं गम् (c. 1. गच्छति, गन्तुं), नश् (c. 4. नश्यति, नशितुं).—(Close, end) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निर्वृत्, विरम् (c. 1. -रमति -रन्तुं), उपरम्, समाप् in pass. (-आप्यते), विगम्, अपया (c. 2. -याति -तुं), अवसद् (c. 1. -सीदति -सत्तुं).

EXPIRED, *p. p.* गतप्राणः -णा -णं, गतासुः -सुः -सु, उत्क्रान्तासुः -सुः -सु, परासुः -सुः -सु, प्राप्तपञ्चत्वः -त्वा -त्वं, प्रेतः -ता -तं, परेतः -ता -तं, संस्थितः -ता -तं.

EXPIRING, *part.* and *a.* कण्ठगतप्राणः -णा -णं, म्रियमाणः -णा -णं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु.—(As a lamp) निर्वास्यन् -स्यन्ती -स्यत् (त्).

To EXPLAIN, *v. a.* व्याख्या (c. 2. -ख्याति -तुं), व्यक्तीकृ, स्पष्टीकृ, व्याकृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं), प्रकाश् (c. 10. -काशयति -यितुं), स्पष्ट (nom. स्पष्टयति -यितुं), व्याह्र (c. 1. -हरति -हर्त्तुं), समुद्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, प्रबुध् (c. 10. -बोधयति -यितुं), सम्बुध्, विब्रू (c. 2. -ब्रवीति), प्रवच् (c. 2. -वक्ति -क्तुं), प्रवद् (c. 1. -वदति -दितुं), व्याचक्ष् (c. 2. -चष्टे), निरूप् (c. 10. -रूपयति -यितुं), परिशुध् (c. 10. -शोधयति -यितुं), वर्ण् (c. 10. वर्णयति -यितुं), कथ् (c. 10. कथयति -यितुं), प्रदृश् in caus. (-दर्शयति -यितुं), प्रकृत् (c. 10. -कीर्त्तयति -यितुं), विवरणं कृ.

EXPLAINABLE, *a.* व्याख्येयः -या -यं, उद्देश्यः -श्या -श्यं, प्रवक्तव्यः -व्या -व्यं.

EXPLAINED, *p. p.* व्याख्यातः -ता -तं, व्याकृतः -ता -तं, स्पष्टीकृतः -ता -तं, विवृतः -ता -तं, प्रकाशितः -ता -तं, निरूपितः -ता -तं, द्योतितः -ता -तं, वर्णितः -ता -तं.

EXPLAINER, *s.* व्याख्याता *m.* (तृ), प्रवक्ता *m.* (क्तृ), प्रकाशकः, उद्देशकः.

EXPLANATION, *s.* व्याख्या -ख्यानं, विवृतिः *f.*, विवरणं, व्याकरणं, व्याकृतिः *f.*, स्पष्टीकरणं, प्रकाशनं, उद्देशः, समुद्देशः, निरूपणं, समाधानं.

EXPLANATORY, *a.* वाचकः -का -कं, उद्देशकः -का -कं, समुद्देशकः -का -कं, व्याख्याकारी -रिणी -रि (न्), विवरणकारी &c., अर्थकथकः -का -कं, प्रकाशकः -का -कं.

EXPLETIVE, *s.* पादपूरणं, उपचारं, वाक्यालङ्कारः, पादपूरकः शब्दः.

EXPLICABLE, *a.* *See* EXPLAINABLE.

To EXPLICATE, *v. a.* विवृ (c. 5. -वृणोति -वरितुं -रीतुं), व्याख्या (c. 2. -ख्याति -तुं), प्रकटीकृ.

EXPLICATION, *s.* विवृतिः *f.*, विवरणं, व्याख्या -ख्यानं, व्यक्तीकरणं, प्रकटीकरणं.

EXPLICATIVE, *a.* विवरणार्थकः -का -कं, प्रकाशकः -का -कं, वाचकः -का -कं.

EXPLICIT, *s.* व्यक्तः -क्ता -क्तं, सुव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, सुस्पष्टः -ष्टा -ष्टं, सुप्रकाशः -शा -शं, स्पष्टार्थः -र्था -र्थं, भिन्नार्थः -र्था -र्थं, स्फुटः -टा -टं, अवक्रः -क्रा -क्रं.

Explicitly, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, सुस्पष्टं, सुप्रकाशं, स्पष्टार्थं, भिन्नार्थं, स्फुटं; 'explicitly shews,' स्पष्टयति.

Explicitness, *s.* व्यक्तत्वं -ता, सुव्यक्तता, स्पष्टता, सुस्पष्टता, सुप्रकाशता, स्पष्टार्थत्वं, भिन्नार्थत्वं, अवक्रता, वाचकता.

To explode, *v. n.* अग्निवातादिबलाद् महाशब्देन or महाशब्दपूर्व्वं विभिद् in pass. (-भिद्यते) or विदॄ in pass. (-दीर्य्यते) or स्फुट् (c. 6. स्फुटति -टितुं) or विदल् (c. 1. -दलति -लितुं).

To explode, *v. a.* (Decry with noise, shew disapprobation) उच्चैःस्वरेण निन्द् (c. 1. निन्दति -न्दितुं), कर्कशशब्देन अप्रसादं or अस्वीकारं सूच् (c. 10. सूचयति -यितुं) or अवज्ञास्पदं कृ.

Exploded, *p. p.* (Burst) महाशब्देन विदीर्णः -र्णा -र्णं or विभिन्नः -न्ना -न्नं or स्फुटितः -ता -तं, निरस्तः -स्ता -स्तं.—(Brought into disrepute) अधुनातनव्यवहारविरुद्धः -द्धा -द्धं, नूतनाचारविरुद्धः -द्धा -द्धं, अवज्ञातः -ता -तं, परिभूतः -ता -तं.

Exploit, *s.* कर्म्म *n.* (न्), महाकर्म्म *n.*, चेष्टितं, चेष्टा, विचेष्टितं, चरित्रं, प्रवृत्तिः *f.*, अद्भुतकर्म्म *n.*, आश्चर्य्यकर्म्म *n.*

Exploration, *s.* अन्वेषणा -णं, पर्य्येषणं, अनुसन्धानं, जिज्ञासा, अनुसरणं, परीक्षा -क्षणं, निरूपणं, समीक्षणं, संवीक्षणं, मार्गः -र्गणं, अनुयोगः, शोधनं.

To explore, *v. a.* अन्विष् (c. 4. -इष्यति, c. 6. -इच्छति -एषितुं -एष्टुं), अनुसन्धा (c. 3. -दधाति -धातुं), निरूप् (c. 10. -रूपयति -यितुं), ज्ञा in des. (जिज्ञासते -सितुं), मार्ग् (c. 1. मार्गति, c. 10. मार्गयति -यितुं), मृग् (c. 10. मृगयते -ति -यितुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं), निरीक्ष्, संवीक्ष्.

Explored, *p. p.* अन्वेषितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, निरूपितः -ता -तं.

Explorer, *s.* अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), अनुसन्धाता *m.* (तृ), परीक्षकः.

Explosion, *s.* महाशब्दपूर्व्वं विदारणं or स्फोटनं or स्फुटनं or अकस्माद् विभङ्गः, समहाशब्दो विदारः, आकस्मिकविदारशब्दः, आकस्मिकविभङ्गशब्दः, महाशब्दः.

Explosive, *a.* आकस्मिकविदारणकारी -रिणी -रि (न्), महाशब्दपूर्व्वविभङ्गकारी &c., महाशब्दकारी &c., विदारकः -का -कं, शीघ्रदाहः -हा -हं.

To export, *v. a.* (Goods to a foreign country) वाणिज्यद्रव्याणि or वस्तूनि विदेशे or देशान्तरे or वहिर्देशे वह् (c. 1. वहति, वोढुं or caus. वाहयति -यितुं) or आवह् or उपवह् or निर्व्विवह् or तॄ in caus. (तारयति -यितुं) or सन्तॄ in caus. or आनी (c. 1. -नयति -नेतुं or caus. -नाययति -यितुं) or उपनी or प्रेर् (c. 10. -ईरयति -यितुं).

Exportable, *a.* देशान्तरे or वहिर्देशे वाह्यः -ह्या -ह्यं or उपवाह्यः &c.

Exportation, *s.* देशान्तरे or वहिर्देशे वाहनं or उपवाहनं or अभियानं or तारणं or प्रेरणं.

Exported, *p. p.* विदेशे or वहिर्देशे वाहितः -ता -तं or तारितः -ता -तं or सन्तारितः -ता -तं or प्रेरितः -ता -तं, देशान्तरीकृतः -ता -तं.

Exports, *s. pl.* विदेशे or वहिर्देशे वाह्यानि वाणिज्यद्रव्याणि or वस्तूनि.

To expose, *v. a.* (Uncover) विवृ (c. 5. -वृणोति -णुते -वरितुं -रीतुं), अपवृ, अपावृ, उच्छद् (c. 10. -छादयति -यितुं).—(Make public) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकाशीकृ, प्रकटीकृ, व्यक्तीकृ, प्रत्यक्षीकृ, प्रादुष्कृ, आविष्कृ.—(Expose to view) प्रत्यक्षीकृ, सर्व्वदृग्गोचरं -रां -रं कृ.—(For sale) पण्यवीथिकायां प्रसृ in caus. (-सारयति -यितुं).—(Make liable) अधीनं -नां -नं कृ.—(To the air) वायुव्याप्यं -प्यां -प्यं कृ.—(To the sun) सूर्य्यव्याप्यं -प्यां -प्यं कृ. (To contempt, ridicule) अवमानास्पदं कृ, अवहासस्थानं कृ, हास्यं -स्यां -स्यं कृ.—(To danger) भयस्थानं कृ, शङ्कास्पदं कृ; 'to expose the failings of others,' परच्छिद्राणि विवृ or अपवृ.

Exposed, *p. p.* विवृतः -ता -तं, अपावृतः -ता -तं, अनावृतः -ता -तं, अनाच्छादितः -ता -तं, प्रकाशीकृतः -ता -तं, प्रकटीकृतः -ता -तं, प्रसारितः -ता -तं; 'caught out in a crime,' दृष्टदोषः -षा -षं; 'exposed to the weather,' अभ्रावकाशिकः -की -कं; 'exposed for sale,' क्रये प्रसारितः -ता -तं, क्रय्यः -य्या -य्यं, पण्यः -ण्या -ण्यं, पण्यवीथिकायां प्रसारितः -ता -तं.

Exposition, *s.* विवृतिः *f.*, विवरणं, व्याख्या -ख्यानं, स्पष्टीकरणं, प्रकाशनं, व्याकृतिः *f.*, व्याकरणं, व्यक्तीकरणं, चूर्णिकं.

Expositor, *s.* व्याख्याता *m.* (तृ), प्रकाशकः, प्रवक्ता *m.* (क्तृ), अर्थपरिशोधकः, अर्थविज्ञापकः, चूर्णिकृत् *m.*

Expository, *a.* वाचकः -का -कं, प्रकाशकः -का -कं, उद्देशकः -का -कं.

To expostulate, *v. a.* आपत्तिं कृ, अन्यायेन or असम्यक् or अनुचितं करोषि or अन्याय्यकर्म्म त्वया कृतम् इत्यादिनिन्दावाक्यैर् अकार्य्यकारिणं कञ्चिज्जनं निवृ in caus. (-वारयति -यितुं), मैवं कार्षीः or मैवं कृथाः or मैतत् त्वया करणीयम् इत्यादिवाक्यैर् अन्यायकारिणा सह विचर् (c. 10. -चारयति -यितुं) or अन्याय्यकर्म्मणः कञ्चिज्जनं निवृत् in caus. (-वर्त्तयति -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं).

Expostulation, *s.* आपत्तिः *f.*, अन्याय्यकर्म्म or असम्यक्कर्म्म or अयुक्तकर्म्म करोषि or कुकर्म्म त्वया कृतम् इत्यादिनिन्दार्थकं वाक्यं or इत्यादिवाक्यैर् अन्यायकारिणा सह विचारणं, निवर्त्तनार्थं वाक्यं, निषेधार्थकं प्रबोधवाक्यं, प्रतिवादः, प्रत्यादेशः.

Expostulatory, *a.* आपत्तिमयः -यी -यं, निन्दामयः -यी -यं, प्रत्यादेशकः -का -कं.

Exposure, *s.* विवृतिः *f.*, विवरणं, प्रकाशनं, विकाशनं, व्यक्तीकरणं, प्रकटीकरणं, प्रत्यक्षीकरणं, दृग्गोचरीकरणं, प्रसारणं; 'to the air,' वायुव्यापकत्वं.

To expound, *v. a.* व्याख्या (c. 2. -ख्याति -तुं), व्याकृ, प्रवद् (c. 1. -वदति -दितुं), प्रवच् (c. 2. -वक्ति -क्तुं), स्पष्टीकृ, व्याहृ (c. 1. -हरति -हर्त्तुं), व्याचक्ष् (c. 2. -चष्टे), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), प्रकाश् (c. 10. -काशयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), विब्रू (c. 2. -ब्रवीति).

Expounded, *p. p.* व्याख्यातः -ता -तं, व्याकृतः -ता -तं, विवृतः -ता -तं, प्रकाशितः -ता -तं, निरूपितः -ता -तं, स्पष्टीकृतः -ता -तं, व्याहृतः -ता -तं.

Expounder, *s.* व्याख्याता *m.* (तृ), प्रवक्ता *m.* (क्तृ), वक्ता *m.*, वादी *m.* (न्), प्रकाशकः, वाचकः, अर्थशोधकः; 'of the law,' धर्म्मप्रवक्ता *m.*

To express, *v. a.* (Press out) निष्पीड् (c. 10. -पीडयति -यितुं), निपीड्, निष्कृष् (c. 1. -कर्षति -क्रष्टुं), निर्हृ (c. 1. -हरति -हर्त्तुं), निर्दुह् (c. 2. -दोग्धि -ग्धुं).—(Utter, declare) वद् (c. 1. वदति -दितुं), कथ् (c. 10. कथयति -यितुं), उदाहृ (c. 1. -हरति -हर्त्तुं), व्याहृ, उच्चर् (c. 10. -चारयति -यितुं), ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा, आविद् in caus. (-वेदयति -यितुं), कॄत् (c. 10. कीर्त्तयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), बुध् (c. 10. बोधयति -यितुं).—(Represent, exhibit) सूच्, दृश् in caus. (दर्शयति -यितुं); 'by gestures, &c.,' नट् (c. 10. नाटयति -यितुं), अभिनी (c. 10. -नयति -नेतुं), रूप् (c. 10. रूपयति -यितुं); 'they express love,' शृङ्गारभावं नाटयन्ति; 'he expresses delight,' हर्षं नाटयति; 'in painting, &c.,' प्रतिरूपं कृ, प्रतिमूर्त्तिं कृ, प्रतिमानं कृ.—(Indicate) सूच्, उद्दिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, लक्ष् (c. 10. लक्षयति -यितुं).

Express, *a.* (Clear) व्यक्तः -क्ता -क्तं, सुव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, अवक्रः -क्रा -क्रं, अवक्रार्थः -र्था -र्थं, भिन्नार्थः -र्था -र्थं, असन्दिग्धार्थः -र्था -र्थं; 'in express terms,' स्पष्टार्थतस्.

Express, *s.* (Courier) वेगी *m.* (न्), प्रजवी *m.* (न्), जवी *m.*, तरस्वी *m.* (न्), जङ्घालः, त्वरितः, जवनः, जवः, धावकः, अश्वगः, वार्त्ताहरः.

Expressed, *p. p.* (In words) उक्तः -क्ता -क्तं, कथितः -ता -तं, आवेदितः -ता -तं, अभिहितः -ता -तं.—(Shewn, indicated) दर्शितः -ता -तं,

सूचितः -ता -तं.

Expressible, *a.* कथनीयः -या -यं, कथ्यः -थ्या -थ्यं, निर्वचनीयः -या -यं, आख्येयः -या -यं.—(To be pressed out) निष्कर्षणीयः -या -यं, निर्हरणीयः -या -यं.

Expression, *s.* (Declaration) वादः, कथनं, ज्ञापनं, विज्ञापनं, ख्यापनं, आवेदनं, अभिधानं, बोधनं, कीर्त्तनं, प्रवचनं.—(Utterance) उदाहरणं, व्याहरणं, उच्चारणं.—(Phrase, word) उक्तिः *f.*, वाक्यं, वचनं, उक्तं, वाक् *f.* (च्), शब्दः, अभिधेयं, वचः *n.* (स्), पदं; 'authorized expression,' आप्तोक्तिः.—(Style, manner) रीतिः *f.*, मार्गः, व्यापारः; 'style of expression,' वाग्व्यापारः.—(Feeling, tone) रसः.

Expressive, *a.* वाचकः, -का -कं, सूचकः -का -कं, उद्बोधकः -का -कं, अभिधायिकः -का -कं, उद्देशकः -का -कं, अर्थः -र्था -र्थं or अर्थकः -का -कं in comp.; as, 'expressive of tenderness,' करुणार्थकः -का -कं.—(Full of meaning) पूर्णार्थः -र्था -र्थं, अर्थवान् -वती -वत् (त्), सार्थः -र्था -र्थं, गुर्वर्थः -र्था -र्थं, साकूतः -ता -तं.

Expressively, *adv.* पूर्णार्थतस्, व्यक्तार्थतस्, सार्थं, साकूतं, सगौरवं.

Expressiveness, *s.* वाचकत्वं, पूर्णार्थत्वं, अर्थवत्त्वं, सार्थत्वं, गौरवं.

Expressly, *adv.* व्यक्तं, सुव्यक्तं, सुस्पष्टं, स्पष्टार्थतस्, व्यक्तार्थतस्, अवक्रं, असन्दिग्धार्थतस्.

To expiobate, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, कुत्स् (c. 10. कुत्सयति -यितुं), उपालभ् (c. 1. -लभते -लब्धुं), तिरस्कृ.

Exprobation, *s.* निन्दा, गर्हा, तिरस्कारः, दुर्वाक्यं, भर्त्सनवाक्यं, उपक्रोशः.

To expugn, *v. a.* दुर्गं लङ्घ् (c. 10. लङ्घयति -यितुं), विजि (c. 1. -जयते -ति -जेतुं).

Expugnable, *a.* लङ्घनीयः -या -यं, आक्रमणीयः -या -यं, विजेतव्यः -व्या -व्यं.

Expugnation, *s.* दुर्गलङ्घनं, दुर्गाक्रमणं, विजयः, जयः.

Expulsion, *s.* अपसारणं, निःसारणं, निरसनं, निराकरणं, अपनोदः -दनं, निर्वासनं, विवासनं, प्रवासनं, प्रव्राजनं, वहिष्करणं, निष्कासनं, निःकासनं, प्रयापणं.—(The state) प्रवासः, विवासः.

Expulsive, *a.* अपनोदनः -ना -नं, निरसनः -ना -नं, निराकरिष्णुः -ष्णुः -ष्णु.

Expunction, *s.* लोपः, विलोपः -पनं, उच्छेदः, अपमार्जना, व्यामर्षः, विनाशः.

To expunge, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोपयति -यितुं), विलुप्, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), व्यामृज् (c. 2. -मार्ष्टि -र्ष्टुं), अपमृज्, उन्मृज्, व्यामृश् (c. 6. -मृशति -म्रष्टुं), विनश् in caus. (-नाशयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं).

Expunged, *p. p.* उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं, व्यामृष्टः -ष्टा -ष्टं, उद्धृतः -ता -तं.

To expurgate, *v. a.* शुध् (c. 10. शोधयति -यितुं), विशुध्, पू (c. 9. पुनाति -नीते, पवितुं), विपू, परिपू, निर्म्मलीकृ, मलं हृ (c. 1. हरति, हर्त्तुं), पवित्रीकृ, शुचीकृ, परिष्कृ.

Expurgated, *p. p.* विशोधितः -ता -तं, पावितः -ता -तं, पवित्रीकृतः -ता -तं.

Expurgation, *s.* शोधनं, विशोधनं, पावनं, पवित्रीकरणं, मलापकर्षणं, निर्म्मलीकरणं, परिष्करणं.

Expurgatory, *a.* शोधकः -का -कं, पावकः -का -कं, पावनः -ना -नं.

Exquisite, *a.* (Choice) उत्तमः -मा -मं, शिष्टः -ष्टा -ष्टं, विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं.—(Nice, accurate) सूक्ष्मः -क्ष्मा -क्ष्मं, समञ्जसः -सा -सं, शुद्धः -द्धा -द्धं.—(Highest) परमः -मा -मं, उत्तमः -मा -मं; 'exquisite delight,' परमानन्दः, परमहर्षः, रोमहर्षणं, पुलकः; 'causing exquisite pleasure,' परमानन्ददः -दा -दं, हृषितस्रुद् *m. f. n.*—(Keen) तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं; 'exquisite pain,' तीव्रवेदना.

Exquisitely, *adv.* (Nicely) सूक्ष्मं, सूक्ष्मत्वेन, ससौक्ष्म्यं, अञ्जसा.—(In a high degree) परमं, उत्तमं; 'exquisitely delighted,' परमहृष्टः -ष्टा -ष्टं, पुलकितः -ता -तं, हर्षरोमाञ्चितः -ता -तं.

Exquisiteness, *s.* (Nicety) सूक्ष्मता, सौक्ष्म्यं, सामञ्जस्यं.—(Keenness) तीक्ष्णता, तैक्ष्ण्यं, तीव्रता.—(Choiceness) उत्तमता, उत्कृष्टता.

To exsiccate, *v. a.* शुष् in caus. (शोषयति -यितुं), उच्छुष्, विशुष्.

Exsiccation, *s.* शोषः -षणं, उच्छोषणं, परिशोषः, विशोषणं, नीरसीकरणं.

Exsiccant, exsiccative, *a.* शोषकः -का -कं, उच्छोषणः -णी -णं, विशोषणः -णी -णं.

Exspuition, *s.* निष्ठीवः -वनं, निष्ठेवनं, श्लेष्मनिरसनं, उद्गिरणं.

Extant, *a.* (Protruding) वहिःस्थः -स्था -स्थं, वहिर्भूतः -ता -तं.—(In existence) विद्यमानः -ना -नं, वर्त्तमानः -ना -नं, प्रकाशः -शा -शं.

Extasy, extatic. *See* Ecstacy, ecstatic.

Extemporaneous, extemporary, *a.* अचिन्तापूर्व्वः -र्व्वा -र्व्वं, अपूर्व्वचिन्तः -न्ता -न्तं, अचिन्तितः -ता -तं, अयत्नपूर्व्वः -र्व्वा -र्व्वं, अयत्नकृतः -ता -तं, अयत्नभृतः -ता -तं, आकस्मिकः -की -कं, अविचारितः -ता -तं, अकल्पितः -ता -तं, अध्यानपूर्व्वः -र्व्वा -र्व्वं, प्रस्तुतः -ता -तं, समयोपयुक्तः -क्ता -क्तं, प्रस्तावयोग्यः -ग्या -ग्यं.

Extempore, *adv.* पूर्व्वचिन्तां or पूर्व्वयत्नम् अकृत्वा, चिन्तां विना, पूर्व्वध्यानं विना, अचिन्तितं, अविचारितं, अनायासेन, द्रुतं.

To extemporize, *v. n.* पूर्व्वचिन्ताम् अकृत्वा वद् (c. 1. वदति -दितुं), अकस्मात् or पूर्व्वविचारं विना वद्.

To extend, *v. a.* तन् (c. 8. तनोति -नितुं), वितन्, व्यातन्, प्रतन्, विततीकृ, प्रसृ in caus. (-सारयति -यितुं), अतिसृ, विसृ; विस्तृ or विस्तॄ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं -रीतुं, c. 10. -स्तारयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), आयम (c. 1. -यच्छति -यन्तुं), प्रपञ्च् (c. 10. -पञ्चयति -यितुं), प्रचर् [illegible] -चारयति -यितुं).—(Extend the hand, &c.) हस्तं प्रसृ in caus. or प्रग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(Enlarge) वृध् in caus. [illegible] -यितुं), संवृध्, विवृध्, विशालीकृ, विपुलीकृ, प्रचुरतरं [illegible].—(Grant, impart) दा (c. 3. ददाति, दातुं), प्रदा, अनुदा, प्रयम्.—(Prolong) द्राघ (nom. द्राघयति -यितुं), दीर्घीकृ, दीर्घतरं -रां -रं कृ.

To extend, *v. n.* तन् in pass. (तन्यते), वितन्, विततीभू, प्रसृ (c. 1. -सरति -सर्त्तुं), प्रसृप् (c. 1. -सर्पति -सर्प्तुं), विसृप्, आया (c. 2. -याति -तुं), आयम (c. 1. -यच्छते -यन्तुं), प्रथ (c. 1. प्रथते -थितुं), विप्रथ्, प्ररुह् (c. 1. -रोहति -रोढुं), विरुह्, विस्तॄ in pass. (-स्तीर्य्यते), व्याप् (c. 5. -आप्नोति -आप्तुं), विप्रस्था (c. 1. -तिष्ठति -स्थातुं), प्रवृध् (c. 1. -वर्धते -र्धितुं), विजृम्भ् (c. 1. -जृम्भते -म्भितुं).

Extended, *p. p.* विततः -ता -तं, प्रविततः -ता -तं, आततः -ता -तं, सन्ततः -ता -तं, आयतः -ता -तं, समायतः -ता -तं, आयामितः -ता -तं, व्यायतः -ता -तं, प्रथितः -ता -तं, प्रसारितः -ता -तं, प्रसृतः -ता -तं, विसृतः -ता -तं, विस्तृतः -ता -तं, विस्तीर्णः -र्णा -र्णं, बहुविस्तीर्णः -र्णा -र्णं, आयतिमान् -मती -मत् (त्), विरूढः -ढा -ढं, प्ररूढः -ढा -ढं, प्रवृद्धः -द्धा -द्धं, परिगतः -ता -तं, विजृम्भितः -ता -तं.—(As the hand, &c.) प्रसारितः -ता -तं, उच्छ्रितः -ता -तं; 'having the fingers extended,' उत्थिताङ्गुलिः -लिः -लि.

Extendible, extensible, *a.* विस्तारयितुं or विततिनितुं शक्यः -क्या -क्यं, विस्तारणीयः -या -यं, प्रसारणीयः -या -यं, विस्तारणक्षमः -मा -मं, आयाम्यः -म्या -म्यं.

Extensibility, *s.* विस्तारणीयता, विततिक्षमता, आयाम्यता.

Extension, *s.* विस्तारः, विस्तृतिः *f.*, विस्तीर्णता, विस्तरः, विततिः *f.*, प्रततिः *f.*, आयतिः *f.*, आयामः, वितानः -नं, तानः, सन्ततिः *f.*, प्रसारणं, प्रसरणं, प्रसरः, विसरणं, प्रसर्पणं, विसर्पणं, प्रपञ्चः, व्याप्तिः *f.*, व्यापनं, वृद्धिः *f.*,

प्रवृद्धिः *f.*, प्रपञ्चः, आमः, विपुलता.

EXTENSIVE, *a.* विस्तीर्णः -र्णा -र्णं, विपुलः -ला -लं, विशालः -ला -लं, सुपर्य्याप्तः -प्ता -प्तं, बृहन् -हती -हत् (त्), पृथुः -थ्वी -थु, पृथुलः -ला -लं, प्रचुरः -रा -रं, विकटः -टा -टं, आयतः -ता -तं, आयतिमान् -मती -मत् (त्), असम्बाधः -धा -धं, अल्पनः -ना -नं.

EXTENSIVELY, *adv.* सुविस्तीर्णं, सुविस्तरं, सुविस्तरेण, विस्तरशस्, अतिमात्रं, विपुलं, प्रचुरं, सामान्यतस्.

EXTENSIVENESS, *s.* विस्तीर्णता, विस्तारः, विस्तृतिः *f.*, विपुलता, विशालता, पृथुत्वं, बृहत्त्वं, परिसरः, आयतिः *f.*, व्याप्तिः *f.*, व्यापकत्वं.

EXTENT, *s.* (Bulk, width, length) विस्तारः, विशालता, विपुलता, बृहत्त्वं, आयतिः *f.*, आयामः, प्रपञ्चः, सन्ततिः *f.*, वितानकं, पाटः.—(Compass) परिमाणं, परिणाहः, परिसरः, परिधिः *m.*—(Degree, measure) मात्रं, परिमाणं, प्रमाणं, मानं.—(Limit) पर्य्यन्तं.—(Range) विषयः; 'to what extent?' कियत्पर्य्यन्तं, किम्पर्य्यन्तं, कियत्प्रमाणं; 'to such extent,' एतावत्; 'such an extent,' एतावत्त्वं; 'to a slight extent,' ईषत्, किञ्चित्, स्वल्पमात्रं, स्तोकं.

To EXTENUATE, *v. a.* (Lessen) न्यूनीकृ, न्यून् (c. 10. -ऊनयति -यितुं), लघ (nom. लघयति -यितुं), कन (nom. कनयति -यितुं), अल्पीकृ, क्षीणीकृ, ह्रस् (c. 10. ह्रासयति -यितुं).—(A crime) शम् (c. 10. शमयति -यितुं), उपशम्, पापापनुत्तिं कृ, पापक्षालनं कृ.

EXTENUATED, *p. p.* उपशान्तः -न्ता -न्तं, शमितः -ता -तं, न्यूनीकृतः -ता -तं.

EXTENUATION, *s.* पापोपशान्तिः *f.*, पापशान्तिः *f.*, उपशमः, पापापनोदनं, पापापनुत्तिः *f.*, पापमार्जना, पापप्रक्षालनं, पापापेक्षा.

EXTERIOR, *a.* बाह्यः -ह्या -ह्यं, बाह्लीकः -का -कं, बहिःस्थः -स्था -स्थं, बहिर्भूतः -ता -तं, बहिर्भवः -वा -वं, बहिस् in comp.; as, 'an exterior object,' बहिरङ्गः.

EXTERIOR, *s.* बहिर्भागः, बाह्यभागः, बहिर्भावः, उपरिस्थभागः.

To EXTERMINATE, *v. a.* उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), समूलं or आमूलम् उद्धृ (c. 1. -हरति -हर्त्तुं) or समुद्धृ or उत्पट् (c. 10. -पाटयति -यितुं), उन्मूल् (c. 10. -मूलयति -यितुं), नश् in caus. (नाशयति -यितुं), विनश्.

EXTERMINATED, *p. p.* उच्छिन्नः -न्ना -न्नं, विनाशितः -ता -तं, उद्धृतः -ता -तं, उत्पाटितः -ता -तं, उन्मूलितः -ता -तं, सादितः -ता -तं.

EXTERMINATION, *s.* उच्छेदः, समुच्छेदः, उच्छित्तिः *f.*, सर्व्वनाशः, उद्धरणं, समूलोत्पाटनं, मूलादुद्धरणं, उन्मूलनं, समूलघातं, विनाशः, प्रलयः, लोपः, शोधनं.

EXTERMINATOR, *s.* उद्धर्त्ता *m.* (र्त्तृ), विनाशकः, उच्छेदी *m.* (न्).

EXTERMINATORY, *a.* उच्छेदी -दिनी -दि (न्), सर्व्वनाशकः -का -कं.

EXTERNAL, *a.* बाह्यः -ह्या -ह्यं, बाह्लीकः -का -कं, बहिःस्थः -स्था -स्थं, बहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), बहिर्भूतः -ता -तं, बहिर्भवः -वा -वं, बहिस् in comp.; as, 'an external part,' बहिरङ्गः.

EXTERNALLY, *adv.* बाह्यतस्, बहिस्, बहिर्भागे, उपरिभागे; 'produced externally,' बहिर्भवः -वा -वं.

EXTINCT, *a.* (Extinguished) शान्तः -न्ता -न्तं, शमितः -ता -तं, निर्वाणः -णा -णं.—(Abolished, at an end) नष्टः -ष्टा -ष्टं, विनष्टः -ष्टा -ष्टं, निवृत्तः -त्ता -त्तं, निर्वृत्तः -त्ता -त्तं, विगतः -ता -तं, निर्गतः -ता -तं, अवसितः -ता -तं, अवसन्नः -न्ना -न्नं, क्षीणः -णा -णं, परिक्षीणः -णा -णं, उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं; 'becomes extinct,' शाम्यति.

EXTINCTION, EXTINGUISHMENT, *s.* (Quenching) निर्वाणं, निर्वापणं, शान्तिः *f.*—(Abolition, destruction) नाशः, विनाशः, प्रणाशः, उच्छेदः, समुच्छेदः, उद्धरणं, लोपः, विलोपनं, क्षयः, संहारः; 'of race,' निर्वंशः.

To EXTINGUISH, *v. a.* (Quench) निर्वा in caus. (-वापयति -यितुं), शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्.—(Destroy, put an end to) नश् in caus. (नाशयति -यितुं), विनश्, निवृत् in caus. (-वर्त्तयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), निर्दह् (c. 1. -दहति -दग्धुं), लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोपयति -यितुं), सद् in caus. (सादयति -यितुं); 'to be extinguished,' शम् (c. 4. शाम्यति, शमितुं), निर्वा (c. 4. -वायति).

EXTINGUISHABLE, *a.* शाम्यः -म्या -म्यं, शमनीयः -या -यं, निर्वाप्यः -प्या -प्यं, निर्वापणीयः -या -यं, नाश्यः -श्या -श्यं, नाशनीयः -या -यं, विलोपनीयः -या -यं.

EXTINGUISHED, *p. p.* (Quenched) निर्वाणः -णा -णं, निर्वापितः -ता -तं, शान्तः -न्ता -न्तं, संशान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः -ता -तं, शान्ताग्निः -ग्निः -ग्नि, शान्तार्च्चिः -र्च्चिः -र्च्चि.—(Destroyed) नष्टः -ष्टा -ष्टं, विनष्टः -ष्टा -ष्टं.

EXTINGUISHER, *s.* निर्वापकः, निर्वाणकारी *m.* (न्).—(Of a candle) दीपनिर्वापकः.

To EXTIRPATE, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, मूलात् or समूलम् उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उत्पट् (c. 10. -पाटयति -यितुं), व्यपरुह् in caus. (-रोपयति -यितुं), उद्बृह् (c. 6. -बृहति -बर्हितुं), निष्कुष् (c. 9. -कुष्णाति -कोष्टुं).

EXTIRPATED, *p. p.* उन्मूलितः -ता -तं, उत्पाटितः -ता -तं, उच्छिन्नः -न्ना -न्नं, उद्धृतः -ता -तं, व्यपरोपितः -ता -तं, आवर्हितः -ता -तं, आवहितः -ता -तं, निष्कुषितः -ता -तं, निर्वीजः -जा -जं.

EXTIRPATION, *s.* उन्मूलनं, उत्पाटनं, उच्छेदः, उद्धरणं, समूलोत्पाटनं, समूलोद्धरणं, उच्छित्तिः *f.*, व्यपरोपणं, निष्कोषणं, नाशः, विनाशः.

EXTIRPATOR, *s.* उद्धर्त्ता *m.* (र्त्तृ), उन्मूलयिता *m.* (तृ), उच्छेदी *m.* (न्).

To EXTOL, *v. a.* प्रशंस् (c. 1. -शंसति -सितुं), अभिप्रशंस्, स्तु (c. 2. स्तौति, स्तोतुं), अभिष्टु, संस्तु, विष्टु, परिसंस्तु, श्लाघ् (c. 1. श्लाघते -घितुं, c. 10. श्लाघयति -यितुं), कॄत् (c. 10. कीर्त्तयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), विख्या (c. 2. -ख्याति -तुं), प्रख्या.

EXTOLLED, *p. p.* प्रशंसितः -ता -तं, कीर्त्तितः -ता -तं, अभिष्टुतः -ता -तं.

EXTOLLER, *s.* प्रशंसकः, कीर्त्तयिता *m.* (तृ), अनुकीर्त्तनकृत् *m.*, श्लाघकः.

EXTORSIVE, *a.* बाधकः -का -कं, उपद्रवी -विणी -वि (न्), सबाधः -धा -धं.

To EXTORT, *v. a.* and *n.* बलात् or बलेन ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), अन्यायेन आदा (c. 3. -दत्ते -ददाति -दातुं), दा in caus. (दापयति -यितुं), विहा in caus. (-हापयति -यितुं), आहृ in caus. (-हारयति -यितुं), बाध् (c. 1. बाधते -धितुं), परिबाध्, उपधिं कृ.

EXTORTED, *p. p.* बलाद्गृहीतः -ता -तं, दापितः -ता -तं, विहापितः -ता -तं.

EXTORTER, EXTORTIONER, *s.* अन्यायेन परस्वादायी *m.* (न्), बलेन परस्वग्राहकः, बाधकः, उपद्रवी *m.* (न्), उपधिकः, औपधिकः, दुर्वृत्तः, दुरात्मा *m.* (न्), दस्युः *m.*, लोठयिता *m.* (तृ).

EXTORTION, *s.* अन्यायेन or बलेन परस्वग्रहणं, बाधः -धनं, उपद्रवः, विप्लवः, अभिद्रोहः, उपधिकरणं, उपधिः *m.*, बलात्कारः, निठुरता, दौरात्म्यं, हठः.

EXTRA, *s.* अधिकं, आधिक्यं, आतिरेक्यं, अति in comp.—(Beyond the usual quantity) अधिकः -का -कं, अतिरिक्तः -क्ता -क्तं, निरूपितपरिमाणातिरिक्तः -क्ता -क्तं.

To EXTRACT, *v. a.* निष्कृष् (c. 1. -कर्षति -क्रष्टुं), उत्कृष्, आकृष्; उद्धृ (c. 1. -हरति -हर्त्तुं), निर्हृ, उद्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), निर्दुह् (c. 2. -दोग्धि -दुग्धुं), निष्कुष् (c. 9. -कुष्णाति -कोष्टुं), उत्खन् (c. 1. -खनति -नितुं), उद्बृह् (c. 6. -बृहति -बर्हितुं), उत्पद् in caus. (-पादयति -यितुं), निर्गम् in caus. (-गमयति -यितुं); 'the teeth,' दन्तान् उद्धृ.

EXTRACT, *s.* (That which is extracted) उद्धृतं, उद्धारः, निष्कर्षः,

चूर्णि: *m.*—(Essence) रस:, निर्यास:, निर्यूह:, कषाय:, अवलेह:; 'of flowers,' पुष्पनिर्यास:.—(Epitome) सङ्ग्रह:, सार:, संक्षेप:.

Extracted, *p. p.* उद्धृत: -ता -तं, निष्कर्षित: -ता -तं, निर्हृत: -ता -तं, निष्कुषित: -ता -तं, निर्गत: -ता -तं, उद्गृहीत: -ता -तं, व्यवस्थित: -ता -तं; 'having the teeth extracted,' उद्धृतदंष्ट्र: -ष्ट्रा -ष्ट्रं.

Extraction, *s.* उद्धार:, निर्हार:, निष्कर्षणं, अभ्यवकर्षणं, आकर्षणं, निष्कोषणं, व्यवस्थिति: *f.*—(Birth, lineage) जन्म *n.* (न्), जाति: *f.*, उत्पत्ति: *f.*, उद्भव:, सम्भव:, वंश:, कुलं; 'of high extraction,' महाकुल: -ला -लं; 'of royal extraction,' राजवंश्य: -श्या -श्यं.

Extra-judicial, *a.* व्यवहारविधिबहिर्भूत: -ता -तं, व्यवहारबाह्य: -ह्या -ह्यं, व्यवहारातिरिक्त: -क्ता -क्तं, व्यवहारातिचर: -रा -रं, व्यवहारातिक्रान्त: -न्ता -न्तं.

Extra-judicially, *adv.* व्यवहारविधिव्यतिरेकेण, व्यवहारम् अतिक्रम्य.

Extra-mundane, *a.* लोकबहिर्भूत: -ता -तं, लोकबाह्य: -ह्या -ह्यं, अतिसंसार: -रा -रं, अलौकिक: -की -कं, असांसारिक: -की -कं.

Extraneous, *a.* बाह्य: -ह्या -ह्यं, बाहीक: -का -कं, बहिर्भव: -वा -वं, बहिर्भूत: -ता -तं, बहि:स्थ: -स्था -स्थं, भिन्न: -न्ना -न्नं, विभिन्न: -न्ना -न्नं, अन्य: -न्या -न्यत्, पर: -रा -रं, विविक्त: -क्ता -क्तं, असहज: -जा -जं, असम्बन्धी -न्धिनी -न्धि (न्), विदेशीय: -या -यं.

Extraordinarily, *adv.* अपूर्वप्रकारेण, अद्भुतप्रकारेण, अद्भुतं, असाधारणेन, वैलक्षण्येन, विचित्रं, आश्चर्यप्रकारेण, अप्रसिद्धं.

Extraordinariness, *s.* अद्भुतत्वं, आश्चर्यत्वं, अपूर्वत्वं, अप्रसिद्धत्वं, वैलक्ष्यं, वैलक्षण्यं, असाधारण्यं, विचित्रता.

Extraordinary, *a.* अपूर्व: -र्वा -र्वं, अदृष्टपूर्व: -र्वा -र्वं, असाधारण: -णी -णं, असामान्य: -न्या -न्यं, अप्रसिद्ध: -द्धा -द्धं, आश्चर्य: -र्या -र्यं, महाद्भुत: -ता -तं, अद्भुत: -ता -तं, अप्राकृत: -ता -तं, विचित्र: -त्रा -त्रं, विलक्षण: -णा -णं, अधिक: -का -कं, लोकोत्तर: -रा -रं, अधिकोत्तर: -रा -रं, विरल: -ला -लं.

Extravagance, *s.* (In expenditure) अतिव्यय:, अपव्यय:, महान् व्यय:, धनव्यय:, धनोत्सर्ग:, अर्थोत्सर्ग:, धनमोक्षणं, अर्थदूषणं, व्ययापरिमितता.—(Excess in general) अतिक्रम:, उत्क्रम:, मर्यादातिक्रम:, नियमातिक्रम:, अमर्यादा, अपरिमितता, अत्यय:, अत्याचार:, व्यभिचार:.

Extravagant, *a.* (Prodigal) अतिव्ययी -यिनी -यि (न्), अपव्ययी &c., व्ययशील: -ला -लं, अपरिमितव्यय: -या -यं, अर्थघ्न: -घ्नी -घ्नं, धनापचेता -त्री -तृ (तृ), मुक्तहस्त: -स्ता -स्तं.—(Exceeding bounds) मर्यादातिक्रमी -मिणी -मि (न्), अतिक्रान्तमर्याद: -दा -दं, उत्क्रान्तमर्याद: -दा -दं, अमर्याद: -दा -दं, अतिमर्याद: -दा -दं, अपरिमित: -ता -तं, अत्याचारी -रिणी -रि (न्), व्यभिचारी -रिणी -रि (न्).

Extravagantly, *adv.* (Prodigally) अतिव्ययेन, महाव्ययेन, मुक्तहस्तेन.—(Beyond all bounds) अतिमर्यादं, अत्यन्तं, अतिमात्रं, अतिशयेन, अपरिमितं.

To Extravagate, *v. a.* मर्यादाम् अतिक्रम् (c. 1. -क्रामति -क्रमितुं), उत्क्रम्, व्युत्क्रम्.

Extravagation, *s.* मर्यादातिक्रम:, नियमातिक्रम:, उत्क्रम:, उल्लङ्घनं.

Extravasated, *a.* नाडिबहिर्भूत: -ता -तं, नाडिबहिष्कृत: -ता -तं, शिराबहिर्गत: -ता -तं.

Extravasation, *s.* नाडिबहिष्करणं, रक्तोत्सर्ग:, रक्तमोक्षणं.

Extreme, *a.* (Outermost) बाह्य: -ह्या -ह्यं.—(Greatest, utmost) परम: -मा -मं, महान् -हती -हत् (त्), अत्यन्त: -न्ता -न्तं, आत्यन्तिक: -की -कं, उत्तम: -मा -मं, पर: -रा -रं, अतिशय or अति prefixed; as, 'extreme pain,' अतिव्यथा.—(Last) अन्त्य: -न्त्या -न्त्यं, अन्तिम: -मा -मं, अन्त or शेष in comp.; 'extreme part,' शेषभाग:; 'extreme limit,' परमावधि: *m.*

Extreme, *s.* अन्त: -न्तं, पर्यन्तं, पार: -रं, उत्तमावधि: *m.*, परमावधि: *m.*, शेषभाग:.—(Excess) अत्यन्तता, आधिक्यं, आतिशय्यं.

Extremely, *adv.* अत्यन्तं, अतिशयेन, अतिमात्रं, नितान्तं, अत्यर्थं, एकान्तं -न्ततस्, परमं, परं, अतीव, बहु, अति or अतिशय prefixed; as 'extremely passionate,' अत्यन्तकोपन: -ना -नं.

Extremity, *s.* (Utmost point) अन्त: -न्तं, अग्रं, अग्रभाग:, पर्यन्तं, प्रान्त:, सीमा, अवधि: *m.*, पार: -रं, उत्तमावधि: *m.*, परमावधि: *m.*, शेषावधि: *m.*, शेषभाग:; 'the lower extremities,' अध:काय:, शरीरस्य अधोभाग:.—(Utmost distress) अतिकृच्छ्रं, अत्यन्तक्लेश:, अत्यन्तदु:खं.

Extricable, *a.* उद्धरणीय: -या -यं, उद्धार्य: -र्या -र्यं, मोचनीय: -या -यं.

To Extricate, *v. a.* उद्धृ (c. 1. -हरति -हर्तुं), समुद्धृ, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, प्रविमुच्, उत्तॄ in caus. (-तारयति -यितुं), निस्तॄ, सन्तॄ; मोक्ष् (c. 10. मोक्षयति -यितुं), त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै, रक्ष् (c. 1. रक्षति -क्षितुं), विशुध् (c. 10. -शोधयति -यितुं).

Extricated, *p. p.* उद्धृत: -ता -तं, समुद्धृत: -ता -तं, उत्तीर्ण: -र्णा -र्णं, निस्तारित: -ता -तं, तारित: -ता -तं, मुक्त: -क्ता -क्तं, मोचित: -ता -तं, त्राण: -णा -णं.

Extrication, *s.* उद्धार:, उद्धरणं, समुद्धरणं, मुक्ति: *f.*, मोचनं, विमोचनं, मोक्ष: -क्षणं, रक्षा, परिरक्षणं, त्राणं, निस्तार:, निस्तरणं, उत्तार:, उत्तरणं, तारणं, विशोधनं, शुद्धि: *f.*

Extrinsic, extrinsical, *a.* बाह्य: -ह्या -ह्यं, बाहीक: -का -कं, बहि:स्थ: -स्था -स्थं, बहिर्भव: -वा -वं, असहज: -जा -जं, असम्बन्धी -न्धिनी -न्धि (न्).

Extrinsically, *adv.* बाह्यतस्, बहिस्, बहिर्भागे, अनभ्यन्तरात्.

To Extrude, *v. a.* बहिष्कृ, निरस् (c. 4. -अस्यति -असितुं), उत्सृ (c. 10. -सारयति -यितुं).

Extrusion, *s.* बहिष्करणं, नि:सारणं, अपसारणं, उत्सारणं, निरसनं.

Extuberance, *s.* अधिमांसं, स्फोट:, ग्रन्थि:, गण्ड:, उन्नभाग:.

Exuberance, *s.* समृद्धि: *f.*, सामग्र्यं, परिपूर्णता, बाहुल्यं, बहुत्वं, प्राचुर्यं, स्फीति: *f.*, स्फाति: *f.*, उत्सेक:, उद्रेक:, उपचय:, वृद्धि: *f.*, आधिक्यं.

Exuberant, *a.* समृद्ध: -द्धा -द्धं, बहुल: -ला -लं, परिपूर्ण: -र्णा -र्णं, प्रचुर: -रा -रं, वर्धिष्णु: -ष्णु: -ष्णु, स्फीत: -ता -तं, उत्सिक्त: -क्ता -क्तं, उद्रिक्त: -क्ता -क्तं, पीन: -ना -नं, पुष्कल: -ला -लं, अतिरिक्त: -क्ता -क्तं, उपचित: -ता -तं.

Exuberantly, *adv.* बाहुल्येन, बहुशस्, प्रचुरं, पुष्कलं, उद्रेकेण.

To Exuberate, *v. n.* बहुलीभू, प्ररुह्, समृध् (c. 5. -ऋध्नोति -अर्धितुं).

Exudation, *s.* स्वेद:, प्रस्वेद:, स्वेदजलस्राव:, स्वेदबिन्दुस्राव:, रस:, रसस्राव:, स्यन्दनं, स्रव: -वणं, प्रस्रवणं, स्राव:, निर्यास:, सुति: *f.*, घर्मपय: *n.* (स्), कषाय:, वेष्टक:.

To Exude, *v. n.* स्विद् (c. 4. स्विद्यति, स्वेत्तुं), प्रस्विद्, स्वेदवत् प्रस्रु (c. 1. -स्रवति -स्रोतुं) or स्यन्द् (c. 1. स्यन्दते -न्दितुं).

To Exude, *v. a.* स्वेदं प्रस्रु in caus. (-स्रावयति -यितुं) or नि:सृ in caus. (-सारयति -यितुं).

Exuded, *p. p.* प्रस्रुत: -ता -तं, स्यन्न: -न्ना -न्नं, नि:सृत: -ता -तं, निर्गत: -ता -तं.

To Exulcerate, *v. a.* व्रणीकृ, व्रणं or क्षतं कृ or उत्पद् in caus. (-पादयति -यितुं).

Exulceration, *s.* व्रणकरणं, क्षतकरणं, व्रणोत्पत्ति: *f.*, व्रणोत्पादनं.

To Exult, *v. n.* अत्यन्तं or अतिशयेन नन्द् (c. 1. नन्दति -न्दितुं) or आनन्द् or हृष् (c. 4. हृष्यति, हर्षितुं) or ह्लाद् (c. 1. ह्लादते -दितुं), उल्लस् (c. 1. -लसति -सितुं), परमहर्षम् इ (c. 2. एति -तुं), मद् (c. 4. माद्यति, मदितुं).

Exultation, *s.* परमानन्द:, परमहर्ष:, परमाह्लाद:, अत्यन्ताह्लाद:, माद:, अत्यानन्द:, महोत्सव:.

Exulting, *a.* परमहृष्टः -ष्टा -ष्टं, उल्लसितः -ता -तं, अत्यानन्दी -न्दिनी -न्दि (न्), सगर्व्वः -र्व्वा -र्व्वं, सदर्पः -र्पा -र्पं.

Exuperable, *a.* लङ्घनीयः -या -यं, अधिगम्यः -म्या -म्यं, अतिक्रमणीयः -या -यं.

Exustion, *s.* निर्दाहः, निर्दहनं, परिदहनं, भस्मसात्करणं.

Eye, *s.* चक्षुः *n.* (स्), नयनं, लोचनं, नेत्रं, विलोचनं, अक्षि *n.*, ईक्षणं, प्रेक्षणं, दृष्टिः *f.*, दृक् *f.* (श्), दृशा, दृशिः *f.*, अक्षं, देवदीपः, विश्वङ्करः; 'pupil of the eye,' तारका, कनीनिका; 'corner of the eye,' अपाङ्गः, नयनोपान्तः; 'mind's eye,' ज्ञानचक्षुः *n.* (स्), ज्ञानदृष्टिः *f.*; 'evil-eye,' कुदृष्टिः *f.*; 'long eyes,' आकर्णलोचने; 'having good eyes,' सुलोचनः -ना -नी -नं, वामलोचनः -ना -नं, स्वक्षः -क्षी -क्षं: 'having large eyes,' फुल्लनयनः -ना -नी -नं, फुल्ललोचनः -ना -नी -नं; 'having sharp eyes,' सूक्ष्माक्षः -क्षी -क्षं; 'having red eyes,' अरुणेक्षणः -णा -णं; 'doing what is right in one's own eyes,' स्वेच्छाचारी -रिणी -रि (न्); 'before one's eyes,' प्रत्यक्षे, प्रत्यक्षेण, प्रत्यक्षतस्, समक्षं, साक्षात्, पश्यतस् ind. or expressed by the pres. part. of दृश्; as, 'he steals my goods before my eyes,' पश्यतो मम द्रव्याणि हरति; 'visible to the eye,' चक्षुर्ग्राह्यः -ह्या -ह्यं, दृष्टिगोचरः -रा -रं; 'with one's own eye,' स्वचक्षुषा; 'glance of the eye,' दृष्टिपातः, नयनपातः; 'in my eyes,' मां प्रति.—(View, regard) दृष्टिः *f.*, दर्शनं, प्रेक्षितं, वीक्षितं, निरीक्षा.—(Aperture) छिद्रं, रन्ध्रं; 'eye of a needle,' सूचीछिद्रं, सूचिरन्ध्रं.—(Catch for a book) कुडुपः.—(Bud) मुकुलं, कुड्मलं, जालकं.

To eye, *v. a.* निरीक्ष् (c. 1. -ईक्षते -क्षितुं), आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं); 'to eye askance,' कटाक्षेण or अपाङ्गेन दृश् (c. 1. पश्यति, द्रष्टुं) or अवेक्ष्.

Eye-ball, *s.* तारा, चक्षुःपिण्डः, नेत्रपिण्डः, नेत्रकोषः -षं, अक्षिगोलः, अक्षिकूटकः, विडालः; 'of an elephant,' इषीका.

Eye-beam, *s.* (Glance) नयनपातः, दृष्टिपातः, दृष्टिनिपातः, दृष्टिबाणः.

Eye-brow, *s.* भ्रूः *f.*, भ्रूलता, कोदण्डः, चक्षुर्भ्रूः *f.*; 'the two eye-brows,' भ्रुवौ du.; 'space between them,' कूर्च्चः, भ्रुवोर्मध्यं; 'wrinkled eye-brow,' लोचकः.

Eyed, *p. p.* and *a.* (Viewed) निरीक्षितः -ता -तं, आलोकितः -ता -तं; 'eyed askance,' कटाक्षितः -ता -तं.—(Having eyes) used in comp.; as, 'black-eyed,' कृष्णनयनः -नी -नं, असितनयनः -नी -नं, नीलाक्षः -क्षी -क्षं; 'fiery-eyed,' ज्वलितनयनः -नी -नं: 'one-eyed,' एकाक्षः -क्षा -क्षं, काणः -णा -णं, एकाक्षिविकलः -ला -लं.

Eye-drop, *s.* वाष्पविन्दुः *m.*, नयनविन्दुः, अश्रुविन्दुः, नेत्रजलं, नेत्राम्बु *n.*, नेत्रजं, नयनसलिलं, नयनवारि *n.* अश्रु *n.*

Eye-glass, *s.* उपनेत्रं, उपनयनं, सुलोचनं —(Lens) दीप्तोपलः, अर्काश्मा *m.* (न्).

Eye-lash, *s.* पक्ष्म *n.* (न्), अक्षिपक्ष्म *n.*, नेत्रच्छदलोम *n.* (न्), रश्मिः *m.*, रल्लकः, उल्लानः.

Eye-less, *a.* अचक्षुः -क्षुः -क्षुः (स्), विचक्षुः -क्षुः -क्षुः (स्), अनक्षः -क्षा -क्षं, अनयनः -ना -नं, गताक्षः -क्षा -क्षं, दृष्टिहीनः -ना -नं, अदृक् *m. f. n.* (श्), नेत्रेन्द्रियविकलः -ला -लं.

Eyelet, eyelet-hole, *s.* गवाक्षः, छिद्रं, रन्ध्रं.

Eye-lid, *s.* नेत्रच्छदः, नयनच्छदः, अक्षिपुटः, पुटः, नयनवर्त्म *n.* (न्), वर्त्म *n.*, आडम्बरः.

Eye-salve, *s.* चक्षुरञ्जनं, नेत्राञ्जनं चक्षुर्विलेपनं, नयनलेपः.

Eye-service, *s.* केवलं प्रभुप्रत्यक्षेण कृता शुश्रूषा or परिचर्य्या.

Eye-shot, *s.* चक्षुर्विषयः, नयनविषयः, दृष्टिगोचरः -रं.

Eye-sight, *s.* दृष्टिः *f.*, नयनदृष्टिः *f.*, नेत्रेन्द्रियं, चक्षुरिन्द्रियं, दर्शनशक्तिः *f.*

Eye-sore, *s.* चक्षुःपीडा, नेत्रपीडाकरं or नयनक्लेशकं वस्तु.

Eye-spotted, *p. p.* नयनाकारचिह्नैर् विचित्रितः -ता -तं.

Eye-tooth, *s.* पार्श्वदन्तः, नयनदन्तः, चक्षुर्दन्तः.

Eye-wink, *s.* अक्षिसंज्ञा, नेत्रसङ्केतः, अक्षिसङ्कोचसंज्ञा, कटाक्षः.

Eye-witness, *s.* स्वचक्षुषा साक्षी *m.* (न्), प्रत्यक्षदर्शी *m.* (न्), प्रत्यक्षदर्शनः, साक्षाद्द्रष्टा *m.* (ष्टृ), साक्षाद्दर्शी *m.*, देश्यः.

Eyrie, *s.* श्येनादिनीडः, श्येनकुलायः, प्रतुदादिपक्षिस्थानं.

F.

Fabaceous, *a.* मौद्गीनः -ना -नं, माषीणः -णा -णं, शिम्बासगुणः -णा -णं.

Fable, *s.* (Feigned story) पुरावृत्तकथा, पुरावृत्तोपाख्यानं, कूटार्थोपाख्यानं, उपाख्यानं, आख्यानं, आख्यायिका, कथा, परिकथा, इतिहासः.—(Fiction) कल्पनासृष्टिः *f.*, प्रबन्धकल्पना, मनःकल्पितं, व्यपदेशः.

To fable, *v. a.* and *n.* पुरावृत्तकथां रच् (c. 10. रचयति -यितुं), विरच्, मनसा कॢप् (c. 10. कल्पयति -यितुं) or सृज् (c. 6. सृजति, स्रष्टुं), मिथ्याकथा रच्.

Fabled, *p. p.* मनःकल्पितः -ता -तं, काल्पनिकः -की -कं, कूटार्थः -र्था -र्थं.

Fabric, *s.* (Structure) निर्म्माणं, निर्म्मितिः *f.*, कल्पना.—(Edifice) हर्म्यं, शाला, भवनं, मन्दिरं, प्रासादः, धाम *n.* (न्), अट्टालिका.—(Form, texture) आकारः, आकृतिः *f.*, ऊतिः *f.*

To fabricate, *v. a.* (Construct) निर्मा (c. 2. -माति -तुं, c. 3. -मिमीते, c. 4. -मीयते caus. -मापयति -यितुं), कृ (c. 8. करोति, कर्त्तुं caus. कारयति -यितुं), कॢप् (c. 10. कल्पयति -यितुं), विरच् (c. 10. -रचयति -यितुं), सृज् (c. 6. सृजति, स्रष्टुं), घट् (c. 1. घटते -टितुं).—(Invent) मनसा कॢप्, मिथ्या कॢप् or कृ.

Fabricated, *p. p.* (Constructed) निर्म्मितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, घटितः -ता -तं, कल्पितः -ता -तं.—(Invented) मनःकल्पितः -ता -तं, कृत्रिमः -मा -मं.

Fabrication, *s.* (Construction) निर्म्माणं, निर्म्मितिः *f.*, रचना, विरचना, कल्पनं -ना, घटनं.—(Falsehood, forgery) मनःकल्पितं, मिथ्याकथा.

Fabricator, *s.* निर्म्माता *m.* (तृ), निर्म्माणकारी *m.* (न्), रचकः, विरचकः.

Fabulist, *s.* पुरावृत्तकथाविरचकः, इतिहासरचकः, ऐतिहासिकः.

Fabulous, *a.* (Fictitious) कृत्रिमः -मा -मं, मनःकल्पितः -ता -तं, काल्पनिकः -की -कं, अप्रसिद्धः -द्धा -द्धं, कूटार्थः -र्था -र्थं.—(Relating to fable) पुरावृत्तकथासम्बन्धी -न्धिनी -न्धि (न्), ऐतिहासिकः -की -कं, काथिकः -की -कं.

Fabulously, *adv.* कृत्रिमप्रकारेण, कल्पनापूर्व्वं, इतिहासानुसारेण.

Façade, *s.* (Of a building) हर्म्यमुखं, प्रासादमूर्द्धा *m.* (न्).

Face, *s.* (Visage) मुखं, वदनं, आननं, वक्त्रं, आस्यं, वन्दनं, तुण्डं, श्मन् indec.; 'face like the moon,' वदनचन्द्रः, वदनेन्दुः *m.*—(Air, look) वदनं, दृष्टिः *f.*, आकारः, आभा.—(Surface) तलं, मुखं, पृष्ठं, पीठं; 'face of the earth,' भूतलं, पृथिवीतलं, क्षितिपीठं.—(State) अवस्था, स्थितिः *f.*, दशा, भावः, रूपं; 'before the face,' प्रतिमुखं, सम्मुखं -खे, अभिमुखं, साक्षात्, समक्षं, प्रत्यक्षं -क्षेण -क्षतस्, अग्रे, अग्रतस्; 'face to face,' सम्मुखं, मुखामुखि; 'in face of,' सम्मुखः -खा -खी -खं, सम्मुखीनः -ना -नं, अभिमुखः -खा -खी -खं; 'having the face averted,' विमुखः -खी -खं, पराङ्मुखः -खी -खं; 'to turn away the face,' विमुखीभू; 'to stand face to face,' सम्मुखीभू; 'to fall with one's face on the ground,' भूमौ न्यङ्मुखः or अधोमुखः

पत् (c. 1. पतति -तितुं); 'a wry face,' विकृताननं.

To FACE, *v. a.* सम्मुखीभू, अभिमुखीभू, प्रतिमुखीभू.—(Meet, oppose) अभिमुखं गम् (c. 1. गच्छति, गन्तुं), अभिवृत् (c. 1. -वर्त्तते -र्त्तितुं), पर्य्यवस्था (c. 1. -तिष्ठति -स्थातुं); 'one who faces the foe,' अभ्यमित्रीणः, अभ्यमित्रीयः, अभ्यमित्र्यः.—(Be opposite to) expressed by मुख or अभिमुख in comp.; 'to face the south,' दक्षिणामुखः -खी -खं भू; 'the north,' उदङ्मुखः -खी -खं भू, उत्तराभिमुखः -खी -खं भू; 'the east,' प्राङ्मुखः -खी -खं भू.—(Covered with additional cloth) अधिवस्त्रेण or अधिकपटेन छद् (c. 10. छादयति -यितुं).

FACED, *a.* अधिवस्त्रोपेतः -ता -तं, उत्तरवस्त्रान्वितः -ता -तं.—(Having a face) used in comp.; as, 'lovely faced,' सुमुखः -खी -खं, मुग्धाननः -नी -नं; 'lotus-faced,' आननाब्जः -ब्जा -ब्जं; 'moon faced,' चन्द्रमुखः -खी -खं.

FACELESS, *s.* निर्मुखः -खा -खी -खं, निर्वदनः -ना -नं, मुखहीनः -ना -नं.

FACET, *s.* (Small surface of a gem) कणः.

FACETIOUS, *a.* रसिकः -का -कं, रसी -सिनी -सि (न्), रसवान् -वती -वत् (त्), सरसः -सा -सं, परिहासशीलः -ला -लं, परिहासवेदी -दिनी -दि (न्), प्रहासी -सिनी -सि (न्), विनोदी -दिनी -दि (न्), विदूषकः -का -कं; 'facetious conversation,' सरसालापः, चित्रं.

FACETIOUSLY, *adv.* सरसं, हासकरणार्थं, विनोदार्थं, रसिकप्रकारेण.

FACETIOUSNESS, *s.* रसिकत्वं, रसवत्त्वं, सरसता, परिहासशीलता, विनोदकत्वं, हास्यता, हासोत्पादकत्वं, उल्लसता.

FACILE, *a.* सुखः -खा -खं, सुकरः -रा -रं, निरायासः -सा -सं, अनायासी -सिनी -सि (न्), सुसाध्यः -ध्या -ध्यं, सुगमः -मा -मं, सुखेन कार्य्यः -र्य्या -र्य्यं, अकठिनः -ना -नं.—(Complying) अनुकूलः -ला -लं.—(Easy of access) अभिगम्यः -म्या -म्यं.

To FACILITATE, *v. a.* सुकरं -रां -रं कृ, निरायासीकृ, सुखीकृ, दुःखानि or दुर्गाणि or विघ्नान् or शल्यानि विनी (c. 1. -नयति -नेतुं) or अपनी or हृ (c. 1. हरति, हर्त्तुं) or नश् (c. 10. नाशयति -यितुं), निर्विघ्नीकृ, निष्प्रत्यूहीकृ.

FACILITATED, *p. p.* सुकरीकृतः -ता -तं, हृतविघ्नः -घ्ना -घ्नं, हृतप्रत्यूहः -हा -हं.

FACILITY, *s.* सौकर्य्यं, सुकरत्वं, सौख्यं, सौगम्यं, सुगमत्वं, सुसाध्यता, अनायासः, निरायासत्वं, अकाठिन्यं, अकष्टत्वं, अवैषम्यं.

FACING, *part.* (Opposite to) अभिमुखः -खा -खी -खं, सम्मुखः -खा -खं, सम्मुखीनः -ना -नं, अभिमुखगतः -ता -तं, प्रतिमुखः -खा -खं; 'facing the north,' उत्तराभिमुखः -खा -खं, or expressed by मुख; as, 'facing the east,' प्राङ्मुखः -खा -खं; 'the west,' प्रत्यङ्मुखः; 'the south,' दक्षिणामुखः; 'the north,' उदङ्मुखः; 'with the head facing the east,' प्राक्शिरसः -सा -सं.

FACING, *s.* (Additional covering in front of a garment) वस्त्राग्रभागे स्यूतम् अधिकांशुकं or अधिवसनं.—(End of a sleeve) पिप्पलान्तं.—(Of a fortification) दुर्गमुखं.

FAC-SIMILE, *s.* प्रतिलिपिः *f.*, हस्ताक्षरप्रतिरूपं.

FACT, *s.* वस्तु *n.* भूतं, अर्थः, वृत्तं, कर्म्म *n.* (न्), कृतं, कृतवस्तु *n.*—(Reality) तत्त्वं, सत्त्वं, सत्ता, सत्यता, यथार्थता, याथार्थ्यं, प्रकृतत्वं; 'in fact,' वस्तुतस्, अर्थतस्, तत्त्वतस्, परमार्थतस्.

FACTION, *s.* (A party) पक्षः, शाखा, गणः, दलं; 'one of the opposite faction,' विपक्षः; 'one's own faction,' आत्मपक्षः; 'following a faction,' पक्षपातः -तिता, पक्षपातकृतस्नेहः, गणता.—(Political dissension) भेदः, द्वैधं, द्वन्द्वं, विरोधः, राजद्रोहः.

FACTIOUS, *a.* (Relating to faction) पाक्षः -क्षी -क्षं.—(Promoting faction, seditious) राज्यभेदकरः -री -रं, राजद्रोही -हिणी -हि (न्), कलहकारी -रिणी -रि (न्), भेत्ता -त्री -तृ (तृ), उपजापकः -का -कं, उपद्रवी -विणी -वि (न्).

FACTIOUSLY, *adv.* भेदकरणार्थं, कलहकरणार्थं, सोपजापं, उपजापकवत्.

FACTIOUSNESS, *s.* भेदकरणशीलता, राजद्रोहः, कलहकारित्वं, उपजापः.

FACTITIOUS, *a.* कृत्रिमः -मा -मं, कृतकः -का -कं, कल्पितः -ता -तं, काल्पनिकः -की -कं, रचितः -ता -तं, घटितः -ता -तं, शिल्पिकः -का -कं, शिल्पनिर्म्मितः -ता -तं, यौक्तिकः -की -कं.

FACTITIOUSLY, *adv.* कृत्रिमप्रकारेण, शिल्पेन, कल्पनापूर्व्वं.

FACTOR, *s.* वणिक्प्रतिनिधिः *m.*, देशान्तरे वाणिज्यकर्म्मनिर्वाहणे नियुक्तो जनः, नियोगी *m.* (न्), नियुक्तः, प्रतिपुरुषः.

FACTORAGE, *s.* वणिक्प्रतिनिधिगृहीतः शुल्कः, वणिक्कर्म्मनिर्वाहणार्थं नियोगिणे देयं पारितोषिकं.

FACTORY, *s.* (Manufactory) शिल्पगृहं, शिल्पशाला, यन्त्रगृहं, आवेशनं, प्रावेशनं, अन्वासनं, पण्यनिर्म्माणशाला, वाणिज्यद्रव्यनिर्म्माणगृहं.

FACTOTUM, *s.* सर्व्वकर्म्मा *m. f.* (न्), सर्व्वकर्म्मकरः -री, सर्व्वकर्म्मीणः -णा.

FACULTY, *s.* (Power) शक्तिः *f.*, बलं, क्षमता, सामर्थ्यं, प्रभावः, आशक्तिः.—(Faculty of the mind) धीशक्तिः *f.*, मनःशक्तिः *f.*, निष्क्रमः, संस्कारः, चित्तसंस्कारः.—(Facility of performance) योग्यता, युक्तिः *f.*, सुप्रयोगता, कौशल्यं, पाटवं.—(Privilege) अधिकारः.—(The body of doctors) वैद्यगणः, चिकित्सकवर्गः.

FACUND, *a.* वाक्पटुः -टुः -टु, वाग्मी -ग्मिनी -ग्मि (न्). *See* ELOQUENT.

FACUNDITY, *s.* वाक्पटुता, वाक्पाटवं, पटुत्वं, वाग्विदग्धता.

To FADDLE, *v. n.* रम् (c. 1. रमते, रन्तुं), खेल् (c. 1. खेलति -लितुं), खेलां कृ.

To FADE, *v. n.* (Decay, wither) म्लै (c. 1. म्लायति, म्लातुं), परिम्लै, विशृ in pass. (-शीर्य्यते), क्षि in pass. (क्षीयते), सद् (c. 1. सीदति, सत्तुं), अवसद्, व्यवसद्, जॄ (c. 4. जीर्य्यति, जरितुं -रीतुं), नश् (c. 4. नश्यति, नशितुं), प्रणश्, विनश्, ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, शद् (c. 1. शीयते, शत्तुं), ग्लै (c. 1. ग्लायति, ग्लातुं), प्रली (c. 4. -लीयते -लेतुं), गल् (c. 1. गलति -लितुं).—(Lose colour) विवर्णीभू, नीरक्तीभू.

To FADE, *v. a.* (Cause to wither) क्षि in caus. (क्षपयति, क्षययति -यितुं), अवसद् in caus. (-सादयति -यितुं), ध्वंस् in caus. (ध्वंसयति -यितुं), ग्लै in caus. (ग्लपयति -यितुं), म्लानीकृ, विशीर्णीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं).—(Deprive of colour) विवर्णीकृ, वर्णं दुष् in caus. (दूषयति -यितुं) or नश् in caus. (नाशयति -यितुं).

FADED, *p. p.* म्लानः -ना -नं, परिम्लानः -ना -नं, शीर्णः -र्णा -र्णं, विशीर्णः -र्णा -र्णं, क्षीणः -णा -णं, ध्वस्तः -स्ता -स्तं, अवसन्नः -न्ना -न्नं, जीर्णः -र्णा -र्णं, तान्तः -न्ता -न्तं.—(In colour) विवर्णः -र्णा -र्णं, दीनवर्णः -र्णा -र्णं, वीतरागः -गा -गं, गतवर्णः -र्णा -र्णं, नीरक्तः -क्ता -क्तं.

FADING, *s.* म्लानिः *f.*, शीर्णता, विशीर्णता, क्षयः, ध्वंसः, अवसादः, जीर्णिः *f.*, तेजोहानिः *f.*, शोषः, शुष्कता.—(Loss of colour) वर्णहानिः *f.*, वैवर्ण्यं.

FADING, *part.* or *a.* म्लायन् -यन्ती -यत् (त्), म्लायमानः -ना -नं, विशीर्य्यमाणः -णा -णं, क्षीयमाणः -णा -णं, म्लायमानः -ना -नं, क्षयी -यिणी -यि (न्), क्षयिष्णुः -ष्णुः -ष्णु, विनश्वरः -रा -रं, विध्वंसी -सिनी -सि (न्).

FECAL, FECES. *See* FECAL, FECES.

To FAG, *v. a.* अतिकायक्लेशेन नीचकर्म्म कृ in caus. (कारयति -यितुं) or दास्यं कृ in caus. खिद् in caus. (खेदयति -यितुं), आयस् in caus. (-यासयति -यितुं).

To FAG, *v. n.* अतिकायक्लेशेन श्रम् (c. 4. श्राम्यति, श्रमितुं), or आयस् (c. 4. -यस्यति -यसितुं), खिद् (c. 4. खिद्यते, खेत्तुं), निरन्तरायासं कृ.

FAG, *s.* दासः, निरन्तरायासी *m.* (न्), अतिश्रमेण नीचकर्म्मकारी *m.* (न्).

Fag-end, *s.* अन्तः -न्तं, अग्र, अग्रभागः, शेषभागः.—(Refuse) शेषः, अवशिष्टं, उच्छिष्टं, परभागः.

Fagged, *p.p.* खिन्नः -न्ना -न्नं, अतिशरीरायासेन परिश्रान्तः -न्ता -न्तं.

Fagging, *s.* निरन्तरायासः, शरीरायासः, कायक्लेशः, नित्यश्रमः, नित्यक्लेशः.

Fagot, *s.* काष्ठभारः, काष्ठकूर्चः, काष्ठखण्डभारः, दारुखण्डपिण्डः.

To fagot, *v. a.* काष्ठभारं कृ, कूर्चीकृ, काष्ठखण्डानि एकत्र बन्ध् (c. 9. बध्नाति, बन्द्धुं) or एकपिण्डीकृ or एकगुच्छीकृ.

To fail, *v. n.* (Decay, decline) क्षि in pass. (क्षीयते), परिक्षि, सद् (c. 1. सीदति, सत्तुं), अवसद्, ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, परिहा in pass. (-हीयते), प्रहा, भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), विस्रंस् (c. 1. -स्रंसते -सितुं), ग्लै (c. 1. ग्लायति, ग्लातुं).—(Cease, be extinct) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), नश् (c. 4. नश्यति, नशितुं).—(Become deficient) न्यूनीभू, ह्रस् (c. 1. ह्रसते -सितुं), क्षि in pass. अपचि in pass. (-चीयते).—(Miss, not to succeed) न सिध् (c. 4. सिध्यति, सेद्धुं), विफलीभू, न उपपद् (c. 4. -पद्यते -पत्तुं), न सम्पद्, वृथाभू, मोघीभू, भग्नाशः -शा -शं भू, प्रतिहन् in pass. (-हन्यते).—(Omit, neglect) हा (c. 3. जहाति, हातुं), प्रमद् (c. 4. -माद्यति -मदितुं), न कृ, न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), न सेव् (c. 1. सेवते -वितुं).—(Become bankrupt) परिक्षि in pass. परिक्षीणः -णा -णं भू.

To fail, *v. a.* (Desert) हा (c. 3. जहाति, हातुं), अपहा, विहा, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्; 'one who fails in his efforts,' भग्नोद्यमः.

Fail, *s.* परित्यागः, अननुष्ठानं, असेवनं, अकरणं, अवक्रिया, उपात्ययः, हानिः *f.*; 'without fail,' अवश्यं, अवश्यमेव, नूनं, सुनिश्चितं, असंशयं, नियतं.

Failed, *p. p.* अनुपपन्नः -न्ना -न्नं, अप्रतिपन्नः -न्ना -न्नं, अकृतः -ता -तं, अननुष्ठितः -ता -तं.

Failing, *part.* सीदन् -दन्ती -दत् (त्), क्षीयमाणः -णा -णं, विकलः -ला -लं.

Failing, *s.* (Fault) दोषः, अपराधः, छिद्रं, अगुणः, मन्तुः *m.*, वैकल्यं.

Failure, *s.* (Want, deficience) अभावः, असम्भवः, विरहः, अविषयः, अप्राप्तिः *f.*, हानिः *f.*, हीनता, न्यूनता, रहितत्वं, ह्रासः, क्षीणता, वैकल्यं, लोपः; 'on failure,' अभावे, अविषये.—(Decay) क्षयः, परिक्षयः, ध्वंसः, नाशः, विनाशः, भ्रंशः; 'failure of intellect,' बुद्धिविनाशः; 'failure of memory,' स्मृतिभ्रंशः.—(Miscarriage, want of success) असिद्धिः *f.*, अनुपपत्तिः *f.*, असम्पत्तिः *f.*, विपत्तिः *f.*, अप्रतिपत्तिः *f.*, कार्य्यविपत्तिः *f.*, भङ्गः, अकरणिः *f.*—(Omission, non-performance) परित्यागः, अननुष्ठानं, असेवनं, अकरणं, अवक्रिया, उपात्ययः; 'in performance of duty,' अतिपातः; 'in a promise,' संविद्व्यतिक्रमः; 'in a vow,' व्रतलोपनं.—(Becoming insolvent) परिक्षयः, परिक्षीणता, गृहभङ्गः.

Fain, *a.* सकामः -मा -मं, इच्छुः -च्छुः -च्छु, अभिलाषी -षिणी -षि (न्).

Fain, *adv.* प्रकामं, कामं, सकामं, इच्छातस्, सानन्दं, सानुरागं; 'he would fain have filled (his) belly,' उदरं पूरयितुम् अकांक्षत् or ऐच्छत्.

To faint, *v. n.* मुर्छ् (c. 1. मूर्च्छति -र्च्छितुं), मूर्च्छां गम् (c. 1. गच्छति, गन्तुं), मुह् (c. 4. मुह्यति, मोहितुं), नष्टचेतनः -ना -नं भू, चेतनां or चैतन्यं हा (c. 3. जहाति, हातुं), ग्लै (c. 1. ग्लायति, ग्लातुं), परिग्लै, म्लै (c. 1. म्लायति, म्लातुं), परिम्लै, क्लम् (c. 4. क्लाम्यति, क्लमितुं), तम् (c. 4. ताम्यति, तमितुं), आतम्, प्रतम्, प्रली (c. 4. -लीयते -लेतुं).—(Sink, be dejected) सद् (c. 1. सीदति, सत्तुं), अवसद्, विषण्णीभू, क्षि in pass. (क्षीयते), स्रंस् (c. 1. स्रंसते -सितुं).

Faint, *a.* (Languid) म्लानः -ना -नं, परिम्लानः -ना -नं, ग्लानः -ना -नं, परिग्लानः -ना -नं, क्लान्तः -न्ता -न्तं, क्लमी -मिनी -मि (न्), तान्तः -न्ता -न्तं, विषण्णः -ण्णा -ण्णं, शिथिलाङ्गः -ङ्गी -ङ्गं, अवसन्नाङ्गः -ङ्गी -ङ्गं, सस्ताङ्गः -ङ्गी -ङ्गं, विस्रस्ताङ्गः -ङ्गी -ङ्गं.—(Feeble) शिथिलबलः -ला -लं, निर्बलः -ला -लं, सत्त्वरहितः -ता -तं.—(As colour) पाण्डुः -ण्डुः -ण्डु, मन्दच्छायः -या -यं; 'faint red,' ईषद्रक्तः -क्ता -क्तं, श्वेतरक्तः -क्ता -क्तं.—(As sound) मन्दः -न्दा -न्दं.

Fainted, *p. p.* मूर्च्छितः -ता -तं, मूर्च्छागतः -ता -तं, कश्मलगतः -ता -तं, नष्टचेतनः -ना -नं, चैतन्यरहितः -ता -तं, प्रमुग्धः -ग्धा -ग्धं, प्रलीनः -ना -नं.

Faint-hearted, *a.* भीतहृदयः -या -यं, भीरुहृदयः -या -यं, हरिणहृदयः -या -यं, चकितहृदयः -या -यं, भयाक्रान्तमनाः -नाः -नः (स्).

Faint-heartedly, *adv.* भीरुवत्, भीतवत्, कापुरुषवत्, कातर्य्येण, चकितं.

Faint-heartedness, *s.* हृदयभीरुता, हृदयकातर्य्यं, कातरता.

Fainting, *s.* मूर्च्छा, मूर्च्छनं -ना, मोहः, सम्मोहः, प्रमोहः, कश्मलं, कस्मलं, नष्टचेष्टता, चेतनाहानिः *f.*, चैतन्यहानिः, चैतन्यनाशः, चित्तवैकल्यं, प्रलयः, निर्वेशः, मूः *f.*, (मुर्).

Fainting, *part.* or *a.* मूर्च्छितः -ता -तं, मूर्च्छालः -ला -लं, मूर्त्तः -र्त्ता -र्त्तं, सस्ताङ्गः -ङ्गी -ङ्गं; 'from sorrow,' शोकमूर्च्छितः -ता -तं. *See* Fainted.

Faintly, *adv.* अल्पबलेन, मन्दं, ईषत्, कियत्, मनाक्, अबलवत्.

Faintness, *s.* म्लानिः *f.*, ग्लानिः *f.*, क्लान्तिः *f.*, क्लमित्वं, अवसादः, अवसन्नता, दीनता, दौर्बल्यं, अङ्गशैथिल्यं, सत्त्वराहित्यं, मान्द्यं, मन्दता.

Fair, *a.* (Beautiful) सुन्दरः -रा -री -रं, चारुः -र्व्वी -रु, चारुदर्शनः -ना -नं, शोभनः -ना -नं, शुभः -भा -भं, शुभ्रः -भ्रा -भ्रं, कान्तः -न्ता -न्तं, सौम्यः -म्या -म्यं, वामः -मा -मं, सुमुखः -खी -खं, रूपवान् -वती -वत् (त्), सुरूपः -पी -पं, सुदृश्यः -श्या -श्यं, रुचिरः -रा -रं, शुभाननः -ना -नं, श्रीमान् -मती -मत् (त्).—(Clear) विमलः -ला -लं, निर्म्मलः -ला -लं, विशदः -दा -दं, स्वच्छः -च्छा -च्छं, दीप्रः -प्रा -प्रं, शुद्धः -द्धा -द्धं; 'fair weather,' निर्म्मलदिनं, सुदिनं.—(Free from clouds) अनभ्रः -भ्रा -भ्रं, निरभ्रः -भ्रा -भ्रं, व्यभ्रः -भ्रा -भ्रं, गततोयदः -दा -दं, वितिमिरः -रा -रं.—(Just, honest) धर्म्यः -र्म्या -र्म्यं, न्याय्यः -य्या -य्यं, यथान्यायः -या -यं, न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), समः -मा -मं, सरलः -ला -लं, शुचिः -चिः -चि, शुद्धमतिः -तिः -ति, विमलात्मा -त्मा -त्म (न्), निष्कपटः -टा -टं, निर्व्याजः -जा -जं, सात्त्विकः -की -कं, ऋजुः -जुः -जु.—(Favourable) अनुकूलः -ला -लं, प्रसन्नः -न्ना -न्नं.—(Middling) मध्यमः -मा -मं, न स्थूलो न सूक्ष्मः, नाधिको न च न्यूनः; 'the fair sex,' रमणीगणः, प्रमदागणः.

Fair, *adv.* (Civilly) अनुनयेन, सुशीलवत्, अनुकूलं.—(Honestly) यथान्यायं, समं; 'he bids fair,' उपपद्यते, युज्यते.

Fair, *s.* (Annual market) मेला, निगमः, क्रयारोहः, निघंटः -टं, हट्टः, अवटङ्कः, निषद्या, सांवत्सरिकः क्रेतृविक्रेतृसमागमः, लोकयात्रा.

Fair-complexioned, *a.* विमलवर्णः -र्णा -र्णं, विशदवर्णः -र्णा -र्णं, सुवर्णः -र्णा -र्णं.

Fair-dealing, *s.* शुचिता, सारल्यं, न्यायः, समता, अव्याजः, अकापट्यं.

Fair-faced, *a.* सुमुखः -खी -खं, चारुमुखः -खी -खं, शुभाननः -ना -नं.

Fair-haired, *a.* सुकेशी -शिनी -शि (न्), सुकेशवान् -वती -वत् (त्).

Fairing, *s.* मेलासमये क्रीतं प्रीतिदानं.

Fairly, *adv.* (Justly) धर्म्मतस्, धर्म्मेण, न्यायतस्, न्यायेन, यथान्यायं, न्याय्यं, समं, सम्यक्, सारल्येन, कपटं विना, अमायया.

Fairness, *s.* (Beauty) सौन्दर्य्यं, चारुता, शोभा, कान्तिः *f.*, रूपं, श्रीः *f.*—(Clearness) विमलता, निर्म्मलता, वैमल्यं, वैशद्यं, प्रसन्नता, शुद्धिः *f.*, दीप्तिः *f.*—(Honesty, candour) सारल्यं, सरलता, शुचिता, समता, साम्यं, न्यायता, दाक्षिण्यं, ऋजुता, आर्जवं, अव्याजः, धर्म्यता, धर्म्मः.

Fair-spoken, *a.* प्रियवादी -दिनी -दि (न्), प्रियंवदः -दा -दं, वल्गुवाक् -ग्वाक् -ग्वाक्.

Fairy, *s.* विद्याधरी, पिशाची, योगिनी, राक्षसी, नायिका, मायिनी, दैत्या, भूती.

Fairy, *a.* पैशाचिकः -की -कं, भौतिकः -की -कं, राक्षसः -सी -सं.

Faith, *s.* श्रद्धा, भक्तिः *f.*, प्रत्ययः, विश्वासः, विश्रम्भः, आस्था, निष्ठा, आस्तिक्यबुद्धिः *f.*, आस्तिकता, भक्तता; 'of one faith,' एकभक्तिः -क्तिः -क्ति; 'to have faith in,' श्रद्धा (c. 3. -दधाति -धातुं), विश्वस् (c. 2. -श्वसिति -तुं).—(Veracity, honesty) सत्यता, सत्यवादित्वं, विश्वास्यता, सारल्यं; 'done with faith,' श्रद्धाकृतः -ता -तं.

Faith, *exclam.* सत्यं, नूनं, खलु, एवं, आश्चर्यं, चित्रं.

Faithful, *a.* (Firm in adherence) भक्तः -क्ता -क्तं, भक्तिमान् -मती -मत् (त्), दृढभक्तिः -क्तिः -क्ति, भक्तियुक्तः -क्ता -क्तं, आप्तः -प्ता -प्तं, अव्यभिचारी -रिणी -रि (न्); 'faithful to one's master,' प्रभुभक्तः -क्ता -क्तं; 'a faithful friend,' स्थिरप्रेमा *m.* (न्), दृढप्रेमा *m.*, दृढसौहृदः.—(True to obligations) सत्यप्रतिज्ञः -ज्ञा -ज्ञं, सत्यसन्धः -न्धा -न्धं, संशितव्रतः -ता -तं, अस्कन्दितव्रतः -ता -तं, अलङ्घितव्रतः -ता -तं, अनुव्रतः, -ता -तं, प्रतिज्ञापालकः -का -कं.—(Full of faith, having faith) श्रद्धालुः -लुः -लु, श्रद्धावान् -वती -वत् (त्), श्रद्दधानः -ना -नं, श्रद्दधत् -धती -धत् (त्), श्रद्धामयः -यी -यं, विश्वासी -सिनी -सि (न्), प्रत्ययी -यिनी -यि (न्).—(To be trusted, confided in) विश्वास्यः -स्या -स्यं, विश्वसनीयः -या -यं, विश्वस्तः -स्ता -स्तं, विश्रब्धः -ब्धा -ब्धं; 'faithful wife,' पतिव्रता, साध्वी, सती, सुचरित्रा, स्वीया, एकपत्नी; 'faithful lover,' अनुकूलः.

Faithfully, *adv.* भक्त्या, दृढभक्त्या, भक्तवत्, सत्यं, सारल्येन, कपटं विना.

Faithfulness, *s.* (Firm adherence) भक्तिः *f.*, दृढा भक्तिः, भक्तत्वं, भक्तिमत्त्वं, दृढभक्तित्वं, आसक्तिः *f.*, अनुरक्तिः *f.*, दृढं सौहृदं.—(Veracity) सत्यता, सत्यवादित्वं.—(Performance of promises) प्रतिज्ञापालनं -लकत्वं.—(In a wife) पातिव्रत्यं, सतीत्वं, साध्वीत्वं; 'in a lover,' अनुकूलता.

Faithless, *a.* (Unbelieving) अश्रद्दधानः -ना -नं, श्रद्धारहितः -ता -तं, अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी -यि (न्).—(Disloyal, perfidious) अभक्तः -क्ता -क्तं, अभक्तिमान् -मती -मत् (त्), भक्तिहीनः -ना -नं, विश्वासघाती -तिनी -ति (न्), विश्रम्भघाती &c., छिद्रसेवी -विनी -वि (न्), कुटिलाचारः -रा -रं.—(Not to be trusted) अविश्वास्यः -स्या -स्यं.—(Not true to engagements) भग्नप्रतिज्ञः -ज्ञा -ज्ञं, असत्यसन्धः -न्धा -न्धं, मिथ्याप्रतिज्ञः -ज्ञा -ज्ञं, विसंवादी -दिनी -दि (न्).—(Not true to marriage) व्यभिचारी *m.* -रिणी *f.* (न्), असाध्वी *f.*, असती *f.*

Faithlessly, *adv.* अभक्त्या, अभक्तवत्, भक्तिभङ्गात्, प्रतिज्ञाभङ्गात्, मिथ्या.

Faithlessness, *s.* (Unbelief) अश्रद्धा, अविश्वासः, अप्रत्ययः, अविश्रम्भः.—(Disloyalty) अभक्तिः *f.*, भक्तिहीनता, भक्तिभङ्गः, विश्वासभङ्गः, विश्वासघातः, शत्रुसेवा.—(Violation of promises, &c.) प्रतिज्ञाभङ्गः, प्रतिज्ञातिक्रमः, व्रतलोपनं, संविद्व्यतिक्रमः.

Falcated, *a.* दात्राकृतिः -तिः -ति, लवित्राकारः -रा -रं, वक्रः -क्रा -क्रं.

Falchion, *s.* वक्रखड्गः, चन्द्रहासः, निस्त्रिंशः, खड्गः, मण्डलाग्रः, कृपाणः -णकः.

Falcon, *s.* श्येनः, कपोतारिः *m.*, घातिपक्षी *m.* (न्), खगान्तकः, शशादनः, पत्री *m.* (न्), नीलपिच्छः, कपोताद्यनुसरणे शिक्षितः श्येनः.

Falconer, *s.* श्येनजीवी *m.* (न्), श्येनपोषकः, श्येनपालकः, श्येनशिक्षकः.

Falconry, *s.* श्येनख्याता, श्येनशिक्षा, श्येनपोषः, श्येनपालनं.

Fald-stool, *a.* इतस्ततो वहनयोग्यो लघुपीठः, धर्म्माध्यक्षपीठः -ठं.

To fall, *v. n.* पत् (c. 1. पतति -तितुं), निपत्, परिपत्, भ्रंश् (c. 4. भ्रश्यति, c. 1. भ्रंशते -शितुं), परिभ्रंश्, च्यु (c. 1. च्यवते, च्योतुं), ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, स्रंस् (c. 1. स्रंसते -सितुं), आस्रंस्, विस्रंस्, गल् (c. 1. गलति -लितुं), अवगल्, विगल्, समागल्, लस् (c. 1. लसते -सितुं), स्खल् (c. 1. स्खलति -लितुं).—(Die) मृ (c. 6. म्रियते, मर्त्तुं).—(Sink) सद् (c. 6. सीदति, सत्तुं), अवसद्.—(Fall away) 'become lean,' क्षि in pass. (क्षीयते), कृशीभू; 'apostatize,' स्वधर्म्मात् भ्रंश् or च्यु or विच्यु; 'decline, fade,' ग्लै (c. 1. ग्लायति, ग्लातुं), म्लै (c. 4. -लीयते -लेतुं).—(Fall back) अवस्था (c. 1. -तिष्ठते -स्थातुं), अपसृ (c. 1. -सरति -सर्त्तुं).—(Fall calm) निर्वातीभू.—(Fall down) अवपत्, निपत्, प्रपत्; 'prostrate one's self in worship,' प्रणिपत्, अवनतिं गम् (c. 1. गच्छति, गन्तुं), अष्टाङ्गपातं कृ; 'fall down with one's face on the ground,' भूमौ न्युब्जः or अधोमुखः पत्; 'fall down at one's feet,' पादयोः or चरणयोः पत्.—(Fall foul) आक्रम् (c. 1. -क्रामति -क्रमितुं).—(Fall from) भ्रंश्, प्रभ्रंश् or च्यु with abl. c.—(Fall into) निपत्; 'fall into the hands of the enemy,' शत्रुहस्ते पत्.—(Fall in with) सम्मन् (c. 4. -मन्यते -मन्तुं), उपगम्.—(Fall off) 'withdraw,' पलाय् (c. 1. पलायति -यितुं, rt. इ), चल् (c. 1. चलति -लितुं), अवस्था, अपसृ; 'abandon one's duty,' स्वधर्म्मं त्यज् (c. 1. त्यजति, त्यक्तुं).—(Fall on) आपत्, आक्रम्, आसद् (c. 10. -सादयति -यितुं), अभिद्रु, (c. 1. -द्रवति -द्रोतुं).—(Fall out) 'quarrel,' विवद् (c. 1. -वदते -दितुं), कलहं कृ; 'befall,' निपत्, आपत्, उपस्था (c. 1. -तिष्ठति -स्थातुं), सम्भू.—(Fall short) न्यूनीभू, ह्रस् (c. 1. ह्रसते -सितुं), क्षि in pass., हा in pass. (हीयते). (Fall sick) रोगग्रस्तः -स्ता -स्तं भू, पीडितः -ता -तं भू.—(Fall to) उपक्रम्, प्रक्रम्.—(Fall under) अन्तर्गम् in pass. (-गम्यते).—(Fall upon). *See To* fall on. (Fall into misfortune) आपद्ग्रस्तः -स्ता -स्तं भू, आपद् (c. 4. -पद्यते -पत्तुं).

To fall, *v. a.* (Drop, let fall) पत् in caus. (पातयति -यितुं), भ्रंश् in caus. (भ्रंशयति -यितुं), स्रंस् in caus. (स्रंसयति -यितुं).—(Diminish) न्यूनीकृ.

Fall, *s.* (Act of falling and dropping) पातः, पतनं, अवपातः, निपातः, निपतनं, सम्पातः, भ्रंशः, भ्रंशः, प्रभ्रंशः, च्युतिः *f.*, ध्वंसः -सनं, विध्वंसः, प्रध्वंसः, अधोगतिः *f.*, अधःपतनं, विस्रंसा.—(Death, ruin) क्षयः, परिक्षयः, ध्वंसः, परिध्वंसः, नाशः.—(Degradation) पदभ्रंशः, पदच्युतिः *f.*, स्थानप्रभ्रंशः, अपकर्षः, अपध्वंसः, अधोगमः -मनं, मर्य्यादाक्षयः.—(Declension, sinking) च्युतिः *f.*, क्षयः, अवक्षयः, सादः, अवसादः.—(Diminution) न्यूनता, ह्रासः, अपचयः, क्षयः.—(Declivity) पातुकः, पातुकभूमिः *f.* प्रवणभूमिः *f.* निम्नभूमिः.—(Cascade) प्रपातः, प्रस्रवणं, वारिप्रवाहः, निर्झरः.—(Fall of the leaf) पर्णध्वंसः, पत्त्रापगमः, शरद् *f.*—(Fall of snow) हिमवर्षः.—(Fall of rain) धारासम्पातः, धारासारः, धारा, आसारः, अभ्रावकाशः.—(Fall from a vehicle) वाहनभ्रंशः, वाहभ्रंशः.

Fallacious, *a.* मोही -हिनी -हि (न्), मोहनः -ना -नी -नं, भ्रान्तिजनकः -का -कं, भ्रमजनकः -का -कं, भ्रान्तिमान् -मती -मत् (त्), मायी -यिनी -यि (न्), वञ्चकः -का -कं, अविश्वसनीयः -या -यं, असत्यः -त्या -त्यं, मिथ्या in comp.; 'a fallacious opinion,' मिथ्यामतिः *f.*; a fallacious argument,' मिथ्याहेतुः *m.*

Fallaciously, *adv.* मिथ्या, मोहनार्थं, व्याजं, मायया, वञ्चनार्थं.

Fallaciousness, *s.* भ्रान्तिजनकत्वं, भ्रान्तिमत्त्वं, वञ्चकता, असत्यता, व्याजत्वं; 'of an argument,' हेत्वाभासः.

Fallacy, *s.* (Deceitfulness) वञ्चकत्वं, कूटता.—(Mistake) भ्रमः, भ्रान्तिः *f.*, मिथ्यामतिः *f.*—(False argument) मिथ्याहेतुः *m.*, आभासः, हेत्वाभासः, पक्षाभासः, फक्किका.

Fallen, *p. p.* पतितः -ता -तं, निपतितः -ता -तं, प्रपतितः -ता -तं, भ्रष्टः -ष्टा -ष्टं, प्रभ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, स्रस्तः -स्ता -स्तं, ध्वस्तः -स्ता -स्तं,

गलितः -ता -तं, विगलितः -ता -तं, पन्नः -न्ना -न्नं, स्खन्नः -न्ना -न्नं; 'fallen down,' अधःपतितः -ता -तं; 'fallen asleep,' सुप्तः -प्ता -प्तं, प्रसुप्तः -प्ता -प्तं; 'fallen into distress,' विपद्ग्रस्तः -स्ता -स्तं, आपत्प्राप्तः -प्ता -प्तं, आपद्ग्प्राप्तः -प्ता -प्तं.

FALLIBILITY, *s.* भ्रान्तिमत्त्वं, मोहयोग्यता, मोहाधीनता, भ्रमजनकता, मोहवत्त्वं, वञ्चनीयता, वञ्चकता, प्रमादवत्त्वं, असत्यता.

FALLIBLE, *a.* भ्रान्तिजनकः -का -कं, भ्रमजनकः -का -कं, भ्रान्तिमान् -मती -मत् (त्), मोही -हिनी -हि (न्), भ्रमणशीलः -ला -लं, वञ्चनीयः -या -यं, भ्रमयोग्यः -ग्या -ग्यं.

FALLING, *part.* पातुकः -का -कं, पाती -तिनी -ति (न्), पतयालुः -लुः -लु, स्रंसी -सिनी -सि (न्), ध्वंसी -सिनी -सि (न्), पित्सन् -त्सन्ती -त्सत् (त्), पिपतिषुः -षुः -षु.

FALLING, *s.* (Indenture) भङ्गः, निम्नता.—(Falling away) धर्म्मभ्रंशः, धर्म्मच्युतिः *f.*; धर्म्मत्यागः.—(Falling off) भ्रंशः, भ्रेषः, क्षयः, उत्क्रमः.

FALLING-SICKNESS, *s.* भ्रामरं, ग्रहामयः, अपस्मारः, भूतविक्रिया, प्रतानः.

FALLOW, *a.* (Unsowed) अनुप्तः -प्ता -प्तं, अनुप्तशस्यः -स्या -स्यं, अनुप्तिमः -मा -मं, अवापितः -ता -तं.—(Untilled) अप्रहतः -ता -तं, अकृष्टः -ष्टा -ष्टं, अफालकृष्टः -ष्टा -ष्टं, अकृतः -ता -तं, अहलः -ला -लं, अहल्यः -ल्या -ल्यं, खिलः -ला -लं; 'fallow land,' अनुप्तभूमिः *f.*, अप्रहतभूमिः *f.* —(Pale red) ईषद्रक्तः -क्ता -क्तं, श्वेतरक्तः -क्ता -क्तं.

To FALLOW, *v. a.* वीजारोपणव्यतिरेकेण or वीजानि अनुप्त्वा भूमिं हलेन कृष् (c. 1. कर्षति, क्रष्टुं) or भूमिलोष्टान् भिद् (c. 7. भिनत्ति, भेत्तुं).

FALLOWING, *s.* वीजवपनव्यतिरेकेण भूमिकर्षणं or लोष्टभेदनं or भूमिहतिः *f.*

FALLOWNESS, *s.* अनुप्तत्वं, अकृष्टता, अहल्यता, वन्ध्यता, निष्फलता, वैफल्यं.

FALSE, *a.* (Not true) असत्यः -त्या -त्यं, निःसत्यः -त्या -त्यं, अनृतः -ता -तं, अतथ्यः -थ्या -थ्यं, वितथः -था -थं, अयथार्थः -र्था -र्थं, असन् -सती -सत् (त्), अप्रकृतः -ता -तं, अलीकः -का -कं, मिथ्या or मृषा or अन्यथा in comp.; as, 'a false accusation,' मिथ्याभियोगः, मिथ्यापवादः; 'a false opinion,' मिथ्यामतिः *f.*; 'a false reply,' मिथ्योत्तरं; 'false speaking,' मृषावादः, मिथ्यावादः, असत्यभाषणं; 'false accuser,' मृषापवादी *m.* (न्).—(Fictitious) कृत्रिमः -मा -मं, कल्पितः -ता -तं, काल्पनिकः -की -कं, विडम्बितः -ता -तं, कपटी -टिनी -टि (न्), कूट or कपट or छद्म in comp.; as, 'false coin,' कूटस्वर्णं; 'false dice,' कूटाक्षः; 'false document,' कपटलेख्यं; 'false balances,' कूटतुला; 'false measure,' कूटमानं; 'a false ascetic,' छद्मतापसः, वकव्रती *m.* (न्); 'in a false dress,' छद्मवेशी *m.* (न्).—(Unfaithful, treacherous) विश्वासघाती -तिनी -ति (न्), रहस्यभेदी -दिनी -दि (न्), मन्त्रभेदी &c., क्षीणभक्तिः -क्तिः -क्ति, व्यभिचारी -रिणी -रि (न्); 'to vows, engagements,' खण्डितव्रतः -ता -तं, उल्लङ्घितव्रतः -ता -तं, असत्यसन्धः -न्धा -न्धं, लुप्तव्रतः -ता -तं; 'a false wife,' अपतिव्रता.—(Hypocritical) कुहकः -का -कं, दम्भी -म्भिनी -म्भि (न्); 'false worship,' अर्च्चाविडम्बनं.—(Vain, groundless) वृथा or मिथ्या in comp. मोघः -घा -घं; 'a false alarm,' वृथाक्रोशः; 'false hope,' मोघाशा.—(Dishonest) कापटिकः -की -कं.

FALSE-HEARTED, *a.* विश्रम्भघाती -तिनी -ति (न्), अस्थिरप्रेमा -मा -म (न्).

FALSEHOOD, *s.* (Want of truth) असत्यता, निःसत्यता, अतथ्यता, अनृतता, वितथता, अलीकता, अयाथार्थ्यं.—(A lie) अनृतं, असत्यं, वितथं, अतथ्यं, अलीकं, अप्रोलं, मृषोद्यं.—(Speaking falsehood) मिथ्यावादः, मृषावादः, मिथ्याकथनं, मृषाभाषिता, असत्यभाषणं, मृषाभिधानं, कैतववादः; 'one who tells a falsehood,' अनृतवादी *m.* (न्), मिथ्यावादी, मृषावादी; 'devoted to falsehood,' अनृतव्रतः -ता -तं.

FALSELY, *adv.* मिथ्या, मृषा, अन्यथा, असत्यं, निःसत्यं, अनृतं; 'acting falsely,' मिथ्याचारः -रा -रं; 'speaking falsely,' अनृतवादी -दिनी -दि (न्), अनृतवाक् *m. f. n.* (च्); 'falsely modest,' मिथ्याविनीतः -ता -तं, कपटविनयवान् -वती -वत् (त्).

FALSENESS, *s.* (Want of truth) असत्यता, निःसत्यता.—(Fictitiousness) कूटता, कृत्रिमता, कापट्यं.—(Duplicity) कपटता, व्याजः, कैतवं, शठता.—(Perfidy) विश्वासभङ्गः, विश्वासघातः, मन्त्रभेदः.

FALSE-PROPHET, *s.* भविष्यद्वादिनो वेशधारी *m.* (न्), मिथ्याभविष्यद्वादी *m.*

FALSE-WITNESS, *s.* कूटसाक्षी *m.* (न्), मिथ्यासाक्षी *m.*, कूटकारकः, कौटसाक्ष्यं, मिथ्यासाक्ष्यं, असत्यसाक्ष्यं.

FALSIFICATION, *s.* कूटकरणं, कपटकरणं, छद्मकरणं, कृत्रिमकरणं, मिथ्याकरणं, अन्यथाकरणं.

FALSIFIER, *s.* कूटकः, कूटकृत्, कपटकारी *m.* (न्), मिथ्याकारी *m.*—(Disprover) खण्डनकृत्, प्रत्याख्याता *m.* (तृ), अधरीकारी *m.*

To FALSIFY, *v. a.* (Counterfeit) कूटं कृ, कपटं कृ, छल् (c. 10. छलयति -यितुं), अन्यथा कृ, मिथ्या कृ.—(Disprove) खण्ड् (c. 10. खण्डयति -यितुं), अधरीकृ, असत्यम् इति सूच् (c. 10. सूचयति -यितुं).—(Violate, break) अतिक्रम् (c. 1. -क्रामति -क्रमितुं), भिद् (c. 7. भिनत्ति, भेत्तुं), लुप् (c. 6. लुम्पति, लोप्तुं).

To FALSIFY, *v. n.* असत्यं वद् (c. 1. वदति -दितुं), मिथ्या or मृषा वद्.

FALSITY, *s.* असत्यता, निःसत्यता, अनृतता, अयाथार्थ्यं, वितथत्वं, अलीकता.

To FALTER, *v. n.* (Speak with broken utterance) स्वरभङ्गेन or भग्नस्वरेण or स्खलद्वाक्येन वद् (c. 1. वदति -दितुं), स्खलितं वद्, स्वरेण स्खल् (c. 1. स्खलति -लितुं, c. 10. स्खलयति -यितुं), गद्गदया वाचा वद्, अस्पष्टवाचा वद्, गद्गद (nom. गद्गदति).—(Tremble, totter) स्खल्, प्रस्खल्, स्खलनं कृ, कम्प् (c. 1. कम्पते -म्पितुं), वेप् (c. 1. वेपते -पितुं).

FALTERING, *part.* or *a.* स्खलितवाक्यः -क्या -क्यं, भग्नस्वरः -रा -रं, भिन्नस्वरः -रा -रं.

FALTERING, *s.* स्खलनं, वाक्यस्खलनं, स्खलद्वाक्यं, स्वरभङ्गः, स्वरभेदः, गद्गदवाक् *f.* (च्), अस्पष्टवचनं.

FALTERINGLY, *adv.* स्खलत्स्वरेण, स्खलद्वाक्येन, स्वरभङ्गेन, गद्गदवाचा.

FAME, *s.* कीर्त्तिः *f.*, यशः *n.* (स्), ख्यातिः *f.*, सुख्यातिः *f.*, परिख्यातिः *f.*, विश्रुतिः *f.*, प्रतिष्ठा, विश्रावः, प्रसिद्धिः *f.*, प्रकीर्त्तिः *f.*, कीर्त्तना -नं, प्रथा, प्रथितिः *f.*, सम्प्रथा, समाख्या, समाज्ञा, प्रतिपत्तिः *f.*, विख्यातिः *f.*, प्रविख्यातिः *f.*, प्रतिख्यातिः *f.*, रूढिः.—(Rumour) जनश्रुतिः *f.*, जनप्रवादः, जनोदाहरणं.

FAMED, *a.* ख्यातः -ता -तं, विख्यातः -ता -तं, प्रसिद्धः -द्धा -द्धं, विश्रुतः -ता -तं, प्रथितः -ता -तं, कीर्त्तितः -ता -तं, समाख्यातः -ता -तं, लोकविश्रुतः -ता -तं.

FAME-GIVING, *a.* कीर्त्तिकरः -री -रं, यशस्करः -री -रं, कीर्त्तिदः -दा -दं.

FAMILIAR, *a.* (Domestic) गृहजः -जा -जं -जातः -ता -तं, आत्मवैश्मिकः -की -कं, कौलिकः -की -कं, कुल in comp.—(Well acquainted with, intimate) परिचितः -ता -तं, सुविद् *m. f. n.*, सुसंसर्गी -र्गिणी -र्गि (न्), संस्तुतः -ता -तं; 'with the scriptures,' शास्त्रज्ञः, अधीतशास्त्रः; 'with law,' स्मृतिकुशलः.—(Accustomed to) अभ्यस्तः -स्ता -स्तं.—(Well-known) सुविदितः -ता -तं, सुज्ञातः -ता -तं, प्रसिद्धः -द्धा -द्धं.—(Unceremonious) आदरहीनः -ना -नं, निर्गौरवः -वा -वं, निरादरः -रा -रं.—(Ordinary) प्राकृतः -ता -तं, लौकिकः -की -कं, लोकसिद्धः -द्धा -द्धं, प्रसिद्धः -द्धा -द्धं; 'familiar conversation,' विश्रम्भालापः.

FAMILIAR, *s.* (Friend) सुपरिचितः सुहृद् *m.*; दृढसुहृद् *m.*, सुसंसर्गी *m.*

(न्), चिरमित्रं, ज्ञातः.

Familiarity, *s.* (Intimate association) सुसंसर्गः, दृढसंसर्गः, संसर्गित्वं, संसक्तिः *f.*, आसङ्गः, संयोगः.—(Intimate acquaintance) परिचयः, सुपरिचयः, परिज्ञानं, संस्तवः.—(Freedom from ceremony, affability) अनादरः, आदरहीनता, गौरवहीनता, अभिगम्यता.

To familiarize, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासेन सुगमं -मां -मं or सुकरं -रां -रं कृ, निरन्तराभ्यासं कृ, परिचयं कृ.

Familiarized, *p.p.* अभ्यस्तः -स्ता -स्तं, कृताभ्यासः -सा -सं, कृतपरिचयः -या -यं.

Familiarly, *adv.* निर्गौरवं, गौरवं विना, निरादरं, अनादरेण, चिरमित्रवत्, सुपरिचितवत्; 'familiarly conversing,' विश्रब्धप्रलापी -पिनी -पि (न्).

Family, *s.* (Race) कुलं, वंशः, कुटुम्बः, जातिः *f.*, गोत्रं, सन्तानः, प्रवरं.—(Lineage) अन्वयः, सन्ततिः *f.*, जननं, आवलिः *f.*, अन्ववायः.—(Household) गृहजनः, अभिजनः, स्वजनः, परिजनः, कुटुम्बकं, स्त्रीपुत्रकन्यादि; 'head of a family,' कुटुम्बी, कौटुम्बिकः, कुलपतिः *m.*, कुलोद्वहः; 'of the same family,' सकुलः -ला -लं, सकुल्यः -ल्या -ल्यं; 'relating to a family,' कौलः -ली -लं -लिकः -की -कं, कुल in comp.; 'of good or noble family,' महाकुलः -ला -लं -लीनः -ना -नं, कुलीनः -ना -नं, कौलेयः -यी -यं, कुलिकः -का -कं, कुलोन्नतः -ता -तं; 'of low family,' दुष्कुलीनः -ना -नं, अकुलीनः -ना -नं; 'a woman of good family,' कुलनारी, कुलकन्या; 'of royal family,' राजवंश्यः -श्या -श्यं; 'family honour,' कुलमर्य्यादा; 'family pride,' कुलाभिमानं, कुलोन्नतिः *f.*; 'family disgrace,' कुलनिन्दा; 'family respectability,' कुलोत्कर्षः; 'family duty,' कुलधर्म्मः, कुलाचारः; 'family priest,' कुलाचार्य्यः; 'family party,' गृहोत्सवः; 'family feuds,' गृहच्छिद्रं; 'family connexions,' गोष्ठी, कुलसन्निधिः *f.*; 'of ancient family,' दीर्घवंशः -शा -शं; 'attentive in supporting one's family,' कुटुम्बव्यापृतः, कुलालम्बी *m.* (न्), अभ्यागारिकः, उपाधिः *m.*; 'cruelty to one's family,' सनात्म्यं.

Famine, *s.* दुर्भिक्षं, दुष्कालः, दुर्भक्ष्यं, अनाकालं, अकालः, प्रयामः, नीवाकः, अनाहारकालः, आहारविरहः, आहाराभावः, अन्नाभावः, आहारासम्भवः, दुर्मूल्यं.

To famish, *v. a.* क्षुधया पीड् (c. 10. पीडयति -यितुं) or व्यापद् (c. 10. -पादयति -यितुं) or अवसद् in caus. (-सादयति -यितुं) or कृशीकृ, क्षुधार्त्तं -र्त्तां -र्त्तं कृ.

To famish, *v. n.* आहारविरहाद् अवसद् (c. 6. -सीदति -सत्तुं) or क्षि in pass. (क्षीयते) or क्षीणशरीरः -रा -रं भू or कृशाङ्गीभू or व्यापद् (c. 4. -पद्यते).

Famished, *p.p.* or *a.* क्षुत्पीडितः -ता -तं, क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुधापीडितः -ता -तं, क्षुत्क्षामः -मा -मं, क्षुत्परिकृशः -शा -शं, क्षुधार्द्दितः -ता -तं, बुभुक्षितः -ता -तं, निरन्नः -न्ना -न्नं.

Famishment, *s.* क्षुत्पीडा, क्षुत्क्षामता, अनाहारः, अन्नाभावः, बुभुक्षा.

Famous, *a.* ख्यातः -ता -तं, सुख्यातः -ता -तं, यशस्वी -स्विनी -स्वि (न्), महायशाः -शाः -शः (स्) -यशस्कः -स्का -स्कं, कीर्त्तिमान् -मती -मत् (त्), विश्रुतः -ता -तं, प्रथितः -ता -तं, प्रसिद्धः -द्धा -द्धं, विख्यातः -ता -तं, परिख्यातः -ता -तं, कीर्त्तितः -ता -तं, प्रतिष्ठः -ष्ठा -ष्ठं, प्रतिपत्तिमान् -मती -मत् (त्), पृथुप्रथः -था -थं, लोकविश्रुतः -ता -तं, 'rendering famous,' यशस्करः -री -रं, यशस्यः -स्या -स्यं, कीर्त्तिकरः -री -रं.

Famously, *adv.* महायशसा, महाकीर्त्तिपूर्व्वं, परमं, उत्तमप्रकारेण.

Famousness, *s.* कीर्त्तिमत्त्वं, यशस्विता, ख्यातिमत्त्वं, विश्रुतिः *f.*

Fan, *s.* व्यजनं, तालवृन्तः -न्तकं, वीजनं, प्रकीर्णकं, चामरं, मरुदान्दोलः, उत्क्षेपणं, व्यजः.—(For winnowing) सूर्प्पः -र्प्पं, शूर्प्पः -र्प्पं.

To fan, *v. a.* वीज् c. 10. वीजयति -यितुं), उपवीज्, अनुवीज्, उद्वीज्, व्यजनवायुना विधू (c. 5. -धूनोति, c. 6. -धुवति -धवितुं), व्यजनवातेन शीतल (nom. शीतलयति -यितुं).

Fanatic, fanatical, *a.* देवभक्तिव्यग्रः -ग्रा -ग्रं or अतिश्रद्धाव्यग्रः, एकान्तदेवभक्तिवाद् उन्मत्तः -त्ता -त्तं or उन्मत्तबुद्धिः -द्धिः -द्धि or उच्चण्डबुद्धिः -द्धिः -द्धि or भ्रान्तबुद्धिः -द्धिः -द्धि.

Fanatic, *s.* अतिशयदेवभक्तिवाद् उन्मत्तजनः or उन्मादी *m.* (न्), मिथ्याभक्तिमान् *m.* (त्), क्षपणकः.

Fanatically, *adv.* देवभक्तिव्यग्रवत्, एकान्तदेवभक्त्या, उन्मत्तवत्.

Fanaticism, *s.* एकान्तदेवभक्तिजन्यो भावविशेषः or उन्मादः or उन्मदः or उन्मत्तबुद्धित्वं, अतिश्रद्धाप्रयुक्ता उन्मत्तता, अतिभक्तिव्यग्रता, अतिश्रद्धाव्यग्रता, भक्तिसुचण्डता, मिथ्याभक्तिः *f.*

Fancied, *p. p.* भावितः -ता -तं, विभावितः -ता -तं, मतः -ता -तं.

Fanciful, *a.* (Formed in the imagination) मानसिकः -की -कं, मनोजः -जा -जं, मनसिजः -जा -जं, मनोगतः -ता -तं, मायामयः -यी -यं, वासनाकल्पितः -ता -तं, काल्पनिकः -की -कं, मनःकल्पितः -ता -तं, मनोरथसृष्टः -ष्टा -ष्टं, सङ्कल्पजः -जा -जं, अमूलकः -का -कं.—(Fanciful man) वृथावासनाकारी *m.* (न्), दुर्वासनाकृत् *m.*, अनर्थकचिन्ताकरः, असम्भवकल्पकः, चपलबुद्धिः *m.*, मनोलौल्यवान् *m.* (त्), लोलमतिः *m.*

Fancifully, *adv.* वृथावासनापूर्व्वं, अनर्थकचिन्तापूर्व्वं, काल्पनिकप्रकारेण, मनोलौल्यात्, बुद्धिचापल्यात्.

Fancifulness, *s.* मनोलौल्यं, बुद्धिचापल्यं, लोलबुद्धित्वं, मायावत्त्वं, बुद्धिविलासिता, मिथ्यासङ्कल्पवत्त्वं.

Fancy, *s.* (The faculty of imagination) कल्पनाशक्तिः *f.*, भावना -नं, विभावना -नं, वासना, कल्पना.—(Idea) बुद्धिः *f.*, मतिः *f.*, सङ्कल्पः, मनोगतं, चिन्ता, मनोरथः, &c.—(Caprice, whim) मनोलौल्यं, बुद्धिविलासः, बुद्धिचापल्यं, चापलं, भ्रमः, आभासः, निर्बन्धः, लहरी, तरङ्गः, अभ्याद्रिः *m.*, छन्दः *n.* (स्).—(Strange fancy) वृथावासना, असम्भवकल्पना, अनर्थकवासना, मिथ्यावासना, दुर्वासना, अनर्थकचिन्ता, मनोमाया, मृषार्थकं.—(Liking) रुचिः *f.*, अभिरुचिः *f.*

To fancy, *v. n.* (Imagine, think) मन् (c. 4. मन्यते, मन्तुं), भू (c. 10. भावयति -यितुं), विभू, सम्भू, चिन्त् (c. 10. चिन्तयति -यितुं). 'To fancy one's self,' is sometimes expressed by the adj. मन्यः -न्या -न्यं; as, 'one who fancies himself learned,' पण्डितम्मन्यः; 'one who fancies himself good,' साधुम्मन्यः; 'one who fancies herself beautiful,' सुन्दरीम्मन्या.

To fancy, *v. a.* (Form in the mind) मनसा क्लृप् (c. 10. कल्पयति -यितुं) or भू in caus. (भावयति -यितुं) or कृ.—(Like) अभिनन्द् (c. 1. -नन्दति -न्दितुं), रुच् (c. 1. रोचते -चितुं) with dat. of the person; as, 'he fancies that,' तत् तस्मै रोचते; 'doing what one fancies,' कामकारी *m.* (न्); 'eating what one fancies,' कामभक्षः.

Fancy-framed, *a.* मनःकल्पितः -ता -तं, वासनाकल्पितः -ता -तं, मनोजः -जा -जं, मनसिजः -जा -जं, मनोरथसृष्टः -ष्टा -ष्टं, मानसिकः -की -कं.

Fancy-sick, *a.* विकृतबुद्धिः -द्धिः -द्धि; 'one who fancies himself sick,' रोगिणम्मन्यः.

Fane, *s.* देवतागारः, देवागारः, देवालयः, देवतायतनं, देवभवनं, देवप्रासादः, देवगृहं, देववेश्म *n.* (न्), देवतामन्दिरं, देवतावासः.

Fang, *s.* दंष्ट्रा, दशनः -नं, रदः -दनः, दन्तः, उदग्रदन्तः, दीर्घदन्तः, विषाणः

-ष्ट्रा, दाढा, दाढका, राक्षसी; 'of a serpent,' विषदन्तः, आशीः *f.* (स्).—(Claw) नखः.

FANGED, *a.* दंष्ट्री -ष्ट्रिणी -ष्ट्रि (न्), दन्ती -न्तिनी -न्ति (न्), दीर्घदन्तवान् -वती -वत् (त्).

FANGLESS, *a.* निर्दशनः -ना -नं, भग्नदंष्ट्रः -ष्ट्रा -ष्ट्रं, गलितदन्तः -न्ता -न्तं, निर्दन्तः -न्ता -न्तं, दशनोच्छिष्टः -ष्टा -ष्टं.

FAN-LIGHT, *s.* व्यजनाकारो गवाक्षः or गृहाक्षः.

FANNED, *p. p.* वीजितः -ता -तं, उपवीजितः -ता -तं, वीज्यमानः -ना -नं, उद्वीज्यमानः -ना -नं, व्यजनेन विधूयमानः -ना -नं or विधुतः -ता -तं.

FANNER, *s.* वीजयिता *m.* (तृ), वीजनकर्त्ता *m.* (र्त्तृ), विधविता *m.* (तृ).

FANTASM, *s.* मिथ्यावासना, मनोरथसृष्टिः *f.*, आभासः, अपच्छाया.

FANTASTIC, FANTASTICAL, *a.* (Existing in the imagination) मनःकल्पितः -ता -तं, मनसिजः -जा -जं, वासनाकल्पितः -ता -तं, मानसिकः -की -कं.—(Capricious, whimsical) चपलः -ला -लं, लोलः -ला -लं.—(Odd) विषमः -मा -मं, असङ्गतः -ता -तं, अपरूपः -पा -पी -पं, विलक्षणः -णा -णं.

FANTASTICALLY, *adv.* चपलं, चापल्येन, मनोलौल्यात्, विषमं, असङ्गतं.

FANTASTICALNESS, *s.* चापल्यं, मनोलौल्यं, वैषम्यं, अपरूपता, असङ्गतत्वं.

FANTASY, *s.* *See* FANCY.

FAR, *a.* दूरः -रा -रं, विदूरः -रा -रं, दूरस्थः -स्था -स्थं -स्थायी -यिनी -यि (न्), दूरवर्त्ती -र्त्तिनी -र्त्ति (न्), दूरीभूतः -ता -तं, अनुपस्थायी -यिनी -यि (न्), अनुपस्थः -स्था -स्थं, असन्निकृष्टः -ष्टा -ष्टं, विप्रकृष्टः -ष्टा -ष्टं, असन्निहितः -ता -तं; 'very far,' सुदूरः -रा -रं, दविष्ठः -ष्ठा -ष्ठं, दवीयान् -यसी -यः (स्).

FAR, *adv.* (At a distance) दूरं, दूरे, दूरतस्, विदूरतस्, आरात्.—(To a distance) दूरं, दूरपर्य्यन्तं.—(By a distance) दूरेण.—(From far) दूरात्, दूरतस्.—(To a great extent) अत्यन्तं, भृशं, बहु, सु or अति or अतिशय prefixed.—(As far as) expressed by आ prefixed governing the abl. c., or by पर्य्यन्तं or अन्त affixed; as, 'the earth as far as the ocean,' आसमुद्रात् or समुद्रपर्य्यन्तं or सागरान्ता पृथिवी.—(By far) दूरेण; 'action is by far inferior to devotion,' कर्म्म दूरेण अवरं योगात्.—(How far?) किं पर्य्यन्तं, कियत् पर्य्यन्तं, कियत् प्रमाणं.—(So far) तदन्तं, तत्पर्य्यन्तं.—(Far off) दूरस्थः -स्था -स्थं, दूरसंस्थः -स्था -स्थं, दूरीभूतः -ता -तं; 'the day being far spent,' अतिक्रान्ते दिवसे; 'a woman far gone in love,' दूरगतमन्मथा.

FAR-EXTENDED, *a.* बहुविस्तीर्णः -र्णा -र्णं, सर्व्वव्यापी -पिनी -पि (न्).

FAR-FAMED, *a.* पृथुप्रथः -था -थं, पृथुयशाः -शाः -शः (स्), महायशाः &c.

FAR-FETCHED, *a.* क्लिष्टः -ष्टा -ष्टं, यत्नकृतः -ता -तं; 'far-fetched idea,' क्लिष्टकल्पना.

FAR-SEEING, *a.* दूरदर्शी -र्शिनी -र्शि (न्), दीर्घदर्शी -र्शिनी -र्शि (न्).

FAR-SIGHTED, *a.* दूरदृष्टिः -ष्टिः -ष्टि, दीर्घदृष्टिः -ष्टिः -ष्टि, पारदृश्वा -श्वा -श्व (न्).

FARCE, *s.* प्रहसनं, विलासिका, दुर्म्मल्लिका, हास्योत्पादको नाटकः, परिहासजनकम् उपरूपकं.

FARCICAL, *a.* प्रहसनसम्बन्धी -न्धिनी -न्धि (न्).—(Droll) हासकरः -री -रं, हास्यः -स्या -स्यं, उपहास्यः -स्या -स्यं, रसिकः -का -कं, विनोदी -दिनी -दि (न्), हास्योत्पादकः -का -कं, असङ्गतः -ता -तं, अपरूपः -पा -पं.

FARCY, *s.* अश्वानां चर्म्मरोगविशेषः or दुश्चर्म्मत्वं or चर्म्मदूषिका.

FARDEL, *s.* कूर्चः, गुच्छः -च्छकः, पोटलिका, पोट्टली, भारः.

To FARE, *v. n.* (Be in any state) वृत् (c. 1. वर्त्तते -र्त्तितुं), अस् (c. 2. अस्ति), भू (c. 1. भवति -वितुं), स्था (c. 1. तिष्ठति, स्थातुं); 'to fare well,' सुस्थः -स्था -स्थं or सुस्थितः -ता -तं भू or अस्; 'to fare badly,' दुःस्थः -स्था -स्थं भू or अस्; 'faring well,' भविष्णुः -ष्णुः -ष्णु, भूष्णुः -ष्णुः -ष्णु, भविता -त्री -तृ (तृ).—(Feed) भोजनं कृ, भुज् (c. 7. भुंक्ते, भोक्तुं), आहारं कृ; 'to fare well,' स्वाद्वन्नानि or उत्तमान्नानि or परमान्नानि भुज्.

FARE, *s.* (Passage-money) आतारः, आतरः, तरपण्यं, तरमूल्यं, तारिकं, तार्य्यं, अनुतरं.—(Food) भोजनं, आहारः, अन्नं, भक्ष्यं; 'good fare,' उत्तमाहारः, परमान्नं, उत्तमान्नं; 'bad fare,' कदन्नं.

FAREWELL, *adv.* (To bid farewell) आमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्, आप्रच्छ् (c. 6. -पृच्छते -ति -प्रष्टुं).—(Bidding farewell) आमन्त्रणं, आप्रच्छनं, प्रस्थानकाले कुशलवादः or प्रणामः or नमस्कारः; 'farewell!' कुशलं भूयात्, सुखं भूयात्, कल्याणं भूयात्, सुखम् आस्तां.

FARINA, *s.* परागः, सुमनोरजः *n.* (स्), पुष्परेणुः *m.*, सुमनःपांशुः *m.*, पुटः *m.*

FARINACEOUS, *a.* शस्यमयः -यी -यं, धान्यमयः -यी -यं, गोधूमचूर्णमयः -यी -यं.

FARM, *s.* क्षेत्रं, भूमिः *f.*, क्षेत्रभूमिः, भूः *f.*, कृषिक्षेत्रं, कर्षणभूमिः *f.*, सीर्य्यं.

To FARM, *v. a.* (Let out the collection of the revenue or any other work at a certain rate per cent.) शते शते निरूपितमूल्यं प्रतिज्ञाय or शते शते नियमितभागो मया दातव्य इति सन्धिं कृत्वा अमुकजनं शुल्ककरादिग्रहणे or किञ्चित्कर्म्मनिर्वहणे नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं).—(Undertake any work for another at a certain rate per cent.) शते शते नियमितभागो मह्येतमार्पयेम् उद्धरणीयं or शते शते निरूपितमूल्यं मया ग्रहणीयम् इति सन्धिं कृत्वा अमुकजनस्थाने किञ्चित् कर्म्म निर्वह् in caus. (-वाहयति -यितुं) or नियमितमूल्यम् अपेक्ष्य परस्थाने किञ्चित् कर्म्म व्यवसो (c. 4. -स्यति -सातुं) or अध्यवसो.—(Farm the tolls) निरूपितमूल्यं दत्त्वा राजस्थाने घट्टनदीतरादिदेयशुल्कान् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Cultivate land) क्षेत्रं or भूमिं कृष् (c. 6. कृषति, c. 1. कर्षति, क्रष्टुं).

FARM-HOUSE, *s.* क्षेत्रिकगृहं, कर्षकगृहं, क्षेत्रिकवेश्म *n.* (न्), क्षेत्रपतिगृहं.

FARM-YARD, *s.* क्षेत्रिकगृहोपान्ते वाटी or वाटिका or चत्वरं.

FARMER, *s.* क्षेत्रकर्षकः, क्षेत्रिकः, क्षेत्री *m.* (न्), कर्षकः, कृषिकः, कृषकः, क्षेत्राजीवः, कृषिजीवी *m.* (न्), कृषीवलः, कार्षकः, क्षेत्रपतिः *m.*—(Of the revenue) शते शते नियमितभागो मह्येतमार्पयेम् उद्धरणीय इति सन्धिं कृत्वा शुल्ककरादि गृह्णाति यो जनः.

FARMING, *s.* कृषिकर्म्म *n.* (न्), कृषिः *f.*, कार्षिः *f.*, क्षेत्रिकव्यापारः, अनृतं.

FARRAGINOUS, *a.* सान्निपातिकः -की -कं, सन्निपतितः -ता -तं, प्रकीर्णः -र्णा -र्णं, बहुद्रव्यनिर्म्मितः -ता -तं, नानाद्रव्यघटितः -ता -तं.

FARRAGO, *s.* सन्निपातः, प्रकीर्णकं, नानाद्रव्यसम्मिश्रणं.

FARRIER, *s.* अश्वचिकित्सकः, अश्ववैद्यः.—(Shoer of horses) अश्वपादुकाबन्धा *m.* (न्धृ), अश्वपादुकाकारः.

FARRIERY, *s.* अश्वचिकित्सा, अश्वरोगचिकित्सनविद्या.

FARROW, *s.* शूकरशावकगणः, शूकरपोतकगणः, शूकरापत्यं.

To FARROW, *v. n.* शूकरीप्रकारेण शावकगणं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू.

FART, *s.* पर्द्दः -र्द्दनं, गुदरवः, वायुशब्दः, शर्द्धः.

FARTHER, *adv.* दूरतरं, विदूरतरं, अधिकदूरे, अग्रे, अग्रतरं, अग्रतस्, पुरतस्, पुरस्.—(Moreover) अपरं, अपरञ्च, अधिकं, अधिकन्तु, अन्यच्च, अपिच, किञ्च, परन्तु. *See* the more correct word *further.*

FARTHER, *a.* दूरतरः -रा -रं, विदूरतरः -रा -रं, दवीयान् -यसी -यः (स्), अधिकदूरस्थः -स्था -स्थं, अपरः -रा -रं; 'the farther side,' पारः; 'on the farther side,' पारे.

FARTHEST, *a.* दूरतमः -मा -मं, विदूरतमः -मा -मं, दविष्ठः -ष्ठा -ष्ठं, सुदूरः

-रा -रं, आयतदूरस्थः -स्था -स्थं.

FARTHING, *s.* ताम्रमुद्रा, कपर्दकः, वराटकः.

FASCES, *s.* धर्म्माध्यक्षलक्षणं, दण्डनायकचिह्नं, पूर्व्वकाले रोमनगरे दण्डलाक्षणिकः काष्ठखण्डसम्बद्धः परशुः.

FASCIA, *s.* पट्टः, पट्टकः, बन्धनं, वेष्टनं, आवेष्टनं, अवलिका.

FASCIATION, *s.* पट्टबन्धनं, अवलिकाबन्धनं, अनुवेष्टितं.

To FASCINATE, *v. a.* (Bewitch) मुह् in caus. (मोहयति -यितुं), मोहं कृ, मायां कृ, मन्त्रद्वारेण वशीकृ or अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं) or अनुमन्त्र् or अभिचर् (c. 10. -चारयति -यितुं).—(Captivate) चित्तं or मनो हृ (c. 1. हरति, हर्तुं) or रम् in caus. (रमयति -यितुं) or आकृष् (c. 1. -कर्षति -क्रष्टुं), हृदयं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

FASCINATED, *p.p.* मोहितः -ता -तं, विमोहितः -ता -तं, सम्मोहितः -ता -तं, परिमूढः -ढा -ढं, सम्मुग्धः -ग्धा -ग्धं, आकृष्टचित्तः -त्ता -त्तं, हृतमानसः -सा -सं, वशीकृतः -ता -तं, वशीभूतः -ता -तं.

FASCINATING, *a.* चित्तहारी -रिणी -रि (न्), चित्तापहारी &c., मनोहरः -रा -रं, मोहनः -ना -नी -नं, विमोहनः &c., मोही -हिनी -हि (न्), परिमोही &c., आकर्षकः -र्की -कं, आकर्षिकः -र्की -कं, आकृष्टवान् -वती -वत् (त्), हृदयग्राही -हिणी -हि (न्); 'a fascinating woman,' मुग्धा, प्रमदा, मदिरेक्षणा.

FASCINATION, *s.* मोहः -हनं, परिमोहनं, विमोहनं, सम्मोहः, आकर्षः, माया, वशक्रिया, अभिमन्त्रणं, अभिचारः, इन्द्रजालं, कार्म्मणं -णत्वं.

FASCINE, *s.* युद्धेऽव्यवहारितः काष्ठभारः or काष्ठकूर्चः.

FASHION, *s.* (Form) आकारः, आकृतिः *f.*, रूपं, संस्कारः, मूर्त्तिः *f.*, विधानं, संस्थानं.—(Cut, shape) आकारः, आकृतिः *f.*, रीतिः *f.*—(Prevailing custom) लौकिकाचारः, लोकाचारः, लोकव्यवहारः, लोकरीतिः *f.*, लोकमार्गः, लोकव्यापारः, धारा, लोकमतं.—(Manner, mode) प्रकारः, विधः, विधिः *m.*, रीतिः *f.*, मार्गः; 'after this fashion,' अनेन प्रकारेण, एवंविधं; 'after one's own fashion,' स्वानुरूपं.

To FASHION, *v. a.* (Form) निर्मा (c. 2. -माति, c. 3. -मिमीते, c. 4. -मायते -मातुं), विनिर्मा, रच् (c. 10. रचयति -यितुं), विरच्, कॢप् (c. 10. कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं), घट् (c. 10. घटयति -यितुं), कृ, संस्कृ.—(Adapt) युज् (c. 10. योजयति -यितुं), सन्धा, समाधा.

FASHIONABLE, *a.* लौकिकः -की -कं, व्यावहारिकः -की -कं, आचारिकः -की -कं, लोकसिद्धः -द्धा -द्धं, लोकप्रसिद्धः -द्धा -द्धं, व्यवहारसिद्धः -द्धा -द्धं, लोकाचारानुसारी -रिणी -रि (न्), लोकव्यवहारानुसारी &c., लोकमतानुसारी &c., लौकिकाचारानुरूपः -पा -पं, लौकिकरीत्यनुरूपः -पा -पं, लोकमार्गानुयायी -यिनी -यि (न्).

FASHIONABLY, *adv.* लोकाचारानुसारेण, लोकव्यवहारानुसारात्, लोकरीतिवत्.

FASHIONED, *p.p.* निर्म्मितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, कल्पितः -ता -तं, कॢप्तः -प्ता -प्तं, घटितः -ता -तं, कारितः -ता -तं.

FAST, *a.* (Firm, close) दृढः -ढा -ढं, स्थिरः -रा -रं, स्थावरः -रा -रं, स्तब्धः -ब्धा -ब्धं, अचलः -ला -लं, निश्चलः -ला -लं, दृढसन्धिः -न्धिः -न्धि, गाढः -ढा -ढं.—(Fixed) बद्धः -द्धा -द्धं, सन्निबद्धः -द्धा -द्धं; 'a fast colour,' स्थिररङ्गः; 'a fast friend,' दृढसौहृदः, दृढभक्तिः *m*; 'a fast sleep,' सुषुप्तिः *f.*, सुनिद्रा, अतिशयनिद्रा, अघोरनिद्रा.—(Quick in motion) त्वरितगतिः -तिः -ति, शीघ्रगामी -मिनी -मि (न्), द्रुतगतिः -तिः -ति, शीघ्रः -घ्रा -घ्रं, महावेगः -गा -गं, वेगवान् -वती -वत् (त्).

FAST, *adv.* (Firmly) दृढं, गाढं, स्थिरं; 'fast-rooted,' बद्धमूलः -ला -लं; 'held fast,' सुगृहीतः -ता -तं, सुधृतः -ता -तं, करलग्नः -ग्ना -ग्नं; 'fast bound,' दृढबद्धः -द्धा -द्धं; 'shut fast,' दृढसंवृतः -ता -तं, दृढपिहितः -ता -तं; 'fast asleep,' सुषुप्तः -प्ता -प्तं, सुनिद्रितः -ता -तं, अतिशयनिद्रितः -ता -तं, सुखसुप्तः -प्ता -प्तं or सुखं सुप्तः -प्ता -प्तं.—(Swiftly) शीघ्रं, त्वरितं, द्रुतं, क्षिप्रं, सत्वरं, आशु, अविलम्बितं, अञ्जसा; 'going fast,' त्वरितगतिः -तिः -ति; 'spoken fast,' त्वरितोदितः -ता -तं.

To FAST, *v. n.* उपवस् (c. 1. -वसति -वस्तुं), लङ्घ् (c. 1. लङ्घते -ङ्घितुं), निरूपितकालपर्य्यन्तं भोजनात् or आहारात् निवृत् (c. 1. -वर्त्तते -र्त्तितुं), उपवासं कृ, अनशनं कृ, आहारनिवृत्तिं कृ; 'to death,' प्रायोपवेशनं कृ.

FAST, *s.* उपवासः, उपवस्तं, उपोषितं, उपोषणं, औपवस्तं, अनशनं, अनाहारः, अभोजनं, लङ्घनं, आक्षपणं.

FAST-DAY, *s.* उपवासदिनं, उपोषणदिनं, अनाहारदिवसः, लङ्घनदिवसः.

FASTED, *p. p.* उपोषितः -ता -तं, कृतोपवासः -सा -सं.

To FASTEN, *v. a.* (Make fast) बन्ध् (c. 9. बध्नाति, बन्द्धुं), सम्बन्ध्, निबन्ध्, अनुबन्ध्.—(Shut up) पिधा (c. 3. -दधाति -धातुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं).—(Bar) अर्गलेन बन्ध्, कील् (nom. कीलयति -यितुं).—(Unite together) सम्बन्ध्, संयुज् (c. 7. -युनक्ति -योक्तुं), संश्लिष् in caus. (-श्लेषयति -यितुं), सन्धा, संलग्नीकृ.—(Tie) योक्त्र् (nom. योक्त्रयति -यितुं), ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं).—(Tie on) पिनह् (c. 4. -नह्यति -नद्धुं), आनह्, आबन्ध्, अनुबन्ध्.—(Impress) प्रणिधा.—(Make firm) दृढीकृ, स्थिरीकृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं).

FASTENED, *p. p.* बद्धः -द्धा -द्धं, पिहितः -ता -तं, पिधानवान् -वती -वत् (त्), सपिधानः -ना -नं, निरुद्धः -द्धा -द्धं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, संयोजितः -ता -तं, संलग्नीकृतः -ता -तं, लग्नः -ग्ना -ग्नं, पिनद्धः -द्धा -द्धं, आनद्धः -द्धा -द्धं, कीलायितः -ता -तं, कीलितः -ता -तं.

FASTENING, *s.* (Any thing that binds) बन्धनं -नी, बन्धनग्रन्थिः *m.*—(Joining) सन्धिः *m.*—(Of a bracelet) कुडुपः, सन्धिः *m.*

FASTER, *s.* उपवासी *m.* (न्), उपवासकर्त्ता *m.* (र्त्तृ), कृतोपवासः, सोपवासः.

FASTER, *adv.* (More rapidly) शीघ्रतरं, अधिकवेगेन, लघुतरं.

FASTIDIOUS, *a.* उपेक्षकः -का -कं, अवमानी -निनी -नि (न्), सावहेलः -ला -लं, सावज्ञः -ज्ञा -ज्ञं, घृणी -णिनी -णि (न्), दुस्तोषणीयः -या -यं, दुःसन्तोषणीयः -या -यं, दुःखेन सन्तोषणीयः -या -यं or तर्पणीयः -या -यं.

FASTIDIOUSLY, *adv.* सावज्ञानं, उपेक्षया, सावहेलं, सावमानं, दुस्तोषणीयं.

FASTIDIOUSNESS, *s.* अवमानशीलता, उपेक्षकत्वं, सावहेलत्वं, दुस्तोषणीयता, दुस्तर्पणीयता, अवमानिता.

FASTING, *s.* उपवासः, उपोषणं -षितं, अनशनं, निरशनं, अभोजनं, अभक्षणं, अनाहारः, लङ्घनं, आक्षपणं, अपतर्पणं; 'to death,' प्रायः -यणं, प्रायोपवेशनं -शनिका.

FASTING, *part.* or *a.* उपवासी -सिनी -सि (न्), निराहारः -रा -रं, अनशनः -ना -नं, अभक्षः -क्षा -क्षं, अनाशकः -का -कं, अकृताहारः -रा -रं; 'to death,' प्रायोपविष्टः -ष्टा -ष्टं.

FASTNESS, *s.* (Firmness) दृढता, स्थिरता, स्तब्धता, अचलता, निश्चलता.—(Strong-hold) दुर्गं, कोटिः *f.*, शिखरी *m.* (न्).

FASTUOUS, *a.* गर्व्वी -र्व्विणी -र्व्वि (न्), सावलेपः -पा -पं, उद्धतः -ता -तं.

FAT, *a.* पीवरः -रा -री -रं, पीनः -ना -नं, मेदस्वी -स्विनी -स्वि (न्), पुष्टः -ष्टा -ष्टं, पुष्टाङ्गः -ङ्गी -ङ्गं, मांसलः -ला -लं, स्थूलः -ला -लं, स्थूलकायः -या -यं, प्यानः -ना -नं, आप्यानः -ना -नं, प्रप्यानः -ना -नं, स्फीतः -ता -तं, स्थूलः -ला -लं, पीवा -वा -व (न्), तुन्दी -न्दिनी -न्दि (न्), तुन्दिकः -का -कं, उच्छूनः -ना -नं, कुक्षलः -ली -लं.—(Fertile) स्फीतः -ता -तं; 'fat land,' उर्व्वरा.

FAT, *s.* मेदः *n.* (स्), वसा, वपा, मांससारः, मांसस्नेहः, घृतं.

To FAT, *v. a.* प्यै in caus. (प्याययति -यितुं), आप्यै, पुष् in caus. (पोष-

यति -यितुं), स्त्याय् in caus. (स्त्यायवयति -यितुं), स्थूलीकृ, पीवरीकृ, पुष्टीकृ.

To FAT, *v. n.* प्याधी (c. 1. -प्यायते -प्यातुं), पुष् (c. 4. पुष्यति, पोष्टुं), पीवरीभू.

FAT. *s.* (tub) भाण्डं. *See* VAT.

FATAL, *a.* (Proceeding from fate, relating to it) दैवः -वी -वं -विकः -की -कं, दैष्टिकः -की -कं, कालिकः -की -कं, दैवप्रयुक्तः -क्ता -क्तं, दैववशः -शा -शं, नियतः -ता -तं, आवश्यकः -की -कं.—(Deadly, calamitous) प्राणघातकः -का -कं, प्राणहरः -रा -रं, प्राणान्तिकः -की -कं or प्राणान्तकः, प्राणनाशकः -की -कं, मृत्युजनकः -का -कं, मारात्मकः -का -कं, साङ्घातिकः -की -कं, मारकः -का -कं, अन्तकरः -रा -रं, व्यापादकः -का -कं, आत्ययिकः -की -कं, अनायुष्यः -ष्या -ष्यं, मर्म्मान्तिकः -की -कं, मर्म्मभेदी -दिनी -दि (न्), दुरन्तः -न्ता -न्तं, दुर्विपाकः -का -कं.

FATALISM, *s.* दैवायत्तता, दैवाधीनता, दैववशित्वं, दैवचिन्ता, दैविकता, दैष्टिकता.

FATALIST, *s.* दैवपरः, दैवाधीनः, दैवायत्तः, दैवपरायणः, दैवचिन्तकः.

FATALITY, *s.* आवश्यकता, अवश्यकत्वं, भवितव्यता, कृतान्तः, नियतिः *f.*

FATALLY, *adv.* (By necessity) दैवात्, दैववशात्, दैवनियोगात्.—(Mortally) प्राणनाशेन, मर्माघ्नं, आत्ययिकं.

FATE, *s.* दैवं, कृतान्तः, विधाता *m.* (तृ), विधिः *m.*, भागधेयं, भाग्यं, नियतिः *f.*, भवितव्यता, दिष्टं, दैविकं, अदृष्टं, कालनियोगः, कालः, कालधर्म्मः, गतिः *f.*, व्यसनं, कर्म्म *n.* (न्), कर्म्मवशः, कार्य्यवशः, प्राक्तनं.—(Death) मृत्युः *m.*, नाशः, विनाशः, क्षयः; 'ill-fate,' दुर्दैवं, दौर्भाग्यं; 'good-fate,' सौभाग्यं.

FATED, *a.* दैवनियुक्तः -क्ता -क्तं, कालनियुक्तः -क्ता -क्तं, दैवनिर्दिष्टः -ष्टा -ष्टं, नियतः -ता -तं, दैविकः -की -कं, दैष्टिकः -की -कं, भवितव्यः -व्या -व्यं; 'one whose fated time is come,' प्राप्तकालः -ला -लं; 'well-fated,' सुभाग्यः -ग्या -ग्यं, सौभाग्यवान् -वती -वत् (त्), पुण्यवान् &c.; 'ill-fated,' दुर्दैवग्रस्तः -स्ता -स्तं, दैवोपहतः -ता -तं.

FATHER, *s.* पिता *m.* (तृ), जनकः, जननः, जनिता *m.* (तृ), जनयिता *m.* (तृ), जन्मदः, तातः, प्रसविता *m.* (तृ), प्रजावान् *m.* (त्), धाता *m.* (तृ), वप्ता *m.* (तृ), वापः, देहकृत् *m.*, सम्भूः *m.*; 'of a family,' कुलपतिः *m.*; 'of a son,' पुत्री *m.* (न्), सुती *m.* (न्); 'father and mother,' मातापितरौ *m.* du. or मातरपितरौ, तातजनयित्र्यौ *f.* du.; 'father of all,' विश्वधाता *m.* (तृ).—(Title of respect) गुरुः, आचार्य्यः.

FATHER-IN-LAW, *s.* श्वशुरः, धर्म्मपिता *m.* (तृ), पूज्यः; 'father and mother-in-law,' श्वश्रूश्वशुरौ *m.* du.

To FATHER, *v. a.* पुत्रं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), पोष्यपुत्रं or कृत्रिमपुत्रं ग्रह्.—(Acknowledge as one's own) स्वीकृ.—(Ascribe to another as his offspring, or production) पुत्रारोपणं कृ, किञ्चित् परस्मै आरुह् in caus. (-रोपयति -यितुं), तेन प्रसुतं or तेन विरचितम् इति विज्ञा in caus. (-ज्ञापयति -यितुं).

FATHERHOOD, *s.* पितृत्वं -ता, जनकत्वं -ता, पितृभावः, प्रजावत्त्वं, पितृधर्म्मः.

FATHER-LAND, *s.* पैतृकभूमिः *f.*, पैतृकदेशः, पैतृकविषयः, जन्मभूमिः *f.*, मूलभूमिः.

FATHERLESS, *a.* अपितृकः -का -कं, पितृहीनः -ना -नं, तातहीनः -ना -नं, क्षमदः or क्षेमदः *m.* only, अनाथः -था -थं, निर्नाथः -था -थं.

FATHERLINESS, *s.* पितृतुल्यता, ताततुल्यता, पैतृकत्वं, वात्सल्यं.

FATHERLY, *a.* पितृसन्निभः -भा -भं, पितृतुल्यः -ल्या -ल्यं, ताततुल्यः -ल्या -ल्यं, तातलः -ला -लं, पैतृकः -की -कं or पैत्रिकः, पैत्रः -त्री -त्रं, पितृनिर्विशेषः -षा -षं, मनोजवः -वा -वं.

FATHERLY, *adv.* पितृवत्, जनकवत्, तातवत्, पितृरूपेण, जनकरूपेण.

FATHOM, *s.* (Measure of length) व्यामः, व्यायामः, न्यग्रोधः.—(Penetration) वेधः -धनं, मर्म्मवेधः.

To FATHOM, *v. a.* (Sound the depth) वेधं or गाम्भीर्य्यं or तलं परीक्ष् (c. 1. -ईक्षते -क्षितुं) or निरूप् (c. 10. -रूपयति -यितुं) or मा in caus (मापयति -यितुं).—(Penetrate) व्यध् (c. 4. विध्यति, व्यद्धुं); 'one's designs,' मर्म्म व्यध्, अभिप्रायं परीक्ष् or निरूप्.

FATHOMLESS, *a.* अतलस्पर्शी -र्शिनी -र्शि, अगाधः -धा -धं, अनवगाह्यः -ह्या -ह्यं, अगम्यः -म्या -म्यं, अगम्यतलः -ला -लं.

FATIDICAL, *a.* भविष्यद्वाचकः -का -कं, भविष्यत्प्रदर्शकः -का -कं.

FATIGUE, *s.* क्लान्तिः *f.*, श्रान्तिः *f.*, क्लमः, श्रमः, आयासः, परिश्रमः, परिश्रान्तिः *f.*, खेदः, क्लेशः, क्लमित्वं, क्लमथः, अवसादः, ग्लानिः *f.*, कष्टं, व्यायामः, कायक्लेशः, तन्द्रा; 'inured to fatigue,' जितश्रमः -मा -मं.

To FATIGUE, *v. a.* खिद् in caus. (खेदयति -यितुं), क्लम् in caus. (क्लमयति -यितुं), परिक्लम्, आयस् in caus. (-यासयति -यितुं), श्रम् in caus (श्रमयति -यितुं), परिश्रम्, सद् in caus. (सादयति -यितुं), अवसद्, ग्लै in caus. (ग्लपयति -यितुं), परिग्लै, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), श्रान्तिं जन् in caus. (जनयति -यितुं).

FATIGUED, *p. p.* श्रान्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, क्लान्तः -न्ता -न्तं, श्रमार्त्तः -र्त्ता -र्त्तं, जातश्रमः -मा -मं, खिन्नः -न्ना -न्नं, खेदितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लिशितः -ता -तं, क्लेशितः -ता -तं, ग्लानः -ना -नं, परिग्लानः -ना -नं, क्लमी -मिनी -मि (न्), श्रमी -मिणी -मि (न्), अवसन्नः -न्ना -न्नं, अवसादितः -ता -तं, सश्रमः -मा -मं; 'to be fatigued,' श्रम् (c. 4. श्राम्यति, श्रमितुं), आयस् (c. 4. -यस्यति -यसितुं), खिद् (c. 4 खिद्यते, खेत्तुं), क्लम् (c. 4. क्लाम्यति, क्लमितुं), कष्ट (nom. कष्टायते).

FATIGUING, *a.* श्रमकरः -री -रं, श्रमजनकः -का -कं, क्लेशकः -की -कं.

FATNESS, *s.* स्थूलता, स्थौल्यं, मेदस्विता, पुष्टता, पुष्टिः *f.*, पीनता, पीवरत्वं स्फीतिः *f.*, मेदोवृद्धिः *f.*, स्फातिः *f.*, उन्मेदा, शरीरस्थूलता, स्थूलकायत्वं आप्यायनं.

To FATTEN, *v. a.* पी in caus. (प्याययति -यितुं), आप्यै, पुष् in caus (पोषयति -यितुं), स्थूलीकृ, पीवरीकृ, पुष्टीकृ, स्त्याय् in caus. (स्त्यापयति -यितुं), संवृध् in caus. (वर्धयति -यितुं).

To FATTEN, *v. n.* आप्यै (c. 1. -प्यायते -प्यातुं), पुष् (c. 4. पुष्यति, पोष्टुं) स्थूलीभू, पीवरीभू, संवृध् (c. 1. -वर्धते -र्धितुं), स्त्याय् (c. 1. स्त्यायते -यितुं)

FATTENED, *p. p.* पुष्टः -ष्टा -ष्टं, पुष्टाङ्गः -ङ्गी -ङ्गं, आप्यायितः -ता -तं बृंहितः -ता -तं, स्थूलीकृतः -ता -तं, संवर्धितमांसः -सा -सं.

FATTENING, *a.* पौष्टिकः -की -कं, पुष्टिदः -दा -दं, बृंहणः -णा -णं.

FATTY, *a.* मेदस्वी -स्विनी -स्वि (न्), मांसलः -ला -लं, सस्नेहः -हा -हं.

FATUITY, *s.* मूर्खता, मौर्ख्यं, मूढता, मोहः, बालिशता, मुग्धता.

FATUOUS, *a.* मूर्खः -र्खा -र्खं, मूढः -ढा -ढं, बालिशमतिः -तिः -ति, दुर्बुद्धिः -द्धिः -द्धि, दुर्मतिः -तिः -ति, अल्पधीः -धीः -धि.

FAUCET, *s.* भाण्डनिवेशितो जलनिर्गमयोग्यो नाडिविशेषः.

FAULT, *s.* दोषः, अपराधः, मन्तुः *m.*, भ्रमः, छिद्रं, अगुणः, पापं, दूषणं, प्रमादः, कर्म्मदोषः, व्यतिक्रमः, परवाच्यं.—(Find fault with) निन्द् (c. 1. निन्दति -न्दितुं), उपालभ् (c. 1. -लभते -लब्धुं), दोषीकृ.

FAULT-FINDER, *s.* दोषग्राही -हिणी -हि (न्), दोषग्राहकः -का -कं, निन्दकः -का -कं, वाक्यदर्शी -र्शिनी -र्शि (न्), छिद्रानुसारी -रिणी -रि (न्), छिद्रान्वेषी -षिणी -षि (न्).

FAULTILY, *adv.* दोषेण, अपराधेन, सदोषं, सापराधं, प्रमादेन, अन्यथा.

FAULTINESS, *s.* अपराधिता -त्वं, दोषिता -त्वं, दोषवत्त्वं, सापराधता, सदोषत्वं, दुष्टता, वाच्यता.

FAULTLESS, *a.* निर्दोषः -षा -षं, निरपराधः -धा -धं, अपराधहीनः -ना -नं, अपापः -पा -पं, अनघः -घा -घं, अकल्मषः -षा -षं, अकलङ्कः -ङ्का -ङ्कं, अनेनाः -नाः -नः (स्), विरागाः -गाः -गः (स्), निश्छिद्रः -द्रा -द्रं, विशुद्धः -द्धा -द्धं, निर्म्मलः -ला -लं; 'in form,' अव्यङ्गः -ङ्गी -ङ्गं.

शुद्धरूपः -पी -पं.

FAULTLESSNESS, *s.* निर्दोषत्वं, निरपराधत्वं, दोषहीनता, विशुद्धता.

FAULTY, *a.* दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्), दोषवान् -वती -वत् (त्), निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, सापराधः -धा -धं, सदोषः -षा -षं, दोषिकः -की -कं, वाच्यः -च्या -च्यं, प्रामादिकः -की -कं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), अशुद्धः -द्धा -द्धं, प्राप्तदोषः -षा -षं, अयथार्थः -र्था -र्थं, वितथः -था -थं, अनृतः -ता -तं; 'full of faults,' बहुदोषः -षा -षं; 'a faulty statement,' मिथ्यावादः, मृषावादः; 'a faulty conclusion,' अपसिद्धान्तः.

FAUN, *s.* (Sylvan deity) वनदेवता, स्थलीदेवता, वनेचरः.

To FAVOR, *v.a.* अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुकूल (nom. अनुकूलयति -यितुं), उपकृ, उपकारं कृ, साहाय्यं कृ, प्रसादं कृ, अनुपाल् (c. 10. -पालयति -यितुं), प्रतिपाल्, भज् (c. 1. भजति -ते, भक्तुं), अनुरुध् (c. 4. -रुध्यति -रोद्धुं), जुष् (c. 6. जुषते, जोषितुं), रक्षां कृ, प्रसन्नो भू or अस्, स्नेहं कृ, कृपां कृ, परप्रियं or परहितम् इष् (c. 6. इच्छति, एषितुं).—(Resemble) सरूपः -पी -पं भू or अस्; 'a child that favors his father,' पितृरूपः पुत्रः; 'fortune favors the brave,' साहसे श्रीः प्रतिवसति.

FAVOR, *s.* (Kind regard, friendly disposition) प्रसादः, अनुग्रहः, अनुकूलता, आनुकूल्यं, प्रसन्नता, प्रीतिः *f.*, प्रियता, स्नेहः, अनुरोधः, हितेच्छा, हितेप्सा.—(Support, countenance) आग्रहः, संग्रहः, ग्रहः, आश्रयः, संश्रयः, आधारः, अनुपालनं, साहाय्यं, उपकारः, पुरस्कारः, संवर्धनं, वर्धनं, शरण्यता, अभ्युपपत्तिः *f.*—(Kind act) उपकृतं, उपकारः, सुकृतं, सुकृतिः *f.*, उपचारः, प्रियं, हितं.—(Leave, permission) अनुमतिः *f.*, अनुज्ञा; 'to ask a favour,' प्रसद् (c. 10. -सादयते -यितुं), with acc. of person, उपकारं प्रार्थ् (c. 10. -अर्थयते -यितुं); 'I ask you as a favor not to be angry with me,' प्रसादये त्वां न मे क्रोद्धुम् अर्हसि; 'conciliate the favor,' आराध् (c. 10. -राधयति -यितुं), अनुरञ्ज् in caus. (-रञ्जयति -यितुं).

FAVORABLE, *a.* प्रसन्नः -न्ना -न्नं, सुप्रसन्नः -न्ना -न्नं, अनुग्राही -हिणी -हि (न्), अनुकूलः -ला -लं, आनुग्राहकः -की -कं, हितैषी -षिणी -षि (न्), प्रियैषी &c., हितकामः -मा -मं, हितेप्सुः -प्सुः -प्सु, हितः -ता -तं, सुहितः -ता -तं, प्रियकारः -री -रं, प्रियङ्करः -री -रं, हितबुद्धिः -द्धिः -द्धि, अर्थकृत्, उपकारकः -का -कं.—(Tending to promote) उत्पादकः -का -कं; 'favorable to wealth,' अर्थोत्पादकः -का -कं; 'to longevity,' आयुष्यः -ष्या -ष्यं; 'to be favorable,' प्रसद् (c. 1. -सीदति -सत्तुं); 'I am favorable to you,' प्रसन्नोऽस्मि तव.

FAVORABLENESS, *s.* प्रसन्नता, अनुकूलता, आनुकूल्यं, हितबुद्धित्वं.

FAVORABLY, *adv.* प्रसन्नं, प्रसादेन, अनुग्रहेण, सानुग्रहं, सानुकूल्यं, प्रियं.

FAVORED, *p.p.* अनुगृहीतः -ता -तं, उपकृतः -ता -तं, प्रतिपालितः -ता -तं.

FAVORER, *s.* अनुग्राही *m.* (न्), अनुग्राहकः, उपकारकः, अनुपालकः.

FAVORITE, *s.* प्रियः -या, सुप्रियः -या, वल्लभः -भा, सुभगः -गा, हृदयप्रियः -या, स्नेहपात्रं, प्रीतिपात्रं; 'general favorite,' सर्वप्रियः; 'a royal favorite,' नृपवल्लभः, राजवल्लभः; 'a favorite wife,' सुभगा.

FAVORITE, *a.* प्रियः -या -यं, प्रियतमः मा -मं, हृदयप्रियः -या -यं, दयितः -ता -तं, इष्टतमः -मा -मं, अभीष्टः -ष्टा -ष्टं, इष्टः -ष्टा -ष्टं.

FAVORITISM, *s.* पक्षपातिता, पक्षानुग्रहः, पक्षोपग्राहित्वं, पक्षता, स्नेहः.

FAWN, *s.* मृगशावकः, मृगपोतकः, हरिणशिशुः *m.*, हरिणबालः, कुरङ्गः; 'fawn-eyed,' कुरङ्गनयनः -ना -नी -नं.

To FAWN, *v. n.* (Bring forth a fawn) मृगशावकं or कुरङ्गं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं).

To FAWN UPON, *v. n.* साष्टाङ्गपातं प्रणम्य सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, उपसान्त्व्, परिशान्त्व् or लल् (c. 10. लालयति -यितुं).

FAWNER, *s.* साष्टाङ्गपातं प्रणम्य सान्त्वकारः, लाली *m.* (न्), चाटुकारः.

FAWNING, *s.* अष्टाङ्गप्रणामपूर्वं सान्त्वनं or लालनं, अतिचाटुकारः.

FAWNINGLY, *adv.* साष्टाङ्गपातं, बद्धाञ्जलिकर्मपूर्वं, सकामचाटुकारेण.

FAY, *s.* विद्याधरी, पिशाची, योगिनी, राक्षसी. *See* FAIRY.

FEALTY, *s.* भक्तिः *f.*, प्रभुभक्तिः *f.*, भक्तता, प्रभुभक्तता, आसक्तिः *f.*, अनुषङ्गः.

FEAR, *s.* भयं, भीतिः *f.*, भीरुता, त्रासः, सन्त्रासः, परित्रासः, साध्वसं, शङ्का, आशङ्का, दरः -रं, भीष्मं, भीषणं; 'removal of fear,' भयप्रतीकारः; 'causing fear,' भयङ्करः -रा -रं, भयकारकः -का -कं, भयदः -दा -दं, भयप्रदः -दा -दं; 'cause of fear,' भयहेतुः *m.*; 'agitated by fear,' भयविह्वलः -ला -लं; 'through fear,' भयात्, त्रासात्, भीत्या, भीतेः, शङ्कया; 'through fear of punishment,' दण्डभयात्.

To FEAR, *v. a.* भी (c. 3. बिभेति, भेतुं) with abl. or gen. c. So also प्रभी, विभी, त्रस् (c. 4. त्रस्यति, त्रसितुं), वित्रस्, उद्विज् (c. 6. -विजते -जितुं), व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ् all with abl. c., शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क् with acc. c., तर्क् (c. 10 तर्कयति -यितुं).

To FEAR, *v. n.* त्रस् (c. 4. त्रस्यति, त्रसितुं), व्यथ् (c. 1. व्यथते -थितुं), उद्विग्नीभू, भयार्त्तः -र्त्ता -र्त्तं भू or अस्; 'do not fear,' मा भैषीः, मा त्रासीः or मा त्रसीः.

FEARFUL, *a.* (Affected by fear, timid) भयार्त्तः -र्त्ता -र्त्तं, भयातुरः -रा -रं, भीरुः -रुः -रु -रुकः -का -कं, सभयः -या -यं, भीतः -ता -तं, ससाध्वसः -सा -सं, सशङ्कः -ङ्का -ङ्कं, शङ्कितः -ता -तं, त्रस्तः -स्ता -स्तं, सन्त्रस्तः -स्ता -स्तं, दीनः -ना -नं, त्रसुः -सुः -सु, भीलुकः -का -कं, दरितः -ता -तं.—(Terrible) भयङ्करः -रा -रं, भयानकः -की -कं, भयावहः -हा -हं, त्रासकरः -री -रं, भीष्मयः -यी -यं, दारुणः -णा -णं, रौद्रः -द्री -द्रं, घोरः -रा -रं, भीमः -मा -मं, भीषणः -णा -णं, भीष्मः -ष्मा -ष्मं, भैरवः -वी -वं.

FEARFULLY, *adv.* (With fear) सभयं, सत्रासं, भयेन, ससाध्वसं, सशङ्कं.—(Terribly) दारुणं, घोरं, भैरवं, भयानकं.

FEARFULNESS, *s.* भीरुता, भीतत्वं, सभयत्वं, सन्त्रस्तता, रौद्रता.

FEARLESS, *a.* निर्भयः -या -यं, अभयः -या -यं, अभीतः -ता -तं, विभीतः -ता -तं, अशङ्कः -ङ्का -ङ्कं, निःशङ्कः -ङ्का -ङ्कं, विशङ्कः -ङ्का -ङ्कं, निर्विशङ्कः -ङ्का -ङ्कं, अभीरुः -रुः -रु, अपभीः -भीः -भि, अपशङ्कः -ङ्का -ङ्कं, निःसाध्वसः -सा -सं, विगतभयः -या -यं, अकुतोभयः -या -यं, निःसंशयः -या -यं, साहसिकः -की -कं.

FEARLESSLY, *adv.* निर्भयं, अभयं, निःशङ्कं, अभीतवत्, साहसेन; 'acting fearlessly,' निर्भयार्थः -र्था -र्थं.

FEARLESSNESS, *s.* निर्भयत्वं, अभीतिः *f.*, अभीतता, अभयं -यत्वं, शौर्यं.

FEASIBILITY, *s.* शक्यता, साध्यता, करणीयता, सम्भाव्यता, उपपाद्यत्वं.

FEASIBLE, *a.* साध्यः -ध्या -ध्यं, करणीयः -या -यं, शक्यः -क्या -क्यं, कर्तुं शक्यः -क्या -क्यं, सुकरः -रा -रं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, उपपाद्यः -द्या -द्यं, कृत्यः -त्या -त्यं, सुगमः -मा -मं, लभ्यः -भ्या -भ्यं, सुलभः -भा -भं.

FEAST, *s.* (Festival) उत्सवः, महः, पर्व *n.* (न्), यात्रा, यात्रोत्सवः, उद्धर्षः, उद्भवः, पर्वरीणः, अभ्युदयः, क्षणः, चर्चरी; 'a great feast,' महोत्सवः.—(Entertainment) सत्क्रिया, सहभोजनं, सम्भोजनं, उत्तमान्नसम्भारः, परमान्नसम्भारः; 'feast of lanterns,' दीपोत्सवः; 'feast to the eye,' नयनोत्सवः.

To FEAST, *v. n.* परमान्नानि भुज् (c. 7. भुङ्क्ते, भोक्तुं), उत्तमाहारं कृ, उत्तमभोजनं कृ, उत्तमान्नेन तृप् (c. 4. तृप्यति), उत्सवं कृ, महोत्सवं कृ.

To FEAST, *v. a.* उत्सवादिभिः or भोजनविशेषैः सन्तृप् (c. 10. -तर्पयति -यितुं) or सन्तुष् in caus. (-तोषयति -यितुं), परमान्नानि भुज् in caus. (भोजयति -यितुं), सत्कृ.

FEASTED, *p. p.* सत्कृतः -ता -तं, परमान्नसन्तर्पितः -ता -तं.

FEASTING, *s.* उत्सवकरणं, परमान्नभोजनं, उत्तमाहारकरणं, सहभोजनं.

FEAT, *s.* कर्म्म *n.* (न्), चरित्रं, चेष्टितं, अद्भुतकर्म्म *n.*, आश्चर्य्यकर्म्म *n.*

FEATHER, *s.* पक्षः, पर्णः, गरुत् *m.*, पिच्छं, पतत्रं, पत्रं, पक्ष्म *n.* (न्), वाजः, तनुरुहः; 'of a peacock,' मयूरपिच्छं; 'of an arrow,' पुङ्खः, शरपुङ्खा, शरपक्षः, पत्रं, वाजः, मणिकाचः.

FEATHER-BED, *s.* पक्षपूरितं शयनं, पक्षशय्या, मृदुशयनं, कोमलपर्य्यङ्कः, सुखस्पर्शप्रस्तरः.

FEATHERED, *a.* पक्षी -क्षिणी -क्षि (न्), पक्षवान् -वती -वत् (त्), पक्षाच्छादितः -ता -तं, पक्षयुक्तः -क्ता -क्तं, सपक्षः -क्षा -क्षं, गरुत्मान् -त्मती -त्मत् (त्), पत्री -त्रिणी -त्रि (न्), पतत्री -त्रिणी -त्रि (न्).

FEATHERY, *a.* पक्षतुल्यः -ल्या -ल्यं, पक्षसदृशः -शी -शं, पक्षसगुणः -णा -णं.

FEATURE, *s.* (Form of the face) वदनाकृतिः *f.*, वदनाकारः, वदनरेखा, मुखरेखा, मुखावयवः, वदनावयवः.—(Form, cast) आकारः, आकृतिः *f.*, संस्कारः, संस्थानं, रूपं, मूर्त्तिः *f.*

To FEAZE, *v. a.* उद्ग्रन्थ् (c. 1. -ग्रन्थति -न्थितुं, c. 9. -ग्रथ्नाति), समुद्ग्रन्थ्.

FEBRICULOSE, *a.* ईषज्ज्वरी -रिणी -रि (न्), ईषज्ज्वरातुरः -रा -रं.

FEBRIFACIENT, *a.* ज्वरकरः -रा -रं, ज्वरोत्पादकः -का -कं.

FEBRIFUGE, *a.* ज्वरघ्नः -घ्नी -घ्नं, ज्वरनाशकः -का -कं, ज्वरान्तकः -का -कं, ज्वरहन्ता -न्त्री -न्तृ (न्तृ), ज्वरनिवारकः -का -कं; 'a febrifuge,' ज्वरनाशकम् औषधं, ज्वरापहा.

Flowing, *s.* स्रवः -वणं, प्रस्रवः -वणं, प्रस्रावः, स्रावः, उदकप्रवाहः, वेला.

Flowingly, *adv.* वाक्सरणिपूर्वं, वाक्चापल्येन, द्रुतं, द्रुतवाक्येन, अस्खलितवाक्येन, अविलम्बितं, अविलम्बितवाक्येन.

Fluctuant, *a.* ऊर्म्मिवद् इतस्ततो लोलमानः -ना -नं or विचलः -ला -लं.

To fluctuate, *v. n.* (Roll or move to and fro) इतस्ततो लुठ् (c. 6. लुठति -ठितुं) or लुल् (c. 1. लोलति -ते -लितुं) or चल् (c. 1. चलति -लितुं) or विचल्.—(Be unsteady, irresolute) दोल (nom. दोलायते -यितुं), विचल्, विचलीभू, अस्थिरः -रा -रं भू, अस्थिरीभू, अनवस्थितः -ता -तं भू, चञ्चलीभू, पातोत्पातं कृ, विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं).

Fluctuating, *a.* दोलायमानः -ना -नं, विचलः -ला -लं, अप्रतिष्ठः -ष्ठा -ष्ठं, अनवस्थितः -ता -तं, अस्थिरः -रा -रं, चलः -ला -लं, चञ्चलः -ला -लं, लोलः -ला -लं, लोलमानः -ना -नं, चपलः -ला -लं, तरलायितः -ता -तं.

Fluctuation, *s.* अस्थैर्य्यं, अस्थिरता, अनवस्थितिः *f.*, विचलनं, चञ्चलता, चाञ्चल्यं, चलता, आन्दोलनं, दोलायमानता, अप्रतिष्ठा, चपलता, पातोत्पातः.

Flue, *s.* (Passage for smoke) धूमपथः, धूममार्गः, धूमवर्त्म *n.* (न्), धूमनिर्गमपथः.—(Soft down) मृदुलोम *n.* (न्), मृदुपक्षः.

Fluency, *s.* (Of speech) वाक्सरणिः *f.*, वाग्द्रुतता, वाक्चापल्यं, वाक्क्षिप्रता, वाग्विभवः, वाक्पटुता, वाक्चातुर्य्यं, शब्दचातुर्य्यं, वाक्कौशलं, वाक्शीघ्रता, वाग्बाहुल्यं.

Fluent, *a.* (In speech) वाग्द्रुतः -ता -तं, द्रुतवाक् *m. f. n.* (च्), वाक्क्षिप्रः -प्रा -प्रं, वाक्त्वरितः -ता -तं, त्वरितवाक् *m. f. n.*, वाक्पटुः -टुः -टु, अस्खलितवाक्यः -क्या -क्यं, अस्खलद्वाक्यः -क्या -क्यं, अविलम्बितवाक्यः -क्या -क्यं, शब्दचतुरः -रा -रं.

Fluently, *adv.* द्रुतवाक्येन, क्षिप्रवाक्येन, वाक्चापल्येन, अविलम्बितवाचा, अस्खलितवाचा, त्वरितवाचा, वाग्विभवेन, द्रुतं, शीघ्रं, अस्खलितं, अविलम्बितं.

Fluid, *a.* द्रवः -वा -वं, द्रुतः -ता -तं, विद्रुतः -ता -तं, द्राव्यः -व्या -व्यं, विलीनः -ना -नं, तरलः -ला -लं, पयस्यः -स्या -स्यं, विभाजनीयः -या -यं.

Fluid, *s.* द्रवः, रसः, द्रवद्रव्यं, द्रववस्तु *n.*, जलवद्द्रव्यं, वारि *n.*, जलं, पयः *n.* (स्).

Fluidity, *s.* द्रवता -त्वं, द्राव्यत्वं, द्रुतत्वं, विद्रुतत्वं, विलीनता, तारल्यं.

Fluke, *s.* लङ्गरदन्तः, लङ्गरभुजः. *See* Flook.

Flummery, *s.* मिथ्याप्रशंसा, मिथ्यास्तुतिः *f.*, कल्पितप्रशंसा, अनर्थकस्तुतिः *f.*

Flung, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं; 'flung aside,' अपास्तः -स्ता -स्तं, अपसारितः -ता -तं, समाक्षिप्तः -प्ता -प्तं.

Flunkey, *s.* दासः, नीचकर्म्मकरः, तुच्छकर्म्मकरः, कापुरुषः, लटकः.

Flurried, *p. p.* आकुलितः -ता -तं, आकुलीकृतः -ता -तं, व्याकुलः -ला -लं -लितः -ता -तं, सम्भ्रान्तः -न्ता -न्तं, ससम्भ्रमः -मा -मं, विभ्रान्तमनाः -नाः -नः (स्), विक्षिप्तचित्तः -त्ता -त्तं, व्यग्रः -ग्रा -ग्रं, समाकुलः -ला -लं, चित्तवेगवान् -वती -वत् (त्), व्यस्तः -स्ता -स्तं, कातरः -रा -रं.

Flurry, *s.* आकुलत्वं, व्याकुलता, सम्भ्रमः, विभ्रमः, चित्तभ्रान्तिः *f.*, चित्तवेगः, व्यग्रता, आवेगः, संवेगः, व्यस्तता, कातरता, वैक्लव्यं, विस्मयः, मोहः.

To flurry, *v. a.* आकुलीकृ, व्याकुलीकृ, व्याकुल (nom. व्याकुलयति -यितुं), कातरीकृ, मुह् (c. 10. मोहयति -यितुं), विमुह्, चित्तवेगं जन् (c. 10. जनयति -यितुं).

To flush, *v. n.* (Become suddenly red) अकस्माद् रक्तोद्गमत्वाद् अरुणमुखीभू or लोहिताननः -ना -नं भू or रक्तवदनः -ना -नं भू, अरुणीभू, रक्तीभू, लोहित (nom. लोहितायते), रञ्ज् in pass. (रज्यते) संरञ्ज्.

To flush, *v. a.* (Redden suddenly) अकस्माद् अरुणीकृ or रक्तीकृ or अरुण (nom. अरुणयति -यितुं), सरागं -गां -गं कृ, रञ्ज् in caus. (रञ्जयति -यितुं).—(Elate) दृप् in caus. (दर्पयति -यितुं), उद्धतीकृ, गर्व्वितीकृ.

Flush, *a.* (Vigorous) प्रौढतेजाः -जाः -जः (स्), तेजस्वी -स्विनी -स्वि (न्), प्रौढः -ढा -ढं.—(Affluent) धनाढ्यः -ढ्या -ढ्यं, समृद्धः -द्धा -द्धं. —(Liberal) धनव्ययशीलः -ला -लं, मुक्तहस्तः -स्ता -स्तं.

Flush, *s.* कपोलरागः, कपोलरक्तता, मुखारुणिमा *m.* (न्), वदनरागः, नवयर्णः.—(Abundance, affluence) बाहुल्यं, धनबाहुल्यं, समृद्धिः *f.*

Flushed, *p. p.* (Colored) अरुणितः -ता -तं, अरुणीकृतः -ता -तं, रञ्जितः -ता -तं, रक्तः -क्ता -क्तं, रागी -गिणी -गि (न्), कपोलरागवान् -वती -वत् (त्).—(Elated) उद्धतः -ता -तं, दर्पाध्मातः -ता -तं, दृप्तः -प्ता -प्तं, 'with victory,' जयगर्व्वितः -ता -तं.

Flushing, *s.* अरुणीभावः, वदनरक्तत्वं, रक्तवर्णः, लोहितवर्णः.

To fluster, *v. a.* पानादिना मद् in caus. (मादयति -यितुं) or उन्मत्तीकृ or विमुह् (c. 10. -मोहयति -यितुं) or चित्तविभ्रमं जन् (c. 10. जनयति -यितुं).

Fluster, *s.* चित्तविभ्रमः, मद्यपानजः सम्भ्रमः, व्यग्रता, मोहः, व्याकुलता.

Flute, *s.* (Instrument) वेणुः *m.*, वंशः -शी, मुरली, सानेयी -यिका -सानिका, विवरनालिका; 'sound of the flute,' वेणुशब्दः, वेणुध्वानः *m.*, [illegible].—(Channel of a column) स्तम्भरेखा, स्तम्भस्रोता.

To flute, *v. n.* (Play on the flute) वेणु or वंशीं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा, or वद् in caus. (वादयति -यितुं) or संवद् or प्रवद्.

To flute, *v. a.* स्तम्भपरितो दीर्घरेखाः कृ or निखन् (c. 1. -खनति -नितुं).

Flute-player, *s.* वेणुध्मः, वांशिकः, वैणविकः, मुरलीवादकः.

Fluted, *p. p.* or *a.* स्तम्भवत् दीर्घरेखायुक्तः -क्ता -क्तं or रेखापंक्तियुक्तः -क्ता -क्तं.

To flutter, *v. n.* (Flap the wings in mid air) विहायसा or व्योममध्ये पक्षास्फालनं कृ or पक्षस्पन्दनं कृ or पक्षौ स्फल् (c. 10. स्फालयति -यितुं) or आस्फल्, प्रडीनम् अकृत्वा आकाशमध्ये पक्षौ विचल् in caus. (-चालयति -यितुं) or चल्.—(Move about with bustle) इतस्ततश् चल् or धाव् (c. 1. धावति -वितुं).—(Vibrate, beat, be agitated) स्पन्द् (c. 1. स्पन्दते -न्दितुं), कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, स्फुर् (c. 6. स्फुरति -रितुं), क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), उल्लस् (c. 2. -लसति -तुं, rt. लस्), दोल् (nom. दोलायते -यितुं).

Flutter, *s.* (Vibration) स्पन्दनं, प्रतिस्पन्दनं, स्फुरणं, कम्पः -म्पनं, विकम्पः, उल्लासः, उल्लसनं, इतस्ततो विचलनं or चलनं.—(Hurry, agitation) सम्भ्रमः, वेगः, संवेगः, आवेगः, चित्तवेगः, क्षोभः.

Fluttering, *s.* पक्षास्फालनं, पक्षस्पन्दनं, पक्षकम्पनं, पक्षचालनं, स्फालः -लनं.

Fluttering, *part.* or *a.* आस्फालितः -ता -तं, स्पन्दमानः -ना -नं, कम्पमानः -ना -नं, विचलः -ला -लं, विचलन् -लन्ती -लत् (त्), उल्लासी -सिनी -सि (न्); 'in the breeze,' अनिलोद्धतः -ता -तं, पवनाहतः -ता -तं, पवनक्षिप्तः -प्ता -प्तं.

Fluvial, fluviatic, *a.* नादेयः -यी -यं, नदीसम्बन्धी -न्धिनी -न्धि (न्).

FLUX, s. (Flow) स्रवः -वणं, प्रस्रवः -वणं, प्रस्रावः, प्रवाहः, स्यन्दः, क्षरणं, गलनं, गालः.—(Of the tide) वेला.—(Confluence) सङ्गमः, समागमः.—(Bloody flux) आमातिसारः, आमरक्तः.

To FLUX, v. a. विली in caus. (-लाययति -लापयति -यितुं), द्रवीकृ, द्रु in caus. (द्रावयति -यितुं), विद्रु, गल् in caus. (गालयति -यितुं), विलीनीकृ.

FLUXIBILITY, FLUXILITY, s. द्रवत्वं, द्राव्यत्वं, गलनीयता, विलीनता.

FLUXIBLE, a. द्राव्यः -व्या -व्यं, गलनीयः -या -यं, सुविलयः -या -यं.

FLUXION, s. स्रवः -वणं, प्रस्रवः -वणं, स्रावः, प्रवाहः, गलनं, क्षरणं.

To FLY, v. n. (As a bird in the air) डी (c. 4. डीयते, c. 1. डयते -यितुं), प्रडी, उड्डी, खे or वियति विसृप् (c. 1. -सर्पति -सर्प्तुं) or सृप्, आकाशेन गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं), पत् (c. 1. पतति -तितुं), उत्पत्, प्रोत्पत्, समुत्पत्, सम्पत्.—(Move along swiftly) त्वरितं or सत्वरं or शीघ्रं गम् or चल् (c. 1. चलति -लितुं) or सृ (c. 1. सरति, सर्त्तुं) or प्रसृ.—(Run away) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु, प्रधाव् (c. 1. -धावति -वितुं), अपधाव्, अपक्रम् (c. 1. -क्रामति -क्रमितुं), अपगम्, निर्गम्, अपसृप् (c. 1. सर्पति -सर्प्तुं), अपया (c. 2. -याति -तुं), अपसृ (c. 1. -सरति -सर्त्तुं), अपे (c. 2. अपैति -तुं, rt. इ).—(Pass rapidly) शीघ्रम् अतिक्रम् or अती (c. 2. अत्येति -तुं, rt. इ) or अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं); 'to fly away,' उड्डी, प्रडी, प्रोड्डी, निष्पत्; 'he flew away,' पलायितः; 'to fly at,' अभिपत्, आपत्, उपपत्, अभिद्रु, आद्रु, उपद्रु, अभिधाव्, आधाव्, प्रतिधाव्; 'to fly up,' उड्डी, उत्पत्, अधिरुह् (c. 1. -रोहति -रोढुं); 'to let fly,' मुच् (c. 6. मुञ्चति, मोक्तुं), सृज् (c. 6. सृजति, स्रष्टुं), पत् in caus. (पातयति -यितुं).

To FLY, v. a. (Avoid) वृज् (c. 10. वर्जयति -यितुं), विवृज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परिहृ (c. 1. -हरति -हर्त्तुं).—(Cause to float in the air) आकाशे विसृप् in caus. (-सर्पयति -यितुं) or विसृ in caus. (-सारयति -यितुं).

FLY, s. (Insect) मक्षिका, मशकः, मक्षीका, माचिका, भम्भः, भम्भराली, बम्भराली.

FLY-BITTEN, a. मक्षिकादष्टः -ष्टा -ष्टं, मक्षिकादंशाङ्कितः -ता -तं.

To FLY BLOW, v. a. मक्षिकावद् अण्डप्रसवेन खाद्यमांसं दुष् (c. 10. दूषयति -यितुं).

FLY-BOAT, s. प्रणालीप्रधमनयोग्या लघुनौका, द्रुतगामिनी दीर्घनौका.

FLY-CATCHER, s. मक्षिकाखादकः पक्षिभेदः, मक्षिकाभुक् m. (ज्), मक्षिकानाशकः.

To FLY-FISH, v. n. मक्षिकां वडिशे निवेश्य मत्स्यान् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

FLY-FLAP, s. मक्षिकानिवारणार्थं चामरं, अश्ववालकं, रोमगुच्छः.

FLY-LEAF, s. मलपृष्ठं, पुस्तकस्य आद्यन्तयोः शून्यपत्रं.

FLYER, s. डीयमानः, खविसर्पी m. (न्), आकाशगामी. See FLIER.—(Wheel) तुलाचक्रं.

FLYING, s. (Act of) डीनं, डयनं, प्रडीनं, विसर्पणं, आकाशगमनं, पतनं; 'flying up and down,' डीनावडीनं.

FLYING, part. डीयमानः -ना -नं, खविसर्पी -पिणी -पि (न्), आकाशगतिः -तिः -ति, आकाशगामी -मिनी -मि (न्), आकाशयायी -यिनी -यि (न्), पतन् -तन्ती -तत् (त्), नभोगतिः -तिः -ति; 'flying up,' उड्डीयमानः -ना -नं.

FLYING-BRIDGE, s. नौसेतुः m., चलसेतुः m., जङ्गमसेतुः.

FLYING-FISH, s. आकाशगमनशीलो मत्स्यभेदः.

FOAL, s. अश्वशावः -वकः, किशोरः, घोटकवत्सः, बालः, बालघोटकः, अश्वरोषः.

To FOAL, v. n. किशोरं or अश्वशावकं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं) or प्रजा (c. 4. -जायते -जनितुं).

FOAM, s. फेनः, मण्डः -ण्डं, पराङ्गः, परग्नः, कारुजः, उत्पीडः, उत्सेकः, उत्सेचनं.

To FOAM, v. n. फेन (nom. फेनायते -यितुं), मण्ड (nom. मण्डायते -यितुं), उत्सेचनं कृ, उत्पीडं कृ, फेनम् उत्पद् in caus. (-पादयति -यितुं) or निर्गम् in caus. (-गमयति -यितुं).

FOAMING, part. फेनायमानः -ना -नं, उत्सेचनकारी -रिणी -रि (न्).

FOAMY, a. फेनलः -ला -लं, फेनिलः -ला -लं, फेनवान् -वती -वत् (त्), फेनी -निनी -नि (न्), फेनोत्पादकः -का -कं.

FOB, s. घटीकोषः, घटीपिधानं, क्षुद्रघटीधारकः, कटिवस्त्रपार्श्वे कालमापनयन्त्राधारः or -कोषः.

To FOB, v. a. छल् (c. 10. छलयति -यितुं), वञ्च् in caus. (वञ्चयते -यितुं), छद्म कृ.

FOCUS, s. अग्रांशुः m., अग्रकरः, केन्द्रं, विन्दुः m., अक्षः, तेजःसङ्कर्षदेशः, नाभिः m.f.

FODDER, s. पशुभोजनं, गवादनं, गवादिभोजनं, अश्वादनं, पशुखादनीयं शुष्कतृणादि, विधः धा -धानं, विधिः m.

To FODDER, v. a. शुष्कतृणादि दा (c. 3. ददाति, दातुं) or भुज् (c. 10. भोजयति -यितुं).

FOE, s. शत्रुः m., रिपुः m., अरिः m., अरातिः m., वैरी m. (न्), विपक्षः, अमित्रः, प्रतिपक्षः, विरोधी m. (न्), प्रतिद्वन्द्वः, सपत्नः, अपकारी m. (न्), अहितः.

FŒTAL, FŒTUS, FŒCES. See FETAL, &c.

FOG, s. (Mist) धूमिका, धूलिका, धूपिका, शीकरः, सवाष्पः, मृगतृष्णा -तृषा -ष्णिका, मृगतृट् f. (ष्), कुहा, कुहेडिका, कुज्झटिका, कुज्झटिः f. -टी -टिका, हिमज्झतिः f., रुभेटिः f., धूममहिषी.—(After grass) द्वितीयतृणं.

FOGGINESS, s. सधूमिकत्वं, धूमलता, सशीकरत्वं, कुज्झटिकावस्था, कुज्झटिकाकीर्णता, सान्धकारत्वं, शीकराकीर्णता.

FOGGY, a. सधूमिकः -का -कं, धूमिकावृतः -ता -तं, धूमलः -ला -लं, सशीकरः -रा -रं, शीकरीयः -या -यं, शीकरीघः -घा -घं, कुज्झटिकाच्छन्नः -न्ना -न्नं, सान्धकारः -रा -रं, सकुज्झटिकः -का -कं, अभियः -या -यं.—(Dull) स्थूलः -ला -लं.

FOH, exclam. धिक्, शान्तं, अपेहि, अपसर.

FOIBLE, s. छिद्रं, दोषः, कलङ्कः, अपराधः, वैकल्यं, हानिः f., हीनता.

To FOIL, v. a. (Frustrate) प्रतिहन् (c. 2. -हन्ति -न्तुं), व्याहन्, परास् (c. 4. -अस्यति -असितुं), खण्ड् (c. 10. खण्डयति -यितुं), उद्यमभङ्गं कृ, विफलीकृ, वृथा कृ.—(Blunt) रुग्नीकृ, विरुग्नीकृ; 'one who foils one's designs,' कार्य्यहन्ता m. (न्तृ).

FOIL, s. (Defeat, frustration) प्रतिहतिः f., खण्डनं, भङ्गः.—(Blunt sword) धाराहीनः खड्गः, क्रीडाखड्गः, युद्धक्रीडायां प्रयुक्तो लोहयष्टिः.—(Leaf of metal) धातुपत्रं; 'tin-foil,' त्रपुपत्रं.—(Foil of a jewel) रत्नप्रभावर्धकं, मणितेजोवर्धको धातुपत्रखण्डः.—(Any thing which sets off) प्रकाशकः -का -कं, कान्तिवर्धकः -का -कं, शोभकृत् m.f.n.

FOILED, p. p. प्रतिहतः -ता -तं, परास्तः -स्ता -स्तं, भग्नोद्यमः -मा -मं, विफलीकृतः -ता -तं, खण्डिताशंसः -सा -सं, अकृतार्थः -र्था -र्थं, हताशः -शा -शं, मनोहतः -ता -तं, विक्षिप्तः -प्ता -प्तं, विनिवृत्तकामः -मा -मं, तिरस्कृतः -ता -तं.

FOILER, s. कार्य्यहन्ता m. (न्तृ), उद्यमभङ्गकारी m. (न्), कर्म्मध्वंसकारी m.

FOIN, s. यष्टिक्रीडायां यष्ट्याघातः or यष्टिप्रहारः, खड्गाघातः.

To FOIN, v. a. यष्टिक्रीडायां यष्टिना प्रहृ (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं).

To FOIST, v. a. छलेन or कपटेन निविश् in caus. (-वेशयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं), मिथ्या क्लृप् (c. 10. कल्पयति

-यितुं), कृत्रिमं -मा -मं कृ.

Foisted, *p. p.* छलेन निवेशितः -ता -तं or अभिलिखितः -ता -तं.

Foistiness, *s.* पर्युषितत्वं, विरसत्वं, ईषत्पूतत्वं, पूतिगन्धिता, कुत्सत्वं.

Fold, *s.* (For sheep or cattle) मेषस्थानं -नकं, व्रजः, व्रजाजिरं, मेषव्रजः, मेषशाला, गोष्ठं, गोस्थानकं.—(A double in cloth, &c.) पुटः, वस्त्रपुटः, ऊर्म्मिः *m.f.* -र्म्मिका -र्म्मी, भङ्गः, वस्त्रभङ्गः, तरङ्गः, व्यावर्त्तनं, चुणः. 'Fold,' in comp. is expressed by the affix धा; as, 'two-fold,' द्विधा, or by गुण; as, द्विगुणः -णा -णं.

To fold, *v. a.* (Double) पुटीकृ, पुट (nom. पुटयति -यितुं), द्विगुण (nom. द्विगुणयति -यितुं), द्विगुणीकृ, व्यावृत् (c. 10. -वर्त्तयति -यितुं) विपरिवृत्, व्यावर्त्तनं कृ, संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं -रीतुं), सम्पीड् (c. 10. -पीडयति -यितुं); 'fold the arms,' भुजौ सम्पीड्; 'in the arms,' भुजापीडं कृ.—(Confine sheep in a fold) मेषान् व्रजे निविश् in caus. (-वेशयति -यितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

Folded, *p. p.* पुटितः -ता -तं, पुटीकृतः -ता -तं, द्विगुणितः -ता -तं, संवृतः -ता -तं, सम्पीडितः -ता -तं, व्यावर्त्तितः -ता -तं. 'folded or wrapped up,' वेष्टितः -ता -तं, वासनस्थः -स्था -स्थं; 'folded leaf,' दलकपाटः.

Folding, *s.* पुटीकरणं, व्यावर्त्तनं, संवृतिः *f.*; 'folding in the arms,' भुजापीडं कृ.

Folding-doors, *s.* द्विकपाटयुक्तं or द्विशाखायुक्तं द्वारं.

Foliage, *s.* पत्रं -त्राणि *n. pl.*, पर्णं, दलं, वृक्षपत्रं, तरुछदः, तरुजं.

To foliate, *v. a.* मुद्गराघातेन धातुं सूक्ष्मपत्राकारं कृ or धातुपत्रं कृ, उद्वर्त्तनं कृ.

Foliation, *s.* मुद्गराघातेन धातुपत्रकरणं, उद्वर्त्तनं.

Folio, *s.* पुस्तकपत्रं, महापत्रं, पृथुपत्रं, वृहत्पत्रं, विशालपत्रं, द्विपत्रं.

Folk, *s.* लोकः, जनः, मनुष्यजातिः *f.*, नृजातिः *f.*, प्रजा, जगती.

To follow, *v. a.* (Go after) अनुगम् (c. 1. -गच्छति -गन्तुं), अन्वागम्, पश्चाद् गम्, अनुया (c. 2. -याति -तुं), समनुया, अन्वि (c. 2. -एति -तुं), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), समनुवृत्, अनुसृ (c. 1. -सरति -सर्तुं), अनुव्रज् (c. 1. -व्रजति -जितुं), समनुव्रज्, अनुक्रम् (c. 1. -क्रामति -क्रमितुं), अनुचर् (c. 1. -चरति -रितुं), अन्वग्या, पुरस्कृ.—(Imitate) अनुकृ, अनुपृत्, अनुगम्.—(Observe, practise) अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, सेव् (c. 1. सेवते -वितुं), उपसेव्, निषेव्, समासेव्, आश्रि (c. 1. -श्रयति -यितुं), विधा (c. 3. -दधाति -धातुं).—(Adhere to, serve, honour) आश्रि, श्रु in des. (शुश्रूषते -षितुं), उपास् (c. 2. -आस्ते -आसितुं), भज् (c. 1. भजते, भक्तुं), परिचर्.—(Result from) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् in pass. (जायते), अनुवृत्, उद्भू, अनुभू.

Followed, *p. p.* अनुगतः -ता -तं, अनुयातः -ता -तं, अनुगम्यमानः -ना -नं, अन्वीयमानः -ना -नं.—(Observed) अनुष्ठितः -ता -तं, सेवितः -ता -तं, आश्रितः -ता -तं.

Follower, *s.* (One who goes after) अनुगामी *m.* (न्), पश्चाद्गामी, अनुगः -गतः, अनुयायी *m.* (न्), अनुवर्त्ती *m.* (न्), अनुचरः -चारी *m.* (न्), अनुगतिकः, अनुयायिकः, अभिसरः, पार्श्वपरिवर्त्ती *m.* (न्), पार्ष्णिग्राहः, उपधावनः.—(Adherent, disciple) अनुपक्षी, भक्तः, आश्रितः, भाक्तिकः, शिष्यः; 'follower of Krishna,' कृष्णाश्रितः.—(Attendant, defendant) परिजनः, अनुचरः, सेवकः, अनुजीवी *m.* (न्) -विकः, उपजीवी *m.*, परिवारः.—(Companion, associate) सहायः, सहचरः, सङ्गी *m.* (न्).

Following, *part.* (Going after) अनुगः -गा -गं, अनुयायी -यिनी -यि (न्), अनुसारी -रिणी -रि (न्), अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), अनुमयः -या -यं, अन्वक्षः -क्षा -क्षं, अन्वक् अनूची अन्वक् (च्), अनुपदं.—(Next after) परः -रा -रं.—(Succeeding) अनुयायी &c.

Following, *s.* (Act of) अनुगमः -मनं, अनुसरणं, अनुवर्त्तनं, अनुव्रजनं.

Folly, *s.* मूर्खता, मौर्ख्यं, मूढता -त्वं, मोहः, मौढ्यं, बुद्धिहीनता, निर्बुद्धिता, अज्ञता, अविज्ञता, अनभिज्ञता, अज्ञानं, ज्ञानाभावः, प्रज्ञाहीनता.

To foment, *v. a.* (Heat with warm lotions) स्विद् in caus. (स्वेदयति -यितुं), प्रस्विद्, घर्म्मोदकादिना or उष्णोदकादिना लिप् (c. 6. लिम्पति, लेप्तुं) or अनुलिप् or अञ्ज् (c. 7. अनक्ति, अंक्तुं) or दिह् (c. 2. देग्धि -ग्धुं) or सिच् (c. 6. सिञ्चति, सेक्तुं) or निषिच्.—(Encourage, excite) वृध् in caus. (वर्धयति -यितुं), संवृध् in caus., प्रवृत् in caus. (-वर्त्तयति -यितुं), तेजो दा, तेजोवृद्धिं कृ, उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं), उद्दीप् (c. 10. -दीपयति -यितुं); 'foment dissensions,' उपजप् (c. 1. -जपति -पितुं), कर्णे जप्, उपजापेन भेदं वृध् in caus.

Fomentation, *s.* (Act of heating with warm lotions, &c.) स्वेदनं, प्रस्वेदनं, घर्म्मोदकादिना विलेपनं or अनुलेपनं or सेचनं.—(The lotion itself) घर्म्मलेपः, घर्म्मानुलेपनं, उष्णोपदेहः.—(Encouragement) उद्दीपनं, उत्तेजनं, उत्तापः, संवर्धनं.

Fomented, *p. p.* स्वेदितः -ता -तं.—(Encouraged) उद्दीप्तः -प्ता -प्तं, संवर्धितः -ता -तं.

Fomenter, *s.* (Of dissension) उपजापकः, कर्णेजपः, भेदकरः, कलिकारकः.

Fond, *a.* (Loving) अनुरक्तः -क्ता -क्तं, अनुरागवान् -वती -वत् (त्), अनुरागी -गिणी -गि (न्), सानुरागः -गा -गं, स्नेही -हिनी -हि (न्), स्नेहितः -ता -तं, कामी -मिनी -मि (न्), प्रणयी -यिनी -यि (न्).—(Attached to, delighting in) आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, परः -रा -रं, तत्परः -रा -रं, रतः -ता -तं, सेवी -विनी -वि (न्), अभिलाषी -षिणी -षि (न्), आनन्दी -न्दिनी -न्दि (न्) -न्दितः -ता -तं, प्रमोदी -दिनी -दि (न्). 'Fond of one's ease,' सुखाभिलाषी -षिणी -षि (न्); 'fond of embracing,' आलिङ्गनतत्परः -रा -रं; 'fond of noise,' ध्वनमोदी &c. Often expressed by प्रिय in comp.; as, 'fond of water,' जलप्रियः -या -यं; 'fond of mountains,' गिरिप्रियः -या -यं; 'fond of ornament,' प्रियमण्डनः -ना -नं; or by काम in comp.; as, 'fond of flesh,' मांसकामः -मा -मं; 'to be fond of,' अनुरागवान् -वती -वत् अस् or भू, सेव् (c. 1. सेवते -वितुं), अभिलष् (c. 1. -लषति -षितुं), रुच् (c. 1. रोचते -चितुं), with dat. of the person; अभिनन्द् (c. 1. -नन्दति -न्दितुं).—(Doting) अत्यनुरक्तः -क्ता -क्तं.—(Silly) मूढः -ढा -ढं, मुग्धः -ग्धा -ग्धं.

To fondle, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्, परिष्वञ्ज् (c. 1. -ष्वजते -ष्वंक्तुं), परिमृश् (c. 6. -मृशति -म्रष्टुं), लल् (c. 10. लालयति -यितुं), क्रोडीकृ, भुजापीडितं -तां -तं कृ, प्रेम कृ, अनुरागं कृ, अङ्कीकृ, अङ्के कृ, अङ्के पाल् (c. 10. पालयति -यितुं).

Fondled, *p. p.* लालितः -ता -तं, क्रोडीकृतः -ता -तं, भुजापीडितः -ता -तं.

Fondling, *s.* (Caressing) आलिङ्गनं, परिष्वङ्गः, लालनं, क्रोडीकरणं, अङ्कपाली -लिका -लिः *m.*, भुजापीडः.—(The person or thing fondled) प्रेमपात्रं, प्रेमभूमिः *f.*, अनुरागपात्रं.

Fondly, *adv.* सानुरागं, वात्सल्येन, अतिस्नेहेन, अतिप्रीतिपूर्ब्बं.—(Foolishly) मूढवत्.

Fondness, *s.* स्नेहः, प्रीतिः *f.*, अनुरक्तिः *f.*, अनुरागः, प्रेम *n.* (न्), प्रियता, वात्सल्यं, वत्सलता, प्रणयः, अभिरुचिः *f.*, रुचिः *f.*, सन्तोषः.

Font, *s.* पूजाशालामध्ये जलसंस्कारकरणे प्रयुक्तः प्रस्तरमयो जलाधारः.—(Complete assortment of printing types of one size) समपरिमाणमुद्राक्षरपरिसंख्या.

Food, *s.* भोजनं, आहारः, भोज्यं, भक्ष्यं, खाद्यं, अन्नं, खाद्यं, अदनं, खादनं,

आहार्यं, अभ्याहार्यं, आमिषं, ग्रासः f., अशनं, भक्ष्यं, भक्तं, खाद्यं, जेमनं, जमनं, घसः n. (स्), घसिः m., निघसः, विघसः, ग्रासः, ग्रासं, प्रत्यदनं, आशः, देहयात्रा, जीवनकः, शरीरयात्रा, न्यादः, लेपः, लेहः; 'choice food,' परमान्नं, उत्तमान्नं, भोजनविशेषः; 'bad food,' कदन्नं; 'food and raiment,' ग्रासाच्छादनं, अन्नाच्छादनं, अशनाच्छादनं or -ने n. du., अन्नवस्त्रं, कशिपुः m. du.; 'food of the gods,' अमृतं, पीयूषं, पेयूषं, सुधा, लेह्यं; 'to eat food,' आहारं कृ. Food is divided by the Hindús into five kinds, भक्ष्यं, भोज्यं, लेह्यं, चोष्यं, पेयं.

Fool, *s.* मूर्खः, मूढः, अज्ञः, निर्बुद्धिः *m.*, निर्बोधः, अबुद्धिः *m.* -द्धिमान् *m.* (त्), अबुधः, अप्राज्ञः, अविज्ञः, अविद्वान् *m.* (स्), प्रमूढः, प्रज्ञाहीनः, अज्ञानी *m.* (न्), जडः, जडमतिः *m.*, अल्पधीः *m.*, मन्दबुद्धिः *m.*, मन्दः, बर्बरः, कुशलकः, लटः.—(Buffoon, jester) विदूषकः, नर्मसचिवः, भण्डः.

To **fool**, *v. n.* खेला (nom. खेलायति), कुड् (c. 6. कुडति -डितुं), परिहासं कृ, लट् (c. 1. लटति -टितुं).

To **fool**, *v. a.* मुह् (c. 10. मोहयति -यितुं), सम्मुह्, वञ्च् (c. 10. वञ्चयते -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं).

Foolery, *s.* मूर्खकर्म्म *n.* (न्), मूर्खक्रिया, मूर्खता, बालकर्म्म *n.*, बालिश्यं.

Fool-hardiness, *s.* असमीक्ष्य साहसं, अविचारेण प्रगल्भता, अतिसाहसिकत्वं, आत्यत्वं, अविमृश्यकारित्वं, अत्याहितं, दर्पः, प्रमत्तता.

Fool-hardy, *a.* असमीक्ष्य साहसी -सिनी -सि (न्), अविमृश्य प्रगल्भः -ल्भा -ल्भं, आल्भः -ल्भा -ल्भं, प्रमत्तवीरः -रा -रं, प्रमत्तशूरः -रा -रं.

Foolish, *a.* मूर्खः -र्खा -र्खं, मूढः -ढा -ढं, अज्ञः -ज्ञा -ज्ञं, अनभिज्ञः -ज्ञा -ज्ञं, निर्बुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, अबुद्धिमान् -मती -मत् (त्), अप्राज्ञः -ज्ञा -ज्ञं, अल्पबुद्धिः &c., दुर्बुद्धिः &c., अल्पधीः -धीः -धि, बुद्धिहीनः -ना -नं, प्रज्ञाहीनः -ना -नं, दुर्मेधाः -धाः -धः (स्), दुर्मतिः -तिः -ति, अज्ञानः -ना -नं -नी -निनी -नि (न्), अकोविदः -दा -दं, बालिशः -शा -शं, बालिशमतिः -तिः -ति, अल्पधीः -धीः -धि, वैधेयः -यी -यं, असत्कृतः -ता -तं.

Foolishly, *adv.* मूर्खवत्, मूढवत्, अज्ञवत्, अज्ञानात्, मौर्ख्यात्, अल्पबुद्ध्या.

Foolishness, *s.* मूर्खता, मौर्ख्यं, मूढता, मौढ्यं, अज्ञता, अनभिज्ञता, निर्बुद्धित्वं, मोहः, बुद्धिहीनता, अबोधता, अज्ञानं, ज्ञानाभावः, बालिशता, बालिश्यं.

Foolscap, *s.* मूर्खशिरोवेष्टनसंज्ञकः कार्पासविशेषः or पत्त्रविशेषः.

Foot, *s.* (Part of the body) पादः, पदं, चरणं -णः, अंह्रिः *m.*, अङ्घ्रिः *m.*, अधमाङ्गं, लग्नः; 'both feet,' पादौ du., चरणौ du., चरणयुगं; 'point of the foot,' पादाग्रं, पदिकं; 'foot and knee,' पदष्ठीवं.—(Bottom, base) तलं, अधोभागः, अधःस्थानं, मूलं, उपस्थः; 'foot of a tree,' तरुतलं, वृक्षतलं, वृक्षाङ्घ्रिः *m.*, पादः, 'foot of a mountain,' उपत्यका, शैलोपशल्यं, पर्व्वततलं, गिरिपादः, पर्व्वताधोभागः.—(Measure) मनुष्यपादपरिमाणं, सार्द्धचतुरङ्गुलिपरिमाणं; 'ornament for the feet,' नूपुरः, पादाङ्गदं, चरणाभरणं, पादकटकः, तुलाकोटिः *f.*, मञ्जीरं; 'water for ablution of the feet,' पाद्यं, पादोदकं; 'to go on foot,' पद्भ्यां or पादाभ्यां व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं); 'going on foot,' पादचारः; 'foot by foot,' पादशस्, पदे पदे, पञ्चशः; 'at the foot,' पादतस्; 'to set on foot,' प्रवृत् (c. 10. -वर्त्तयति -यितुं); 'set on foot,' प्रवर्त्तितः -ता -तं, उपक्रान्तः -न्ता -न्तं.

To **foot**, *v. a.* (Kick) पादेन प्रहृ (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं), पादाघातं कृ.—(Tread) क्रम् (c. 1. क्रामति, क्रमितुं), चरणपातं कृ.

To **foot it**, *v. n.* नृत् (c. 4. नृत्यति, नर्त्तितुं), पादादि सञ्चल् in caus. (-चालयति -यितुं).

Foot-ball, *s.* वाताध्मातो गोवस्तिर यः सक्रीडमानजनपादाघातेन इतस्ततो विक्षिप्यते, पादाहतकन्दुकक्रीडा.

Foot-board, *s.* पादफलकं, चरणफलकं, पादकाष्ठं.

Foot-boy, *s.* बालसेवकः, युवसेवकः, बालभृत्यः, युवप्रेष्यः.

Foot-bridge, *s.* सङ्क्रमः, सङ्क्रामः, सङ्क्रमसेतुः *m.*, दुर्गसञ्चरः -सञ्चारः.

Footed, *p. p.* पादाहतः -ता -तं.—(Having feet) पादी -दिनी -दि (न्), पदी &c.

Foot-fall, *s.* पदपातः, पादपातः, चरणपातः, पदन्यासः, पदविष्टम्भः.—(Trip) स्खलनं.

Foot-fight, *s.* पादातियुद्धं, पदातियुद्धं, पदिकयुद्धं, पदगयुद्धं.

Foot-guard, *s.* पादातिकसैन्यः, पदातिकसैनिकः, पदगरक्षकः.

Footing, *s.* (Ground for the feet) पादन्यासस्थानं, पादनिक्षेपस्थानं, पदविष्टम्भस्थानं, पदं, स्थानं, भूमिः *f.*, स्थलं, आस्पदं, वर्त्म *n.* (न्), पदवी -विः *f.*, अयनं, सरणिः *f.*, वर्त्तनं; 'firm footing,' प्रतिष्ठानं; 'place with no firm footing,' अस्थानं.—(Basis, foundation) मूलं, उपष्टम्भः, तलं.—(Support) उपस्तम्भः, उपघ्नः, आश्रयः, अवलम्बनं.(Condition, position) अवस्था, स्थितिः *f.*, भावः, संस्थानं, वृत्तिः *f.*

Footless, *a.* पादहीनः -ना -नं, निष्पादः -दा -दं, चरणहीनः -ना -नं.

Foot-licker, *s.* पादसेवकः, चरणसेवकः, पदानुरागः, पीठमर्द्दः.

Foot-man, *s.* (Foot-soldier) पदातिः *m.* -तिकः, पादातिः *m.* -तिकः, पादातः, पदातः, पादात्, पत्तिः *m.*, पदगः, पत्तः, पदिकः, पादचारः -री *m.* (न्), पादाविकः, पदाजिः *m.*—(Running footman) जाङ्घिकः.—(Servant) सेवकः, प्रेष्यः, कुलसेवकः, परिचरः, किङ्करः.

Foot-mark, *s.* पादचिह्नं, पदचिह्नं, पदाङ्कः, पदपंक्तिः *f.*, पादमुद्रा, चरणपदवी, पदवी, पदं; 'of a horse,' खुरपदवी.

Foot-pace, *s.* पदपातः, पादगतिः *f.*, पदक्रमः, चरणक्रमः.

Foot-pad, *s.* मार्गाक्रमः, पादविक्रमः, परिपन्थी *m.* (न्), होडा *m.* (ढ्).

Foot-pan, *s.* पाद्यपात्रं, पाद्यभाजनं, पाद्याधारः, पादोदकपात्रं.

Foot-path, *s.* पदविः *f.* -वी, पदगपथः, पदिकमार्गः, पादचारयोग्यः क्षुद्रपथः.

Foot-soldier, *s.* पदातिः *m.*, पत्तिः *m.*, पदातिकसैन्यः, पादातिकयोद्धा *m.* (द्धृ). *See* Foot-man.

Foot-stalk, *s.* प्रसवबन्धनं, वृन्तं, मञ्जरी.

Foot-step, *s.* (Mark of the foot) पादचिह्नं, पदाङ्कः, पदपंक्तिः *f.*, पादमुद्रा, चरणपदवी.—(Tread) पदपातः, पादपातः, पादन्यासः, चरणपातः, पदविक्षेपः, पदविष्टम्भः.—(Course, track) पदविः -वी *f.*, अनुपदं, पद्धतिः *f.*, पथः, मार्गः, अयनं, वर्त्म *n.* (न्).—(Token) चिह्नं, लक्षणं.

Foot-stool, *s.* पादपीठं, चरणपीठं, पादासनं, पादपः, पदासनं.

Fop, *s.* दर्शनीयमानी *m.* (न्), दम्भी *m.* (न्), गर्व्वी *m.* (न्), आत्माभिमानी, रूपगर्व्वितः, सुवेशमानी *m.*, सुवेशिनम्मन्यः, छेकः.

Foppery, *s.* सुवेशमानिता, रूपमानिता, मूर्खता, मूर्खकर्म्म *n.* (न्).

Foppish, *a.* दम्भी -म्भिनी -म्भि (न्), वेशाभिमानी -निनी -नि (न्).

Foppishness, *s.* वेशाभिमानता, दम्भः, दाम्भिकत्वं, रूपगर्व्वितत्वं.

For, *conj.* (Because) यतस्, यत्, येन, यस्मात्, हि, इति हेतोः, तदर्थं, अनेन हेतुना. *See* Because.—(For as much as) यतस्, यत्, or expressed by the abl. c. of the abst. noun; as, 'for as much as he was a good man,' सज्जनत्वात्.

For, *prep.* (In exchange for) प्रति with abl. c., विनिमयेन; 'he exchanges beans for sesamum seed,' तिलेभ्यः प्रति माषान् ददाति; or expressed by the inst. c., as, तिलैर् माषान् परिवर्त्तयति; 'in exchange for one's life,' स्वप्राणविनिमयेन.—(Instead of, in place of) स्थाने, प्रति.—(Toward) प्रति, उद्दिश्य with

acc. c.—(On account of, by reason of) अर्थं, अर्थे, हेतोः, हेतौ, कृते, निमित्ते, कारणात् all affixed to the crude; as, 'for this cause,' तदर्थं, or expressed by उद्दिश्य with acc. c., or by the abl. c.; as, 'for anger he did it,' कोपात् तत् कृतवान्; 'for want of money,' धनाभावात्.—(Conducive to) अर्थं, अर्थे, or expressed by the dat. c., as, 'for the good of the world,' भूतये भुवः; 'for one's own advantage,' आत्मविवृद्धये.—(For the sake of) अर्थं, अर्थे, हेतोः, कृते, or by dat. c., as, 'for the satisfying of hunger,' क्षुधाशान्तये; 'for thy enjoyment,' तव भोगाय.—(In order to obtain) अर्थं, अर्थे or by dat. c., as, 'for fame,' प्रतिपत्तये, or even by inst. c., as, 'for hire,' भाटकेन.—(In return for) प्रति, or more usually expressed by the indec. part.; as, 'for so doing,' तत् कृत्वा.—(During a certain time) यावत्, पर्य्यन्तं; 'for life,' पुरुषस्यायुर् यावत्, यावज्जीवं, जीवनपर्य्यन्तं, or by prefixing आ with abl. c., as, आमरणात्, आजीवनान्तात् (*i. e.* until death); 'lasting for life,' आमरणान्तिकः -का -कं; 'for three days,' दिनत्रयपर्य्यन्तं; 'for a hundred years,' वर्षशतं यावत्. Sometimes expressed by the acc. c., as, 'for one month,' एकं मासं; 'for two months,' द्वौ मासौ; 'for a hundred years,' वर्षशतं, or even by the instr. c., as, 'for twelve years,' द्वादशभिर् वर्षैर्; 'for a few days,' कतिपयदिवसैः; 'for a long time,' चिरकालं, अनेककालं, चिरात्, चिरेण, चिराय; 'food for a year,' वर्षोपभोग्यम् अन्नं.—(In proportion to, considering) अपेक्ष्य, उद्दिश्य, प्रतीक्ष्य, अवेक्ष्य, all with acc. c.—(On the part of) अपेक्ष्य, उद्दिश्य, कृते; 'as for me,' मामपेक्ष्य, मामुद्दिश्य, मत्कृते.—(On the side of) सपक्षः -क्षा -क्षं; 'he is for us,' अस्माकं सपक्षो भवति.—(Notwithstanding, for all that) तथापि.—(As if) वत् affixed, इव; 'he shewed himself for dead,' मृतवत् or मृतम् इव आत्मानम् अदर्शयत्.—(According to) यथा, अनुसारेण, अनुरूपेण, 'for one's ability,' यथाशक्ति. 'For,' may be expressed by the acc. c. in such phrases as 'looking for,' 'waiting for,' &c.; as, 'he looks for me,' माम् अपेक्षते, or by other cases, as, 'we depend on God for success,' ईश्वराधीना सिद्धिः; 'I have great affection for her,' तस्याम् अनुरागवान् अस्मि or तया सह महान् स्नेहः, or by गत, as, 'through love for him,' तद्गतेन अनुरागेण, or by the crude form, as, 'search for money,' धनान्वेषणं, or even by the affix सात्, as, 'he built a house for the Brahman,' गृहं चकार द्विजातिसात्.—(For the most part) प्रायेण, प्रायस्, प्रायशस्, भूयिष्ठं.

FORAGE, *s.* (Food for horses and cattle) अश्वादनं, गवादनं, अश्वादिभोजनं.—(Provisions) पाथिकं, पाथेयं, खाद्यद्रव्यं, भोज्यं, भोजनसम्भारः.—(Search for food) खाद्यद्रव्यान्वेषणं; 'going to forage,' प्रसारः -रणं, प्रसरणं.

To FORAGE, *v. n.* परिभ्रमणं कृत्वा खाद्यद्रव्याणि or अश्वादनम् अन्विष् (c. 4. -इष्यति -एषितुं), प्रसारं or अवस्कन्दं or उपद्रवं कृत्वा धान्यादिभोज्यम् अपहृ (c. 1. -हरति -हर्त्तुं).

FORAGER, *s.* भोजनार्थं परिभ्रमणकारी *m.* (न्) or अवस्कन्दकारी or प्रसारी *m.* (न्), युद्धसमये खाद्यद्रव्यान्वेषी *m.* (न्), or अश्वादिभोजनार्थं धान्यादिहारकः.

FORAGING, *s.* भोजनान्वेषणार्थं परिभ्रमणं or प्रसारणं or प्रसरणं or अवस्कन्दः or उपद्रवः, युद्धसमये खाद्यद्रव्यान्वेषणं; 'foraging army,' प्रचक्रं.

FORAY, *s.* उपद्रवः, अवस्कन्दः, विप्लवः, लोप्त्रार्थम् उपप्लवः.

To FORBEAR, *v. a.* and *n.* (Cease from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरम् (c. 1. -रमति -रन्तुं).—(Delay, pause) विलम्ब् (c. 1. -लम्बते -म्बितुं), विरम्, आकालागमनात् यम् (c. 1. यच्छति, यन्तुं).—(Avoid) वृज् (c. 10. वर्जयति -यितुं), परिहृ (c. 1. -हरति -हर्त्तुं).—(Be patient) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते -मितुं, क्षन्तुं).

FORBEARANCE, *s.* (Cessation from, avoidance) निवृत्तिः *f.*, विनिवृत्तिः *f.*, सन्निवृत्तिः *f.*, विरतिः *f.*, विरामः, उपरतिः *f.*, वर्जनं, त्यागः, परिहारः.—(Patience) क्षमा, क्षान्तिः *f.*, तितिक्षा, सहनं, सहनशीलता, सहिष्णुता, मर्षः, परामर्षः, अपकारेऽपि चित्तस्याविकारः.—(Restraint) संयमः, यमः, यामः, संयामः, वियामः, वियमः, दमः.

FORBEARING, *a.* सहनशीलः -ला -लं, सहिष्णुः -ष्णुः -ष्णु, तितिक्षुः -क्षुः -क्षु, क्षमी -मिणी -मि (न्), संयमवान् -वती -वत् (त्).

To FORBID, *v. a.* (Prohibit) प्रतिषिध् (c. 1. -षेधति -षेद्धुं, c. 10. -षेधयति -यितुं), निषिध्, प्रत्याख्या (c. 2. -ख्याति -तुं), अन्तःख्या, परिभाष् (c. 1. -भाषते -षितुं), मैवं कुरु or मैवं कार्षीर् इति आज्ञा in caus. (-ज्ञापयति -यितुं) or आदिश् (c. 6. -दिशति -देष्टुं).—(Prevent) वृ in caus. (वारयति -यितुं), निवृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं), बाध् (c. 1. बाधते -धितुं); 'heaven forbid!' इत्थं न भूयात्, एतादृशं न भवतु, शान्तं.

FORBIDDANCE, *s.* निषेधः, प्रतिषेधः, प्रतिषेधोक्तिः *f.*, प्रत्याख्यानं, वारणं, निवारणं, निरोधः, बाधः, बाधकता.

FORBIDDEN, *p. p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, निवारितः -ता -तं.

FORBIDDING, *a.* बीभत्सजनकः -का -कं, घृणोत्पादकः -का -कं, अनिष्टः -ष्टा -ष्टं.

FORCE, *s.* (Strength) बलं, शक्तिः *f.*, सामर्थ्यं, समर्थता.—(Energy, might) तेजः *n.* (स्), वीर्य्यं, विक्रमः, पराक्रमः, ऊर्जः, शौर्य्यं.—(Violence) बलात्कारः, साहसं, प्रमाथः, प्रसभं.—(Momentum) वेगः, आपातः.—(Efficacy) [illegible]भावः, प्राबल्यं, गौरवं, सामर्थ्यं, प्रतापः.—(Validity) सिद्धिः *f.*, निष्प[illegible] *f.*; 'of force,' सिद्धः -द्धा -द्धं, निष्पन्नः -न्ना -न्नं; 'of no force,' असिद्धः -द्धा -द्धं, मोघः -घा -घं, निष्फलः -ला -लं; 'put in force,' प्रवर्त्तितः -ता -तं.—(Force of a word) शब्दशक्तिः *f.*, शब्दसामर्थ्यं -समर्थता, निरूढः, लक्षणं.—(Forces, troops) बलं, सैन्यं, सेना, सैन्याः *m. pl.*, अनीकं -कानि *n. pl.*, अनीकिनी, दण्डः; 'by force,' बलात्, बलेन, बलात्कारेण; 'taken by force,' बलाद्गृहीतः -ता -तं, कलहापहृतः -ता -तं.

To FORCE, *v. a.* (Compel). Expressed by the causal form usually in conjunction with बलात् or बलेन or बलात्कारेण or यत्नेन; as, 'to force a man to do any thing,' बलेन पुरुषं किञ्चित् कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं); 'to force to give,' दा in caus. (दापयति -यितुं); 'to force to go,' बलेन गम् in caus. (गमयति -यितुं).—(Impel, drive) प्रेर् (c. 10. प्रेरयति -यितुं), कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रणुद् (c. 6. -णुदति -णोत्तुं).—(Use force) बलात्कारं कृ, साहसं कृ, विक्रमं कृ, यत्नं कृ, प्रतियत्नं कृ.—(Force a town, storm) दुर्गं लङ्घ् (c. 10. लङ्घयति -यितुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं) or बलेन प्रविश् (c. 6. -विशति -वेष्टुं).—(Violate) धृष् (c. 10. धर्षयति -यितुं), बलात्कारेण अभिगम् (c. 1. -गच्छति -गन्तुं).—(Cause to produce fruit prematurely) प्राक्पूर्णकालात् फलोत्पत्तिं जन् (c. 10. जनयति -यितुं).

FORCED, *p. p.* (To do) बलात् कारितः -ता -तं.—(To pay) दापितः -ता -तं.—(Done by force) बलात्कृतः -ता -तं, बलात्कारितः -ता -तं, यत्नकृतः -ता -तं, यत्नपूर्व्वः -र्व्वा -र्व्वं.—(Strained, unnatural, affected)

FOR

क्लिष्टः -ष्टा -ष्टं, प्रतियत्नपूर्व्वः -र्व्वा -र्व्वं, विलक्षः -क्षा -क्षं, कृत्रिमः -मा -मं; 'a forced idea,' क्लिष्टकल्पना; 'a forced smile,' वैलक्ष्यस्मितं.

FORCEDLY, *adv.* बलात्, यत्नपूर्व्वं, प्रतियत्नपूर्व्वं, वैलक्ष्येण, सवैलक्ष्यं.

FORCEFUL, *a.* बलवान् -वती -वत् (त्), शक्तः -क्ता -क्तं, साहसी -सिनी -सि (न्).

FORCELESS, *a.* निर्बलः -ला -लं, शक्तिहीनः -ना -नं, अशक्तः -क्ता -क्तं.

FORCE-MEAT, *s.* चुर्त्त, निस्तनी, मिष्टान्नं, उपस्करः, व्यञ्जनं.

FORCEPS, *s.* सन्दंशः -शकं -शका, लवडधारा, शल्योद्धरणयन्त्रं.

FORCIBLE, *a.* (Powerful) प्रबलः -ला -लं, बलवान् -वती -वत् (त्), शक्तिमान् -मती -मत (त्), समर्थः -र्था -र्थं, तेजोवान् -वती -वत् (त्), —(Efficacious) सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, अमोघः -घा -घं, सफलः -ला -लं.—(Impressive) निर्बन्धेन or दार्ढ्येन or गौरवेण or सगौरवम् उक्तः -क्ता -क्तं, तीक्ष्णः -क्ष्णा -क्ष्णं.—(Violent, done by force) साहसिकः -की -कं, बलेन कृतः -ता -तं; 'forcible entry,' बलप्रवेशः or बलात्प्रवेशः; 'forcible removal,' बलापकर्षः.

FORCIBLENESS, *s.* बलवत्त्वं, शक्तिमत्त्वं, प्राबल्यं, सामर्थ्यं, तैक्ष्ण्यं, गौरवं.

FORCIBLY, *adv.* बलात्, बलेन, बलात्कारेण, बलवत्, प्रसभं, प्रसह्य, अभिपद्य, प्रमथ्य, बलापकर्षं, अवगृह्य.—(Impressively) निर्बन्धेन, दार्ढ्येन, गौरवेण, सगौरवं.

FORD, *s.* नदीतरस्थानं, नदीतरस्थलं, तरणस्थानं, उत्तरणस्थानं, ईषज्जलो नदीभागः, घट्टः.

To FORD, *v. a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन नदीम् ईषज्जलस्थाने तॄ (c. 1. तरति -रितुं -रीतुं) or नदीपारं तॄ.

FORDABLE, *a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन तार्य्यः -र्य्या -र्य्यं, सुतरः -रा -रं, पादस्पृश्यतलः -ला -लं, अल्पजलः -ला -लं.

FORDING, *s.* पद्भ्यां or पादाभ्यां or अश्वादिवाहनेन नदीतरणं or उत्तरणं.

FORE, *a.* पूर्व्वः -र्व्वा -र्व्वं, अग्रः -ग्रा -ग्रं, पूर्व्ववर्त्ती -र्त्तिनी -र्त्ति (न्), अग्रगामी -मिनी -मि (न्), पूर्व्वगतः -ता -तं; 'fore-part,' अग्रभागः, अग्रांशः; 'fore part of the thigh,' अग्रजङ्घा.

FORE, *adv.* पूर्व्वं, पूर्व्वे, अग्रे, अग्रतस्, पूर्व्वतस्, प्राक्; 'fore and aft,' नावोऽग्रभागात्प्रभृति पश्चिमभागपर्य्यन्तं.

To FORE-ADMONISH, *v. a.* अग्रे प्रबुध् (c. 10. -बोधयति -यितुं) or उपदिश् (c. 6. -दिशति -देष्टुं).

FORE-ARM, *s.* प्रकोष्ठः, प्रवेष्टः, कलाचिका, अग्रबाहुः *m.*, अग्रभुजः.

To FORE-ARM, *v. a.* अग्रे or पूर्व्वं सन्नह् (c. 4. -नह्यति -नद्धुं) or युद्धार्थं सज्जीकृ.

To FORE-BODE, *v. a.* अनिष्टघटनां पूर्व्वं सूच् (c. 10. सूचयति -यितुं) or अग्रे ज्ञा (c. 9. जानाति, ज्ञातुं) or प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्व्वलक्षणं दा, पूर्व्वचिह्नं दा, पूर्व्वलक्षणेन अनिष्टम् अनुमा (c. 2. -माति -तुं) or अवगम् (c. 1. -गच्छति -गन्तुं).

FOREBODER, *s.* अनिष्टसूचकः, अनिष्टप्रदर्शकः, पूर्व्वलक्षणज्ञः, पूर्व्वलिङ्गज्ञः, अग्रसूचकः.

FOREBODING, *s.* अनिष्टसूचनं -ना, अनिष्टप्रदर्शनं, पूर्व्वलक्षणात् अनिष्टानुमानं.

To FORECAST, *v. a.* and *n.* अग्रे or पूर्व्वं चिन्त् (c. 10. चिन्तयति -यितुं) or प्रचिन्त् or निरूप् (c. 10. -रूपयति -यितुं) or उपायम् अनुसन्धा, (c. 3. -दधाति -धातुं), अग्रविवेचनां कृ, अग्रकल्पनां कृ.

FORECAST, *s.* अग्रचिन्तनं, अग्रनिरूपणं, पूर्व्वविवेचनं, पूर्व्वकल्पना, दीर्घदृष्टिः *f.*

FORECASTLE, *s.* नावः पूर्व्वभागः or अग्रभागः, अग्रकूपकपुरतो नौभागः.

To FORECLOSE, *v.* प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं).—(Foreclose a mortgage) न्यासकारिणं ऋणमोक्षणक्षमताम् अपनी (c. 1. -नयति -नेतुं).

FORECLOSURE, *s.* प्रतिबन्धनं, प्रतिषेधः, अवरोधनं, ऋणमोक्षणक्षमताहरणं.

FOREDECK, *s.* नौकापृष्ठस्य पूर्व्वभाग or अग्रभागः, पूर्व्वपृष्ठं, अग्रपृष्ठं.

To FORE-DETERMINE, *v. a.* अग्रे निश्चि (c. 5. -चिनोति -चेतुं) or निर्णी (c. 1. -णयति -णेतुं).

FORE-DETERMINED, *p. p.* पूर्व्वनिश्चितः -ता -तं, पूर्व्वनिर्णीतः -ता -तं, अग्रविचारितः -ता -तं.

To FOREDOOM, *v. a.* अग्रे or पूर्व्वं निर्दिश् (c. 6. -दिशति -देष्टुं) or प्रक्लृप् (c. 10. -कल्पयति -यितुं) or विचर् in caus. (-चारयति -यितुं).

FOREFATHERS, *s. pl.* पूर्व्वाः *m. pl.*, पूर्व्वपुरुषाः *m. pl.*, पूर्व्वजाः *m. pl.*, पितृलोकः, पितरः *m. pl.*, पितृपितामहादि *n.*, वृद्धाः *m. pl.*; 'practice of forefathers,' वृद्धाचारः.

To FOREFEND, *v. a.* निवृ (c. 10. -वारयति -यितुं), प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिकृ.

FOREFINGER, *s.* प्रदेशिनी, प्रदेशनी, देशिनी, देशी *m.* (न्), तर्ज्जनी, तरिता.

FOREFOOT, *s.* अश्वादिचतुष्पदजन्तूनां पूर्व्वपादः or सम्मुखीनपादः.

To FOREGO, *v. a.* अवसृज् (c. 6. -सृजति -स्रष्टुं), उत्सृज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, हा (c. 3. जहाति, हातुं), उज्झ् (c. 6. उज्झति -झितुं), प्रोज्झ्.

FOREGONE, *s.* त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, अवसृष्टः -ष्टा -ष्टं.

FOREGROUND, *s.* चित्रगतभूमेर् अग्रभागः or पूर्व्वभागः.

FOREHEAD, *s.* ललाटं, अलिकं, अलीकं, भालं, गोधिः *m.*, मुखः -खं, ललाटतटं, ललाटपट्टं, लकं, निटलं, गण्डशैलः, महाशङ्खः; 'having a high forehead,' उच्चललाटः -टा -टं; 'the open forehead,' ललाटफलकं.

FOREIGN, *a.* विदेशीयः -या -यं, वैदेशिकः -की -कं, विदेशी -शिनी -शि (न्), पारदेशिकः -की -कं, परदेशी -शिनी -शि (न्), विदेशजः -जा -जं, अन्यदेशीयः -या -यं, अन्यदेशजः -जा -जं, अन्यदेशोद्भवः -वा -वं, भिन्नदेशीयः -या -यं; 'a foreign country,' विदेशः, बहिर्देशः, देशान्तरं, अन्यदेशः.—(Extraneous) बहिर्भवः -वा -वं, बहिर्भूतः -ता -तं, बहिःस्थः -स्था -स्थं, बाह्यः -ह्या -ह्यं.—(Not pertaining) असम्बन्धी -न्धिनी -न्धि (न्), अनन्वितः -ता -तं, असम्पर्कीयः -या -यं.

FOREIGNER, *s.* विदेशी *m.* (न्), विदेशीयः, वैदेशिकः, परदेशी *m.* (न्), पारदेशिकः, पारदेश्यः, भिन्नदेशीयः, बहिर्देशजः, विदेशादागतः, देशान्तरादागतः, बहिर्देशोद्भवः, वैदेश्यः.

FOREIGNNESS, *s.* बाह्यत्वं, बहिर्भूतत्वं, दूरत्वं, असम्बन्धः, असम्पर्कः.

To FORE-IMAGINE, *v. a.* अग्रे मन् (c. 4. मन्यते, मन्तुं) or चिन्त् (c. 10. चिन्तयति -यितुं).

To FORE-JUDGE, *v. a.* अग्रे or पूर्व्वं विचर् (c. 10. -चारयति -यितुं) निर्णी (c. 1. -णयति -णेतुं).

To FORE-KNOW, *v. a.* अग्रे or पूर्व्वं ज्ञा (c. 9. जानाति, ज्ञातुं) or विद् (c. 2. वेत्ति, वेदितुं) or निरूप् (c. 10. -रूपयति -यितुं) or बुध् (c. 4. बुध्यते, बोद्धुं), भविष्यद् ज्ञा, प्रवेक्ष् (c. 1. -ईक्षते -क्षितुं), प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्व्वं लक्ष्यीकृ.

FOREKNOWLEDGE, *s.* अग्रज्ञानं, पूर्व्वज्ञानं, अग्रनिरूपणं, भविष्यज्ज्ञानं, भाविज्ञानं, प्रवेक्षणं, प्रदर्शनं, पूर्व्वलक्ष्यं, अग्रदृष्टिः *f.*, पूर्व्वदृष्टिः *f.*

FOREKNOWN, *p. p.* पूर्व्वज्ञातः -ता -तं, अग्रज्ञातः -ता -तं, अग्रनिरूपितः -ता -तं.

FORELAND, *s.* अन्तरीपः -पं, समुद्रमध्ये महाद्वीपबहिःस्थो भूमिभागः, उदग्रभूमिः *f.*, उदग्रभूः *f.*, उदग्रस्थलं, महाद्वीपनासिका, समुद्रनासिका.

FORELOCK, *s.* ललाटरुहः -हं, ललाटजः -जं, केशपाशी, ललाटकेशः, मस्तकाग्रकेशः, मस्तकाग्ररुहः केशपाशः or केशपक्षः.

FOREMAN, *s.* (Of a jury) द्वादशप्रमाणपुरुषप्रधः, द्वादशमध्यस्थपुरुषमुख्यः, प्रधानमध्यस्थः, मुख्यप्रमाणपुरुषः.—(Superintendant) कार्य्याधिष्ठाता *m.* (तृ), अधिकर्म्मिकः, कार्य्याधीशः, कार्य्याध्यक्षः, कार्य्याधिकृतः, श्रेष्ठी *m.* (न्), कर्म्म कुर्व्वताम् अधिष्ठाता *m.*

Foremast, *s.* नौकाग्रस्थः कूपकः, नौकाग्रभागे गुणवृक्षकः, अग्रकूपकः.

Fore-mentioned, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

Foremost, *a.* अग्रः -ग्रा -ग्रं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, प्राग्र्यः -ग्र्या -ग्र्यं, प्रधानः -ना -नं, प्रथमः -मा -मं, उत्तमः -मा -मं, उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, सर्व्वाग्रस्थः -स्था -स्थं; 'first in rank,' प्रथमपदस्थः -स्था -स्थं.

Forenamed, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वाभिहितः -ता -तं, पूर्व्वोदाहृतः -ता -तं.

Forenoon, *s.* पूर्व्वाह्णः, प्राह्णः, पूर्व्वाह्णकालः; 'in the forenoon,' प्राह्णे, पूर्व्वाह्णे, प्राह्णेतमां; 'relating to it,' प्राह्णेतनः -नी -नं, पूर्व्वाह्णेतनः -नी -नं.

Forensic, *a.* व्यावहारिकः -की -कं or व्यवहारिकः, व्यवहारी -रिणी -रि (न्), विचारसभासु व्यवहारितः -ता -तं, विचारस्थानसम्बन्धीयः -या -यं.

To **fore-ordain**, *v. a.* अग्रे or पूर्व्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रक्लृप् (c. 10. -कल्पयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or नियुज् (c. 7. -युनक्ति -योक्तुं) or विधा (c. 3. -दधाति -धातुं).

Fore-ordained, *p. p.* अग्रनिरूपितः -ता -तं, पूर्व्वनिर्दिष्टः -ष्टा -ष्टं, पूर्व्वप्रकल्पितः -ता -तं.

Forepart, *s.* अग्रभागः, पूर्व्वभागः, आदिभागः, प्रथमभागः, सम्मुखभागः.

Forerank, *s.* अग्रपदं, प्रथमपदं, प्रधानपदं, मुख्यपदं, श्रेष्ठपदविः *f.*

To **fore-run**, *v. a.* अग्रे or अग्रतः or पुरः or प्राक् सृ (c. 1. सरति, सर्त्तुं) or गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं).

Fore-runner, *s.* अग्रेसरः, अग्रसरः, अग्रगः -गामी *m.* (न्), पुरोगः -गामी *m.*, प्राग्गामी *m.*, अग्रवर्त्ती *m.* (न्), अग्रगतः, पूर्व्वपुरुषः.

Foresaid, *p. p.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

Foresail, *s.* नौकाग्रस्थकूपकालम्बितं वायुवसनं or वातवसनं.

To **foresay**, *v. a.* अग्रे or पूर्व्वं वद् (c. 1. वदति -दितुं) or प्रवद्, भविष्यद् वद्.

To **foresee**, *v. a.* प्रदृश् (c. 1. -पश्यति -द्रष्टुं), उद्दृश्, प्रवेक्ष् for प्रावेक्ष् (c. 1. -ईक्षते -क्षितुं), अग्रे or पूर्व्वं दृश्, अनागतं or परिणामं or भविष्यद् दृश् or समीक्ष्, अग्रे ज्ञा (c. 9. जानाति, ज्ञातुं) or निरूप् (c. 10. -रूपयति -यितुं).

Foreseeing, *part.* प्रपश्यन् -श्यन्ती -श्यत् (त्), अग्रदर्शी -र्शिनी -र्शि (न्), अनागतदर्शी &c., पूर्व्वदर्शी &c., भविष्यद्दर्शी &c., दूरदर्शी &c., अन्तरज्ञः -ज्ञा -ज्ञं, प्रवेक्ष्यन् &c. for प्रावेक्ष्यन् &c.

Foreseen, *p. p.* प्रवेक्षितः -ता -तं, प्रदृष्टः -ष्टा -ष्टं, सन्दृष्टः -ष्टा -ष्टं, सन्दृश्यमानः -ना -नं, अग्रनिरूपितः -ता -तं.

To **foreshadow**, *v. a.* पूर्व्ववर्णनं कृ, पूर्व्वमूर्त्तिं कृ, अग्रे रूप् (c. 10. रूपयति -यितुं).

To **foreshame**, *v. a.* लज्ज् in caus. (लज्जयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं).

Fore-ship, *s.* नावः पूर्व्वभागः or अग्रभागः, नौकाग्रभागः.

To **foreshorten**, *v. a.* मूर्त्तिं चित्रसमर्पणात् सम्मुखभागे ह्रस् (c. 10. ह्रासयति -यितुं) or संहृ (c. 1. -हरति -हर्त्तुं) or संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

To **foreshow**, *v. a.* प्रदृश् in caus. (-दर्शयति -यितुं), अग्रे or पूर्व्वं दृश् or सूच् (c. 10. सूचयति -यितुं), भविष्यत् सूच् or वद् (c. 1. वदति -दितुं).

Foreshown, *p. p.* प्रदर्शितः -ता -तं, अग्रसूचितः -ता -तं, पूर्व्वसूचितः -ता -तं.

Foresight, *s.* पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, प्रवेक्षणं, प्रदर्शनं, परिणामदृष्टिः *f.*, अग्रनिरूपणं, भविष्यद्दर्शनं, दूरदृष्टिः *f.*, दूरदर्शनं, दीर्घदृष्टिः *f.*, परिवेदना.

Foreskirt, *s.* अग्रस्थो वस्त्राञ्चलः, परिधानस्य अग्राञ्चलः, अग्रतो वसनान्तं.

To **forespeak**, *v. a.* अग्रे वद् (c. 1. वदति -दितुं), प्रवद्, प्रव्याहृ (c. 1. -हरति -हर्त्तुं).

Forespent, *a.* क्षीणबलः -ला -लं, श्रान्तः -न्ता -न्तं, खिन्नः -न्ना -न्नं.

Forespoken, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

Forest, *s.* अरण्यं -ण्यी -ण्यानी, वनं -नी, अटविः -वी *f.*, गहनं, गहः, काननं, विपिनं, जङ्गलः -लं, दावः, दवः, कान्तारः -रं, कुञ्जं, रिक्तं, तल्कं; 'forest on fire,' दावः, दावाग्निः *m.*, मुखाग्निः, महिलः.

Forest, *a.* वन्यः -न्या -न्यं, आरण्यः -ण्यी -ण्यं -ण्यकः -का -कं, जङ्गलः -ला -लं, जाङ्गलः -ली -लं; 'produced in a forest,' वनोद्भवः -वा -वं, अरण्यजः -जा -जं -जातः -ता -तं, अरण्यभवः -वा -वं, अरण्योत्पन्नः -न्ना -न्नं, अरण्यसम्भवः -वा -वं, अरण्य or वन in comp.; as, 'a forest tree,' वनपादपः, अरण्यवृक्षः, वनराजिः *m.*, वनस्पतिः *m.*, वन्यतरुः *m.*

To **forestall**, *v. a.* (Take beforehand) अग्रे or पूर्व्वं or पूर्व्वतो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददे -दातुं), अग्रे गृहीत्वा निवृ (c. 10. -वारयति -यितुं) or निषिध् (c. 1. -षेधति -षेद्धुं).—(Buy beforehand) पूर्व्वं क्री (c. 9. क्रीणाति, क्रेतुं), पूर्व्वक्रयं कृ, प्रख्या (c. 2. -ख्याति -तुं).

Forestalled, *p. p.* पूर्व्वगृहीतः -ता -तं, पूर्व्वक्रीतः -ता -तं, प्रख्यातः -ता -तं.

Forestaller, *s.* पूर्व्वक्रेता *m.* (तृ), अग्रक्रयी *m.* (न्), सर्व्वपण्यानि विक्रयस्थानानयनात् पूर्व्वं क्रीत्वा मूल्यवर्धकः.

Forester, *s.* (Inhabitant of a forest) वनवासी *m.* (न्), अरण्यवासी *m.*, वनस्थायी *m.* (न्), वनस्थः, वनेचरः, वनचरः, वनचारी *m.* (न्), वनवर्त्ती *m.* (न्), वनौकाः *m.* (स्), अरण्यौकाः *m.* (स्), वनाश्रयः, वनव्यवहारी *m.* (न्), आरण्यकः, अरण्यसद् *m.*—(Overseer of the forests) अरण्याध्यक्षः, अरण्यरक्षकः.

Foretaste, *s.* पूर्व्वभुक्तिः *f.*, अग्रभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वास्वादनं, अग्रोपभोगः, पूर्व्वोपभोगः, पूर्व्वानुभवः, पूर्व्वज्ञानं, अग्रज्ञानं.

To **foretaste**, *v. a.* अग्रे or पूर्व्वं or अग्रतो भुज् (c. 7. भुंक्ते, भोक्तुं) or उपभुज् or अनुभू or आस्वाद् (c. 1. -स्वादते -दितुं), पूर्व्वभुक्तिं कृ, पूर्व्वस्वादनं कृ.

Foretasted, *p. p.* पूर्व्वभुक्तः -क्ता -क्तं, पूर्व्वास्वादितः -ता -तं, पूर्व्वानुभूतः -ता -तं.

To **foretell**, *v. a.* अग्रे or अग्रतः or पूर्व्वं वद् (c. 1. वदति -दितुं) or प्रवद्, भविष्यद् वद् or वच् (c. 2. वक्ति -क्तुं), प्रदृश् in caus. (-दर्शयति -यितुं), अग्रे दृश्, अन... [illegible] ज्ञापयति -यितुं).

Foreteller, *s.* अग्रवादी *m.* (न्), भविष्यद्वक्ता *m.* (क्तृ), भविष्यद्वादी *m.*, भाविवक्ता *m.*, अनागतज्ञापकः, प्रदर्शकः, भाविदर्शकः, दैवज्ञः.

To **forethink**, *v. a.* पूर्व्वं or अग्रे चिन्त् (c. 10. चिन्तयति -यितुं) or प्रचिन्त् or विमृश् (c. 6. -मृशति -म्रष्टुं) or निरूप् (c. 10. -रूपयति -यितुं), पूर्व्वविवेचनं कृ.

Forethought, *s.* पूर्व्वचिन्ता, अग्रचिन्ता, पूर्व्वविवेचनं -ना, अग्रविवेचनं, पूर्व्वविचारणं -णा, अग्रनिरूपणं, पूर्व्वविमर्शः, प्रसमीक्षा, प्रवेक्षणं, पूर्व्वदृष्टिः *f.*, दीर्घदृष्टिः *f.*, परिणामदृष्टिः, परिवेदना.

To **foretoken**, *v. a.* अग्रे or पूर्व्वं दृश् (c. 10. दर्शयति -यितुं) or सूच् (c. 10. सूचयति -यितुं), प्रदृश्, पूर्व्वलक्षणं or पूर्व्वचिह्नं दा, पूर्व्वलक्षणेन भविष्यत् सूच्.

Foretoken, *s.* पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, भाविलक्षणं, भाविचिह्नं, भविष्यल्लक्षणं, भविष्यल्लिङ्गं.

Foretold, *p. p.* पूर्व्वकथितः -ता -तं, प्रदर्शितः -ता -तं, प्राक्सम्भवादुक्तः -क्ता -क्तं.

Fore-tooth, *s.* अग्रदन्तः, राजदन्तः, सम्मुखदन्तः, मुख्यदन्तः.

Foretop, *s.* मस्तकाग्रकेशः.—(Of a ship) कूपकाग्रे मञ्चकः.

For-ever, *adv.* नित्यं, सर्व्वकालं, अनन्तकालं, शाश्वतीः समाः.

Fore-ward, *s.* सेनामुखं, ध्वजिनीमुखं, सेनाग्रं, रणमूर्द्धा *m.* (न्), शिरः *n.* (स्).

To **fore-warn**, *v. a.* अग्रे or पूर्व्वं बुध् (c. 10. बोधयति -यितुं) or प्रबुध् or प्रत्यादिश् (c. 6. -दिशति -देष्टुं) or उपदिश् or सन्दिश् or ज्ञा in caus. (ज्ञापयति -यितुं), पूर्व्वलक्षणं दा.

Fore-warned, *p. p.* पूर्व्वबोधितः -ता -तं, अग्रविज्ञापितः -ता -तं, पूर्व्वोपदिष्टः -ष्टा -ष्टं.

Fore-warning, *s.* अग्रप्रत्यादेशः, पूर्व्वबोधनं, पूर्व्वोपदेशः, पूर्व्वविज्ञप्तिः *f.*

To forfeit, *v. a.* दण्ड् in pass. (दण्ड्यते), दण्डं दा; 'he forfeits the eighth part of his property,' स्ववित्तस्य अष्टमांशं दण्ड्यते.—(Lose one's right) स्वाधिकारात् or स्वस्वत्वाद् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) or परिभ्रंश् or प्रभ्रंश् or च्यु (c. 1. च्यवते, च्योतुं) or प्रच्यु, हा in pass. (हीयते) with instr. or abl. c., प्रहा; 'he forfeits his right,' तस्मात् स्वत्वम् अपवर्ज्यते; 'his kingdom,' राज्यात् प्रभ्रश्यति.

Forfeit, *s.* दण्डः, धनदण्डः, अर्थदण्डः, हारितं, विहापितं, निक्षेपः, न्यासः.

Forfeitable, *a.* दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डनीयः -या -यं, हेयः -या -यं.

Forfeited, *p. p.* दण्डितः -ता -तं, भ्रष्टः -ष्टा -ष्टं, हीनः -ना -नं, च्युतः -ता -तं; 'one who has forfeited his right,' हृताधिकारः -रा -रं, च्युताधिकारः -रा -रं, अधिकाराद्भ्रष्टः -ष्टा -ष्टं; 'all his property,' सर्व्वस्वदण्डः -ण्डा -ण्डं, हृतसर्व्वस्वः -स्वा -स्वं; 'his kingdom,' राज्यात्प्रभ्रष्टः -ष्टा -ष्टं.

Forfeiture, *s.* हानिः *f.*, भ्रंशः, अपहारः, च्युतिः *f.*, नाशः, अपवर्ज्जनं, वृद्धिः *f.*, दण्डदानं; 'of right,' स्वत्वहानिः *f.*, अधिकारहानिः, अधिकारभ्रंशः; 'of property,' वित्तहानिः *f.*, दायापवर्ज्जनं.

Forge, *s.* कुटिलिका, उध्मानं, अग्निकुण्डं, तप्तलोहघटनस्थानं, निर्म्माणस्थानं.

To forge, *v. a.* (Metals) तप्तलोहादि मुद्गरादिना ताडयित्वा नानारूपेण घट् (c. 10. घटयति -यितुं) or कुटिलिकायां विलाप्य घट् or निर्मा (c. 2. -माति -तुं).—(Make) घट्, निर्मा, कॢप् (c. 10. कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं), विरच् (c. 10. -रचयति -यितुं).—(Counterfeit) छलेन or कपटेन कॢप् or निर्म्मा, कूटं कृ, कपटं कृ; 'forge a writing,' कपटलेख्यं कृ, कूटलेखं कृ.

Forged, *p. p.* (Fabricated) घटितः -ता -तं, कल्पितः -ता -तं, रचितः -ता -तं, निर्म्मितः -ता -तं.—(Counterfeit) काल्पनिकः -की -कं, कृत्रिमः -मा -मं, कपटी -टिनी -टि (न्), कूट or कपट in comp.; as, 'a forged document,' कपटलेख्यं, कूटलेखः; 'a forged decree,' कूटशासनं; 'forged coin,' कूटस्वर्णं.

Forger, *s.* कूटकः, कूटकृत् *m.* -कारः, कपटलेख्यकारी *m.* (न्), कूटलेख्यकारकः, कपटिकः, कपटकारी *m.*, कृत्रिमलेखकृत्.

Forgery, *s.* कूटकरणं, कपटकरणं, कपटलेख्यकरणं, कूटलेख्यकरणं, कृत्रिमलेखकरणं, कूटता.—(That which is counterfeited) कपटलेखः.

To forget, *v. a.* विस्मृ (c. 1. -स्मरति -ते -स्मर्त्तुं), न स्मृ, अपस्मृ, स्मृतेर् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) with nom. of thing forgotten, स्मृत्यपेतः -ता -तं भू, विस्मरणात् परित्यज् (c. 1. -त्यजति -त्यक्तुं), अवमर्षणं कृ.

Forgetful, *a.* विस्मरणशीलः -ला -लं, विस्मारकः -का -कं, नष्टसंस्मृतिः -तिः -ति, नष्टस्मृतिः -तिः -ति, अपस्मृतिः -तिः -ति, अनवहितः -ता -तं, प्रमत्तः -त्ता -त्तं.

Forgetfulness, *s.* विस्मृतिः *f.*, विस्मरणं, विस्मरणशीलता, अस्मृतिः *f.*, अस्मरणं, अपस्मारः, प्रस्मृतिः *f.*, स्मृतिभ्रंशः, स्मृतिहानिः *f.*, स्मृतिनाशः, भ्रमः.

Forging, *s.* घटनं -ना, निर्म्माणं, कल्पनं, रचना, कूटकरणं.

To forgive, *v. a.* क्षम् (c. 1. क्षमते -ति, क्षन्तुं), संक्षम्, मुच् (c. 6. मुञ्चति, मोक्तुं), विमुच्, अवसृज् (c. 6. -सृजति -स्रष्टुं), त्यज् (c. 1. त्यजति, त्यक्तुं), मृष् (c. 4. मृष्यति, मर्षितुं, मर्ष्टुं. c. 10. मर्षयति -यितुं), मृज् (c. 2. मार्ष्टि -र्ष्टुं), अनुज्ञा (c. 9. -जानाति -ज्ञातुं), समनुज्ञा, सह् (c. 1. सहते, सोढुं). निर्यत् (c. 10. -यातयति -यितुं); 'forgive injuries,' अपराधान् क्षम्; 'forgive sins,' पापानि मृज् or अवसृज्; 'forgive a debt,' ऋणं त्यज्.

Forgiven, *p. p.* क्षान्तः -न्ता -न्तं, दोषमुक्तः -क्ता -क्तं, पापमुक्तः -क्ता -क्तं, विमोचितः -ता -तं, अवमृष्टः -ष्टा -ष्टं, पापमार्ज्जितः -ता -तं.

Forgiveness, *s.* क्षमा, क्षान्तिः *f.*, पापमोचनं, पापमुक्तिः *f.*, दोषमुक्तिः *f.*, अपराधसहिष्णुता, पापमार्ज्जनं, विमोचनं, कृपा, दया, मर्षणं; 'of a debt,' ऋणत्यागः.

Forgiving, *a.* क्षमी -मिणी -मि (न्), क्षमावान् -वती -वत् (त्), क्षमान्वितः -ता -तं, क्षमायुक्तः -क्ता -क्तं, अपराधसहिष्णुः -ष्णुः -ष्णु, दयालुः -लुः -लु, कृपालुः -लुः -लु.

Forgotten, *p. p.* विस्मृतः -ता -तं, अस्मृतः -ता -तं, स्मृतिभ्रष्टः -ष्टा -ष्टं, स्मृत्यपेतः -ता -तं, अन्तर्गतः -ता -तं.

Fork, *s.* खाद्यमांसाद्युत्तोलनार्थं शूलविशेषः, कण्टकः; 'two-pronged,' द्विशिखशूलः, द्व्यग्रशूलः; 'three-pronged,' त्रिशिखशूलः, त्र्यग्रशूलः.

To fork, *v. n.* (Divide in two) द्विशिखः -खा -खं भू, द्विशिखारूपेण भिन्नीभू or विभिद् in pass. (-भिद्यते), द्विशिखीभू.

To fork, *v. a.* पूर्व्वोक्तशूलेन उत्तुल् (c. 10. -तोलयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Garland, *s.* माला, माल्यं, स्रक् *f.* (ज्), दाम *n.* (न्), हारः, आवलिः -ली *f.*, प्रालम्बः -म्बिका; 'of flowers,' कुसुममाला, पुष्पावली, कुसुमस्तवकः, कुसुमावतंसकं; 'of pearls,' मुक्तावली, देवच्छन्दः, शतयष्टिकः; 'other kinds of garlands,' गुच्छः, गुच्छार्द्धः, गोस्तनः.

To garland, *v. a.* मालया or स्रजा अलङ्कृ, मालायुक्तं -क्तां -क्तं कृ.

Garlanded, *p. p.* माली -लिनी -लि (न्), स्रग्वी -ग्विणी -ग्वि (न्), स्रग्धरः -रा -रं.

Garlic, *s.* लशुनं, रशुनं, लशूनं, लसुनः, रसुनः, रसोनः -नकः, गृञ्जनः, महौषधं, महाकन्दः, अरिष्टः, सोनहः, उग्रगन्धः, दीर्घपत्रः, ग्रन्थिमूलं, श्रीमस्तकः, मुखदूषणः, राहूच्छिष्टः, तरिता.

Garlic-eater, *s.* लशुनाशी *m.* (न्), लशुनभोजी *m.* (न्), लशुनादः.

Garlicky, *a.* लशुनीयः -या -यं, रशुनीयः -या -यं.

Garment, *s.* वस्त्रं, वेशः, वेषः, वासस् *n.*, वसनं, परिधानं, परिच्छदः, अम्बरं, आच्छादनं, प्रच्छादनं, प्रसाधनं, संव्यानं, प्रावारः, झर्झरः; 'under-

garment,' अन्तरीयं, अन्तर्वासस्, अधोवसनं; 'upper,' उत्तरीयं, प्रावारः.

GARNER, s. कुशूलः, धान्यागारं, अन्नकोष्ठः, कोष्ठः -ष्ठकं, भाण्डागारं, व्रीह्यगारं, कण्डोलः -लकः, काण्डालः, पिटः, कूदरः.

To GARNER, *v. a.* कुशूले निविश् (c. 10. -वेशयति -यितुं) or सञ्चि (c. 5. -चिनोति -चेतुं).

GARNERED, *p. p.* कुशूलभृतः -ता -तं, कोष्ठभृतः -ता -तं, कुशूलीकृतः -ता -तं.

GARNET, *s.* रक्तवर्णो मणिविशेषः, पद्मरागविशेषः, सर्पमणिः *m.f.*

To GARNISH, *v. a.* शुभ् (c. 10. शोभयति -यितुं), उपशुभ्, भूष् (c. 10 भूषयति -यितुं), विभूष्, अलङ्कृ, समलङ्कृ, परिष्कृ, रञ्ज् (c. 10. रञ्जयति -यितुं).

GARNISH, *s.* अलङ्कारः, अलङ्क्रिया, शोभा -भनं, भूषणं, विभूषणं, आभरणं, सज्जा, प्रसाधनं. *See* GARNISHMENT.

GARNISHED, *p. p.* शोभितः -ता -तं, उपशोभितः -ता -तं, अलङ्कृतः -ता -तं, भूषितः -ता -तं, विभूषितः -ता -तं, परिष्कृतः -ता -तं, प्रसाधितः -ता -तं, कृतशोभः -भा -भं.

GARNISHMENT, GARNITURE, *s.* सज्जा, उपकरणानि *n. pl.*, शोभार्थम् अनुबन्धाः *m. pl.*

GARRET, *s.* उपरिस्थः कोष्ठः, क्षोमः -मं, क्षौमः -मं, अट्टः, अट्टालः, कूटागारं, चन्द्रशाला -लिका, चूला.

GARRISON, *s.* दुर्गनिवासिनः सैन्याः *m. pl.*, दुर्गस्थाः सैन्याः, दुर्गस्थसैन्यं, दुर्गसैन्यं, दुर्गबलं, दुर्गरक्षिणः *m. pl.*, दुर्गरक्षकाः *m. pl.*, रक्षिणः *m. pl.*, रक्षकाः *m. pl.*, रक्षिवर्गः.

To GARRISON, *v. a.* नगररक्षार्थं दुर्गे सैन्यान् or रक्षकान् निविश् in caus. (-वेशयति -यितुं), नगररक्षणे सैन्यगुल्मं नियुज् (c. 7. युनक्ति -योक्तुं).

GARRISONED, *p. p.* रक्षकयुक्तः -क्ता -क्तं, रक्षार्थं सैन्ययुक्तः -क्ता -क्तं.

GARRULITY, *s.* वावदूकता, वाचालता, बहुवादित्वं, बहुभाषिता, अतिशयोक्तिः *f.* जल्पकता, जल्पाकत्वं, वाग्मित्वं, अतिभाषणं, अत्यालापः, अतिवादः.

GARRULOUS, *a.* वावदूकः -का -कं, वाचालः -ला -लं, बहुभाषी -षिणी -षि (न्), बहुवादी -दिनी -दि (न्), जल्पकः -का -कं, जल्पाकः -का -कं, वाग्मी -ग्मिनी -ग्मि (न्), गदयित्नुः -त्नुः -त्नु, मुखरः -रा -रं, वक्ता -क्त्री -क्तृ (क्तृ).

GARTER, *s.* जङ्घाबन्धनी, पादबन्धनी, जङ्घाबन्धः, जङ्घावस्त्ररक्षणी.

GARUDA, *s.* (The bird on which the god Vishnu is carried, represented as being something between a man and a bird, and considered as the lord of the feathered tribe. He is the son of Kasyapa by Vinatá, and younger brother of Aruna) गरुडः, गरुत्मान् *m.* (-त्मत्), तार्क्ष्यः, खगेश्वरः, सुपर्णः, विष्णुरथः, वैनतेयः, विनतासूनुः *m.*, नागान्तकः, पन्नगाशनः, भुजगदारणः, सिताननः, दक्षाय्यः. The son of Garuda is called सम्पातिः -तिकः.

GAS, *s.* वायुः *m.*, वाष्पः, वातः, धूमः, धूमिका, अङ्गारजो वायुः *m.*

GASH, *s.* दीर्घच्छेदः, गम्भीरच्छेदः, दीर्घक्षतं, गम्भीरक्षतं, दीर्घगम्भीरस् त्वग्भेदः or त्वक्छेदः.

To GASH, *v. a.* दीर्घच्छेदं कृ, गम्भीरच्छेदं कृ, दीर्घगम्भीरं त्वग्भेदं कृ.

GASOMETER, *s.* वायुमापनयन्त्रं, अङ्गारजवायुनिर्म्माणस्थानं.

To GASP, *v. n.* मुखं व्यादाय कृच्छ्रेण श्वासप्रश्वासं कृ, कृच्छ्रेण श्वस् (c. 2. श्वसिति -तुं) or प्राण् (c. 2. प्राणिति -तुं), दुःश्वासं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.

GASP, *s.* दुःश्वासः, श्वासः, श्वसितं, दुःश्वसितं, उच्छ्वासः, उच्छ्वसितं, प्राणः.

GASPING, *part.* उच्छ्वसन् -सन्ती -सती -सत् (त्), कृच्छ्रेण श्वसन् &c., उच्छ्वसितः -ता -तं, काशश्वासः -सा -सं, दुःश्वासी -सिनी -सि (न्), श्वासकृच्छ्रोपहतः -ता -तं, यष्टिप्राणः -णा -णं.

GASTRIC, *a.* जाठरः -री -रं, औदरिकः -की -कं, उदरीयः -या -यं, जठरीयः -या -यं; 'gastric juice,' कोष्ठाग्निः *m.*, अग्निः.

GASTRONOME, *s.* उदरपरायणः, उदरसेवी *m.* (न्), कुक्षिम्भरिः *m.*, सद्भोज्यरसज्ञः.

GASTRONOMY, *s.* सद्भोज्यरसविद्या, परमान्नरसविद्या, उदरसेवा.

GASTROTOMY, *s.* उदरच्छेदः -दनं, जठरच्छेदः -दनं.

GATE, *s.* द्वारं, द्वाः *f.* (र्), प्रतीहारः, प्रतिहारः, अररः -री -रं, गृहमुखं, द्वारकण्टकः; 'back-gate,' पश्चाद्द्वारं; 'private-gate,' अन्तर्द्वारं, प्रच्छन्नद्वारं; 'city-gate,' पुरद्वारं, नगरद्वारं, गोपुरं; 'raised place over it,' हस्तिनखः; 'outer-gate,' बहिर्द्वारं.

GATE-POST, *s.* द्वारस्तम्भः, द्वारस्थूणा, द्वारदारुः *m.*; 'its ornament,' तोरणः.

GATE-WAY, *s.* द्वारवर्त्म *n.* (न्), द्वारपथः, निःसरणं.

To GATHER, *v. a.* (Collect) चि (c. 5. चिनोति, चेतुं), अवचि, समाचि, सञ्चि, आचि, प्रचि, समानी (c. 1. -नयति -नेतुं), समुपानी, समादा (c. 3. -ददाति -दातुं), समाहृ (c. 1. -हरति -हर्तुं), उपसंहृ, समूह् (c. 1. ऊहते -हितुं), सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह्, सम्भृ (c. 1. -भरति, c. 3. -बिभर्त्ति -भर्त्तुं), संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं), एकीकृ, एकत्र कृ.—(Gather flowers, &c.) पुष्पाणि चि or अवचि or लू (c. 9. लुनाति, लवितुं).—(Select) उद्धृ, समुद्धृ, वृ, उद्धृ.—(Deduce, infer) अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते), ऊह् (c. 1. ऊहते -हितुं), अपोह्, अवगम् (c. 1. -गच्छति -गन्तुं).

To GATHER, *v. n.* (Congregate) सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्, समे (सम and आ with rt. इ, समैति -तुं), एकत्र मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, एकत्र आगम्.—(Increase) वृध् (c. 1. वर्धते -र्धितुं), उपचि in pass. (-चीयते).—(Form matter) पूय् (c. 1. पूयते -यितुं), पूयं बन्ध् (c. 9. बध्नाति, बन्धुं), पूयपूर्णः -र्णा -र्णं भू.

GATHER, *s.* (Fold) वस्त्रपुटः, ऊर्म्मिः *m. f.*, ऊर्म्मिका, व्यावर्त्तनं, चूणः.

GATHERED, *p. p.* चितः -ता -तं, सञ्चितः -ता -तं, अवचितः -ता -तं, उपचितः -ता -तं, समूढः -ढा -ढं, सङ्गृहीतः -ता -तं, लूनः -ना -नं.

GATHERER, *s.* अवचायी *m.* (न्), सञ्चयी *m.* (न्), सङ्ग्रहीता *m.* (तृ), सङ्ग्राहकः; 'gatherer of taxes,' करग्रहः, शुल्कग्राही *m.* (न्); 'of flowers,' पुष्पावचायी *m.*

GATHERING, *s.* (Act of collecting) चयनं, सञ्चयनं, चायः, अवचयः, अवचायः, लावः, सङ्ग्रहः -हणं, एकत्रकरणं; 'of flowers,' पुष्पचयः, कुसुमावचयः, पुष्पप्रचायः.—(Crowd, assembly) समूहः, सङ्घः, सञ्चयः, सङ्घातः, समागमः, समवायः, समाहारः, सन्नयः; 'of people,' जनसमूहः, जननिवहः, लोकसङ्घः.—(Abscess) विद्रधिः *m.*, पूयसम्पूर्णः स्फोटः.—(Gathering of clouds) घनचयः, घनौघः, घनजालं, घनसमौघः.

GAUDERY, *s.* अलङ्कारः, चित्रविचित्राभरणानि *n. pl.*, शोभाकरद्रव्याणि *n. pl.*

GAUDILY, *adv.* सचित्रालङ्कारं, शोभाकरणार्थं, एकान्तशोभनं, चित्रविचित्रं; 'gaudily dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

GAUDINESS, *s.* रक्तता, सरागत्वं, रागः, रङ्गः, चित्रता, चित्रविचित्रता, शोभा, एकान्तशोभा, अतिशोभा, वर्णः, नानावर्णत्वं, कर्बुरता, वाह्यदृष्टिः *f.*

GAUDY, *a.* बहुवर्णः -र्णा -र्णं, नानावर्णः -र्णा -र्णं, चित्रः -त्रा -त्रं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं, एकान्तशोभनः -ना -नं, रक्तः -क्ता -क्तं, अतिरागी -गिणी -गि (न्), चित्रालङ्कारवान् -वती -वत् (त्), उज्ज्वलः -ला -लं.

GAUDY, *s.* (A feast) उत्सवः, उत्सवदिनं, पर्व्वाहः, उद्धर्षः.

To GAUGE, *v. a.* प्रमाणदण्डेन भाण्डभरकं मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

GAUGE, *s.* (Measure) परिमाणं, प्रमाणं, मानं, परिमाणविधिः *m.*, परिमाणरीतिः *f.*—(Instrument for measuring) मापनयन्त्रं, परिमापनदण्डः, प्रमाणदण्डः, भाण्डपूरकमापनार्थं यष्टिः *m.* *See* GAGE.

GAUGER, s. प्रमाणदण्डद्वारेण भाण्डभरकमापकः, परिमाणकर्त्ता m. (र्त्तृ).

GAUGING, s. प्रमाणदण्डेन भाण्डभरकमापनं or भाण्डपूरकपरिमापणं.

GAUNT, a. कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, क्षामः -मा -मं, शुष्काङ्गः &c., सुक्षामः &c.

GAUNTLET, s. लोहनिर्म्मितं हस्ताच्छादनं or हस्तत्राणं; 'to throw the gauntlet,' पूर्व्वोक्तहस्ताच्छादनं भूमौ प्रक्षिप्य युद्धार्थम् आह्वे (c. 1. -ह्वयति -ह्वातुं).

GAUR, s. (The country) गौडः; 'its inhabitants,' गौडाः m. pl.

GAUZE, s. विरलतन्तुः स्वच्छवस्त्रविशेषः, विरलांशुकं, सूक्ष्मांशुकं.

GAVOT, s. गवोतसंज्ञको लघुनृत्यविशेषः.

GAWK, s. मूर्खः, मूढः, स्थूलबुद्धिः m., स्थूलधीः m., जडधीः m.

GAWKY, a. स्थूलः -ला -लं, स्थूलशरीरः -रा -रं, दीर्घस्थूलः -ला -लं, दीर्घदेहः -हा -हं, अदक्षः -क्षा -क्षं, विरूपः -पी -पं.

GAY, a. (Merry) उल्लसः -सा -सं -सितः -ता -तं, आनन्दी -न्दिनी -न्दि (न्), हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, प्रफुल्लः -ल्ला -ल्लं, उल्लासितः -ता -तं, समुल्लसितः -ता -तं, विलासी -सिनी -सि (न्), केलिकः -का -कं, मुदितः -ता -तं, प्रमोदी -दिनी -दि (न्), ललितः -ता -तं, परिहासशीलः -ला -लं, हासी -सिनी -सि (न्).—(Showy) नानावर्णः -र्णा -र्णं, बहुवर्णः -र्णा -र्णं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं.

GAYETY, s. उल्लसता, उल्लासः, आनन्दः, आह्लादः, सानन्दता, हर्षः, प्रहर्षः, प्रफुल्लता, मुदा, प्रमोदः, चित्तप्रसन्नता, प्रहसनं.—(Merry making) उत्सवः, महोत्सवः, उत्सवकरणं.

GAYLY, adv. सानन्दं, सहर्षं, प्रमोदेन, उल्लासेन, प्रहृष्टवत्.—(Showily) बहुवर्णं, चित्रविचित्रं, अतिशोभनं; 'gayly dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

To GAZE, v. a. and n. ईक्ष् (c. 1. ईक्षते -क्षितुं), प्रेक्ष्, निरीक्ष्, वीक्ष्, अभिवीक्ष्, समीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां निरीक्ष् or दृश् (c. 1. पश्यति, द्रष्टुं), स्थिरदृष्टिं कृ, दृष्टिं or लक्ष्यं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

GAZE, s. स्थिरदृष्टिः f., बद्धदृष्टिः f., अनिमिषदृष्टिः f., दृष्टिः f., आलोकनं, ईक्षणं, निरीक्षा, वीक्षणं, वीक्षितं, प्रेक्षणं, प्रेक्षितं, दर्शनं, लक्षः -क्षणं; 'with fixed gaze,' बद्धदृष्टिः -ष्टिः -ष्टि, अनिमिषनयनः -ना -नं.

GAZEHOUND, s. दृष्टिमात्रेण शशकाद्यनुसरणशीलो मृगव्यकुक्कुरः.

GAZELLE, s. तनुशरीरो हरिणभेदः, मृगः -गी; 'gazelle-eyed,' मृगीदृक् m.f.n. (श्).

GAZETTE, s. वार्त्तिकपत्रं, समाचारपत्रं, संवादपत्रं, सन्देशपत्रं.

To GAZETTE, v. a. वार्त्तिकपत्रेण प्रकाश् (c. 10. -काशयति -यितुं).

GAZETTEER, s. अमुकदेशे यत्किञ्चिद् नगरग्राममार्गादि विद्यते तदाकारनामादिवाचकं पुस्तकं.

GAZING, part. स्थिरदृष्ट्या प्रेक्षमाणः -णा -णं or आलोकयन् -यन्ती -यत् (त्); 'gazing up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि; 'in various directions,' इतस्ततो दत्तदृष्टिः.

GAZING-STOCK, s. तिरस्कारविषयः, अवहासभूमिः f., परिभवास्पदं, कौतुकं.

GEAR, s. उपकरणं, सामग्री -ग्र्यं, सज्जा, परिच्छदः, पारिणाह्यं, आभरणं, प्रसाधनं, प्रतिकर्म्म n. (न्); 'plough-gear,' हलोपकरणं.

GEESE, s. pl. हंसाः m. pl. *See* GOOSE.

GELATIN, s. क्वथितमांसनिर्म्मितं घनीभूतं or श्यानीभूतं स्वच्छद्रव्यं.

GELATINOUS, a. पूर्व्वोक्तश्यानद्रव्यगुणविशिष्टः -ष्टा -ष्टं, श्यानः -ना -नं, शीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, संलग्नशीलः -ला -लं, अवलेसः -सा -सं.

To GELD, v. a. वृषणाद् उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), वृषणद्वयम् उत्पट् (c. 10. -पाटयति -यितुं).

GELDED, p. p. छिन्नवृषणः -णा -णं, छिन्नमुष्कः -ष्का -ष्कं, मुष्कशून्यः -न्या -न्यं.

GELDING, s. (Horse) अवृषणो ऽश्वः, छिन्नवृषणो वाजी m. (न्).

GELID, a. अतिशीतलः -ला -लं, अत्यन्तशिशिरः -रा -रं, हिमः -मा -मं.

GELIDITY, GELIDNESS, s. अतिशीतलता, अतिशैत्यं, शीतता, शिशिरत्वं.

GELLY, s. क्वथितमांसनिर्म्मितो घनीभूतः or श्यानीभूतः स्वच्छरसः.

GEM, s. (Precious stone) मणिः m. f. -णी, रत्नं, चारुशिला, प्रस्तरः, मणिरत्नं; 'necklace of gems,' मणिमाला, मणिसरः, रत्नावलिः f.; 'its central gem,' तरलः; 'mine of gems,' रत्नाकरः.—(Bud) मुकुलं, जालकं, पल्लवः -वं, कुड्मलं.

To GEM, v. a. मणिभिः or रत्नैर् अलङ्कृ or भूष् (c. 10. भूषयति -यितुं).

To GEM, v. n. (Bud) फुल्ल् (c. 1. फुल्लति -ल्लितुं), अङ्कुर (nom. अङ्कुरयति -यितुं).

To GEMINATE, v. a. द्विगुणीकृ, द्विगुण (nom. द्विगुणयति -यितुं), द्वैधीकृ, द्विकं -कां -कं कृ.

GEMINATION, s. द्विगुणीकरणं, द्वैगुण्यं, द्विरावृत्तिः f., पुनरुक्तिः f.

GEMINI, s. pl. (Twins) यमौ m. du., यमलौ m. du.—(Constellation) द्वन्द्वः, मिथुनः, जितुमः.

GEMINOUS, a. द्विगुणः -णा -णं, द्विकः -का -कं, द्वैधः -धी -धं, द्विविधः -धा -धं, यमः -मा -मं, यमकः -का -कं.

GEMINY, s. मिथुनं, द्वन्द्वं, यमकं, यमलं, युगं, युग्मं, युगलं, द्वयं.

GEMMATE, a. मुकुलितः -ता -तं, फुल्लवान् -वती -वत् (त्), पल्लवितः -ता -तं.

GEMMED, p. p. रत्नवान् -वती -वत् (त्), मणिमान् -मती -मत् (त्), रत्नमयः -यी -यं, रत्नानुविद्धः -द्धा -द्धं, रत्नालङ्कृतः -ता -तं, मणिभूषितः -ता -तं.

GEMMY, a. मणिशः -शा -शं, रत्नद्योती -तिनी -ति (न्), मणिमयः -यी -यं.

GENDER, s. लिङ्गं, प्रकृतिः f.; 'masculine gender,' पुंलिङ्गं, पुरुषः; 'feminine gender,' स्त्रीलिङ्गं; 'a noun of invariable gender,' अजहल्लिङ्गः.

To GENDER, v. a. जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 2. -सूते, c. 1. -सुवति [illegible]), उत्पद् in caus. (-पादयति -यितुं).

To GENDER, v. n. स्त्रीपुरुषवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or मैथुनं कृ.

GENEALOGICAL, a. वंशावलीविषयः -या -यं, वंशान्वयविषयकः -का -कं, वंशक्रमसम्बन्धी -न्धिनी -न्धि (न्).

GENEALOGIST, s. अन्वयज्ञः, वंशावलिज्ञः, घटकः, कुलाचार्य्यः, वंशावलिरचकः, वंशपरम्पराज्ञः.

GENEALOGY, s. वंशावली -लिः f., आवलिः f., वंशान्वयः, अन्वयः, वंशश्रेणी, वंशक्रमः, वंशपरम्परा, वंशानुचरितं, वंशविततिः f., वंशविवरणं; 'of kings,' राजावलिः f., नृपावलिः, पार्थिवावलिः.

GENERAL, a. (Common to many, or all) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्व्वसामान्यः -न्या -न्यं, बहुसामान्यः -न्या -न्यं, सर्व्वसाधारणः -णी -णं, सर्व्वः -र्व्वा -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सार्व्वत्रिकः -की -कं, सर्व्वीयः -या -यं, सर्व्वजनीयः -या -यं, सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, विश्वजनीनः -ना -नं, विश्वजनीयः -या -यं, विश्वजन्यः -न्या -न्यं, सार्व्वलौकिकः -की -कं, लौकिकः -की -कं, व्यापकः -का -कं, सर्व्वव्यापकः -का -कं, सर्व्वमयः -यी -यं, औत्सर्गिकः -की -कं.—(Not particular) अविशेषकः -का -कं, अवच्छेदावच्छेदकः -का -कं.—(Usual) प्रायिकः -की -कं, लोकसिद्धः -द्धा -द्धं, आचारिकः -की -कं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं; 'general practice,' जनरीतिः f., लोकव्यवहारः; 'general order,' सामान्यशासनं; 'general opinion,' बहुमतं; 'general collection,' सर्व्वसङ्ग्रहः; 'general reader,' चुम्बकः, प्रपठाविद् m.; 'in general,' प्रायेण, प्रायशस्, बहुशस्. *See* GENERALLY.

GENERAL, *s.* (Of an army) सेनापतिः *m.*, वाहिनीपतिः *m.*, सेनानीः *m.*, सेनाधिपः, सेनाग्रगः, चमूपतिः *m.*, योधमुख्यः, सेनाध्यक्षः, सैन्याध्यक्षः, बलाध्यक्षः, दण्डनायकः, महासेनः ; 'skilful general,' सांयुगीनः.—(Total, whole) साकल्यं, सामान्यं, साधारण्यं, समुदायः.

GENERALISSIMO, *s.* प्रधानसेनापतिः *m.*, अग्रसेनानीः *m.*, प्रधानसैन्याध्यक्षः.

GENERALITY, *s.* (State of being general) सामान्यं -न्यत्वं, साधारण्यं, साधारणत्वं.—(Greatest part) प्रधानभागः, अधिकभागः, बहुतरभागः, प्रधानांशः.

GENERALIZATION, *s.* अवच्छेदावच्छेदः, व्यापकत्वं, जातिनिर्देशः, बहुसामान्यकरणं, गणीकरणं.

To GENERALIZE, *v. a.* अवच्छेदावच्छेदं कृ, बहुव्यापकं -कां -कं कृ, बहुसामान्यं -न्यां -न्यं कृ, गणीकृ, जातिनिर्देशं कृ.

GENERALLY, *adv.* प्रायस्, प्रायशस्, प्रायेण, भूयस्, बहुशस्, बाहुल्येन, भूयिष्ठं, बहुतरं, साधारण्येन, सामान्यतस्, साकल्येन.

GENERALNESS, *s.* साधारणत्वं, सामान्यत्वं, व्यापकत्वं, बाहुल्यं, प्रसिद्धत्वं.

GENERALSHIP, *s.* सैनापत्यं, सेनापतित्वं.—(Skill in tactics) व्यूहपाण्डित्यं, रणपाण्डित्यं, सेनाव्यूहनैपुण्यं, बलविन्यासकौशल्यं, सेनानयप्रवीणता.

GENERALTY, *s.* साकल्यं, समस्तत्वं, सामान्यं, कार्त्स्न्यं, आखिल्यं, समुदायः.

To GENERATE, *v. a.* जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 1. -सवति, c. 2. -सूते, c. 4. -सूयते -सोतुं), सू, उत्पद् in caus. (-पादयति -यितुं).

GENERATED, *p. p.* जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, सञ्जातः -ता -तं, उत्पादितः -ता -तं, समुत्पादितः -ता -तं, प्रसूतः -ता -तं, प्ररूढः -ढा -ढं, कृतजन्मा -न्मा -न्म (न्), उद्भवः -वा -वं, प्रभवः -वा -वं; 'generated in water,' जलोद्भवः -वा -वं.

GENERATION, *s.* (Production) जननं, प्रजननं, जन्म *n.* (न्), उत्पादनं, उत्पत्तिः *f.*, प्रसूतिः *f.*, प्रसवः, सम्भवः, उद्भवः, प्रभवः.—(Race) जातिः *f.*, वंशः, सन्तानः, सन्ततिः *f.*, कुलं, अन्वयः, प्रवरं.—(The people living at the same time) समवयस्काः or समकालजीविनः पुरुषाः *m. pl.*—(Series of descendants) वंशावली, वंशपरम्परा, वंशश्रेणी; 'extending to seven generations,' साप्तपौरुषः -षी -षं; 'organ of generation,' उपस्थः.

GENERATIVE, *a.* जनकः -का -कं, उत्पादकः -का -कं, सावकः -विका -कं.

GENERATOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जननः, जनकः, जन्मदः, दाता *m.* (तृ), बीजप्रदः, बीजी *m.* (न्), उत्पादकः.

GENERIC, GENERICAL, *a.* सामान्यः -न्या -न्यं, साधारणः -णा -णी -णं, वर्गीयः -या -यं, जातीयः -या -यं, जातिसम्बन्धीयः -या -यं, व्यापकः -का -कं; 'generic property,' जातित्वं, जातिधर्म्मः, जातिस्वभावः, सामान्यं, समानाधिकरणं; 'generic characteristic,' जातिलक्षणं, सामान्यलक्षणं.

GENERICALLY, *adv.* जातिमुद्दिश्य, वर्गमुद्दिश्य, जातितस्, सामान्यतस्.

GENEROSITY, *s.* (Liberality) औदार्य्यं, उदारता, दानशीलता, त्यागशीलता -त्वं, त्यागः, त्यागिता, बहुप्रदत्वं, अतिसर्ज्जनं, अतिदानं, वदान्यता, अकार्पण्यं, विलम्भः.—(Nobleness of soul) माहात्म्यं, औदार्य्यं, उदीर्णता.

GENEROUS, *a.* (Liberal) उदारः -रा -री -रं, दानशीलः -ला -लं, त्यागशीलः -ला -लं, बहुप्रदः -दा -दं, बहुदः -दा -दं, अतिदाता -त्री -तृ (तृ), दायकः -का -कं, दानरतः -ता -तं, वदान्यः -न्या -न्यं, अकृपणः -णा -णं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, उदात्तः -त्ता -त्तं.—(Noble-minded) उदारचेताः -ताः -तः (स्), उदारधीः -धीः -धि, उदारचरितः -ता -तं, माहात्मिकः -की -कं, महामनाः -नाः -नः (स्), महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, उदीर्णः -र्णा -र्णं.—(Of honourable birth) सत्कुलीनः -ना -नं, महाकुलः -ला -लं.

GENEROUSLY, *adv.* उदारवत्, वदान्यवत्, औदार्य्येण, दानशीलत्वात्, माहात्म्येन.

GENEROUSNESS, *s.* औदार्य्यं, उदारता, माहात्म्यं. *See* GENEROSITY.

GENESIS, *s.* धर्म्मग्रन्थानां मध्यात् प्रथमग्रन्थः, जगत्सृष्टिविषयकं मूसालिखितम् आदिपुस्तकं.

GENET, *s.* (Horse) सुरूपी विदेशीयः क्षुद्रवाजी *m.* (न्).—(Civet) गन्धमार्जारः.

GENETHLIAC, *s.* (Birthday poem) जन्मदिवसमुद्दिश्य काव्यं.

GENIAL, *a.* (Contributing to propagation) सावकः -का -कं, प्रसवकारी -रिणी -रि (न्), प्रसूतिवर्धकः -का -कं.—(Contributing to life and cheerfulness) जीवदः -दा -दं, तेजोवर्धकः -का -कं, आनन्दकरः -रा -रं, रम्यः -म्या -म्यं, रमणीयः -या -यं, मनोरमः -मा -मं, सुखकरः -री -रं, प्रसन्नः -न्ना -न्नं, सुभगः -गा -गं, प्रसादकरः -रा -रं, रुचिरः -रा -रं.

GENIALLY, *adv.* प्रसन्नं, प्रसादेन, सप्रसादं, सानन्दं, प्रमोदेन, सहर्षं.

GENIALNESS, *s.* सुनन्दता, रम्यता, रमणीयत्वं, प्रसन्नता, सानन्दता.

GENICULATED, *a.* जानुपर्वाकारग्रन्थियुक्तः -क्ता -क्तं, ग्रन्थिलः -ला -लं.

GENITAL, *a.* प्रसवसम्बन्धी -न्धिनी -न्धि (न्), जननसम्बन्धी &c., यौनः -नी -नं.

GENITALS, *s. pl.* उपस्थः, शिश्नादि *n.*, भगादि *n.*, अधोऽङ्गं, जननाङ्गं.

GENITIVE, *a.* or *s.* (In grammar) सम्बन्धः, शेषः, षष्ठी विभक्तिः *f.*

GENITOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जनकः, जननः, जन्मदः.

GENIUS, *s.* (Natural disposition) स्वभावः, प्रकृतिः *f.*, शीलः, गुणः.

(Strength of mind, power of intellect) धीशक्तिः *f.*, बुद्धिशक्तिः *f.*, मनःशक्तिः *f.*, मनोयुक्तिः *f.*, बुद्धिसामर्थ्यं, बुद्धिप्रभावः, मतिसुप्रयोगता.—(Power of invention) कल्पनाशक्तिः *f.*—(Man endowed with talent) गुणी *m.* (न्), गुणवान् *m.* (त्), धीशक्तियुक्तः, बुद्धिशक्तिमान् *m.* (त्), युक्तबुद्धिः *m.*, बुद्धिमान् *m.* (त्), धीमान् *m.* (त्).—(Peculiar characteristic) विशेषणं, लक्षणं, स्वभावः, स्वधर्म्मः, वृत्तिः *f.*; 'poetical genius,' कविताशक्तिः *f.*

GENIUS, *s.* (Demon) भूतः, असुरः, दैत्यः, दानवः, प्रेतः, पिशाचः; 'evil genius,' दुर्दैवं; 'good genius,' सुदैवं, शुभदैवं.

GENTEEL, *a.* सभ्यः -भ्या -भ्यं, सभ्याचारी -रिणी -रि (न्), आर्य्यः -र्य्या -र्य्यं, आर्य्यव्यवहारः -रा -रं, आर्य्यवृत्तः -त्ता -त्तं, सद्वृत्तः -त्ता -त्तं, सुजनः -ना -नं, साधुवृत्तः -त्ता -त्तं, साधुव्यवहारः -रा -रं, सुशीलः -ला -लं, अग्राम्यः -म्या -म्यं, शिष्टाचारी -रिणी -रि (न्), महानुभावः -वा -वं.—(Elegant) विनीतः -ता -तं, चारुः -र्वी -रु, ललितः -ता -तं.

GENTEELLY, *adv.* सभ्यवत्, सुशीलवत्, आर्य्यवत्, सुजनवत्, सभ्याचारानुसारेण.

GENTEELNESS, *s.* सभ्यता, आर्य्यत्वं, सभ्याचारत्वं, आर्य्यवृत्तत्वं, सुशीलता, शिष्टाचारत्वं, सौजन्यं, सुजनता, साधुता, विनीतत्वं.

GENTIAN, *s.* (Plant) किरातः, किराततिक्तः, अनार्य्यतिक्तः, चिरातिक्तः, चिरतिक्तः, काण्डतिक्तकः, कैरातं, भूनिम्बः, भूतीकः.

GENTILE, *s.* अन्यदेशीयः, भिन्नदेशीयः, भिन्नदेशीयलोकः, अन्यदेशीयलोकः, देवतार्चकः, देवताभ्यर्चकः, देवार्चकः.—(Kindred) गोत्रजः; 'in grammar,' जातिवाचकः.

GENTILE, *a.* अन्यदेशीयः -या -यं, भिन्नदेशीयः -या -यं, जातीयः -या -यं.

GENTILISM, *s.* देवार्चकत्वं, देवतार्चनं -ना, देवताभ्यर्चनं, भिन्नदेशीयता.

GENTILITIAL, *a.* कौलिकः -की -कं, कुलजः -जा -जं, वांशिकः -की -कं, वंश्यः -श्या -श्यं, जातीयः -या -यं, दैशिकः -की -कं.

GENTILITY, *s.* (Politeness of manners) सभ्यता, सभ्याचारत्वं, सुशीलता, शिष्टाचारत्वं, आर्य्यत्वं, आर्य्यवृत्तत्वं, सौजन्यं, सुजनता, साधुवृत्तत्वं, सुविनीतता, महानुभावता.—(Good birth) कुलीनता, महाकुलत्वं, वंशविशुद्धता, कुलोत्कर्षः.

GENTLE, *a.* (Well-born) कुलीनः -ना -नं, सत्कुलीनः -ना -नं, महाकुलः

-ला -लं, महाकुलप्रसूतः -ता -तं, साधुजः -जा -जं, साधुवंशजः -जा -जं, आर्य्यवंशजः -जा -जं, सुजन्मा -न्मा -न्म (न्); 'a maid of gentle birth,' कुलकन्यका.—(Mild, soft, bland) मृदुः -द्वी -दु, मृदुलः -ला -लं, मन्दः -न्दा -न्दं, कोमलः -ला -लं, सौम्यः -म्या -म्यी -म्यं, स्निग्धः -ग्धा -ग्धं, सुकुमारः -रा -री -रं, मसृणः -णा -णं, अनुग्रः -ग्रा -ग्रं, अकर्कशः -शा -शं, अपरुषः -षा -षं, अचण्डः -ण्डा -ण्डी -ण्डं, अखरः -रा -रं, असाहसिकः -की -कं, सुकरः -रा -री -रं; 'of a gentle disposition,' मृदुभावः -वा -वं, मृदुस्वभावः -वा -वं.—(Quiet, tame) शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, शमी -मिनी -मि (न्), दान्तः -न्ता -न्तं; 'a gentle breeze,' मन्दानिलः, मृदुवातः; 'a gentle laugh,' मन्दहास्यं, मन्दस्मितं, ईषद्धासः; 'gentle remedy,' सौम्योपचारः, सामोपचारः; 'by gentle means,' साम्ना; 'gentle speech,' प्रियवाक्यं, प्रियोदितं.

Gentle, *s.* (Maggot) अलिः *m.*, अली *m.* (न्), कोषकारी *m.* (न्).

Gentlefolk, *s.* आर्य्यलोकाः *m. pl.*, साधुजनाः *m. pl.*, आर्य्यमिश्राः *m. pl.*, कुलीनलोकः.

Gentleman, *s.* आर्य्यः, आर्य्यजनः, आर्य्यमिश्रः, साधुः *m.*, साधुजनः, महाशयः, महानुभावः, कुलीनः, कुलीनजनः, सत्कुलीनः, सुजनः, सुजन्मा *m.* (न्), सज्जनः, सज्जातिः *m.*, महाजनः, सत्कुलजातः, सुविनीतः, श्री prefixed.

Gentleman-commoner, *s.* राजविद्यालये अन्तेवासिनां मध्यात् प्रथमपदस्थः.

Gentlemanlike, gentlemanly, *a.* आर्य्यव्यवहारानुसारी -रिणी -रि (न्), सभ्याचारानुसारी &c., सभ्यः -भ्या -भ्यं, आर्य्यवृत्तः -त्ता -त्तं, सुशीलः -ला -लं, सुविनीतः -ता -तं, शिष्टाचारयोग्यः -ग्या -ग्यं; 'gentlemanly deportment,' आर्य्यवृत्तिः *f.*, सौजन्यं.

Gentlemanliness, *s.* आर्य्यत्वं, सुशीलता, सौजन्यं, सुविनीतता.

Gentleness, *s.* मृदुता, म्रदिमा *m.* (न्), मार्द्दवं, मन्दता, कोमलता, सौम्यता -त्वं, स्निग्धता, सौकुमार्य्यं, सुकुमारता, अनुग्रता, अकार्कश्यं, अकर्कशत्वं, अपरुषता, अपारुष्यं, अचण्डता, असाहसं; 'of disposition,' भावमृदुता.

Gentlewoman, *s.* आर्य्या, कुलीना स्त्री, सुशीला स्त्री, सुविनीता स्त्री.

Gently, *adv.* शनैस्, शनैः शनैस्, शनकैस्, मन्दं मन्दं, मृदु, अनुग्रं, अकर्कशं, अपरुषं, अचण्डं, साहसं विना.

Gentry, *s.* आर्य्यलोकाः *m. pl.*, आर्य्याः *m. pl.*, साधुलोकाः *m. pl.*, कुलीनलोकाः *m. pl.*, कुलीनवर्गः, सुजनवर्गः, सुजनता, सौजन्यं.

Genuflexion, *s.* पूजार्थं जानुभ्यां नतिः *f.* or आनतिः *f.*, जानुनतिः *f.*

Genuine, *a.* सत्यः -त्या -त्यं, प्रकृतः -ता -तं, वास्तवः -वी -वं -विकः -की -कं, अकल्पितः -ता -तं, अकृत्रिमः -मा -मं, अकपटः -टा -टं, निष्कपटः -टा -टं, निर्व्याजः -जा -जं, निर्व्यलीकः -का -कं, यथार्थः -र्था -र्थं, सारः -रा -रं.

Genuinely, *adv.* सत्यं, निष्कपटं, कपटं विना, निर्व्याजं, निर्व्यलीकं, यथार्थं.

Genuineness, *s.* सत्यता, प्रकृतत्वं, अकृत्रिमता, अकल्पितत्वं, याथार्थ्यं, यथार्थता, निर्व्यलीकता, निर्व्याजत्वं, वास्तविकता, सारता.

Genus, *s.* (In logic) परं.—(A class) जातिः *f.*, गणः, वर्गः, जातिमात्रं, गोत्रं.

Geographer, *s.* भूपृष्ठविद्याज्ञः, भूगोलविद्याज्ञः, भूगोलशास्त्रज्ञः, भूपृष्ठलेखकः, भूगोलज्ञानी *m.* (न्), भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिलेखकः, भूपृष्ठस्य देशसमुद्रपर्व्वतनद्यादिव्याख्याता *m.* (तृ), भूपृष्ठविवरणकृत्.

Geographical, *a.* भूगोलविषयः -या -यं, भूपृष्ठविषयकः -का -कं, भूगोलशास्त्रविषयः -या -यं, भूपृष्ठसम्बन्धी -न्धिनी -न्धि (न्), भूगोलशास्त्रीयः -या -यं.

Geographically, *adv.* भूगोलशास्त्रानुसारेण, भूगोलशास्त्रवत्.

Geography, *s.* भूपृष्ठविद्या, भूगोलविद्या, भूपृष्ठविषयकं ज्ञानं, भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिव्याख्या, भूपृष्ठस्य देशसमुद्रपर्व्वतनद्यादीनां ज्ञानं or विवरणं, भूगोलशास्त्रं.

Geological, *a.* पार्थिवांशविषयः -या -यं, पृथिवीविद्यासम्बन्धी -न्धिनी -न्धि (न्), पृथिवीसंस्थानविषयकः -का -कं.

Geologist, *s.* पार्थिवांशविद्याज्ञः, पृथिवीविद्याज्ञः, पृथिवीसंस्थानव्याख्याता *m.* (तृ), मृत्तिकाभावगुणादिविवरणकृत् *m.*

Geology, *s* पार्थिवांशानां ज्ञानं or विद्या, पार्थिवांशविषयं ज्ञानं, पृथिवीविद्या, पार्थिवांशानां प्राचीनेतिहासः, पृथिवीसंस्थानविद्या, मृत्तिकासंस्थानविद्या, मृत्तिकाभावगुणादिविवरणविद्या.

Geometral, geometric, geometrical, *a.* क्षैत्रः -त्री -त्रं, क्षेत्रपरिमाणविषयः -या -यं, क्षेत्रगतः -ता -तं, क्षेत्रविद्यानुसारी -रिणी -रि (न्), रेखागणितसम्बन्धी -न्धिनी -न्धि (न्); 'geometrical proof,' क्षेत्रगतोपपत्तिः *f.*

Geometrically, *adv.* क्षेत्रविद्यानुसारेण, रेखागणितशास्त्रवत् or -तस्.

Geometrician, *s.* क्षेत्रविद्याज्ञः, रेखागणितविद् *m.*, क्षैत्रज्ञः, रेखागणितशास्त्रदर्शी *m.* (न्), क्षेत्रपरिमाणविद्यावान् *m.* (त्).

Geometry, *s.* क्षैत्रं, क्षेत्रं, क्षेत्रविद्या, क्षेत्रपरिमाणविद्या, क्षेत्रपरिमाणविषया विद्या, रेखागणितं, रेखागणितशास्त्रं, रेखागणनाविद्या; 'proof by geometry,' क्षेत्रगतोपपत्तिः *f.*

Georgic, *s.* गोमेषादिविषयं गीतं, कृषिविद्याविषयकं काव्यं.

Geranium, *s.* वकमुखाकारबीजकोषः सुपुष्पवान् ओषधिभेदः.

Gerfalcon, *s.* श्येनभेदः, कपोतारिः *m.*, घातिपक्षी *m.* (न्).

Germ, germen, germin, *s.* (The embryo of fruit, a bud) पल्लवः -वं, अङ्कुरः, अभिनवोद्भिद् *m.*, जालकं, क्षारकः, जोषिका, कुन्दुकं; 'of leaves,' माद्रिः *f.*—(Origin, that from which any thing springs) बीजं, योनिः *m. f.*, आदिः *m.*, आरम्भः, गर्भः, मूलं.

German, *a.* (Related) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्की -र्किणी -र्कि (न्); 'cousin german,' पितृव्यपुत्रः -त्री, मातुलपुत्रः -त्री.—(Belonging to Germany) जर्म्मणिदेशसम्बन्धी &c., जर्म्मणिदेशजः -जा -जं; 'language,' जर्म्मणिदेशभाषा.

Germander, *s.* अनेकौषधीनां साधारणनाम *n.* (न्), ओषधिगणसंज्ञा.

Germanism, *s.* जर्म्मणिदेश[illegible] सम्प्रदायः.

To germinate, *v. n.* स्फुट् (c. 6. स्फुटति -टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), अङ्कुर [illegible] अङ्कुरयति -यितुं), विकस् (c. 1. -कसति -सितुं), उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, प्ररुह् (c. 1. -रोहति -रोढुं), वृध् (c. 1. वर्धते -र्धितुं).

Germinating, *part.* उद्भिन्नः -न्ना -न्नं, उद्भिद् *m. f. n.*, उद्भिदः -दा -दं, प्ररोही -हिणी -हि (न्), अङ्कुरितः -ता -तं, फुल्लवान् -वती -वत्, प्रस्फुटः -टा -टं, स्फुटन् -टन्ती -टत् (त्).

Germination, *s.* स्फुटनं, स्फुटता, उद्भेदः, प्रोद्भेदः, प्ररोहः, उद्वर्त्तनं.

Gerund, *s.* लाटीनभाषाव्याकरणे क्रियावाचकः शब्दः.

Gestation, *s.* गर्भधारणं, गर्भपोषणं, गर्भवहनं, गर्भिणीभावः.

To gesticulate, *v. n.* अङ्गानि विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), हस्तादि विक्षिप् or सञ्चल् in caus. (-चालयति -यितुं), अङ्गविक्षेपं कृ, इङ्ग् (c. 1. इङ्गति -ङ्गितुं), नट् (c. 10. नाटयति -यितुं), अभिनयं कृ, आङ्गिककर्म्म कृ.

Gesticulation, *s.* अङ्गविक्षेपः -पणं, हस्तादिविक्षेपः, अङ्गहारः, इङ्गितं, इङ्गितकरणं, अङ्गसञ्चालनं, हस्तादिसञ्चालनं, सङ्केतकरणं, शाणी, सूचा -चना, भावकरणं, आङ्गिककर्म्म *n.* (न्).

Gesticulator, *s.* अङ्गविक्षेपकः, हस्तादिविक्षेपकः, अङ्गसञ्चालकः, इङ्गितकारी *m.* (न्), सङ्केतकारी *m.* (न्).

Gesture, *s.* इङ्गितं, अङ्गविक्षेपः, हस्तादिविक्षेपः, सङ्केतः, अङ्गहारः -रिः *m.*, चेष्टा, भावः, इङ्गः, अभिनयः, अभिनीतिः *f.*, सूचना.

To gesture, *v. a.* साङ्गविक्षेपं कृ, सहस्तविक्षेपं कृ, साभिनयं कृ.

To get, *v. a.* (Obtain) आप् (c. 5. आप्नोति, आप्तुं), प्राप्, अवाप्,

सम्प्राप्, समवाप्, लभ् (c. 1. लभते, लब्धुं), उपलभ्, अर्ज् (c. 1. अर्जति -र्जितुं, c. 10. अर्जयति -यितुं), उपार्ज्, आसद् (c. 10. -सादयति -यितुं), समासद्, अधिगम् (c. 1. -गच्छति -गन्तुं), गम्, प्रतिपद् (c. 4. -पद्यते -पत्तुं), आपद्, अभिपद्, आविश् (c. 6. -विशति -वेष्टुं), इ (c. 2. एति -तुं), अश् (c. 5. अश्नुते, अशितुं), उपाश्, समश्.—(Have) धा (c. 3. दधाति, धत्ते, धातुं), धृ in caus. (धारयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्त्तुं), आप.—(Beget) जन् (c. 10. जनयति -यितुं).—(Learn) शिक्ष् (c. 1. शिक्षते -क्षितुं), अधी (c. 2. अधीते, अध्येतुं rt. इ), अधिगम्.—(Induce, persuade) अनुनी (c. 1. -नयति -नेतुं), प्रोत्सह् (c. 10. -साहयति -यितुं), or expressed by the causal; as, 'he got him to return,' निवर्त्तयामास.—(Earn) उपार्ज्, लभ्.—(Receive, take) आदा (c. 3. -दत्ते -दातुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), उपलभ्.—(Procure, get ready) क्लृप् (c. 10. कल्पयति -यितुं), परिक्लृप्, सज्जीकृ, उत्पद् (c. 10. -पादयति -यितुं).—(Get together) समानी (c. 1. -नयति -नेतुं), सञ्चि (c. 5. -चिनोति -चेतुं), समादा, सङ्ग्रह्, एकीकृ, एकत्र कृ.—(Get over, get through, surmount) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), तीर् (c. 10. तीरयति -यितुं), पार् (c. 10. पारयति -यितुं), तॄ (c. 1. तरति -रितुं -रीतुं), निस्तॄ; 'get over a difficulty,' दुःखम् आरुह्, दुःखपारं गम् (c. 1. गच्छति, गन्तुं), दुःखस्यान्तं गम्.—(Get up, prepare) उपस्कृ, संस्कृ, पुरस्कृ, विरच् (c. 10. -रचयति -यितुं), सज्जीकृ.—(Get into debt) ऋणं कृ, ऋणग्रस्तः -स्ता -स्तं भू, ऋणवान् -वती -वत् भू.

To GET, *v. n.* (Arrive at) आगम् (c. 1. -गच्छति -गन्तुं), उपगम्, अभिगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), अवाप्, आया (c. 2. -याति -तुं). उपस्था (c. 1. -तिष्ठति -स्थातुं).—(Get away) अपगम्, अपया, अपे (c. 2. अपैति -तुं, rt. इ), अपसृ (c. 1. -सरति -सर्त्तुं), अपक्रम् (c. 1. -क्रामति -क्रमितुं), चल् (c. 1. चलति -लितुं), प्रस्था.—(Get before) अग्रे or पूर्व्वं or पूर्व्वम् आगम् or प्राप्.—(Get clear) मुच् in pass. (मुच्यते).—(Get down) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अधो या or गम्.—(Get in) विश् (c. 6. विशति, वेष्टुं), प्रविश्, निविश्, आविश्.—(Get off, escape) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, निस्तॄ, अपक्रम्, निर्गम्.—(Get off, alight) अवतॄ, अवरुह्.—(Get out) अपगम्, अपसृ, अपे.—(Get up) उत्था for उत्स्था.—(Get quit of) मुच् in pass.—(Get on) प्रगम्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रसृ, प्रया, प्रचल्.—(Get drunk) मत्तः -त्ता -त्तं भू, उन्मत्तीभू; 'get out with you,' अपसर, अपैहि, अपेहि.

GETTER, *s.* प्रापकः, अवाप्ता *m.* (प्तृ), लब्धा *m.* (ब्धृ), अर्जकः, उपार्जकः, अधिगन्ता *m.* (न्तृ), लाभकृत् *m.*, आदाता *m.* (तृ), ग्राहकः, जनकः, उत्पादकः.

GETTING, *s.* लाभः, लब्धिः *f.*, आप्तिः *f.*, प्राप्तिः *f.*, प्रापणं, अवाप्तिः *f.*, सम्प्राप्तिः *f.*, अर्जनं, उपार्जनं, आसादनं, अधिगमः, आगमः, ग्रहणं.

GEWGAW, *s.* अल्पमूल्यकम् आभरणं, अल्पार्घं क्रीडाद्रव्यं, क्रीडनकं, कङ्कणं, खेलाद्रव्यं, कदर्थद्रव्यं.

GHASTFULLY, *adv.* पिशाचवत्, भूतवत्, प्रेतवत्, दारुणं, भयानकं, घोरं.

GHASTLINESS, *s.* रूपदारुण्यं, वदनघोरता, मुखरौद्रता, भूतरूपता, भौतत्वं, करालत्वं, विकटत्वं.

GHASTLY, *a.* (Like a ghost) भूतस्वरूपः -पी -पं, प्रेतस्वरूपः -पी -पं, भौतिकः -की -कं, पैशाचिकः -की -कं, शवसवर्णः -र्णा -र्णं, प्रेतसवर्णः -र्णा -र्णं.—(Frightful) घोररूपः -पी -पं, घोराकृतिः -तिः -ति, दारुणः -णा -णं, भयानकः -का -कं, रौद्रः -द्री -द्रं, भीमदर्शनः -ना -नं, उग्रम्पश्यः -श्या -श्यं, करालमुखः -खी -खं.

GHAUT, *s.* (Landing-place) घट्टः -ट्टी, मज्जनं, गुल्मः.—(Malaya range of mountains) मलयः, मलयाचलः, मलयपर्व्वतः, मलयाद्रिः *m.*, दक्षिणाचलः, दक्षिणपर्व्वतः.

GHEE, *s.* घृतं, हविस् *n.*, सर्पिस् *n.*, हव्यं, हवनीयं, हविष्यं, आज्यं, तनूनपं, तृप्रः.

GHOST, *s.* (Soul) आत्मा *m.* (न्), अन्तरात्मा *m.* (न्).—(Disembodied spirit) प्रेतः, प्रेतनरः, परेतः, नारकः, नरकवासी *m.* (न्), नरकामयः.—(Goblin) वेतालः, रात्रिचरः, निशाचरः, निशाटः, भूतः -तं, श्मशानवासी *m.* (न्), राक्षसः; 'to give up the ghost,' प्राणत्यागं कृ, ईश्वरहस्ते जीवनं or प्राणं समृ in caus. (-अर्पयति -यितुं).

GHOSTLIKE, *s.* प्रेतस्वरूपः -पा -पी -पं, भूतस्वरूपः -पा -पी -पं.

GHOSTLINESS, *s.* प्रेतत्वं, भूतत्वं, परेतत्वं, आत्मता, पारमार्थिकत्वं.

GHOSTLY, *a.* (Spiritual) आत्मिकः -की -कं, आत्मविषयः -या -यं, पारमार्थिकः -की -कं, अशारीरिकः -की -कं, पारत्रिकः -की -कं.—(Pertaining to ghosts) भौतिकः -की -कं, प्रेतसम्बन्धी -न्धिनी -न्धि (न्).

GIANT, *s.* (A man of extraordinary size) बृहत्कायः, बृहच्छरीरः, विकटशरीरः, भीमविग्रहः, प्रकाण्डशरीरः, अखर्व्वः.—(A titan) दैत्यः, असुरः, राक्षसः, दानवः, दैतेयः, रक्षस् *n.*, इन्द्रारिः *m.*, सुरद्विट् *m.* (ष्), दितिसुतः, दनुजः, यातु *n.*, यातुधानः, पूर्व्वदेवः, शुक्रशिष्यः, कौणपः, नैर्ऋतः, निकषात्मजः, क्रव्याद् *m.*, निशाचरः.

GIANTESS, *s.* बृहत्काया, बृहच्छरीरा, विकटशरीरा स्त्री, राक्षसी.

GIANT-LIKE, GIANTLY, *a.* बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं.

To GIBBER, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), अस्पष्टं वद् (c. 1. वदति -दितुं).

GIBBERISH, *s.* अनर्थकवाक्यं, असम्बद्धवाक्यं, वृथाकथा, अपार्थकवचनं, जल्पितं; 'one who talks it,' अनिबद्धप्रलापी *m.* (न्).

GIBBET, *s.* उद्बन्धनकाष्ठं, उद्बन्धनवृक्षः, वधस्थानं, घातस्थानं.

To GIBBET, *v. a.* रज्जुपाशेन उद्बन्ध् (c. 9. -बध्नाति -बन्धुं), उद्बन्धनं कृ.

GIBBOSITY, *s.* कुब्जता, न्युब्जता, कूर्म्मपृष्ठाकारत्वं, पिण्डाकारता, आभोगः, खण्डमण्डलत्वं.

GIBBOUS, *a.* (Convex, protuberant) न्युब्जः -ब्जा -ब्जं, पिण्डाकारः -रा -रं, कूर्म्मपृष्ठाकारः -रा -रं, गण्डाकारः -रा -रं, आभोगी -गिनी -गि (न्); 'as the moon,' खण्डमण्डलः -ला -लं.—(Hump-backed) कुब्जः -ब्जा -ब्जं, गडुरः -रा -रं.

GIBBOUSNESS, *s.* न्युब्जता, कूर्म्मपृष्ठाकारता, आभोगता. *See* GIBBOSITY.

GIB-CAT, *s.* जीर्णमार्जारः, अतिवृद्धो बिडालः.

To GIBE, *v. a.* and *n.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, परिक्षिप्, अवहस् (c. 1. -हसति -सितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ.

GIBE, *s.* क्षेपः, अवक्षेपः, तिरस्कारः, अवहासः, दुर्वाक्यं, दुरुक्तं, कटुवाक्यं.

GIBER, *s.* क्षेपकः, अवक्षेपकः, दुर्मुखः, मुखरः, दुर्वक्ता *m.* (क्तृ).

GIBLETS, *s. pl.* हंसादेर् यत् पादमस्तकयकृदादि प्राक्शूलारोपणाद् अवच्छिन्नीभूय पृथक् पच्यते, हंसस्य पचनयोग्यं हृद्यकृदन्त्रादि, हंसखण्डकाः *m. pl.*

GIDDILY, *adv.* भ्रामररोगग्रस्तवत्, सभ्रामरं, चपलं, मनोलौल्यात्.

GIDDINESS, *s.* (Of the head, &c.) भ्रमरं, भ्रामरं, भ्रमिः *f.*, भ्रमः, विभ्रमः, विभ्रान्तिः *f.*, घूर्णिः *f.*, घूर्णनं, चक्षुरादिचापल्यं -चापलं, चक्षुरादिविभ्रान्तिः *f.*, प्रमादः.—(Of character) चपलता, चापल्यं, चञ्चलत्वं, चाञ्चल्यं, चलचित्तता, अस्थिरता, अस्थैर्य्यं, लोलता, अनवस्थितिः *f.*, अधीरत्वं, लौल्यं, मनोलौल्यं, विभ्रान्तिः *f.*, विभ्रान्तशीलता, तरलता, प्रमत्तता.

GIDDY, *a.* (In the head) भ्रामरी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्), घूर्णरोगी -गिणी -गि (न्), भ्रामररोगी &c., विभ्रान्तः -न्ता -न्तं.—(Causing giddiness) भ्रमकरः -री -रं.—(In character) चपलः -ला -लं, चञ्चलः -ला -लं, विभ्रान्तशीलः -ला -लं, अस्थिरः -रा -रं, अनवस्थः -स्था -स्थं, अनवस्थितः -ता -तं, अधीरः -रा -रं, चपलबुद्धिः -द्धिः -द्धि, चपलात्मकः -का -कं, चलचित्तः -त्ता -त्तं, लोलः -ला -लं, लोलमनाः

-नाः -न्नः (न्), प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्).—(Elated) उद्धतः -ता -तं, मत्तः -त्ता -त्तं; 'with power,' ऐश्वर्यमत्तः -त्ता -त्तं.

Gift, *s.* दानं, प्रदानं, दत्तं, प्रदेयं, सम्प्रदानं, दायः, उपहारः, उपायनं, वितरणं, त्यागः, उत्सर्जनं, विसर्गः, विसर्जनं, विश्राणनं, संहतिः *f.*, उपग्राह्यं, उपढौकनं, उपदा -दानकं, प्रदा, दादः, दा, दं, विहापितं, प्रतिपादनं, निर्वपणं, स्पर्शनं, प्रादेशनं, प्रदेशनं, अपवर्जनं, उपचारः, प्रीतिदानं, प्राभृतं; 'a special gift,' सदायः, सुदायः, हरणं; 'nuptial gift,' यौतकं; 'desirable gift,' प्रवारणं, प्रहारणं; 'gift to deceased ancestors,' पितृदानं.—(Endowment) गुणः, शक्तिः *f.*

Gifted, *p. p.* or *a.* (Endowed) सम्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, उपेतः -ता -तं, अन्वितः -ता -तं, शीलितः -ता -तं.—(With talents) गुणी -णिनी -णि (न्), गुणवान् -वती -वत् (त्), इष्टगुणसम्पन्नः -न्ना -न्नं, सद्गुणोपेतः -ता -तं.

Gig, *s.* (Any thing that whirls round in play) भ्रमरं, भ्रमरक्रीडनकं.—(A light carriage) द्विचक्रयुक्तं लघुयानं, लघुरथः.—(Boat) उपनौका, लघुनौका, क्षुद्रनौका.

Gigantic, *a.* बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं -री -रिणी -रि (न्), भीमविग्रहः -हा -हं, अतिकायः -या -यं, विकटशरीरः -रा -रं, अतिमहान् -हती -हत् (त्), अतिबृहन् -हती -हत् (त्), राक्षसपरिमाणः -णा -णं, दैत्यपरिमाणः -णा -णं.

Giggle, *s.* असमञ्जसपरिहासः, अनर्थकहासः, कुहसितं, मूर्खहसितं.

To giggle, *v. n.* असमञ्जसपरिहासं कृ, अनर्थकहासं कृ, मूर्खवत् or असमञ्जसं or कु हस् (c. 1. हसति -सितुं), कक्ख् (c. 1. कक्खति -क्खितुं), कख् (c. 1. कखति -खितुं).

Giggler, *s.* असमञ्जसपरिहासशीलः, निरर्थकहासकारी *m.* (न्).

To gild, *v. a.* (Overlay with gold) सुवर्ण (nom. सुवर्णयति -यितुं), स्वर्णपत्रपिनद्धं -द्धां -द्धं कृ, सुवर्णोपेतं -तां -तं कृ.—(Illuminate) रञ्ज् (c. 10. रञ्जयति -यितुं), द्युत् (c. 10. द्योतयति -यितुं), विराज् (c. 10. -राजयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं).

Gilded, *p. p.* सुवर्णितः -ता -तं, रसितः -ता -तं, स्वर्णपत्रपिनद्धः -द्धा -द्धं, स्वर्णमण्डितः -ता -तं, स्वर्णपत्रसंवीतः -ता -तं or -प्रतिबद्धः -द्धा -द्धं, राजतान्वितः -ता -तं, रञ्जितः -ता -तं, राजितः -ता -तं, प्रद्योतितः -ता -तं.

Gilder, *s.* स्वर्णपत्रादिना रञ्जकः, स्वर्णपत्रपिनद्धकारी *m.* (न्).

Gilding, *s.* स्वर्णरञ्जनं, सुवर्णीकरणं, स्वर्णमण्डनं; 'of the leaves of a book,' पत्ररञ्जनं.

Gill, *s.* (Organ of respiration in fishes) मत्स्यानां श्वासेन्द्रियं, मत्स्यानां श्वासप्रश्वासार्थं मस्तकरन्ध्रं or शिरोरन्ध्रद्वयं.—(Of a fowl) कुक्कुटस्य मुखकम्बलः or मुखस्याधःस्थं लोलमांसं.—(Flesh on the lower part of the cheek) अधोगण्डमांसं, अधोगण्डः, अधःकपोलः, चिबुकमांसं.—(Measure) द्रवद्रव्याणां परिमाणविशेषः.

Gilly-flower, *s.* अनेकौषधीनां सामान्यनाम *n.* (न्), ओषधिगणसंज्ञा.

Gilt, *p. p.* or *a.* सुवर्णितः -ता -तं, रसितः -ता -तं, राजतान्वितः -ता -तं. *See* Gilded.

Gilt, *s.* सुवर्णरञ्जनं, स्वर्णपत्रं; 'silver-gilt,' विमलं.

Gilt-head, *s.* (Fish) गडकः, शकुलगण्डः, शकुलार्भकः, शालः, कुम्भिलः.

Gimcrack, *s.* निरर्थकयन्त्रं, क्रीडायन्त्रं, क्रीडाद्रव्यं, क्रीडनकं.

Gimlet, *s.* वेधनिका, आस्फोटनी, लास्फोटनी, आविधः.

Gimp, *s.* कौशिकसूत्रनिर्मितः सुतनुचेलकः.

Gin, *s.* (Spirit) शुण्डा, सुरा -री, वारुणी, शीधुः *m.* -धु *n.*, मदिरा, हाला, आसवं; 'gin-drinker,' सुरापः -पी, शुण्डापायी *m.* -यिनी; 'gin-drinking,' सुरापानं; 'gin-shop,' शुण्डापानं, पानगोष्ठिका.—(Snare, trap) पाशः, उन्माथः, जालं, कूटयन्त्रं, वागुरा, पाशबन्धं.

Ginger, *s.* आर्द्रकं, शृङ्गवेरं, अकटुलोद्भः, गुल्ममूलं, अपाकशाकं; 'dry ginger,' शुष्कार्द्रं, शुण्ठिः *f.* -ण्ठी -ण्ठयं, विश्वभेषजं, विश्वं -श्वा, महौषधं, नागरं.

Ginger-beer, *s.* आर्द्रकपानं, आर्द्रकरसः, आर्द्रकपानीयं, आर्द्रकसुरा.

Ginger-bread, *s.* आर्द्रकपिष्टकः, आर्द्रकपूपः, आर्द्रकमयं मिष्टान्नं.

Ginger-wine, *s.* आर्द्रकमद्यं, आर्द्रकमदिरा, आर्द्रकसुरा.

Gingerly, *adv.* सावधानं, अवधानेन, शनैः शनैस्, असहसा.

Gingham, *s.* रेखाचित्रितं कार्पासवस्त्रं or तूलवस्त्रं.

Gingival, *a.* दन्तमांससम्बन्धी -न्धिनी -न्धि (न्), दन्तशिरासम्बन्धी &c.

To gingle, *v. n.* शिञ्ज् (c. 2. शिङ्क्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), किङ्किण (nom. किङ्किणायते), झञ्झनं कृ.

Gingle, gingling, *s.* शिञ्जः -ञ्जा, शिञ्जितं, आशिञ्जितं, क्वणितं, किङ्किणिशब्दः, झञ्झनं, झनत्कारः.

Gingling, *part.* क्वणन् -णन्ती -णत् (त्), शिञ्जी -ञ्जिनी -ञ्जि (न्).

Ginnet, *s.* अश्वकः. *See* Jennet.

Gipsy, *s.* हस्तरेखानिरीक्षणानन्तरं दैवकथनाद्युपजीवी चक्राटः, अवनिचरः -रा *f.*, धूर्तः -र्ता *f.*, काकचरित्रः -त्रा.

Giraffe, *s.* तरक्षुरूपेण चित्रितः उष्ट्रजातीयो दीर्घग्रीवो जन्तुभेदः.

To gird, *v. a.* (Bind round) बन्ध् (c. 9. बध्नाति, बन्धुं), परिबन्ध्.—(Bind on) आबन्ध्, पिनह् (c. 4. -नह्यति -नद्धुं), अवनह्, सन्नह्, पिनद्धं -द्धां -द्धं कृ, आकष् (c. 1. -कषति -षितुं); 'gird the loins,' कटिं बन्ध्.—(Encircle, invest) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिधा (c. 3. -दधाति -धत्ते -धातुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

To gird, *v. n.* (Gibe) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, अवहस् (c. 1. -हसति -सितुं).

Gird, *s.* आकर्षः, शूलं, अपतानकः, अपतन्त्रकः, आक्षेपकः, वेगाघातः.

Girded, *p. p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, आनद्धः -द्धा -द्धं, अवनद्धः -द्धा -द्धं, आबद्धः -द्धा -द्धं, परिवेष्टितः -ता -तं, परिहितः -ता -तं.

Girder, *s.* गृहतले बृहत्काष्ठं or अयःकाष्ठं or महादारु *m.*

Girdle, *s.* (Belt) मेखला, रसना, कटिसूत्रं, कटिबन्धनं -नी, काञ्ची, कलापः, कक्षा, कक्ष्या, परिकरः, सारसं -सनं, यन्त्रनं, सप्तकी, शृङ्खरी, रशना, शृङ्खला.—(Inclosure, circumference) वेष्टनं, परिवेष्टनं, आवेष्टनं, मण्डलं, वलयः, चक्रवालं.—(Zodiac) राशिचक्रं.

To girdle, *v. a.* मेखलया बन्ध् (c. 9. बध्नाति, बन्धुं), वेष्ट् (c. 1. वेष्टते -ष्टितुं, c. 10. वेष्टयति -यितुं), परिवेष्ट्, परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

Girdler, *s.* मेखलाकारः, रसनाकर्त्ता *m.* (र्तृ), कटिसूत्रकारी *m.* (न्).

Girl, *s.* कन्या, कुमारी, तरुणी, बाला, बालिका, पुत्री, दारिका, अनागतार्त्तवा, लग्निका, नग्निका, गौरी, वासूः *f.*

Girlhood, *s.* कन्यात्वं, कुमारीत्वं, तरुणीत्वं, कौमार्यं, तारुण्यं.

Girlish, *a.* कन्यायोग्यः -ग्या -ग्यं, कुमारीयोग्यः -ग्या -ग्यं.

Girlishly, *adv.* कन्यावत्, कुमारीवत्, तरुणीवत्, कन्यारूपेण.

Girt, *p. p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, वेष्टितः -ता -तं, परिवेष्टितः -ता -तं; 'girt with a falchion,' बद्धनिस्त्रिंशः -शा -शं; 'sea-girt,' समुद्रमेखलः -ला -लं.

Girth, *s.* उदरत्राणं, अधोबन्धनं -नी, वरत्रा, वर्द्ध्री, वध्री, नध्री, चूषा, कक्षा, कक्ष्या.

To girth, *v. a.* वरत्रया बन्ध् (c. 9. बध्नाति, बन्धुं), उदरत्राणं पिनह् (c. 4. -नह्यति -नद्धुं).

Gist, *s.* अर्थः, मुख्यार्थः, परमार्थः, उत्तमार्थः, अर्थविषयः.

To give, *v. a.* दा (c. 3. ददाति, दत्ते, दातुं), प्रदा, प्रादा, अभिदा, सम्प्रदा,

निदा, अनुदा, सन्दा, यम् (c. 1. यच्छति -ते, दातुं), प्रयम्, संयम्, प्रतियम्, सम्प्रयम्, दद् (c. 1. ददते -दितुं), प्रतिपद् (c. 10. -पादयति -यितुं), उपपद्, ऋ in caus. (अर्पयति -यितुं), सम्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), वितृ (c. 1. -तरति -रितुं -रीतुं), विश्राण् (c. 10. -श्राणयति -यितुं), त्यज् (c. 1. त्यजति, त्यक्तुं), विसृज् (c. 10. -सर्जयति -यितुं), ग्रह् in caus. (ग्राहयति -यितुं), आहृ (c. 1. हरति -हर्तुं), उपहृ, सङ्क्रम् in caus. (-क्रामयति -यितुं), दिश् (c. 6. दिशति, देष्टुं).—(Give away) प्रदा, प्रयम्.—(Give back) प्रतिदा, प्रतिपद्, प्रत्यर्प् (caus. of ऋ with प्रति), निर्यत् (c. 10. -यातयति -यितुं), प्रतिनिर्यत्, प्रतिरुह् in caus. (-रोपयति -यितुं).—(Give chase) अनुधाव् (c. 1. धावति -वितुं), अनुसृ (c. 1. -सरति -सर्तुं).—(Give forth) प्रकाश् (c. 10. -काशयति -यितुं), ख्या in caus. (ख्यापयति -यितुं), निविद् (c. 10. -वेदयति -यितुं).—(Give the hand for support) करालम्बनं कृ.—(Give in) अनुदा, अनुज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), त्यज्.—(Give over) त्यज्, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विरम् (c. 1. -रमति -रन्तुं) with abl. c., निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. c. 'To give over a sick man,' असाध्य इति परिच्छिद्य रोगातुरं मुच् (c. 6. मुञ्चति, मोक्तुं).—(Give out) निविद्, प्रकाश्, विघुष् (c. 10. -घोषयति -यितुं); 'emit,' उत्सृज्, मुच्, निःसृ in caus. (-सारयति -यितुं).—(Give up) त्यज्, परित्यज्, सन्त्यज्: हा (c. 3. जहाति, हातुं), विहा; उत्सृज्, विमुच्, उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्, प्रत्यादिश्.—(Give one's self up to) आसञ्ज् in pass. (-सज्यते or -सज्जते), सेव् (c. 1. सेवते -वितुं), आसेव्, आसक्तः -क्ता -क्तं भू. निरतः -ता -तं भू.—(Give ground) अपक्रम् (c. 1. -क्रामति -क्रमितुं), अवस्था (c. 1. -तिष्ठते -स्थातुं), परावृत्, निवृत्.—(Give way) पन्थानं दा, त्यज्, अपसृ (c. 1. -सरति -सर्तुं); 'give way,' अपसरत, पन्थानं त्यजत.—(Give in marriage) दा, प्रदा, उपादिश्; 'the girl is given in marriage to a husband,' कन्या वोढुः प्रदीयते.—(Give thanks) धन्यवादं कृ, धन्यं वद् (c. 1. वदति -दितुं), कुशलं वद्.—(Give ear) कर्णं दा.—(Give power) शक्तिं दा, क्षमतां ऋ, नियुज् (c. 7. -युनक्ति -योक्तुं).—(Give utterance) उदीर् (c. 10. -ईरयति -यितुं), उच्चर् (c. 10. -चारयति -यितुं), उदाहृ.—(Give suck) धे in caus. (धापयति -यितुं), उपधे, पा in caus. (पाययति -यितुं).—(Give offence) रुष् in caus. (रोषयति -यितुं), विप्रियं कृ.

To GIVE, *v. n.* (Give way, sink) सद् (c. 1. सीदति, सत्तुं), अवसद्.—(Relent, be mitigated) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, शान्तिं or सान्त्वनं या (c. 2. याति -तुं), शान्तीभू, शिथिलीभू.—(Recede) अपसृ (c. 1. -सरति -सर्तुं), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), अपया.—(Cease) विरम् (c. 1. -रमति -रन्तुं), निवृत्, शम्.—(Give in to) अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं).

GIVEN, *p. p.* दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, नीत्तः -त्ता -त्तं, निहितः -ता -तं, निक्षिप्तः -प्ता -प्तं, प्रतिपादितः -ता -तं, उपपादितः -ता -तं, विश्राणितः -ता -तं, अर्पितः -ता -तं, समर्पितः -ता -तं, वितीर्णः -र्णा -र्णं, विसर्ज्जितः -ता -तं, विसृष्टः -ष्टा -ष्टं, उपन्यस्तः -स्ता -स्तं; 'well given,' सूत्तः -त्ता -त्तं; 'given and taken,' दत्तादत्तः -त्ता -त्तं, दत्तापहृतः -ता -तं.—(Given up) त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, उत्सृष्टः -ष्टा -ष्टं.—(Addicted to) आसक्तः -क्ता -क्तं, रतः -ता -तं, निरतः -ता -तं; 'given quantity,' दृश्यः.

GIVER, *s.* दाता *m.* (तृ), प्रदाता, दायकः, दायी *m.* (न्), दानकर्त्ता *m.* (र्तृ), दात्रकः, दादी *m.* (न्), प्रदः or दः in comp., त्यागी *m.* (न्); 'giver and receiver,' दातृग्राहकौ m. du., दातृप्रतीच्छकौ m. du.

GIVING, *s.* दानं, प्रदानं, सम्प्रदानं, त्यागः, वितरणं, विसर्ज्जनं.

GIZZARD, *s.* कुक्कुटादीनां जठरः or उदरं or अन्तर्जठरं or पक्वाशयः.

GLACIAL, *a.* हिम्यः -म्या -म्यं, हैमः -मी -मं, हिमरूपः -पा -पं.

To GLACIATE, *v. n.* हिमीभू, हिमवत् संहतीभू or शीतीभू.

GLACIATION, *s.* शीतीकरणं, शीतीभावः, हिमीकरणं, हिमसंहतिः *f.*

GLACIER, *s.* हिमपर्वतोत्सङ्गे सुविस्तीर्णा हिमसंहतिः.

GLACIS, *s.* दुर्गबहिर्भागे प्रवणभूमिः *f.* or निम्नभूमिः or स्थानं क्रमशो ऽवनतं.

GLAD, *a.* हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, हृष्टमानसः -सा -सं, हर्षयुक्तः -क्ता -क्तं, आनन्दी -न्दिनी -न्दि (न्), आनन्दितः -ता -तं, सानन्दः -न्दा -न्दं, प्रीतः -ता -तं, आह्लादितः -ता -तं, प्रह्लादितः -ता -तं, प्रफुल्लः -ल्ला -ल्लं, तुष्टः -ष्टा -ष्टं, परितुष्टः -ष्टा -ष्टं, तृप्तः -प्ता -प्तं, प्रसादितः -ता -तं, प्रफुल्लः -ल्ला -ल्लं, उल्लसः -सा -सं -सितः -ता -तं, अभिहर्षितः -ता -तं, मत्तः -त्ता -त्तं.—(Making glad) हर्षकः -का -कं, नन्दकः -का -कं, मोदकः -का -कं, आनन्दकरः -री -रं, हर्षकरः -री -रं, सुभगः -गा -गं, रमणीयः -या -यं.

To GLAD, GLADDEN, *v. a.* हृष् (c. 10. हर्षयति -यितुं), प्रहृष्, परिहृष्, नन्द् (c. 10. नन्दयति -यितुं), अभिनन्द्, ह्लाद् (c. 10. ह्लादयति -यितुं), आह्लाद्, प्रह्लाद्, रम् (c. 10. रमयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), तुष् (c. 10. तोषयति -यितुं), तृप् (c. 10. तर्पयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं).

GLADDENED, *p. p.* आह्लादितः -ता -तं, आनन्दितः -ता -तं, प्रमोदितः -ता -तं.

GLADDENING, *a.* हर्षकः -का -कं, हर्षणः -णा -णं, हर्षकरः -री -रं, नन्दकः -का -कं, आनन्दनः -ना -नं, आनन्ददः -दा -दं, प्रीतिदः -दा -दं.

GLADDER, GLADDENER, *s.* आनन्दकारी *m.* (न्), आनन्दकः, सुखदः.

GLADE, *s.* जङ्गलमध्ये or वनमध्ये पथः, वनपथः, वनमार्गः, वृक्षावृतः पथः, तरुगुल्मावृतो मार्गः.

GLADIATE, *a.* खड्गाकारः -रा -रं, अस्याकारः -रा -रं, खड्गाकृतिः -तिः -ति.

GLADIATOR, *s.* मल्लः, मल्लः, आसिकः, असिक्रीडकः, खड्गक्रीडकः, खड्गक्रीडकः, नैस्त्रिंशिकः.

GLADIATORIAL, *a.* मल्लसम्बन्धी -न्धिनी -न्धि (न्), असिक्रीडासम्बन्धी &c., आसिकः -की -कं.

GLADIATURE, *s.* असियुद्धं, खड्गयुद्धं, असिक्रीडा, खड्गक्रीडा.

GLADLY, *adv.* सानन्दं, सहर्षं, हर्षेण, हृष्टमनसा, हृष्टवत्, साह्लादं, आह्लादेन, प्रह्लादेन, प्रमोदेन, सन्तोषेण.

GLADNESS, *s.* हर्षः, आनन्दः, आह्लादः, प्रह्लादः, प्रमोदः, आमोदः, हृष्टिः *f.*, मुदा, हृष्टता, प्रहृष्टता, प्रफुल्लता, उल्लासः, उल्लसत्वं, चित्तप्रसन्नता, प्रीतिः *f.*, प्रीतता, तुष्टिः *f.*, सन्तुष्टिः *f.*, मोदः, उत्सवः.

GLADSOME, *a.* आनन्दी -न्दिनी -न्दि (न्), रम्यः -म्या -म्यं, सुभगः -गा -गं.

GLAIR, *s.* अण्डशुक्लं, अण्डगर्भपरिगतः शुक्लरसः, अण्डपयस् *n.*

GLANCE, *s.* (Of the eye) दृष्टिपातः, दृष्टिनिपातः, नयनपातः, दृष्टिविक्षेपः, कटाक्षः, नेत्रकटाक्षः, अपाङ्गदृष्टिः *f.*, अपाङ्गदर्शनं, वीक्षितं, प्रेक्षितं, अवलोकनं, काक्षः, दृष्टिबाणः.—(Slight view) ईषद्दर्शनं, ईषद्दृष्टिः *f.*, अर्द्धवीक्षणं, अर्द्धदृष्टिः *f.*; 'glance in return,' प्रतिसमीक्षणं.—(A shoot of light) स्फुरितं, स्फुरणं, द्युतिपातः, रश्मिः *m.*

To GLANCE, *v. n.* (As light) स्फुर् (c. 6. स्फुरति -रितुं), परिस्फुर्, लस् (c. 1. लसति -सितुं).—(Strike lightly and pass by) लघु हत्वा or ताडयित्वा अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or अती (c. 2. अत्येति -तुं. rt. इ), दूरम् अतिक्रम्य वृष् (c. 1. वर्षति -र्षितुं).—(Glance with the eye) दृष्टिं पत् (c. 10. पातयति -यितुं) or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), दृष्टिबाणं मुच्, कटाक्ष (nom. कटाक्षयति -यितुं).—(Glance at, inspect slightly) ईषद् दृश् (c. 1. पश्यति, द्रष्टुं) or निरीक्ष् (c. 1. -ईक्षते -क्षितुं), अर्द्धवीक्षणं कृ.

GLANCING, *part.* स्फुरन् -रन्ती -रत् (त्), लसन् -सन्ती -सत् (त्), स्फुरितः -ता -तं.

GLANCINGLY, *adv.* लघु, ईषत्, अल्पमात्रं, सार्द्धदर्शनं, लाघवेन, तिर्य्यक्, तिरस्, वक्रगत्या.

GLAND, *s.* शरीराभ्यन्तरे ग्रन्थिसंज्ञकः पित्तश्लेष्माद्याशयो मृदुमांसपिण्डः, मांसग्रन्थिः *m.*

GLANDERS, *s.* अश्वानाम् उग्ररोगविशेषो यत्र नासिकारन्ध्रेण दुर्गन्धश्लेष्म or दुर्गन्धमलम् उत्सृज्यते.

GLANDULE, *s.* शरीराभ्यन्तरे श्लेष्माद्याशयो मृदुमांसपिण्डकः.

GLANDULOUS, GLANDULAR, *a.* पूर्व्वोक्तमांसपिण्डसम्बन्धी -न्धिनी -न्धि (न्).

GLANS, *s.* (Penis) मणिः *m.f.*

GLARE, *s.* तेजस् *n.*, अतितेजस्, अतिद्युतिः *f.*, द्युतिः *f.*, अतिप्रभा, भाः *f.* (स्), दृष्टिसन्तापिका द्युतिः, नयनोपघातिनी प्रभा, हेतिः *f.*, उज्ज्वलद्युतिः *f.*, प्रखरदीप्तिः *f.*, खरदीप्तिः *f.*—(Fierce look) उग्रदृष्टिः *f.*, तीक्ष्णदृष्टिः, कोपज्वलिता दृष्टिः.

To GLARE, *v. n.* अतितेजसा द्युत् (c. 1. द्योतते -तितुं), उज्ज्वल् (c. 1. -ज्वलति -लितुं), ज्वल् in freq. (जाज्वल्यते), दीप् in freq. (देदीप्यते), अतितेजसा दृष्टिं सन्तप् (c. 10. -तापयति -यितुं) or उपहन् (c. 2. -हन्ति -न्तुं), स्फुर् (c. 6. स्फुरति -रितुं).—(Look with fierce eyes) तीक्ष्णदृष्टिं or कोपज्वलितां दृष्टिं पत् (c. 10. -पातयति -यितुं), रोषप्रदीप्ताक्षः -क्षा -क्षं भू.

GLAREOUS, *a.* अण्डशुक्लसगुणः -णा -णं, अण्डशुक्लधर्म्मा -र्म्मा -र्म्म (न्).

GLARING, *part.* or *a.* अतितैजसः -सी -सं, उज्ज्वलः -ला -लं, अतिद्योती -तिनी -ति (न्), अतितेजसा दृष्टिसन्तापकः -का -कं or नयनोपघाती -तिनी -ति (न्), भास्वान् -स्वती -स्वत् (त्), काशीनवः -वी -वं.—(Clear, notorious) सर्व्वप्रकाशः -शा -शं, सुप्रकाशः -शा -शं, पुरःस्फुरन् -रन्ती -रत् (त्); 'having eyes glaring with anger,' रोषदीप्ताक्षः -क्षा -क्षं.

GLARINGLY, *adv.* सुप्रकाशं, सर्व्वप्रकाशं, सर्व्वप्रसिद्धं, अतितेजसा.

GLASS, *s.* (Transparent substance formed by fusing sand with alkalies) काचः, क्षारः, सिक्थं, अभ्रं -भ्रकं, स्फटिकः.—(Glass drinking-vessel) काचभाजनं, काचपात्रं, काचकूपी, पलिघः, चुलुकः, पारी; 'glass jar,' काचघटी.—(Looking-glass, mirror) दर्पणः, मुकुरः, आदर्शः.

GLASS, *a.* काचमयः -यी -यं, काचनिर्म्मितः -ता -तं, काच in comp.

To GLASS, *v. a.* *See To* GLAZE.

GLASS-BLOWER, *s.* काचधमकः, क्षारधमकः, काचध्माकारः, काचनिर्म्माणकृत्.

GLASSFUL, *s.* काचपात्रपूरणं, काचभाण्डभरकः, काचभाण्डपूरकः.

GLASS-GRINDER, *s.* काचपरिष्कारकः, काचमार्ज्जकः, काचतेजस्कारी *m.* (न्).

GLASS-HOUSE, *s.* काचनिर्म्माणशाला, क्षारनिर्म्माणगृहं, काचशाला.

GLASSINESS, *s.* स्वच्छता, प्रसन्नता, प्रसत्तिः *f.*, विमलता, श्लक्ष्णता.

GLASS-LIKE, *a.* काचोपमः -मा -मं, काचसगुणः -णा -णं.

GLASS-MAN, *s.* काचविक्रेता *m.* (तृ), काचद्रव्यविक्रयी *m.* (न्), काचव्यवसायी *m.* (न्).

GLASS-WORK, *s.* काचनिर्म्माणं, काचनिर्म्माणशिल्पं, काचकर्म्म *n.* (न्).

GLASSY, *a.* काचोपमः -मा -मं, काचवत्प्रसन्नः -न्ना -न्नं, काचवद्विमलः -ला -लं, स्वच्छः -च्छा -च्छं, स्फटिकप्रभः -भा -भं, श्लक्ष्णः -क्ष्णा -क्ष्णं.

GLAUCOUS, *a.* समुद्रवर्णः -र्णा -र्णं, श्यामहरित् *m.f.n.*, घननीलः -ला -लं.

To GUARD, *v. a.* and *n.* रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, पाल or पा (c. 10. पालयति -यितुं, c. 2. पाति -तुं), अनुपाल्, परिपाल्, प्रतिपाल्, सम्पाल्, अभिपाल्, उपपाल्, गुप् (c. 1. गोपायति, गोप्तुं, c. 10. गोपयति -यितुं), अनुगुप्, अभिगुप्, प्रगुप्, अभिसङ्गुप्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै, अव् (c. 1. अवति -वितुं), पर्याप् in des. (-ईप्सति -प्सितुं), परिप्राप्.—(Ward off) वृ (c. 10. वारयति -यितुं), निवृ.—(Guard against) अवधा (c. 3. -धत्ते -धातुं), अवहितः -ता -तं भू, सावधानः -ना -नं भू, अवधानं कृ; 'guard against avarice,' लोभात् सावधानो भव.—(Keep guard) रक्षां कृ, रक्षार्थं जागृ (c. 2. जागर्त्ति, जागरितुं).

GUARD, *s.* (Act of guarding) रक्षणं, रक्षा, रक्षणः, पालनं, त्राणं, गुप्तिः *f.*, गोपनं, अवनं.—(A sentry) रक्षकः, रक्षी *m.* (न्), सैन्यः, सैनिकः, सेनारक्षः, परिचरः, उपरक्षणं, परिधिस्थः, रक्षिवर्गः, अनीकस्थः, मल्लः; 'captain of the guards,' गुल्मस्थानाधिकारी *m.* (न्), गुल्मस्थानाधिपः, रक्षाधिकृतः.—(That which protects any part of the body from injury) त्राणं, त्रं affixed, वारकः; 'a finger-guard,' अङ्गुलित्राणं, अङ्गुलित्रं; 'guard for the arm in shooting,' गोधा, तलं -ला, ज्याघातवारणं; 'to stand on one's guard,' सावधानः -ना -नं or सचेतनः -ना -नं स्था or भू; 'be on your guard,' सावधानो भव, सावहितो भव.

GUARD-ROOM, *s.* उद्घाटः, रक्षकाणां वासागारं, सैन्यस्थानं, सैनिकशाला.

GUARDABLE, *a.* रक्षणीयः -या -यं, रक्ष्यः -क्ष्या -क्ष्यं, पालनीयः -या -यं.

GUARDED, *p. p.* रक्षितः -ता -तं, अभिरक्षितः -ता -तं, पालितः -ता -तं, उपपालितः -ता -तं, गुप्तः -प्ता -प्तं, गोपायितः -ता -तं, त्रातः -ता -तं, त्राणः -णा -णं, अवितः -ता -तं.—(Cautious) अवहितः -ता -तं, स्ववहितः -ता -तं, सावधानः -ना -नं.

GUARDEDLY, *adv.* सावधानं, अवधानेन, अवहितं, स्ववहितं, सुविमृश्य.

GUARDEDNESS, *s.* अवधानता, सावधानता, स्ववहितत्वं, समीक्ष्यकारित्वं.

GUARDER, *s.* रक्षकः, रक्षी *m.* (न्), परिरक्षी *m.*, रक्षिता *m.* (तृ), पालयिता *m.* (तृ), पालकः, पालः -ली *m.* (न्), गोप्ता *m.* (प्तृ), गोपः -पकः, गोपायकः, गोपी *m.* (न्), गोपिलः, त्राता *m.* (तृ), पः in comp.

GUARDFUL, *a.* सावधानः -ना -नं, अवहितः -ता -तं, स्ववहितः -ता -तं.

Guardian, *s.* पालकः, प्रतिपालकः, रक्षकः, गोप्ता *m.* (प्तृ), पालः, नाथः, अध्यक्षः.—(Of an orphan) पितृस्थानः -नीयः, मातृपितृस्थानः, नाथः; 'guardian deity,' लोकपालः -लकः.

Guardianship, *s.* रक्षणं, रक्षा, रक्षकत्वं, पालकत्वं, रक्षितृपदं.

Guardship, *s.* रक्षणं, रक्षा, पालनं, त्राणं, गुप्तिः *f.*, गोपनं.

Gudgeon, *s.* वडिशद्वारेण सुग्रहणीयः क्षुद्रमत्स्यभेदः.—(A person easily cheated) सुवञ्चनीयः, सुप्रतारणीयः.

Guerdon, *s.* फलं, प्रतिफलं, पारितोषिकं, वेतनं.

To guess, *v. a.* and *n.* अनुमा (c. 2. -माति, c. 4. -मायते, c. 3. -मिमीते -मातुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, ऊह् (c. 1. ऊहते -हितुं), अवगम् (c. 1. -गच्छति -गन्तुं), शङ्क् (c. 1. शङ्कते -ङ्कितुं), अनिर्णयपूर्व्वम् अनुभू, अनिश्चयपूर्व्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रदृश् (c. 1. -पश्यति -द्रष्टुं) or विवेचनां कृ or मन् (c. 4. मन्यते, मन्तुं).

Guess, *s.* अनुमानं, अनुमितिः *f.*, अनुमानोक्तिः *f.*, वितर्कः -र्कणं, ऊहा -हनं, शङ्का, अनुभवः, अनुभूतिः *f.*, अनिश्चयपूर्व्वं निरूपणं, अनिर्णयपूर्व्वा विवेचना, अदृढप्रमाणः परामर्शः, अवगतिः, उपलब्धिः *f.*, उपलम्भः.

Guessed, *p. p.* अनुमितः -ता -तं, वितर्कितः -ता -तं, शङ्कितः -ता -तं.

Guesser, *s.* अनुमाता *m.* (तृ), अनुमानकर्त्ता *m.* (र्त्तृ), वितर्ककः.

Guest, *s.* अतिथिः *m. f.* -थी *f.*, अभ्यागतः, अभ्यागतजनः, गृहाभ्यागतः, गृहागतः, आगन्तुः *m. f.*, आमान्तुः, आगन्तुकः -का -कं, आवेशिकः -की -कं, प्राघुणः, प्राघुर्णिकः, प्रघूर्णः, साङ्गतिकः; 'proper for a guest,' आतिथ्यः -थ्यी -थ्यं, आतिथेयः -यी -यं.

Guest-chamber, *s.* अतिथिशाला, अतिथिसत्कारयोग्या शाला.

Guest-rite, *s.* अतिथिसत्कारः -सत्क्रिया, अतिथिक्रिया, अतिथिसेवा.

To guggle, *v. n.* *See* Gurgle.

Guidance, *s.* नयः, नायः, नीतिः *f.*, प्रणयनं, नेतृत्वं, विनियमः, पथदर्शनं.—(Direction) निर्देशः, निदेशः, उपदेशः, शास्तिः *f.*, शासनं, अनुशास्तिः *f.*, अनुशासनं, विधानं; 'good guidance,' सुनयः, सुनीतिः *f.*

To guide, *v. a.* नी (c. 1. नयति नेतुं), आनी, समानी, मार्गं or पथं दृश् (c. 10. दर्शयति -यितुं), गम (c. 10. गमयति -यितुं).—(Direct) निर्दिश् (c. 6. -दिशति -देष्टुं), उपदिश्, उद्दिश्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, समनुशास्, प्रणी, विनियम् (c. 1. -यच्छति -यन्तुं), धृ (c. 10. -धारयति -यितुं), विधा (c. 3. -दधाति -धातुं).

Guide, *s.* नेता *m.* (तृ), नायकः, नेत्रः, विनेता *m.* (तृ), पथदर्शकः, मार्गदर्शकः, दर्शकः, दर्शयिता *m.* (तृ), प्रदर्शकः, निर्देष्टा *m.* (ष्टृ), निर्देशकः, उद्देशकः, उपदेशी *m.* (न्), उपदेशकः, देशकः, उपदेष्टा *m.* (ष्टृ), आदेष्टा *m.*, पथिकः, सञ्चारकः, शासिता *m.* (तृ), शास्ता *m.*, अनुशासकः, अध्यक्षः.

Guided, *p. p.* नीतः -ता -तं, आनीतः -ता -तं, समानीतः -ता -तं, नीयमानः -ना -नं, गमितः -ता -तं, शासितः -ता -तं, अनुशासितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

Guide-post, *s.* पथदर्शनार्थं or मार्गसूचनार्थं स्थूणा.

Guild, *s.* श्रेणी -णिः *m.*, सहकारिजनसमूहः, नगरकार्य्यसम्पादनार्थं जनसंसर्गः, नागरसमाजः, वणिक्समाजः, निगमः, नैगमः, महाजनसंसर्गः.

Guild-hall, *s.* सहकारिणां वाणिजजनानां समागमशाला, निगमशाला, नगरकार्य्यसम्पादनार्थं महाचत्वरं.

Guile, *s.* माया, कपटः -टं, छलं -लना, शठता, शाठ्यं, खलता, धूर्त्तता, व्याजः, विदग्धता, वैदग्ध्यं, छद्म *n.* (न्), कूटः -टं, कौटिल्यं, कैतवं, वक्रता, कापट्यं, वञ्चनं -ना, असारल्यं.

Guileful, *a.* मायावान् -वती -वत् (त्), मायी -यिनी -यि (न्), मायामयः -यी -यं, मायान्वितः -ता -तं, मायावी -विनी -वि (न्), छली -लिनी -लि (न्), छलान्वितः -ता -तं, विदग्धः -ग्धा -ग्धं, कापटिकः -की -कं, वञ्चकः -का -कं, वञ्चनशीलः -ला -लं, शठः -ठा -ठं, खलः -ला -लं, कुटिलः -ला -लं, विजिह्मः -ह्मा -ह्मं, सव्याजः -जा -जं, धूर्त्तः -र्त्ता -र्त्तं, वक्रः -क्रा -क्रं, वक्रभावः -वा -वं.

Guilefully, *adv.* मायया, समायं, शाठ्येन, छलेन, खलवत्, शठवत्, धूर्त्तवत्, सव्याजं, कितववत्, कैतवेन, विदग्धं.

Guilefulness, *s.* मायावत्त्वं, शठता, शाठ्यं, कौटिल्यं, वक्रता, विजिह्मता, विदग्धता, सव्याजत्वं, असारल्यं.

Guileless, *a.* अमायी -यिनी -यि (न्), अमायिकः -की -कं, मायाहीनः -ना -नं, निष्कपटः -टा -टं, कपटहीनः -ना -नं, निर्व्याजः -जा -जं, छलरहितः -ता -तं, शुद्धमतिः -तिः -ति, सरलः -ला -लं, अजिह्मः -ह्मा -ह्मं, अवक्रः -क्रा -क्रं, अकुटिलः -ला -लं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, दक्षिणः -णा -णं, अकृत्रिमः -मा -मं, अकूर्चः -र्चा -र्चं.

Guilelessly, *adv.* मायां विना, मायया विना, मायाव्यतिरेकेण, कपटं विना, निष्कपटं, निर्व्याजं, सरलवत्.

Guilelessness, *s.* मायाहीनता, सारल्यं, अवक्रता, अजिह्मता, शुद्धता.

Guillotine, *s.* शिरश्छेदनयन्त्रं, अतितीक्ष्णयन्त्रं यदाघातेन निमेषमात्रेण शीर्षच्छेदः क्रियते.

To guillotine, *v. a.* पूर्व्वोक्तयन्त्रेण मस्तकं छिद् (c. 7. छिनत्ति, छेत्तुं).

Guilt, *s.* (Criminality) अपराधिता -त्वं, सापराधता, पापित्वं, सपापत्वं, अपराद्धता, दोषिता -त्वं, सदोषता, पापवत्त्वं, दोषवत्त्वं.—(Crime) पापं, अपराधः, दोषः, पातकं, दुष्कृतं, दुष्कर्म्म *n.* (न्), पापकर्म्म *n.*, कल्मषं, एनस् *n.*, आगस् *n.*, अघं, दुरितं, मन्तुः *m.*

Guiltily, *adv.* सापराधं, सपापं, सदोषं, सपातकं, अपराद्धवत्.

Guiltiness, *s.* अपराधिता, अपराद्धता, सापराधत्वं, पापित्वं, सपापता, दोषिता -त्वं, सदोषता, पापवत्ता, दोषवत्ता.

Guiltless, *a.* निष्पापः -पा -पं, [illegible] -पिनी -पि (न्), अपापः -पा -पं, निरपराधः -धा -धं, अनपराधी -धिनी -धि (न्), निर्दोषः -षा -षं -षी -षिणी -षि (न्), [illegible] शुद्धः -द्धा -द्धं, शुद्धमतिः -तिः -ति, अनघः -घा -घं.

Guiltlessly, *adv.* निष्पापं, पापं विना, निरपराधं, अपराधेन विना.

Guiltlessness, *s.* निष्पापत्वं, निर्दोषत्वं, निरपराधता, शुद्धता.

Guilty, *adv.* अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं, सापराधः -धा -धं, कृतापराधः -धा -धं, प्राप्तापराधः -धा -धं, पापी -पिनी -पि (न्), पापवान् -वती -वत् (त्), पापकर्म्मा -र्म्मा -र्म्म (न्), सपापः -पा -पं, दोषी -षिणी -षि (न्), दोषवान् -वती -वत् (त्), सदोषः -षा -षं, पातकी -किनी -कि (न्), दुष्कृती -तिनी -ति (न्), एनस्वी -स्विनी -स्वि (न्), कृतैनाः -नाः -नः (स्), अनिष्कृतैनाः [illegible] कृतागाः -गाः -गः (स्), अभिपन्नः -न्ना -न्नं; 'rashly guilty,' चिकुरः -रा -रं, चपलः -ला -लं.

Guinea, *s.* सुवर्णमुद्राविशेषः, सुवर्णः.

Guinea-hen, *s.* चित्रशरीरविशिष्टा विदेशीयकुक्कुटी.

Guinea-pig, *s.* अत्यल्पशरीरो विदेशीयशूकरभेदः.

Guise, *s.* वेशः, वेषः, वासस् *n.*, परिधानं, अम्बरं, वस्त्रं, वसनं, आकारः, रूपं, व्यवहारः, रीतिः *f.*; 'in the guise of a herdsman,' गोपवेशः; 'of a Brahmin,' द्विजरूपी *m.* (न्).

Guitar, *s.* वीणा, वल्लकी, विपञ्ची -ञ्चिका, तन्त्री, रुद्री, सारङ्गी, शारङ्गी, पिनाकी, ततं, परिवादिनी.

Gulf, *s.* (A bay) अखातं, खातं, समुद्रवङ्कः, पुटभेदः.—(Abyss) अगाधदरी, अगाधरन्ध्रं, अतलस्पर्शखातं, गम्भीररन्ध्रं, नरकः.—(Whirlpool) आवर्त्तः, जलावर्त्तः, जलगुल्मः, अवघूर्णः, घूर्णः, घूर्णजलं.

Gulfy, *a.* घूर्णजलपूर्णः -र्णा -र्णं, जलगुल्ममयः -यी -यं.

To gull, *v. a.* वञ्च् (c. 10. वञ्चयते -ति -यितुं), परिवञ्च्, छल् (c. 10.

छलयति -यितुं), प्रतॄ (c. 10. -तारयति -यितुं).

GULL, *s.* (Bird) जलकुक्कुट: -टी, विष्वका, गङ्गाचिल्ली, देवट्टी, ध्वांक्ष:. —(One easily cheated) सुवञ्चनीय:, सुप्रतारणीय:.

GULL-CATCHER, *s.* वञ्चक:, प्रतारक:, छली *m.* (न्), कूटकार:.

GULLED, *p. p.* वञ्चित: -ता -तं, प्रलब्ध: -ब्धा -ब्धं, प्रतारित: -ता -तं.

GULLERY, *s.* वञ्चनं, छलं, कपट: -टं, प्रतारणा, व्याज:, कैतवं.

GULLET, *s.* निगरणस्रोतस् *n.*, निगरण:, अन्नवाहिस्रोतस् *n.*

GULLIBILITY, *s.* सुवञ्चनीयता, सुखवञ्चनीयत्वं, सुप्रतारणीयता.

GULLIBLE, *a.* सुवञ्चनीय: -या -यं, सुखेन प्रतारणीय: -या -यं.

GULLY, *s.* नाल:, प्रणाल: -ली -लिका, खातं, कुल्या, जलमार्ग:, उदकगमनमार्ग:, जलवाहनी, परीवाह:, सारणि: -णी *f.*

To GULLY, *v. a.* भूमिम् उत्खन् (c. 1. -खनति -नितुं), प्रणालिकां कृ, कुल्यां कृ.

GULLY-HOLE, *s.* कर्द्दमाटकरन्ध्रं, प्रणालिकारन्ध्रं, प्रणालीविवरं.

GULOSITY, *s.* अतिभोजनं, अत्याहार:, घस्मरता, अतृप्ति: *f.*

To GULP, *v. a.* जलं बहुशो गॄ (c. 6. गिरति, गरितुं -रीतुं) or निगॄ or अवगॄ or ग्रस् (c. 1. ग्रसते -सितुं).—(Disgorge) उद्गॄ, उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

GULP, *s.* गरणं, गर, गीर्णि: *f.*, गिरि: *f.*, निगार:, निगरणं, ग्रसनं, ग्रास:, एकवारे निगीर्णं यत्किञ्चित्.—(Disgorging) उद्गार: -रणं, उद्गिरणं, उद्वम: -मनं.

GUM, *s.* (Fleshy covering of the teeth) दन्तमांसं, दन्तवेष्ट: -ष्टनं, दन्तशिरा, दन्तमूलं, वेला.—(Exudation from trees) निर्यास:, वृक्षनिर्यास:, वृक्षरस:.—(Adhesive substance) श्यानद्रव्यं, सान्द्रद्रव्यं.

To GUM, *v. a.* पूर्व्वोक्तनिर्यासेन or श्यानद्रव्येण लिप् (c. 6. लिम्पति, लेप्तुं) or संयुज् (c. 7. -युनक्ति -योक्तुं) or संलग्नीकृ.

GUM-ARABIC, *s.* सूक्ष्मपत्र:, सूक्ष्मपत्ररस:.

GUM-BOIL, *s.* दन्तविस्फोट:, दन्तस्फोट: -टक:, दन्तव्रण: -णं, दन्तार्बुद:, द्विजव्रण:, वैदर्भ:, उपकुश:.

GUMMINESS, *s.* सान्द्रत्वं, श्यानत्वं, स्निग्धता, संलग्नशीलता.

GUMMY, *a.* वृक्षनिर्यासमय: -यी -यं, श्यान: -ना -नं, सान्द्र: -न्द्रा -न्द्रं.

GUN, *s.* अन्तरग्निबलेन गुलिकाप्रक्षेपणी लोहनाडि: or -डी, गुलिप्रक्षेपणी सुषिरनाली, गुलिकाप्रक्षेपार्थं शुषिरयन्त्रं, लोहसुषि: *f.*

GUNNER, *s.* पूर्व्वोक्तनाडिद्वारा गुलिकाप्रक्षेपक:, लोहनाडिधारी *m.* (न्), अग्न्यस्त्रधारी *m.*, आग्नेयास्त्रप्रक्षेपक:.

GUNNERY, *s.* अग्न्यस्त्रविद्या, लोहनाडिद्वारेण गुलिकाप्रक्षेपणविद्या.

GUNPOWDER, *s.* आग्नेयचूर्णं, शीघ्रदाह्यचूर्णं, आग्नेयक्षोद:, महाशब्दपूर्व्वम् अग्निसम्पर्कात् सद्योदाह्यचूर्णं.

GUN-SHOT, *s.* लोहगुलिकागोचरं, लोहगुलिविषय:, युद्धनाडिक्षेपणं.

GUN-SMITH, *s.* अग्न्यस्त्रकार:, आग्नेयशस्त्रकार:, आग्नेयनाडिनिर्म्माता *m.* (तृ), युद्धनाडिनिर्म्माणशिल्पज्ञ:.

GUN-STOCK, *s.* आग्नेयनाडिदण्ड:, लोहनाडिदारु: *m.*, नाडियारङ्ग:.

GUNWALE, GUNNEL, *s.* नौपार्श्वधारा -र:, नौपार्श्वस्य उपरिकाष्ठं, नाव्युत्सङ्ग:.

GURGE, *s.* जलावर्त्त:, जलभ्रम:, जलावघूर्ण:, जलगुल्म:, घूर्णजलं.

To GURGLE, *v. n.* जलवद् घर्घराशब्देन स्रु (c. 1. स्रवति, स्रोतुं), घर्घराशब्दं कृ, घर्घ or गर्ग (nom. घर्घायते, गर्गायते), गर्घ् (c. 1. गर्घति -र्घितुं).

GURGLING, *s.* घर्घराशब्देन जलप्रस्राव:, घर्घरा.

To GUSH, *v. n.* प्रपत् (c. 1. -पतति -तितुं), निपत्, बहुश: प्रस्रु (c. 1. -स्रवति -स्रोतुं) or प्रस्यन्द् (c. 1. -स्यन्दते -न्दितुं) or क्षर् (c. 1. क्षरति -रितुं), वेगेन or वेगत: नि:सृ (c. 1. -सरति -सर्त्तुं); 'tears gushed from (her) eyes,' जलं नेत्राभ्यां प्रापतत्.

GUSH, GUSHING, *s.* बहुप्रस्राव:, जलप्रपात:, उत्सेक:, उत्सेचनं, उत्पीड:.

GUSSET, *s.* वस्त्रनिवेशित उपवस्त्रखण्ड: or अधिकवस्त्रखण्ड:.

GUST, *s.* (Blast of wind) निर्घात:, प्रभञ्जन:, व्योममुद्गर:, वातरूप: वायुगुल्म:, वायुवेग:, वात्या, प्रबलवायु: *m.*, प्रचण्डवायु: *m.*, चण्डवात: तीव्रवात:, पवनाघात:, जवानिल:.—(Taste) स्वाद:, आस्वाद:, रसनेन्द्रियं, रुचि: *f.*, अभिरुचि: *f.*

GUSTATION, *s.* स्वादनं, आस्वादनं, प्राशनं, लेहनं.

GUSTFUL, *a.* रुच्य: -च्या -च्यं, रुचिर: -रा -रं, सरस: -सा -सं.

GUSTLESS, *a.* विरस: -सा -सं, नि:स्वादु: -दु: -दु, अस्वादु: -दु: -दु.

GUSTO, *s.* रुचि: *f.*, अभिरुचि: *f.*, रस:, सुरस:, आस्वाद:.

GUSTY, *a.* वातल: -ला -लं, वातवान् -वती -वत् (त्), वातीय: -या -यं वातमय: -यी -यं, बहुपवन: -ना -नं, पवनक्षिप्त: -प्ता -प्तं.

GUT, *s.* नाडि: -डी *f.*, अन्तर्नाडी, नाली -लि: *f.*, धमनी -नि: *f.*, शिरा सिरा, अन्त्रं, पुरीतत् *m. n.*, कोष्ठ:.—(Stomach) उदरं, जठर: -रं.

To GUT, *v. a.* निरन्त्रीकृ, निरन्त्र (nom. निरन्त्रयति -यितुं), नाडी: or अन्त्राणि वहिष्कृ.—(Plunder) द्रव्याणि अपहृ (c. 1. -हरति -हर्त्तुं).

GUTTA SERENA, *s.* तिमिरं; 'an eye affected with it,' तिमिरदोषहतं चक्षुस्

GUTTED, *p. p.* निरन्त्रीकृत: -ता -तं, हृतसर्व्वद्रव्य: -व्या -व्यं.

GUTTER, *s.* प्रणाल: -ली -लिका, नाल:, जलनिर्गम:, जलमार्ग:, परीवाह: जलवाहनी, सारणि: *f.* -णी, उदकगमनमार्ग:.

To GUTTER, *v. a.* प्रणालीरूपेण उत्खन् (c. 1. -खनति -नितुं) or शुषिरीकृ

To GUTTER, *v. n.* प्रणालीरूपेण उत्खन् in pass. (-खन्यते) or शुषिरीभू प्रणालिकां कृ, जलदीपिकारूपेण लवश: स्यन्द् (c. 1. स्यन्दते -न्दितुं).

GUTTLER, *s.* बहुभक्षक:, अतिभोजी *m.* (न्), कुक्षिम्भरि: *m.*

GUTTURAL, *a.* कण्ठ्य: -ण्ठ्या -ण्ठ्यं, कण्ठस्थ: -स्था -स्थं, ग्रैव: -वी -वं ग्रैवेय: -यी -यं; 'guttural letter,' कण्ठ्यं; 'guttural sound,' कूजं

GUZARAT, *s.* (The country) गुर्जर:.—(The people) गुर्जरा: *m. pl.*

To GUZZLE, *v. a.* बहुशो गॄ (c. 6. गिरति, गरितुं -रीतुं) or निगॄ or ग्रस् (c. 1. ग्रसते -सितुं) or पा (c. 1. पिबति, पातुं), पानरत: -ता -तं भू

GUZZLER, *s.* अतिपायी *m.* (न्), अतिभोजी *m.* (न्), पानरत:.

GYMNASIUM, *s.* व्यायामशाला, मल्लयुद्धशाला, मल्लशाला, विहार:.

GYMNASTIC, *a.* व्यायामी -मिनी -मि (न्), व्यायामसम्बन्धी -न्धिनी -न्धि (न्), मल्लयुद्धसम्बन्धी &c., व्यायामशील: -ला -लं.

GYMNASTICS, *s. pl.* व्यायाम:, मल्लयुद्धं, व्यायामविद्या.

GYPSY, GYPSEY. *See* GIPSY.

To GYRATE, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), भ्रम् (c. 4. भ्राम्यति, c. 1. भ्रमति -मितुं), घूर्ण् (c. 6. 1. घूर्णति -ते -र्णितुं), परिघूर्ण्, विघूर्ण्, व्याघूर्ण्

GYRATION, *s.* परिवर्त्तनं, आवर्त्त:, भ्रम: -मणं, भ्रमि: *f.*, घूर्णि: *f.*, घूर्णनं 'of a bird,' परिडीनकं.

GYRE, *s.* चक्रावर्त्त:, चक्रगति: *f.*, आवृत्ति: *f.*, मण्डलं, परिमण्डलं.

To GYVE, *v. a.* निगडेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), निगड (nom. निगडयति -यितुं), पाश (nom. पाशयति -यितुं).

GYVES, *s. pl.* निगड: -डं, पाश:, बन्धनं -नानि *n. pl.*, पादपाश:, शृङ्खला

H.

HA, *interj.* हा, हहा, आहा, अहो, आहो, अहह:, अहोवत्, ह, अह आ, अयि, आश्चर्य्यं.

HABEAS CORPUS, *s.* मिथ्यानिरोधनिषेधार्थकं पूर्व्वकालीनशासनपत्रं.

HABERDASHER, *s.* वस्त्रादिविक्रेता *m.* (तृ), वसनादिविक्रेता *m.*, अंशुकादिविक्रयी *m.* (न्), क्षुद्रद्रव्यविक्रेता *m.*

HABERDASHERY, *s.* पूर्व्वोक्तव्यापारिणा विक्रीता वस्त्रादिद्रव्यसामग्री.

HABERGEON, *s.* वक्षस्त्राणं, उरस्त्राणं, उरश्छदः, कण्ठस्थकवचं.

HABILIMENT, *s.* वेशः, परिधानं, परिच्छदः, वसनं, वस्त्रं, आभरणं, अम्बरं, वासस् *n.*, प्रसाधनं, आच्छादनं, सज्जा.

HABIT, *s.* (Dress) वेशः, वेषः, वसनं, वस्त्रं, वासस् *n.*, परिधानं, परिच्छदः, अम्बरं.—(State, condition) अवस्था, स्थितिः *f.*, भावः, वृत्तिः *f.*, दशा, संस्थितिः *f.*, स्वभावः; 'habit of body,' शरीरस्थितिः *f.*, देहस्वभावः; 'habit of mind,' चित्तवृत्तिः *f.*—(Temperament, disposition) प्रकृतिः *f.*, शीलः -लता, स्वभावः, अन्तःकरणं.—(Custom, practice, established manner) आचारः, अभ्यासः, व्यवहारः, समाचारः, नित्यकृत्यं, नित्यक्रिया, रीतिः *f.*, व्यवहृतिः *f.*, शीलः, प्रचारः, चरितं, चर्य्या, क्रमः, नियमः, आवृत्तिः *f.*, व्यापारः, प्रवृत्तिः *f.*, मार्गः, अनुशीलनं; 'bad habit,' व्यसनं; 'having bad habits,' दुराचारः -रा -रं, पापसमाचारः -रा -रं, पापचर्य्यः -र्य्या -र्य्यं, दुर्वृत्तः -त्ता -त्तं, दुश्चरित्रः -त्रा -त्रं, व्यसनी -निनी -नि (न्).

To **HABIT**, *v. a.* वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, आच्छद् (c. 10. -च्छादयति -यितुं), वस्त्र (nom. वस्त्रयति -यितुं), परिधा in caus. (-धापयति -यितुं).

HABITABLE, *a.* वासतेयः -यी -यं, वासव्यः -व्या -व्यं, वासयोग्यः -ग्या -ग्यं, वासक्षमः -मा -मं, आजीव्यः -व्या -व्यं, उपजीव्यः -व्या -व्यं.

HABITANT, *s.* वासी *m.* (न्), निवासी *m.*, निलायी *m.* (न्), वासकृत्.

HABITATION, *s.* वासः, वासस्थानं, निवासः, वसतिः *f.*, निवसतिः *f.*, गृहं, गेहः -हं, वेश्म *m.* (न्), निलयः -यनं, आलयः, आयतनं, निवेशनं, निकेतः -तनं, आगारः, भवनं, वसितं, समावासः, अवस्थानं, आवसथः, स्थानं, ओकस् *n.*, धाम *n.* (न्).

HABITUAL, *a.* आभ्यासिकः -की -कं, अभ्यस्तः -स्ता -स्तं, आचारिकः -की -कं, आचरितः -ता -तं, व्यावहारिकः -की -कं, व्यवहारिकः -की -कं, नित्यः -त्या -त्यं, स्वाभाविकः -की -कं, अनुशीलितः -ता -तं, नैयमिकः -की -कं, प्रायिकः -की -कं.

HABITUALLY, *adv.* नित्यं, नित्यशस्, यथाव्यवहारं, यथारीति, साभ्यासं, अभ्यासेन, अभ्यासपूर्व्वं, यथाभ्यासं.

To **HABITUATE**, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासं कृ, अभ्यस्तं -स्तां -स्तं कृ, शिक्ष् (c. 10. शिक्षयति -यितुं), शील् (c. 10. शीलयति -यितुं); 'to be habituated,' अभ्यस्तः -स्ता -स्तं भू.

HABITUATED, *p. p.* अभ्यस्तः -स्ता -स्तं, शिक्षितः -ता -तं, कृताभ्यासः -सा -सं, शीलितः -ता -तं, अनुशीलितः -ता -तं, शीलः -ला -लं in comp.

HABITUDE, *s.* (Custom) व्यवहारः, आचारः, रीतिः *f.*, चरितं, चर्य्या, नित्यकृत्यं.—(Relation) सम्बन्धः, सम्पर्कः, प्रतीक्षा.—(Intercourse) संसर्गः.

To **HACK**, *v. a.* (Mangle) व्यवछिद् (c. 7. -छिनत्ति -छेत्तुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं), प्रव्रश्च्, विदॄ (c. 10. -दारयति -यितुं), बहुलवशः खण्ड् (c. 10. खण्डयति -यितुं) or छिद्, बहुखण्डशः कृ, खण्डं खण्डं कृ, बहुखण्डीकृ, शतविक्षतीकृ.

To **HACK**, *v. n.* (For hire) अतिशरीरायासेन नीचकर्म्म कृ, निरन्तरायासं कृ, पण्यः -ण्या -ण्यं भू, सर्व्वप्रयोज्यः -ज्या -ज्यं भू, सर्व्वसाधारणीभू.

HACK, *s.* (Cut) प्रहारः, छेदः, आघातः, छुरिकाघातः.—(Horse kept for hire, worn out horse) कदश्वः, पण्याश्वः, भाटकीयवाजी *m.* (न्), साधारणवाजी *m.*, सर्व्वप्रयोज्यवाजी *m.*, पण्यघोटकः, अश्वकः; 'hack-carriage,' पण्यवाहनं, साधारणरथः.—(Drudge) निरन्तरायासी *m.* (न्), अतिदेहक्लेशेन नीचकर्म्मकारी *m.* (न्), हीनवृत्तिः *m.*, व्रातीनः.

HACKED, *p. p.* व्यवछिन्नः -न्ना -न्नं, क्षतविक्षतः -ता -तं, वृक्णः -क्णा -क्णं.

To **HACKLE**, *v. a.* वल्कमाणयन्त्रेण शणं or अतसीं मृज् (c. 2. मार्ष्टि -र्ष्टुं) or सम्मृज्, or परिष्कृ or शुध् (c. 10. शोधयति -यितुं) or पृथक्कृ.

HACKLE, *s.* अतसीमार्जनी, शणमार्जकः, उमाशोधनी.

HACKNEY, *s.* (Horse) कदश्वः, अश्वकः, पण्याश्वः, पण्यघोटकः, साधारणवाजी *m.* (न्), भाटकीयवाजी *m.*—(Any thing much used, a drudge, a hireling) नीचकर्म्मणि नियुक्तः, नीचकर्म्मकारी *m.* (न्), निरन्तरायासी *m.* (न्), हीनवृत्तिः *m.*, वैतनिकः, पण्यः, साधारणः, सर्व्वप्रयोज्यः.—(Prostitute) पण्यस्त्री, साधारणस्त्री.

To **HACKNEY**, *v. a.* नीचकर्म्मणि नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), पण्यीकृ, साधारणीकृ, सर्व्वप्रयोज्यं -ज्यां -ज्यं कृ, जीर्णीकृ.

HACKNEY-COACH, *s.* साधारणरथः, पण्यरथः, पण्यवाहनं, सर्व्वप्रयोज्यरथः.

HACKNEYED, *p. p.* सर्व्वप्रयुक्तः -क्ता -क्तं, सर्व्वसाधारणः -णा -णी -णं, सर्व्वपण्यः -ण्या -ण्यं, अपकर्म्मनियुक्तः -क्ता -क्तं, जीर्णः -र्णा -र्णं.

HADDOCK, *s.* हड्डकसंज्ञकः समुद्रीयमत्स्यभेदः.

HADES, *s.* प्रेतलोकः, अधोलोकः, अधोभुवनं, नरकः, पातालं.

HAFT, *s.* (Handle) त्सरुः *m.*, तलः, वारङ्गः, मुष्टिः *m.* -ष्टी *f.*, दण्डः, कर्णः.

To **HAFT**, *v. a.* त्सरौ or तले or वारङ्गे निविश् (c. 10. -वेशयति -यितुं).

HAG, *s.* कुरूपी -पिणी, कुट्टिनी, डाकिनी, वृद्धा स्त्री, जरिणी.

HAGGARD, *a.* कृशाननः -ना -नं, क्षीणवदनः -ना -नं, क्षामवदनः -ना -नं, शुष्कवदनः -ना -नं, उग्रमुखः -खा -खं, उग्रदर्शनः -ना -नं.

HAGGISH, *a.* कुरूपिणी, अपरूपिणी, विरूपिणी, जरापरिणता.

To **HAGGLE**, *v. a.* व्यवछिद् (c. 7. -छिनत्ति -छेत्तुं), शतविक्षतीकृ, खण्डशः कृ.

To **HAGGLE**, *v. n.* (In bargaining) क्रयकाले विलम्ब् (c. 1. -लम्बते -म्बितुं) or विचर् (c. 10. -चारयति -यितुं) or एतावन्न दातुम् इच्छामीति वादानुवादं कृ or न्यूनमूल्यं दित्सामीति वद् (c. 1. वदति -दितुं).

HAGGLER, *s.* क्रयकाले विलम्बी *m.* (न्) or एतावन्मूल्यं न दातुम् इच्छामीति वादानुवादकारी *m.* (न्).

HAGIOGRAPHA, *s.* धर्म्मग्रन्थः, धर्म्मशास्त्रसंहिता, धर्म्मपुस्तकं.

HAH, *interj.* [illegible] अहो अहावत्, अहह, हाहा, आ, अयि आश्चर्य्यं.

HAIL, *s.* (Frozen rain) करका, करकावृष्टिः *f.*, शिला, शिलावृष्टिः *f.*, वर्षोपलः, [illegible] पयोगडः, घनकफः, मेघास्थि *n.*, मेघकफः, मेघगर्भः, धारा, तोयडिम्भः, मरु[illegible] [illegible] धाराङ्कुरः, मटती, शिलीन्ध्रं, वार्षिला.

HAIL, *exclam.* नमस्, स्वस्ति, कुशलं, कुशलं भूयात्, सुखं भूयात्, कल्याणं भूयात्, क्षेमं भवतु, शेवं, अभिवादये, अभिवन्दे.

To **HAIL**, *v. n.* (Pour down hail) करकासारं वृष् (c. 1. वर्षति -र्षितुं), शिला वृष्, उपलान् वृष् or पत् (c. 10. पातयति -यितुं).

To **HAIL**, *v. a.* (Call from a distance) दूराद् आह्वे (c. 1. -ह्वयति -ह्वातुं) or ह्वे or सम्बोधनं कृ or आक्रन्द् (c. 1. -क्रन्दति -न्दितुं) or आमन्त्र् (c. 10. -मन्त्रयते -यितुं) or समाभाष् or अभिभाष् (c. 1. -भाषते -षितुं) or आभाष्.—(Salute) वन्द् (c. 1. वन्दते -न्दितुं), अभिवन्द्, अभिवद् (c. 10. -वादयति -ते -यितुं), नमस्कृ, आमन्त्र्, उपास् (c. 2. -आस्ते -आसितुं).

HAILED, *p. p.* दूराद् आहूतः -ता -तं or अभिहितः -ता -तं or आमन्त्रितः -ता -तं, सम्बोधितः -ता -तं, आक्रन्दितः -ता -तं.

HAIL-STONE, *s.* शिला, वर्षोपलः, पयोघनः, करका, पयोगडः.

HAIL-STORM, *s.* करकासारः, करकावृष्टिः *f.*, शिलासारः.

HAILY, *a.* करकामयः -यी -यं, शिलामयः -यी -यं, वर्षोपलमयः &c.

HAIR, *s.* केशः, वालः, कचः, चिकुरः, वृजनः -जिनः, कुन्तलः.—(Of the head) केशः, शिरोरुहः, शिरोरुद् *m.*, शिरसिजः, मूर्द्धजः, कुशला.—(Of the body) लोम *n.* (न्), रोम *n.* (न्), तनुरुहः -हं, तनूरुहः -हं, तनुरुद् *m.* (ह्), तनुजं, अङ्कुरः; 'a head of hair,' कैश्यं, कैशिकं; 'a quantity of hair,' केशकलापः, केशपक्षः, केशोच्चयः, केशपाशः, कचपाशः, कचपक्षः, कचहस्तः, चिकुरपाशः, चिकुरपक्षः, चिकुरहस्तः; 'having much or fine hair,' केशी -शिनी -शि (न्), केशवान् -वती -वत् (त्), केशवः -वा -वं, केशिकः -की -कं; 'a fine head

of hair,' केशभारः, कबरीभारः -भरः; 'a braid of hair,' कबरी, केशगर्भः -र्भकः, केशवेशः; 'braided hair,' धम्मिल्लः, वेणिः -णी *f.*, वेणिका, प्रवेणिः -णी *f.*; 'a lock of hair,' अलकः -कं, चूर्णकुन्तलः, भ्रमरकः, काकपक्षः, शिखण्डः -ण्डकः, केशपाशी, चूडा, शिखा; 'clotted hair,' जटा, सटा, 'unentangled hair,' शीर्षण्यः, शिरस्यः; 'covered with hair,' लोमशः -शा -शं, बहुलोमा -मा -म (न्), रोमाक्रान्तः -न्ता -न्तं; 'point of hair,' वालाग्रं; 'erection of the hair,' रोमहर्षणं, उद्धर्षणं. *See* ERECTION.—(Filament of a plant) केशरः, केसरः.

HAIR-BELL, *s.* घण्टाकारपुष्पविशिष्ट ओषधिभेदः.

HAIR-BREADTH, *s.* एककेशान्तरं, एककचपरिमाणं, अत्यल्पान्तरं.

HAIR-BROOM, *s.* केशनिर्म्मिता मार्जनी, लोममयी शोधनी.

HAIR-BRUSH, *s.* केशमार्जनी, केशशोधनी, केशनिर्घर्षणकः.

HAIR-CLOTH, *s.* लोमनिर्म्मितं वस्त्रं, केशमयः पटः.

HAIR-CUTTER, *s.* केशच्छिद् *m.* -छेत्ता *m.* (तृ), शिरोरुहच्छेदकः.

HAIR-DRESSER, *s.* केशरचकः, केशविरचकः, केशसंस्कारकृत् *m.*

HAIR-DRESSING, *s.* केशरचना, केशविरचनं -ना, केशसंस्कारः.

HAIRED, *a.* केशी -शिनी -शि (न्), केशवान् -वती -वत् (त्).

HAIRINESS, *s.* लोमशत्वं, रोमशत्वं, बहुलोमत्वं, लोमप्राचुर्य्यं.

HAIRLESS, *a.* अकेशः -शा -शं, विकेशः -शा -शं, केशहीनः -ना -नं, निर्लोमा -मा -म (न्), लोमरहितः -ता -तं, अविद्यमानलोमा &c.

HAIRY, *a.* लोमशः -शा -शं, रोमशः -शा -शं, बहुलोमा -मा -म (न्), प्रचुरलोमा &c., बहुकेशः -शा -शं, केशी -शिनी -शि (न्), केशकः -का -कं, केशिकः -की -कं, केशवः -वा -वं, बहुकेशवान् -वती -वत् (त्), लोमवान् &c., लोममयः -यी -यं, लोमपूर्णः -र्णा -र्णं.

HAKE, *s.* समुद्रीयमत्स्यभेदः.

HALBERD, *s.* युद्धे प्रयुक्तः काष्ठदण्डो लोहाग्रः शूलविशेषः, प्रासः, शक्तिः *f.*

HALBERDIER, *s.* पूर्व्वोक्तशूलधरः, शक्तिग्रहः, शाक्तीकः, प्रासिकः.

HALCYON, *s.* (Kingfisher) मत्स्यरङ्गः -ङ्गकः, सुचित्रकः, कुट्टकः.

HALCYON, *a.* प्रसन्नः -न्ना -न्नं, शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, निरङ्गः -ङ्गा -ङ्गं, निराकुलः -ला -लं, निर्वृतः -ता -तं, निर्वातः -ता -तं, सुखी -खिनी -खि (न्).

HALE, *a.* निरामयः -या -यं, नीरोगः -गा -गं, नीरुजः -जा -जं, नीरुक् *m. f. n.* (ज्), कल्यः -ल्या -ल्यं, आधिव्याधिरहितः -ता -तं, अक्षतः -ता -तं.

To HALE, *v. a.* कृष् (c. 1. कर्षति, क्रष्टुं), आकृष्, अपकृष्, अपहृ (c. 1. -हरति -हर्तुं).

HALF, *s.* अर्द्धं -र्द्धः, अर्द्धभागः, अर्द्धांशः; 'half an hour,' अर्द्धदण्डः; 'half a league,' अर्द्धक्रोशः; 'half a hundred,' अर्द्धशतं; 'half the body,' अर्द्धाङ्गं, 'a year and a half,' सार्द्धवत्सरः; 'a hundred and a half,' सार्द्धशतं; 'the best half,' उत्तमार्द्धं -र्द्धः; 'the last half,' अपरार्द्धं, पश्चार्द्धं, 'sharing a half,' अर्द्धभागी -गिनी -गि (न्), अर्द्धांशी -शिनी -शि (न्), अर्द्धी -र्द्धिनी -र्द्धि (न्); 'lasting half a month,' आर्द्धमासिकः -की -कं.

HALF, *a.* अर्द्धः -र्द्धा -र्द्धं, आर्द्धिकः -की -कं, अर्द्धिकः -का -कं; 'half assent,' अर्द्धाङ्गीकारः; 'half moon,' अर्द्धचन्द्रः.

HALF, *adv.* अर्द्धं, अर्द्धेन, सामि; 'half-man, half-woman,' अर्द्धेन पुरुषोऽर्द्धेन स्त्री; 'half-eaten,' अर्द्धभुक्तः -क्ता -क्तं, जग्धार्द्धः -र्द्धा -र्द्धं, सामिभुक्तः -क्ता -क्तं; 'half-drank,' अर्द्धपीतः -ता -तं, सामिपीतः -ता -तं; 'half-read,' अर्द्धवाचितः -ता -तं; 'half-spoken,' अर्द्धोक्तः -क्ता -क्तं; 'half-closed,' अर्द्धसंवृतः -ता -तं, मुकुलितः -ता -तं, निमीलितः -ता -तं.

HALF-BLOOD, *s.* or *a.* भिन्नोदरः -रा -रं, भिन्ननाभिः -भिः -भि, भिन्नगर्भः -र्भा -र्भं, असमानोदरः -रा -रं, भिन्नोदर्य्यः, अन्योदर्य्यः, भिन्नशरीरान्वयः.

HALF-BROTHER, *s.* वैमात्रः -त्रेयः, भ्राता द्वैमातुरः, अन्योदर्य्यः, सापत्नः.

HALF-DEAD, *a.* मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, मरणोन्मुखः -खी -खं, अर्द्धमृतः -ता -तं, कण्ठगतप्राणः -णा -णं.

HALF-HEARD, *a.* अर्द्धश्रुतः -ता -तं, ईषच्छ्रुतः -ता -तं.

HALF-HOLIDAY, *s.* अर्द्धोत्सवः, अर्द्धमहोत्सवः, अर्द्धानध्यायः.

HALF-LEARNED, *a.* अल्पज्ञानी -निनी -नि (न्), किञ्चिज्ज्ञः -ज्ञा -ज्ञं, चुञ्चकः.

HALF-LOST, *a.* नष्टप्रायः -या -यं, आसन्ननाशः -शा -शं, नाशोन्मुखः -खी -खं.

HALF-MOON, *s.* अर्द्धचन्द्रः, चन्द्रार्द्धं, अर्द्धेन्दुः *m.*; 'shaped like a half-moon,' अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

HALF-PAY, *s.* निवृत्तयुद्धस्य सैन्यस्य प्रकल्पितम् अर्द्धवेतनं.

HALF-PENNY, *s.* ताम्रमुद्रार्द्धं, ताम्रमुद्राविशेषः.

HALF-PIKE, *s.* लघुशूलः -लं, अदीर्घपरिमाणः शूलविशेषः, परिघः.

HALF-SEAS-OVER, *s.* ईषन्मत्तः -त्ता -त्तं, ईषदुन्मत्तः -त्ता -त्तं, ईषत्क्षीवः -वा -वं.

HALF-SISTER, *s.* वैमात्री, वैमात्रेयी, स्वसा द्वैमातुरी, अन्योदर्य्या.

HALF-SPHERE, *s.* अर्द्धमण्डलं, अर्द्धगोलः, मण्डलार्द्धं, भूगोलार्द्धं.

HALF-STARVED, *a.* अनाहारेण म्रियमाणः -णा -णं or मृतप्रायः -या -यं, क्षुधावसन्नः -न्ना -न्नं.

HALF-UTTERED, *a.* अर्द्धोक्तः -क्ता -क्तं, अर्द्धोदितः -ता -तं, अर्द्धकथितः -ता -तं

HALF-WAY, *adv.* अर्द्धमार्गे, अर्द्धपथे, मध्यमार्गे, मध्यपथे.

HALF-WITTED, *a.* अल्पबुद्धिः -द्धिः -द्धि, अल्पधीः -धीः -धि, अल्पमेधाः -धाः -धः (स्).

HALF-YEAR, *s.* अर्द्धवत्सरः, वत्सरार्द्धं, अब्दार्द्धं, षण्मासः, अयनं.

HALF-YEARLY, *a.* षाण्मासिकः -की -कं, आर्द्धवर्षिकः -की -कं.

HALIBUT, *s.* वृहत्कायः समुद्रीयमत्स्यभेदः.

HALIDOM, *s.* शापः, शपथः, दिव्यं, सत्यं, प्रत्ययः.

HALITUOUS, *a.* प्राणसमभावः -वा -वं, वाष्पोपमः -मा -मं, धूमलः -ला -लं

HALL, *s.* (Large room at the entrance of a house) शाला, बहिर्द्वारशाला, द्वारोपान्ते महाशाला, बाह्यकोष्ठः, कक्षा, कक्ष्या, किष्कु; 'a temporary hall,' मण्डपः -पा, जनाश्रयः; 'a judgment-hall,' विचारशाला.

HALLELUJAH, HALLELUJAH, *exclam.* ईश्वरस्य धन्यवादं or स्तुतिवादं कुरुत.

HALLELUJAH, *s.* ईश्वरस्य धन्यवादः or स्तुतिवादः or स्तुतिगानं.

HALLIARD, HALYARD, *s.* नौरज्जुः *m.*, नौगुणः, वातवसनोत्तोलनार्थं रज्जुः

HALLOO, *interj.* भोः, भो, भोभो, हे, है, अये, अयि, अरे, रे, अहो, हंहो, हलहलाशब्दः.

To HALLOO, *v. n.* हलहलाशब्दं कृ, हलहला (nom. हलहलायते), भोः, हे, है इत्यादिशब्दैर् उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं) or दूरात् आह्वे (c. 1. -ह्वयति -ह्वातुं), उच्चैःस्वरेण घुष् (c. 10. घोषयति -यितुं).

To HALLOO, *v. a.* (Set on by shouts) हे, है, हलहला इत्यादिशब्दैः कुक्कुरादीन् प्रचुद् (c. 10. -चोदयति -यितुं).

To HALLOW, *v. a.* (Make holy) पवित्रीकृ, पवित्रं -त्रां -त्रं कृ, पुण्यीकृ, पुण्यं -ण्यां -ण्यं कृ, पूज्यं -ज्यां -ज्यं कृ, शुद्धीकृ.—(Consecrate) संस्कृ, अभिसंस्कृ, अभिषिच् (c. 6. -षिञ्चति -षेक्तुं), प्रोक्ष् (c. 1. -उक्षति -क्षितुं), प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), धर्म्मार्थं विनियुज् (c. 7. -युनक्ति -योक्तुं) or निर्दिश् (c. 6. -दिशति -देष्टुं).

HALLOWED, *p. p.* (Made holy, reverenced) पवित्रीकृतः -ता -तं, पवित्रितः -ता -तं, पूजितः -ता -तं, पूज्यः -ज्या -ज्यं, अर्च्चितः -ता -तं.—(Consecrated) संस्कृतः -ता -तं, कृतसंस्कारः -रा -रं, प्रतिष्ठितः -ता -तं, सुप्रतिष्ठितः -ता -तं, प्रोक्षितः -ता -तं, प्रणीतः -ता -तं, अभिषिक्तः -क्ता

-क्तं, धर्म्मार्थं विनियोजितः -ता -तं.

Hallucination, s. मोहः, व्यामोहः, माया, भ्रमः, भ्रान्तिः f., मतिविभ्रमः, मिथ्यामतिः f., इन्द्रजालं, वञ्चना.

Halm, s. (Straw) तृणं, पलालः -लं -ली, पलः, धान्यकल्कं.

Halo, s. द्युतिमाला, अंशुमाला, सूर्य्यपरिगतं or चन्द्रपरिगतं द्युतिमण्डलं or दीप्तिमण्डलं or रक्तवर्णमण्डलं, दीप्तिचक्रं, द्युतिवलयः, परिधिः m. परिवेशः.

Halser, s. नौरज्जुः m., नौगुणः, नौबन्धनरज्जुः, नौबन्धनार्थं महागुणः.

Halt, s. (Stopping) अयानं, पथमध्ये स्थितिः f. or अवस्थितिः f., स्थानं, आसनं, विश्रामः, यानविरतिः f., विरामः, अवरतिः f., स्तम्भः, यतिः f. —(Limping) लङ्गः.

Halt, a. (Lame) पङ्गुः -ङ्गुः -ङ्गु, खञ्जः -ञ्जा -ञ्जं, खोरः -रा -रं, गतिविकलः -ला -लं, पादविकलः -ला -लं.

To halt, v. n. (Stop) पथमध्ये स्था (c. 1. तिष्ठति -ते, स्थातुं), संस्था, विष्ठा, अवस्था, or विरम् (c. 1. रमति -रन्तुं) or विश्रम् (c. 4. -श्राम्यति -श्रमितुं), स्तम्भ् (c. 1. स्तम्भते -म्भितुं).—(Limp) लङ्ग् (c. 1. लङ्गति -ङ्गितुं), खञ्जीभू, गतिविकलः -ला -लम् अस्.

Halted, p. p. निरुद्धयानः -ना -नं अवस्थितः -ता -तं, संस्थितः -ता -तं.

Halter, s. (Rope) कण्ठपाशः -शकः, कण्ठरज्जुः m., पाशः, कण्ठलता, पलापः, प्रग्रहः, प्रग्राहः.

To halter, v. a. कण्ठपाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाश (nom. पाशयति -यितुं).

To halve, v. a. अर्द्धीकृ, द्विसमभागीकृ, द्विधा कृ, द्विखण्डीकृ, द्व्यंशीकृ.

Halved, a. अर्द्धकृतः -ता -तं, सामिकृतः -ता -तं, द्विसमभागीकृतः -ता -तं.

Halves, s. pl. (To go halves) अर्द्धभागी -गिनी -गि भू, अर्द्धांशी -शिनी -शि भू.—(To cry halves) अर्द्धभागो ममेति वद् (c. 1. वदति -दितुं).

Ham, s. (Back of the knee) मन्दिरः, जङ्घोरुसन्धेः पश्चिमभागः.—(Thigh) सक्थि n., जङ्घा, जाङ्घनी; 'seated on the hams,' कृतावमविपक्षः -का -कं.—(Dried hog's flesh) वल्लूरं, शूकरस्य शुष्कमांसं.

Hamadryad, s. वनदेवता, तरुदेवता, वृक्षाधिष्ठात्री देवता, वन्यस्त्री.

Hamlet, s. ग्रामः, क्षुद्रग्रामः, पल्लिः f., पल्ली, पद्रः, खेटकः, निवसथः.

Hammer, s. मुद्गरः, घनः, अयोघनः, अयोग्रं, मुषलः, मुसलः.

To hammer, v. a. मुद्गरेण आहन् (c. 2. -हन्ति -न्तुं) or तड् (c. 10. ताडयति -यितुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

To hammer, v. n. (Labour, work hard) महायत्नं कृ, महाकष्टेन मुहुर् मुहुर् उद्योगं कृ, पुनः पुनर् उत्साहं कृ or श्रम् (c. 4. श्राम्यति, श्रमितुं).

Hammer-cloth, s. रथोपस्थवस्त्रं, सूतासनाच्छादनं.

Hammerer, s. मुद्गरेण ताडयिता m. (तृ), मुद्गरादिना कर्म्मकारी m. (न्).

Hammering, s. मुद्गरताडनं, मुद्गरप्रहरणं, मुद्गराघातः.

Hammock, s. दोला -ली, दोलिका, प्रेङ्खा, खट्वा, प्रेङ्खोलनं.

Hamper, s. पेटा -टी, पेटिका, पेटकः, करण्डः, उद्धकः.

To hamper, v. a. रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, विरुध्, विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, विघ्न (nom. विघ्नयति -यितुं), बाध् (c. 1. बाधते -धितुं), क्लेशं दा, शल्यं कृ.

Hampered, p. p. विरुद्धः -द्धा -द्धं, विघ्नितः -ता -तं, बाधितः -ता -तं.

Hamstring, s. मन्दिरशिरा, मन्दिरस्नायुः m., जङ्घोरुसन्धिबन्धनं, जङ्घपश्चिबन्धनस्नायुः m., जङ्घोरुबन्धनं.

To hamstring, v. a. मन्दिरशिरां छिद् (c. 7. छिनत्ति, छेत्तुं), जङ्घोरुपश्चैबन्धनं छित्त्वा गतिविकलं -लां -लं कृ.

Hamstrung, p. p. छिन्नमन्दिरस्नायुः -युः -यु, छिन्नजङ्घोरुबन्धनः -ना -नं.

Hanaper, s. कोषः, राजकोषः, राजस्वकोषः, धनकोषः.

Hand, s. (Palm with the fingers) हस्तः, करः, पाणिः m., पञ्चशाखः, भुजादलः, शयः, शमः, कुलिः m., हरणः; 'the right hand,' अग्रहस्तः, अग्रकरः, अग्रपाणिः m.; 'the left hand,' वामहस्तः; 'the palm of the hand,' हस्ततलं, करतलं; 'the open hand,' प्रहस्तः, प्रपाणिः m., चपेटः; 'back of the hand,' करपृष्ठं, अवहस्तः; 'hollow of the hand,' करपुटं, करकोषः, करपात्रं; 'both hands,' हस्तौ m. du., हस्तद्वयं, करद्वयं; 'a beautiful hand,' करकमलं, करपद्मं, करपल्लवः, करपङ्कजं; 'the hand below the wrist,' कल्मषं, हस्तपुच्छं; 'the clenched hand,' मुष्टिः m. f., हस्तमुष्टिः; 'part of the hand sacred to the gods,' देवतीर्थं, दैवं; 'to the manes,' पितृतर्पणं, पितृतीर्थं, पित्र्यं; 'the hands and feet,' पाणिपादं; 'bound hand and foot,' संयमितकरचरणः -णा -णं; 'hand to hand,' हस्ताहस्ति, मुष्टीमुष्टि, बाहूबाहवि; 'hand in hand,' सहितं, सह, समं, योगतस्, सम्भूय, एकीभूय; 'with joined hands,' अभिगृहीतपाणिः -णिः -णि; 'with hands across,' व्यत्यस्तपाणिः -णिः -णि; 'with one's own hand,' स्वहस्तेन; 'at hand,' उपस्थितः -ता -तं, आसन्नः -न्ना -न्नं, सन्निहितः -ता -तं; 'in hand, in one's possession,' हस्तस्थः -स्था -स्थं, हस्तस्थितः -ता -तं, हस्तवर्त्ती -र्त्तिनी -र्त्ति (न्), हस्तगतः -ता -तं; 'held in the hand,' करधृतः -ता -तं, करतलधृतः -ता -तं, करनिहितः -ता -तं, करप्राप्तः -प्ता -प्तं; 'in hand, ready to hand,' प्रस्तुतः -ता -तं, प्रत्युत्पन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं; 'matter in hand,' प्रस्तुतं; 'sword in hand,' खड्गपाणिः m.; 'staff in hand,' लगुडहस्तः; 'off hand,' अचिरेण, अविलम्बितं, आकस्मिकः -की -कं, प्रत्युत्पन्नः -न्ना -न्नं, अचिन्तापूर्व्वः -र्व्वा -र्व्वं; 'out of hand,' तत्काले, तत्क्षणात्, सपदि, सद्यस्; 'living from hand to mouth,' उत्पन्नभक्षी -क्षिणी -क्षि (न्); 'to take in hand,' आरभ् (c. 1. -रभते -रब्धुं), व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो; 'to lend a hand,' उपकृ, साहाय्यं or सहायत्वं कृ; 'to lay hands on,' ... (c. 1. ... धर्त्तुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), हृ (c. 1. हरति, हर्त्तुं); '... ' ... पाणिं ग्रह, अन्योन्यं हस्तं or हस्तौ स्पृश् (c. 6. स्पृशति, स्प्रष्टुं); '... hand in,' सहकारी -रिणी -रि (न्); 'to get the upper hand,' अभिभू, प्रभू; 'to clap the hands,' करतालं कृ; 'to support with the hand,' करालम्बनं कृ; 'under-hand,' तिरस्, रहस्, छलेन.—(A measure) हस्तपरिमाणं, करतलपरिमाणं.—(Side, part) पार्श्वः, पक्षः, भागः; 'on the one hand,' एकतस्, ...; 'on the other hand,' अन्यत्र, पुनर्; 'on all hands,' सर्व्वतस्, सर्व्वत्र.—(Action, performance) करणं, विधानं, प्रवृत्तिः f., चेष्टा, क्रिया.—(Power, possession) शक्तिः f., अधिकारः, आधिकारण्यं; 'fallen into one's hand,' हस्तगतः -ता -तं.—(Agent) कर्त्ता m. (र्तृ), कारः, कारकः, कर्म्मकरः.—(Index of a dial) कीलः, देशिनी, प्रदेशिनी, सूचिः f., सूचिनी.—(Form of writing) स्वाक्षरं, स्वहस्ताक्षरं, लिपिः f.

To hand, v. a. (Give with the hand) हस्तेन गृहीत्वा परहस्ते दा (c. 3. ददाति, दातुं) or प्रदा or ऋ in caus. (अर्पयति -यितुं) or समृ or प्रतिपद् (c. 10. -पादयति -यितुं).—(Guide or lead with the hand) हस्तेन नी (c. 1. नयति, नेतुं) or समानी or गम् in caus. (गमयति -यितुं).—(Support with the hand) परालम्बनार्थं हस्तं दा, करालम्बनं कृ.—(Hand down, transmit) क्रमागतं -तां -तं कृ, क्रमायातं -तां -तं, क्रमेण or पारम्पर्य्येण सञ्चर् (c. 10. -चारयति -यितुं) or सङ्क्रम् (c. 10. -क्रामयति -यितुं) or प्रतिपद्.

Hand-barrow, s. हस्तसञ्चालितं वाहनं or यानं.

Hand-bell, s. हस्तेन वादिता क्षुद्रघण्टा, घण्टिका, हस्तघण्टा.

HAND-BREADTH, *s.* एकहस्तपरिमाणं, एककरपरिमाणं, पाणितलं.

HANDCUFF, *s.* हस्तपाशः, पाणिबन्धनं, हस्तबन्धः, करबन्धनं.

To HANDCUFF, *v.a.* हस्तौ पाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाणिबन्धनं कृ.

HANDCUFFED, *p.p.* बद्धहस्तः -स्ता -स्तं, यन्त्रितकरः -रा -रं, संयमितकरः -रा -रं.

HANDED, *p. p.* (Given into the hand) हस्ते दत्तः -त्ता -त्तं or अर्पितः -ता -तं.—(Led with the hand) हस्तेन नीतः -ता -तं.—(Supported with the hand) दत्तहस्तः -स्ता -स्तं, आलम्बितकरः -रा -रं.—(Handed down) पारम्पर्य्यक्रमागतः -ता -तं, क्रमायातः -ता -तं, पारम्पर्य्येण सञ्चारितः -ता -तं.

HANDFUL, *s.* मुष्टिः *m.f.*, हस्तपूरणं, पाणिपूरणं, गण्डूषः -षा, मुष्टिपरिमितं द्रव्यं; 'a handful of grass,' तृणमुष्टिः.

HAND-GALLOP, *s.* ईषत्पुलायितं, अर्द्धपुलायितं, ईषद्वल्गितं, अर्द्धवल्गितं.

HAND-GUN, *s.* हस्तद्वारेण प्रयुक्ता आग्नेयनाडिः, हस्तनाडिः.

HANDICRAFT, *s.* शिल्पं, शिल्पकर्म्म *n.* (न्), शिल्पिकं, शिल्पविद्या, हस्तकर्म्म *n.*, हस्तव्यापारः, हस्तव्यवसायः.

HANDICRAFTSMAN, *s.* शिल्पी *m.* (न्), शिल्पकारः, कर्म्मकारः, हस्तव्यापारी *m.* (न्), हस्तव्यवसायी *m.* (न्), पाणिघः.

HANDILY, *adv.* सदाक्ष्यं, दाक्ष्येण, दक्षं, करदाक्ष्येण, हस्तकौशल्येन, हस्तलाघवेन, कुशलं, निपुणं, चतुरं, सलाघवं, युक्त्या.

HANDINESS, *s.* दक्षता, दाक्ष्यं, हस्तकौशल्यं, करदक्षता, हस्तलाघवं, हस्तपादादिक्षिप्रता, युक्तिः *f.*, कौशल्यं, कुशलता, सुप्रयोगः -गता, नैपुण्यं, चातुर्य्यं, चतुरता, पटुता, क्षिप्रता.

HANDIWORK, *s.* हस्तकर्म्म *n.* (न्), हस्तव्यापारः, हस्तकृतं कर्म्म.

HANDKERCHIEF, *s.* नक्तकः, वरकं, मुखमार्जनी, गात्रमार्जनी; 'neck-handkerchief,' कण्ठवेष्टनं, गलावेष्टनं, कण्ठवस्त्रं.

To HANDLE, *v. a.* (Feel with the hand) स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), संस्पृश्, परिस्पृश्, हस्तेन परामृश् (c. 6. -मृशति -म्रष्टुं) or परिमृश् or आलभ् (c. 1. -लभते -लब्धुं) or समालभ् or घट्ट् (c. 10. घट्टयति -यितुं) or परिघट्ट्.—(Manage) प्रणी (c. 1. -णयति -णेतुं), विधा (c. 3. -दधाति -धातुं).—(Use) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), उपयुज्.—(Treat) आचर् (c. 1. -चरति -रितुं), व्यवहृ (c. 1. -हरति -हर्त्तुं).—(Discuss) विचर् (c. 10. -चारयति -यितुं), विमृश्.

HANDLE, *s.* मुष्टिः *m.f.*, वारङ्गः, दण्डः, तलः, तालः, नालः, कर्णः.—(Of a sword, &c.) त्सरुः *m.*, सरुः *m.*, तलः, तालः.—(Of a plough) ईषादण्डः; 'become a handle,' नालयितः -ता -तं.

HANDLED, *p.p.* स्पृष्टः -ष्टा -ष्टं, संस्पृष्टः -ष्टा -ष्टं, परामृष्टः -ष्टा -ष्टं, परिमृष्टः -ष्टा -ष्टं, परिघट्टितः -ता -तं, करघट्टितः -ता -तं, करपरिघट्टितः -ता -तं.

HANDLESS, *a.* अहस्तः -स्ता -स्तं, विहस्तः -स्ता -स्तं, अकरः -रा -रं.

HAND-MAID, *s.* दासी, दासिका, चेटी, सेविका, परिचारिका.

HAND-MILL, *s.* यन्त्रपेषणी, हस्तेन सञ्चालिता पेषणी.

HAND-RAIL, *s.* (Of a staircase) सोपाने उभयतः स्थापिता क्षुद्रस्तम्भपंक्तिः.

HAND-SAW, *s.* हस्तसञ्चारितं करपत्रं, हस्तसञ्चालितः क्रकचः.

HANDSEL, *s.* प्रथमविक्रयः, आदिविक्रयः, प्रथमप्रयोगः, प्रथमव्यवहारः, प्रथमकर्म्म *n.* (न्), आदिक्रिया.

To HANDSEL, *v.a.* प्रथमं कृ or प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), प्रथमप्रयोगं कृ.

HANDSOME, *a.* (Beautiful) सुरूपः -पी -पं, रूपवान् -वती -वत् (त्), रूपी -पिणी -पि (न्), रूपान्वितः -ता -तं, सुगात्रः -त्री -त्रं, स्वङ्गः -ङ्गी -ङ्गं, वराङ्गः -ङ्गी -ङ्गं, दर्शनीयः -या -यं, सुदृश्यः -श्या -श्यं, चारुः -र्व्वी -रु, चारुदर्शनः -ना -नं, सौम्यः -म्या -म्यी -म्यं, सुन्दरः -रा -री -रं, शोभनः -ना -नं, कान्तः -न्ता -न्तं, लावण्यवान् -वती -वत् (त्), वामः -मा -मं, वामिलः -ला -लं, पेशलः -ला -लं, सिंहसंहननः -ना -नं; 'having a handsome countenance,' शुभाननः -ना -नं, चारुवदनः -ना -नं सुमुखः -खा -खी -खं, आननाब्जः -ब्जा -ब्जं; 'a handsome woman, रूपवती, प्रमदा. Often expressed by सु; as, 'having handsome teeth,' सुदन् -दती -दत् (त्); 'having handsome eyes, सुनयनः -ना -नं, सुदृक् *m.f.n.* (श्); 'having a handsome waist,' सुमध्यमा.—(Generous, liberal) उदारः -रा -रं, वदान्यः -न्या -न्यं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, अकृपणः -णा -णं.—(Ample, large) विपुलः -ला -लं, विशालः -ला -लं, प्रचुरः -रा -रं, बृहन् -हती -हत् (त्).

HANDSOMELY, *adv.* (With beauty or grace) चारु, सुन्दरं, सौन्दर्य्येण, लावण्येन, सलावण्यं, शोभनं, शोभया.—(Generously) उदारवत्, वदान्यवत्, अकृपणं.

HANDSOMENESS, *s.* सुरूपता, रूपवत्त्वं, रूपं, रूपलावण्यं, दर्शनीयता, सुदृश्यता, चारुता, सौम्यता, सौन्दर्य्यं, कान्तता, शोभा, वामता.

HAND-STROKE, *s.* कराघातः, हस्ताघातः, पाणिघातः, हस्तप्रहारः, हस्तपातः.

HAND-WEAPON, *s.* हस्तायुधं, हस्तशस्त्रं, हस्तास्त्रं, हस्तप्रहरणं.

HAND-WRITING, *s.* स्वहस्ताक्षरं, हस्ताक्षरं, स्वाक्षरं, हस्तलिखनं, हस्तलेखा.—(In general) लेखः -खा, लिखनं, लिपिः *f.*, लिविः *f.*, अक्षरसंस्थानं.

HANDY, *a.* दक्षः -क्षा -क्षं, करदक्षः -क्षा -क्षं, लघुहस्तः -स्ता -स्तं, चतुरः -रा -रं, कुशलः -ला -लं, निपुणः -णा -णं, क्षिप्रः -प्रा -प्रं, युक्तिमान् -मती -मत् (त्), सुप्रयोगवान् -वती -वत् (त्), पटुः -टुः -टु, लघुः -घुः -घु.—(Convenient, ready, near) उपयुक्तः -क्ता -क्तं, प्रस्तुतः -ता -तं, प्रत्युत्पन्नः -न्ना -न्नं, आसन्नः -न्ना -न्नं, निकटः -टा -टं, समीपस्थः -स्था -स्थं.

HANDY-BLOW, *s.* कराघातः, हस्ताघातः, पाणिघातः; 'handy-blows,' मुष्टीमुष्टि.

To HANG, *v. a.* उद्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), उद्बन्धनं कृ, उद्बद्धं -द्धां -द्धं कृ, ऊर्द्ध्वं or उच्चैः or विहायसा बन्ध्, आन्दोल (nom. आन्दोलयति -यितुं); 'by a loop,' काच (nom. काचयति -यितुं).—(Put to death by hanging) रज्जुपाशेन उद्बन्ध्, उद्बन्धनेन हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं) or प्राणदण्डं कृ.—(With curtains, &c.) यवनिकादिना परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or प्रच्छद् (c. 10. -छादयति -यितुं).

To HANG, *v. n.* (Be suspended) उद्बन्ध् in pass. (-बध्यते), ऊर्द्ध्वं or उच्चैर् बन्ध्.—(Dangle) लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, प्रलम्ब्, लुल् (c. 1. लोलति -ते -लितुं), लुठ् (c. 6. लुठति -ठितुं), चञ्च् (c. 1. चञ्चति -ञ्चितुं).—(Swing) दोल (nom. दोलायते -यितुं), प्रेङ्ख् (c. 1. प्रेङ्खति -ङ्खितुं).—(Depend) अवलम्ब्, समालम्ब्, आश्रि (c. 1. -श्रयति -ते -यितुं), अधीनः -ना -नं भू.—(Cling to) अवलम्ब्, समालम्ब्, संलग्नीभू, अनुलग्नीभू, लग्नीभू, अनुबन्ध् in pass., सञ्ज् in pass. (सज्यते, सज्जते).—(Hang back) विलम्ब्.—(Hang by) अवलम्ब्; 'hanging by the mouth,' मुखेन अवलम्ब्य.—(Hang down) अवलम्ब्, प्रलम्ब्, अधो लम्ब्.—(Hang over, impend) उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रत्युपस्था.—(Hang over, project) बहिर्लम्ब्.—(Hang one's self) आत्मदेहम् उद्बन्ध्, रज्जुपाशेन आत्मघातं कृ.—(Hang the head) शिरो नम् (c. 10. नामयति, नमयति -यितुं) or अवनम्.

HANGER, *s.* (One who hangs) उद्बन्धा *m.* (न्धृ), उद्बन्धनकृत्.—(Sort of sword) हस्तपत्रः, खड्गविशेषः, हस्तकृपाणः.

HANGER-ON, *s.* उपजीवी *m.* (न्), अनुजीवी *m.*, परान्नभोजी *m.* (न्), परपिण्डादः, पराधीनः, पार्श्वसमितः, पीठमर्द्दः.

HANGING, *s.* उद्बन्धनं, ऊर्द्ध्वबन्धनं.—(Tapestry, drapery) जवनिका, चित्रजवनिका, यवनिका, प्रच्छदपटः, अपटी, परिच्छदः, वसनं, अम्बरं.

HANGING, *part.* (Dangling, being suspended) लम्बमानः -ना -नं,

लम्बः -म्बा -म्बं, प्रलम्बः -म्बा -म्बं, लम्बितः -ता -तं, अवलम्बितः -ता -तं, अवलम्बः -म्बा -म्बं, अवलम्बी -म्बिनी -म्बि (न्), विलम्बमानः -ना -नं; 'hanging the head,' नतमूर्द्धा -र्द्धा -र्द्ध (न्), अवनतशिराः -राः -रः (स्).

Hangman, *s.* दण्डपाशिकः, मृतपाः *m.*, घातुकपुरुषः, उद्बन्धनकर्म्माधिकृतः.

Hang-nail, *s.* नखाङ्कुरः, नखमूलाङ्कुरः, नखकीलः.

Hank, *s.* (A bundle of skeins) पञ्जिकासमूहः.—(Wooden ring) काष्ठवलयः.—(Check) संयमः, नियहः, यन्त्रणं, निरोधः.

To hanker after, *a.* अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, स्पृह् (c. 10. स्पृहयति -यितुं), कांक्ष् (c. 1. कांक्षति -क्षितुं), आकांक्ष्, अनुकांक्ष्, उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं), लुभ् (c. 4. लुभ्यति, लोब्धुं), कम् (c. 10. कामयते -यितुं), लभ् in des. (लिप्सते -प्सितुं), गृध् (c. 4. गृध्यति, गर्धितुं).

Hankering, *s.* स्पृहा, अभिलाषः, वाञ्छा, उत्कण्ठा, आकांक्षा.

Hap, hap-hazard, *s.* दैवं, दैवयोगः, दैवगतिः *f.*, दैवघटना, अदृष्टं, सङ्गतिः *f.*, दैवसङ्गतं, नियतिः *f.*

Hapless, *a.* दुर्भाग्यः -ग्या -ग्यं, अभाग्यः -ग्या -ग्यं मन्दभाग्यः -ग्या -ग्यं, दैवहीनः -ना -नं, निर्दैवः -वा -वं, अधन्यः -न्या -न्यं, हतभाग्यः -ग्या -ग्यं.

Haply, *adv.* दैवात्, दैववशात्, दैवयोगेन, अदृष्टवशात्, अकस्मात्, अनिश्चितं, अचिन्तितं, अपिनाम, किल.

To happen, *v. n.* घट् (c. 1. घटते -टितुं), निपत् (c. 1. -पतति -तितुं), आपत्, सम्पद् (c. 4. -पद्यते -पत्तुं), उपपद्, समापद्, उत्पद्, उपस्था (c. 1. -तिष्ठति -स्थातुं), समुपस्था, सम्भू (c. 1. -भवति -वितुं), संवृत् (c. 1. -वर्त्तते -र्त्तितुं), वृत्, आगम् (c. 1. -गच्छति -गन्तुं), उपागम्, दैवात् or अकस्मात् भू.

Happened, *p. p.* घटितः -ता -तं, उपस्थितः -ता -तं, समुपस्थितः -ता -तं, समापन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, उत्पन्नः -न्ना -न्नं, निपतितः -ता -तं, आपतितः -ता -तं, वृत्तः -त्ता -त्तं, संवृत्तः -त्ता -त्तं, आगतः -ता -तं, उपागतः -ता -तं, सम्भूतः -ता -तं

Happily, *adv.* (Fortunately) सौभाग्येन -ग्यात्, कल्याणात्, दिष्ट्या, सम्यक्.—(In a state of happiness) सुखं, सुखेन, यथासुखं, सौख्येन स्वास्थ्येन.

Happiness, *s.* सुखं, सौख्यं, सुखित्वं, आनन्दः, आह्लादः, धन्यता, हर्षः, कल्याणं, शर्म्म *n.* (न्), श्रेयस्, निःश्रेयसं, क्षेमः -मं, स्वास्थ्यं, कुशलं, शुभं, मङ्गलं, माङ्गल्यं, कौशल्यं, भद्रं, सौभाग्यं, सम्पत्तिः *f.*, सम्पद् *f.*, निर्वृतिः *f.*, निर्वृतिः *f.*, श्रीः *f.*, पुण्योदयः, शस्तं, मतल्लिका, मचर्चिका, प्रकाण्डं, उद्घः, तल्लजः.

Happy, *a.* सुखी -खिनी -खि (न्), सुखयुक्तः -क्ता -क्तं, सुखभागी -गिनी -गि (न्), आनन्दी -न्दिनी -न्दि (न्), हृष्टः -ष्टा -ष्टं, प्रीतः -ता -तं, तुष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, प्रमोदी -दिनी -दि (न्), प्रमुदितः -ता -तं, विशोकः -का -कं, शोकहीनः -ना -नं, सुस्थः -स्था -स्थं, निर्वृतः -ता -तं, अकातरः -रा -रं, तृप्तः -प्ता -प्तं, मत्तः -त्ता -त्तं.—(Fortunate, prosperous) धन्यः -न्या -न्यं, सौभाग्यवान् -वती -वत् (त्), भाग्यवान् &c., पुण्यवान् &c., पुण्यः -ण्या -ण्यं, शर्म्मवान् &c., क्षेमवान् &c., क्षेमः -मा -मं, क्षेम्यः -म्या -म्यं, कुशली -लिनी -लि (न्), कुशलः -ला -लं, कल्याणः -णा -णं -णी -णिनी -णि (न्), शुभः -भा -भं, शुभान्वितः -ता -तं, शुभंयुः -युः -यु, भद्रः -द्रा -द्रं, श्रीमान् -मती -मत् (त्), श्रीयुक्तः -क्ता -क्तं, लक्ष्मीवान् &c., मङ्गलः -ला -लं, शिवः -वा -वं, भावुकः -का -कं, भविकः -का -कं, भव्यः -व्या -व्यं, श्वःश्रेयसः -सा -सं, शस्तः -स्ता -स्तं, लक्षण्यः -ण्या -ण्यं, श्रीलः -ला -लं, समृद्धः -द्धा -द्धं, अधिकर्द्धिः -र्द्धिः -र्द्धि, वर्द्धिष्णुः -ष्णुः -ष्णु, निरापद् *m. f. n.*; 'a happy moment,' शुभलग्नः; 'a happy result,' शुभफलं, स्वन्तं; 'having a happy result,'

स्वन्तः -न्ता -न्तं; 'to be happy,' सुख (nom. सुखायते).

Harangue, *s.* वाक्यं, अलङ्कारमयं वाक्यं, रसिकवाक्यं.

To harangue, *v. n.* बहुजनसमाजे अलङ्कारमयं वाक्यं वद् (c. 1. वदति -दितुं), अभिवद्, अभिभाष् (c. 1. -भाषते -षितुं).

Haranguer, *s.* बहुजनसमाजे अलङ्कारमयवाक्यवक्ता *m.* (क्तृ), वागीशः, वागीश्वरः, प्रवचनपटुः, वाक्यद्वारेण विस्मयोत्पादकः or इन्द्रियमोहकः.

To harass, *v. a.* (Fatigue) खिद् (c. 10. खेदयति -यितुं), आयस् (c. 10. -यासयति -यितुं), सद् (c. 10. सादयति -यितुं), अवसद्, क्लम् (c. 10. क्लमयति -यितुं), परिक्लम्, श्रम् (c. 10. श्रमयति -यितुं), परिश्रम्, ग्लै in caus. (ग्लपयति -यितुं).—(Vex) बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), संक्लिश्, पीड् (c. 10. पीडयति -यितुं), परिपीड्, उपपीड्, प्रपीड्, अभिपीड्, अभिनिपीड्, निपीड्, सम्पीड्, आपीड्, व्यथ् (c. 10. व्यथयति -यितुं), अर्द्द् (c. 10. अर्दयति -यितुं), समर्द्द्, दु (c. 5. दुनोति, दोतुं), प्रदु, तप् (c. 10. तापयति -यितुं), परितप्, सन्तप्, कृप् (c. 10. कर्पयति -यितुं), अभिकृप्, उपरुध् (c. 7. -रुणद्धि, रोद्धुं), मथ् (c. 1. मथति, c. 9. मथ्नाति, मन्थितुं), प्रमथ्, क्षि (c. 5. क्षिणोति, क्षेतुं), रध् (c. 10. रन्धयति -यितुं), उपहन् (c. 2. -हन्ति -न्तुं).

Harassed, *p. p.* खेदितः -ता -तं, खिन्नः -न्ना -न्नं, श्रान्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, क्लान्तः -न्ता -न्तं, बाधितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लिशितः -ता -तं, क्लेशितः -ता -तं, परिक्लिष्टः -ष्टा -ष्टं, पीडितः -ता -तं, अर्द्दितः -ता -तं, अभ्यर्द्दितः -ता -तं, समर्द्दितः -ता -तं, अवसादितः -ता -तं, दूनः -ना -नं, उपहतः -ता -तं, व्यथितः -ता -तं, विडम्बितः -ता -तं, दुर्मनायमानः -ना -नं; 'to be harassed,' खिद् (c. 4. खिद्यते).

Harasser, *s.* खेदकरः, श्रमकरः, बाधकः, क्लेशकः, पीडकः, पीडाकरः.

Harassing, *a.* खेदजनकः -का -कं, क्लेशकरः -री -रं, दुःखकरः -री -रं.

Harbinger, *s.* अग्रेसरः, अग्रसरः, अग्रगः, अग्रगामी *m.* (न्), पुरोगः -गामी *m.* (न्), प्राग्गामी *m.*, अग्रवर्त्ती *m.* (न्), अग्रगतः, दूतः [illegible] 'harbinger of spring,' वसन्तदूतः.

Harbor, *s.* (For ships) नौबन्धनयोग्यं खातं, नौबन्धनखातं, नौकागमस्थानं, नौकाश्रयः.—(Shelter, place of rest) आश्रयः, समाश्रयः, संश्रयः, प्रतिश्रयः, आशयः, अवस्थानं, अवकाशः, वासस्थानं, निवासस्थानं, आश्रमस्थानं.

To harbor, *v. a.* आश्रयं कृ, [illegible], अवकाशं दा, वासस्थानं दा, वस् in caus. (वासयति -यितुं), निवस्, सत्कृ.—(Entertain in the mind) ध्याने or मनसि धृ (c. 1. धरति, धर्त्तुं) or उपलभ् (c. 1. -लभते -लब्धुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

To harbor, *v. n.* आश्रि (c. 1. -श्रयति -यितुं), समाश्रि, वस् (c. 1. वसति, वस्तुं), निवस्.

Harborage, *s.* आश्रयः, समाश्रयः, संश्रयः, अवस्थानं, अवकाशः.

Harborer, *s.* आश्रयकर्त्ता *m.* (र्त्तृ), आश्रयः, आशयिता *m.* (तृ), अवस्थापकः, ग्रहीता *m.* (तृ).

Harborless, *a.* निराश्रयः -या -यं, आश्रयहीनः -ना -नं, निर्वासः -सा -सं.

Hard, *a.* (Firm, solid, compact) दृढः -ढा -ढं, घनः -ना -नं, कठिनः -ना -नं, कर्कशः -शा -शं, कठोरः -रा -रं, संहतः -ता -तं, अशिथिलः -ला -लं, असमृणः -णा -णं, वज्रः -ज्रा -ज्रं, ग्रावा -वा -व (न्), वज्रमयः -यी -यं, दृढग्रन्थिः -न्थिः -न्थि, कर्कुरः -रा -रं, जरठः -ठा -ठं, गाढः -ढा -ढं, प्रगाढः -ढा -ढं, कीकसः -सा -सं, कक्खटः -टा -टं, कटोलः -ला -लं, क्रूरः -रा -रं, निष्ठुरः -रा -रं, दुर्वेतरः -रा -रं.—(Hard to be understood) दुर्ज्ञेयः -या -यं.—(Difficult, not easy to be done) कठिनः -ना -नं, दुष्करः -रा -री -रं, दुःसाध्यः -ध्या -ध्यं, दुष्करः -रा -रं, असुकरः -री -रं, अमुगमः -मा -मं, विषमः -मा -मं, कष्टः -ष्टा -ष्टं,

दुर्निग्रहः -हा -हं, सायासकृतः -ता -तं, दुःखसाध्यः -ध्या -ध्यं, दुःखेन कार्य्यः -र्य्या -र्य्यं or साध्यः -ध्या -ध्यं. *Often expressed by* दुर् *or* दुःख *in comp.*; as, 'hard to be borne,' दुःसहः -हा -हं; 'hard to obtain,' दुर्लभः -भा -भं, दुःखलभ्यः -भ्या -भ्यं, दुष्प्रापः -पा -पं, दुःखेन प्राप्यः -प्या -प्यं; 'hard to be crossed,' दुस्तरः -रा -रं, दुस्तार्य्यः -र्य्या -र्य्यं; 'hard to be broken,' दुर्भेद्यः -द्या -द्यं, दुःखभेद्यः -द्या -द्यं; 'hard to be relinquished,' दुस्त्यजः -जा -जं.—(Fatiguing, painful, laborious) कष्टकरः -री -रं, दुःखी -खिनी -खि (न्), दुःखकरः -रा -रं, क्लेशी -शिनी -शि (न्), क्लेशकः -का -कं.—(Severe, harsh) कठोरः -रा -रं, निष्ठुरः -रा -रं, उग्रः -ग्रा -ग्रं, उग्रदण्डः -ण्डा -ण्डं, तीक्ष्णः -क्ष्णा -क्ष्णं, क्रूरः -रा -रं, कर्कशः -शा -शं, रूक्षः -क्षा -क्षं.—(Unfavorable) अननुकूलः -ला -लं; 'hard fate,' दुर्दैवं.—(Sour, acid) अम्लरसः -सा -सं, शुक्तः -क्ता -क्तं.

Hard, *adv.* (Near, hard by) समीपं, निकटे, उपान्ते, आरात्, आसन्नः -न्ना -न्नं, सन्निकृष्टः -ष्टा -ष्टं.—(With difficulty) दुःखेन, कष्टेन, कृच्छ्रेण, आयासेन, कठिनं, विषमं, दुर् *prefixed.* (Violently, with force) बलेन, बलात्, बलवत्, तीव्रं, तीक्ष्णं, प्रसभं.—(Hard) शीघ्रं, सत्वरं, त्वरितं.

Hard-bound, *a.* दृढबद्धः -द्धा -द्धं, दृढसन्धिः -न्धिः -न्धि, बद्धकोष्ठः -ष्ठा -ष्ठं.

Hard-drinker, *s.* मद्यपानप्रसक्तः, पानरतः, अतिपायी *m.* (न्).

Hard-earned, *a.* श्रमेणोपार्जितः -ता -तं, कृच्छ्रोपार्जितः -ता -तं, कृच्छ्रलब्धः -ब्धा -ब्धं.

To harden, *v. a.* कठिनीकृ, घनीकृ, कठोरीकृ, दृढीकृ, कर्कशीकृ, स्तम्भीकृ, कठिनं -नां -नं कृ.

To harden, *v. n.* कठिनीभू, घनीभू, कठोरीभू, दृढीभू, कर्कशीभू.

Hardened, *p. p.* कठिनीकृतः -ता -तं, घनीकृतः -ता -तं, दृढीभूतः -ता -तं.

Hard-featured, *a.* कठिनवदनः -ना -नं, कठिनमुखः -खी -खं, दुर्मुखः -खी -खं.

Hard-fisted, *a.* कठिनमुष्टिः -ष्टिः -ष्टि, दृढमुष्टिः -ष्टिः -ष्टि.

Hard-hearted, *a.* कठिनहृदयः -या -यं, कठिनान्तःकरणः -णा -णं, पाषाणहृदयः -या -यं, अयोहृदयः -या -यं, निर्दयः -या -यं, निरनुक्रोशः -शा -शं, दुर्हृदयः -या -यं, अक्लिन्नहृदयः -या -यं, वज्रमयः -यी -यं.

Hard-heartedness, *s.* कठिनहृदयता, हृदयकाठिन्यं, निरनुक्रोशता.

Hardihood, *s.* वीर्य्यं, वीरता, धीरत्वं, धृतिः *f.*, धैर्य्यं, शौर्य्यं, शूरता, साहसं, निर्भयत्वं, प्रगल्भता, प्रागल्भ्यं, स्थैर्य्यं, स्थिरता.

IMMODESTY, *s.* निर्लज्जत्वं, लज्जाहीनता, अलज्जा, अविनयः, अविनीतत्वं, वैयात्यं, प्रगल्भता, प्रागल्भ्यं, धृष्टता, अशुद्धता, अशुचिता, गर्ह्यता; 'in a woman,' पौंश्चल्यं, असतीत्वं, असाध्वीत्वं.

To IMMOLATE, *v. a.* क्रतौ हन् (c. 2. हन्ति -न्तुं), उपहारार्थं हन्, उत्सर्गार्थं हन् or शस् (c. 1. शसति -सितुं) or विशस् or प्रमी in caus. (मापयति -यितुं), or उपहृ or उपहारीकृ or प्रोक्ष् (c. 1. -उक्षति -क्षितुं), उत्सर्गपूर्व्वं हन्, घातयित्वा उत्सर्गं कृ, हत्वा उत्सृज् (c. 6. -सृजति -स्रष्टुं), बलिं कृ, बलिदानं कृ.

IMMOLATED, *p. p.* उपहारार्थं हतः -ता -तं or प्रमीतः -ता -तं or शसितः -ता -तं, उपहृतः -ता -तं, उपहारीकृतः -ता -तं, प्रोक्षितः -ता -तं.

IMMOLATION, *s.* उपहारार्थं घातः or घातनं or निहननं, उत्सर्गार्थं मारणं or प्रमापणं or विशसनं or शसनं, शमनं, ससनं, प्रोक्षणं, परम्पराकं, उपहारः, उपहरणं, उत्सर्गकरणं, बलिदानं.

IMMORAL, *a.* निर्धर्म्मः -र्म्मा -र्म्मं -र्म्मा -र्म्मा -र्म्म (न्), अधार्म्मिकः -की -कं, धर्म्मविरुद्धः -द्धा -द्धं, धर्म्मापेतः -ता -तं, धर्म्मविरोधी -धिनी -धि (न्), अधर्म्मी -र्म्मिणी -र्म्मि (न्), कुधर्म्मा -र्म्मा -र्म्म (न्), अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, अशुचिः -चिः -चि, कुशीलः -ला -लं, विशीलः -ला -लं, दुःशीलः -ला -लं, दुश्चरित्रः -त्रा -त्रं, असच्चरित्रः -त्रा -त्रं, असत्कर्म्मा -र्म्मा -र्म्म (न्), दुष्टः -ष्टा -ष्टं, कर्म्मदुष्टः -ष्टा -ष्टं, दुर्वृत्तः -त्ता -त्तं, व्यभिचारी -रिणी -रि (न्), पापी -पिनी -पि (न्), पापकर्म्मा &c., व्यसनी -निनी -नि (न्), कुचरितः -ता -तं, अधर्म्मचारी -रिणी -रि (न्).

IMMORALITY, *s.* अधर्म्मः, अधर्म्मत्वं -ता, निर्धर्म्मत्वं, अधार्म्मिकत्वं, असाधुत्वं, अपुण्यता, अशुचिता, दुष्टता, दुर्वृत्तत्वं, व्यसनिता, व्यसनं, कुशीलता, दुश्चरित्रता, अधर्म्मचारित्वं, दुःशीलता, दौःशील्यं, व्यभिचारः.

IMMORTAL, *a.* (Exempt from death) अमरः -री -रं, अमर्त्यः -र्त्या -र्त्यं, सदाजीवी -विनी -वि (न्), सदास्थायी -यिनी -यि (न्), मरणरहितः -ता -तं.—(Imperishable) निर्जरः -रा -रं, अजरः -रा -रं, अक्षयः -या -यं, अनश्वरः -रा -रं, अनाश्यः -श्या -श्यं, अविनाशी -शिनी -शि (न्), निरत्ययः -या -यं.—(Eternal) अनन्तः -न्ता -न्तं, नित्यः -त्या -त्यं, सनातनः -नी -नं, सदातनः -नी -नं, शाश्वतः -ती -तं, अनाद्यन्तः -न्ता -न्तं, सर्व्वकालीनः -ना -नं, अनन्तकालस्थायी -यिनी -यि (न्).

IMMORTALITY, *s.* अमरता -त्वं, अमर्त्यता, निर्जरता -त्वं, अजरता -त्वं, अक्षयता, अनश्वरता, अनाश्यता, अनन्तता, आनन्त्यं, अनन्त्यं, सदास्थायित्वं, नित्यता.

To IMMORTALIZE, *v. a.* अमरीकृ, निर्जरीकृ, अनश्वरीकृ, अक्षयीकृ, शाश्वतीकृ, नित्यीकृ, आनन्त्यं कृ or जन् (c. 10. जनयति -यितुं).

IMMORTALLY, *adv.* अमरं, अमरत्वेन, अमरवत्, अमर्त्यवत्, निर्जरं, अजरं, अक्षयं, अनश्वरं, अनन्तकाले -लं, अनन्तं, आनन्त्येन, सनातनं, शाश्वतं, निरत्ययं, अविनाशेन.

IMMOVABILITY, *s.* अचलता -त्वं, निश्चलत्वं, स्थावरत्वं, स्थिरता, अचरिष्णुता, स्तब्धता.

IMMOVABLE, *a.* अचलः -ला -लं, निश्चलः -ला -लं, स्थावरः -रा -रं, अचरः -रा -रं, अचरिष्णुः -ष्णुः -ष्णु, अनाक्रमः -मा -मं, अस्पन्दः -न्दा -न्दं, अच्युतः -ता -तं, स्थिरः -रा -रं, स्थायी -यिनी -यि (न्), स्तब्धः -ब्धा -ब्धं, स्थाणुः -णुः -णु, स्थाणुः -णुः -णु, अकम्पनः -ना -नं, स्तिमितः -ता -तं, अनेतन -नी -न (न्); 'immovables,' स्थावराणि.

IMMOVABLY, *adv.* अचलं, निश्चलं, स्थावरं, स्थिरं, स्तब्धं, स्थाणुवत्.

IMMUND, *a.* अशुचिः -चिः -चि, अपवित्रः -त्रा -त्रं, अशौची -चिनी -चि (न्).

IMMUNDICITY, *s.* अशुचिता -त्वं, अशौचं, आशौचं, अपवित्रता -त्वं, अशोधनं.

IMMUNITY, *s.* मुक्तिः *f.*, मोक्षः, विमोक्षः, विनिर्मोकः, निर्मोकः, विरहः, राहित्यं, रहितत्वं, शून्यता, अभावः, असम्भवः, or expressed by अ prefixed; as, 'immunity from danger,' अभयं; 'from exertion,' अनायासः; 'from taxes,' अकरत्वं.

To IMMURE, *v. a.* निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, रुध्; 'in a prison,' कारायां निरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं), कारागुप्तं -प्तां -प्तं कृ.—(Inclose) परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), संवेष्ट्, उपवेष्ट्.—(Surround with a wall) प्राकारेण परिवृ, प्राकारीयं -यां -यं कृ.

IMMURED, *p. p.* निरुद्धः -द्धा -द्धं, अवरुद्धः -द्धा -द्धं, अन्तर्गतः -ता -तं.

IMMUTABILITY, *s.* अविकार्य्यता -त्वं, अविकारत्वं, निर्विकारत्वं, अविकारः, स्थिरता, अमोघता, अपरिवर्त्तनं, नित्यता.

IMMUTABLE, *a.* अविकार्य्यः -र्य्या -र्य्यं, अविकारः -रा -रं, अविक्रियः -या -यं, निर्विकारः -रा -रं, विकाराक्षमः -मा -मं, विकारहीनः -ना -नं, स्थिरः -रा -रं, अमोघः -घा -घं, निर्विकल्पः -ल्पा -ल्पं, नित्यः -त्या -त्यं, अपरिवर्त्तनीयः -या -यं.

IMMUTABLY, *adv.* अविकार्य्यं, अविकारेण, अविकार्य्यत्वेन, स्थिरं, नित्यं, निर्विकारं, निर्विकल्पं, अमोघं.

IMMUTATION, *s.* विकारः, विक्रिया, विकृतिः *f.*, वैकृत्यं, विपर्य्ययः, परिवर्त्तः.

IMP, *s.* पिशाचः, भूतः, राक्षसः, असुरः, दैत्यः, दानवः, ग्रहः, यातुः *m.*, यातुधानः, विपुरः, क्रव्यादः, निकृत्यः, निशाचरः, कर्ब्बुरः, कर्ब्बुरः.

To IMP, *v. a.* (Graft) एकवृक्षशाखायां भिन्नवृक्षपल्लवं निविश् (c. 10. -वेशयति -यितुं).—(Lengthen) दीर्घतरं -रां -रं कृ, दीर्घीकृ.

IMPACABLE, *a.* अशाम्यः -म्या -म्यं, असान्त्वनीयः -या -यं, अतोषणीयः -या -यं.

IMPACT, *s.* स्पर्शः, संस्पर्शः, सम्पर्कः, उपघातः, आघातः, प्रतिघातः.

To IMPAIR, *v. a.* न्यूनीकृ, ह्रस् (c. 10. ह्रासयति -यितुं), अल्पीकृ, विकलीकृ, कन (nom. कनयति -यितुं), ऊन् (c. 10. ऊनयति -यितुं), न्यून्, क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, क्षीणीकृ, क्षतिं कृ, परिक्षतिं कृ, दुष् (c. 10. दूषयति -यितुं), उपहन् (c. 2. -हन्ति -न्तुं), लघ (nom. लघयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं), लघूकृ, नश् (c. 10. नाशयति -यितुं), विनश्.—(Enfeeble) शिथिलीकृ, अल्पबलीकृ, दुर्बलीकृ, बलं or तेजः or सत्त्वं हृ (c. 1. हरति, हर्त्तुं).

IMPAIRED, *p. p.* विकलः -ला -लं, विकलीभूतः -ता -तं, विकलीकृतः -ता -तं, अल्पीभूतः -ता -तं, अल्पीकृतः -ता -तं, न्यूनीकृतः -ता -तं, न्यूनीभूतः -ता -तं, क्षीणः -णा -णं, ह्रसितः -ता -तं, अपचितः -ता -तं, लुप्तः -प्ता -प्तं, शिथिलीकृतः -ता -तं, उपहतः -ता -तं, विशीर्णः -र्णा -र्णं; 'impaired in strength,' शिथिलबलः -ला -लं, क्षीणबलः -ला -लं, हृतबलः -ला -लं, हृतसत्त्वः -त्त्वा -त्त्वं.

IMPAIRING, IMPAIRMENT, *s.* न्यूनता -त्वं, न्यूनीकरणं, क्षयः, ह्रासः, हानिः *f.*, अल्पत्वं -ता, वैकल्यं, विकलीकरणं, शैथिल्यं, शिथिलीकरणं, अपचयः, क्षिया, अवसादः.

To IMPALE, *v. a.* IMPALED, IMPALEMENT. *See* EMPALE, &c.

IMPALPABILITY, *s.* अस्पृश्यता, अस्पर्शनीयता, दुःस्पृश्यता, अग्राह्यता,

अग्रहणीयत्वं, अव्यक्तता, अव्यक्तिः *f.*, अतिसूक्ष्मता.

IMPALPABLE, *a.* अस्पृश्यः -श्या -श्यं, अस्पर्शनीयः -या -यं, दुःस्पर्शः -र्शा -र्शं, दुःस्पृश्यः -श्या -श्यं, अग्राह्यः -ह्या -ह्यं, अग्रहणीयः -या -यं, दुरभिग्रहः -हा -हं, दुरालभः -भा -भं, स्पर्शाव्यक्तः -क्ता -क्तं, अव्यक्तः -क्ता -क्तं, अप्रत्यक्षः -क्षा -क्षं, इन्द्रियैरग्राह्यः -ह्या -ह्यं, इन्द्रियाग्राह्यः -ह्या -ह्यं, इन्द्रियागोचरः -रा -रं, अतिसूक्ष्मः -क्ष्मा -क्ष्मं.

IMPALPABLY, *adv.* अस्पर्शनीयं, अस्पृश्यं, अव्यक्तं, अप्रत्यक्षं.

To IMPANNEL, *v. a.* (A jury) नामावलिपत्रे or नामपरिसंख्यापत्रे द्वादशप्रमाणपुरुषाणां or द्वादशमध्यस्थपुरुषाणां नामानि समारुह in caus. (-रोपयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं).

IMPARASYLLABIC, *a.* असमानाक्षरः -रा -रं, अतुल्याक्षरः -रा -रं.

IMPARITY, *s.* असाम्यं, असमता, असमानता, असामान्यं, वैषम्यं, विषमता, विषमं, अतुल्यत्वं -ता, असमञ्जसं, असामञ्जस्यं, तारतम्यं.

To IMPARK, *v. a.* वाटं कृ, वाटिकां कृ, भूमिभागं प्राचीरेण परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or वृतिपरिगतं कृ.

To IMPART, *v. a.* प्रदा (c. 3. -ददाति -दातुं), अभिदा, सम्प्रदा, निदा, दा, यम् (c. 1. यच्छति, दातुं), प्रयम्, सम्प्रयम्, प्रतिपद् (c. 10. -पादयति -यितुं), उपपद्, वितॄ (c. 1. -तरति -रितुं -रीतुं), आहृ (c. 1. -हरति -हर्तुं), उपहृ, ऋ in caus. (अर्पयति -यितुं), समृ, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), सङ्क्रम् in caus. (-क्रामयति -यितुं), ग्रह् in caus. (ग्राहयति -यितुं), प्रदानं कृ. —(Impart information, make known) विज्ञा in caus. (-ज्ञापयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), समावेद्, संवद् (c. 1. -वदति -दितुं), संवादं कथ् (c. 10. कथयति -यितुं), समाचारं कथ्; 'impart a secret,' रहस्यं प्रकाश् (c. 10. -काशयति -यितुं).

IMPARTED, *p. p.* प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, निदत्तः -त्ता -त्तं, नीत्तः -त्ता -त्तं, प्रतिपादितः -ता -तं, उपपादितः -ता -तं, वितीर्णः -र्णा -र्णं, अर्पितः -ता -तं, समर्पितः -ता -तं, निक्षिप्तः -प्ता -प्तं, निहितः -ता -तं, संक्रान्तः -न्ता -न्तं.—(Made known) निवेदितः -ता -तं, विज्ञापितः -ता -तं, विज्ञप्तः -प्ता -प्तं.—(As a secret, &c.) प्रकाशितः -ता -तं.—(As a disease) संचारितः -ता -तं, संक्रान्तः -न्ता -न्तं.

IMPARTER, *s.* दाता *m.* (तृ), प्रदाता *m.*, दायी *m.* (न्), प्रतिपादकः.

IMPARTIAL, *a.* अपक्षपाती -तिनी -ति (न्), विपक्षपातः -ता -तं, पक्षपातरहितः -ता -तं, पक्षपातहीनः -ना -नं, समदर्शी -र्शिनी -र्शि (न्), सर्वसमः -मा -मं, समः -मा -मं, निःसङ्गः -ङ्गा -ङ्गं, सङ्गहीनः -ना -नं, मुक्तसङ्गः -ङ्गा -ङ्गं, न्यायी -यिनी -यि (न्), न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), उदासीनः -ना -नं, उदासी -सिनी -सि (न्), उभयसाधारणः -णा -णी -णं, उभयसमः -मा -मं, उभयसामान्यः -न्या -न्यं, मध्यस्थः -स्था -स्थं, धार्म्मिकः -की -कं, निरपेक्षः -क्षा -क्षं, समानवृत्तिः -त्तिः -त्ति.

IMPARTIALITY, *s.* अपक्षपातः, पक्षपातहीनता, साम्यं, समता, सर्वसमता, उभयसमता, औदास्यं, उदासीनता, निःसङ्गता, सङ्गहीनता, न्यायः, धर्म्मन्यायः.

IMPARTIALLY, *adv.* अपक्षपातेन, पक्षपातं विना, समं, साम्येन, असङ्गेन, सङ्गं विना, न्यायेन, न्यायतस्, उदासीनं, उदासीनवत्.

IMPARTIBLE, *a.* अविभाज्यः -ज्या -ज्यं, अवण्टनीयः -या -यं, अनंश्यः -श्या -श्यं.

IMPASSABLE, *a.* अतरणीयः -या -यं, अतार्य्यः -र्य्या -र्य्यं, दुस्तरः -रा -रं, दुस्तार्य्यः -र्य्या -र्य्यं, सुदुस्तरः -रा -रं, दुरुत्तरः -रा -रं, दुर्गः -र्गा -र्गं, दुर्गमः -मा -मं, अगम्यः -म्या -म्यं, अगमनीयः -या -यं, दुरत्ययः -या -यं, गहनः -ना -नं, सङ्कटः -टा -टं, सम्बाधः -धा -धं, गत्वरः -ना -नं.

IMPASSABLENESS, *s.* अतार्य्यत्वं, दुस्तार्य्यत्वं, अगम्यता, दुर्गमता.

IMPASSIBLE, *a.* अचेतनः -ना -नं, निश्चेतनः -ना -नं, शोकदुःखाक्षमः -मा -मं, क्लेशदुःखादिहीनः -ना -नं, रागहीनः -ना -नं, अरागी -गिणी -गि (न्).

IMPASSIBLENESS, *s.* अचैतन्यं, शोकदुःखाक्षमता, क्लेशदुःखादिहीनता.

To IMPASSION, *v. a.* संरक्तीकृ, सरागीकृ, रागवन्तं -वतीं -वत् कृ.

IMPASSIONED, *p. p.* संरक्तः -क्ता -क्तं, रागवान् -वती -वत् (त्), रागी -गिणी -गि (न्), रागान्वितः -ता -तं, सरागः -गा -गं, सानुरागः -गा -गं, अनुरागी -गिणी -गि (न्), सरसः -सा -सं, रसी -सिनी -सि (न्), रसिकः -का -कं, शृङ्गारी -रिणी -रि (न्), शृङ्गारितः -ता -तं.

IMPATIENCE, *s.* अमर्षः, अक्षमता, अक्षमा, अक्षान्तिः *f.*, असहिष्णुता -त्वं, विमर्षः, असहनं, असह्यत्वं, अतितिक्षा, औत्सुक्यं, अनुत्साहः.

IMPATIENT, *a.* असहिष्णुः -ष्णुः -ष्णु, असहनः -ना -नं, असहः -हा -हं, असहमानः -ना -नं, असहनशीलः -ला -लं, अक्षमः -मा -मं, अक्षान्तिमान् -मती -मत् (त्), अक्षमी -मिणी -मि (न्), अक्षन्ता -न्त्री -न्तृ (न्), अमर्षणः -णा -णं, विमर्षी -र्षिणी -र्षि (न्), जातामर्षः -र्षा -र्षं, अतितिक्षुः -क्षुः -क्षु, उत्सुकः -का -कं, उत्कः -त्का -त्कं.

IMPATIENTLY, *adv.* सामर्षं, सविमर्षं, अमर्षेण, विमर्षेण, असहिष्णुवत्, अक्षान्त्या, असहनशीलत्वात्, सावेगं.

To IMPAWN, *v. a.* आधीकृ, पण् (c. 1. पणते -णितुं), परिपण्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं).

To IMPEACH, *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), व्यवहारसभायां or व्यवहारानुसारेण अभियुज् or अभिशंस् (c. 1. -शंसति -सितुं) or अभियोगं कृ or अभिशंसनं कृ or अपवद् (c. 1. -वदति -दितुं), दोषीकृ, उपालभ् (c. 1. -लभते -लब्धुं).

IMPEACHABLE, *a.* अभियोक्तव्यः -व्या -व्यं, व्यवहारसभायाम् अभियोज्यः -ज्या -ज्यं.

IMPEACHED, *a.* व्यवहाराभियुक्तः -क्ता -क्तं, अभियुक्तः -क्ता -क्तं, व्यवहाराभिशस्तः -स्ता -स्तं.

IMPEACHER, *s.* अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभियोगकृत् *m.*, अपवादकः.

IMPEACHMENT, *s.* अभियोगः, व्यवहाराभियोगः, अभिशंसनं, व्यवहाराभिशंसनं, अपवादः, संशयः.

IMPECCABILITY, *s.* निष्पापत्वं, पापहीनता, पापाभावः, पापाक्षमता.

IMPECCABLE, *a.* अपापः -पा -पं, निष्पापः -पा -पं, पापाक्षमः -मा -मं.

To IMPEDE, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, उपरुध्, संरुध्, विरुध्; विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, आवृ, समावृ, प्रतिवृ, विघ्न (nom. विघ्नयति -यितुं), बाध् (c. 1. बाधते -धितुं), स्तम्भ् (c. 10. स्तम्भयति -यितुं, c. 9. स्तभ्नाति, स्तम्भितुं), विष्टम्भ्, प्रत्यूहीकृ, निषिध् (c. 1. -षेधति -षेद्धुं).

IMPEDED, *p. p.* रुद्धः -द्धा -द्धं, विरुद्धः -द्धा -द्धं, प्रतिरुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, उपरुद्धः -द्धा -द्धं, विहतः -ता -तं, प्रतिहतः -ता -तं, पराहतः -ता -तं, वारितः -ता -तं, निवारितः -ता -तं, विघ्नितः -ता -तं, बाधितः -ता -तं, स्तम्भितः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः -ब्धा -ब्धं, अन्तरितः -ता -तं, सार्गलः -ला -लं.

IMPEDIMENT, *s.* विघ्नः, व्याघातः, अन्तरायः, प्रत्यूहः, प्रतिबन्धः, विष्टम्भः, प्रतिष्टम्भः, स्तम्भः -म्भनं, रोधः, संरोधः, विरोधः, अवरोधः, उपरोधः, निरोधः, विघातः -तं, विहननं, विहतिः *f.*, बाधा -धकः, वारणं, निवारणं, आवरणं.—(Impediment in speech) वाक्स्खलनं, वाग्भेदः, वाग्वैकल्यं; 'having an impediment in one's speech,' स्खलद्वाक्यः -क्या -क्यं, वाग्विकलः -ला -लं, भिन्नवाक् *m. f. n.*, कडदः -दा -दं.

IMPEDIMENTAL, *a.* (Causing impediment) व्याघातकः -का -कं, विघाती -तिनी -ति (न्), विघ्नकरः -री -रं, विघ्नकारी -रिणी -रि (न्), विरोधी -धिनी -धि (न्), प्रतिरोधी &c., औपरोधिकः -की -कं, विष्टम्भी -म्भिनी -म्भि (न्), निवारकः -का -कं.

To IMPEL, *v. a.* (Drive, urge forward) प्रेर् (c. 10. -ईरयति -यितुं).

प्रणुद् (c. 6. -णुदति -णोत्तुं), प्रचुद् (c. 10. -चोदयति -यितुं), समुद्, परिचुद्, चुद्, कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्.—(Incite to action) प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), नियुज्, उद्युज्, उत्सह् (c. 10. -साहयति -यितुं), प्रोत्सह्, प्ररुच् (c. 10. -रोचयति -यितुं), चेष्ट् (c. 10. चेष्टयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं).

IMPELLED, *p.p.* प्रेरितः -ता -तं, प्रणोदितः -ता -तं, प्रणुन्नः -न्ना -न्नं, प्रचोदितः -ता -तं, प्रवर्त्तितः -ता -तं, प्रवृत्तः -त्ता -त्तं, नियोजितः -ता -तं, प्रयोजितः -ता -तं, प्रोत्साहितः -ता -तं, प्ररुचितः -ता -तं, समाकृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं.

IMPELLENT, *s.* प्रेरकः, प्रेरयिता *m.* (तृ), प्रणोदकः, प्रवर्त्तकः, प्रयोजकः, प्रोत्साहकः, प्रचोदकः.

To IMPEND, *v. n.* (Be near) उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), प्रत्युपस्था, समुपस्था, समीपं स्था or वृत् (c. 1. वर्त्तते -र्त्तितुं), निकटे स्था or वृत्, उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, समुपगम्, उपनतः -ता -तं भू.—(Hang over) आलम्ब् (c. 1. -लम्बते -म्बितुं), प्रलम्ब्, अवलम्ब्, लम्ब्.—(Be about to fall) पत् in des. (पिपतिषति -षितुं, पित्सति -त्सितुं), आपत् (c. 1. -पतति -तितुं).

IMPENDENT, IMPENDING, *a.* उपस्थायी -यिनी -यि (न्), उपस्थितः -ता -तं, उपस्थः -स्था -स्थं, समुपस्थितः -ता -तं, समीपवर्त्ती -र्त्तिनी -र्त्ति (न्), निकटवर्त्ती &c., आसन्नवर्त्ती &c., उपनतः -ता -तं, समुपगतः -ता -तं, पतनोन्मुखः -खा -खं, पिपतिषुः -षुः -षु, पित्सुः -त्सुः -त्सु.

IMPENETRABILITY, *s.* अवेध्यता, अव्यध्यता, अभेद्यता, अच्छेद्यत्वं, अप्रवेश्यत्वं, वज्रता -त्वं, गहनत्वं: 'impenetrability,' as a property of matter, is expressed in scientific treatises by the word विरोधः.

IMPENETRABLE, *a.* (Not to be pierced) अवेध्यः -ध्या -ध्यं, अव्यध्यः -ध्या -ध्यं, अभेद्यः -द्या -द्यं, अभेदनीयः -या -यं, अच्छेद्यः -द्या -द्यं, अच्छेदनीयः -या -यं, अव्याप्यः -प्या -प्यं, अच्छिद्रणीयः -या -यं, कलिलः -ला -लं.—(Not to be entered) अप्रवेश्यः -श्या -श्यं, अप्रवेष्टव्यः -व्या -व्यं, गहनः -ना -नं.—(Very hard) वज्रमयः -यी -यं, वज्रः -ज्रा -ज्रं.

IMPENETRABLY, *adv.* अभेद्यं, अवेध्यं, अच्छेदनीयं, गहनं, वज्रवत्.

IMPENITENCE, IMPENITENCY, *s.* अननुतापः, अपश्चात्तापः, पश्चात्तापहीनता, पश्चात्तापाभावः, अननुशोकः, अखेदः, खेदहीनता, खेदराहित्यं, अप्रायश्चित्तं, अननुशयः, स्तब्धचित्तत्वं.

IMPENITENT, *a.* अननुतापी -पिनी -पि (न्), अननुतप्तः -प्ता -प्तं, पश्चात्तापहीनः -ना -नं, अननुतापशीलः -ला -लं, खेदहीनः -ना -नं, खेदरहितः -ता -तं, अननुशयी -यिनी -यि (न्), स्तब्धचित्तः -त्ता -त्तं, कठिनचित्तः -त्ता -त्तं.

IMPERATIVE, *a.* आज्ञापकः -का -कं, आदेशकः -का -कं, आदेशी -शिनी -शि (न्), नियोजकः -का -कं, प्रबोधकः -का -कं, अवश्यकर्त्तव्यः -व्या -व्यं; 'imperative mood,' विधिः *m.*, आज्ञावाचकः -कं.

IMPERCEPTIBLE, *a.* अव्यक्तः -क्ता -क्तं, अप्रत्यक्षः -क्षा -क्षं, अविभाव्यः -व्या -व्यं, अविभावनीयः -या -यं, अगम्यः -म्या -म्यं, अगोचरः -रा -रं.—(To the senses) अतीन्द्रियः -या -यं, इन्द्रियागोचरः -रा -रं, इन्द्रियागम्यः -म्या -म्यं, इन्द्रियातीतः -ता -तं.—(To the eye) परोक्षः -क्षा -क्षं, अलोकनीयः -या -यं, नयनागोचरः -रा -रं.—(To the ear) कर्णागोचरः -रा -रं.

IMPERCEPTIBLY, *adv.* अव्यक्तं, अप्रत्यक्षं -क्षेण, अविभावनीयं, अगोचरं; 'going imperceptibly,' अव्यक्तगतिः -तिः -ति.

IMPERFECT, *a.* (Not complete) असम्पूर्णः -र्णा -र्णं, अपूर्णः -र्णा -र्णं, अपरिपूर्णः -र्णा -र्णं, असम्पन्नः -न्ना -न्नं, असमाप्तः -प्ता -प्तं, असिद्धः -द्धा -द्धं, असमग्रः -ग्रा -ग्रं, अनिखिलः -ला -लं, अनिष्पन्नः -न्ना -न्नं, अपर्य्याप्तः -प्ता -प्तं, असंसिद्धः -द्धा -द्धं, अपक्वः -क्वा -क्वं, खण्ड in comp.—(Defective) न्यूनः -ना -नं, विकलः -ला -लं, हीनः -ना -नं, लुप्तः -प्ता -प्तं, दोषी -षिणी -षि (न्), सच्छिद्रः -द्रा -द्रं, ऊनः -ना -नं.—(Wanting some organ) अङ्गहीनः -ना -नं, न्यूनेन्द्रियः -या -यं, विकलेन्द्रियः -या -यं, विकलाङ्गः -ङ्गा -ङ्गं.—(Tense) अद्यतनभूतः, अनद्यतनः: the grammatical symbols are घी, लङ्; 'imperfect comparison,' लुप्तोपमा.

IMPERFECTION, *s.* (Defect) दोषः, छिद्रं, अगुणः, अपराधः, कलङ्कः, दूषणं, वैकल्यं, हानिः *f.*, हीनता, क्षतिः *f.*, न्यूनता, अपर्य्याप्तिः *f.*, अशुद्धता: 'in a gem,' पुलकः, खण्डः.

IMPERFECTLY, *adv.* असम्पूर्णं, असमग्रं, खण्डशस्, अनिखिलेन, असम्पन्नं, असम्यक्, अपर्य्याप्तं, विकलं, वैकल्येन.

IMPERFECTNESS, *s.* असम्पूर्णता, अपूर्णता, असम्पन्नता, असिद्धिः *f.*, असमग्रता.

IMPERFORATE, *a.* नीरन्ध्रः -न्ध्रा -न्ध्रं, निश्छिद्रः -द्रा -द्रं, अच्छिद्रितः -ता -तं.

IMPERIAL, *a.* माहाराजिकः -की -कं, आधिराजिकः -की -कं, महाराजकीयः -या -यं, महाराजयोग्यः -ग्या -ग्यं, साम्राजिकः -की -कं, महेश्वरीयः -या -यं.

IMPERIALIST, *s.* महाराजाधीनः, अधिराजाधीनः, महाराजानुचरः, महाराजानुषङ्गी *m.* (न्): 'imperialist army,' महाराजसैन्यं.

To IMPERIL, *v. a.* संशयस्थं -स्थां -स्थं कृ, सन्देहस्थं -स्थां -स्थं कृ.

IMPERIOUS, *a.* (Commanding) आज्ञापकः -का -कं, आदेशकः -का -कं.—(Overbearing, haughty) धृष्टः -ष्टा -ष्टं, धर्षी -र्षिणी -र्षि (न्), भर्त्सनकारी -रिणी -रि (न्), उद्धतः -ता -तं, अवलिप्तः -प्ता -प्तं, सावहेलः -ला -लं, सोन्मायः -या -यं, प्रगल्भः -ल्भा -ल्भं, दृप्तः -प्ता -प्तं.

IMPERIOUSLY, *adv.* धर्षेण, प्रगल्भं, सावहेलं, सावलेपं, सोन्मायं, साटोपं.

IMPERIOUSNESS, *s.* धृष्टता, धर्षः, अवलिप्तता, अवलेपः, सावलेपत्वं, अवहेला, उद्धतिः *f.*, चित्तसमुन्नतिः *f.*, प्रगल्भता, प्रागल्भ्यं, उत्सिक्तता, साटोपत्वं.

IMPERISHABLE, *a.* अक्षयः -या -यं, अक्षय्यः -य्या -य्यं, अक्षयी -यिणी -यि (न्), अनश्वरः -रा -रं, अविनश्वरः -रा -रं, अविनाशी -शिनी -शि (न्), अनाश्यः -श्या -श्यं, अव्ययः -या -यं, अजरः -रा -रं, निर्जरः -रा -रं, अजर्य्यः -र्य्या -र्य्यं, [illegible] अनाशनीयः -या -यं.

IMPERISHABLENESS, *s.* अक्षयता -त्वं, अनश्वरता, अनाश्यत्वं, अविनाशयता, अजरत्वं, निर्जरत्वं, अव्ययीभावः.

IMPERMEABLE, *a.* अव्याप्यः -प्या -प्यं, अप्रवेश्यः -श्या -श्यं, अप्रवेशनीयः -या -यं.

IMPERMEABLENESS, *s.* अव्याप्यता, अप्रवेश्यता, अभेद्यत्वं.

IMPERSONAL, *a.* अकर्त्तृकः -का -कं, कर्त्तृत्वहीनः -ना -नं, अकर्त्तृवाच्यः -च्या -च्यं, भाववाचकः -का -कं: 'impersonal verb,' भाववाच्यं, अकर्त्तृवाचका क्रिया.

IMPERSONALLY, *adv.* अकर्त्तृकं, अकर्त्तृवाच्यक्रमेण, भाववाच्यानुसारेण.

IMPERTINENCE, IMPERTINENCY, *s.* (Rudeness) अविनयः, अविनीतता, अशिष्टता, परुषवचनं, दुरुक्तिः *f.*, वाक्पारुष्यं, कुशीलता, दुःशीलता, अशीलता, वामशीलता, धृष्टता, धर्षः, प्रगल्भता, चापल्यं, क्लेशदायकत्वं, उत्तरदायकत्वं.—(Meddling with others' affairs) पराधिकारचर्चा, पराधिकारप्रवेशः.—(State of not relating to the subject) निर्विषयता -त्वं, अप्रासङ्गिकत्वं, अप्रस्तुतत्वं, असम्बन्धः.—(Nonsense) आनर्थक्यं, अनर्थकता, असङ्गतत्वं.

IMPERTINENT, *a.* (Rude) अविनीतः -ता -तं, अशिष्टः -ष्टा -ष्टं, धृष्टः -ष्टा -ष्टं, प्रगल्भः -ल्भा -ल्भं, दुःशीलः -ला -लं, अशीलः -ला -लं, कुशीलः -ला -लं, वामशीलः -ला -लं, चपलः -ला -लं, परुषवाक् *m. f. n.*, परुषवादी -दिनी -दि (न्), क्लेशदायकः -का -कं; 'giving impertinent answers,' उत्तरदायकः -का -कं.—(Meddling with others' affairs) पराधिकारचर्चकः -का -कं.—(Irrelevant) अप्रासङ्गिकः -की -कं, अप्रस्तुतः -ता -तं, निर्विषयः -या -यं, असम्बन्धी -न्धिनी -न्धि (न्),

असम्पर्कीयः -या -यं, निष्प्रयोजनः -ना -नं, प्रस्तुतवहिर्भूतः -ता -तं.—(Nonsensical) अनर्थकः -का -कं, असम्बद्धः -द्धा -द्धं.

Impertinently, *adv.* (Rudely) अविनयेन, अविनीतवत्, धृष्टवत्, प्रगल्भवत्, अशिष्टवत्, कुशीलवत्, परुषोक्त्या.—(Officiously) अतिचर्चापूर्व्वं.—(Irrelevantly) असम्बद्धं, अप्रस्तुतं, अप्रासङ्गिकं, निष्प्रयोजनं.

Imperturbable, *a.* अक्षोभ्यः -भ्या -भ्यं, अक्षोभणीयः -या -यं, अवस्थितमतिः -तिः -ति, स्थिरमतिः -तिः -ति, समबुद्धिः -द्धिः -द्धि, अनाकुलचित्तः -त्ता -त्तं, अपारिप्लवः -वी -वं, अकातरः -रा -रं, अविखण्डितमनाः -नाः -नः (स्), निर्व्विकारः -रा -रं.

Imperturbation, *s.* अक्षोभ्यता, अनाकुलचित्तता, अपारिप्लवत्वं, अव्यग्रता.

Impervious, *a.* (Not to be penetrated or entered) अप्रवेश्यः -श्या -श्यं, अप्रवेशनीयः -या -यं, अगम्यः -म्या -म्यं, गहनः -ना -नं, सुगहनः -ना -नं, गहीयः -या -यं, गभीरः -रा -रं, गम्भीरः -रा -रं, कलिलः -ला -लं, सङ्कटः -टा -टं, सम्बाधः -धा -धं, कष्टः -ष्टा -ष्टं.—(Compact, without interstice) निविडः -डा -डं, अविरलः -ला -लं, निर्व्विवरः -रा -रं, नीरन्ध्रः -न्ध्रा -न्ध्रं.—(Not to be pierced) अवेध्यः -ध्या -ध्यं, अव्याप्यः -प्या -प्यं, अभेद्यः -द्या -द्यं, अच्छेदनीयः -या -यं.

Imperviousness, *s.* अप्रवेश्यता, गम्भीरत्वं, गहनत्वं, अव्याप्यता, अगम्यता, अवेध्यता, नीरन्ध्रता, नैविड्यं.

Impetrable, *a.* अभ्यर्थनीयः -या -यं, प्रार्थनेन प्राप्यः -प्या -प्यं.

To **impetrate,** *v. a.* प्रार्थनेन or अभ्यर्थनाद्वारेण प्राप् (c. 5. -आप्नोति -आप्तुं).

Impetration, *s.* प्रार्थनया or याच्ञाद्वारेण प्राप्तिः *f.* or प्रापणं.

Impetuosity, *s.* वेगः, आवेगः, महावेगः, संवेगः, अत्यन्तवेगः, संरम्भः, संरब्धत्वं, आपातः, तीक्ष्णता, तैक्ष्ण्यं, साहसं, उग्रता, उच्चण्डता, अमर्षः, क्षिप्रता, रभसः, कुतूहलं, तीव्रता.

Impetuous, *a.* वेगवान् -वती -वत् (त्), वेगी -गिनी -गि (न्), महावेगः -गा -गं, भीमवेगः -गा -गं, उदीर्णवेगः -गा -गं, संरम्भी -म्भिणी -म्भि (न्), चण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), अमर्षी -र्षिणी -र्षि (न्), अमर्षणः -णा -णं, अमर्षवान् -वती -वत् (त्), साहसी -सिनी -सि (न्), साहसिकः -की -कं, उग्रः -ग्रा -ग्रं, तीव्रः -व्रा -व्रं, प्रबलः -ला -लं, रोषणः -णा -णं, कुतूहली -लिनी -लि (न्).

Impetuously, *adv.* महावेगेन, भीमवेगेन, अत्यन्तवेगेन, वेगतस्, सवेगं, संरम्भेण, आपाततस्, तीक्ष्णं, सामर्षं, उच्चण्डं, उग्रं, सरभसं, साहसेन संरब्धवत्, सकुतूहलं, कौतूहलेन.

Impetuousness, *s.* *See* Impetuosity.

Impetus, *s.* वेगः, आवेगः, संवेगः, आपातः, अत्यन्तवेगः, गतिशक्तिः *f.*

Impiety, *s.* अधर्म्मः -र्म्मत्वं, वैधर्म्यं, निर्धर्म्मत्वं, धर्म्मलोपः, धर्म्महीनता, अभक्तिः *f.*, भक्तिहीनता, अभक्तत्वं, देवनिन्दा, दुष्टता, अपुण्यत्वं, असाधुता, पापिष्ठत्वं, सपापत्वं, पापं, दुष्कृतं, कुकर्म्म *n.* (न्).

To **impinge,** *v. a.* आहन् (c. 2. -हन्ति -न्तुं), अभिहन्, अभ्याहन्, आपत् (c. 1. -पतति -तितुं), प्रपत्, संघट्ट् (c. 1. -घट्टते -ट्टितुं).

Impious, *a.* अधर्म्मी -र्म्मिणी -र्म्मि (न्), अधार्म्मिकः -की -कं, निर्धर्म्मः -र्म्मा -र्म्मं, धर्म्महीनः -ना -नं, धर्म्मालीकः -का -कं, अभक्तः -क्ता -क्तं, देवनिन्दकः -का -कं, भक्तिहीनः -ना -नं, दुष्टः -ष्टा -ष्टं, अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, पापी -पिनी -पि (न्), पापिष्ठः -ष्ठा -ष्ठं, ईश्वरद्रोषितः -ता -तं.

Impiously, *adv.* अधर्म्मतस्, अधर्म्मेण, अपुण्यवत्, पापिष्ठवत्, देवनिन्दकवत्.

Impiousness, *s.* *See* Impiety.

Implacability, implacableness, *s.* अशाम्यता, असान्त्वनीयता, अतोषणीयता, अप्रसाद्यत्वं.

Implacable, *a.* अशाम्यः -म्या -म्यं, अतोषणीयः -या -यं, अशमनीयः -या -यं, असान्त्वनीयः -या -यं, अनाराध्यः -ध्या -ध्यं, अप्रसाद्यः -द्या -द्यं, दुःखेन शाम्यः -म्या -म्यं or आराध्यः -ध्या -ध्यं.—(Constant in hatred) दीर्घद्वेषी -षिणी -षि (न्), अतिद्वेषी &c.; 'implacable hatred,' दीर्घद्वेषः, बद्धवैरं.

Implacably, *adv.* अशमनीयं, अशाम्यं, अतोषणीयं, अनाराधनीयं.

To **implant,** *v. a.* निरुह् in caus. (-रोपयति -यितुं), निष्ठा in caus. (-ष्ठापयति -यितुं), प्रतिष्ठा, निष्ठं -ष्ठां -ष्ठं कृ, निधा (c. 3. -दधाति -धातुं), प्रणिधा, उपनिधा, निखन् (c. 1. -खनति -नितुं).

Implanted, *p. p.* निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, प्रतिष्ठितः -ता -तं, सुप्रतिष्ठितः -ता -तं, निरूढः -ढा -ढं, निखातः -ता -तं, निहितः -ता -तं.

To **implead,** *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), व्यवहारसभायाम् उत्तरप्रत्युत्तरे कृ.

Implement, *s.* यन्त्रं, उपकरणं, साधनं, भाण्डं, कार्य्यसाधनं, सामग्र्यं -ग्री, द्रव्यं, पात्रं, उपस्करः, सम्भारः.

To **implicate,** *v. a.* सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), अनुबन्ध्, संश्लिष् (c. 10. -श्लेषयति -यितुं), आश्लिष्, परिश्लिष्, संसृज् (c. 6. -सृजति -स्रष्टुं); 'he is implicated in many crimes,' बहुपापैः सम्बध्यते.

Implicated, *p. p.* सम्बद्धः -द्धा -द्धं, अनुबद्धः -द्धा -द्धं, संश्लिष्टः -ष्टा -ष्टं, संसृष्टः -ष्टा -ष्टं, ग्रस्तः -स्ता -स्तं, अनुषङ्गी -ङ्गिणी -ङ्गि (न्), लिप्तः -प्ता -प्तं.

Implication, *s.* (Involution, connection) सम्बन्धः, अनुबन्धः, अभिसम्बन्धः, अनुषङ्गः, समन्वयः, सम्पर्कः, संसर्गः.—(Implying) विवक्षा, अर्थापत्तिः *f.*, अनुमानं, अपवाहः, उपलक्षणं.

Implicit, *a.* अनाशङ्कितः -ता -तं, अवितर्कितः -ता -तं, अवैकल्पिकः -की -कं, अविचार्य्य कृतः -ता -तं, अवितर्क्य कृतः -ता -तं, अशङ्कात्मकः -का -कं, असांशयिकः -की -कं, अखण्डः -ण्डा -ण्डं.

Implicitly, *adv.* अवितर्क्य, अविचार्य्य, अनाशङ्कापूर्व्वं, अशङ्कया, अवितर्केण, असंशयपूर्व्वं, अविकल्पेन.

Implied, *p. p.* or *a.* विवक्षितः -ता -तं, अर्थसम्बद्धः -द्धा -द्धं, उपलक्षितः -ता -तं, आनुषङ्गिकः -की -कं, 'implied meaning,' विवक्षितार्थः फलितार्थः, ध्वनितार्थः, ध्वनिः *m.*

To **implore,** *v. a.* प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अभ्यर्थ्, सम्प्रार्थ्, अर्थ्, विनयेन or अञ्जलिं कृत्वा प्रार्थ्, कृताञ्जलिः or निर्बन्धेन याच् (c. 1. याचति -चितुं), अभियाच्, संयाच्, प्रयाच्, सम्प्रयाच्, प्रसद् (c. 10. -सादयते -ति -यितुं), विनी (c. 1. -नयति -नेतुं), अनुनी, विनयेन स्वार्थं निविद् (c. 10. -वेदयति -यितुं), नाथ् (c. 1. नाथति -थितुं).

Implored, *p. p.* अञ्जलिकर्म्मपूर्व्वं प्रार्थितः -ता -तं or अभ्यर्थितः -ता -तं, विनयेन or निर्बन्धेन याचितः -ता -तं or अभियाचितः -ता -तं, प्रसादितः -ता -तं, अनुनीतः -ता -तं.

Implorer, *s.* कृताञ्जलिः प्रार्थकः or प्रार्थयिता *m.* (तृ), निर्बन्धेन याचकः.

To **imply,** *v. a.* वच् in des. (विवक्षति -क्षितुं), सूच् (c. 10. सूचयति -यितुं), संसूच्. Often expressed by अर्थ in comp., as, 'a speech which implies censure,' निन्दार्थो वादः.

Impolicy, *s.* कुनीतिः *f.*, दुर्णीतिः *f.*, दुर्णयः, अनीतिः *f.*, दुर्णीतं, अनयः.

Impolite, *a.* अशिष्टः -ष्टा -ष्टं, असभ्यः -भ्या -भ्यं, अविनीतः -ता -तं, अशीलः -ला -लं, कुशीलः -ला -लं, विशीलः -ला -लं, दुःशीलः -ला -लं, दुर्व्यादः -दा -दं, नष्टविनयः -या -यं, ग्राम्यः -म्या -म्यं, असुजनः -ना -नं, अनार्य्यः -र्य्या -र्य्यं.

Impoliteness, *s.* अशिष्टता, असभ्यता, अविनयः, कुशीलता, दुःशीलता.

Impolitic, *a.* (Not acquainted with good policy, not prudent)

अनीतिज्ञः -ज्ञा -ज्ञं, अनीतिविद् *m.f.n.*, अनीतिमान् -मती -मत् (त्), अनीतिकुशलः -ला -लं, दुर्णीतः -ता -तं, अविनीतः -ता -तं, अमतिमान् -मती -मत् (त्), अबुद्धिमान् &c., अबुधः -धा -धं, अविज्ञः -ज्ञा -ज्ञं, अविवेचकः -का -कं, अकोविदः -दा -दं.—(Not politic, adapted to injure the public interest) अहितः -ता -तं, नीतिविरुद्धः -द्धा -द्धं, प्रजार्थविरोधी -धिनी -धि (न्), अर्थविरोधी &c., अनर्थकरः -रा -रं, अनर्थजनकः -का -कं, अनिष्टकरः -री -रं, असमीक्ष्य कृतः -ता -तं, सापकारः -रा -रं, अयौक्तिकः -की -कं.

MPOLITICLY, *adv.* नीतिविरुद्धं, अहितं -ताय, अर्थविरोधेन, असमीक्ष्य.

MPONDERABLE, IMPONDEROUS, *a.* निर्भारः -रा -रं, अभारी -रिणी -रि (न्), अतोलनीयः -या -यं, अगुरुः -र्वी -रु, अतिसूक्ष्मः -क्ष्मा -क्ष्मं, अतिलघुः -घुः -घु.

To IMPORT, *v. a.* (Bring goods from a foreign country) वाणिज्यद्रव्याणि or वाणिज्यवस्तूनि विदेशात् or देशान्तरात् or वहिर्देशाद् आनी (c. 1. -नयति -नेतुं) or उपनी or आवह् (c. 1. -वहति -वोढुं) or उपवह् or आहृ (c. 1. -हरति -हर्तुं).—(Convey a meaning, imply) सूच् (c. 10. सूचयति -यितुं), संसूच्, उद्दिश् (c. 6. -दिशति -देष्टुं), वच् in des. (विवक्षति -क्षितुं), उद्बुध् (c. 10. -बोधयति -यितुं), or expressed by अर्थ in comp.; as, 'a speech which imports censure,' निन्दार्थो वादः.—(Be of weight or consequence) गुर्वर्थः -र्था -र्थं भू.

MPORT, *s.* (Goods brought from a foreign country) विदेशात् or देशान्तरात् or वहिर्देशाद् आनीतानि वाणिज्यद्रव्याणि *n. pl.* or वाणिज्यवस्तूनि *n. pl.*, विदेशीयवस्तूनि *n. pl.*, विदेशजद्रव्याणि *n. pl.*, वहिर्देशवस्तूनि.—(Meaning) अर्थः, अभिप्रायः, अभिप्रेतं, विवक्षा, उद्देशः, आशयः; 'of like import,' समानार्थः -र्था -र्थं.—(Importance) गौरवं, गुरुत्वं, प्रभावः.

MPORTABLE, *a.* विदेशाद् आनेयः -या -यं or आनेतव्यः -व्या -व्यं.

MPORTANCE, *s.* (Consequence) गौरवं, गुरुत्वं -ता, गुर्वर्थत्वं, प्रभावः, भारः; 'of a thing,' द्रव्यगुरुता; 'of an act,' कार्य्यगुरुता.—(Of a person) उत्कर्षः, औत्कर्ष्यं, प्रधानता, सेव्यता, प्रतिपत्तिः *f.*, प्रागल्भ्यं, गर्व्वः, मानं.

MPORTANT, *a.* गुरुः -र्वी -रु, गुर्वर्थः -र्था -र्थं, बह्वर्थः -र्था -र्थं, महार्थः -र्था -र्थं, परमार्थः -र्था -र्थं, गुरुप्रभावः -वा -वं, महाप्रभावः -वा -वं, बहुप्रभावः -वा -वं, परमप्रभावः -वा -वं, परमः -मा -मं, अलघुः -घुः -घु, महोपकारी -रिणी -रि (न्), भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), आवश्यकः -की -कं; 'important object,' गुर्वर्थः, परमार्थः, महार्थः; 'most important,' गरिष्ठः -ष्ठा -ष्ठं, गुरुतमः -मा -मं; 'more important,' गरीयान् -यसी -यः (स्).

MPORTANTLY, *adv.* गुरु, परमप्रभावेण, परमं, अलघु.

MPORTATION, *s.* (Act of bringing from a foreign country) विदेशात् or वहिर्देशात् or देशान्तराद् आनयः -यनं or उपनयः -यनं or आवाहनं or आवहनं or उपवाहनं.—(The commodities imported) विदेशाद् आनीतानि द्रव्याणि, देशान्तराद् आनीतवस्तूनि, विदेशीयवस्तुसमूहः.

MPORTED, *p. p.* विदेशात् or वहिर्देशाद् आनीतः -ता -तं or उपनीतः -ता -तं.

MPORTER, *s.* विदेशात् or वहिर्देशाद् वाणिज्यद्रव्यानेता *m.* (तृ).

MPORTUNACY, *s.* निर्बन्धः, अतिनिर्बन्धः, अतियाचना -नं, अतिप्रार्थनं -ना, आग्रहः, अतिनिर्बन्धेन याचना or प्रार्थनं, वारं वारं प्रार्थना, नित्यप्रार्थनं, नित्ययाचना, नित्ययाचनेन परोद्वेजनं or परायासकरणं.

MPORTUNATE, *a.* निर्बन्धशीलः -ला -लं, अतिनिर्बन्धशीलः -ला -लं, आग्रही -हिणी -हि (न्), आग्रहशीलः -ला -लं, अतियाचकः -का -कं, अतिप्रार्थकः -का -कं, निर्बन्धेन याचकः -का -कं, नित्यप्रार्थकः -का -कं, नित्यं याचनेन परोद्वेजकः -का -कं or परायासकरः -री -रं, वारं वारं प्रार्थकः -का -कं; 'importunate solicitation,' निर्बन्धः, आग्रहः.

IMPORTUNATELY, *adv.* निर्बन्धेन, अतिनिर्बन्धेन, आग्रहेण, साग्रहं, प्रसभं मुहुर्मुहुः, पुनःपुनर्.

IMPORTUNATENESS, *s.* *See* IMPORTUNACY.

To IMPORTUNE, *v. a.* अतिनिर्बन्धेन or निर्बन्धेन प्रार्थ् (c. 10. -अर्थयति -यितुं) or अभ्यर्थ् or याच् (c. 1. याचति -चितुं) or अभियाच्, आग्रहेण प्रार्थ्, वारं वारं प्रार्थ्, अतियाचनेन परम् उद्विज् (c. 10. -वेजयति -यितुं), नित्यप्रार्थनेन परम् आयस् (c. 10. -यासयति -यितुं).

IMPORTUNED, *p. p.* निर्बन्धेन प्रार्थितः -ता -तं or याचितः -ता -तं, अतियाचितः -ता -तं.

IMPORTUNER, *s.* अतिप्रार्थकः, अतियाचकः, निर्बन्धेन प्रार्थकः, अतियाच्ञया परोद्वेजकः.

IMPORTUNITY, *s.* निर्बन्धः, अतिनिर्बन्धः, अतियाचना -नं, आग्रहः, वारं वारं प्रार्थना, पुनःपुनः प्रार्थनं, अतियाचनेन परोद्वेजनं. *See* IMPORTUNACY.

To IMPOSE, *v. a.* (Lay on) न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), समाविश्, नियुज् (c. 10. -योजयति -यितुं, c. 7. -युनक्ति -योक्तुं), धा (c. 3. दधाति, धातुं), निधा, विधा, आरुह् in caus. (-रोपयति -यितुं), स्था in caus. (स्थापयति -यितुं), उपस्था, अवस्था.—(Set over) अधिकृ, उपधिकृ, नियुज्, विनियुज्.—(Impose upon, deceive) प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, वञ्च् (c. 10. वञ्चयते -ति -यितुं), परिवञ्च्, छल् (c. 10. छलयति -यितुं), अभिसन्धा, अतिसन्धा, दम्भ् (c. 5. दभ्नोति -दम्भितुं).

IMPOSED, *p. p.* न्यस्तः -स्ता -स्तं, निवेशितः -ता -तं, नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, [illegible] -तं, अधिकृतः -ता -तं; 'imposed upon,' वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं, अतिसंहितः -ता -तं.

IMPOSING, *a.* विस्मयोत्पादकः -का -कं, आश्चर्य्यकरः -रा -रं, विस्मापकः -का -कं, अद्भुतः -ता -तं, गुरुः -र्वी -रु, महातेजाः -जाः -जः (स्).

IMPOSITION, *s.* (Act of laying on) न्यासः, न्यसनं, निवेशनं, आरोपणं, स्थापनं; 'of hands,' हस्तन्यासः.—(That which is imposed, a tax) करः, शुल्कः -ल्कं.—(Task given as a punishment) साहसं, व्रतं, शिष्येण दण्डार्थम् आधिककर्त्तव्यं किञ्चित्.—(Fraud, deception) दम्भः, वञ्चनं -ना, छलं, प्रलम्भः, विप्रलम्भः अभिसन्धिः *m.*, अतिसन्धानं.

IMPOSSIBILITY, *s.* अशक्यता, असाध्यता, अकर्त्तव्यता, अकरणीयता, अकार्य्यता.—(An impossibility, an absurdity) असाध्यं, असम्भवः, मृषार्थकं, शशविषाणं, शशशृङ्गं, खपुष्पं, गगणपुष्पं, गगणकुसुमं; 'impossibilities,' असाध्यानि *n. pl.*

IMPOSSIBLE, *a.* अशक्यः -क्या -क्यं, असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, असम्भवः -वा -वं, अकर्त्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्य्यः -र्य्या -र्य्यं, असङ्गतः -ता -तं, अघटितः -ता -तं, अघटमानः -ना -नं, अघटनीयः -या -यं, अगम्यः -म्या -म्यं, अप्राप्यः -प्या -प्यं, अपार्य्यः -र्य्या -र्य्यं, अपारणीयः -या -यं, अक्षमः -मा -मं.

IMPOST, *s.* करः, शुल्कः -ल्कं, राजकरं, कारः, राजग्राह्यभागः, राजस्वं, राजदेयं, राजधनं, शाल्किकः, तारिकं, तार्य्यं.

IMPOSTHUME, *s.* विद्रधिः *m.*, पूयसम्पूर्णः स्फोटः or विस्फोटः, सपूयव्रणं.

IMPOSTOR, *s.* (Deceiver) दम्भी *m.* (न्), दाम्भिकः, दम्भकः, कुहकः, कूटकारः, कूटकः, वञ्चकः, कपटी *m.* (न्), कापटिकः, धूर्त्तः, कितवः, प्रतारकः, छद्मवेशी *m.* (न्).—(In religion) धर्म्मध्वजी *m.* (न्), धार्म्मि-

लिङ्गी m. (न्), साधुरूप:, धर्म्मोपध:, पाषण्ड:, पाखण्ड:, लिङ्गवृत्ति: m., सर्व्वलिङ्गी m. (न्), छद्मतापस:, कपटधर्म्मी m. (न्).

IMPOSTURE, s. दम्भ:, वञ्चनं -ना, प्रवञ्चना, प्रलम्भ:, विप्रलम्भ:, कूट: -टं, कपट: -टं, व्याज:, छलं -लना, कैतवं, कौटं, उपधि: m., प्रतारणं -णा, कुहक:, अभिसन्धि: m., अतिसन्धानं, छद्म n. (न्).

IMPOTENCE, IMPOTENCY, s. (Want of strength or power) वीर्य्यहानि: f., शक्तिहीनता, अशक्ति: f., अशक्तता, अवीर्य्यं, निर्बलता, बलहीनता, सत्त्वहानि: f., नि:सत्त्वं, सत्त्वाभाव:, वीर्य्याभाव:, असामर्थ्यं, असमर्थत्वं, अतेजस् n., तेजोहीनता, क्लीवता, दौर्बल्यं, दुर्बलता, शक्तिवैकल्यं.—(Absence of virility) क्लीवत्वं, क्लैव्यं, अपुंस्त्वं, निष्पुरुषत्वं, अपौरुषं, नपुंसकत्वं, ध्वजभङ्ग:, निर्बीजता, निष्फलत्वं, अजनकता.

IMPOTENT, a. (Without power) निर्बल: -ला -लं, बलहीन: -ना -नं, शक्तिहीन: -ना -नं, अशक्त: -क्ता -क्तं, अबल: -ला -लं, असमर्थ: -र्था -र्थं, सामर्थ्यहीन: -ना -नं, निर्वीर्य्य: -र्य्या -र्य्यं, वीर्य्यहीन: -ना -नं, अवीर: -रा -रं, नि:सत्त्व: -त्त्वा -त्त्वं, सत्त्वहीन: -ना -नं, निस्तेजा: -जा: -ज: (स्), तेजोहीन: -ना -नं, गततेजा: &c., अकल्प: -ल्पा -ल्पं, दुर्बल: -ला -लं, अक्षम: -मा -मं, अपारग: -गा -गं.—(Wanting virility) क्लीव: -वा -वं, पुंस्त्वहीन: -ना -नं, पुंशक्तिहीन: -ना -नं, निष्पुरुष: -षा -षं, पुरुषशक्तिवर्जित: -ता -तं, नपुंसक: -का -कं, निर्बीज: -जा -जं, भग्नध्वज: -जा -जं, निष्फल: -ला -लं.

IMPOTENTLY, adv. निर्बलं, अबलं, दुर्बलं, अवीरवत्, निर्वीर्य्यवत्, क्लीववत्, निर्वीर्य्यं, बलं विना, वीर्य्यं विना, नि:सत्त्वेन.

To IMPOUND, v. a. यूथपरिभ्रष्टपश्वादि अवरोधस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं) or रक्ष् (c. 1. रक्षति -क्षितुं).

To IMPOVERISH, v. a. दरिद्रीकृ, निर्धनीकृ, क्षीणीकृ, धनं नश् (c. 10. नाशयति -यितुं), क्षीणधनं -नां -नं कृ.—(Enfeeble, exhaust strength) कृश् (nom. क्रशयति -यितुं), कृशीकृ, तेज: or सत्त्वं or वीर्य्यं हृ (c. 1. हरति, हर्त्तुं) or नश्, दुर्बलीकृ, क्षि in caus. (क्षपयति -यितुं).

IMPOVERISHED, p. p. (Reduced to poverty) क्षीणधन: -ना -नं, निर्धन: -ना -नं, दरिद्रित: -ता -तं, दरिद्रीकृत: -ता -तं, दारिद्र्यगत: -ता -तं, धनच्युत: -ता -तं, क्षीणार्थ: -र्था -र्थं, नष्टार्थ: -र्था -र्थं, नष्टधन: -ना -नं, गतविभव: -वा -वं, प्रचलितविभव: -वा -वं, शिथिलवसु: -सु: -सु, विगतश्रीक: -का -कं, विनष्टलक्ष्मीक: -का -कं, निष्किञ्चन: -ना -नं, अकिञ्चन: -ना -नं.—(Exhausted of energy) क्षीणसत्त्व: -त्त्वा -त्त्वं, कृशीभूत: -ता -तं, गतवीर्य्य: -र्य्या -र्य्यं, च्युतोत्साह: -हा -हं.

IMPOVERISHMENT, s. दरिद्रता, दारिद्र्यं, दरिद्रीकरणं, धननाश:, धनहानि: f., धनच्युति: f., सत्त्वहानि: f., क्षीणता.

IMPRACTICABILITY, s. असाध्यता -त्वं, असाधनीयता, अकर्त्तव्यता, अकरणीयता, अकार्य्यता, अशक्यता -त्वं, कर्त्तुम् अशक्यता, असम्भवत्वं, असम्भाव्यता, अनुपपाद्यता, अघटनीयत्वं, अगम्यत्वं, दुष्करत्वं.

IMPRACTICABLE, a. असाध्य: -ध्या -ध्यं, असाधनीय: -या -यं, अकर्त्तव्य: -व्या -व्यं, अकरणीय: -या -यं, अकार्य्य: -र्य्या -र्य्यं, अशक्य: -क्या -क्यं, कर्त्तुम् अशक्य: -क्या -क्यं, अकृत्य: -त्या -त्यं, अघटनीय: -या -यं, असम्भव: -वा -वं, असम्भाव्य: -व्या -व्यं, असम्भावनीय: -या -यं, अनुपपाद्य: -द्या -द्यं, दुष्कर: -रा -रं, अगम्य: -म्या -म्यं, अपार्य्य: -र्य्या -र्य्यं.

IMPRACTICABLY, adv. असाधनीयं, अकरणीयं, असम्भवेन, असम्भावनीयं.

To IMPRECATE, v. a. शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्, आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), अमङ्गलं or अनिष्टम् आशंस् (c. 1. -शंसते -सितुं) or प्रार्थ् (c. 10. -अर्थयते -यितुं), गर्ह् (c. 1. गर्हते -र्हितुं), भर्त्स् (c. 10. भर्त्सयति -यितुं), धिक्कृ.

IMPRECATED, p. p. अभिशप्त: -प्ता -प्तं, आक्रुष्ट: -ष्टा -ष्टं, धिक्कृत: -ता -तं.

IMPRECATION, s. शाप:, अभिशाप:, आक्रोशनं, अपक्रोश:, अभीषङ्ग:, अभिषङ्ग:, अनिष्टाशंसनं, अनिष्टप्रार्थना, मन्दप्रार्थना, मन्दवाञ्छा, भर्त्सनं, गालि: m., धिक्करणं.

IMPRECATORY, a. अभिशापार्थक: -का -कं, आक्रोशक: -की -कं, अनिष्टाशंसक: -का -कं, अनिष्टप्रार्थक: -का -कं.

IMPREGNABLE, a. अलङ्घनीय: -या -यं, अलंघ्य: -घ्या -घ्यं, अनाक्रमणीय: -या -यं, अनाक्रम्य: -म्या -म्यं, दुराक्रम: -मा -मं, दुराक्राम: -मा -मं, अगम्य: -म्या -म्यं, दुर्गम: -मा -मं.—(Invincible) अजेय: -या -यं, दुर्जय: -या -यं, अपराजित: -ता -तं.

To IMPREGNATE, v. a. (Infuse the principle of conception, make pregnant) सिच् (c. 6. सिञ्चति, सेक्तुं), निषिच्, आसिच्, रेत: सिच्, गर्भं ग्रह् in caus. (ग्राहयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं), गर्भवतीं कृ, ससत्त्वां कृ, आपन्नसत्त्वां कृ, अन्तरापत्नां कृ, सञ्जातगर्भां कृ, गर्भाधानं कृ, निषेकं कृ.—(Infuse particles of one thing into another) प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), निषिच्, प्रक्षेपं कृ, व्याप् (c. 5. -आप्नोति -आप्तुं), व्याप्तं -प्तां -प्तं कृ.

IMPREGNATED, p. p. सिक्त: -क्ता -क्तं, गृहीतगर्भा, उत्पन्नगर्भा, ससत्त्वा, आपन्नसत्त्वा, सञ्जातगर्भा.—(Infused) व्याप्त: -प्ता -प्तं.

IMPREGNATING, part. गर्भद: -दा -दं, सेचक: -का -कं, गर्भोत्पादक: -का -कं.

IMPREGNATION, s. सेक:, सेचनं, निषेक:, आसेक:, आसेचनं, गर्भग्रहणं, गर्भोत्पादनं, गर्भाधानं, गर्भधारणं, भेरुण्डं.

IMPREGNATOR, s. सेक्ता m. (कृ), सेचक:, निषेककारी m. (न्), गर्भद:, गर्भोत्पादक:.

To IMPRESS, v. a. (Imprint, stamp, make a mark by pressure) मुद्र् (nom. मुद्रयति -यितुं), मुद्रीकृ, अङ्क् (c. 10. अङ्कयति -यितुं), चिह्न् (nom. चिह्नयति -यितुं), मुद्रितं -तां -तं कृ, लक्ष् (c. 10. लक्षयति -यितुं), प्रणिधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), निपीड् (c. 10. -पीडयति -यितुं), अङ्कितं -तां -तं कृ.—(Fix deep in the mind, &c.) हृदये सुनिहितं -तां -तं कृ, चित्तनिष्ठं -ष्ठां -ष्ठं कृ, हृत्स्थं -स्थां -स्थं कृ, हृद्गतं -तां -तं कृ, हृदयगतं -तां -तं कृ, हृदये कृ, हृदये निविश् or निष्ठा in caus. (-ष्ठापयति -यितुं), 'to be impressed,' निष्ठा (c. 1. -तिष्ठति -ष्ठातुं).—(Impress seamen) राजाज्ञया बलात्कारेण धृत्वा नाविकादिकर्म्मणि व्यापृ (c. 10. -पारयति -यितुं).

IMPRESS, s. मुद्रा, अङ्क:, चिह्नं, न्यास:, लक्षणं; 'having the impress of knowledge' ज्ञानमुद्र: -द्रा -द्रं.

IMPRESSED, p. p. (Imprinted) मुद्रित: -ता -तं, मुद्रीकृत: -ता -तं, कृतमुद्र: -द्रा -द्रं, मुद्राङ्कित: -ता -तं, अङ्कित: -ता -तं, कृताङ्क: -ङ्का -ङ्कं, चिह्नित: -ता -तं, समुद्र: -द्रा -द्रं, लक्षित: -ता -तं.—(Infixed) निष्ठित: -ता -तं, निष्ठ: -ष्ठा -ष्ठं, न्यस्त: -स्ता -स्तं, निहित: -ता -तं, प्रणिहित: -ता -तं, निवेशित: -ता -तं; 'in the mind,' हृदयनिष्ठित: -ता -तं, चित्तनिष्ठ: -ष्ठा -ष्ठं, हृदयगत: -ता -तं, हृद्गत: -ता -तं, हृदयनिवेशित: -ता -तं, हृत्स्थ: -स्था -स्थं.

IMPRESSIBLE, s. अङ्कनीय: -या -यं, अंक्य: -क्या -क्यं, चिह्नक्षम: -मा -मं.

IMPRESSION, s. (Mark, stamp) मुद्रा, अङ्क:, चिह्नं.—(Act of impressing) अङ्कनं.—(Impression on the mind) संस्कार:, चित्तसंस्कार:, मन:संस्कार:.—(Idea, image in the mind) बुद्धि: f., मति: f., अनुभव:, मनोगतं, मनसिजं, आभास:, भास:.—(Sensible effect) उत्पन्नं, निष्पन्नं, उत्पत्ति: f., सम्पन्नं.—(Indentation) आघातचिह्नं, अभिघातचिह्नं, भङ्ग:, छेद:.—(Number of books printed at once) एकवारे मुद्रितो ग्रन्थसमूह:.

IMPRESSIVE, a. हृदयङ्गम: -मा -मं, हृद्गम: -मा -मं, हृदयग्राही -हिणी -हि

(न्), चित्तहारी -रिणी -रि (न्), हृदयस्पृक् *m.f.n.* (श्), मर्म्मस्पृक् *m.f.n.*, विस्मयोत्पादकः -का -कं, हृद्भेदकः -का -कं, भावोत्पादकः &c.

IMPRESSIVELY, *adv.* हृदयङ्गमप्रकारेण, यथा हृदयं स्पृश्यते इति प्रकारेण.

IMPRESSIVENESS, *s.* हृदयङ्गमत्वं, हृद्गमत्वं, हृदयस्पृक्त्वं, विस्मयोत्पादकत्वं.

IMPRESSMENT, *s.* राजाज्ञया बलात्कारधरणानन्तरं नाविकादिकर्म्मणि प्रवर्त्तनं.

To IMPRINT, *v. a.* मुद्र् (nom. मुद्रयति -यितुं), मुद्रीकृ, मुद्रितं -तां -तं कृ, अङ्क् (c. 10. अङ्कयति -यितुं), चिह्न् (nom. चिह्नयति -यितुं), प्रणिधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं); 'on the mind,' हृदयनिष्ठं -ष्ठां -ष्ठं कृ, हृदये मुद्रितमिव किञ्चित् कृ, हृदये निविश्.

IMPRINTED, *p.p.* मुद्रितः -ता -तं, मुद्रीकृतः -ता -तं, अङ्कितः -ता -तं, मुद्राङ्कितः -ता -तं, कृतमुद्रः -द्रा -द्रं.—(Infixed) निक्षितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, निवेशितः -ता -तं; 'on the mind,' हृदयनिष्ठः -ष्ठा -ष्ठं, हृदयगतः -ता -तं, हृद्गतः -ता -तं, हृदयनिवेशितः -ता -तं.

To IMPRISON, *v. a.* कारायां or कारागारे निरुध् (c. 7. -रुणद्धि -रोद्धुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), कारागृहं प्रविश् (c. 10. -वेशयति -यितुं), बन्धनालये रक्ष् (c. 1. रक्षति -क्षितुं) or अवरुध् or आसिध् (c. 1. -सेधति -सेद्धुं), कारागुप्तं -प्तां -प्तं कृ.

IMPRISONED, *p.p.* कारागुप्तः -प्ता -प्तं, कारानिरुद्धः -द्धा -द्धं, कारायां बद्धः -द्धा -द्धं, काराबद्धः -द्धा -द्धं, कारागारप्रवेशितः -ता -तं, अवरुद्धदेहः -हा -हं, निरुद्धः -द्धा -द्धं, आसिद्धः -द्धा -द्धं, प्रतिबद्धः -द्धा -द्धं.

IMPRISONMENT, *s.* कारानिरोधः, निरोधः -धनं, काराबन्धनं, बन्धनं, प्रतिबन्धनं, कारागारप्रवेशनं, कारागृहप्रवेशः, कारागोपनं, कारागृहगुप्तिः *f.*, आसेधः, स्थानासेधः, रोधः, सम्प्रतिरोधकः, प्रग्रहः.

IMPROBABILITY, *s.* असम्भवः -वता -त्वं, असम्भाव्यता, असम्भावनीयता, असम्भावना, अनुपपत्तिः *f.*, अनुपपाद्यता, असङ्गतिः *f.*, असङ्गतत्वं, अघटनीयता, अभवनीयत्वं, अप्रमेयता, असाध्यता.

IMPROBABLE, *a.* असम्भवः -वा -वं, असम्भाव्यः -व्या -व्यं, असम्भावनीयः -या -यं, असम्भावितः -ता -तं, असङ्गतः -ता -तं, अनुपपन्नः -न्ना -न्नं, असत्यसन्निभः -भा -भं, असत्यसङ्काशः -शा -शं, अभवनीयः -या -यं, असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, अघटनीयः -या -यं, अघटितः -ता -तं, अघटमानः -ना -नं, अप्रमेयः -या -यं; 'it is improbable,' न उपपद्यते.

IMPROBABLY, *adv.* असम्भवेन, असम्भावनीयं, असङ्गतं, असाध्यं, अन्यथा.

IMPROBITY, *s.* असाधुत्वं -ता, अशुचित्वं, अधर्म्मः, असरलता, असारल्यं, अनृजुता, अदाक्षिण्यं, अशुद्धता, दुष्टता, अभद्रता, नीचत्वं, खलता, जिह्मता, कौटिल्यं, कापट्यं, कौटं, वक्रता.

IMPROMPTU, *adv.* पूर्व्वचिन्ताम् अकृत्वा, पूर्व्वचिन्तां विना, अचिन्तितं, अनायासेन.

IMPROMPTU, *a.* अचिन्तापूर्व्वः -र्व्वा -र्व्वं, अपूर्व्वचिन्तः -न्ता -न्तं, अयत्नपूर्व्वः -र्व्वा -र्व्वं, आकस्मिकः -की -कं, प्रस्तुतः -ता -तं, पूर्व्वविचारहीनः -ना -नं.

IMPROPER, *a.* अयुक्तः -क्ता -क्तं, अयोग्यः -ग्या -ग्यं, अनुचितः -ता -तं, अन्याय्यः -य्या -य्यं, असङ्गतः -ता -तं, अनुपयुक्तः -क्ता -क्तं, असमञ्जसः -सा -सं, अनुपपन्नः -न्ना -न्नं, अनर्हः -र्हा -र्हं, असदृशः -शी -शं, अपथ्यः -थ्या -थ्यं, असमीचीनः -ना -नं, असम्भाव्यः -व्या -व्यं, असम्भावनीयः -या -यं, अपथ्यः -थ्या -थ्यं, अयथार्थः -र्था -र्थं; sometimes expressed by कु prefixed; as, 'an improper marriage,' कुविवाहः.—(Improper to be done) अकर्त्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्य्यः -र्य्या -र्य्यं, अननुष्ठेयः -या -यं, नानुष्ठेयः -या -यं, अननुष्ठातव्यः -व्या -व्यं; 'to be spoken,' अवचनीयः -या -यं.

IMPROPERLY, *adv.* अयुक्तं, अयोग्यं, अनुपयुक्तं, अनुचितं -तेन, असाम्प्रतं -ति, असम्यक्, अन्यायेन, अन्यायतस्, असङ्गतं, अयथार्थं, अयोगतस्, अकार्य्यतस्, दुःषमं, निःषमं, असम्भावनीयं; 'acting improperly,' अकृत्यकारी -रिणी -रि (न्), व्यभिचारी &c.

IMPROPRIETY, *s.* अयुक्तिः *f.*, अयुक्तता, निर्युक्तिः *f.*, अन्यायः -यत्वं, अनुपयुक्तता, अविनयः, अविनीतता, आनुचित्यं, अनुचितत्वं, अनौचित्यं, अयोग्यता, असमञ्जसं, असामञ्जस्यं, अनुपपत्तिः *f.*, असङ्गतत्वं, व्यलीकता, असम्यक्त्वं, अयाथार्थ्यं; 'of conduct,' अमर्य्यादा, कुचर्य्या, कुचरितं, कुचेष्टितं, दुश्चरितं, दुश्चेष्टितं, अपचारः, अकार्य्यं, अकर्त्तव्यता, भ्रेषः, व्यभिचारः, अनियमः, मर्य्यादातिक्रमः; 'of speech,' अवचनीयता, अवाच्यता.

IMPROSPERITY, *s.* असमृद्धिः *f.*, अकल्याणं, अकुशलं, अशुभं, असम्पत्तिः *f.*

IMPROSPEROUS, *a.* असमृद्धः -द्धा -द्धं, अकल्याणः -णा -णं, अक्षेमवान् -वती -वत् (त्).

IMPROVABILITY, *s.* वर्धनीयता, संवर्धनीयता, बृंहणीयता, श्रेयस्त्वक्षमता.

IMPROVABLE, *a.* वर्धनीयः -या -यं, संवर्धनीयः -या -यं, बृंहणीयः -या -यं, श्रेयस्त्वक्षमः -मा -मं, भद्रतरभावक्षमः -मा -मं, वृद्धिम् आनेयः -या -यं, भद्रतरीकरणीयः -या -यं.

To IMPROVE, *v. a.* (Make better, advance in good qualities) भद्रतरं -रां -रं कृ, अधिकतरं -रां -रं कृ, भद्रतरीकृ, अधिकीकृ, वृध् (c. 10. वर्धयति -यितुं), संवृध्, परिवृध्, बृंह् (c. 10. बृंहयति -यितुं), वृद्धिं नी (c. 1. नयति, नेतुं) or प्राप् in caus. (-आपयति -यितुं), श्रेयस्त्वं or भद्रतरत्वं or भद्रतरभावं नी or प्राप्, श्रेयांसं -यसीं -यः कृ.—(Make productive, turn to good account) सफलं -लां -लं कृ, सफलीकृ, सु प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं).

To IMPROVE, *v. n.* (Grow better, advance in goodness or any excellence) भद्रतरः -रा -रं भू, भद्रतरीभू, वृध् (c. 1. वर्धते -र्धितुं), अभिवृध्, विवृध्, प्रवृध्, संवृध्, वृद्धिं गम् (c. 1. गच्छति, गन्तुं) or प्राप् (c. 5. -आप्नोति -आप्तुं), श्रेयान् -यसी -यो भू, अधिकः -का -कं भू, अधिकतरः -रा -रं भू, अधिकीभू, अधिकतरीभू, उपचि in pass. (-चीयते), अभ्युदयं or उपचयं गम् [illegible] (c. 2. [illegible]ति -तुं); 'improve in knowledge,' विद्यागमं कृ, विद्याप्राप्तिं कृ, विद्यार्जनं कृ.

IMPROVED, *p.p.* वर्धितः -ता -तं, प्रवृद्धः -द्धा -द्धं, उपचितः -ता -तं, बृंहितः -ता -तं, परिबृंहितः -ता -तं, भद्रतरीभूतः -ता -तं, अधिकीभूतः -ता -तं, समुत्थितः -ता -तं.—(Employed profitably) सफलीकृतः -ता -तं, सुप्रयुक्तः -क्ता -क्तं.

IMPROVEMENT, *s.* (Advancement in any excellence) वृद्धिः *f.*, प्रवृद्धिः *f.*, वर्धनं, उपचयः, समुत्थानं, अभ्युदयः, बृंहणं, परिबृंहणं, आधिक्यं, प्राप्तिः *f.*, आगमः.—(State of being better) श्रेयस्त्वं, भद्रतरत्वं, श्रेष्ठता, श्रैष्ठ्यं.—(Advancement in knowledge) विद्यागमः, विद्याप्राप्तिः *f.*, विद्यार्जनं.—(Progression) प्रगमनं, अग्रगमनं.—(Employment to beneficial purposes) सुप्रयोगः, सफलीकरणं.

IMPROVIDENCE, *s.* अपूर्व्वदृष्टिः *f.*, अदीर्घदृष्टिः *f.*, अपरिणामदृष्टिः *f.* -दर्शनं, अदूरदृष्टिः *f.*, अपूर्व्वचिन्ता, अपूर्व्वविवेचनं, अपूर्व्वनिरूपणं, अप्रसमीक्षा, असमीक्ष्यकारिता, पूर्व्वविवेचनाभावः, पूर्व्वचिन्ताभावः, अपूर्व्वविचारणं -णा, असावधानता.

IMPROVIDENT, *a.* अदीर्घदर्शी -र्शिनी -र्शि (न्), अदूरदर्शी &c., अपूर्व्वदृष्टिः -ष्टिः -ष्टि, अदीर्घदृष्टिः -ष्टिः -ष्टि, अपरिणामदर्शी &c., अपूर्व्वविवेकी -किनी -कि (न्), असमीक्ष्यकारी -रिणी -रि (न्), अभविष्यद्दर्शी &c.

IMPROVIDENTLY, *adv.* पूर्व्वचिन्तां विना, अग्रविवेचनां विना, अग्रनिरूपणं विना, पूर्व्वविचारणां विना, अपरिणामदृष्ट्या, असमीक्षापूर्व्वं, अप्रसमीक्ष्य, अप्रविमृश्य.

IMPROVING, *part.* or *a.* (Growing better) वर्धमानः -ना -नं, वर्धी

-विनी -वि (न्), वर्धनः -नी -नं, उपचीयमानः -ना -नं.—(Making better) वर्धकः -का -कं, वृद्धिकरः -री -रं, वृंहणः -णा -णी -णं.

Imprudence, *s.* अविनयः, अविनीतता, अनीतिः *f.*, दुर्विनीतता, दुर्नीतिः *f.*, दुर्णयः, असमीक्षा, असमीक्ष्यकारित्वं, अविज्ञता, अप्रज्ञता, अप्राज्ञत्वं, अविवेचना, अविचारः -रणा, अविचक्षणता, अवैचक्षण्यं, असावधानता, अमनस्विता.

Imprudent, *a.* अविज्ञः -ज्ञा -ज्ञं, अप्रज्ञः -ज्ञा -ज्ञं, अविचक्षणः -णा -णं, अविनीतः -ता -तं, दुर्विनीतः -ता -तं, अनभिज्ञः -ज्ञा -ज्ञं, अनीतिमान् -मती -मत् (त्), अनीतिज्ञः -ज्ञा -ज्ञं, अविमृश्यकारी -रिणी -रि (न्), असमीक्ष्यकारी &c., अमनस्वी -स्विनी -स्वि (न्), अमतिमान् -मती -मत् (त्), अविवेकी -किनी -कि (न्), अविवेचकः -का -कं, अविचारणशीलः -ला -लं, अकार्यचिन्तकः -का -कं, अबुधः -धा -धं, असावधानः -ना -नं.

Imprudently, *adv.* अविज्ञवत्, अविनीतवत्, अविमृश्य, असमीक्ष्य, असमीक्षापूर्वं, अविचारपूर्वं, अविचार्य, अनालोचितं, अविचारितं, अबुधवत्.

Impudence, *s.* निर्लज्जता -त्वं, लज्जाहीनता, अलज्जता, अलज्जा, धृष्टता, धार्ष्ट्यं, प्रगल्भता, प्रागल्भ्यं, वैयात्यं, त्रपाहीनता, अनपत्रपत्वं, निस्त्रपत्वं, निरपत्रपत्वं, अव्रीडता, व्रीडाहीनता, अविनयः, अविनीतता.

Impudent, *a.* निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं, अलज्जः -ज्जा -ज्जं, विलज्जः -ज्जा -ज्जं, अविनीतः -ता -तं, दुर्विनीतः -ता -तं, धृष्टः -ष्टा -ष्टं, अत्रपः -पा -पं, त्रपाहीनः -ना -नं, निस्त्रपः -पा -पं, निरपत्रपः -पा -पं, अनपत्रपः -पा -पं, वियातः -ता -तं, प्रगल्भः -ल्भा -ल्भं, व्रीडाहीनः -ना -नं, स्वल्पव्रीडः -डा -डं, अल्पलज्जः -ज्जा -ज्जं, अनिभृतः -ता -तं, धर्षितः -ता -तं, धृष्णक् *m.f.n.* (ज्), धृष्णुः -ष्णुः -ष्णु, त्यक्तलज्जः -ज्जा -ज्जं, प्रौढः -ढा -ढं.

Impudently, *adv.* धृष्टवत्, अविनीतवत्, दुर्विनीतवत्, अविनीतं, धार्ष्ट्येन, प्रगल्भं, प्रगल्भवत्, लज्जां विना, वैयात्येन, प्रौढवत्, वियातवत्.

To impugn, *v.a.* विपरीतं वद् (c. 1. वदति -दितुं), अपवद्, विवद्, प्रत्याख्या (c. 2. -ख्याति -तुं), अधरीकृ, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं).

Impugned, *p. p.* अपवादितः -ता -तं, प्रत्याख्यातः -ता -तं, अधरीकृतः -ता -तं, विरुद्धः -द्धा -द्धं, बाधितः -ता -तं, विप्रतिपन्नः -न्ना -न्नं.

Impugner, *s.* विपरीतवादी *m.* (न्), अपवादकः, प्रतिवादी *m.* (न्).

Impulse, *s.* वेगः, आवेगः, मनोवेगः, प्रेरणं -णा, प्रणोदः, प्रवर्त्तः -र्त्तनं, प्रोत्साहः -हनं, प्ररोचनं, शक्तिः *f.*—(Motive) हेतुः *m.*, प्रयोगः, प्रयोजनं, निमित्तं, निबन्धनं, कारणं.—(Mental impression) मनःसंस्कारः.

Impulsion, *s.* प्रेरणं -णा, प्रणोदः -दनं, प्रचोदनं, आकर्षः -र्षणं, प्रवर्त्तनं.

Impulsive, *a.* प्रेरकः -का -कं, प्रणोदकः -का -कं, प्रचोदकः -का -कं.—(Actuated by impulse) वेगी -गिनी -गि (न्), वेगवान् -वती -वत् (त्), वेगशीलः -ला -लं.

Impunctual, *a.* असमयपालकः -का -कं, असामयिकः -की -कं, अकालिकः -की -कं.

Impunity, *s.* (Exemption from punishment) अदण्डं -ण्डः, दण्डाभावः, असाहसं, अशास्तिः *f.*—(Exemption from injury or hurt) अक्षतिः *f.*, अक्षतं, अहिंसा, हिंसाभावः, अपीडा, अनाशः, अनपकारः; 'with impunity to one's self,' स्वयमक्षतेन.

Impure, *a.* अशुद्धः -द्धा -द्धं, अशुचिः -चिः -चि, अपवित्रः -त्रा -त्रं, अमेध्यः -ध्या -ध्यं, अपूतः -ता -तं, अशुद्धिः -द्धिः -द्धि, अशौची -चिनी -चि (न्), आशौची &c., अनिर्मलः -ला -लं, समलः -ला -लं, मलवान् -वती -वत् (त्), मलिनः -ना -नं, अपुण्यः -ण्या -ण्यं, अपावनः -ना -नं, शौचहीनः -ना -नं.—(Obscene) गर्हितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं, अवाच्यः -च्या -च्यं.—(Unchaste) लम्पटः -टा -टं, पांशुलः -ला -लं.

Impurely, *adv.* अशुद्धं, अपवित्रं, अपुण्यं, समलं, साशौचं, अशुचिवत्, अमेध्यं, अशुद्धवत्, मलिनं, लम्पटवत्, गर्हितं.

Impureness, impurity, *s.* अशुद्धिः *f.*, अशुद्धत्वं -ता, अशोधनं, अशुचित्वं -ता, अशुचिः *f.*, अशौचं -चत्वं, आशौचं, अपवित्रत्वं -ता, अमेध्यता, अपुण्यता, अपूतता, अपूतिः *f.*, समलता, मलवत्त्वं, मालिन्यं, मलं, कलुषत्वं, कालुष्यं, शौचहीनता, अप्रायत्यं.—(Obscenity) गर्हितत्वं, कुत्सितत्वं, अवाच्यता.—(Unchastity) लम्पटत्वं, लाम्पट्यं, पांशुलता; 'an impure thing,' अपद्रव्यं.

To impurple, *v. a.* धूम्रीकृ, धूम्रलीकृ, धूम्रल (nom. धूम्रलयति -यितुं). *See* Empurple.

Imputable, *a.* आरोपणीयः -या -यं, अध्यारोपणीयः -या -यं, सम्बन्धनीयः -या -यं, अभिसम्बन्धनीयः -या -यं.

Imputation, *s.* (Act of imputing) आरोपः -पणं, अध्यारोपः -पणं, अभिसम्बन्धनं, सम्बन्धनं, प्रसङ्गः; 'imputation of a crime,' दोषारोपः, दोषकल्पनं, दोषप्रसङ्गः.—(Charge) अभियोगः, अपवादः, अभिशंसनं, संशयः.—(Reproach) अवक्षेपः, क्षेपः, अभिवादः, परीवादः, दुर्वाक्यं, दुरुक्तं, तिरस्कारवाक्यं, कलङ्कः.

LEARNING, *s.* (Knowledge of literature, erudition) विद्या, पाण्डित्यं, ज्ञानं, विज्ञानं, वैदुष्यं, विद्वत्ता, ज्ञातृत्वं, व्युत्पत्तिः *f.*, प्राज्ञत्वं, पण्डितता -त्वं, वेत्तृत्वं, विद्यासम्पत्तिः *f.*, अक्षरसम्पत्तिः *f.*, साक्षरता, अध्ययनसम्पत्तिः *f.*—(Literature) विद्या, शास्त्रं, अक्षरं, साहित्यं.—(Sacred learning) श्रुतिः *f.*, श्रोत्रियत्वं.—(Act of learning, acquisition of learning) शिक्षा, अध्ययनं, अभ्यासः, विद्याभ्यासः, विद्याप्राप्तिः *f.*, विद्यालब्धिः *f.*, विद्यार्ज्जनं, विद्यागमः; 'cultivation of learning,' विद्यानुसेवनं; 'patronising learning,' विद्यानुपालनं; 'to affect great learning,' पण्डित (nom. पण्डितायते).

LEASE, *s.* (Of lands, houses, &c.) पट्टः, पट्टोलिका, कुम्भकीला, निर्दिष्टकालं यावत् नियमितमूल्यम् अपेक्ष्य क्षेत्रगृहादीनां परहस्तसमर्पणं.

To LEASE, *v. a.* पट्टं दा, पट्टोलिकां दा, पट्टेन क्षेत्रगृहादि परप्रयोजनीयं दा, पट्टोलिकापूर्ब्बं नियमितमूल्यम् अपेक्ष्य क्षेत्रगृहादि परप्रयोजनीयं दा or विसृज् (c. 6. -सृजति -स्रष्टुं), आविहितकालाद् निरूपितमूल्यम् अपेक्ष्य क्षेत्रगृहादि परहस्ते समृ in caus. (-अर्पयति -यितुं).

LEASED, *p. p.* पट्टेन or पट्टलिखनपूर्ब्बम् आविहितकालात् परहस्तसमर्पितः -ता -तं.

LEASEHOLD, *a.* पट्टेन or पट्टोलिकालिखनपूर्ब्बम् अध्युषितः -ता -तं.

LEASH, *s.* (Leather thong) चर्म्मबन्धः -न्धनी, चर्म्मरज्जुः *m. f.*, बन्धनरज्जुः.—(Tierce, three) त्रयं, त्रिकं; 'a leash of hares,' शशकत्रयं.

To LEASH, *v. a.* चर्म्मरज्जुना or चर्म्मरज्ज्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं).

LEASING, *s.* असत्यता, अनृतता, अलीकता, कापट्यं, मृषावादः. *See* FALSEHOOD.

LEAST, *a.* (Smallest) अल्पिष्ठः -ष्ठा -ष्ठं, कनिष्ठः -ष्ठा -ष्ठं, क्षुद्रतमः -मा -मं, क्षोदिष्ठः -ष्ठा -ष्ठं, कनीयान् -यसी -यः (स्), तनिष्ठः -ष्ठा -ष्ठं, तनीयान् &c., लघिष्ठः &c., स्तोकतमः -मा -मं, सूक्ष्मतमः -मा -मं, अतिक्षुद्रः -द्रा -द्रं, स्वल्पः -ल्पा -ल्पं, अवरः -रा -रं, अवरतमः -मा -मं, न्यूनः -ना -नं; 'least of all,' सर्व्वकनिष्ठः -ष्ठा -ष्ठं, सर्व्वकनीयान् &c., सर्व्वस्मात् क्षुद्रः -द्रा -द्रं; 'the least particle,' लेशः, लवः, कणः: 'not the least darkness is in that place,' तत्र अन्धकारस्य लेशो ऽपि नास्ति.

LEAST, *adv.* (In the least) मनाक्, किञ्चित्, अल्पिष्ठं, कनिष्ठं, लेशमपि, कियत्, सूक्ष्मं, स्तोकं; 'not in the least,' न मनाक्, न मनागपि, न किञ्चिदपि, न किमपि, न कियदपि, न सूक्ष्ममपि, न स्तोकमपि, न लेशमपि, अलेशं; 'three witnesses at least,' त्र्यवराः साक्षिणः; 'at least, at any rate,' तावत्.

LEATHER, *s.* चर्म्म *n.* (न्), दृतिः *m.*, पशुत्वक् *f.* (च्), पशुचर्म्म *n.*, कृत्तिः *f.*, अजिनं, वर्द्धं, शिपिः *f.*; 'a leather thong,' चर्म्मबन्धः -न्धनं, वरत्रा, वर्द्ध्री; 'covered with leather,' चर्म्मावृतः -ता -तं, चर्म्मावनद्धः -द्धा -द्धं, चर्म्माच्छादितः -ता -तं.

LEATHER, *a.* चर्म्म in comp., चर्म्ममयः -यी -यं; 'a leather shoe,' चर्म्मपादुका; 'a leather band,' चर्म्मबन्धः. *See* LEATHERN.

To LEATHER, *v. a.* चर्म्मदण्डेन तड् (c. 10. ताडयति -यितुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

LEATHER-CUTTER, *s.* चर्म्मछिद् *m.*, चर्म्मछेदनकारी *m.* (न्), चर्म्मावकर्त्ती *m.*

LEATHER-DRESSER, *s.* चर्म्मकारः -रकः, चर्म्मकारी *m.* (न्), चर्म्मकृत्, चर्म्मारः.

LEATHERN, *a.* चार्म्मिकः -की -कं, चार्म्मः -र्म्मी -र्म्मं, चर्म्मी -र्म्मिणी -र्म्मि (न्), चर्म्ममयः -यी -यं, चर्म्मनिर्म्मितः -ता -तं, दार्त्तेयः -यी -यं, आजिनीयः -या -यं, पशुत्वङ्मयः -यी -यं, चर्म्म in comp.; 'a leathern bottle,' दृतिः *m.*

LEATHER-SELLER, *s.* चर्म्मविक्रेता *m.* (तृ), चर्म्मविक्रयी *m.* (न्), चर्म्मविक्रयोपजीवी *m.*

LEATHERY, *a.* चर्म्मवद् दुःखभेद्यः -द्या -द्यं, चर्म्मसगुणः -णा -णं.

LEAVE, *s.* (Permission) अनुज्ञा, अनुमतिः *f.*, अभ्यनुज्ञा, अनुज्ञानं, समनुज्ञानं, अनुमोदनं; 'leave to depart,' अनुज्ञा; 'to give leave,' अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं), अनुज्ञां कृ or दा.—(Farewell) आमन्त्रणं, आप्रच्छनं; 'to bid farewell,' आमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्, आप्रच्छ् (c. 6. -पृच्छते -ति -प्रष्टुं).

To LEAVE, *v. a.* (Abandon, forsake) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, सन्त्यज्; हा (c. 3. जहाति, हातुं), अपहा, विहा, प्रहा, अपाहा, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अतिसृज्, व्यपसृज्, रह् (c. 10. रहयति -यितुं), विरह्, उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्, परिहृ (c. 1. -हरति -हर्त्तुं), वृज् (c. 10. -वर्जयति -यितुं), परिवृज्, विवृज्.—(Depart from)

अपगम् (c. 1. -गच्छति -गन्तुं), अपगम्, विगम्, अपया (c. 2. -याति -तुं), अपे (c. 2. अपैति -तुं), व्यपे, अपसृ (c. 1. -सरति -सर्तुं), प्रस्था (c. 1. -तिष्ठति -स्थातुं), विप्रस्था.—(Leave remaining, suffer to remain) शिष् (c. 10. शेषयति -यितुं), अवशिष्, परिशिष्, उच्छिष्, समवशिष्, उद्धृ (c. 10. -धारयति -यितुं), शिष्टं -ष्टां कृ, अवशिष्टं -ष्टां कृ, अवशिष्टीकृ; 'to be left remaining,' शिष् in pass. (शिष्यते), अवशिष्.—(Commit, trust to) सृ in caus. (-अर्पयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), न्यासीकृ.—(Bequeath) मृत्युपत्रेण प्रदा or मृत्युलेखेन दा.—(Leave off, desist from) विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विनिवृत् with abl. c., मुच् (c. 6. मुञ्चति, मोक्तुं), अवमुच्, अवसृज्, अपास् (c. 4. -अस्यति -असितुं), व्युदस्, त्यज्, परित्यज्; 'the peacock leaves off dancing,' परित्यक्तनर्त्तनो मयूरः; 'it leaves off raining,' निर्वर्षति.—(Leave out) वृज्, अपास्, हा, अपाहा.—(Leave behind, distance) दूरीकृ, दव (nom. दवयति -यितुं).

To LEAVE, *v. n.* (Cease, leave off) विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निवृत्, विनिवृत्, विगम् (c. 1. -गच्छति -गन्तुं), अपया (c. 2. -याति -तुं), शम् (c. 4. शाम्यति, शमितुं), विच्छिद् in pass. (-च्छिद्यते).

LEAVED, *a.* (Having leaves) पत्री -त्रिणी -त्रि (न्), पर्णी -र्णिनी &c., सपत्रः -त्रा -त्रं, सपर्णः -र्णा -र्णं, सदलः -ला -लं; 'two-leaved,' द्विपर्णः -र्णा -र्णं.

LEAVEN, *s.* किण्वः -ण्वं, नग्नहूः *m.*, मण्डः -ण्डं, कारोत्तरः, कारोत्तमः, कादम्बरीबीजं.—(Any thing which works a change in the mass) विकारजनकं किञ्चिद् वस्तु.

To LEAVEN, *v. a.* किण्वनिवेशनपूर्व्वम् अम्लरसीकं or अम्लत्वापं जन् (c. 10. जनयति -यितुं), अम्लरसीकरणार्थं किण्वं निविश् (c. 10. -वेशयति -यितुं) or प्रविश्.—(Taint, imbue) दुष् (c. 10. दूषयति -यितुं), रञ्ज् (c. 10. रञ्जयति -यितुं).

LEAVINGS, *s. pl.* (Any thing left, remnants) शिष्टं, अवशिष्टं, उच्छिष्टं, परिशिष्टं, शेषः -षं, परिशेषः, अवशेषः, उच्छेषणं, शेषभागः, परभागः, शेषखण्डः -ण्डं, उद्वर्त्तः, जुष्टं, समुज्झितं.—(Of food) शेषान्नं, उच्छिष्टान्नं, भुक्तशेषः -षं, भुक्तावशेषः -षं, अन्नशेषः -षं, भुक्तसमुज्झितं, परभुक्तोज्झितं, भुक्तोच्छिष्टं, भक्षितशेषं, खादिष्टं, फेलकः, फेला -लि: -ली *f.*; 'one who eats leavings,' शेषभुक् *m.* (ज्), शेषभोजी *m.* (न्), उच्छिष्टभोजनः; 'eating leavings,' शेषभोजनं, उच्छिष्टभोजनं.—(Offal) मलं, विमांसं.

LECHER, *s.* लम्पटः, स्त्रीलम्पटः, कामुकः, कामुकजनः, व्यवायी *m.* (न्), रतार्थी *m.* (न्), सुरतार्थी *m.* (न्), स्त्रीपरः.

To LECHER, *v. n.* लम्पटवद् आचर् (c. 1. -चरति -रितुं), रतार्थी भू, कामुको भू.

LECHEROUS, *a.* कामुकः -का -कं, कामी -मिनी -मि (न्), कामनः -ना -नं, रतार्थी -र्थिनी -र्थि (न्), सुरतार्थी &c., कामासक्तः -क्ता -क्तं, व्यवायी -यिनी -यि (न्), सम्भोगी -गिनी -गि (न्), सम्भोगासक्तः &c., सम्भोगार्थी &c., भोगासक्तः &c., व्यवायपरायणः -णा -णं, स्त्रीपरः, स्त्रीरतः, स्त्रीव्यासक्ती *m.* (न्), स्त्रीलम्पटः, स्त्रीव्यसनी *m.* (न्), तरलः -ला -लं, अभीकः -का -कं, वियातः -ता -तं.

LECHEROUSLY, *adv.* लम्पटवत्, कामुकवत्, सकामं, रतासक्तवत्, कामपूर्व्वं.

LECHEROUSNESS, LECHERY, *s.* कामुकत्वं, लम्पटत्वं -ता, लाम्पट्यं, रतार्थित्वं, रतासक्तिः *f.*, कामासक्तिः *f.*, सम्भोगासक्तिः *f.*, व्यवायः -यित्वं, स्त्रीव्यसनं, स्त्रीव्यासक्तः, वैयात्यं, हेला -लनं.

LECTION, *s.* (Reading) पाठः, अध्ययनं.—(Variety in copies of a manuscript) पाठान्तरं, पाठभेदः, पाठः, द्विरुक्तपाठः.

LECTOR, *s.* पाठकः, पठिता *m.* (तृ), अध्येता *m.* (तृ), अध्यायी *m.* (न्).

LECTURE, *s.* पाठः, निपाठः, पाठनं, पठनं, अध्यायः, अध्ययः -यनं, अध्यापनं, वादः, व्याख्यानं.—(Reprimand) वाग्दण्डः, वाक्शासनं, भर्त्सनवाक्यं.

To LECTURE, *v. a.* पठ् (c. 10. पाठयति -यितुं), अधी in caus. (अध्यापयति -यितुं, rt. इ), उपदिश् (c. 6. -दिशति -देष्टुं), पाठं कृ, अध्यापनं कृ.—(Reprove) प्रत्यादिश्, निन्द् (c. 1. निन्दति -न्दितुं), वाग्दण्डं कृ, निन्दावाक्यं कृ.

To LECTURE, *v. n.* पठ् (c. 1. पठति -ठितुं), अधी (c. 2. अधीते, अध्येतुं, rt. इ), वाक्यं श्रु (c. 10. श्रावयति -यितुं), पाठं कृ, अध्ययनं कृ.

LECTURED, *p. p.* अध्यापितः -ता -तं, पाठितः -ता -तं.—(Reprimanded) प्रत्यादिष्टः -ष्टा -ष्टं, निन्दितः -ता -तं, उपालब्धः -ब्धा -ब्धं.

LECTURER, *s.* पाठकः, अध्यापकः, पठिता *m.* (तृ), अध्येता *m.* (तृ), अध्यायी *m.* (न्), पाठकारी *m.* (न्), शिक्षकः, उपदेशकः, व्याख्याता *m.* (तृ), प्रवक्ता *m.* (कृ), वक्ता, वादी *m.* (न्), वाचकः, नागरः; 'in theology,' धर्म्मप्रवक्ता *m.*, धर्म्मभाषकः.

LECTURE-ROOM, *s.* पाठशाला, पाठगृहं, अध्ययनशाला, अध्ययनगृहं.

LECTURESHIP, *s.* पाठकत्वं, अध्यापकत्वं, प्रवक्तृत्वं, वक्तृत्वं, शिक्षकत्वं.

LED, *p. p.* नीतः -ता -तं, आनीतः -ता -तं, समानीतः -ता -तं; 'being led,' नीयमानः -ना -नं.—(Guided) सञ्चारितः -ता -तं.—(As life, time) नीतः -ता -तं, गमितः -ता -तं, यापितः -ता -तं, प्रवृत्तः -त्ता -त्तं.—(Led on by, headed by) पुरःसरः -रा -रं, पुरस्सरः -रा -रं, पुरोगमः -मा -मं, मुखः -खा -खं in comp.; as, 'led on by Karna,' कर्णमुखः -खा -खं, कर्णपुरोगमः -मा -मं &c.; 'having led, नीत्वा.

LEDGE, *s.* (Stratum, layer) फलकः -कं, स्तरः, आस्तरः -रणं.—(Ridge, projecting part) कटकः -कं, कूटं, दन्तः -न्तकः.—(Row) आलिः -ली.—(Ledge of a rock) शिला, शिलाफलकं.

LEDGER, *s.* महागणनापुस्तकं, बृहद्गणनापुस्तकं, वाणिज्यपुस्तकं.

LEE, *s.* (Sediment) See LEES.—(Calm or sheltered place) निर्वातस्थानं, निर्वातदेशः.—(Side opposite to that on which the wind blows) वाताभिमुखदिशा, वायुप्रतिमुखदेशः; 'under the lee of the land,' तीरोपान्ते.

LEE-WARD, *a.* or *adv.* (In the same direction as the wind) वातानुकूलः -ला -लं, वातानुलोमः -मा -मं, अनुवातं.—(In an opposite direction to the wind) प्रतिवातं, वाताभिमुखदिशि, वाताभिमुखं, वायुप्रतिमुखदिशि.

LEECH, *s.* रक्तपा, रक्तपायिनी, रक्तपाता, जलौका, जलूका, जलाकाः *f.* (स्), जलुका, जलोका, जलिका, जलौकसः -सा -सं, जलायुका, जलालुका, जलायुका, जलालोका, जलोरगी, जलजन्तुका, जलसर्पिणी, जलाटनी, पटालुका, वार्य्योकाः *f.* (स्), वार्य्योकः, वारिक्रिमिः *m.*, वेधिनी, भ्रमणी, कारुण्डी.—(Physician) वैद्यः, चिकित्सकः, रोगहृत् *m.*, रोगशान्तकः, भिषक् *m.* (ज्).

To LEECH, *v. a.* कित् in des. (चिकित्सति -त्सितुं), रोगशमनं कृ.

LEEK, *s.* कन्दः -न्दं, तीक्ष्णकन्दः, महाकन्दः, पलाण्डुः *m.*, सुकन्दकः, शाकः.

LEER, *s.* कटाक्षः, नेत्रकटाक्षः, अपाङ्गदर्शनं, कटाक्षावेक्षणं, कटाक्षावलोकनं, अपाङ्गप्रसरः, दृष्टिविक्षेपः, तिर्य्यक्प्रेक्षणं, साचिविलोकितं, काक्षः, वक्रेराटः, कक्केराटुः *m.*, विकूणनं, दृष्टिपातः, कुञ्चितं.

To LEER, *v. n.* कटाक्षेण दृश् (c. 1. पश्यति, द्रष्टुं), अपाङ्गाद् दृश् or ईक्ष् (c. 1. ईक्षते -क्षितुं), कटाक्ष (nom. कटाक्षयति -यितुं), कटाक्षावेक्षणं कृ, कटाक्षपातं कृ, अपाङ्गदर्शनं कृ, दृष्टिविक्षेपं कृ, साचि or तिर्य्यग् विलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं), कुञ्च (c. 1.

-लायते -लोतुं).

Leered upon, *p. p.* कटाक्षितः -ता -तं, कटाक्षावेक्षितः -ता -तं, कटाक्षेण दृष्टः -ष्टा -ष्टं, शाचिविलोकितः -ता -तं, कुञ्चितः -ता -तं.

Leering, *part.* or *a.* लोलापाङ्गः -ङ्गा -ङ्गं, अपाङ्गदर्शी -र्शिनी -र्शि (न्), कटाक्षावलोकी -किनी -कि (न्), शाचिदृष्टिः -ष्टिः -ष्टि, तिर्य्यग्दृष्टिः &c., कुलेरः -रा -रं.

Lees, *s. pl.* मलं, उच्छिष्टं, शेषं, किट्टं, खलं, कल्कं, विनीयः.

Left, *p. p.* (Abandoned) त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, उत्सृष्टः -ष्टा -ष्टं, विसर्जितः -ता -तं, रहितः -ता -तं, विरहितः -ता -तं, हीनः -ना -नं, उज्झितः -ता -तं, समुज्झितः -ता -तं, प्रोज्झितः -ता -तं, विधुतः -ता -तं, वर्जितः -ता -तं, धूतः -ता -तं.—(Left remaining) शिष्टः -ष्टा -ष्टं, अवशिष्टः -ष्टा -ष्टं, अवशेषितः -ता -तं, शेषः -षा -षं, उच्छिष्टः -ष्टा -ष्टं, उद्वृत्तः -त्ता -त्तं, उद्धर्त्तः -र्त्ता -र्त्तं, उद्वेरितः -ता -तं, अनारितः -ता -तं; 'to be left remaining,' शिष् in pass. (शिष्यते), अवशिष्.

Left, *a.* (Not right) वामः -मा -मं, सव्यः -व्या -व्यं, दक्षिणेतरः -रा -रं, प्रतिलोमः -मा -मं; 'the left,' सव्यं; 'left and right,' सव्यापसव्यं; 'the left hand,' वामहस्तः, वामपाणिः *m.*, सव्यं; 'the left arm,' वामबाहुः *m.*; 'the left shoulder,' वामस्कन्धः; 'the left side,' वामकुक्षिः *m.*, वामाङ्गं; 'that is on the left side,' वामस्थः -स्था -स्थं.

Left-handed, *a.* सव्यसाची -चिनी -चि (न्), वामहस्तसेवी -विनी -वि (न्), दक्षिणहस्तात् वामहस्तम् अधिकं व्यवहरति यः or या.

Leg, *s.* जङ्घा, प्रसृता, पादः, प्रेङ्खा, टङ्का, टङ्कः, अंह्रिः *m.*, अंघ्रिः *m.*, अधमाङ्गं; 'relating to the leg,' जाङ्घिकः -की -कं; 'enlargement of the leg,' श्लीपदं; 'having a swelled leg,' कुम्भपादः *m.*, कुम्भपदी *f.*; 'long-legged,' दीर्घजङ्घः -ङ्घा -ङ्घं, ऊर्द्ध्वजानुः -नुः -नु, ऊर्द्ध्वज्ञुः -ज्ञुः -ज्ञु, ऊर्द्ध्वज्ञः -ज्ञा -ज्ञं, दीर्घपादः -दा -दं, दीर्घपाद् *m. f. n.*

Legacy, *s.* मृत्युलेखार्पितदानं, मृतपत्रार्पितदानं, मृत्युपत्रस्थदानं, मृतदानं, मृतलेखदानं, मृतपत्राङ्कितदानं, मुमूर्षुदानं, मुमूर्षुदत्तं, उत्तरदानं, मृतलेखस्थदानं, आसन्नमरणे दानं or प्रदानं.

Legal, *a.* (Conformable to law) धर्म्यः -र्म्या -र्म्यं, धर्म्मानुसारी -रिणी -रि (न्), स्मार्त्तः -र्त्ती -र्त्तं, व्यावहारिकः -की -कं, व्यवहारिकः &c., स्मृतिशास्त्रानुगतः -ता -तं, धर्म्मशास्त्रानुसारी &c., आचारिकः -की -कं, शास्त्रीयः -या -यं, राज्यव्यवस्थानुसारी &c., व्यवस्थानुरूपः -पा -पं, राज्यनियमानुसारी &c., न्यायानुसारी &c.—(Relating to law) स्मार्त्तः &c., व्यावहारिकः &c., व्यवहारसम्बन्धी &c., व्यवहारविषयः -या -यं, धर्म्म in comp., स्मृति in comp.—(Enjoined, permitted by law) स्मृत्युक्तः -क्ता -क्तं, शास्त्रोक्तः &c., स्मृतिशास्त्रविहितः -ता -तं, स्मृतिशास्त्रप्रोक्तः &c., राज्यनियमविहितः -ता -तं, व्यवहारविधिविहितः -ता -तं, धर्म्माभिनिविष्टः -ष्टा -ष्टं, शास्त्राभिनिविष्टः &c.—(According to the law of works, resting on works for salvation) कर्म्ममार्गी -र्गिणी -र्गि (न्), कर्म्ममार्गावलम्बी -म्बिनी -म्बि (न्), कर्म्ममार्गसेवी -विनी -वि (न्), कर्म्ममार्गाश्रयी -यिणी -यि (न्), कर्म्मशीलः -ला -लं; 'legal proceeding,' व्यवहारः; 'a written legal opinion,' पट्टोल्लिका; 'incorrect legal opinion,' अव्यवस्था. *See* Law, lawful.

Legalist, *s.* (One who relies on works for salvation) कर्म्ममार्गावलम्बी *m.* (न्), कर्म्मावलम्बी *m.*, कर्म्ममार्गाश्रयी *m.* *See* Legal.

Legality, *s.* धर्म्यता, धर्म्मानुसारः -रित्वं, धर्म्मशास्त्रानुसारः -रिता, स्मृतिशास्त्रानुसारः -रिता, व्यवहारविध्यनुरूपता, राज्यव्यवस्थानुरूपता, व्यवस्थानुसारित्वं. *See* Lawfulness.—(Reliance on works for salvation) कर्म्मावलम्बनं, कर्म्मनिष्ठा, कर्म्ममार्गसेवा, कर्म्ममार्गाश्रयः.

To legalize, *v. a.* धर्म्यं -र्म्यां -र्म्यं कृ, शास्त्रसम्मतं -तां कृ, स्मृतिसम्मतं -तां कृ, धर्म्मसम्मतं -तां कृ, व्यवस्थागतं -तां कृ, विधिगतं -तां कृ, विहितं -तां कृ, विधिविहितं -तां कृ, अनुमन् (c. 4. -मन्यते -मन्तुं), अनुज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), व्यवस्था in caus. (-स्थापयति -यितुं).

Legalized, *p. p.* व्यवस्थागतः -ता -तं, विधिगतः -ता -तं, धर्म्मसम्मतः -ता -तं.

Legally, *adv.* धर्म्मेण, धर्म्मतस्, धर्म्मानुसारेण -रात्, यथाधर्म्मं, न्यायतस्, न्यायानुसारेण, यथान्यायं, स्मृतिशास्त्रानुसारेण, धर्म्मशास्त्रानुसारेण. *See* Lawfully.

Legate, *s.* दूतः, राजदूतः, राजप्रतिनिधिः *m.*—(Pope's ambassador) रोमीयधर्म्माधिपतेर् दूतः or प्रतिनिधिः.

Legatee, *s.* मृतपत्रदानाधिकारी *m.* (न्), मृतलेखदानाधिकारी *m.*, मृतदानग्राही *m.*, मृतरिक्थभागी *m.*, मृतधनभागी *m.*, मृत्युपत्रस्थदानाधिकारी *m.*, उत्तराधिकारी *m.*, अंशभाक् *m.* (ज्).

Legation, *s.* दूत्यं, दौत्यं, दूतत्वं, दूतकर्म्म *n.* (न्), दूतक्रिया, दूतधर्म्मः.

Legator, *s.* मृत्युलेखदानकारी *m.* (न्), मृत्युपत्रदानकारी, उत्तरदानकारी *m.*, मृत्युपत्रेण दानकारी *m.*, मृत्युकाले रिक्थप्रदाता *m.* (तृ).

Legend, *s.* पुरावृत्तकथा, पुराणकथा, प्राचीनकथा, पुरावृत्ताख्यानं, पुराणोपाख्यानं, पुरावृत्तं, लोककथा, जनकथा, कथा, आख्यानं, आख्यायिका, चरित्रं, चरितं, पुराणं, इतिहासः.—(Story of a saint or holy place) माहात्म्यं.

Legendary, *a.* पुराणकथितः -ता -तं, पुराणोक्तः -क्ता -क्तं, पौराणिकः -की -कं, पुरावृत्तकथकः -का -कं, ऐतिहासिकः -की -कं, कथिकः -की -कं.

Legendary, *s.* (Reciter of legends) पुरावृत्तकथिकः, पुराणकथकः, इतिहासवक्ता *m.* (क्तृ), ऐतिहासिकः.

Legerdemain, *s.* हस्तलाघवं, लघुहस्तत्वं, हस्तचापल्यं, इन्द्रजालः -लं, जालं, माया, कुहकः, कुहकवृत्तिः *f.*, कुसृतिः *f.*, इन्द्रियमोहः.

Legged, *a.* (In composition) जङ्घः -ङ्घा -ङ्घं, पादः -दा -दं, पदः -दा -दं, पाद् *m. f. n.*; 'long-legged,' दीर्घजङ्घः &c.; 'two-legged,' द्विपदः &c.

Leggings, *s.* स्थूलवस्त्रमयं जङ्घात्राणं or जङ्घावरणं, जङ्घोत्तरीयं.

Legibility, *s.* पठनीयता, पाठ्यता, पठनयोग्यता, पठनशक्यता, सुवाच्यता, स्पष्टाक्षरत्वं, स्पष्टता, व्यक्तता.

Legible, *a.* पठनीयः -या -यं, पाठ्यः -ठ्या -ठ्यं, पठनयोग्यः -ग्या -ग्यं, पठनशक्यः -क्या -क्यं, सुवाच्यः -च्या -च्यं, स्पष्टाक्षरः -रा -रं, व्यक्ताक्षरः -रा -रं, सुस्पष्टः -ष्टा -ष्टं, अध्येतव्यः -व्या -व्यं, अध्ययनीयः -या -यं.

Legibly, *adv.* स्पष्टाक्षरैः, सुस्पष्टाक्षरेण, सुस्पष्टं, सुव्यक्तं.

Legion, *s.* (Body of soldiers) सैन्यदलं, सैन्यगुल्मः, सैन्यव्यूहः, सैन्यसमूहः, योधसमूहः.—(Host) चमूः *f.*, सेना, वाहिनी.—(A multitude, great number) वृन्दं, समवायः, निवहः, बाहुल्यं, चक्रं.

Legionary, *a.* वाहिनीसम्बन्धी -न्धिनी -न्धि (न्), चाक्रिकः -की -कं.

To legislate, *v. a.* व्यवस्थां कृ or विधा (c. 3. -दधाति -धातुं), नियमान् or विधीन् स्था in caus. (स्थापयति -यितुं) or रच् (c. 10. रचयति -यितुं) or प्रक्लृप् (c. 10. -कल्पयति -यितुं) or प्रशास् (c. 2. -शास्ति -शासितुं), व्यवस्था in caus.

Legislation, *s.* व्यवस्थाकरणं, नियमस्थापना, विधिस्थापना, व्यवस्थारचना -नं, व्यवस्थाप्रकल्पनं, विधिप्रकल्पनं, व्यवस्थाविधानं.

Legislative, *a.* व्यवस्थाकारी -रिणी -रि (न्), व्यवस्थापकः -का -कं, नियमस्थापकः -का -कं, विधिस्थापकः -का -कं, नियमरचकः -का -कं, नियमविधायी -यिनी -यि (न्), व्यवस्थाविधायी, &c., स्मृतिकारी &c.

Legislator, *s.* व्यवस्थाकारः -रकः, व्यवस्थाविधायी *m.* (न्), विधिस्थापकः, नियमस्थापकः, व्यवस्थारचकः, व्यवस्थापकः, धर्म्मशास्त्ररचकः, शासिता *m.* (तृ), शास्ता *m.* (स्तृ), प्रयोजकः.

LEGISLATURE, *s.* विधिस्थापनाधिकारिणी सभा, व्यवस्थाकरणाधिकारिणी सभा, व्यवस्थाविधायिनी सभा, विधिस्थापकसभा, व्यवस्थारचकसभा.

LEGIST, *s.* *See* LAWYER.

LEGITIMACY, *s.* (Lawfulness of birth) औरसता -त्वं, उरस्यता -त्वं, धर्म्मजत्वं, धर्म्मपत्नीजत्वं, धर्म्मपत्नीजन्म *n.* (न्), औरसजन्म *n.*, दम्पतिजन्म *n.*, दम्पत्युद्भवः, सुजन्म *n.*, जात्यता -त्वं, वैधजन्म *n.*—(Genuineness) सत्यता, यथार्थता, अकृत्रिमता, अकल्पितत्वं, वास्तविकता.

LEGITIMATE, *a.* (Lawfully born) धर्म्मजः -जा -जं, औरसः -सी -सं, उरस्यः -स्या -स्यं, धर्म्मपत्नीजः -जा -जं, दम्पतिजातः -ता -तं, सुजन्मा -न्मा -न्म (न्), जात्यः -त्या -त्यं, औरसजातः -ता -तं, विवाहजातः &c., विधिजातः &c., धर्म्यः -र्म्या -र्म्यं; 'a legitimate wife,' धर्म्मपत्नी; 'a legitimate son,' औरसः, उरस्यः, औरस्यः; 'daughter,' औरसी, उरस्या.—(Genuine, just, right) सत्यः -त्या -त्यं, वास्तवः -वी -वं, यथार्थः -र्था -र्थं, यथान्यायः -या -यं, न्याय्यः -य्या -य्यं, यथायोग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं.

To LEGITIMATE, *v. a.* औरसीकृ, औरसत्वं दा, औरससमं -मां कृ, धर्म्यं -र्म्यां कृ.

LEGITIMATELY, *adv.* धर्म्मेण, धर्म्मानुसारेण, यथाधर्म्मं, न्यायतस्, न्यायानुसारेण, यथान्यायं, युक्तं, उपयुक्तं, सम्यक्, यथायोग्यं, यथोचितं, समञ्जसं.

LEGITIMATION, *s.* औरसीकरणं, औरससमीकरणं, औरसाधिकारदानं.

LEGUME, LEGUMEN, *s.* शमी, सिम्बा, बीजकोशः, बीजगुप्तिः *f.*, पुटः.—(Pulse) शमीधान्यं, द्विदलं, त्रिपुटः, धान्यवीरः, सतीलकः.

LEISURABLE, *a.* सावकाशः -शा -शं, निर्व्यापारः -रा -रं, व्यापारशून्यः -न्या -न्यं, निष्कर्म्मकः -का -कं, निष्क्रियः -या -यं, कर्म्मरहितः -ता -तं, कार्य्यशून्यः -न्या -न्यं.

LEISURE, *s.* अवकाशः, अवसरः, सावकाशता, विश्रामः, कार्य्यनिवृत्तिः *f.*, कार्य्यविच्छेदः, निर्वृतिः *f.*, विश्रान्तिः *f.*, विश्रमः, स्वाधीनकालः, क्षणः, वितानं, सन्धिः *m.*; 'at leisure,' सावकाशः -शा -शं, अवकाशप्राप्तः -प्ता -प्तं, प्राप्तावकाशः -शा -शं, प्राप्तावसरः -रा -रं, व्यापारशून्यः -न्या -न्यं, निर्व्यापारः -रा -रं, कार्य्यरहितः -ता -तं, निष्क्रियः -या -यं, निष्कर्म्मकः -का -कं, शून्यः -न्या -न्यं; 'want of leisure,' अनवकाशः, अनवसरः; 'having no leisure,' निरवकाशः -शा -शं, अनवकाशः -शा -शं, निरवसरः -रा -रं.

LEISURELY, *a.* (Done at leisure) सावकाशः -शा -शं, अत्वरितः -ता -तं, विलम्बितः -ता -तं, मन्दः -न्दा -न्दं, अक्षिप्रः -प्रा -प्रं, अशीघ्रः -घ्रा -घ्रं.

LEISURELY, *adv.* सावकाशं, अत्वरितं, अत्वरया, मन्दं, मन्दं मन्दं, विलम्बेन, विलम्बितं, शनैः, शनैः शनैः, अक्षिप्रं, अशीघ्रं.

LEMON, *s.* (The fruit) जम्बीरफलं, जम्भीरफलं.—(The tree) जम्बीरः, जम्भीरः, जम्बिरः, जम्भः -म्भकः -म्भलः -म्भरः -म्भी *m.* (न्), फलपूरः -रकः, बीजपूरः, अम्लकेशरः, केशराम्लः, दन्तशठः, पूर्णबीजः, बीजकः, बीजपूर्णः, मातुलुङ्गः -ङ्गकः, गिलः, रुचकः, इञ्जकः, वृहच्चित्तः, छोलङ्गः.

LEMONADE, *s.* जम्बीररसः, शर्करादिमिश्रितं जम्बीररसमयं पानीयं.

LEMURES, *s. pl.*, रात्रिचराः *m. pl.*, वेतालाः *m. pl.*, पिशाचाः *m. pl.*, राक्षसाः *m. pl.*

To LEND, *v. a.* (Give to another for temporary use) निरूपितकालं यावत् किञ्चिद् द्रव्यं परप्रयोजनीयं दा (c. 3. ददाति, दातुं), आविहितकालात् प्रयोज्यं किञ्चिद् द्रव्यं परहस्ते समृ in caus. (-अर्पयति -यितुं) or ऋ or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or न्यस् (c. 4. -अस्यति -असितुं) or परस्मिन् समृ, निरूपितकाले प्रतिदातव्यं or प्रतिदेयं किञ्चिद् द्रव्यं दा or समृ, निरूपितकालपर्य्यन्तं द्रव्यप्रयोगं कृ.—(Give to be returned in kind, as money, a loaf of bread, &c.) ऋणं दा, ऋणं समृ or ऋ in caus., ऋणदानं कृ; 'to lend money,' धनप्रयोगं दा or कृ, परप्रयोज्यं धनं दा, आविहितकालात् प्रयोजनीयं धनं परस्मै दा or परस्मिन् समृ; 'to lend money at interest,' कुसीदं कृ, कौसीद्यं कृ, कलान्तिकां कृ; 'lend me three loaves of bread,' पूपत्रयं मह्यं ऋणं देहि.—(Grant, furnish, afford) दा, प्रदा, ऋ, समृ, परिक्लृप् (c. 10. -कल्पयति -यितुं), उपस्था in caus. (-स्थापयति -यितुं); 'he lends an ear,' कर्णं ददाति, कर्णम् अर्पयति, कर्णार्पणं करोति; 'to lend assistance,' उपकृ, साहाय्यं कृ.

LENDER, *s.* ऋणदाता *m.* (तृ), ऋणदायी *m.* (न्), ऋणदः, ऋणसमर्पकः, निक्षेप्ता *m.* (प्तृ), न्यासकर्त्ता *m.* (र्त्तृ), प्रयोगदाता, उत्तमर्णः -र्णी *m.* (न्).

LENDING, *s.* ऋणदानं, ऋणसमर्पणं, ऋणार्पणं, निरूपितकालपर्य्यन्तं or आविहितकालात् परहस्ते द्रव्यसमर्पणं.

LENGTH, *s.* (Extent) दैर्घ्यं दीर्घत्वं -ता, द्राघिमा *m.* (न्), आयामः, आयतिः *f.*, प्रयामः, विस्तारः, विस्तृतिः *f.*, विस्तरः, विततिः *f.*, प्रततिः *f.*, सन्ततिः *f.*, वितानः -नं -नकं, प्रपञ्चः, आरोहः, पाटः; 'length of the journey,' अध्वदीर्घत्वं.—(Measure) परिमाणं, प्रमाणं, मानं; 'the length of a rope,' रज्जुपरिमाणं; 'the length of the day and night,' अहोरात्रस्य परिमाणं.—(Extent of duration) कालदीर्घत्वं, कालदैर्घ्यं, दीर्घकालः, चिरकालः -लं; 'for a length of time,' चिरकालं, बहुकालं -लात्; 'length of life,' आयुर्दीर्घत्वं.—(Reach, range, limit) पर्य्यन्तं, मात्रं, अवधिः *m.*, अन्तः, प्रमाणं, मर्य्यादा; 'to such a length,' एतावत्पर्य्यन्तं; 'to a great length,' अतिमात्रं, अतिमर्य्यादं, अत्यन्तं.—(At length, at full length) विस्तरेण, सुविस्तरेण, सुविस्तरं, विस्तरशस्, सविस्तरं, सुविस्तीर्णं, असंक्षेपतस्, असंक्षिप्तं; 'spread out at full length,' विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं; 'to lie at full length,' दण्डवत् पत् (c. 1. पतति -तितुं), दण्डासनं कृ.—(At length, at last, after long delay) शेषे अनन्तरं, तदनन्तरं, चिरकालात्परं, दीर्घकालात्परं, दीर्घकाले गते.

To LENGTHEN, *v. a.* दीर्घीकृ, द्राघ (nom. द्राघयति -यितुं), वितन् (c. 8. -तनोति -नितुं), प्रतन्, विततीकृ, प्रसृ (c. 10. -सारयति -यितुं), विसृ, आयम् (c. 1. -यच्छति -यन्तुं), प्रपञ्च् (c. 10. -पञ्चयति -यितुं), विस्तृ (c. 10. -स्तारयति -यितुं).

To LENGTHEN, *v. n.* द्राघ (c. 1. द्राघते -घितुं), दीर्घीभू, आयम् (c. 1. -यच्छते -यन्तुं), आयतीभू, विततीभू, विस्तृ in pass. (-स्तीर्य्यते).

LENGTHENED, *p. p.* दीर्घीकृतः -ता -तं, आयतः -ता -तं, आयामितः -ता -तं, समायतः -ता -तं, व्यायतः -ता -तं, विततः -ता -तं, प्रविततः -ता -तं, आततः -ता -तं, विस्तृतः -ता -तं, विस्तीर्णः -र्णा -र्णं, विरूढः -ढा -ढं, प्रसृतः -ता -तं.

LENGTHWISE, *adv.* अन्वायतनं, अन्वायामं, अन्वायति, आयामदिशि.

LENGTHY, *a.* दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (त्), आयतिमान् &c., आयामवान् &c., विस्तीर्णः -र्णा -र्णं, दीर्घसूत्रः -त्रा -त्रं.

LENIENCY, *s.* क्षमा, मृदुता, म्रदिमा *m.* (न्), मार्दवं, सौम्यता, स्निग्धता, अनुग्रता, कोमलता, साम *n.* (न्), सामवृत्तिः *f.*, अतीक्ष्णता, अतैक्ष्ण्यं, अतीव्रता, दण्डानुग्रता, अनुग्रदण्डत्वं, अपरुषता, दया, दयार्द्रभावः, कृपा. *See* LENITY.

LENIENT, *a.* क्षमावान् -वती -वत् (त्), क्षमी -मिणी -मि (न्), मृदुः -दुः -द्वी -दु, सौम्यः -म्या -म्यं, स्निग्धः -ग्धा -ग्धं, कोमलः -ला -लं, अनुग्रः -ग्रा -ग्रं, सामवृत्तिः -त्तिः -त्ति, अतीक्ष्णः -क्ष्णा -क्ष्णं, अतीव्रः -व्रा -व्रं, अपरुषः -षा -षं, अनुग्रदण्डः -ण्डा -ण्डं, सदयः -या -यं, दयार्द्रः -र्द्रा -र्द्रं, दयालुः -लुः -लु, सामोपचारी -रिणी -रि (न्), कृपालुः -लुः -लु.—

(Assuasive) शमकः -का -कं, शमी -मिनी -मि (न्). *See* LENITIVE; 'a lenient measure,' सामोपचारः, सामोपायः.

LENIENTLY, *adv.* क्षमापूर्व्वं, क्षमया, अनुग्रं, अतीक्ष्णं, सामा, सकार्द्दवं, सदयं, दयया, स्निग्धं, अपरुषं, कोमलं.

To LENIFY, *v. a.* शम् (c. 10. शमयति -यितुं), उपशम्, प्रशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), परिशान्त्व्.

LENITIVE, *a.* शमकः -का -कं, शान्तिकः -की -कं, शान्तिकरः -रा -रं, शान्तिदः -दा -दं, शान्तिकर्त्ता -र्त्री -र्त्तृ (र्त्तृ), स्नेही -हिनी -हि (न्), स्निग्धः -ग्धा -ग्धं, स्निग्धकारी &c., पिच्छिलः -ला -लं.

LENITIVE, *s.* (A medicine that softens pain) वेदनाशामिकं, वेदनाशमकम् औषधं, क्लेशापहं, उपशमनं, प्रशमनं, शूलघ्नं, सामोपचारः.

LENITY, *s.* क्षमा, क्षमाशीलता, मृदुता, सौम्यता, सामोपचारबुद्धिः *f.*, अनुग्रता.—(Mildness of discipline) अनुग्रदण्डत्वं, अतीक्ष्णदण्डत्वं, अल्पदण्डः -ण्डनं, अल्पशिक्षा. *See* LENIENCY.

LENS, *s.* काचः; 'a convex lens,' मध्योन्नतकाचः; 'a double convex lens,' यवः; 'a concave lens,' मध्यनिम्नकाचः; 'a chrystal lens,' दीप्तोपलः, अर्कोश्मा *m.* (न्), सूर्य्याश्मा *m.*, सूर्य्यकान्तः.

LENT, *p. p.* (Given to another for temporary use) आविहितकालात् परहस्ते समर्पितः -ता -तं or अर्पितः -ता -तं or निक्षिप्तः -प्ता -प्तं or न्यस्तः -स्ता -स्तं, निरूपितकालं यावद् विसृष्टः -ष्टा -ष्टं, कालकृतः -ता -तं, प्रयुक्तः -क्ता -क्तं.

LENT, *s.* (Fast of forty days) चत्वारिंशद्दिनपर्य्यन्तो महोपवासः.

LENTEN, *a.* पूर्व्वोक्तमहोपवाससम्बन्धी -न्धिनी -न्धि (न्).

LENTICULAR, *a.* मसूरसरूपः -पा -पं, मसूरोपमः -मा -मं.

LENTIFORM, *a.* यवसरूपः -पा -पं, यवाकृतिः -तिः -ति, यवाकारः -रा -रं.

LENTIGINOUS, *a.* जटुली -लिनी -लि (न्), दद्रुणः -णा -णं.

LENTIGO, *s.* (Freckly eruption) जटुलोत्पत्तिः *f.*, तिलकोत्पत्तिः *f.*, दद्रुः *m.*

LENTIL, *s.* मसूरः, मसुरः, मङ्गल्यकः.

LENTOR, *s.* (Viscousness) सान्द्रता, श्यानता.—(Slowness) मन्दता.

LENTOUS, *a.* सान्द्रः -न्द्रा -न्द्रं, श्यानः -ना -नं, घनः -ना -नं.

LEO, *s.* (The sign of the zodiac) सिंहः, आरण्यराशिः *m.*

LEONINE, *a.* सैंहः -ही -हं, सैंहिकः -की -कं, सिंहधर्म्मा -र्म्मा -र्म्म (न्), सिंहस्वभावः -वा -वं, सिंहशीलः -ला -लं, सिंहसम्बन्धी -न्धिनी &c.

LEOPARD, *s.* चित्रकः, चित्रव्याघ्रः, तरक्षुः -क्षुकः, अच्छव्याघ्रः, पृदाकुः *m.*, पुण्डरीकः, मृगादनः.

LEPER, *s.* कुष्ठी *m.* -ष्ठिनी *f.*, श्वित्री *m.* -त्रिणी *f.* (न्), त्वग्रोगी *m.* -गिणी *f.* (न्), कुष्ठरोगी &c., दुश्चर्म्मा *m.* (न्), दुश्चर्म्मा *m.*

LEPORINE, *a.* शशसम्बन्धी -न्धिनी -न्धि (न्), शशकीयः -या -यं.

LEPROSY, *s.* कुष्ठं, कुष्ठरोगः, श्वित्रं, श्वैत्रं, श्वेतं, श्वैत्यं, त्वग्रोगः, त्वग्दोषः, चर्म्मदूषिका, दुश्चर्म्मत्वं, दुश्चर्म्मत्वं, किलासम्, चित्रं, मण्डलकं, कोठः; 'black leprosy,' रक्तकुष्ठं, महारोगः, महाव्याधिः *m.*, व्याधिः; 'afflicted with it,' रक्तकुष्ठी *m.* (न्), महारोगी *m.* (न्); 'white leprosy,' श्वेतकुष्ठं; 'wasting leprosy,' गलत्कुष्ठं.

LEPROUS, *a.* कुष्ठी -ष्ठिनी -ष्ठि (न्), श्वित्री -त्रिणी -त्रि (न्), कुष्ठरोगी -गिणी -गि (न्), त्वग्रोगी &c., चर्म्मरोगी &c., दुश्चर्म्मा -र्म्मा -र्म्म (न्), दुश्चर्म्मा &c., महारोगी &c., महाव्याधिग्रस्तः -स्ता -स्तं.

LESION, *s.* क्षतिः *f.*, परिक्षतिः *f.* -तं, अपकारः, द्रोहः, पीडा, बाधः.

LESS, *a.* न्यूनः -ना -नं, ऊनः -ना -नं, अल्पतरः -रा -रं, अल्पीयान् -यसी -यः (स्), अल्पः -ल्पा -ल्पं, क्षुद्रतरः -रा -रं, क्षोदीयान् &c., कनीयान् &c., स्तोकतरः -रा -रं, तनीयान् &c., सूक्ष्मतरः -रा -रं, अवरः -रा -रं with abl. c.; as, 'water is less heavy than quicksilver,'

जलगुरुत्वं पारदगुरुत्वाद् अल्पं भवति; 'less or more,' न्यूनाधिकं न्यूनातिरेकं. The privative affix 'less' is expressed by हीनः -ना -नं, रहितः -ता -तं, विरहितः &c., विहीनः &c., शून्य &c., वर्ज्जितः &c., अपेतः &c., व्यतिरिक्तः &c. affixed, or by अ निर्, नि, वि, वीत, विगत prefixed; as, 'childless,' पुत्रहीनः -ना -नं, अपुत्रः -त्रा -त्रं, निष्पुत्रः &c.; 'penniless,' द्रव्यहीनः &c. निष्किञ्चनः &c.; 'senseless,' बुद्धिहीनः &c., निर्बुद्धिः &c. 'worthless,' सारहीनः &c., निर्गुणः &c.; 'fearless,' वीतभयः &c. अभयः &c.

LESS, *adv.* न्यूनं, अल्पतरं, अल्पं, क्षुद्रतरं, स्तोकं, स्तोकतरं with abl. c. *See* LESS, *a.* 'How much less,' किमुत, किम्पुनर्.

LESS, *s.* न्यूनत्वं, ऊनता, अल्पत्वं -ता.—(An inferior) अवरजनः.

LESSEE, *s.* पट्टधारी *m.* (न्), पट्टोलिकाधारी *m.*, पट्टग्राही *m.*, पट्टादायी *m.*

To LESSEN, *v. a.* न्यूनीकृ, अल्पीकृ, ऊन् (c. 10. ऊनयति -यितुं), न्यून् ह्रस् (c. 10. ह्रासयति -यितुं), कन् (c. 10. कनयति -यितुं), लघ (nom. लघयति -यितुं), लघूकृ.

To LESSEN, *v. n.* न्यूनीभू, ऊनीभू, अल्पीभू, ह्रस् (c. 1. ह्रसते -सितुं), क्षि in pass. (क्षीयते), अपचि in pass. (-चीयते); 'to lessen by a quarter,' पादशो न्यूनीभू.

LESSENED, *p. p.* न्यूनीभूतः -ता -तं, अल्पीभूतः -ता -तं, ह्रसितः -ता -तं.

LESSER, *a.* अल्पः -ल्पा -ल्पं, अल्पतरः -रा -रं, अल्पीयान् -यसी -यः (स्) क्षुद्रतरः -रा -रं, क्षुद्रः -द्रा -द्रं, अवरः -रा -रं.

LESSON, *s.* पाठः -ठनं, अध्यायः, अध्ययः -यनं, निपाठः, व्याख्यानं.—(Precept, matter inculcated) उपदेशः, शिक्षा, अध्यापनं, बोधनं, निर्देशः.—(Reprimand) वाग्दण्डः, वाक्शासनं.

To LESSON, *v. a.* उपदिश् (c. 6. -दिशति -देष्टुं), शिक्ष् (c. 10. शिक्षयति -यितुं), अधी in caus. (अध्यापयति -यितुं), शास् (c. 2. शास्ति, शासितुं), उपदेशं कृ.

LESSOR, *s.* पट्टदाता *m.* (तृ), पट्टोलिकादाता *m.*, पट्टदायी *m.* (न्).

LEST, *conj.* यदि, यदि न, चेत्, न चेत्, मो चेत्, यदि कदाचित्, यदाकदाचित्, कदाचित्. In using these particles to express the word 'lest' it will be necessary to vary the form of the sentence according to the particle employed, as in the following examples selected from modern Sanskrit. 'I fear lest your minds should be corrupted,' चेद् युष्माकं मनांसि दुष्येयुर् ममैषा भीतिर् जायते; 'beware lest he strike thee,' सावधानो भव चेत् त्वामपि ताडयति; or the particle may be omitted; as, 'beware lest any man deceive you,' सावधाना भवत को ऽपि युष्मान् न भ्रमयेत्: or other particles may be used in more classical Sanskrit, the construction of the sentence being changed accordingly; as, 'commit not evil lest thou obtain the same,' पापं मा कुरु पापे हि कृते त्वया तादृशं प्राप्यं; 'he commanded to kill the captives lest they should escape,' बन्द्यः पलायिष्यन्ते इत्याशङ्कया or इति बुद्ध्या तान् हन्तुम् आदिदेश; 'justice is not to be killed, lest being killed, it destroy us,' धर्म्मो न हन्तव्यो मा नो धर्म्मो हतो वधीत्.

To LET, *v. a.* (Permit, allow) अनुज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), अभ्यनुज्ञा, अनुमन् (c. 4. -मन्यते -मन्तुं), सह् (c. 1. सहते, सोढुं), विषह्, अनुज्ञां कृ or दा or sometimes expressible by the causal form; as, 'he lets perish,' नाशयति; 'he lets enter,' प्रवेशयति.—(Let out, lease out) विहितकालं यावद् निरूपितमूल्य-

अपेक्ष्य गृहक्षेत्रादि परप्रयोजनीयं दा or विसृज् (c. 6. -सृजति -स्रष्टुं), नियमितमूल्यमपेक्ष्य किञ्चिद् द्रव्यं परप्रयोजनीयं दा, आविहितकालाद् निरूपितमूल्यमपेक्ष्य गृहक्षेत्रादि परहस्ते सम् in caus. (-अर्पयति -यितुं) or ऋ, नियमितवारिकोपेविकमपेक्ष्य किञ्चिद् वस्तु परस्मिन् सम्.—(Hinder) निवृ (c. 10. -वारयति -यितुं), रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्.—(Let alone) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. सर्जयति -यितुं), उत्सृज्.—(Let down) अवतॄ (c. 10. -तारयति -यितुं), अवरुह् in caus. (-रोपयति -यितुं), अवपत् (c. 10. -पातयति -यितुं), अवमुच् (c. 6. -मुञ्चति -मोक्तुं), अवसृज्.—(Let go, let loose) मुच्, अवमुच्, विमुच्, विसृज्, अवसृज्, शिथिलीकृ, शिथिल (nom. शिथिलयते -ति -यितुं), क्षप् (c. 10. क्षपयति -यितुं) or क्षप्, स्रंस् (c. 10. स्रंसयति -यितुं), विस्रंस्, विस्रस्तं -स्तां कृ; 'having let go the hold,' स्रस्तहस्तः -स्ता -स्तं, शिथिलितहस्तः -स्ता -स्तं.—(Let in) प्रविश् or निविश् or आविश् in caus.—(Let out) मुच्, विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, विसृज्.—(Let off, discharge) मुच्, प्रमुच्, सृज्, अस् (c. 4. अस्यति, असितुं), प्रास्, क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, ईर् (c. 10. ईरयति -यितुं); 'let off a gun,' लोहगुलिकां युद्धनाडेः प्रक्षिप् or निःसृ (c. 10. -सारयति -यितुं). *See To* fire. (Let blood) रक्तं स्रु (c. 10. स्रावयति -यितुं). *See To* bleed, *v. a.* (Let slip) मुच्, विमुच्, विसृज्, शिथिलीकृ; 'I will not let slip the occasion,' अवकाशं न शिथिलिष्ये. The sense of 'let' is often inherent in the imperative; as, 'let him go,' गच्छतु; 'let it be,' भवतु.

Let, *s.* (Hinderance) रोधः, व्याघातः, प्रत्यूहः, विघ्नः, अन्तरायः, बाधः.

Let loose, *p. p.* मुक्तः -क्ता -क्तं, विमुक्तः -क्ता -क्तं, विमोक्षितः -ता -तं, विसृष्टः -ष्टा -ष्टं, शिथिलीकृतः -ता -तं, शिथिलितः -ता -तं, स्रस्तः -स्ता -स्तं, विस्रस्तः &c.

Lethal, *a.* मारात्मकः -का -कं, प्राणनाशकः -का -कं, प्राणहरः -रा -रं, प्राणघातकः -का -कं, मृत्युजनकः -का -कं. *See* Deadly.

Lethargic, *a.* निद्रालुः -लुः -लु, अतिनिद्रालुः &c., निद्रालसः -सा -सं, सुप्तबुद्धिः -द्धिः -द्धि, जडः -डा -डं, जडबुद्धिः &c., निद्राशीलः -ला -लं, स्वप्नशीलः -ला -लं, नैद्रः -द्री -द्रं, सुषुप्सुः -प्सुः -प्सु.

Lethargically, *adv.* निद्रालुवत्, निद्रालसवत्, जडवत्, सजाड्यं.

Lethargicalness, lethargy, *s.* निद्रालुता, अतिनिद्रालुत्वं, निद्रालसता, निद्राशीलता, स्वप्नशीलता, जडता, जाड्यं, जडबुद्धित्वं, अलसता, आलस्यं, सुप्तबुद्धित्वं, शयालुता, तन्द्रा -न्द्रिः *f.*, प्रमीला.—(Deep sleep) घोरनिद्रा, गाढनिद्रा, सुनिद्रा, निर्भरनिद्रा.

Lethe, *s.* विस्मृतिः *f.*, अस्मृतिः *f.*, स्मृतिनाशः, स्मृतिहानिः *f.*

Lethean, *a.* विस्मृतिजनकः -का -कं, विस्मृतिकारकः -का -कं.

Lethiferous, *a.* मृत्युजनकः -का -कं, निधनावहः -हा -हं. *See* Deadly.

Letter, *s.* (Of the alphabet, character) अक्षरं, वर्णः -र्णं, मातृका, अभिनिधानः, वर्णः, कारः; the latter word is only used in naming any letter; as, 'the letter a,' अकारः; the letter 'r,' is called रेफः.—(Printing letter or type) मुद्राक्षरं, अक्षरमुद्रा; 'compound letter,' संयुक्ताक्षरं, सन्ध्यक्षरं; 'letter by letter,' अक्षरशस्; 'beginning to learn the letters,' अक्षरारम्भः.—(Epistle) पत्रं, लेखः, लेख्यं, पत्रिका, पत्री, पत्रकं, लिखितं, सन्देशपत्रं, लिपिः *f.*; 'by letter,' पत्रद्वारा, पत्रद्वारेण; 'on sight of the letter,' पत्रदर्शनात्; 'a letter from an inferior to a superior,' निवेदनपत्रं, आवेदनपत्रं, विज्ञापनपत्रं; 'from a superior officer,' आज्ञापत्रं; 'a letter to a son, daughter, &c.,' आशीर्वादपत्रं.—(The literal meaning, verbal expression) शब्दार्थः, अक्षरार्थः, वाच्यार्थः, प्रकृतार्थः, पदार्थः, वचनं, मुख्यार्थः; 'in the spirit and in the letter,' अर्थतो ग्रन्थतश्च, अर्थतो वचनतश्च.—(Letters, literature) अक्षरं, विद्या, शास्त्रं; 'a man of letters,' शिक्षिताक्षरः, साक्षरजनः, कृतविद्यः.—(Dead letter) निरर्थकविधिः *m.*

To letter, *v. a.* अक्षराङ्कितं -तां कृ, अक्षरमुद्रितं -तां कृ, अक्षरैर् अङ्क् (c. 10. अङ्कयति -यितुं) or मुद्र् (nom. मुद्रयति -यितुं) or मुद्रीकृ or चिह्न् (nom. चिह्नयति -यितुं), अक्षरचिह्नितं -तां कृ, अक्षरयुक्तं -क्तां कृ.

Letter-carrier, *s.* पत्रवाहः -हकः, पत्रवाही *m.* (न्), लेखहारः -रकः, लेखहारी *m.* (न्), लेखनिकः.

Lettered, *p. p.* (Stamped with letters) अक्षराङ्कितः -ता -तं, अक्षरमुद्रितः -ता -तं, अक्षरचिह्नितः -ता -तं, अक्षरयुक्तः -क्ता -क्तं; 'well-lettered,' शुद्धवर्णः -र्णा -र्णं, शुद्धाक्षरः -रा -रं. (Versed in literature) शिक्षिताक्षरः -रा -रं, साक्षरः -रा -रं, कृतविद्यः -द्या -द्यं, गृहीतविद्यः &c., कृतबुद्धिः -द्धिः -द्धि.

Letter-press, *s.* अक्षरमुद्रा, मुद्राक्षरं, मुद्रिताक्षरं, अक्षरं.

Letter-writer, *s.* पत्रलेखकः, पत्रलिपिकारः, पत्रलिखनकृत्.

Lettuce, *s.* शाकभेदः, हरितकं, शिग्रुः *m.*

Leucophlegmacy, *s.* कफोदरं, कफशोथः, जलोदरं, उदकोदरं, आध्मानं.

Leucophlegmatic, *a.* कफोदरी-रिणी-रि(न्), कफशोथरोगी-गिणी-गि(न्).

Levant, *a.* पूर्व्वदेशीयः -या -यं, पूर्व्वदिश्यः -श्या -श्यं, पूर्व्वदिक्स्थः -स्था -स्थं, पूर्व्वदेशजः -जा -जं, पूर्व्वदेशसम्बन्धी -न्धिनी &c., सूर्य्योदयदेशसम्बन्धी &c.

Levant, *s.* पूर्व्वदेशः, प्राग्देशः, प्राचीनदेशः, सूर्य्योदयदेशः.

Levee, *s.* राजदर्शनं, राजसभा, सभा, दर्शनं, प्रातःसभा.

Level, *a.* (Even, flat) समः -मा -मं, समानः -ना -नं, समस्थः -स्था -स्थं, सपाटः -टा -टं, समरेखः -खा -खं.—(Horizontal) क्षितिजसमसूत्रः -त्रा -त्रं.—(On the same plane or line with) समरेखः -खा -खं, समसूत्रः -त्रा -त्रं, समदेशस्थः -स्था -स्थं, समभूमिस्थः &c.; 'level ground,' समभूमिः *f.*, समस्थलं -ली, प्रस्थः, पाटः, आजिः *f.*; 'level surface,' समपृष्ठं, समतलं.

Level, *s.* (Even surface) समं, समस्थलं -ली, समभूमिः *f.*, समतलं, समपृष्ठं, समदेशः, प्रस्थः, पाटः; 'liquids always find their own level,' द्रवपदार्थाः सदा समानपृष्ठा भवन्ति; 'the water in the tube rises to a level with the water in the vessel,' नलस्थजलं प्रांशुत्वेन पात्रस्थजलसमं भवति.—(State of equality, equal elevation) समता, समानता, साम्यं, तुल्यता, समसमानता.—(Line of direction in which a weapon is aimed) लक्ष्यं, लक्ष्यदेशः, लक्ष्यसूत्रं, सन्धानं, अभिसन्धानं.—(Instrument for finding the level) सूत्रं.—(Rule, plan) नियमः, सूत्रं.

To level, *v. a.* (Make even) समीकृ, समानीकृ, समं -मां -मं कृ.—(Reduce to an even surface) समस्थलीकृ, समपृष्ठीकृ, समतलीकृ.—(Aim) अभिसन्धा (c. 3. -दधाति -धातुं), प्रतिसन्धा, लक्षीकृ.—(Direct at) उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्.

Leveled, *p. p.* (Made even) समीकृतः -ता -तं, समानीकृतः -ता -तं.—(Reduced to an even surface) समस्थलीकृतः -ता -तं.—(Aimed) प्रतिसंहितः -ता -तं, अभिसंहितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं.

Leveler, *s.* समकारी *m.* (न्), समानकारी *m.*—(One who destroys distinctions) पदनाशकः, पदघातकः, भावविघातकः.

Leveling, *s.* समीकरणं, समानीकरणं, समस्थलीकरणं, तुल्यीकरणं.

Levelness, *s.* समता, साम्यं, समानता -त्वं, समभूमिस्थभावः, समस्थलस्थभावः, तुल्यता.

Lever, *s.* उत्तोलनदण्डः -ण्डं, उत्तोलनदारुः *m.*, उत्तोलनी, लोहदण्डः, उत्तोलनयन्त्रं; 'to raise with a lever,' लोहदण्डेन or दारुणा उत्तुल् (c. 10. -त्तोलयति -यितुं).

Leveret, *s.* शशशावकः, शशपोतः, शशशिशुः *m.*, बालशशकः.

Leviathan, *s.* तिमिः *m.*, तिमिङ्गिलः, मीनराट्, समुद्रारुः *m.*

To levigate, *v. a.* (Grind to a fine powder) चूर्ण् (c. 10. चूर्णयति -यितुं), चूर्णीकृ.—(Polish, make smooth) परिष्कृ, श्लक्ष्णीकृ, स्निग्धीकृ.

Levigation, *s.* चूर्णीकरणं, पेषणं, क्षोदीकरणं, परिष्कारः, श्लक्ष्णीकरणं.

Levite, *s.* लीवैनाख्यो यिहूदीयानां पुरोहितः or याजकः.

Levitical, *a.* पौरोहितः -ती -तं, याजकीयः -या -यं, पूर्वोक्तयाजकसम्बन्धी -न्धिनी -न्धि (न्), धर्म्मोपदेशविषयः -या -यं.

Levity, *s.* (Lightness) लघुता, लाघवं, लघिमा *m.* (न्), अगुरुता.—(Unsteadiness) चञ्चलत्वं, चाञ्चल्यं, चपलता, चापल्यं, चापलं, लोलता, लौल्यं, मनोलौल्यं, अस्थिरता, अस्थैर्य्यं, अनवस्थितिः *f.*, अधृतिः *f.*—(Want of seriousness) अगुरुता, गौरवहीनता.

To levy, *v. a.* (Raise troops) योद्धृमध्ये समारोप्य सैन्यान् समूहीकृ or व्यूहीकृ or समूह् (c. 1. -ऊहते -हितुं) or समाहृ (c. 1. -हरति -हर्तुं), सेनां or वरूथिनीं युज् (c. 10. योजयति -यितुं), सैन्यसमूहं कृ, सैन्यसमाहारं कृ, सैन्यपरिसंख्यां कृ, शस्त्राणि or अस्त्राणि ग्रह् in caus. (ग्राहयति -यितुं), युद्धकर्म्मणि प्रवृत् (c. 10. -वर्त्तयति -यितुं), सैन्यमध्ये अभिलिख् (c. 6. -लिखति -लेखितुं) or समारुह् in caus. (-रोपयति -यितुं) or आरुह्.—(Levy a tax) करं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दातुं) or दा in caus. (दापयति -यितुं) or अवहृ (c. 10. -हारयति -यितुं), शुल्कग्रहणं कृ.—(Levy contributions) एकैकस्मात् किञ्चिद्धनग्रहणं or धनोत्तोलनं कृ.

Levy, *s.* (Act of collecting troops) सैन्यसमाहारः, सैन्यसमाहरणं, सैन्याभिलेखनं, सैन्यव्यूहकरणं.—(Troops raised) सैन्यसमूहः, सैन्यसमुदायः.—(Of taxes) करग्रहणं, शुल्कग्रहणं.—(Of money) धनोत्तोलनं, एकैकस्मात् किञ्चिद्धनग्रहणं.

Lewd, *a.* कामुकः -का -कं, कामी -मिनी -मि (न्), रतार्थी -र्थिनी &c., सुरतार्थी &c., व्यवायी -यिनी &c., व्यवायपरः -रा -रं, कामासक्तः -क्ता -क्तं, सम्भोगार्थी &c., तरलः -ला -लं, स्त्रीलम्पटः, लम्पटः, स्त्रीव्यसनी *m.*—(Wicked) दुष्टः -ष्टा -ष्टं, दुराचारः -रा -रं, दुरात्मा -त्मा -त्म (न्), पापी -पिनी -पि (न्).

Lewdly, *adv.* कामुकवत्, लम्पटवत्, कामुकं, सकामं, दुष्टवत्.

Lewdness, *s.* कामुकत्वं, लम्पटता, लाम्पट्यं, रतार्थित्वं, रतासक्तिः *f.*, सकामता, सम्भोगार्थित्वं, व्यवायः -यित्वं, वैयात्यं, वियातता, हेला, स्त्रीव्यसनं.—(Wickedness) दुष्टता, दुराचारता, अधमाचारता, कुसृतिः *f.*

Lexicographer, *s.* कौशिकः, कोशकारः, कोशरचकः, अभिधानकर्त्ता *m.* (र्तृ).

Lexicographical, *a.* कौशिकः -की -कं, कोशरचनासम्बन्धी -न्धिनी -न्धि (न्).

Lexicography, *s.* शब्दकोशरचना, शब्दकोशकरणं, कोशरचना.

Lexicon, *s.* कोषः, कोशः, शब्दकोषः, शब्दकोशः, शब्दसङ्ग्रहः, अभिधानं, शब्दग्रन्थः, शब्दजालं, निर्वचनं, निघण्टुः *m.*

Liable, *a.* (Subject to) अधीनः -ना -नं, योग्यः -ग्या -ग्यं, अर्हः -र्हा -र्हं, वशः -शा -शं, शीलः -ला -लं in comp.; 'liable to be punished,' दण्डयोग्यः &c.; 'liable to death,' मरणाधीनः -ना -नं; 'liable to disease,' रोगाधीनः -ना -नं; 'not liable,' अनधीनः -ना -नं.—(Responsible, amenable) आज्ञानाधीनः -ना -नं, अभियोक्तव्यः -व्या -व्यं, अभियोज्यः -ज्या -ज्यं, अभियोक्त्राज्ञानाधीनः -ना -नं, व्यवहार्य्यः -र्य्या -र्य्यं, व्यवहर्त्तव्यः -व्या -व्यं; 'liable for the debt,' उत्तमर्णाज्ञानाधीनः -ना -नं, धनिकाज्ञानाधीनः &c.; 'he is liable to pay,' दातुम् अर्हति. Sometimes 'liable' may be expressed by the affix. आलु; as, 'liable to fall,' पतयालुः -लुः -लु.

Liableness, liability, *s.* अधीनता, योग्यता -त्वं, शीलता; 'liability to disease,' रोगाधीनता; 'liability to fall,' पातनशीलता, पतयालुता.—(Responsibility) आज्ञानाधीनता, अभियोज्यता, अनुयोगाधीनता, व्यवहार्य्यता; 'for debt,' उत्तमर्णाज्ञानाधीनता, धनिकाज्ञानाधीनता.—(Debt) ऋणं.

Liaison, *s.* सम्बन्धः, संयोगः, प्रेमबन्धः, प्रेमसम्बन्धः.

Liar, *s.* असत्यवादी *m.* -दिनी *f.* (न्), मिथ्यावादी -दिनी, मृषावादी -दिनी, असत्यवक्ता *m.*, क्त्री *f.* (क्तृ), मिथ्याभाषी -षिणी (न्), अनृतभाषी &c., अनृतवादी &c., अनृतवाक् *m. f.* (च्), अनृतवदनशीलः, असत्यवदनशीलः, अनृती *m.* (न्), अतथ्यवादी &c., अलीकवाक् *m.*, छिद्रितः, अनेकछिद्रः, असत्यचूडामणिः *m.*

Libation, *s.* (The act) उदकतर्पणं, उदकदानं, उदकक्रिया, उदकनिषेकः, उदकपातनं, देवतोद्देशकः पेयनिषेकः or पानीयनिषेकः or मद्यनिषेकः or पेयत्यागः, पात्रस्थरसनिषेकः.—(The liquor poured out) तर्पणोदकं, तर्पणरसः, तर्पणद्रव्यं, निषिक्तरसं, पातितरसः; 'to make libations,' उदकादिदानेन or उदकादिनिषेकेण तृप् (c. 10. तर्पयति -यितुं), देवतामुद्दिश्य पात्रस्थरसं पत् (c. 10. पातयति -यितुं) or पात्रस्थमद्यं निषिच् (c. 6. -षिञ्चति -षेक्तुं) or अवसिच्.

Libel, *s.* अपवादपत्रं, अपवादलेखः, अपवादलेख्यं, परिवादलेख्यं, निन्दापत्रं, निन्दालेखः, अभिशापपत्रं, अमुकोद्देशकं पिशुनलेख्यं, कलङ्कसूचकपत्रं, अख्यातिसूचकपत्रं.

To libel, *v. a.* अपवादपत्रेण निन्द् (c. 1. निन्दति -न्दितुं), निन्दापत्रेण अपवद् (c. 1. -वदति -दितुं) or परिवद् or कलङ्क (nom. कलङ्कयति -यितुं) or कीर्त्तिकलङ्कं कृ, अमुकजनमुद्दिश्य अपवादपत्रं लिख् (c. 6. लिखति, लेखितुं) or निन्दापत्रं लिख्.

Libeled, *p. p.* पत्रापवादितः -ता -तं, पत्रनिन्दितः -ता -तं, पत्राभिशप्तः -प्ता -प्तं, लेखनिन्दितः &c., पत्रकलङ्कितः -ता -तं.

Libeler, *s.* पत्रापवादी *m.* (न्), पत्राभिशापकः, अपवादपत्रलेखकः, निन्दापत्रलेखकः, कलङ्ककारः, अभ्यसूयकः.

Libellous, *a.* अपवादकः -का -कं, अभिशापकः -का -कं, कलङ्ककरः -री -रं, अकीर्त्तिकरः -री -रं, अपयशस्करः -री -रं, गुणापवादकः -का -कं, निन्दकः -का -कं, पिशुनः -ना -नं, अभ्यसूयकः -का -कं.

Liberal, *a.* उदारः -रा -रं, दानशीलः -ला -लं, बहुदः -दा -दं, बहुप्रदः -दा -दं, अतिदाता -त्री -तृ (तृ), दायकः -का -कं, बहुदायकः -का -कं, दानरतः -ता -तं, त्यागशीलः -ला -लं, वदान्यः -न्या -न्यं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, स्थूललक्षः -क्षा -क्षं, मुक्तहस्तः -स्ता -स्तं, बहुत्यागी -गिनी -गि (न्), दाम्यः -म्या -म्यं, दाश्वान् -श्वती -श्वत् (त्), दारुः -री -रु, व्ययशीलः -ला -लं, उदारहस्तः &c., उदात्तः -त्ता -त्तं, सुकलः -ला -लं, अकृपणः -णा -णं, परिनिर्विवप्सुः -प्सुः -प्सु.—(Liberal-minded) उदारचेताः -ताः -तः (स्), उदारधीः -धीः -धि, उदारचरितः -ता -तं, माहात्मिकः -की -कं, महात्मा -त्मा -त्म (न्), महामनाः -नाः -नः (स्), महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, महाशयः -या -यं.—(Of good birth) महाकुलः -ला -लं, सत्कुलीनः -ना -नं.—(Exuberant) बहुलः -ला -लं, प्रचुरः -रा -रं, परिपूर्णः -र्णा -र्णं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः -क्ता -क्तं, पुष्कलः -ला -लं, विपुलः -ला -लं.—(Liberal arts) अलङ्कारकला, अलङ्कारविद्या, कला.

Liberality, *s.* उदारता, औदार्य्यं, दानशीलता, त्यागशीलता, त्यागिता, त्यागः, दानं, अतिदानं, दातृत्वं -ता, अतिदातृत्वं, अतिसर्ज्जनं, बहुप्रदत्वं, वदान्यता, स्थूललक्ष्यता, व्ययशीलता, मुक्तहस्तत्वं, विलम्भः, अकार्पण्यं.

अकृपणता, परिनिर्विचारता.—(Nobleness of mind) माहात्म्यं, उदारचित्तत्वं; 'act of pious liberality,' पूर्त्तं.

LIBERALLY, *adv.* बाहुल्येन, अकार्पण्येन, अतित्यागेन, अतिदानेन, मुक्तहस्तेन, वदान्यवत्, उदारवत्, बहुशस्, अतिव्ययेन, स्थूललक्ष्यवत्.

To LIBERATE, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं), निस्तॄ (c. 10. -तारयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), त्रै (c. 1. त्रायते, त्रातुं), परित्रै, मुक्तिं कृ, विमोचनं कृ.—(From confinement) बन्धनात् or बन्धनालयाद् मुच्.

LIBERATED, *p. p.* मुक्तः -क्ता -क्तं, मोचितः -ता -तं, विमोचितः -ता -तं, विमुक्तः -क्ता -क्तं, मोक्षितः -ता -तं, विसृष्टः -ष्टा -ष्टं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं, त्रातः -ता -तं, त्राणः -णा -णं, बन्धनमुक्तः -क्ता -क्तं.

LIBERATION, *s.* मुक्तिः *f.*, विमुक्तिः *f.*, वैमुक्तं, मोचनं, विमोचनं, मोक्षः -क्षणं, विमोक्षः -क्षणं, परिमोक्षणं, त्राणं, परित्राणं, निस्तारः, निस्तरणं, उद्धारः, उद्धरणं, समुद्धरणं, विसर्जनं, विसृष्टिः *f.*, मुक्तिदानं.

LIBERATOR, *s.* मोचकः, विमोचकः, मोक्षकः, मुक्तिदाता *m.* (तृ), उद्धर्त्ता *m.* (र्त्तृ), समुद्धर्त्ता *m.*, निस्तारकः, निस्तारयिता *m.* (तृ), तारकः, रक्षकः.

LIBERTINE, *a.* व्यसनी -निनी -नि (न्), व्यसनीयः -या -यं, व्यभिचारी -रिणी -रि (न्), विषयासक्तः -क्ता -क्तं, विषयी -यिणी &c., विषयानुरागी -गिणी &c., कामासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, कामुकः -का -कं, तरलः -ला -लं, अनवस्थः -स्था -स्थं, अमर्य्यादः -दा -दं, निर्मर्य्यादः -दा -दं, दुराचारः -रा -रं, कामवृत्तः -त्ता -त्तं.

LIBERTINE, *s.* लम्पटः, स्त्रीलम्पटः, स्त्रीव्यसनी *m.* (न्), स्त्रीसेवी *m.* (न्), स्त्रीपरः, स्त्रीरतः, स्त्रीव्यासक्ती *m.* (न्), नागरः, नागरीटः, विटः.

LIBERTINISM, *s.* व्यसनिता -त्वं, व्यसनं, व्यभिचारः, व्यतिक्रमः, लम्पटता, लाम्पट्यं, अनवस्थितिः *f.*, अनवस्थता, विषयासक्तिः *f.*, विषयानुरागः, कामासक्तिः *f.*, भोगासक्तिः, कामुकत्वं, स्त्रीसेवा, स्त्रीप्रसङ्गः, स्त्रीव्यसनं, स्त्रीव्यासङ्गः, दुर्वृत्तता, दुराचारत्वं, अमर्य्यादा, इन्द्रियासंयमः, वनितोपभोगः, नारीप्रसङ्गः.

LIBERTY, *s.* (Freedom from restraint or servitude) स्वतन्त्रता, स्वातन्त्र्यं, स्वाधीनता, अनधीनता, स्वच्छन्दता, स्वाच्छन्द्यं, आत्माधीनता, अपराधीनता, स्ववशत्वं, अपरवशत्वं, अवशत्वं, विवशत्वं, अपारतन्त्र्यं, अनायत्तता, अपरायत्तता, स्वायत्तता, स्वेच्छाचारता, अदास्यं, अदासत्वं, अपरप्रेष्यत्वं, दास्याभावः, सेवाभावः, अयन्त्रणं, निर्यन्त्रणं, अयन्त्रितत्वं.—(Freedom of the will) स्वेच्छा, स्वच्छन्दता, स्वकामः, यदृच्छा.—(Ability to act) क्षमता, शक्तिः *f.*—(Freedom in general) मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः, विमोक्षः, परिमोक्षणं, मोचनं, विमोचनं, वैमुक्तं, बन्धनाभावः, बन्धनराहित्यं.—(Leave) अनुज्ञा, अनुमतिः *f.*, अभ्यनुज्ञा.—(Exemption from) मुक्तिः *f.*, विरहः, राहित्यं, शून्यता, अभावः, मोक्षः.—(Freedom from necessity) भवितव्यतानधीनता, दैवानधीनता, कर्म्मायत्तता, दैवावशता.—(Breach of decorum) अविनयः, अमर्य्यादा, विनयातिक्रमः, मर्य्यादातिक्रमः, मर्य्यादातिवर्त्तनं, मर्य्यादातिचारः, विनयोल्लंघनं; 'to set at liberty,' मुच् (c. 6. मुञ्चति, मोक्तुं), विमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, निस्तॄ (c. 10. -तारयति -यितुं); 'at liberty,' अनियतः -ता -तं, अयन्त्रितः -ता -तं, निर्यन्त्रितः -ता -तं, निरवग्रहः -हा -हं, क्षमः -मा -मं. *See* FREE.

LIBIDINOUS, *a.* कामुकः -का -कं, कामी -मिनी -मि (न्), कामनः -ना -नं, कामलः -ला -लं, कामात्मा -त्मा -त्म (न्), कमनः -ना -नं, कामकेलिः -लिः -लि, कामिता -त्री -तृ (तृ), रतार्थी -र्थिनी -र्थि (न्), सुरतार्थी &c., व्यवायी -यिनी -यि (न्), कामासक्तः -क्ता -क्तं, तरलः -ला -लं, सकामः -मा -मं, कामवृत्तिः -त्तिः -त्ति, कामप्रवणः -णा -णं, कामशीलः -ला -लं, कामवृत्तिः -त्तिः -त्ति, अभीकः -का -कं, अनुकः -का -कं. *See* LECHEROUS, LUSTFUL, LEWD, &c.

LIBIDINOUSLY, *adv.* सकामं, कामुकवत्, कामुकं, लम्पटवत्, तरलवत्.

LIBIDINOUSNESS, *s.* सकामता, कामुकता -त्वं, कामित्वं, कामात्मता, कामासक्तिः *f.*, रतासक्तिः *f.*, व्यवायित्वं, चैवार्थं, रतार्थित्वं, हेला -लनं.

LIBRA, *s.* (Sign of the zodiac) तुला, तुलाधारः, घटः.

LIBRARIAN, *s.* पुस्तकशालाध्यक्षः, पुस्तकशालाधिकारी *m.* (न्), पुस्तकाध्यक्षः, ग्रन्थाध्यक्षः, पुस्तकागाररक्षकः, पुस्तकागारपालकः.

LIBRARY, *s.* (Collection of books) पुस्तकसङ्ग्रहः, पुस्तकसमूहः, ग्रन्थसङ्ग्रहः.—(Edifice or room for holding it) पुस्तकशाला, पुस्तकालयः, पुस्तकागारं, पुस्तकाधारः, ग्रन्थगृहं, ग्रन्थसङ्ग्रहशाला, ग्रन्थकुटी.

To LIBRATE, *v. a.* तुल् (c. 10. तुलयति -यितुं), समतोलीकृ, तुल्यभारीकृ.

LIBRATION, *s.* तोलनं, समतोलीकरणं, भारतुल्यता, तुल्यचलता, तुल्यता.

LICE, *s. pl.* यूकाः *m. f. pl.*, केशकीटाः *m. pl.*, षट्पदाः *m. pl.*

LICENSE, *s.* (Leave, permission) अनुज्ञा, अनुमतिः *f.*, अनुज्ञानं, अभ्यनुज्ञा, समनुज्ञानं, क्षमता, आज्ञा; 'written license,' अनुज्ञापत्रं, आज्ञापत्रं.—(Excess of liberty) मर्य्यादातिक्रमः, व्यतिक्रमः, अनर्गलता, उत्क्रमः, विधिव्यतिक्रमः, विधिनिषेधातीतता.

To LICENSE, *v. a.* अनुज्ञापत्रेण अनुमन् (c. 4. -मन्यते -मन्तुं), अनुज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), अनुज्ञां दा, अनुज्ञापत्रं दा, आज्ञापत्रं दा.

LICENSED, *p. p.* अनुज्ञातः -ता -तं, पत्रानुज्ञातः -ता -तं, गृहीतानुज्ञः -ज्ञा -ज्ञं, अभ्यनुज्ञातः -ता -तं, अनुमतः -ता -तं.

LICENSER, *s.* अनुज्ञादाता *m.* (तृ), अनुमतिदाता *m.*, अनुज्ञापत्रप्रकाशकः.

LICENTIATE, *s.* गृहीतानुज्ञः, सानुज्ञः, अधिकारयुक्तः, अधिकारी *m.* (न्).

LICENTIOUS, *a.* (Exceeding the limits of law or propriety) निर्मर्य्यादः -दा -दं, मर्य्यादातिवर्त्ती -र्त्तिनी -र्त्ति (न्), मर्य्यादातिक्रमी -मिणी &c., त्यक्तमर्य्यादः -दा -दं, अतिक्रान्तमर्य्यादः &c., उत्क्रान्तमर्य्यादः &c., अमर्य्यादः &c., व्यभिचारी -रिणी &c., दुराचारी &c., दुराचारः -रा -रं, अनाचारी &c., स्वच्छन्दचारी &c., यथेष्टचारी &c., कामाचारी &c., कामवृत्तः -त्ता -त्तं, उच्छृङ्खलः -ला -लं, अशिष्टः -ष्टा -ष्टं, अशिष्टाचारः &c., धर्म्मभ्रष्टः -ष्टा -ष्टं, त्यक्तधर्म्मा -र्म्मा -र्म्म (न्), अयथाचारी &c., अबद्धः -द्धा -द्धं, अनर्गलः -ला -लं.—(Profligate, dissolute) व्यसनी -निनी &c., व्यसनीयः -या -यं, व्यसनासक्तः -क्ता -क्तं, विषयासक्तः &c., विषयी -यिणी &c., विषयानुरागी -गिणी &c., भोगासक्तः &c., कामुकः -का -कं, अनवस्थः -स्था -स्थं, दुष्टः -ष्टा -ष्टं, पापीयान् -यसी -यः (स्), पापिष्ठः -ष्ठा -ष्ठं, दुर्वृत्तः -त्ता -त्तं, लम्पटः, स्त्रीलम्पटः, स्त्रीव्यसनी, व्यवायपरः -रा -रं.

LICENTIOUSLY, *adv.* अशिष्टवत्, उच्छृङ्खलं, व्यभिचारेण, लम्पटवत्, कामुकं, कामुकवत्, विषयानुरागात्, दुष्टवत्, पापिष्ठवत्.

LICENTIOUSNESS, *s.* व्यभिचारः, व्यतिक्रमः, मर्य्यादातिक्रमः, मर्य्यादातिवर्त्तनं, नियमातिक्रमः, अशिष्टता, उच्छृङ्खलत्वं, दुराचारत्वं, अनाचारः, अत्याचारः, आचारभ्रष्टता, दुर्वृत्तता, व्यसनिता, अनवस्थितिः *f.*, अनवस्थता, पापिष्ठत्वं, लम्पटता, लाम्पट्यं, कामुकत्वं, इन्द्रियासंयमः, स्त्रीप्रसङ्गः, स्त्रीसेवा, स्त्रीव्यसनं, भोगासक्तिः *f.*

LICHEN, *s.* शिलावल्का, शूकरी, शूकरी, शूकराक्रान्ता, वराहक्रान्ता.

To LICK, *v. a.* लिह् (c. 2. लेढि, लीढे, लेढुं), आलिह्, अवलिह्, परिलिह्, संलिह्, परिसंलिह्, जिह्वालेहनं कृ, अवलेहनं कृ.—(Lick up, devour) ग्रस् (c. 1. ग्रसते -सितुं), भक्ष् (c. 10. भक्षयति -यितुं), सम्भक्ष्, गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, संगॄ.—(Beat) तड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं), वेत्राघातं कृ, दण्डाघातं कृ.

LICK, *s.* लेहः -हनं.—(A blow) आघातः, प्रहारः, ताडनं, दण्डाघातः.

LICKED, *p. p.* लीढः -ढा -ढं, आलीढः -ढा -ढं, अवलीढः -ढा -ढं.

LICKERISH, *a.* (Dainty) सुरस: -सा -सं, रसिक: -का -कं, स्वादु: -द्वी -दु, मिष्ट: -ष्टा -ष्टं.—(Eager to taste) प्राशनोत्सुक: -का -कं, लेहनोत्सुक: &c., भोगोत्सुक: &c.

LICKERISHNESS, *s.* रसिकत्वं, सरसता, सौरस्यं, मिष्टता, स्वादुता, लालित्यं.

LICKING, *s.* (With the tongue) लेह: -हनं, अवलेह: -हनं, जिह्वालेहनं, जिह्वास्वाद:.—(Beating) ताडनं, आघात:, दण्ड:, दण्डप्रहार:, वेत्राघात:.

LICORICE, *s.* यष्टिमधु *n.* -धुका, मधुयष्टिका, मधुकं, मधूली, क्लीतकं, यष्टिक:, तिक्तपर्व्वा *f.* (न्).

LICTOR, *s.* पूर्व्वकाले काष्ठखण्डयुक्तपरशुधारी धर्म्माध्यक्षपरिचर:.

LID, *s.* पिधानं, शराव:, शरव:, मुद्र:, आच्छादनं, छादनं, आवरणं, पटलं, छद: -दनं, पुट: -टी -टं; वर्द्धमानक:, उदञ्चनं, कूर्म्मपृष्ठकं, कपाट:, मार्त्तिक:; 'opening of a lid,' शरावोद्घट्टनं; 'a box having a lid,' सपिधानं भाजनं, समुद्रं करण्डकं, सम्पुटक:; 'lid of the eye,' नेत्रच्छद:, नयनच्छद:, अक्षिपुट:, नेत्रकपाट:.

LIE, *s.* (Falsehood) अनृतं, असत्यं, वितथं, अतथ्यं, अलीकं, अनृतवाक्यं, मृषावाक्यं, मृषोक्ति: *f.*, मृषोद्यं, मिथ्योक्ति: *f.*, मिथ्यावाद:, मृषावाद:, मिथ्याभाषणं, असत्यवाद:, असत्यभाषणं, अनृतोक्ति: *f.*, मिथ्यावचनं, असत्यवचनं, मृषाभिधानं.

To LIE, *v. n.* (Utter a falsehood) असत्यं or अनृतं वद् (c. 1. वदति -दितुं), अनृतवाक्यं वद्, मृषा or मिथ्या वद्, मिथ्यावादं कृ, मृषावादं कृ, मृषाभिधानं कृ.

To LIE, *v. n.* (Down to rest, lie horizontally) शी (c. 2. शेते, शयितुं), शयनं कृ, संविश् (c. 6. -विशति -वेष्टुं), उपविश्, पत् (c. 1. पतति -तितुं); 'he lies on the ground,' भूमौ शेते; 'he lies on the bed,' खट्वायां शेते; 'to lie down upon,' अधिशी with acc. c.; as, 'he lies down upon the couch,' शय्याम् अधिशेते.—(Lean, rest upon) अवलम्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, संश्रि (c. 1. -श्रयति -ते -यितुं), समाश्रि, उपाश्रि, निली (c. 4. -लीयते -लेतुं), अवलम्बनं कृ.—(Remain, be situated, be) वृत् (c. 1. वर्त्तते -र्त्तितुं), स्था (c. 1. तिष्ठति, स्थातुं), आस् (c. 2. आस्ते, आसितुं); 'to lie near,' समीपस्थ: -स्था -स्थं भू or अस्; 'to lie towards the east,' पूर्व्वदिश्य: -श्या -श्यं भू or अस्.—(Lie by, rest) विश्रम् (c. 4. -श्राम्यति -श्रमितुं), कार्य्याद् निवृत् (c. 1. -वर्त्तते -र्त्तितुं), कार्य्यविच्छेदं कृ.—(Lie in the way) रुध् (c. 7. रुणद्धि, रोद्धुं), अन्तरायो भू.—(Lie hard upon) पीड् (c. 10. पीडयति -यितुं), अभिपीड्, निपीड्.—(Lie in wait) गुप्तं or निभृते स्था.—(Lie up, keep in the house) गृहावस्थित: -ता -तं भू.—(Lie to, as a ship) रुद्धगति: -ति: -ति भू.—(Lie on, be a matter of obligation). *See* INCUMBENT. (Lie in, be in childbed) प्राप्तप्रसवकाला भू, प्राप्तप्रसवावस्था भू.—(Lie with, carnally) सङ्गम् (c. 1. -गच्छति -गन्तुं), अभिगम्, सम्भोगं कृ.

LIEF, *adv.* कामं, प्रकामं, सकामं, कामतस्, इच्छातस्, यथेप्सितं.

LIEGE, *a.* (Bound to be loyal) भक्त: -क्ता -क्तं, भक्तिबद्ध: -द्धा -द्धं, सेवाबद्ध: &c., प्रभुभक्त: &c., स्वामिभक्त: &c., ईश्वराधीन: -ना -नं, ईश्वरायत्त: -त्ता -त्तं, प्रभुवश: -शा -शं.

LIEGE, *s.* (Lord) स्वामी *m.* (न्), प्रभु: *m.*, ईश्वर:, पति: *m.*

LIEGE-MAN, *s.* (Vassal) भक्त:, सेवाबद्ध:, प्रभुसेवी *m.* (न्).

LIENTERIC, *a.* आमातिसारी -रिणी -रि (न्), आमातिसारसम्बन्धी &c.

LIENTERY, *s.* आमातिसार:, अतिसार:, सारण:, आमरक्त:.

LIEU, *s.* स्थानं, भूमि: *f.*, स्थलं; 'in lieu of,' स्थाने, भूमौ, प्रति with abl. c., विनिमयात् -येन.

LIEUTENANCY, *s.* प्रतिनिधित्वं, सेनायां प्रतिनिधे: or प्रतिपुरुषस्य पदं or अवस्था or अधिकार:.

LIEUTENANT, *s.* सैन्याधिपतिप्रतिनिधि: *m.*, सैन्याध्यक्षप्रतिनिधि: *m.*, प्रतिनिधि: *m.*, प्रतिपुरुष:, नियोगी *m.* (न्); 'lord-lieutenant,' राजप्रतिनिधि: *m.*

LIFE, *s.* (Existence) जीवनं, जीवितं, जीव: -वा, प्राणनं, प्राण:, प्राणपरिग्रह:, सत्त्वं, सत्ता, जन्म *n.* (न्), जीवातु: *m.*, जीवथ:, जीवदशा, उक्थं.—(Vitality, principle of life) प्राण: -णा: *m. pl.*, जीवात्मा *m.* (न्), आत्मा *m.*, जीव: -वितं, जीवितत्वं, चेतना, चैतन्यं, प्राणवायु: *m.*, प्राणात्मा *m.*, भूतात्मा *m.*, पञ्चप्राणा: *m. pl.*—(Possession of breath) असुधारणं, प्राणधारणं, प्राणपरिग्रह:.—(Drawing breath) श्वासप्रश्वासं, श्वासनि:श्वासं, निश्वसनप्रश्वसनं; 'endowed with life,' जीवी -विनी -वि (न्), जीवभूत: -ता -तं, सजीव: -वा -वं, प्राणी -णिनी &c., प्राणभृत् *m. f. n.*, सचेतन: -ना -नं; 'giving life,' प्राणद: -दा -दं, प्राणप्रद: -दा -दं, जीवद: -दा -दं; 'destroying life,' प्राणहर: -रा -रं, प्राणहारी -रिणी &c., जीवितहारी &c., प्राणान्तिक: -की -कं; 'the giving or saving of life,' प्राणदानं, जीवदानं; 'abandonment of life,' जीवोत्सर्ग:, प्राणत्याग:, प्राणोत्सर्ग:, जीवितत्याग:, प्राणपरित्याग:, देहत्याग:, देहन्यास:; 'fear of losing life,' जीवितसंशय:; 'peril of life,' प्राणबाध:; 'love of life,' जीविताशा, जिजीविषा, प्राणिणिषा; 'wishing for life,' जिजीविषु: -षु: -षु, प्राणिणिषु: -षु: -षु; 'dread of life, impatience of life,' जीवनत्रास:, जीवनद्वेष:, मुमूर्षा; 'impatient of life,' मुमूर्षु: -र्षु: -र्षु; 'deprived of life,' हतप्राण: -णा -णं, हतजीवित: -ता -तं, नष्टप्राण: -णा -णं, नष्टजीवित: -ता -तं; 'support or maintenance of life,' प्राणयात्रा, प्राणधारणं, प्राणरक्षणं; 'reckless of life,' जीवितव्ययी -यिनी &c., प्राणव्ययी &c.; 'recklessness of life,' जीवितव्यय:; 'the end or object of life,' जीवनहेतु: *m.*; 'means of life,' जीवनोपाय:; 'a happy life,' सुजीवितं.—(Age, duration of life, term of life) आयुस् *n.*, आयु: -यु *m. n.*, वयस् *n.*, परमायुस्, जीवितकाल:, जन्म *n.* (न्), जन्मकाल:, आयु:परिमाणं, जीवपरिमाणं, आयुर्मर्य्यादा, कालविशेषावच्छिन्नं जीवनं; 'advanced in life,' गतायु: -यु: -यु (स्), प्रवया: -या: -य: (स्); 'conferring long life,' आयुष्य: -ष्या -ष्यं, आयुष्कर: -रा -री -रं; 'end of life,' आयु:शेष:; 'for life, during life, all one's life,' यावज्जीवं, जीवनपर्य्यन्तं, आमरणात्, यावज्जन्म, जन्मपर्य्यन्तं, यावद्देहं; 'in all one's life,' जन्मत: प्रभृति, जन्मत आरभ्य, जन्मारभ्य:, जन्मावधि, आजन्मत:, जन्मत:; 'lasting all one's life,' यावज्जीविक: -का -कं, आमरणान्तिक: -का -कं.—(Life in the world, the present life) इहलोकवास:, इहलोकवर्त्तनं, भूलोकवास:, इहकाल:, इहजन्म *n.* (न्), संसार:, संसरणं, संसृति: *f.*, गुणत्रयाभ्यास:; 'active or secular life,' प्रवृत्ति: *f.*, प्रवृत्तिमार्ग:, संसारमार्ग:, लोकव्यवहार:, प्रवर्त्तनं; 'retired life,' निवृत्ति: *f.*, निवृत्तिमार्ग:; 'engaging in public life,' लोकव्यवहारप्रवृत्ति: *f.*; 'in this life,' इह, इहकाले, इहलोके; 'the vicissitudes of life,' संसारचक्रं, कालचक्रं, कालावृत्ति: *f.*—(Conduct, manner of living) वृत्ति: *f.*, व्यवहार:, आचार:, आचरणं, रीति: *f.*, स्थिति: *f.*, चेष्टितं, चर्य्या, प्रवृत्ति: *f.*, स्थिति: *f.*; 'virtuous life,' धर्म्माचरणं.—(Vivacity) तेजस् *n.*, रस:, रसिकत्वं, तीक्ष्णता, सत्त्वं, वीर्य्यं.—(Narrative of a life, memoir) चरित्रं, चरितं, चरित्ररचना, चरिताख्यानं, आख्यानं.—(State, condition) अवस्था, दशा, भाव:, स्थिति: *f.*, वृत्ति: *f.*, गति: *f.*; 'the two states of life,' अवस्थाद्वयं;

these are 'happiness,' सुखावस्था, सुखदशा and 'misery,' दुःखावस्था, दुःखदशा; 'the three states of life,' अवस्थात्रयं; these are 'waking state,' जाग्रदवस्था; 'dreaming state,' स्वप्नावस्था and 'state of sound sleep,' सुषुप्त्यवस्था.

LIFE-GIVING, *a.* जीवदः -दा -दं, जीवदायकः -का -कं, जीवदाता -त्री -तृ (तृ), तेजस्करः -री -रं? तेजोवर्धकः -का -कं, वीर्य्यदः -दा -दं.

LIFE-GUARD, *s.* राजशरीररक्षकः, राजदेहरक्षी *m.* (न्), राजपरिचरः, राजपरिधिस्थः.

LIFELESS, *a.* निर्जीवः -वा -वं, अजीवः -वा -वं, अप्राणी -णिनी -णि (न्), प्राणहीनः -ना -नं, गतप्राणः -णा -णं, नष्टप्राणः -णा -णं, निःप्राणः -णा -णं, प्राणरहितः -ता -तं, प्राणविरहितः -ता -तं, अचेतनः -ना -नं, विचेतनः -ना -नं, चैतन्यरहितः -ता -तं, व्यसुः -सुः -सु, गतासुः -सुः -सु, अचेष्टः -ष्टा -ष्टं.—(Spiritless) निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, विरसः -सा -सं, रसहीनः -ना -नं, निःसत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं.

LIFETIME, *s.* जीवितकालः, आयुस् *n.*, वयस् *n.*, जन्मकालः, आयुष्यं; 'during life-time,' यावज्जीवं, जीवपर्य्यन्तं, जन्मपर्य्यन्तं.

To LIFT, *v. a.* (Raise) उत्तुल् (c. 10. -तोलयति -यितुं), उच्छ्रि (c. 1. उच्छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि, उन्नम् (c. 10. -नमयति -यितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उत्था in caus. (-थापयति -यितुं, rt. स्था), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), समुत्क्षिप्, उद्धन् (c. 2. -हन्ति -न्तुं), उन्नी (c. 1. -नयति -नेतुं), उत्कृष् (c. 1. -कर्षति -क्रष्टुं), उद्धृ (c. 1. -हरति -हर्त्तुं), उद्बृह् (c. 6. -बृहति -बर्हितुं), उत्तोलनं कृ, ऊर्द्ध्वीकृ.—(Raise in rank) पदवृद्धिं कृ, उत्कृष्टपदे प्रतिपद् (c. 10. -पादयति -यितुं), संवृध् (c. 10. -वर्धयति -यितुं), प्रतिपत्तिं कृ or दा.—(Fill with pride or joy) दृप् (c. 10. दर्पयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), उद्धतं -तां कृ; 'to be lifted up with pride,' दृप् (c. 4. दृप्यति, दर्प्तुं), उद्धतीभू, उद्धतचित्तः -त्ता -त्तं भू.

LIFT, *s.* उत्तोलनं, उत्थापनं, उन्नमनं, उद्यामः, उन्नयनं, उच्छ्रयः, समुच्छ्रयः, उत्कर्षः.—(Help) साहाय्यं, उपकारः, उपकृतं.

LIFTED, *p. p.* उत्तोलितः -ता -तं, उत्थापितः -ता -तं, उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, उन्नतः -ता -तं, उद्यतः -ता -तं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं, उद्धतः -ता -तं, उत्कर्षितः -ता -तं, उद्बर्हितः -ता -तं, उत्क्षिप्तः -प्ता -प्तं, उद्ग्राहितः -ता -तं; 'having the hands lifted up,' अभ्युच्छ्रितपाणिः -णिः -णि, उत्थितहस्तः -स्ता -स्तं; 'having his weapon lifted up,' उद्यतायुधः -धा -धं; 'having the arms lifted up,' ऊर्द्ध्वबाहुः -हुः -हु.

LIGAMENT, *s.* (Any thing that unites or ties) बन्धनं, बन्धः, योक्त्रं, सेत्रं, यन्त्रणं, पाशः, निगडः, शृङ्खला -लं, चारः, प्रसितिः *f.*—(In anatomy) सन्धिबन्धनं, सन्धिबन्धः, ग्रन्थिबन्धनं, अस्थिबन्धनं.

LIGATURE, *s.* बन्धः -न्धनं, पट्टः, पट्टकः, आवेष्टनं, परिवेष्टनं, वेष्टनं, रज्जुः *m. f.*, कवलिका.

LIGHT, *s.* द्युतिः *f.*, दीप्तिः *f.*, तेजस्, ज्योतिस् *n.*, ज्योतिः *f.*, प्रभा, प्रकाशः, आभा, छविः *f.*, आलोकः, रुचिः *f.*, रुक् *f.* (च्), कान्तिः *f.*, छटा, निभा, भा, भास् *f.*, विभा, छाया, त्विषा, त्विट् *f.* (ष्), शोचिस् *n.*, शोभा, वर्चस् *n.*, महस् *n.*, द्योतः, दृशानं, मरीचिः *m. f.*, कलिका; 'light of the moon or stars,' ज्योत्स्ना, कौमुदी, दीपिका; 'shining by its own light,' स्वप्रकाशः -शा -शं, स्वयंज्योतिः -तिः -ति; 'day-light,' सूर्य्यप्रकाशः, सूर्य्यरश्मिः *m.*, दिनालोकः.—(Any thing that gives light, candle) दीपः -पकः, प्रदीपः, दीपिका.—(Knowledge) ज्ञानं, बोधः, अवगमः, प्रकाशः.—(Public notice) प्रकाशः, प्रकाशता, प्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, लौकिकं, प्रख्यातिः *f.*—(Light of a picture) प्रकाशितचित्रांशः, चित्रस्य प्रकाशितभागः, चित्रस्थं प्रकाशितस्थलं.—(Point of view) दृष्टिः *f.*, लक्ष्यं, दृष्टिसूत्रं, दृष्टिपातमार्गः, दृष्टिपातसूत्रं, लक्ष्यसूत्रं; 'to throw light upon,' प्रकाश् (c. 10. -काशयति -यितुं), विकाश्; 'throwing light upon,' प्रकाशकः -का -कं; 'to bring to light,' प्रकटीकृ, प्रकाशीकृ, स्पष्टीकृ, आविष्कृ, प्रादुष्कृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं); 'to come to light,' आविर्भू, प्रादुर्भू, प्रकाशीभू, प्रसिद्धिं गम् (c. 1. गच्छति, गन्तुं). In scientific treatises 'light' is called प्रकाशः.

LIGHT, *a.* (Having little weight) लघुः -घुः -घ्वी -घु, अगुरुः -रुः -र्वी -रु, अल्पभारः -रा -रं, लघुभारः -रा -रं, अल्पप्रमाणः -णा -णं, लघुप्रमाणः -णा -णं, गौरवहीनः -ना -नं, सुवहः -हा -हं, सुवाह्यः -ह्या -ह्यं, सुखवाह्यः -ह्या -ह्यं.—(Not oppressive, easy to be endured) लघुः -घ्वी -घु, सुसहः -हा -हं, सुसहनीयः -या -यं, अक्लेशकः -का -कं, अल्पक्लेशकरः -री -रं; 'very light,' लघिष्ठः -ष्ठा -ष्ठं.—(Easy) सुकरः -रा -रं, सुकरः -रा -री -रं, निरायासः -सा -सं, सुगमः -मा -मं, अकष्टः -ष्टा -ष्टं, अकठिनः -ना -नं, अविषमः -मा -मं, सुसाध्यः -ध्या -ध्यं, लघुः &c.—(Easy of digestion) सुपाक्यः -क्या -क्यं, सुपचनीयः -या -यं, सुपचः -चा -चं, सुखपच्यः -च्या -च्यं.—(Active, nimble) चपलः -ला -लं, लघुशरीरः -रा -रं, लघुगतिः -तिः -ति.—(Not dense) अस्थूलः -ला -लं, अघनः -ना -नं, शिथिलावयवः -वा -वं, विरलावयवः -वा -वं.—(Not steady, gay, airy) लघुचित्तः -त्ता -त्तं, लघुचेताः -ताः -तः (स्), लघुस्वभावः -वा -वं, चञ्चलः -ला -लं, चपलः -ला -लं, प्रकृतितरलः -ला -लं, अस्थिरः -रा -रं, लोलः -ला -लं, अनवस्थः -स्था -स्थं, गौरवहीनः -ना -नं, गाम्भीर्य्यहीनः -ना -नं.—(Trivial, inconsiderable) लघुः &c., लघुप्रभावः -वा -वं, अल्पप्रभावः &c., लघ्वर्थः -र्था -र्थं, अल्पार्थः -र्था -र्थं, तुच्छः -च्छा -च्छं, अगण्यः -ण्या -ण्यं, तृणप्रायः -या -यं.—(Light in color) पाण्डुः -ण्डुः -ण्डु, श्वेतः -ता -तं or expressed by ईषत्, आ prefixed; 'light red,' श्वेतरक्तः -क्ता -क्तं, ईषद्रक्तः -क्ता -क्तं; 'light [illegible],' आनीलः -ला -लं; 'light brown,' श्वेतपिङ्गः -ङ्गा -ङ्गं; 'light blue,' श्वेतनीलः -ला -लं.—(Bright, not dark) दीप्तिमान् -मती -मत् (त्), द्युतिमान् &c., प्रभावान् &c., दीप्रः -प्रा -प्रं, सप्रकाशः -शा -शं, प्रकाशमयः -यी -यं, तेजोमयः &c., तैजसः -सी -सं, प्रकाशयुक्तः -क्ता -क्तं, रुचिरः -रा -रं, शोभनः -ना -नं; 'the light half of the month when the moon increases,' शुक्लः, शुक्लपक्षः, शुद्धपक्षः.—(To make light of) लघूकृ, तुच्छीकृ, तृणाय मन् (c. 4. मन्यते, मन्तुं).

LIGHT, *adv.* लघु, लाघवेन, सलाघवं, अगुरु, लघु prefixed in comp.

To LIGHT, *v. a.* (Make light, illuminate) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, द्युत् (c. 10. द्योतयति -यितुं), प्रद्युत्, विद्युत्, दीप् (c. 10. दीपयति -यितुं), उद्दीप्, प्रदीप्, विदीप्, प्रकाशितं -तां कृ, द्योतितं -तां कृ, सप्रकाशं -शां कृ.—(Give light) प्रकाशं दा, प्रकाशनं कृ, द्योतनं कृ, तेजः कृ or दा.—(Kindle, set on fire) ज्वल् (c. 10. ज्वलयति, ज्वालयति -यितुं), प्रज्वल्, उज्ज्वल्, संज्वल्, समिन्ध् (c. 7. -इन्द्धे -इन्धितुं), सन्धुक्ष् (c. 10. -धुक्षयति -यितुं), तप् (c. 10. तापयति -यितुं), सन्तप्, दीप्, प्रदीप्, उद्दीप्, आदीप्.

To LIGHT, *v. n.* (Fall on) आपत् (c. 1. -पतति -तितुं), निपत्, आसद् (c. 10. -सादयति -यितुं), अकस्मात् आसद् or उपस्था (c. 1. -तिष्ठति -स्थातुं) or आगम् (c. 1. -गच्छति -गन्तुं) or उपागम्.—(Descend) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अवया (c. 2. -याति -तुं), अधो गम्, अवपत्.—(Settle, rest upon) अध्यास् (c. 2. -आस्ते -आसितुं), निली (c. 4. -लीयते -लेतुं), निषद् (c. 1. -षी-

दति -धतुं), अधिवस् (c. 1. -वसति -वस्तुं), अवस्था, संस्था, सङ्कीर्णं कृ. —(Kindle) समिन्ध् in pass. (-इध्यते), ज्वल् (c. 1. ज्वलति -लितुं).

Light-armed, *a.* लघ्वायुधः -धा -धं, लघुशस्त्री -स्त्रिणी -स्त्रि (न्), लघ्वस्त्रधारी -रिणी -रि, लघुशस्त्रभृत् *m.f.n.*

Lighted, *p.p.* इद्धः -द्धा -द्धं, समिद्धः -द्धा -द्धं, ज्वलितः -ता -तं, सन्नद्धः -द्धा -द्धं, सन्धुक्षितः -ता -तं, प्रज्वालितः -ता -तं.—(Lighted up, illuminated) प्रकाशितः -ता -तं, विकाशितः -ता -तं, द्योतितः -ता -तं, प्रद्योतितः -ता -तं, उद्योतितः -ता -तं, उद्दीपितः -ता -तं, भासितः -ता -तं, विभासितः -ता -तं, उद्भासितः -ता -तं, उज्ज्वलितः -ता -तं.

To lighten, *v.n.* (Flash, as lightning) स्फुर् (c. 6. स्फुरति -रितुं), विद्युत् (c. 1. -द्योतते -तितुं), अकस्मात् प्रकाश् (c. 1. -काशते -शितुं) or ज्वल् (c. 1. ज्वलति -लितुं) or उज्ज्वल्, विद्युद्वत् कम्प् (c. 1. कम्पते -म्पितुं).

To lighten, *v.a.* (Make bright) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, द्युत् (c. 10. द्योतयति -यितुं), दीप् (c. 10. दीपयति -यितुं), विदीप्. —(Make less heavy) लघूकृ, लघ (nom. लघयति -यितुं), न्यूनभारं -रां -रं कृ, अल्पभारीकृ, भारन्यूनतां कृ.—(Alleviate) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, लघूकृ.

Lightened, *p.p.* (Made less heavy) लघूकृतः -ता -तं, न्यूनभारः -रा -रं, शमितः -ता -तं, प्रशमितः -ता -तं.

Lighter, *s.* (More light) लघुतरः -रा -रं, लघीयान् -यसी -यः (स्), न्यूनभारः -रा -रं.—(One that lights or kindles) प्रकाशकः, प्रकाशदः, दीपकः, उद्दीपकः, द्युतिदः, द्युतिकरः, अग्निदः.—(Large, flat-bottomed boat) तरालुः *m.*, तरान्धुः *m.*, तरणिः -णी *f.*, वहित्रं, उडुपः -पं.

Lighterman, *s.* नाविकः, पोतवाहः, तरिकः, पूर्वोक्तनौकाकर्णधारः.

Light-fingered, *a.* लघुहस्तः -स्ता -स्तं, चपलहस्तः &c., पाणिचपलः -ला -लं.

Light-footed, *a.* लघुपादः -दा -दं, लघुगतिः -तिः -ति, द्रुतगतिः -तिः -ति.

Light-headed, *a.* (Delirious) रोगोपहतज्ञानः -ना -नं, रोगोपहतत्वाद् भ्रान्तचित्तः -त्ता -त्तं or भ्रान्तबुद्धिः -द्धिः -द्धि or विक्षिप्तबुद्धिः -द्धिः -द्धि or क्षिप्तचित्तः &c., बुद्धिविभ्रमात् प्रलापकारी -रिणी &c.—(Thoughtless, volatile) चपलचित्तः &c., लघुचित्तः &c.

Light-headedness, *s.* चित्तविभ्रमः, ज्ञानभ्रान्तिः *f.*, बुद्धिभ्रान्तिः, बुद्धिविप्लवः.

Light-hearted, *a.* लघुचित्तः -त्ता -त्तं, लघुचेताः -ताः -तः (स्), हृष्टचित्तः &c., हृष्टहृदयः -या -यं, हृष्टमानसः -सी -सं, उन्मनाः -ना -नं, आनन्दी -न्दिनी -न्दि (न्), सुमनस्कः -स्का -स्कं.

Light-house, *s.* दीपस्तम्भः, दीपगृहं, आकाशदीपः, समुद्रयायिनां पथदर्शनार्थम् उन्नतभूभागे निर्मितं दीपगृहं.

Lighting, *part.* प्रकाशयन् -यन्ती -यत् (त्), उद्भासयन् -यन्ती -यत् (त्), द्योतमानः -ना -नं, उद्दीपकः -का -कं, प्रदीपकः -का -कं—(Resting on) निषण्णः -ण्णा -ण्णं, निलीयमानः -ना -नं, सन्निषण्णमानः -ना -नं.

Lightless, *a.* निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, निरालोकः -का -कं.

Lightly, *adv.* (With little weight) लघु, लाघवेन, सलाघवं, अगुरु, अल्पभारेण, अल्पप्रमाणेन.—(Easily) सुखेन, अनायासेन, अकष्टेन, अक्लेशेन, अयत्नेन.—(Without reason) हेतुना विना, कारणेन विना. —(Nimbly) लघुगत्या, चपलं.—(With levity) लघुचेतसा, चञ्चलं. चञ्चलवत्, अस्थिरं; 'to think lightly of,' लघूकृ, तुच्छीकृ.

Lightness, *s.* (Want of weight) लघुता -त्वं, लाघवं, लघिमा *m.* (न्), अगुरुता, गौरवहीनता, भारलघुता, भारहीनता, अल्पभारत्वं, भाराभावः, Li... सुभारता, भाररहितत्वं.—(Easiness) सुखत्वं, अनायासः, निरायासत्वं, [illegible]त्वं, सुसाध्यता, लघुता, सुगमत्वं, अकष्टत्वं, अकाठिन्यं.—(State of being easy to be borne) लघुता, सुसहता, सुसहनीयता.—(Nimbleness) शरीरलघुता, लघुशरीरत्वं, लघुगतित्वं, द्रुतत्वं.—(Levity) चञ्चलत्वं, चाञ्चल्यं, चपलता, चापल्यं, लोलता, लौल्यं, अस्थिरता, अस्थैर्यं, अनवस्थितिः *f.*, अगुरुता, अगौरवं.—(Trivialness) लघुता, लाघवं, लघ्वर्थता, अल्पप्रभावत्वं, तुच्छता; 'lightness of hand,' हस्तलाघवं, हस्तचापल्यं.

Lightning, *s.* विद्युत् *f.*, तडित् *f.*, सौदामिनी, सौदाम्नी, सौदामनी, मेघज्योतिस् *n.*, मेघवह्निः *m.*, मेघदीपः, घनज्वाला, क्षणप्रभा, अचिरप्रभा, क्षणद्युतिः *f.*, ह्रादिनी, ह्रदिनी, शतह्रदा, शम्पा, सम्पा, चपला, चञ्चला, चञ्चिका, आकालिकी, चला, ऐरावती, छटाभा, रोहिणी, अशुभा, अशुभा, वज्रस्फुलिङ्गः -ङ्गं, घनवल्लिका, वीपा, महोल्का, अतिभीः *m.*, चटुला, रुक् *f.* (च), नीलाञ्जना; 'forked lightning,' विद्युल्लता, तडिल्लता, द्यौतं; 'flash of lightning,' विद्युत्प्रकाशः, विद्युत्स्फुरणं, सौदामिनीस्फुरणं, विद्युत्कम्पः, विद्युद्दाम *n.* (न्), विद्युज्ज्वाला; 'the falling of lightning,' विद्युत्पातः; 'struck by lightning,' उपहतः -ता -तं, विद्युत्पातोपहतः &c.; 'relating to lightning,' वैद्युतः -ती -तं.

Lights, *s.pl.* पुस्फुसः, पुप्फुसः, फुप्फुसः, रक्तफेनजः.

Lightsome, *a.* (Not dark, luminous) दीप्तिमान् -मती -मत् (त्), तेजोमयः -यी -यं, सप्रकाशः -शा -शं, प्रकाशमयः -यी -यं, सुप्रकाशः -शा -शं, तेजस्वी -स्विनी -स्वि (न्), प्रभावान् &c., सुप्रभः -भा -भं.—(Cheerful, gay) उन्मनाः -ना -नं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, सानन्दः -न्दा -न्दं, आनन्दी -न्दिनी &c., आनन्ददः -दा -दं, हर्षदः -दा -दं.

Lightsomeness, *s.* (Brightness) सप्रकाशता, दीप्तिमत्त्वं, दीप्तता.—(Cheerfulness) उन्मनस्ता, उल्लासः, सानन्दता, हृष्टता, प्रहर्षः.

Light-spirited, *a.* लघुहृदयः -या -यं, हृष्टहृदयः -या -यं, हृष्टचित्तः -त्ता -त्तं.

Ligneous, *a.* काष्ठी -ष्ठिनी -ष्ठि (न्), काष्ठमयः -यी -यं, दारुमयः &c., दारवः -वी -वं, काष्ठरूपः -पा -पं, दारुरूपः -पा -पं, काष्ठघटितः -ता -तं.

Ligniferous, *a.* काष्ठदः -दा -दं, काष्ठदायकः -का -कं, काष्ठोत्पादकः -का -कं.

Ligniform, *a.* काष्ठरूपः -पा -पं, काष्ठाकारः -रा -रं, काष्ठाकृतिः -तिः -ति.

To lignify, *v.a.* काष्ठसात्कृ, दारुसात्कृ, काष्ठरूपीकृ, दारुरूपीकृ.

Like, *a.* (Resembling) सदृशः -शी -शं, सदृक्षः -क्षा -क्षं, सदृक् *m.f.n.* (श्), तुल्यः -ल्या -ल्यं, समः -मा -मं, समीयः -या -यं, समानः -ना -नं, सन्निभः -भा -भं, अनुकारी -रिणी -रि (न्), निर्विशेषः -षा -षं, प्रातिभासिकः -की -कं. The following can only be used in comp. at the end of a word उपमः -मा -मं, निभः -भा -भं, प्रतिमः -मा -मं, उपमितः -ता -तं, प्रख्यः -ख्या -ख्यं, सङ्काशः -शा -शं, रूपः -पा -पं, विधः -धा -धं, नीकाशः -शा -शं, निकाशः -शा -शं, प्रतीकाशः &c., प्रतिकाशः &c., प्रतिकाशः &c., प्रतीकाशः &c., भूतः -ता -तं; 'like the moon,' चन्द्रनिभः -भा -भं, चन्द्रोपमः -मा -मं; 'like, but with a degree of inferiority,' कल्पः -ल्पा -ल्पं. The propositions स and अनु are often used indifferently with सम, समान, and तुल्य to express 'like'; as, 'of like form,' सरूपः -पा -पी -पं, अनुरूपः -पा -पं, समरूपः -पा -पं, तुल्यरूपः &c., तुल्याकृतिः -तिः -ति, तुल्याकारः -रा -रं; 'of like properties or qualities,' सगुणः -णा -णं, अनुगुणः -णा -णं, समगुणः -णा -णं, तुल्यगुणः &c., समानगुणः &c., सधर्म्मा -र्म्मा -र्म्म (न्), अनुधर्म्मा &c., समानधर्म्मा &c., समभावः -वा -वं; 'of like tribe, class, or kind,' सजातिः -तिः -ति, सजातीयः -या -यं, समानजातिः &c., समानजातीयः &c., सवर्णः -र्णा -र्णं, तुल्यवर्णः &c., सविधः -धा -धं, सवर्गः -र्गा -र्गं, सवर्गीयः -या -यं, सवर्गीयः -या -यं; 'like this or that,' ईदृशः -शी -शं, ईदृक् *m.f.n.* (श्), ईदृक्षः -क्षा -क्षं, एतादृशः &c., एतादृक् &c., एतादृक्षः &c., तादृशः &c.,

तादृक् &c., तादृक्षः &c.; 'like what?' कीदृशः &c., कीदृक् &c., कीदृक्षः &c.; 'like which,' यादृशः &c., यादृक् &c., यादृक्षः &c.; 'like me,' मादृशः &c., मादृक् &c., मादृक्षः &c.; 'like thee,' त्वादृशः &c., त्वादृक् &c., त्वादृक्षः &c.; 'like your honor,' भवादृशः &c., भवादृक् &c., भवादृक्षः &c. 'To be like,' अनुकृ, सदृशः -शी -शं भू.' तुल्यः -ल्या -ल्यं भू, सदृशीभू, तुल्यीभू. The following examples illustrate the use and construction of some of the above words. 'The son is very like the father,' पुत्रो बहुधा पितुर् अनुकरोति or पुत्रः पितृरूपो भवति; 'like another son,' पुत्रनिर्विशेषः -षा -षं; 'there never has been, nor ever will be, any one like him,' अनेन सदृशो न भूतो न भविष्यति; 'there is nobody like him,' तेन सदृशः कश्चिदपि नास्ति or न तस्य तुल्यः कश्चन or न कोपि तस्य समः; 'like the sun,' आदित्यसदृशः -शी -शं, आदित्येन तुल्यः &c.; 'a crime like that of Brahmanicide,' ब्रह्महत्यासमं पापं; 'like me,' मम समः or मम तुल्यः or मम अनुरूपः or मद्रूपः &c. or मद्विधः -धा -धं. —(Probable) समसङ्काशः -शा -शं, सम्भाव्यः -व्या -व्यं.

Like, *s.* (Match, equal) तुल्यः -ल्या, तुल्यगुणः -णा, सदृशः -शी, तुल्यरूपः -पी, समानगुणः -णा, यमकः -का, युग्मकः -का; 'his like will never be again,' अनेन सदृशो न कदाचिद् भविष्यति.—(Likes and dislikes) प्रियाप्रियाणि *n. pl.*, प्रियाप्रियं.

Like, *adv.* (In the same manner) वत् affixed, इव, यथा, तथा, निर्विशेषं -षेण; 'like a dream,' स्वप्नवत्; 'like the moon,' चन्द्रवत्, चन्द्र इव, चन्द्रो यथा; 'cherished like another son,' पुत्रनिर्विशेषं पालितः; 'like king, like people,' यथा राजा तथा प्रजा; 'in like manner,' तथैव, तद्वत्, तथा, एवं, एवम्प्रकारेण, तथाविधेन, एवंविधेन, एवमेव; 'to act like,' अनुकृ.

To **Like**, *v. a.* (Approve of, be pleased with) रुच् (c. 1. रोचते -चितुं) used impersonally, रुच् (c. 10. रोचयति -यितुं), अनुरुच्, अभिरुच्, अभिमन् (c. 4. -मन्यते -मन्तुं), अनुमन्, सम्मन्, मन्, अभिनन्द्, (c. 1. -नन्दति -ते -न्दितुं), प्रतिनन्द्, नन्द्, अनुमुद् (c. 1. -मोदते -दितुं). अनुरुध् (c. 4. -रुध्यते -ति -रोद्धुं), प्रशंस् (c. 1. शंसति -सितुं), प्री (c. 4. प्रीयते), जुष् (c. 6. जुषते, जोषितुं), तुष् (c. 4. तुष्यति, तोष्टुं), सन्तुष्, परितुष्, दय् (c. 1. दयते -यितुं), अनुरञ्ज् (c. 4. -रज्यते), स्निह् (c. 4. स्निह्यति, स्नेहितुं), प्रियः -या -यं भू or अस्, अभिमतः -ता -तं भू, इष्टः -ष्टा -ष्टं भू, प्रीतः -ता -तं भू, दयितः -ता -तं भू. Obs. Since some of the above verbs have a neuter sense, and some of these again are susceptible of an active sense if used in other forms, the construction of the sentence must vary accordingly; thus, 'I like that,' तद् मह्यं or मम रोचते or अहं तद् रोचयामि or तद् मया प्रशस्यते or अहं तद् अनुमन्ये or तद् मया अनुमतं or तद् मम अभिमतं; 'he does not like the gift,' दत्तं नाभिनन्दति or दत्तेन न तुष्यति; 'they like their king,' स्वराजानम् अनुरुध्यन्ते; 'he likes his brother's wife,' भ्रातुर् भार्यायाम् अनुरज्यते; 'women like everybody,' सर्वे स्त्रीणां प्रियाः.

To **Like**, *v. n.* रुच् (c. 1. रोचते -चितुं), इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति, c. 4. -लष्यति -षितुं); 'as you like,' यथा भवते रोचते, यथाकामं; 'doing what one likes,' कामकारी -रिणी -रि (न्), कामचारः -रा -रं; 'going where one likes,' कामगामी -मिनी &c.; 'eating what one likes,' कामभक्षः -क्षा -क्षं; 'taking what form one likes,' कामरूपः -पा -पं.

Liked, *p. p.* अभिमतः -ता -तं, अनुमतः -ता -तं, यथाभिमतः -ता -तं, अनुमोदितः -ता -तं, प्रियः -या -यं, प्रीतः -ता -तं, इष्टः -ष्टा -ष्टं, मनोनीतः -ता -तं, दयितः -ता -तं, अनुरक्तः -क्ता -क्तं, मतः -ता -तं.

Likelihood, likeliness, *s.* सम्भाव्यता -त्वं, सम्भावनीयता, योग्यता -त्वं, सम्भावना, सम्भवः, अभ्युपगम्यता, अभ्युपगमः, अनुमेयता -त्वं, समसादृश्यं, समसङ्काशत्वं -ता, आभासः.

Likely, *a.* सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, सम्भावितः -ता -तं, योग्यः -ग्या -ग्यं, समसङ्काशः -शा -शं, समसन्निभः -भा -भं, समसदृशः -शी -शं, अनुमेयः -या -यं, अभ्युपगम्यः -म्या -म्यं; 'it is likely,' युज्यते, उपपद्यते.

Likely, *adv.* सम्भावनीयं, यथायोग्यं, यथासम्भवं, प्रायस्, प्रायशस्.

Likeminded, *a.* समानशीलः -ला -लं, समस्वभावः -वा -वं, समभावः -वा -वं.

To **Liken**, *v. a.* उपमा (c. 2. -माति, c. 3. -मिमीते -मातुं), सदृशीकृ, समीकृ, तुल्यीकृ, समानीकृ, समान (nom. समानयति -यितुं); 'to whom shall I liken him,' केन तम् उपमास्यामि.

Likened, *p. p.* उपमितः -ता -तं, उपमेतः -ता -तं, समीकृतः -ता -तं.

Likeness, *s.* (Resemblance) सादृश्यं, सदृशता -त्वं, सारूप्यं, सरूपता, समरूपता, अनुरूपता, आनुरूप्यं, समता, साम्यं, समानता, तुल्यता -त्वं, तुला, तौल्यं, औपम्यं, उपमा, उपमानं -नता, उपमितिः *f.*, प्रतिमानं -नता, प्रतिमता, आनुगुण्यं, अनुकारः, अनुहारः, आनुधर्म्यं, रूपसमता, स्वभावसमता.—(Form, appearance) आकृतिः *f.*, आकारः, रूपं, मूर्त्तिः *f.*, संस्कारः.—(A picture or image resembling a person or thing) उपमा, उपमितिः *f.*, उपमानं, प्रतिमा, प्रतिमानं, प्रतिरूपं -पकं, प्रतिकृतिः *f.*, प्रतिमूर्त्तिः *f.*, प्रतिकायः, प्रतिनिधिः *m.*, प्रतिच्छन्दः, प्रतियातना, प्रतिबिम्बं, चित्रं, आकृतिः *f.*; 'a speaking likeness,' आकृतिः संवादिनी.

Likewise, *adv.* (In like manner) तथा, तथैव, तद्वत्, एवं, एवमेव.—(Moreover) अपिच, अपरञ्च, किञ्च, चैव, तथा, एवं.

Liking, *s.* (Fondness for, delight in, pleasure) रुचिः *f.*, अभिरुचिः *f.*, सन्तोषः, तोषः, तुष्टिः *f.*, सन्तुष्टिः *f.*, परितोषः, अनुरागः, अनुरक्तिः *f.*, अभिमतता, अनुमतिः *f.*, अनुमोदनं, इच्छा, अभिलाषः, अभिलषितं, प्रियता, प्रीतिः *f.*, छन्दं, छन्दस् *n.*: 'that husband was not to her liking,' स भर्त्ता तस्याः सन्तोषाय नाभवत्; 'likings and dislikings,' प्रियाप्रियाणि.—(State of body) शरीरस्थितिः *f.*, देहस्थितिः *f.*, शरीरभावः.

Lilac, *s.* लैलकाख्यः पारसीकदेशीयो गुल्मप्रभेदः.

Lily, *s.* पद्मः -द्मं, पद्मिनी, उत्पलं, कमलं, कुमुदं, नलिनं, पङ्कजं, कुवलयं, इन्दीवरं, सौगन्धिकं, अम्बुजं, नीलाम्बुजन्म *n.* (न्), रक्तसन्ध्यकं, हल्लकं, कैरवं. These names properly apply to the water lily. *See* Lotus.

Limation, *s.* लोहमार्जनेन घर्षणं or परिष्कारः or परिष्करणं, मार्जनं.

Limature, *s.* (Filings) लोहचूर्णं, कृष्णचूर्णं, लोहजं, लोहकिट्टं.

Limb, *s.* अङ्गं, अवयवः, गात्रं, अपघनः, प्रतीकः; 'limb by limb,' अवयवशस्, गात्रं गात्रं; 'over every limb,' सर्वाङ्गीणः -णा -णं, प्रत्यङ्गं; 'having large limbs,' बृहदङ्गः -ङ्गी -ङ्गं; 'kneading of the limbs,' गात्रसंवाहः -हनं, अङ्गमर्दनं.—(Edge, border) कोटिः *f.*, प्रान्तः, सीमा.

To **Limb**, *v. a.* अङ्गाद् अङ्गम् अवछिद् (c. 7. -छिनत्ति -छेत्तुं), अवयवशो निकृत् (c. 6. -कृन्तति -कर्त्तितुं), गात्राणि पृथक्कृ, व्यङ्गीकृ.

Limbed, *a.* अङ्गी -ङ्गिनी -ङ्गि (न्), साङ्गः -ङ्गा -ङ्गं, अवयवी -विनी -वि (न्), सावयवः -वा -वं; 'large-limbed,' बृहदङ्गः -ङ्गी -ङ्गं, बृहदवयवः -वा -वं, महाङ्गः -ङ्गा -ङ्गं; 'slender-limbed,' कृशाङ्गः -ङ्गी -ङ्गं.

चौपाङ्गः &c., सन्धङ्गः &c.

LIMBER, *a.* (Flexible) मृदुः -दुः -द्वी -दु, शिथिलः -ला -लं, कोमलः -ला -लं, अदृढः -ढा -ढं, आयम्यः -म्या -म्यं, नम्यः -म्या -म्यं, आनम्यः -म्या -म्यं.

LIMBER, *s.* (Of a cannon) युद्धयन्त्रवाहनं, युद्धयन्त्रधुरा.

LIMBERNESS, *s.* शैथिल्यं, शिथिलता -त्वं, मृदुता, कोमलता, नम्यता.

LIMBLESS, *a.* निरवयवः -वा -वं, अनङ्गः -ङ्गा -ङ्गं, निरङ्गः -ङ्गा -ङ्गं, अङ्गहीनः -ना -नं, अङ्गशून्यः -न्या -न्यं, अवयवहीनः -ना -नं.

LIMBMEAL, *adv.* अवयवशस्, गात्रं गात्रं, खण्डशस्, खण्डं खण्डं.

LIMBO, *s.* (Hell) नरकः, निरयः.—(Prison) कारागारं, बन्धनागारं.

LIME, *s.* (Calcareous earth used for mortar) चूर्णं, कर्करः -रं, सुधा, छुरा, लेपः, विलेपः; 'nodule of lime,' चूर्णखण्डः, कर्करखण्डः, —(Bird-lime) पक्षिबन्धनलेपः, अतिश्यानद्रव्यं येन पक्षिणो बध्यन्ते, द्रव्यविशेषः.—(Lime-tree, citrus acida) जम्बीरः, गुरुवक्रोष्ठः, वक्रशोधी -धनः *m.*

To LIME, *v. a.* पूर्व्वोक्तश्यानद्रव्येण लिप् (c. 6. लिम्पति, लेप्तुं) or विलिप्.

LIME-BURNER, *s.* चूर्णकारः, चूर्णकर्त्ता *m.* (र्त्तृ), चूर्णदाहकः, चूर्णदाहकृत्.

LIME-KILN, *s.* चूर्णदहनस्थानं, चूर्णपचनस्थानं, चूर्णपाकः.

LIME-STONE, *s.* चूर्णखण्डः -ण्डं, कर्करखण्डः, कर्करं, चूर्णोपलः, कर्करोपलः.

LIME-WATER, *s.* चूर्णसंसृष्टं जलं, चूर्णजलं, कर्करजलं.

LIMIT, *s.* सीमा *f.*, सीमा *m.* (न्), परिसीमा *f. m.*, अवधिः *m.*, अन्तः -न्तं, पर्य्यन्तः -न्तं, समन्तः, प्रान्तः, मर्य्यादा, परिच्छेदः, अवच्छेदः, वेला, नेमः, पर्य्याप्तिः *f.*, परिमाणं, परिमितिः *f.*, अवसानं, पर्यवसानं, परिसरः, शेषः, आघाटः, चक्रवाटः, पारः -रं; 'that forms a limit,' अवधिभूतः -ता -तं.

To LIMIT, *v. a.* (Bound) प्रान्त (nom. प्रान्तयति -यितुं), समन्त (nom. समन्तयति -यितुं) or पर्य्यन्त, परिच्छिद् (c. 7. -च्छिनत्ति -च्छेत्तुं), अवच्छिद्, परिच्छेदं कृ, सावधिकं -कां कृ, सोपाधिकं -कां कृ, समर्य्यादं -दां कृ, ससीमं -मां कृ.—(Confine within certain bounds, circumscribe) परिमा (c. 2. -माति, c. 3. -मिमीते -मातुं), परिमितं -तां कृ, मितं -तां कृ, सपरिमाणं -णां कृ, संयम् (c. 1. -यच्छति -यन्तुं), नियम्, नियह् (c. 9. गृह्णाति -ग्रहीतुं), संहृ (c. 1. -हरति -हर्त्तुं), निबन्ध् (c. 9. -बध्नाति -बन्द्धुं), निरूप् (c. 10. -रूपयति -यितुं).

LIMITABLE, *a.* परिमेयः -या -यं, परिच्छेदनीयः -या -यं, निरूपणीयः -या -यं.

LIMITATION, *s.* (The act of bounding) सीमाकरणं, मर्य्यादाकरणं, अवधिकरणं, पर्य्यन्तकरणं, परिच्छेदः -दनं, अवच्छेदः -दनं, परिमाणकरणं.—(A state of restriction) परिमितता -त्वं, सावधिकता, समर्य्यादत्वं, सोपाधिकत्वं, ससीमत्वं, अवधिता, अवधिः *m.*, पर्य्यन्तं -न्तत्वं, अव्यापित्वं, निबन्धनं, बन्धः -न्धनं.

LIMITED, *p. p.* परिमितः -ता -तं, मितः -ता -तं, समर्य्यादः -दा -दं, सावधिकः -का -कं, सोपाधिकः -का -कं, ससीमः -मा -मं, सपरिमाणः -णा -णं, परिच्छिन्नः -न्ना -न्नं, नियतः -ता -तं, संयतः -ता -तं, निबद्धः -द्धा -द्धं, बद्धः -द्धा -द्धं, संहृतः -ता -तं, अव्याप्तः -प्ता -प्तं, अव्याप्यः -प्या -प्यं, अव्यापी पिनी -पि (न्), सङ्कुचितः -ता -तं, सबाधः -धा -धं; 'of limited meaning,' मितार्थः -र्था -र्थं.

LIMITER, *s.* मर्य्यादाकारी *m.* (न्), सीमाकर्त्ता *m.* (र्त्तृ), परिच्छेदकः, अवधिकृत्.

LIMITLESS, *a.* अपरिमितः -ता -तं, अमितः -ता -तं, अनन्तः -न्ता -न्तं, निरवधिः -धिः -धि.

To LIMN, *v. a.* लिख् (c. 6. लिखति, लेखितुं), आलिख्, विलिख्, अभिलिख्, चित्रं लिख्, चित्र् (c. 10. चित्रयति -यितुं).

LIMNER, *s.* चित्रकरः, चित्रकारः, चित्रलिख् *m.* (ख्), चित्रकर्म्मविद् *m.*

LIMOUS, *a.* पङ्किलः -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), सकर्द्दमः -मा -मं.

To LIMP, *v. n.* लङ्ग् (c. 1. लङ्गति -ङ्गितुं), खञ्ज् (c. 1. खञ्जति -ञ्जितुं), खोट् (c. 1. खोटति -टितुं), खोल् (c. 1. खोलति -लितुं), खोड् (c. 1. खोडति -डितुं), खोद् (c. 1. खोदति -दितुं), लुञ्च् (c. 1. लुञ्चते -ञ्चितुं), वङ्क् (c. 1. वङ्कति -ङ्कितुं).

LIMP, *s.* लङ्गः, खञ्जनं, लङ्गगतिः *f.*, खञ्जगतिः *f.*

LIMP, *a.* मृदुः -दुः -द्वी -दु, शिथिलः -ला -लं, कोमलः -ला -लं.

LIMPER, *s.* लङ्गगतिः *m.*, लङ्गगामी *m.* (न्), खञ्जगतिः *m.*, खञ्जः.

LIMPID, *a.* स्वच्छः -च्छा -च्छं, स्वच्छजलः -ला -लं, अच्छः -च्छा -च्छं, निर्म्मलः -ला -लं, विमलः -ला -लं, अमलः -ला -लं, निर्म्मलजलः -ला -लं, सुजलः -ला -लं.

LIMPIDNESS, LIMPIDITY, *s.* स्वच्छता, निर्म्मलता, विमलता, सुजलता, जलनैर्म्मल्यं.

LIMPING, *part.* or *a.* खञ्जः -ञ्जा -ञ्जं, पङ्गुः -ङ्गुः -ङ्गु, खोरः -रा -रं, खोलः -ला -लं, खोडः -डा -डं, लङ्गगतिः -तिः -ति, खञ्जगतिः &c., लङ्गगामी -मिनी -मि (न्), विकलगतिः &c.

LIMPINGLY, *adv.* खञ्जवत्, पङ्गुवत्, सलङ्गं, लङ्गगत्या, खञ्जगत्या.

LIMSY, LIMPSY, *a.* शिथिलः -ला -लं, मृदुः -दुः -दु, कोमलः -ला -लं.

LIMY, *a.* चूर्णमयः -यी -यं, सचूर्णः -र्णा -र्णं, कर्करीयः -या -यं, प्रचुरचूर्णः -र्णा -र्णं, कर्करमयः -यी -यं.—(Viscous) सान्द्रः -न्द्रा -न्द्रं, श्यानः -ना -नं, चूर्णसगुणः -णा -णं, चूर्णोपमः -मा -मं.

LIN, *s.* (Flax) अतसी, उमा, क्षुमा, क्षौमी, शणं.

LINCH-PIN, *s.* अक्षाग्रकीलः -लकः, अक्षाग्रशङ्कुः *m.*, अक्षाग्रशलाका, अणिः *m.*, आणिः *m. f.*, उद्ग्रथः.

LINCTURE, *s.* (Medicine) अवलेहः, अवलेह्यं, लेह्यं, अवलेह्यौषधं.

LINE, *s.* रेखा, लेखा, सरणिः -णी, धारणी, राजिः -जिका *f.*, राजी पंक्तिः *f.*, पद्धतिः *f.*, आलिः -ली *f.*, आवलिः -ली *f.*, पालिः -ली *f.*, ततिः *f.*, श्रेणिः -णी *m. f.*—(Ruled line) वर्त्तिः *f.*, रेखा, लेखा, अङ्कः—(Row, range) पंक्तिः *f.*, श्रेणिः -णी राजिः -जी *f.*, पद्धतिः *f.*, आवलिः -ली *f.*, माला, हारः; 'in a line,' पंक्तिक्रमेण; 'in the same line,' समरेखः -खा -खं, एकरेखः &c.—(Line of troops) दण्डः, पंक्तिः *f.*, व्यूहः, विन्यासः, सैन्यपंक्तिः *f.* बलविन्यासः; 'an array of troops in line,' दण्डव्यूहः; 'line of infantry,' पत्तिपंक्तिः *f.* पत्तिश्रेणी.—(String, cord) सूत्रं, रज्जुः *m. f.*, गुणः, तन्तुः *m.*—(Cord extended to direct any operation) सूत्रं; 'by line and rule,' यथासूत्रं.—(Line of the face, &c.) मुखरेखा, वदनरेखा, रेखा 'a lucky line,' आयुष्यरेखा, पद्मरेखा, स्वस्तिकः.—(Line of print &c.) पंक्तिः *f.*—(Line of a stanza) पदं.—(Outline) पाण्डुरेखा बहिर्लेखा.—(Contour) आकारः, आकृतिः *f.*, परिधिः *m.*—(Rampart trench) प्राकारः, वप्रः, दुर्गवप्रः, परिखा, परिकूटं.—(Method, disposition) क्रमः, अनुक्रमः, पर्य्यायः, मार्गः, परम्परा, विन्यासः, परिपाटिः -टी *f.*—(Series) श्रेणी -णिः *m. f.*, पंक्तिः *f.*, परम्परा, पारम्पर्य्यं, आवलिः -ली *f.*, माला, आनुपूर्व्यं; 'in regular line,' क्रमशस् अनुक्रमशस्, अनुपूर्व्वशस्, पारम्पर्य्येण.—(Line of a family) वंशावलिः *f.* वंशपरम्परा, वंशपारम्पर्य्यं, कुलपरम्परा.—(Line of conduct) मार्गः पथः, व्यवहारः, रीतिः *f.*, वृत्तिः *f.*; 'correct line of conduct,' सुमार्गः, सुपथः; 'incorrect line,' उन्मार्गः, विमार्गः, विपथः, कुपथः कुवृत्तिः *f.*—(Line of study) अध्ययनमार्गः, अध्ययनक्रमः.—(Department) देशः, विषयः, अङ्गं.—(Direction, course) दिक् *f.* (श्), पथः, मार्गः; 'line of direction in mechanics,' गुरुत्वलम्बः; 'it goes in a different line,' भिन्नदिशं गच्छति.—(Fishing-line) वरडः, वडिशसूत्रं, मत्स्यग्रहणसूत्रं.—(Equator) विषुवचक्रं, विषुवमण्डलं विषुवद्वृत्तं, विषुववृत्तं, विषुवरेखा, नाडीवृत्तं, नाडीमण्डलं, भूगोलरेखा भूपरिधिः *m.*, भूचक्रं, भूमध्यरेखा.—(To draw lines) लिख् (c. 6

लिखति, लेखितुं), उल्लिख्, प्रोल्लिख्, रेखां कृ; 'to draw lines on the ground,' रेखादिना भूमिम् उल्लिख् or अङ्क् (c. 10. अङ्कयति -यितुं); 'act of drawing lines,' रेखाकरणं, प्रोल्लेखनं, उल्लिखनं; 'drawing lines,' उल्लिखन् -खन्ती -खत् (त्), प्रोल्लिखन् &c.

To LINE, *v. a.* (Cover on the inside) अन्तर् or अन्तर्भागे छद् (c. 10. छादयति -यितुं) or अन्तश्छद्, अन्तश्छादनं कृ, अभ्यन्तरे छद्, अन्तःपटलं कृ, अन्तःपुटं कृ.—(Place in a line) पंक्तिक्रमेण स्था in caus. (स्थापयति -यितुं).

[L]INEAGE, *s.* अन्वयः, वंशः, सन्ततिः *f.*, सन्तानः, कुलं, अन्ववायः, गोत्रं, वंशविततिः *f.*, वंशपरम्परा, आवली -लिः *f.*, वंशावलिः, परम्परा, जातिः *f.*, जननं, अभिजनः; 'of royal lineage,' राजवंश्यः -श्या -श्यं; 'of high lineage,' महाकुलः -ला -लं.

[L]INEAL, *a.* (Compound of lines) रेखामयः -यी -यं, रेखारूपः -पा -पं, अङ्कितः -ता -तं.—(Derived from ancestors in a direct line) परम्परागतः -ता -तं, परम्परायातः -ता -तं, परम्पराप्राप्तः -प्ता -प्तं, क्रमागतः -ता -तं, क्रमायातः -ता -तं, क्रमप्राप्तः -प्ता -प्तं, वंशक्रमागतः -ता -तं, [illegible]: -णा -णं, पारम्परिकः -की -कं: 'a lineal descendant,' [illegible], सन्ततिः *f.*: 'lineal descent,' क्रमागमः, वंशक्रमागमः, क्रमागतत्वं, अन्वयागमः.

[LINE]ALLY, *adv.* क्रमागमेन, वंशक्रमेण, पारम्पर्येण, परम्परतस्; 'lineally descended,' वंशक्रमागतः -ता -तं, वंशक्रमायातः -ता -तं, अन्वयागतः -ता -तं, कुलक्रमागतः -ता -तं.

[LINEA]MENT, *s.* (Feature) रेखा, वदनरेखा, मुखरेखा, वदनाकृतिः *f.*, वदनाकारः, मुखावयवः, रूपचिह्नं, रूपलक्षणं, अङ्गचिह्नं, अङ्गलक्षणं.—(Outline) बहिर्लेखा, बाह्यरेखा, वस्तु *n.*, [illegible]; 'of just lineaments,' [illegible]: -खा -खं.

[LINE]AR, *a.* पांक्तः -क्ती -क्तं, पांक्तेयः -यी -यं, पंक्तिरूपः -पा -पं, पंक्तिमयः [illegible], रेखामयः -यी -यं, रेखारूपः &c., रेखासम्बन्धी -न्धिनी -न्धि (न्).

[LINED, *p. p.*] अन्तर्भागे छादितः -ता -तं, अन्तराच्छादितः -ता -तं, अन्तरावृतः &c.

[LINEN, *a.*] (Made of flax or hemp) क्षौमः -मी -मं, क्षौमः -मी -मं, [क्षौमि]कः -की -कं, शाणः -णी -णं, अतसीमयः -यी -यं, शाणमयः &c.

[—, *s.*] क्षौमवस्त्रं, क्षौमपटः, शाणवस्त्रं, शाणपटः, क्षौमी, क्षौमवस्त्रं, [क्षौमप]टः, क्षौमाम्बरं.

[LINEN-]DRAPER, *s.* क्षौमवस्त्रविक्रेता *m.* (तृ), क्षौमपटविक्रयी *m.* (न्), वस्त्रक्रयोपजीवी *m.* (न्), वस्त्रक्रयविक्रयिकः, वस्त्रवाणिज्यकारी *m.* (न्).

[LING,] *s.* (Plant) जङ्गलरूहं तृणं, जङ्गलरोही तृणभेदः.

To LINGER, *v. n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), मन्द (nom. मन्दायते), चिर (nom. चिरयति, चिरायति), अवस्था (c. 1. -तिष्ठति -स्थातुं), कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विलम्बनं कृ, कालक्षेपं कृ.—(Hesitate) विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं), विचर् (c. 10. -चारयति -यितुं), विकल्पं कृ, विचारणं कृ.—(Remain long in any state) चिरेण or चिरं or चिरकालं or दीर्घकालं स्था or अवस्था or वृत् (c. 1. -वर्त्तते -र्त्तितुं), सुचिरं स्था; 'on a bed of sickness,' चिररोगी -गिणी भू.—(Proceed slowly) मन्दं मन्दं चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं).

[L]INGERER, *s.* विलम्बी *m.* (न्), विलम्बकारी *m.*, मन्दगामी *m.* (न्), मन्दगतिः *m.*, चिरक्रियः, कालक्षेपकः, कालयापकः, दीर्घसूत्री *m.* (न्).

[L]INGERING, *part.* मन्दायमानः -ना -नं, मन्दयमानः -ना -नं, विलम्बी -म्बिनी -म्बि (न्), विलम्बितः -ता -तं, चिरायमाणः -णा -णं.—(Remaining long) चिरस्थः -स्था -स्थं, चिरस्थायी -यिनी -यि (न्), चिरस्थितः -ता -तं, चिरकालस्थः -स्था -स्थं, दीर्घकालीनः -ना -नं, चिरकालीनः -ना -नं.

LINGERINGLY, *adv.* विलम्बेन, विलम्बात्, सविलम्बं, मन्दं मन्दं, मन्दगत्या, कालक्षेपेण, सकालक्षेपं, दीर्घसूत्रवत्, दीर्घसूत्रतया.

LINGET, *s.* (Mass of metal) धातुपिण्डः, लोहपिण्डः.

LINGUADENTAL, *a.* जिह्वादन्त्यः -न्त्या -न्त्यं, जिह्वादान्तः -न्ती -न्तं.

LINGUAL, *a.* जिह्वासम्बन्धी -न्धिनी -न्धि (न्), जैह्विकः -की -कं, जिह्वा in comp.

LINGUIFORM, *a.* जिह्वारूपः -पा -पं, जिह्वाकारः -रा -रं, जिह्वाकृतिः -तिः -ति.

LINGUIST, *s.* भाषाज्ञः, बहुभाषाज्ञः, नानाभाषाज्ञः, अनेकभाषाज्ञः, बहुभाषावेत्ता *m.* (तृ), नानाभाषानिपुणः, शाब्दिकः, शब्दव्युत्पन्नः, बहुभाषावादी *m.* (न्), उच्चारणज्ञः.

LINIMENT, *s.* लेहनं, उपदेहः, लेपः, आलेपः, प्रलेपः, विलेपनं, अनुलेपनं, अभ्यङ्गः, अभ्यञ्जनं, मर्दनौषधं.

LINING, *s.* अन्तश्छादनं, अन्तराच्छादनं, अन्तर्वेष्टनं, अन्तःपटलं, अन्तःपुटः -टं, आस्तरः -रणं, अन्तरास्तरणं.

LINK, *s.* (Of a chain) शृङ्खलासन्धिः *m.*, शृङ्खलसन्धिः, शृङ्खलाग्रन्थिः *m.*—(A chain, any thing connecting) शृङ्खलः -ला, सन्धिः *m.*, बन्धनं, पाशः, संयोगः, सम्बन्धः.—(Part of a connected series) अन्वयः, समन्वयः, प्रबन्धः.—(Torch) उल्का, उल्मुकं, ज्वलनकाष्ठं, अग्निकाष्ठं.

To LINK, *v. a.* सन्धा (c. 3. -दधाति -धत्ते -धातुं), संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), सम्बन्ध् (c. 9. -बध्नाति -बन्धुं), संश्लिष् (c. 10. -श्लेषयति -यितुं), योक्त्र (nom. योक्त्रयति -यितुं), ग्रन्थ् (c. 9. ग्रथ्नाति, ग्रन्थितुं), शृङ्खलारूपेण सन्धा.

LINK-BOY, *s.* उल्काभृत्, उल्काधारी *m.* (न्), ज्वलनकाष्ठभृत्.

LINKED, *p. p.* सन्धितः -ता -तं, संयुक्तः -क्ता -क्तं, सम्बद्धः -द्धा -द्धं, अनुसम्बद्धः &c., अनुबद्धः &c., अन्वितः -ता -तं, समन्वितः -ता -तं, सान्वयः -या -यं.

LINNET, *s.* लिखताख्यो मधुररुतविशिष्टः क्षुद्रपक्षी.

LINSEED, *s.* अतसीबीजं, उमाबीजं, क्षुमाबीजं, अतसी, उमा, क्षुमा, मसीना, मसृणा, [illegible] नीलपुष्पिका, मालिका.

LINSEY-WOOLSEY, *a.* क्षौमाविकः -की -कं, क्षौमोर्णः &c., शाणोर्णः &c.

LINSTOCK, *s.* अग्निदयष्टिः *m.*, अग्निदकाष्ठं, अग्निदशलाका, अग्निदण्डः, ज्वलनदण्डः, ज्वलनकाष्ठं, शलाका.

LINT, *s.* विकेशिका, व्रणशोषणार्थं क्षौमवस्त्रखण्डः or क्षौमपटखण्डः or शाणवस्त्रखण्डः.

LINTEL, *s.* द्वारोपरिस्थकाष्ठं, द्वारोपरिस्थदारुः *m.*, द्वारोपरिस्थितं काष्ठं, द्वाराग्रकाष्ठं.

LION, *s.* सिंहः, केसरी *m.* (न्), केशरी *m.*, हरिः *m.*, मृगेन्द्रः, मृगराजः, मृगराट् *m.* (ज्), मृगपतिः *m.*, पशुराजः, पशुपतिः *m.*, वनराजः, मृगरिपुः *m.*, मृगारिः *m.*, गजारिः *m.*, कुञ्जरारातिः *m.*, द्विरदान्तकः, हस्तिकक्ष्यः, भीमनादः, भीमविक्रान्तः, भारिः *m.*, हरित् *m.*, हर्यक्षः, पञ्चास्यः, पञ्चमुखः, पञ्चाननः, पञ्चवक्त्रः, पञ्चशिखः, सटाङ्कः, जटिलः; 'a lion's mane,' केशरः, केसरः, सिंहकेशरः; 'lion's mouth,' सिंहमुखं, मृगेन्द्रमुखं; 'lion's roar,' सिंहनादः -दकः, सिंहध्वनिः *m.*; 'abounding with lions,' सिंहाढ्यः -ढ्या -ढ्यं; 'he plays the lion,' सिंहायते.—(Sign in the zodiac) सिंहः. *See* LEO. (Object of curiosity) कौतुकं.

LIONESS, *s.* सिंही, केशरिणी, केसरिणी, मृगराज्ञी, वनराज्ञी.

LION-LIKE, LIONLY, *a.* सैंहः -ही -हं, सैंहिकः -की -कं, सिंहस्वभावः -वा -वं.

LIP, *s.* ओष्ठः, अधरः, दशनच्छदः, रदनच्छदः, रदच्छदः, दन्तच्छदः, दच्छदः, दशनवासस् *n.*, वाग्दलं, ओष्ठपल्लवं, अधरपुटं, ओष्ठपुटः -टं; 'the upper lip,' is properly ओष्ठः; 'the lower lip,' अधरः.—

(The lips) ओष्ठाधरौ m. du., ओष्ठौ m. du., अधरौ du., दन्तच्छदौ, रदनच्छदौ, दशनच्छदौ, दशनवाससी n. du.; 'red or cherry lip,' बिम्बोष्ठः or बिम्बौष्ठः, बिम्बाधरः; 'having red lips,' बिम्बोष्ठः -ष्ठा -ष्ठं or बिम्बौष्ठः; 'nectar of the lips,' अधरामृतं; 'drinking the nectar of the lips,' अधरपानं; 'to bite the lips,' ओष्ठं or अधरं or ओष्ठाधरौ दंश् (c. 1. दशति, दंष्टुं) or सन्दंश्, दन्तैर् ओष्ठं खाद् (c. 1. खादति -दितुं), अधरावलोपं कृ, ओष्ठदंशनं कृ; 'biting the lips,' सन्दष्टौष्ठः -ष्ठा -ष्ठं, दष्टदच्छदः -दा -दं, सन्दष्टौष्ठपुटः -टा -टं.—(Edge of a cup, &c.) पात्रकण्ठः, पात्रमुखं, पात्रधारः, पात्रकर्णः, पात्रपार्श्वः.

Lip-devotion, *s.* ओष्ठभक्तिः *f.*, अधरभक्तिः *f.*, ओष्ठपूजा, अधरपूजा.

Lipless, *a.* ओष्ठहीनः -ना -नं, अधरहीनः -ना -नं, निरोष्ठः -ष्ठा -ष्ठं.

Lipothymous, *a.* मूर्च्छितः -ता -तं, मूर्च्छालः -ला -लं, नष्टचेतनः -ना -नं.

Lipothymy, *s.* मूर्च्छा -र्च्छनं -ना, मोहः, सम्मोहः, प्रमोहः, प्रलयः, चेतनाहानिः *f.*, चैतन्यहानिः *f.*, चैतन्यनाशः.

Lipped, *a.* ओष्ठवान् -वती -वत् (त्), ओष्ठी -ष्ठिनी -ष्ठि (न्), ओष्ठ or अधर in comp.; as, 'red lipped,' बिम्बोष्ठः -ष्ठा -ष्ठं or बिम्बौष्ठः &c., बिम्बाधरः -रा -रं.

Lippitude, *s.* चुल्लत्वं, पिल्लत्वं, चिल्लत्वं, क्लिन्नाक्षता, नयनक्लिन्नता.

Lip-salve, *s.* ओष्ठलेपः, ओष्ठप्रलेपः, ओष्ठलेहनं, अधराभ्यञ्जनं.

Liquefaction, *s.* (The act) द्रावः -वणं, विद्रावः -वणं, द्रवीकरणं, विलयः -यनं, लयः -यनं, गलनं, गालनं, परिगलनं, विगलनं, क्षरणं, जलसात्करणं.—(The state) द्रवत्वं, द्रावितत्वं, विलीनता, गलितत्वं, द्रुतत्वं, विद्रुतता.

Liquefiable, liquable, *a.* द्राव्यः -व्या -व्यं, विद्राव्यः -व्या -व्यं, विलयनीयः -या -यं, गलनीयः -या -यं, द्रवणीयः -या -यं or द्रावणीयः सुविलयः -या -यं, विलयनशीलः -ला -लं, द्रावणार्हः -र्हा -र्हं, द्रवार्हः -र्हा -र्हं, क्षरणीयः -या -यं, क्षरभावः -वा -वं, याव्यः -व्या -व्यं.

Liquefied, *p. p.* द्रुतः -ता -तं, विद्रुतः -ता -तं, द्रावितः -ता -तं, विद्रावितः -ता -तं, द्रवीकृतः -ता -तं, द्रवीभूतः -ता -तं, लीनः -ना -नं, विलीनः -ना -नं, निलीनः -ना -नं, गलितः -ता -तं, गालितः -ता -तं, परिगलितः -ता -तं, विगलितः -ता -तं.

To liquefy, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), विद्रु (c. 10. -द्रावयति -यितुं), द्रु, द्रवीकृ, गल् (c. 10. गालयति -यितुं), विगल्, गलितीकृ, विलीनीकृ, जलसात्कृ, आर्द्रीकृ.

To liquefy, *v. n.* विली (c. 4. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल्, क्षर् (c. 1. क्षरति -रितुं), द्रवीभू, विलीनीभू, जलसाद्भू.

Liquid, *a.* द्रवः -वा -वं, द्रुतः -ता -तं, द्रवरूपः -पा -पं, सद्रवः -वा -वं, विद्रुतः -ता -तं, विलीनः -ना -नं, लीनः -ना -नं, गलितः -ता -तं, तरलः -ला -लं, विह्वलः -ला -लं, प्रवाही -हिणी -हि (न्), प्रवाहधर्म्मकः -का -कं, पयस्यः -स्या -स्यं.

Liquid, *s.* द्रवः, द्रवद्रव्यं, द्रवपदार्थः, द्रववस्तु *n.*, सद्रवपदार्थः, रसः, आर्द्रद्रव्यं, आर्द्रवस्तु *n.*, जलं, वारि *n.*, पयस् *n.*

To liquidate, *v. a.* शुध् (c. 10. शोधयति -यितुं), परिशुध्, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं), निस्तृ (c. 10. -तारयति -यितुं), अपनी (c. 1. -नयति -नेतुं), विनी, अपसृज् (c. 10. -सर्जयति -यितुं), अपाकृ, साध् (c. 10. साधयति -यितुं); 'settle a debt,' ऋणं शुध् or अपनी or विनी or अपाकृ or अपसृज् or साध्, ऋणशोधनं कृ, ऋणसिद्धिं कृ, ऋणशुद्धिं कृ.

Liquidated, *p. p.* शोधितः -ता -तं, परिशोधितः -ता -तं, परिशुद्धः -द्धा -द्धं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, ऋणमुक्तः -क्ता -क्तं, ऋणमोचितः -ता -तं, अपाकृतः -ता -तं, विमोक्षितः -ता -तं, निस्तारितः -ता -तं, उत्तीर्णः -र्णा -र्णं.

Liquidation, *s.* शोधनं, परिशोधनं, शुद्धिः *f.*, परिशुद्धिः *f.*, मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः -क्षणं, परिमोक्षणं, निस्तारः, उद्धरणं, अपाकरणं, सिद्धिः *f.*, साधनं, अपनयनं; 'of a debt,' ऋणशोधनं, ऋणसिद्धिः *f.*, ऋणापाकरणं, ऋणशुद्धिः *f.*, ऋणापनयनं, ऋणापनोदनं, विगणनं, निरादेशः.

Liquidity, liquidness, *s.* द्रवत्वं -ता, द्रावत्वं -ता, विद्रुतत्वं, विलीनता, गलितत्वं, द्रवभावः, रसता, प्रवाहधर्म्मः.

Liquor, *s.* (Fluid) द्रवः, द्रवद्रव्यं, द्रवपदार्थः, सद्रवपदार्थः, द्रववस्तु *n.*, रसः, जलं.—(Drink) पेयं, पानीयं, पेयद्रव्यं.—(Spirituous liquor) मद्यं, मदिरा, मदः, सुरा -री, वारुणी, शुण्डा, शीधुः *m.* -धु, सीधुः *m.*, हाला, आसवं, कल्यं -ल्या, कश्यं; 'drinker of spirituous liquor,' सुरापः -पी *f.*, मद्यपः -पी *f.*, शीधुपः -पी *f.*, शुण्डापायी *m.* -यिनी *f.*

Liquor-shop, *s.* मदिरागृहं, मद्यविक्रयस्थानं, शुण्डापानं.

Liquorice, *s.* मधुयष्टिका, यष्टिमधु *n.*, मधुकं, मधूली. *See* Licorice.

To lisp, *v. a.* or *n.* गद्गद् (nom. गद्गदति), गद्गदवाचा वद् (c. 1. वदति -दितुं), बालकवद् उच्चर् (c. 10. -चारयति -यितुं), भग्नमन्दैर् इव उच्चर्, भग्नदन्तोच्चारणं कृ, भग्नस्वरेण or भिन्नस्वरेण वद् or उच्चर्, अस्पष्टवाचा or अस्फुटवाचा उच्चर्, अस्पष्टोच्चारणं कृ, अस्फुटोच्चारणं कृ, जल्प् (c. 1. जल्पति -ल्पितुं).

Lisp, lisping, *s.* गद्गदः, गद्गदवाक् *f.* (च्), गद्गदपदं, गद्गदवाक्यं, भग्नदन्तोच्चारणं, भग्नस्वरोच्चारणं, भिन्नस्वरोच्चारणं, अस्फुटोच्चारणं, अस्पष्टोच्चारणं, बालकवद् उच्चारणं.

Lisped, *p. p.* भग्नदन्तोच्चारितः -ता -तं, अस्पष्टोच्चारितः -ता -तं.

Lisper, lisping, *a.* अस्फुटवाक् *m. f. n.* (च्), अस्पष्टवाक् *m. f. n.*, गद्गदवाक् *m. f. n.*, अस्फुटजल्पः -ल्पा -ल्पं, चित्रजल्पः &c., लोहलः -ला -लं, भग्नदन्तोच्चारणकृत्.

Lispingly, *adv.* अस्फुटवाचा, अस्पष्टवाचा, गद्गदवाचा, बालकवत्.

List, *s.* (Catalogue) आवलिः -ली *f.*, अनुक्रमणिका, परिसंख्या, परिसंख्यापत्रं, परिगणना, सूचिः -ची *f.*, सूचिपत्रं; 'a list of names,' नामावलिः -ली *f.*, नामावलिपत्रं, नामपरिसंख्यापत्रं; 'list of errata,' शुद्धिपत्रं.—(Strip of cloth) पट्टः -ट्टकः, पटखण्डः, वस्त्रखण्डः.—(Border or edge of cloth) वस्त्रधारः, वस्त्रप्रान्तः, वसनप्रान्तः वस्त्रान्तः, वसनान्तः, वस्तिः *m.*, तरी, दशा.—(Ground enclosed as a field of combat) रङ्गभूमिः *f.*, रणभूमिः, रङ्गाङ्गनं, रङ्गः, युद्धभूमिः *f.*, युद्धक्षेत्रं, रणाजिरं, मल्लभूमिः *f.*, मल्लभूः *f.*—(Liking, desire) इच्छा, रुचिः *f.*, अभिरुचिः *f.*, स्पृहा.

To list, *v. a.* (Enroll) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति -यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्.—(Cover with strips of cloth) पट्टेन or पटखण्डेन छद् (c. 10. छादयति -यितुं) or आछद्, पट्टबन्धनं कृ.—(Sew together strips of cloth) पटखण्डान् संसिव् (c. 4. -सीव्यति, सेवितुं) or निषिव्.—(Hearken) आकर्ण् (c. 10. -कर्णयति -यितुं), कर्णं दा.

To list, *v. n.* (Desire, choose) इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति -षितुं), रुच् (c. 1. रोचते) used impersonally; 'doing as one lists,' कामचारी -रिणी -रि (न्), कामचारः -री -रं, 'going as one lists,' कामगामी -मिनी &c., कामगः -गा -गं; 'as one lists,' कामतस्, कामचारतस्. *See* Like.

To Listen, *v. n.* आकर्ण् (c. 10. -कर्णयति -यितुं), श्रु (c. 5. शृणोति,

श्रोतुं), आश्रु, उपश्रु, निशम् (c. 10. -शामयति -यितुं), कर्णं दा (c. 3. ददाति, दातुं), श्रवणं कृ.—(Heed, lend the mind) अवधा (c. 3. -धत्ते -धातुं), मनो धा, सावधानः -ना -नं भू, अवहितः -ता -तं भू or अस्, अवधानं कृ; 'listen,' शृणु, कर्णं देहि, अवधीयतां.—(Obey, follow admonition) श्रु in des. (शुश्रूषते -षितुं), अनुविधा in pass. (-धीयते), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं).

ISTENER, *s.* श्रोता *m.* -त्री *f.* (तृ), श्रवणकर्त्ता *m.* -र्त्री *f.* (र्तृ), निशमनकारी *m.* -रिणी *f.* (न्).

ISTLESS, *a.* अनुत्सुकः -का -कं, निरुत्सुकः -का -कं, अनिच्छुः -च्छुः -च्छु, अनिच्छुकः -का -कं, निरिच्छः -च्छा -च्छं, निःस्पृहः -हा -हं, निरीहः -हा -हं, उदासीनः -ना -नं, उदासी -सिनी -सि (न्), निरपेक्षः -क्षा -क्षं, विरक्तः -क्ता -क्तं, वीतरागः -गा -गं, विकौतुकः -का -कं, अनभिलाषः -षा -षं, अनवधानः -ना -नं, अनवहितः -ता -तं, निरुद्योगः -गा -गं, निरुद्यमः -मा -मं, अप्रयत्नः -त्ना -त्नं, अप्रयत्नशीलः -ला -लं, अनास्थः -स्था -स्थं, आस्थाहीनः -ना -नं, मन्दबुद्धिः -द्धिः -द्धि, जडः -डा -डं, जडबुद्धिः &c., अव्यग्रः -ग्रा -ग्रं, निःसङ्गः -ङ्गा -ङ्गं, ग्लानः -ना -नं, प्रमादी -दिनी &c. *See* LANGUID.

ISTLESSLY, *adv.* अनुत्सुकं, निरुत्सुकं, अनिच्छया, अनौत्सुक्येन, उदासीनवत्, अनभिलाषेण, अनवधानेन, अनवहितं, अनपेक्षया, जडवत्, अव्यग्रं. *See* LANGUIDLY.

ISTLESSNESS, *s.* अनुत्सुकता, अनौत्सुक्यं, निरुत्सुकता, अनिच्छा, अनीहा, निरीहता -त्वं, अस्पृहा, निःस्पृहता, अनभिलाषः, उदासीनता, औदास्यं, विरक्तिः *f.*, विरक्तता, वैराग्यं, अननुरागः, अनपेक्षा, अनवेक्षा, अनुत्साहः, अनुद्योगः, अप्रयत्नः -त्नता, अनास्था, आस्थाहीनता, मन्दबुद्धित्वं, जडता, जाड्यं, अव्यग्रता, मान्द्यं, ग्लानिः *f.* *See* LANGUOR.

ITANY, *s.* ख्रीष्टीयमतधारिभिर् व्यवहृतः प्रार्थनामार्गः, ख्रीष्टीयसमाजव्यवहारिता प्रार्थना.

ITERAL, *a.* (Not figurative) मूलार्थकः -का -कं, मुख्यार्थकः -का -कं, मुख्यः -ख्या -ख्यं, अरूपकः -का -कं, अव्यञ्जकः -का -कं, विवक्षितः -ता -तं, शक्यः -क्या -क्यं; 'literal occupation,' मुख्यत्वं, मुख्यार्थः, मूलार्थः, प्रकृतार्थः.—(Following the letter or exact words) मूलशब्दानुसारी -रिणी -रि (न्), मूलशब्दानुयायी -यिनी &c., मूलपदानुसारी &c., शब्दार्थानुसारी &c., अवयवार्थानुसारी &c., शब्दानुसारी &c., यथाशब्दः -ब्दा -ब्दं, शाब्दिकः -की -कं.—(Consisting of letters) आक्षरी -रिणी &c., अक्षरमयः -यी -यं.

ITERALITY, *s.* मुख्यत्वं -ता, मुख्यार्थत्वं, मूलार्थत्वं, मुख्यार्थः, मूलार्थः, प्रकृतार्थः, शब्दार्थः, अव्यञ्जनं -ना, अरूपकं.

ITERALLY, *adv.* (Not figuratively) मूलार्थानुसारेण, मुख्यार्थानुसारेण, मूलार्थतस्.—(Close to the letter or exact words) शब्दतस्, ग्रन्थतस्, यथाशब्दं, शब्दानुसारेण -रतस्, मूलशब्दानुसारेण, मूलपदानुसारात्, शब्दार्थतस्.—(Letter by letter) अक्षरशस्.

ITERARY, *a.* (Pertaining to literature) विद्यासम्बन्धी -न्धिनी -न्धि (न्), विद्याविषयः -या -यं, अक्षरसम्बन्धी &c., शास्त्रिकः -की -कं, शास्त्रीयः -या -यं, विद्याप्रकरणसम्बन्धी &c., साहित्यसम्बन्धी &c.—(Versed in literature, fond of it) विद्यावान् -वती -वत् (त्), शास्त्राभिज्ञः -ज्ञा -ज्ञं, विद्याप्रियः -या -यं, विद्यासेवी -विनी &c., विद्यानुसेवी &c., विद्यानुरागी -गिणी &c., विद्याव्यवसायी -यिनी &c., विद्यानुपाली -लिनी &c., विद्याविशिष्टः -ष्टा -ष्टं, विद्यासम्पन्नः -न्ना -न्नं.

ITERATE, *a.* पण्डितः -ता -तं, विद्यावान् -वती -वत् (त्), विद्यासम्पन्नः -न्ना -न्नं, व्युत्पन्नः -न्ना -न्नं, विद्वान् -दुषी -द्वत् (स्), विपश्चित् *m.f.n.*, साक्षरः -रा -रं.

LITERATI, *s. pl.* पण्डितमण्डली -लं, पण्डितसमाजः, विद्वत्समाजः, पण्डितगणः, पण्डितवर्गः, पण्डितसमूहः, विद्वद्वृन्दं.

MANUAL, a. (Pertaining to the hand) हस्त्यः -स्त्या -स्त्यं, हस्तसम्बन्धी -न्धिनी -न्धि (न्), हस्त in comp.—(Performed by the hand) हस्तकृतः -ता -तं, हस्तसाध्यः -ध्या -ध्यं, हस्तसाधनीयः -या -यं; 'manual operation,' हस्तकर्म्म n. (न्), हस्तक्रिया, हस्तव्यापारः; 'manual labor,' वार्त्तं, शिल्पकर्म्म; 'manual art,' शिल्पं; 'knowledge of it,' शिल्पविद्या; 'relating to it,' शिल्पिकः -की -कं; 'manual skill or dexterity,' हस्तकौशल्यं, हस्तकौशलं, हस्तलाघवं, हस्तचापल्यं; 'sign manual,' हस्ताक्षरं, स्वहस्ताक्षरं, स्वाक्षरं.

MANUAL, s. (Small book for carrying in the hand) पद्धतिः -ती f., सारग्रन्थः, सारसङ्ग्रहः, सारसंक्षेपः, संक्षिप्तग्रन्थः, संहिता; 'of laws,' धर्म्मसंहिता.

MANUFACTORY, s. शिल्पशाला -लं, शिल्पिशाला -लं, यन्त्रगृहं, आवेशनं, प्रावेशनं, अन्वासनं.

MANUFACTURAL, a. शिल्पिकः -की -कं, शिल्पकर्म्मसम्बन्धी -न्धिनी -न्धि (न्).

MANUFACTURE, s. (The act) निर्म्माणं, निर्म्मितिः f., कल्पनं -ना, रचनं -ना, विरचना, घटनं, सन्निवेशः, पर्य्यायः, शिल्पकर्म्म n. (न्), शिल्पेन or शिल्पकर्म्मणा निर्म्माणं or करणं.—(The article) शिल्पिकद्रव्यं, शिल्पनिर्म्मितद्रव्यं, शिल्पिकवस्तु n.

To MANUFACTURE, v. a. शिल्पेन or शिल्पकर्म्मणा निर्मा (c. 2. -माति -तुं, c. 3. -मिमीते caus. मापयति -यितुं) or विनिर्मा or क्लृप् (c. 10. कल्पयति -यितुं) or कृ (c. 8. करोति, कर्त्तुं, c. 10. कारयति -यितुं) or संस्कृ or रच् (c. 10. रचयति -यितुं) or विरच् or घट् (c. 1. घटते -टितुं).

MANUFACTURED, p. p. शिल्पनिर्म्मितः -ता -तं, शिल्पकृतः -ता -तं, शिल्पकल्पितः -ता -तं, निर्म्मितः -ता -तं, शिल्पिकः -की -कं, कार्म्मिकः -की -कं.

MANUFACTURER, s. शिल्पी m. (न्), शिल्पिकः, शिल्पकारः.

MANUMISSION, s. दास्यमुक्तिः f., दास्यमोचनं, दास्यमोक्षः -क्षणं, दासमोक्षः &c.

To MANUMIT, v. a. दास्याद् विमुच् (c. 6. -मुञ्चति -मोक्तुं) or मुच् or मोक्ष् (c. 10. मोक्षयति -यितुं) or विमोक्ष्, विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं).

MANUMITTED, p. p. दास्यमुक्तः -क्ता -क्तं, दास्यमोक्षितः -ता -तं, मुक्तदास्यः -स्या -स्यं, दास्यविमोचितः -ता -तं, अभुजिष्यः -ष्या -ष्यं.

To MANURE, v. a. भूमिं पुरीषादिना लिप् (c. 6. लिम्पति, लेप्तुं), उर्व्वराकरणार्थं गोमयादिसम्मिश्रद्रव्यं भूमौ प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or क्षिप् or धा (c. 3. दधाति, धातुं), भूमिलेपनेन or पांशुप्रक्षेपेण उर्व्वरात्वं जन् (c. 10. जनयति -यितुं) or बहुशस्योत्पादकत्वं जन्, आलवालं स्था in caus. (स्थापयति -यितुं).

MANURE, s. भूमिलेपः -पनं, पांशुः m., पांसुः m., सारः, पुरीषादि n., पुरीषादिसम्मिश्रद्रव्यं, गोमयादिसम्मिश्रद्रव्यं, शस्योत्पादकद्रव्यं.

MANUSCRIPT, s. हस्तलेखः -खनं, हस्तलिखितं, हस्तलेख्यं, लेख्यं, लिखितं, पुस्तकं -की, पुस्तं -स्ती.

MANUSCRIPT, a. हस्तलिखितः -ता -तं, लेख्यकृतः -ता -तं, लिखितः -ता -तं.

MANY, a. बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, अनेकः -का -कं, प्रचुरः -रा -रं, भूरिः -रिः -रि, बहुसंख्यकः -का -कं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, नैकः -का -कं, अनल्पः -ल्पा -ल्पं, पुष्कलः -ला -लं, विपुलः -ला -लं, प्राज्यः -ज्या -ज्यं, प्रभूतः -ता -तं, पुरुः -रुः -रु, पुरुहः -हा -हं, बहुः -हुः -हु, अदभ्रः -भ्रा -भ्रं, बहुतिथः -था -थं, स्फिरः -रा -रं, नाना in comp.; 'as many as,' यावान् -वती -वत् (त्) or यावत् indec., यावत्संख्यकः -का -कं, यत्संख्यकः -का -कं, यतयः यतीनि or यति indec.; 'so many,' तावान् -वती -वत् (त्) or तावत् indec., तावत्संख्यकः -का -कं, तत्संख्यकः -का -कं, ततयः m. f. ततीनि n. or तति indec.; 'how many?' कियान् -यती -यत् (त्) or कियत् indec., कतिः -तिः -ति or plur. कतयः, कतीनि; 'of how many sorts?' कतिविधः -धा -धं; 'in many places,' बहुत्र, अनेकत्र; 'in many ways,' बहुधा, अनेकधा; 'in how many ways?' कतिधा; 'many times,' बहुशस्, अनेकशस्, बहुवारं, बहुकृत्वस्, मुहुर् मुहुः, भूयस्, पुनः पुनर्.

MANY, s. (A multitude) समूहः, समवायः, समुदायः, समाजः, संघातः, ओघः, निवहः, वृन्दं; 'the interests of the many,' समूहकार्य्यं.

MANY-COLORED, a. नानावर्णः -र्णा -र्णं, नानारङ्गः -ङ्गा -ङ्गं, बहुवर्णः -र्णा -र्णं, चित्रविचित्रः -त्रा -त्रं, बहुरङ्गी -ङ्गिणी -ङ्गि (न्).

MANY-CORNERED, a. बहुकोणः -णा -णं, अनेककोणविशिष्टः -ष्टा -ष्टं.

MANY-FIBERED, a. बहुतन्त्री -न्त्रिणी -न्त्रि (न्), बहुसूत्री -त्रिणी &c.

MANY-FLOWERED, a. बहुपुष्पः -ष्पा -ष्पं, प्रचुरकुसुमः -मा -मं.

MANY-HEADED, a. बहुशिराः -राः -रः (स्), बहुशिरस्कः -स्का -स्कं, बहुमस्तकः -का -कं, अनेकमस्तकः -का -कं, बहुमूर्द्धा -र्द्धा -र्द्ध (न्).

MANY-LEAVED, a. बहुपर्णः -र्णा -र्णं, बहुपत्रः -त्रा -त्रं, प्रचुरपर्णः &c.

MANY-LEGGED, a. बहुपादः -दा -दं, बहुपाद् m. f. n., बहुजङ्घः -ङ्घा -ङ्घं.

MANY-STREAMED, a. बहुप्रवाहः -हा -हं, बहुस्रोताः -ताः -तः (स्).

MANY-STRINGED, a. बहुसूत्री -त्रिणी -त्रि (न्), बहुतन्त्रिकः -का -कं.

MANY-TONGUED, a. बहुजिह्वः -ह्वा -ह्वं, अनेकजिह्वः -ह्वा -ह्वं.

MAP, s. देशालेख्यपत्रं, भूपृष्ठालेख्यपत्रं, देशालेख्यं, देशसमुद्राद्यालेख्यं, भूगोलस्य देशसमुद्रनगराद्यालेख्यं, देशचित्रं, भूपृष्ठभङ्गिप्रदर्शनपत्रं, भूपृष्ठदेशालेख्यं.

To MAP, v. a. भूपृष्ठदेशान् लिख् (c. 6. लिखति, लेखितुं) or आलिख् or चित्र् (c. 10. चित्रयति -यितुं), देशालेख्यं कृ, भूपृष्ठालेख्यं कृ.

To MAR, v. a. दुष् (c. 10. दूषयति -यितुं), नश् (c. 10. नाशयति -यितुं), हन् (c. 2. हन्ति -न्तुं), व्याहन्, विहन्, क्षतिं कृ.

MARASMUS, s. क्षयः, क्षयरोगः, क्षयथुः m., यक्ष्मा m. (न्), राजयक्ष्मा m., शोषः.

To MARAUD, v. n. युद्धसमये गोधान्यादिग्रहणार्थम् इतस्ततो भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम्, लोप्त्रार्थं परिभ्रम् or उपद्रवं कृ or विप्लवं कृ or उपद्रु (c. 1. -द्रवति -द्रोतुं).

MARAUDER, s. लोप्त्रार्थं परिभ्रमणकारी m. (न्), उपद्रवी m. (न्), विप्लवकारी m., उपद्रवकारी m., उपप्लवकृत्, लुण्टाकः.

MARAUDING, s. युद्धकाले गोधान्याद्यपहरणार्थम् इतस्ततः परिभ्रमणं, विप्लवः, उपप्लवः, उपद्रवः, विप्लवकरणं.

MARBLE, s. मार्बलाख्यो नानावर्णः प्रस्तरः, रुचिरप्रस्तरः, चारुप्रस्तरः, पाषाणः, ग्रावा m. (न्), शिला, उपलः.

MARBLE, a. (Made of marble) पूर्व्वोक्तप्रस्तरमयः -यी -यं, पाषाणनिर्म्मितः -ता -तं.—(Variegated) प्रस्तररेखानुकारेण चित्रितः -ता -तं.

MARBLE-HEARTED, a. पाषाणहृदयः -या -यं, वज्रहृदयः &c., वज्रचित्तः -त्ता -त्तं.

MARCASITE, s. आवर्त्तः, सुवर्णमाक्षिकं, सुवर्णमुखी.

MARCESCENT, a. विशीर्य्यमाणः -णा -णं, क्षीयमाणः -णा -णं, म्लायमानः -ना -नं.

MARCH, s. (The month) फाल्गुनः -निकः, चैत्रः -त्रिकः, फाल्गुनोत्तरार्द्धं, चैत्रपूर्व्वार्द्धं, पूर्व्वचैत्रः, उत्तरफाल्गुनः, तपस्यः, मधुः m., तृतीयमासः.—(Movement of soldiers, &c.) गमनं, यानं, यात्रा, सैनिकगमनं, सैनिकयात्रा, गमः, गतिः f., सैनिकगतिः f., व्रज्या, सरणं, संसरणं.—(Marching onwards, progression) प्रयाणं, प्रस्थानं, प्रस्थितिः f., प्रगमनं,

अपगमनं.—(Marching against) अभिषेणनं, अभिनिर्यानं; 'setting out on a march,' यात्राकरणं; 'toilsome march,' दुर्गसञ्चारः, दुर्गसंचारः, सञ्चारः.

To MARCH, *v. n.* यात्रां कृ, गमनं कृ, सैनिकवद् गमनं कृ or प्रगम् (c. 1. -गच्छति -गन्तुं) or प्रया (c. 2. -याति -तुं) or प्रस्था (c. 1. -तिष्ठति -ते -स्थातुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं) or चल् (c. 1. चलति -लितुं) or प्रचल्; 'to march against,' अभिनिर्या (c. 2. -याति -तुं), अभिप्रया, प्रतिप्रव्रज्, अभिप्रस्था, प्रत्यभिप्रस्था, अभिगम्, प्रतिगम्; 'one who marches slow,' मन्दगामी *m.* (न्), मन्थरः; 'fast,' अतिजवः, जंघालः, जंघिलः.

To MARCH, *v. a.* अभिषेण (nom. अभिषेणयति -यितुं), सेनां प्रस्था in caus. (-स्थापयति -यितुं) or चल् (c. 10. चलयति -यितुं) or प्रतिगम् (c. 10. -गमयति -यितुं), यात्रां कृ (c. 10. कारयति -यितुं).

MARCHES, *s. pl.* (Confines) देशसीमा, देशसमन्ताः *m. pl.*, देशप्रान्ताः *m. pl.*

MARE, *s.* अश्वा, अश्विनी, वाजिनी, तुरगी, तुरङ्गी, तुरङ्गिणी, वडवा, वडवा, घोटिका, अश्वतरी, वामी, प्रसूः *f.*, प्रसूका.

MARGARITE, *s.* (Pearl) मुक्ता, मुक्तिका, मौक्तिकं, शुक्तिबीजं, शुक्तिजं.

MARGIN, *s.* प्रान्तः, अन्तः -न्तं, सीमा, उपान्तं, पर्यन्तं, कच्छः, धारः -रा, तटं, समन्तः, उत्सङ्गः, कोटिः *f.*, परिसरः; 'of a river,' तीरं, कूलं, तटं, कच्छः, कच्छान्तः; 'on the margin,' प्रान्ततस्.—(Of a book) समासः, पुस्तकप्रान्तः.

MARGINAL, *a.* प्रान्तस्थः -स्था -स्थं, समासस्थः &c., समासलिखितः -ता -तं.

MARGINALLY, *adv.* (Along the margin) प्रान्ततस्, प्रान्ते, अनुप्रान्तं.

MARINE, *a.* सामुद्रः -द्री -द्रं, समुद्रीयः -या -यं, समुद्रियः -या -यं, सामुद्रिकः -की -कं, समुद्रसम्बन्धी -न्धिनी -न्धि (न्), समुद्रविषयः -या -यं, सैन्धवः -वी -वं, सिन्धुकः -का -कं, समुद्रजः -जा -जं, समुद्रोद्भवः -वा -वं, जलधिसम्भवः -वा -वं, सागरसम्बन्धी &c.; 'marine engagement,' नौयुद्धं.

MARINE, *s.* (A soldier that serves on board a ship) नौयोद्धा *m.* (द्धृ), नौसैन्यः, नाविकसैन्यः, समुद्रीयसैनिकः.—(Navy) युद्धनौसमूहः.—(Naval affairs) नाविकविषयः, नाविककर्म्म *n.* (न्), नाविकप्रकरणं, जलयानविषयः, जलयानप्रकरणं.

MARINER, *s.* नाविकः, नाविकजनः, समुद्रयायी *m.* (न्), समुद्रगः, समुद्रगामी *m.*, पोतवाहः, नियामः, जलपथोपजीवी *m.* (न्), उदधिक्षः *m.* (न्), समुद्रीयजनः.

MARITAL, *a.* भर्तृसम्बन्धी -न्धिनी -न्धि (न्), पतिसम्बन्धी &c., भर्तृविषयः -या -यं, पतिविषयः &c., स्वामिविषयः &c.

MARITIME, *a.* (Relating to the sea) सामुद्रः -द्री -द्रं, समुद्रियः -या -यं, समुद्र in comp. *See* MARINE, *a.* (Naval) नाविकः -की -कं, नाव्यः -व्या -व्यं, नौ in comp.—(Bordering on the sea) समुद्रतटस्थः -स्था -स्थं, समुद्रतीरस्थः -स्था -स्थं.

MARJORAM, *s.* तुलसी, मरुवकः, समीरणः, प्रस्थपुष्पः, फणिज्झकः, पर्णासः, जम्भीरः, कठिञ्जरः, कुठेरकः, अर्जकः.

MARK, *s.* (Sign, token by which a thing is known) चिह्नं, लक्षणं, लाञ्छनं, लिङ्गं, अङ्कः -ङ्कं, अभिज्ञानं, व्यञ्जनं, व्यञ्जकः -कं, लक्ष्मं, लक्ष्म *n.* (न्), लक्षणं, ललामं.—(Spot) कलङ्कः, अङ्कः, चिह्नं, बिन्दुः *m.*, विप्रुट् (ष्), विप्रुट्, गण्डः.—(Mark on the body) सामुद्रं, सामुद्रचिह्नं, सामुद्रिकलक्षणं, तिलः -लकः, तिलकालकः; 'an interpreter of marks on the body,' सामुद्रिकः; 'an auspicious mark,' सुलक्षणं, सुचिह्नं; 'having auspicious marks,' सुलक्षणी -णिनी -णि (न्), सुलक्षणिकः -का -कं; 'having thirty-two auspicious marks,' द्वात्रिंशल्लक्षणोपेतः -ता -तं; 'an inauspicious mark,' कुलक्षणं, अपलक्षणं, दुर्लक्षणं, दुश्चिह्नं; 'having inauspicious marks,' कुलक्षणी -णिनी &c., कुलक्षणः -णा -णं.—(Butt for shooting at) लक्ष्यं, बाणलक्ष्यं, लक्षं, वेध्यं, व्यध्यः, शरव्यं, दृष्टिगुणः, प्रतिकायः; 'hitting the mark,' लक्ष्यभेदः; 'to hit the mark,' लक्ष्यं भिद् (c. 7. भिनत्ति, भेत्तुं) or व्यध् (c. 4. विध्यति, व्यद्धुं), लक्ष्यवेधनं कृ.—(Line) रेखा, लेखा.

To MARK, *v. a.* (Stamp, impress with a mark) चिह्न (nom. चिह्नयति -यितुं), अङ्क् (c. 10. अङ्कयति -यितुं), लक्ष् (c. 10. लक्षयति -यितुं), मुद्र् (nom. मुद्रयति -यितुं), लाञ्छ् (c. 1. लाञ्छति -ञ्छितुं), अङ्कं कृ, चिह्नं कृ, लक्षणं कृ, लक्षीकृ.—(Stain) कलङ्क (nom. कलङ्कयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलङ्कीकृ, लाञ्छ्.—(Draw a line) लिख् (c. 6. लिखति, लेखितुं), आलिख्, रेखां कृ.—(Notice, observe) लक्ष्, आलक्ष्, उपलक्ष्, अवेक्ष् (c. 1. -ईक्षते -क्षितुं), निरीक्ष्, वीक्ष्, समीक्ष्, प्रेक्ष्.—(Mark out, define) परिच्छिद् (c. 7. -च्छिनत्ति -च्छेत्तुं), परिच्छेदं कृ, निर्दिश् (c. 6. -दिशति -देष्टुं), लक्ष्, लक्षीकृ.—(Mark out, trace the outline) बाह्यरेखां लिख् or अङ्क् or कृ, बहिर्लेखां कृ.

To MARK, *v. n.* (Note, take notice) आलोच् (c. 10. -लोचयति -यितुं), आलक्ष् (c. 10. -लक्षयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), समीक्ष् (c. 1. -ईक्षते -क्षितुं), समीक्षां कृ, बुध् (c. 4. बुध्यते, बोद्धुं), विमृश् (c. 6. -मृशति -म्रष्टुं), परामर्शं कृ, विवेचनं कृ.

MARKED, *p. p.* चिह्नितः -ता -तं, अङ्कितः -ता -तं, लक्षितः -ता -तं, उपलक्षितः -ता -तं, लाञ्छितः -ता -तं, कृतलक्षणः -णा -णं, कृताङ्कः -ङ्का -ङ्कं, कृतलाञ्छनः -ना -नं, मुद्रितः -ता -तं, मुद्राङ्कितः -ता -तं.—(Defined) परिच्छिन्नः -न्ना -न्नं, निर्दिष्टः -ष्टा -ष्टं, लक्षितः -ता -तं.

MARKER, *s.* चिह्नकर्त्ता *m.* (र्तृ), अङ्कनकृत् *m.*, अङ्कयिता *m.* (तृ), लक्षयिता *m.*

MARKET, *s.* पण्यवीथी -थिका, पण्यशाला, विक्रयशाला, विक्रयस्थानं, क्रयविक्रयस्थानं, पण्यस्थानं, आपणः, हट्टः, विपणिः *m.* -णी *f.*, निगमः, अवट्टङ्कः, क्रयारोहः, पुटभेदः, विपणा, निषद्यं, पण्यग्रन्थिः *m.*, पण्यवीथी -थिका; 'a free market,' अपशुल्कं.—(Sale) विक्रयः, विपणः.

To MARKET, *v. n.* क्रयविक्रयं कृ, पण् (c. 1. पणते -णितुं, पणायति -यितुं), पणायां कृ.

MARKET-DAY, *s.* क्रयविक्रयदिवसः, हट्टदिवसः, हट्टवारः.

MARKET-PLACE, *s.* चत्वरं, चतुष्पथं, क्रयविक्रयचत्वरं, पणायाचत्वरं, पणाया, पणायास्थानं, विपणिः -णी *m. f.* *See* MARKET.

MARKET-RATE, MARKET-PRICE, *s.* आपणिकः, पण्यभावः, पण्यमूल्यं, अर्घबलाबलं.

MARKET-TOWN, *s.* ग्राममुखः, मुख्यग्रामः, नगरमुखः, मुख्यनगरं -री, कर्वटः -टं.

MARKETABLE, *a.* विक्रेयः -या -यं, विक्रयणीयः -या -यं, पण्यः -ण्या -ण्यं, पणितव्यः -व्या -व्यं, पण्यार्हः -र्हा -र्हं, क्रेयः -या -यं, क्रयविक्रययोग्यः -ग्या -ग्यं.

MARKING, *s.* अङ्कनं, मुद्राङ्कनं, चिह्नाङ्कनं, चिह्नकरणं, अङ्ककरणं, लिखनं.

MARKING-INK, *s.* दहनमसिः *f.*, दहनमसिका, दहनरसः, वस्त्राङ्कनमसिः.

MARKING-NUT, *s.* दहनं, निर्दहनं, अग्निका, भल्लातः -तकी, भल्ली.

MARKSMAN, *s.* लक्ष्यवेधी *m.* (न्), लक्ष्यभेदी *m.*, लब्धलक्षः, सुलक्ष्यपाती *m.* (न्), सुप्रयोगबाणः, सुप्रयोगविशिखः, शराभ्यासकुशलः, धनुर्विद्, आयुधविद्.

MARL, *s.* मालाख्यो मृत्तिकाविशेषः, चिक्कणमृत्तिका, पांशुः *m.*

To MARL, *v. a.* पूर्वोक्तमृत्तिकया लिप् (c. 6. लिम्पति, लेप्तुं).

MARMALADE, *s.* मिष्टान्नं, मिष्टान्नं, शर्करादिसंसृष्टा नारङ्गत्वक् *f.* (च्).

MARMOREAN, *a.* श्वेतप्रस्तरमयः -यी -यं, पाषाणनिर्मितः -ता -तं.

MARMOSET, *s.* सूक्ष्मवानरः, सूक्ष्मकीटः, क्षुद्रप्लवङ्गः.

MAROON, *a.* (Dark red) धम्रलः -ला -लं, धम्रालकः -का -कं, कपिशः -शा -शं.

MARPLOT, *s.* कार्य्यविघातकः, कार्य्यविनाशकः, कार्य्यबाधकः.

MARQUEE, *s.* पटमण्डपः, पटवासः, बृहत्पटवेश्म *n.* (न्), वस्त्रगृहं.

MARQUESS, *s.* उपराजपुत्रः *m.*, उपनायकः, उपाधिपः, कुलीनपदभ्रात् द्वितीयपदस्थः, द्वितीयकुलीनपदभाक् *m.* (ज्).

MARQUISATE, *s.* पूर्व्वोक्तकुलीनजनस्य अधिकारः, उपाधिपत्यं.

MARRED, *p. p.* दूषितः -ता -तं, विहतः -ता -तं, व्याहतः -ता -तं, नाशितः -ता -तं, विनाशितः -ता -तं, क्षतः -ता -तं, विक्षतः -ता -तं.

MARRER, *s.* दूषकः, दूषयिता *m.* (तृ), नाशकः, विनाशकः, विघातकः.

MARRIAGE, *s.* विवाहः, उद्वाहः -हनं, उद्वहनं, परिणयः -यनं, पाणिग्रहः -हणं, पाणिग्राहः, पाणिपीडनं, हस्तेकरणं, दारपरिग्रहः, दारसङ्ग्रहः, दारक्रिया, दारकर्म्म *n.* (न्), दाराधिगमनं, उपयमः, उपयामः, लग्नकार्य्यं, मैथुनं, वाधुक्यं, निवेशः; 'marriage-rite,' विवाहविधिः *m.*, विवाहक्रिया, विवाहसंस्कारः; 'giving in marriage,' दारिकादानं, दारिकाप्रदानं; 'marriage-contract,' वाग्निश्चयः; 'marriage-settlement,' शुल्कः -ल्कं; 'auspicious season for marriage,' लग्नतिथिः *f.*, लग्नमुहूर्त्तः -र्त्तं; 'marriage-string, or ring hung round the neck of the bride, who wears it till she becomes a widow, when it is broken,' मङ्गलसूत्रं, माङ्गल्यतन्तुः *m.*, सौभाग्यतन्तुः *m.*, कौतुकं; 'marriage gifts,' यौतकं, औद्वाहिकं, वारिकार्य्यं, शुल्कं, सुदायः -यं; 'marriage festival,' विवाहोत्सवः, विवाहमहोत्सवः; 'ablution at marriage,' मङ्गलस्नानं; 'compliments at marriage,' वधूलः, वधूलमालिका; 'second marriage,' द्वितीयविवाहः, द्वितीयसम्बन्धः. The following are different forms of marriage, explained in Manu, chap. iii. verses 27 et seq.: आसुरविवाहः, आर्षविवाहः, गान्धर्व्वविवाहः, दैवविवाहः, पैशाचविवाहः, प्राजापत्यविवाहः, ब्राह्मविवाहः, राक्षसविवाहः, प्रीतिविवाहः. The स्वयंवरः is a form of marriage in which a girl chooses her own husband.

MARRIAGEABLE, *a.* विवाह्यः -ह्या -ह्यं, उद्वाह्यः &c., वोढव्यः -व्या -व्यं, विवाहयोग्यः -ग्या -ग्यं, विवाहोचितः -ता -तं, विवाहोपयुक्तः -क्ता -क्तं, विवाहकालप्राप्तः -प्ता -प्तं, विवाहवयस्कः -स्का -स्कं, परिणेयः -या -यं; 'as a girl,' दूरवत्सा *f.* (स्), सञ्जातार्त्तवा, आगतार्त्तवा, ऋतुयुक्ता, ऋतुमती, मध्यमा, मध्या, पतीयन्ती.

MARRIED, *p. p.* विवाहितः -ता -तं, उद्वाहितः -ता -तं, ऊढः -ढा -ढं, उपोढः -ढा -ढं, समूढः -ढा -ढं, कृतविवाहः -हा -हं, जातविवाहः -हा -हं, कृतोद्वाहः -हा -हं, कृतदारपरिग्रहः -हा -हं, परिणीतः -ता -तं, कृतोपयमः -मा -मं, जातोपयमः -मा -मं, निर्व्विष्टः -ष्टा -ष्टं, प्रत्तः -त्ता -त्तं; 'a married man,' सभार्य्यः, सपत्नीकः, स्त्रीमान् *m.* (त्), कृतदारः, सदारः, कृतदारपरिग्रहः, कुटुम्बी *m.* (न्), सकुटुम्बः, भार्य्यौढः; 'a married woman,' सभर्तृका, सपतिका, पतिवत्नी, सधवा, सुवासिनी; 'newly married woman,' नववधूः *f.*, नववरिका; 'twice-married woman,' पुनर्भूः *f.*, दिधिषूः *f.*, दिधीषूः *f.*, दिधिषुः *f.*; 'one who is married before his elder brother,' परिवेत्ता *m.* (तृ).

MARROW, *s.* मज्जा, वपा, वसा, मेदस् *n.*, मेदः, मज्जा *m.* (न्), मज्जनं, सारः, अस्थिसारः, देहसारः, बीजं, स्निग्धा, वसाकृत् *m.*, कीकसकृत्, अस्थिजं, अस्थिजः, स्नुग्मं, शुक्रकरः, तेजस् *n.*, मधुरं, जीवनं, मस्तिष्कद्रा. —(Pith, essence) सारः, गर्भः, सारता, मेदोजः.

MARROW-BONE, *s.* मज्जापूर्णम् अस्थि, मेदोयुक्तम् अस्थि.

MARROWLESS, *a.* मज्जाहीनः -ना -नं, मेदोहीनः -ना -नं, वसाशून्यः -न्या -न्यं, निःसारः -रा -रं, असारः -रा -रं, निःसारः -रा -रं.

MARROWY, *a.* मज्जावान् -वती -वत् (त्), सारवान् &c., मेदस्वी -स्विनी -स्वि (न्).

To MARRY, *v. a.* (Unite a man and woman in wedlock) विवाहमेलनं वा स्त्रीपुरुषौ संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं) or विवाहसंयुक्तौ कृ, विवाहसंस्कारं कृ. —(Take for wife) विवह् (c. 1. -वहति -ते -वोढुं), उद्वह्, समुद्वह्, उदावह्, परिणी (c. 1. -णयति -णेतुं), उपयम् (c. 1. -यच्छते -ति -यन्तुं -यमितुं), पाणिं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), कन्यां परिग्रह् or प्रतिग्रह् or सङ्ग्रह्, दारपरिग्रहं कृ, दारसङ्ग्रहं कृ, दाराधिगमनं कृ, कन्यापरिणयं कृ, भार्य्यां विद् (c. 6. विन्दते -ति, वेत्तुं) or अनुविद्; 'he should marry a wife,' कन्यां विवहेत् or उपयच्छेत, कन्यायाः पाणिं गृह्णातु. —(Take for husband) पतिं विद् or वृ (c. 5. वृणोति, वरितुं -रीतुं), भर्त्रा संयुज् in pass. (-युज्यते), पतिवरणं कृ, भर्तृवरणं कृ. —(Dispose of in marriage) विवाहार्थं कन्यां दा or प्रदा.

To MARRY, *v. n.* भर्त्रा or भार्य्यया संयुज् in pass. (-युज्यते) or युज्, विवाहं कृ, उद्वाहं कृ, परिणयं कृ, पाणिग्रहणं कृ, दारपरिग्रहं कृ, उपयमं कृ.

MARS, *s.* (The planet, fabled as the son of the earth) मङ्गलः, मङ्गलग्रहः; भौमः, अङ्गारकः, कुजः, भूमिजः, भूसुतः, महीसुतः, क्षितिसुतः, आवनेयः, धरात्मजः, धरासुतः, धरापुत्रः, नवर्च्चिः *m.*, आषाढभवः, शिवघर्म्मजः, गगनोल्मुकः, खोल्मुकः, लोहितः -तकः, लोहिताङ्गः, रक्ताङ्गः, रुधिरः, आरः, वक्रः, ऋणान्तकः, चरः, ग्रहः. (In mythology, the god of war). *See* KÁRTIKEYA.

MARSH, *s.* कच्छः, कच्छभूः *f.*, कच्छभूमिः *f.*, अनूपभूः *f.*, अनूपभूमिः *f.*, सजलभूमिः *f.*, जलाढ्यभूः *f.*, आर्द्रभूमिः *f.*, पङ्कः.

To MARSHAL, *v. a.* विन्यस् (c. 4. -अस्यति -असितुं), व्यूह् (c. 1. -ऊहते -हितुं), विरच् (c. 10. -रचयति -यितुं), रच्, क्रमेण स्था in caus. (स्थापयति -यितुं), व्यवस्था, विधा (c. 3. -दधाति -धातुं), संविधा, प्रतिविधा.

MARSHAL, MARSHALLER, *s.* विधाता *m.* (तृ), संविधाता *m.*, व्यवस्थापकः, विरचकः, व्यूहरचकः, विन्यासकृत् *m.*

MARSHY, *a.* अनूपः -पा -पं, आनूपः -पी -पं, कच्छः -च्छा -च्छं, जलाढ्यः -ढ्या -ढ्यं, जलप्रचुरः -रा -रं, जलमयः -यी -यं, सजलः -ला -लं, जलप्रायः -या -यं, आप्यः -प्या -प्यं, आर्द्रः -र्द्रा -र्द्रं.

MART, *s.* विक्रयस्थानं, क्रयविक्रयस्थानं, पण्यस्थानं, आपणः, विपणिः *m.* -णी *f.*, निगमः, निषद्या, पण्यवीथी -थिका, अघट्टः.

MARTIAL, *a.* (Relating to war) युद्धसम्बन्धी -न्धिनी -न्धि (न्), रणसम्बन्धी &c., युद्धविषयः -या -यं, रणविषयकः -का -कं, साङ्ग्रामिकः -की -कं, सामरिकः -की -कं, साम्परायिकः -की -कं. —(Suited to war) रणयोग्यः -ग्या -ग्यं, युद्धोपयुक्तः -क्ता -क्तं, रणोपयोगी -गिनी &c. —(Given to war) रणप्रियः -या -यं, रणासक्तः -क्ता -क्तं, रणधीरः -रा -रं, रणकामी -मिनी &c.; 'martial music,' रणवाद्यं.

MARTINET, *a.* उग्रदण्डः, उग्रशासनः, तीक्ष्णदण्डः, दण्डबुद्धिः *m.*, उग्रशासनः, तीक्ष्णशासनः, निष्ठुरबुद्धिः *m.* निष्ठुरः.

MARTINGAL, MARTINGALE, *s.* तलिका, तलसारकः, अधोबन्धनं.

MARTYR, *s.* साक्षी *m.* (न्), स्वधर्म्मार्थम् आत्मत्यागी *m.* (न्) or देहत्यागी *m.* or जीवितत्यागी *m.*, स्वमतार्थं त्यक्तप्राणः or अर्पितप्राणः, स्वधर्म्मप्रमाणार्थं न्यस्तप्राणः or न्यस्तदेहः or न्यस्तजीवितः or जीवोत्सर्गी *m.* or साक्षी *m.*

To MARTYR, *v. a.* स्वधर्म्मार्थं हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं).

MARTYRDOM, *s.* स्वधर्म्मार्थं प्राणत्यागः or जीवितत्यागः, स्वमतार्थं जीवोत्सर्गः or प्राणोत्सर्गः, स्वधर्म्मप्रमाणार्थं देहन्यासः or प्राणन्यासः or प्राणार्पणं.

MARTYRED, *p. p.* स्वधर्म्मार्थं, हतः -ता -तं or व्यापादितः -ता -तं, स्वधर्म्मप्रमाणार्थं हतजीवितः -ता -तं or त्यक्तप्राणः -णा -णं.

MARTYROLOGY, *s.* साक्षिचरित्रशास्त्रं, स्वधर्म्मार्थं प्राणत्यागिनां चरित्रविवरणं or चरित्रलिखनं.

MARVEL, *s.* कौतुकं, अद्भुतं, अद्भुतवस्तु *n.*, आश्चर्य्यवस्तु *n.*, आश्चर्य्यं, चमत्कारः, चित्रवस्तु *n.*, चित्रं, विस्मयजनकवस्तु, उत्पातः, उपसर्गः.

To **MARVEL**, *v. n.* विस्मितः -ता -तं भू, विस्मयान्वितः -ता -तं भू, सविस्मयः -या -यं भू, विस्मि (c. 1. -स्मयते -स्मेतुं) with instr. loc. or acc. c., साश्चर्य्यः -र्य्या -र्य्यं भू, चमत्कृतः -ता -तं भू, आश्चर्य्यं ज्ञा (c. 9. जानाति, ज्ञातुं) or मन् (c. 4. मन्यते, मन्तुं).

MARVELLOUS, *a.* आश्चर्य्यः -र्य्या -र्य्यं, अद्भुतः -ता -तं, विस्मयजनकः -का -कं, विस्मयोत्पादकः -का -कं, आश्चर्य्यकरः -रा -रं, आश्चर्य्यकारकः -का -कं, आश्चर्य्यजनकः -का -कं, चमत्कारजनकः -का -कं, चित्रः -त्रा -त्रं, विचित्रः -त्रा -त्रं, तातः -ता -तं; 'a marvellous tale,' चित्रोक्तिः *f.*; 'a marvellous action,' अद्भुतकर्म्म *n.* (न्), आश्चर्य्यकर्म्म.

MARVELLOUSLY, *adv.* अद्भुतं, अद्भुतप्रकारेण, विचित्रं, आश्चर्य्यप्रकारेण, यथा विस्मयो जायते तथा.

MARVELLOUSNESS, *s.* अद्भुतता -त्वं, आश्चर्य्यत्वं, विचित्रता, साश्चर्य्यत्वं, वैचित्र्यं, विस्मयजनकता, अपूर्वत्वं.

MARWAR, *s.* (The province) मरुः *m.*, मरुभूः *f.*—(The inhabitants) मरवः *m. pl.*, मरुभुवः *m. pl.*

MASCULINE, *a.* पौरुषः -षी -षं, पौरुषेयः -यी -यं, पुरुषजातीयः -या -यं, पुंजातीयः -या -यं, पुं in comp., पुरुष in comp., अक्लीवः -वा -वं.—(Having the qualities of a man, resembling a man) पुरुषस्वभावः -वा -वं, पुरुषवृत्तिः -त्तिः -त्ति, पुरुषशीलः -ला -लं, पुरुषधर्म्मकः -का -कं, पुरुषप्रकृतिः -तिः -ति, पुम्प्रकृतिः -तिः -ति; 'the masculine gender,' पुंलिङ्गं, पुमान् *m.* (पुंस्), पुरुषः; 'a masculine woman,' वृषभी.

MASCULINELY, *adv.* पुरुषवत्, नरवत्, सपौरुषं, पौरुषेण, पुंवत्.

MASCULINENESS, *s.* पुंस्त्वं, पुरुषत्वं -ता, पौरुषं, पौरुषता, पुरुषशीलता, पुरुषस्वभावः, पुरुषप्रकृतिः *f.*

MASH, *s.* उदपेषः -षणं, उदकपेषः, सम्पेषः -षणं, नानाद्रव्यसम्पेषः, नानाद्रव्यमिश्रणं, जलमिश्रितं नानासम्पिष्टद्रव्यं, नानासम्मिश्रद्रव्यपिण्डः.

To **MASH**, *v. a.* सम्पिष् (c. 7. -पिनष्टि -पेष्टुं), सम्मृद् (c. 9. -मृद्नाति -मर्द्दितुं), सम्पेषणं कृ, सम्मर्द्दनं कृ, चूर्ण् (c. 10. चूर्णयति -यितुं), सञ्चूर्ण्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), सम्पेषणपूर्व्वं पिण्डीकृ.

MASHED, *p. p.* सम्पिष्टः -ष्टा -ष्टं, सम्मर्द्दितः -ता -तं, सञ्चूर्णितः -ता -तं, क्षुण्णः -ण्णा -ण्णं, सम्पेषणानन्तरं पिण्डीभूतः -ता -तं.

MASK, *s.* (Cover for the face) कृत्रिममुखं, छद्ममुखं, छद्मास्यं, कपटमुखं, उपमुखं.—(Pretext, subterfuge) छद्म *n.* (न्), कपटः -टं, व्यपदेशः, अपदेशः, व्याजः, छलं, कूटं.—(Masquerade) छद्मवेशः, कपटवेशः, कृत्रिमवेशः, छद्मवेशधारणं, विडम्बनं.

To **MASK**, *v. a.* (Disguise with a mask) कृत्रिममुखेन छद् (c. 10. छादयति -यितुं) or गुह् (c. 1. गूहति -हितुं), मुखगोपनं कृ.—(Conceal) छद्, आछद्, गुप् (c. 1. गोपायति, गोप्तुं), गोपनं कृ, अपवृ (c. 10. -वारयति -यितुं).

To **MASK**, *v. n.* विडम्बनं कृ, छद्मवेशी -शिनी -शि भू, कपटवेशी &c. भू.

MASKED, *p. p.* (Having the face covered) गुप्तमुखः -खी -खं, छद्ममुखी -खिनी -खि (न्), कृत्रिममुखी &c.—(Disguised) छद्मवेशी -शिनी &c., कपटवेशी &c., छद्मवेशधारी -रिणी &c., कपटवेशः -शा -शं, छद्मवेशः &c., कपटरूपी -पिणी &c., विडम्बितवेशी &c., अलक्षितः -ता -तं.—(Concealed) गुप्तः -प्ता -प्तं, गोपितः -ता -तं, आच्छादितः -ता -तं.

MASKER, *s.* छद्मवेशी *m.* (न्), कपटवेशी *m.*, छद्मवेशभृत्, छद्मरूपी *m.*, विडम्बितवेशः, कृत्रिमवेशधारी *m.*, विडम्बनकृत्.

MASON, *s.* लेपकः, लेपी *m.* (न्), लेपकारः, गृहनिर्म्माता *m.* (तृ), सुधाजीवी *m.* (न्), लेपजीवी *m.*, प्रलेपकः, प्रस्तरन्यासकृत्, इष्टकान्यासजीवी *m.*

MASONRY, *s.* लेपकर्म्म *n.* (न्), इष्टकान्यासकर्म्म *n.*, सुधाकर्म्म *n.*, गृहनिर्म्माणं, गृहकरणं, गृहनिर्म्माणे प्रस्तरन्यासः or प्रस्तरादिविन्यासः.—(Brickwork, any thing made of stone, brick, &c.) इष्टकाकर्म्म *n.*, प्रस्तरकर्म्म *n.*, प्रस्तरनिर्म्मितं प्राकारादि.

MASQUERADE, *s.* छद्मवेशधारणं, वेशधारणं, छद्मवेशक्रीडा, छद्मवेशसमारम्भः, छद्मवेशः, कपटवेशिनां यात्रा, विडम्बनं, विडम्बनक्रीडा.

To **MASQUERADE**, *v. n.* छद्मवेशी -शिनी -शि भू, कपटवेशी &c. भू, छद्मवेशं धृ (c. 10. धारयति -यितुं), विडम्ब् (c. 10. -डम्बयति -यितुं), विडम्बनं कृ.

MASQUERADER, *s.* छद्मवेशी *m.* (न्), वेशधारी *m.*, विडम्बनकर्त्ता *m.* (र्तृ). *See* MASKER.

MASS, *s.* (Lump) पिण्डः -ण्डं, घनः, ओघः, घनौघः, स्थूलं, गण्डः -ण्डका; 'a mass of iron,' लोहपिण्डः.—(Heap) राशिः *m.*, सञ्चयः, निचयः, प्रचयः, समुच्चयः, चयः, चितिः *f.*, चायः, निकरः, उत्करः, ओघः, पुञ्जः, पूगः, स्तूपः, स्तोमः.—(Collection) समूहः, सङ्घः, सङ्घातः, संहतिः *f.*, समुदायः, वृन्दं, संहारः, समाहारः, समयः, निवहः; 'in masses,' सङ्घशस्.—(Gross, bulk) साकल्यं, सामग्र्यं, समुदायः; 'in the mass,' साकल्येन.

MASSACRE, *s.* महामारणं, महाघातः, महावधः, निषूदनं, विशसनं, निहननं, संहारः, विमर्द्दनं, निकृन्तनं, प्रमापणं, निशारणं.

To **MASSACRE**, *v. a.* अतिनैष्ठुर्य्येण हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं) or निहन् or मृ (c. 10. मारयति -यितुं) or सूद् (c. 10. सूदयति -यितुं) or निसूद् or विनिसूद् or विशस् (c. 1. -शसति -सितुं) or निकृत् (c. 6. -कृन्तति -कर्त्तितुं).

MASSACRED, *p. p.* अतिनैष्ठुर्य्येण हतः -ता -तं or विनिहतः -ता -तं or घातितः -ता -तं or निषूदितः -ता -तं or विशसितः -ता -तं.

MASSIVENESS, MASSINESS, *s.* स्थूलता -त्वं, स्थौल्यं, स्थूलाकारता, वृहत्त्वं, गुरुत्वं -ता, सभारता -त्वं, भारिता -त्वं, भारवत्त्वं, पिण्डाकारता, महत्त्वं, स्त्यानता.

MASSIVE, MASSY, *a.* स्थूलः -ला -लं, स्थूलाकारः -रा -रं, स्थूलरूपः -पा -पं, भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), सभारः -रा -रं, गुरुः -र्व्वी -रु, पिण्डितः -ता -तं, पिण्डाकारः -रा -रं, वृहन् -हती -हत् (त्), वृहत्परिमाणः -णा -णं, स्थूलपरिमाणः -णा -णं, स्त्यानः -ना -नं.

MAST, *s.* (Of a ship) कूपकः, कूपः, गुणवृक्षकः, गुणवृक्षः, नौकूपकः.

MAST-HEAD, *s.* गुणवृक्षकाग्रं, गुणवृक्षाग्रं, कूपकाग्रं.

MASTER, *s.* (One who rules or has servants under him) स्वामी *m.* (न्), प्रभुः *m.*, पतिः *m.*, ईश्वरः, ईशः, नाथः, अधिपतिः *m.*, अधिपः, अधिभूः *m.*, ईशिता *m.* (तृ), नायकः, भर्त्ता *m.* (र्तृ), आर्य्यः, भरण्डः, भरण्युः *m.*, सेव्यः; 'master of a family,' कुलपतिः *m.*, कुटुम्बी *m.* (न्), कौटुम्बिकः; 'serving two masters,' उभयवेतनः -ना -नं, उभयस्वामिकः -का -कं; 'one's own master,' स्वाधीनः -ना -नं, स्वतन्त्रः -न्त्रा -न्त्रं.—(Owner) अधिकारी *m.* (न्), स्वामी *m.*, ईश्वरः, पतिः *m.*, प्रभुः *m.*, परिवृढः.—(Superintendent, director) अध्यक्षः, अधिष्ठाता *m.* (तृ), अधिकृतः, अधिकारी *m.*, अधिपतिः *m.*, अधिपः, अधीशः, नायकः, नेता *m.* (तृ); 'master of the horse,' अश्वाध्यक्षः; 'master of the house,' गृहपतिः, भवनपतिः; 'master of the mint,' टङ्कपतिः *m.*, रूप्याध्यक्षः; 'master of the sports,' केलिसचिवः, नर्म्मसचिवः.—(Chief, head) नायकः, पतिः *m.*, अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अग्रगः, अग्रणीः *m.*, मुखरः, श्रेष्ठः, मुख्य or प्रधान in comp.—(Teacher, director of a school) अध्यापकः,

शिक्षकः, शिक्षागुरुः *m.*, गुरुः *m.*, आचार्य्यः, शिक्षादाता *m.* (तृ), विद्यादाता *m.*, विद्यागुरुः *m.*, आर्य्यः, उपाध्यायः, उपदेशकः, शिक्षाकरः.—(Well skilled in) निपुणः, कुशलः, सम्पन्नः, व्युत्पन्नः, पण्डितः, कृती *m.* (न्), पारगतः.—(Of a ship) नौकाधिपतिः *m.*, नौपतिः *m.*

To MASTER, *v. a.* (Subdue) वशीकृ, स्ववशीकृ, स्वाधीनीकृ, जि (c. 1. जयति -ते, जेतुं), विजि, दम् (c. 10. दमयति -यितुं), आयत्तीकृ, पराभू, अभिभू, प्रभू.—(Make one's self master of a subject) वशीकृ, पारं गम् (c. 1. गच्छति, गन्तुं), सर्व्वतत्त्वानि ज्ञा (c. 9. जानाति, ज्ञातुं); 'you must master the Sanskrit language,' भवद्भिः संस्कृतवाक्यानि वशीकर्त्तव्यानि.

MASTER-BUILDER, *s.* प्रधानस्थपतिः *m.*, मुख्यस्थपतिः *m.*

MASTERED, *p. p.* वशीकृतः -ता -तं, स्ववशीभूतः -ता -तं, स्वहस्तगतः -ता -तं.

MASTER-KEY, *s.* प्रधानोद्घाटकयन्त्रं, अग्रकुञ्चिका, मुख्योद्घाटनं.

MASTERLY, *a.* अत्युत्तमः -मा -मं, अत्युत्कृष्टः -ष्टा -ष्टं, अनुपमः -मा -मं, अनुपमेयः -या -यं, निरुपमः -मा -मं, सर्व्वोत्तमः -मा -मं, सर्व्वोत्कृष्टः -ष्टा -ष्टं, सर्व्वजित् *m.f.n.*, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, असामान्यः -न्या -न्यं, अतुलनीयः -या -यं, सुनिपुणः -णा -णं, अतिकुशलः -ला -लं.

MASTERLY, *adv.* परमयुक्त्या, सुनिपुणवत्, अतिकुशलवत्, अत्युत्तमं, अत्युत्कृष्टं.

MASTERPIECE, *s.* अत्युत्तमकर्म्म *n.* (न्), अनुपमकर्म्म *n.*, अत्युत्कृष्टकर्म्म, उत्तमकर्म्म *n.*, परमकर्म्म *n.*, प्रधानकर्म्म *n.*, सर्व्वोत्कृष्टकर्म्म *n.*

MASTERSHIP, *s.* प्रभुत्वं -ता, स्वाम्यं, स्वामित्वं, आधिपत्यं, ऐश्वर्य्यं, अधिकारित्वं, भर्तृत्वं, प्रधानत्वं, प्राधान्यं, श्रेष्ठता, श्रैष्ठ्यं.

MASTER-STROKE, *s.* उत्तमकर्म्म *n.* (न्), परमकर्म्म *n.*, अत्युत्तमक्रिया.

MASTERY, *s.* (Dominion) ऐश्वर्य्यं, आधिपत्यं, प्रभुत्वं, ईशत्वं, स्वामित्वं, स्वाम्यं, अधिकारः, भर्तृता.—(Ownership) स्वाम्यं, अधिकारित्वं -ता, प्रभुता, स्वत्वं.—(Pre-eminence) श्रेष्ठत्वं, श्रैष्ठ्यं, प्रधानत्वं, प्राधान्यं, उत्कर्षः, उत्कृष्टता, मुख्यता, प्रकृष्टता, प्रभुत्वं, आधिक्यं, परमपदं.—(Victory) विजयः.—(Great skill) अतिकौशल्यं, अतिनैपुण्यं, अतिपाटवं, परमयुक्तिः *f.*, परमोत्कर्षः; 'to have the mastery,' प्रभू, अभिभू.

MASTICABLE, *a.* चर्व्यः -र्व्या -र्व्यं, चर्वणीयः -या -यं, चर्वितव्यः -व्या -व्यं.

To MASTICATE, *v. a.* चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), चर्वणं कृ, दन्तैः पिष् (c. 7. पिनष्टि, पेष्टुं), विदंश् (c. 1. -दशति -दंष्टुं).

MASTICATED, *p. p.* चर्वितः -ता -तं, कृतचर्वणः -णा -णं, दन्तपिष्टः -ष्टा -ष्टं.

MASTICATION, *s.* चर्वणं, चर्वणक्रिया, चर्वणकर्म्म *n.* (न्), दन्तपेषणं, पेषणं.

MASTICATORY, *a.* चर्वणसाधकः -का -कं, चर्वणोपयोगी -गिनी -गि (न्).

MASTICATORY, *s.* (Substance to be chewed) चर्वणौषधं, चर्व्यद्रव्यं, चर्व्यं.

MASTICH, MASTIC, *s.* मास्तिचाख्यो वृक्षनिर्यासः.—(Cement) लेपविशेषः.

MASTIFF, *s.* वृहत्कुक्कुरः, अतिसाहसशीलः कुक्कुरभेदः.

MASTLESS, *a.* कूपकहीनः -ना -नं, अकूपकः -का -कं, हतकूपकः -का -कं.

MAT, *s.* कटः, किलिञ्जकः, पादपाशी, आस्तरणं, तृणपूली, तल्पाची, चटरः, वानं, चञ्चा.

To MAT, *v. a.* (Lay with mats) कटैर् आस्तृ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), कटान् विस्तृ, कटास्तरणं कृ.—(Interweave, entangle) संश्लिष् (c. 10. -श्लेषयति -यितुं), आश्लिष्, ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं); 'to mat the hair,' जटिलीकृ.

MATCH, *s.* (One who is equal to another in strength) तुल्यबलः -ला, तुल्यशक्तिः *m.f.*, समानबलः -ला, तुल्यविक्रमः -मा; 'to be a match for,' अलङ्कृ.—(One that tallies with another) यमः -मा -मं, यमकः -का -कं, यमलः -ला -लं, युग्मकः, समः -मा, समानः -ना, समकक्षः -क्षा, समानकक्षः -क्षा, समतोलः -ला.—(Union by marriage) विवाहसम्बन्धः, सम्बन्धः, विवाहः, प्रेमसम्बन्धः; 'scheming to effect a match,' विवाहघटनं -ना, सन्दर्भः.—(Contest) युद्धं, कलहः, कलिः *m.*; 'a match of cocks, &c.,' प्राणिद्यूतं, समाह्वयः, आह्वयः; 'boxing match,' मल्लयात्रा, माल्लवी, मल्लयुद्धं.—(For lighting fires) शलाका, ज्वलनशलाका, ज्वलशलाका, ज्वलतृणं, ज्वलनतृणं, अरणिः -णी *m. f.*

To MATCH, *v. a.* (Equal, make equal) समीकृ, समानीकृ, सदृशीकृ, समान (nom. समानयति -यितुं), उपमा (c. 2. -माति -तुं), प्रतिमा, तुल् (c. 10. तुलयति -यितुं), तुल्यीकृ.—(Show an equal) समं or तुल्यं or युग्मकं दृश् (c. 10. दर्शयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं), प्रतिमां or उपमां or उपमानं or प्रतिरूपं दृश्.—(Oppose as equal in contest) प्रतियुध् in caus. (-योधयति -यितुं), तुल्यबलं or तुल्यविक्रमं कञ्चित् पुरस्कृ.—(Adapt) युज् (c. 10. योजयति -यितुं), समायुज्.—(Give in marriage) विवाहार्थं दा or प्रदा.

To MATCH, *v. n.* (Correspond, tally) युज् in pass. (युज्यते), उपयुज्, तुल्यः -ल्या -ल्यं भू, तुल्यीभू, समीभू, समानीभू, सदृशीभू, अनुरूपः -पा -पं भू or अस्, प्रतिरूपीभू, उपमितः -ता -तं भू.—(Be united in marriage) विवाहसम्बन्धं कृ, प्रेमसम्बन्धं कृ.—(Be a match for) अलङ्कृ, अलम्भू, अलन्तमः -मा -मं भू.

MATCHED, *p. p.* (Equalled, evenly matched) तुल्यः -ल्या -ल्यं, तुल्यीभूतः -ता -तं, तुल्यबलः -ला -लं, तुल्यशक्तिः -क्तिः -क्ति, तुल्यविक्रमः -मा -मं, समतोलः -ला -लं, समानतोलः -ला -लं, समानकक्षः -क्षा -क्षं, सप्रतिमः -मा -मं, सप्रतिरूपः -पा -पं, उपमितः -ता -तं.—(Married) कृतविवाहः -हा -हं, कृतोपयमः -मा -मं.

MATCHLESS, *a.* अतुल्यः -ल्या -ल्यं, अनुपमः -मा -मं, निरुपमः -मा -मं, अप्रतिमः -मा -मं, अतुलनीयः -या -यं, अतुलः -ला -लं, निस्तुलः -ला -लं, अनुपमेयः -या -यं, अप्रतिमेयः -या -यं, अप्रतिरूपः -पा -पं, अगम्यरूपः -पा -पं, अद्वितीयः -या -यं, असदृशः -शी -शं, सर्व्वोत्तमः -मा -मं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, सर्व्वजित् *m.f.n.*, विषमः -मा -मं, अपूर्व्वः -र्व्वा -र्व्वं.

MATCHLESSLY, *adv.* अतुल्यं, अनुपमेयं, अप्रतिमेयं, निरुपमं, सर्व्वश्रेष्ठं.

MATCHLESSNESS, *s.* अतुल्यता, अनुपमेयता, अप्रतिमेयता, अनुपमता, अनौपम्यं.

MATCHLOCK, *s.* अङ्गारग्निबलेन लोहगुलिकाप्रक्षेपणी सुषिरनाडी.

MATCH-MAKER, *s.* (Maker of matches for burning) शलाकाकारी *m.* (न्), ज्वलशलाकाकृत् *m.*—(Contriver of marriages) घटकः, विवाहघटकः, प्रेमघटकः, प्रेमविषये मध्यस्थः.

MATE, *s.* (Companion, associate) सहायः, सहचरः -री *f.*, सहवर्त्ती *m.* -र्त्तिनी *f.*, सहवासी *m.* -सिनी, सखा *m.* -खी *f.*, सहभावी *m.* -विनी *f.*, सङ्गी *m.* -ङ्गिनी *f.*, मित्रं.—(Husband) भर्त्ता *m.* (र्तृ), स्वामी *m.* (न्), पतिः *m.*—(Wife) स्त्री, वधूः *f.*, पत्नी, भार्य्या, जाया, वल्लभा, प्रिया, दयिता, प्रियतमा.—(The male or female of animals which associate for propagation) सहचरः *m.* -री *f.* In poetry the above words for husband and wife are used in this sense: 'the elephant's mate,' करिणी *f.*, हस्तिनी *f.*—(An assistant) सहकारी *m.* -रिणी *f.* (न्), सहायः; 'in a ship,' नौपतिसहायः.

To MATE, *v. a.* *See To* MATCH, *v. a.*

MATER-FAMILIAS, *s.* कुटुम्बिनी *f.*, गृहिणी, गेहिनी, स्वामिनी, कौटुम्बिकी.

MATERIAL, *a.* (Consisting of matter, not spiritual) भौतिकः -की -कं, आधिभौतिकः -की -कं, भूतात्मकः -का -कं, भूतमयः -यी -यं, पाञ्चभौतिकः -की -कं, पञ्चभूतात्मकः -का -कं, अनात्मीयः -या -यं, अनात्मिकः -की -कं, अपारमार्थिकः -की -कं, मूर्त्तिमान् -मती -मत् (त्), मूर्त्तः -र्त्ता -र्त्तं, द्रव्यमयः -यी -यं, विषयात्मकः -का -कं, प्राकृतिकः -की -कं,

प्राकृत: -ती -तं, घन: -ना -नं; 'the material world,' भूतसृष्टि: *f.*, भूतसर्ग:, भूतसंसार:; 'material universe,' ब्रह्माण्ड: -ण्डं; 'material body,' स्थूलशरीरं.—(Substantial) वास्तविक: -की -कं, वास्तव: -वी -वं, सारवान् -वती &c., मूर्त्तिमान् &c., घन: -ना -नं.—(Important) गुरु: -र्वी -रु, गुर्व्वर्थ: -र्था -र्थं, गुरुप्रभाव: -वा -वं, परमार्थ: -र्था -र्थं, अलघु: -घु: -घु, मुख्य: -ख्या -ख्यं, आवश्यक: -की -कं, प्रधान in comp.; 'material cause,' उपादानं, उपादानकारणं, समवायिकारणं.

MATERIAL, *s.* साधनं, उपकरणं, द्रव्यं, साधनद्रव्यं, पदार्थ:, वस्तु *n.*, मूर्त्ति: *f.*, सार:, घन:, मात्रा; 'materials, collectively,' साधनं -नानि *n. pl.*, सामग्र्यं -ग्री, द्रव्यसामग्र्यं, सम्भार:, द्रव्यसम्भार:, उपकरणसम्भार:, सज्जा, परिच्छद:; 'writing-materials,' लेखसाधनं, लिपिसज्जा; 'the material of cloth,' वस्त्रयोनि: *f.*

MATERIALISM, *s.* देहात्मवाद:, अनात्मवाद:, अनात्ममतं, लोकायतं, चार्वाकमतं.

MATERIALIST, *s.* देहात्मवादी *m.* (न्), अनात्मवादी *m.*, लौकायतिक:, लोकायतिक:, विषयी *m.* (न्), विषयायी *m.* (न्), चार्वाकमतावलम्बी *m.* (न्), चार्वाकमतधारी *m.*

MATERIALITY, *s.* भौतिकत्वं, आधिभौतिकत्वं, मूर्त्तिमत्त्वं, अनात्मिकत्वं.

MATERIALLY, *adv.* वस्तुतस्, अर्थतस्, सारतस्, प्रकृतितस्, पदार्थतस्, तत्त्वतस्, अवश्यं, विशेषतस्.

MATERIALNESS, *s.* *See* MATERIALITY. (Importance) गौरवं, गुरुत्वं.

MATERNAL, *a.* मातृक: -की -कं, मातृसम्बन्धी -न्धिनी -न्धि (न्), मातृयोग्य: -ग्या -ग्यं, मातृधर्म्मिक: -का -कं; 'maternal affection,' अपत्यस्नेह:, वात्सल्यं; 'maternal duty,' मातृधर्म्म:.

MATERNITY, *s.* मातृत्वं -ता, मातृभाव:, मातृकत्वं, मातृधर्म्म:, जननीत्वं.

MATHEMATIC, MATHEMATICAL, *a.* (Relating to mathematics) गणितसम्बन्धी -न्धिनी -न्धि (न्), गणितविषय: -या -यं, गणितविद्यासम्बन्धी &c., संख्यापरिमाणविद्यासम्बन्धी &c., रेखाबीजादिगणितविषय: -या -यं.—(According to the principles of mathematics) गणितशास्त्रानुसारी -रिणी &c., गणितानुरूप: -पा -पं, गणितविद्यानुसारी &c.

MATHEMATICALLY, *adv.* गणितविद्यानुसारेण, गणितानुरूपेण, गणितशास्त्रवत्.

MATHEMATICIAN, *s.* गणितविद्याज्ञ:, संख्यापरिमाणविद्याज्ञ:, रेखाबीजादिगणितवित् *m.*, गणितशास्त्रज्ञ:, क्षेत्रपरिमापकविद्यावान् *m.* (त्), गणनाविद्याज्ञ:, गणितज्ञ:.

MATHEMATICS, *s. pl.* गणितं, गणितविद्या, संख्यापरिमाणविद्या, गणनाविद्या, रेखाबीजादिगणितं, रेखाबीजादिगणितविद्या, पाटीबीजादिगणितविद्या, रेखादिगणितं, बीजादिगणितं, गणितशास्त्रं, बीजादिगणितशास्त्रं, क्षेत्रादिपरिमाणविद्या, मानविद्या.

MATIN, *a.* (Relating to the morning) प्रात:कालिक: -की -कं, प्रात:कालीन: -ना -नं, औषिक: -की -कं, प्रगेतन: -नी -नं, वैयुष्ट: -ष्टी -ष्टं.

MATINS, *s. pl.* प्रात:कृत्यं, प्रातर्भजनं, प्रात:स्मरणं, प्रात:पूजा.

MATRICE, *s.* (Womb) गर्भाशय:, योनि: *m.f.*, गर्भकोश:, जरायु: *m.*—(Of a type) मुद्राक्षरसंस्कार:, मुद्राक्षरगर्भ:, मुद्राक्षराकार:.

MATRICIDE, *s.* (The act) मातृहत्या, मातृवध:, मातृघात:, जननीवध:.—(The killer) मातृहन्ता *m.* (न्), मातृहा *m.* (न्), मातृघातुक:, मातृघातक:, मातृघाती *m.* (न्), मातृघ्न:.

To MATRICULATE, *v. a.* संस्कारपूर्व्वं or नामाभिलिखनपूर्व्वं विद्यालयं प्रविश् (c. 10. -वेशयति -यितुं).

MATRICULATED, *p. p.* संस्कारपूर्व्वं विद्यालयप्रवेशित: -ता -तं.

MATRICULATION, *s.* संस्कारपूर्व्वं or नामाभिलेखनपूर्व्वं विद्यालयप्रवेशनं.

MATRIMONIAL, *a.* वैवाहिक: -की -कं, उद्वाहिक: -का -कं, औद्वाहिक: -की -कं, उद्वाही -हिनी -हि (न्), विवाही &c., विवाहसम्बन्धी -न्धिनी &c., पाणिग्रहणिक: -की -कं.

MATRIMONIALLY, *adv.* विवाहनियमानुसारेण, विवाहरीत्यनुरूपेण, विवाहविधिवत्.

MATRIMONY, *s.* विवाह:, उद्वाह:, परिणय:, पाणिग्रह: -हणं, पाणिग्राह:, उपयम:, उपयाम:, विवाहावस्था, विवाहितावस्था.

MATRIX, *s.* गर्भाशय:, गर्भकोश:, योनि: *m.f.* *See* MATRICE.

MATRON, *s.* कुटुम्बिनी, गृहिणी, गेहिनी, कौटुम्बिकी, जननी, मध्यमवयस्का, पुत्रवती, प्रजावती, पुत्रिणी, सुतिनी, पतिपुत्रवती, प्रौढा, प्रौढस्त्री, धीरा, पुरन्ध्री -न्ध्रि: *f.*, त्रयी, विजाता.

MATRONLY, *a.* कुटुम्बिनीयोग्य: -ग्या -ग्यं, पुरन्ध्रियोग्य: &c., गृहिणीयोग्य: &c., पुत्रिणीयोग्य: &c., गम्भीरा, धीरा, मध्यमवयस्का.

MATTED, *p. p.* or *a.* (Laid with mats) कटी -टिनी -टि (न्), कटास्तीर्ण: -र्णा -र्णं; 'matted hair,' जटा, सटा, जटि:, जुटकं, जूट:; 'having matted hair,' जटी -टिनी &c., जटिल: -ला -लं, जटावान् -वती -वत् (त्).

MATTER, *s.* (Body, substance, not spirit, that which is visible) मूर्त्ति: *f.*, वस्तु *n.*, द्रव्यं, अनात्मद्रव्यं, अनात्मा, अनात्मीयवस्तु *n.*, अनात्मिकवस्तु *n.*, भूतात्मकवस्तु *n.*, पाञ्चभौतिकवस्तु *n.*, मूर्त्तिमद्वस्तु *n.*, साकारवस्तु *n.*, घनवस्तु *n.*, घनद्रव्यं, घन:, दृश्यस्पृश्यवस्तु *n.*, सार:, विषय:, शरीरं.—(Cause of the material world or substratum of the universe) प्रकृति: *f.*, प्रधानं, माया.—(Material cause, materials, that of which any thing is composed) साधनं, साधनवस्तु *n.*, साधनभूतवस्तु, प्रकृति: *f.*, सार:, उपकरणं, कारणं, उपादानं, उपादानकारणं.—(Thing) द्रव्यं, वस्तु *n.*, अर्थ:, पदार्थ:.—(Subject) विषय:, प्रकरणं, वस्तु *n.*, अर्थ:, पदं, प्रस्ताव:, प्रसङ्ग:, सार:, वृत्तान्त:, विधि: *m.*, आस्पदं; 'matter in hand,' प्रस्तुतं; 'an important matter,' परमार्थ: गुर्व्वर्थ:; 'an unimportant matter,' लघ्वर्थ:, लघुविषय:, अल्पविषय:, [illegible]विषय:; 'matter of dispute,' विवादास्पदं, विवादविषय:, वादविषय:; 'what is the matter?' को वृत्तान्त:.—(Cause) प्रयोजनं, हेतु: *m.*, प्रयोग:, कारणं.—(Import, consequence) अर्थ:, गौरवं, गुरुत्वं, प्रभाव:; 'of no matter,' अनर्थक: -का -कं, निरर्थक: -का -कं, निष्प्रभाव: -वा -वं, अगुरु: -र्वी -रु.—(Business, affair) कर्म्म *n.* (न्), कार्य्यं, विषय:, व्यापार:, अर्थ:, प्रयोग:.—(Pus, purulent matter) पूयं, पूयरक्तं, पूयशोणितं, दूष्यं, मलजं, क्षतजं, प्रसितं, अस्रक्लेद:.

To MATTER, *v. n.* (Be of importance) expressed by अर्थ in comp. or प्रभाव in comp.; as, 'it matters not,' निरर्थकं or अनर्थकं भवति; 'to matter but little,' लघ्वर्थ: -र्था -र्थं or अल्पार्थ: -र्था -र्थं or लघुप्रभाव: -वा -वं भू; 'to matter greatly,' गुर्व्वर्थ: -र्था -र्थं or गुरुप्रभाव: -वा -वं भू, प्रभू.—(Form purulent matter) पूय् (c. 1. पूयते -यितुं), सपूय: -या -यं भू, पूयपूर्ण: -र्णा -र्णं भू, पूयगर्भ: -र्भा -र्भं भू.

MATTERY, *a.* (Purulent) पूययुक्त: -क्ता -क्तं, सपूय: -या -यं, पूयपूर्ण: -र्णा -र्णं, पूयगर्भ: -र्भा -र्भं, पूयस्रावी -विणी -वि (न्), पूयविशिष्ट: -ष्टा -ष्टं.

MATTOCK, *s.* खनित्रं, खात्रं, शैलभित्ति: *f.*, पाषाणदारण:, टङ्क:, स्तम्बहननी.

MATTRESS, *s.* तूलिका, तूला -ली, आस्तरणं, बोरपट्टी, तूलादिनिर्म्मितम् आस्तरणं, आस्तर:, प्रस्तर:, संस्तर:, स्तरिमा *m.* (न्), शयनीयं.

To MATURATE, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पाकं कृ or जन् (c. 10. जनयति -यितुं), सपूयं -यां कृ.

To MATURATE, *v. n.* पक्व: -क्वा -क्वं भू, परिपक्वीभू, पूयपूर्ण: -र्णा -र्णं भू,

सपूयः -या -यं भू, पूयगर्भः -र्भा -र्भं भू, पूय् (c. 1. पूयते -यितुं).

MATURATION, *s.* पाकः, परिपाकः, विपाकः, पचनं, पक्वता, परिपक्वता, पाचा -चिका, पचा, पूयत्वं, सपूयत्वं, पूयपूर्णता, पूयसंस्रावः, पूयस्रावः.

MATURATIVE, *a.* पाकलः -ला -लं, पाचलः -ला -लं, पाचनः -ना -नं, पचिष्णुः -ष्णुः -ष्णु, उत्पचिष्णुः &c., पक्ष्णुः &c., पाककरः -रा -रं, पाकजनकः -का -कं, पूयजनकः -का -कं.

MATURE, *a.* पक्वः -क्वा -क्वं, सुपक्वः &c., परिपक्वः &c., पक्त्रिमः -मा -मं, विपक्त्रिमः -मा -मं, पाकिमः -मा -मं, पक्वतापन्नः -न्ना -न्नं, पक्वदशाप्राप्तः -प्ता -प्तं, पक्वदशापन्नः -न्ना -न्नं, परिणतः -ता -तं, पाकोन्मुखः -खा -खं, फलोन्मुखः -खा -खं; 'ready to drop,' विनाशोन्मुखः -खा -खं.—(Brought to perfection, complete) सम्पन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, सम्पूर्णः -र्णा -र्णं, प्रौढः -ढा -ढं; 'mature deliberation,' सुसमीक्षा -क्षणं, सुविचारः -रणा.

To MATURE, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पक्वं -क्वां कृ, पक्वीकृ, परिपक्वं -क्वां कृ, परिपक्वीकृ, पाकं कृ or जन् (c. 10. जनयति -यितुं), पक्वतां or परिपाकं कृ or जन्, परिणामं कृ or जन्, सिद्धं -द्धां कृ, सिद्धीकृ, साध् (c. 10. साधयति -यितुं), सम्पन्नं -न्नां कृ, सम्पद् (c. 10. -पादयति -यितुं).

To MATURE, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वः -क्वा -क्वं भू, पच् in pass. (पच्यते), परिपच्, पक्वतां or पक्वदशां or परिणामं या (c. 2. याति -तुं) or इ (c. 2. एति -तुं) or गम् (c. 1. गच्छति, गन्तुं), परिणतः -ता -तं भू, पाकोन्मुखः -खा -खं भू, सिद्धः -द्धा -द्धं भू, सम्पन्नः -न्ना -न्नं भू.

MATURED, *p. p.* पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, परिणतः -ता -तं, पक्वतापन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, प्रौढः -ढा -ढं, सम्पन्नः -न्ना -न्नं, सम्पूर्णः -र्णा -र्णं.

MATURELY, *adv.* सपाकं, सपरिणामं, परिपक्वं, सम्पन्नं, सम्पूर्णं.—(With full deliberation) सुसमीक्ष्य, सुविमृश्य, सुविचार्य्य.

MATURESCENT, *a.* पाकोन्मुखः -खा -खं, आपक्वः -क्वा -क्वं, परिणामोन्मुखः &c., पर्य्यतिकल्पः -ल्पा -ल्पं, पर्य्यतिदेशीयः -या -यं, पर्य्यतिदेश्यः -श्या -श्यं.

MATURITY, MATURENESS, *s.* पाकः, परिपाकः, पक्वता, पक्तिः *f.*, परिपक्वता, विपाकः, सुपक्वता, सुपक्तिः, परिणतिः *f.*, परिणामः, परिणतता -त्वं, पक्वभावः, पक्वदशा, पक्वावस्था, परिणतावस्था, पचा, पाचा -चिका, प्रौढिः *f.*, प्रौढता, सिद्धता, सिद्धिः *f.*, सम्पन्नता, सम्पूर्णता.

MATUTINAL, MATUTINE, *a.* प्रातःकालीनः -ना -नं, प्रातःकालिकः -की -कं, औषिकः -की -कं, औषसः -सी -सं, उषस्यः -स्या -स्यं, प्रगेतनः -नी -नं, वैयुष्टः -ष्टी -ष्टं, प्राबोधिकः -की -कं, औदयिकः -की -कं, प्रातःकालसम्बन्धी -न्धिनी -न्धि (न्).

MAUDLIN, *a.* ईषन्मत्तः -त्ता -त्तं, मत्तकल्पः -ल्पा -ल्पं, मत्तदेशीयः -या -यं.

MAUL, *s.* बृहन्मुद्गरः, काष्ठमुद्गरः, स्थूलमुद्गरः, घनः.

To MAUL, *v. a.* स्थूलवेगेण तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्तुं), वेत्राघातं कृ, वेत्राघातेन क्षतविक्षतीकृ.

MAULED, *p. p.* वेत्रादिप्रहारेण परिक्षतः -ता -तं or क्षतिमुखः -खा -खं.

MAUSOLEAN, *a.* चिताचूडकसम्बन्धी -न्धिनी -न्धि (न्), चैत्यसम्बन्धी &c.

MAUSOLEUM, *s.* चिताचूडकं, चैत्यं, चित्यं, चैत्रः, समाधिः *m.*

MAUVAISE-HONTE, *s.* सभाभीतिः *f.*, सभाकम्पः, जनभीतिः, लोकभीतिः, जनलज्जा.

MAW, *s.* पशूनां जठरः or उदरं.—(Of fowls) उपजठरः.

MAWKISH, *a.* विरसः -सा -सं, नीरसः -सा -सं, अरसिकः -का -कं.

MAWKISHLY, *adv.* विरसं, वैरस्येन, सवैरस्यं, रसं विना, अरसिकं.

MAWKISHNESS, *s.* विरसता -त्वं, वैरस्यं, अरसता, अरसिकत्वं, म्लानता.

MAXILLAR, MAXILLARY, *a.* हनुसम्बन्धी -न्धिनी -न्धि (न्) हनु in comp.

MAXIM, *s.* सूत्रं, वचनं, वाक्यं, तत्त्वं, विधिः *m.*, विधानं, नियमः, स्थितिः *f.* आदेशः, विदेशः, निर्देशः, कल्पः, न्यायः, नीतिः *f.*, क्रमः, चोदना, निगमः, सिद्धान्तः, मतं.

MAXIMUM, *s.* उत्तमसंख्या, परमसंख्या, अधिकसंख्या, उत्तमपरिमाणं.

MAY, *s.* (The month) वैशाखोत्तरार्द्धं, ज्यैष्ठपूर्वार्द्धं, वैशाखः, माधवः, राधः, ज्येष्ठः, शुक्रः, पद्ममासः.

MAY, *v. auxil.* (Be possible) सम्भू, शक् in pass. (शक्यते), शक्यः -क्या -क्यं भू or expressed by the potential.—(Have liberty, be allowed) expressed by the potential; as, 'he may do that,' स तत् कुर्य्यात्. *See also* PERMITTED, ALLOWED, &c. (May be) स्यात्.

MAY-DAY, *s.* पूर्व्वोक्तपद्ममासस्य प्रथमदिवसः.

MAY-POLE, *s.* क्रीडादण्डविशेषो यत्परितो मण्डलनृत्यं क्रियते.

MAYOR, *s.* नगराध्यक्षः, पुराध्यक्षः, नगराधिकारी *m.* (न्).

MAYORALTY, *s.* नगराध्यक्षता -त्वं, पुराध्यक्षता, नगराधिकारः -रिता, नगराध्यक्षपदं, नगराध्यक्षाधिकारः.

MAYORESS, *s.* नगराधिकारिणी, नगराध्यक्षस्त्री, नगराध्यक्षपत्नी.

MAZE, *s.* (Labyrinth) गहनं, सुगहनस्थानं, दुर्निर्गमस्थानं, अशक्यनिर्गमः प्रदेशः, भ्रमजनकः प्रदेशः, दुर्गतिः *f.*—(Intricacy, perplexity) वक्रता, कौटिल्यं, विषमता, वैषम्यं, क्लिष्टता, काठिन्यं, दुःशोध्यता, व्यस्तता.

MAZY, *a.* गहनः -ना -नं, सुगहनः -ना -नं, दुर्निर्गमः -मा -मं, वक्रः -क्रा -क्रं, अतिवक्रः -क्रा -क्रं, भ्रमजनकः -का -कं, भ्रान्तिजनकः -का -कं, दुःशोध्यः -ध्या -ध्यं.

ME, *pron.* acc. c. मां; 'by me,' मया; 'to me,' मह्यं; 'of me,' मम.

MEACOCK, *s.* गेहशूरः, गेहनर्दी *m.* (न्), कापुरुषः, स्त्रीविधेयः.

MEAD, *s.* मधु *n.*, मधुपानीयं, मधुनीरं, मधुपयस् *n.*

MEAD, MEADOW, *s.* क्षेत्रं, केदारः, यवसस्थानं, शाद्वलस्थानं, गोचरः, गोप्रचारः; 'meadow-grass,' यवसः, क्षेत्रियं; 'relating to a meadow,' कैदारः -री -रं, क्षेत्रिकः -की -कं.

MEADOWY, *a.* यवसमयः -यी -यं, यवसीयः -या -यं, शाद्वलः -ला -लं.

MEAGER, MEAGRE, *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणः -णा -णं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, शुष्कमांसः -सा -सं, शुष्काङ्गः &c., क्षामः -मा -मं, क्षामशरीरः &c., अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं, तनुः -नुः -न्वी -नु, वितनुः &c., प्रतनुः &c., शातः -ता -तं.—(Barren as soil) रूक्षः -क्षा -क्षं, वन्ध्यः -न्ध्या -न्ध्यं; 'a barren soil,' मरुस्थलं -ली.—(As style) विरसः -सा -सं, फल्गुः -ल्गुः -ल्गु.

MEAGERLY, *adv.* परिकृशं, सकार्श्यं, कार्श्येन, क्षीणतया, रूक्षं.

MEAGERNESS, MEAGRENESS, *s.* कृशता -त्वं, कार्श्यं, परिकृशता, कृशाङ्गता, क्षीणता, क्षामता, शरीरक्षीणता, मांसक्षीणता, शुष्कता, मांसशुष्कता, अपुष्टता, विपुष्टता, अमांसत्वं -ता, तनुता, शुष्काङ्गता, मांसहीनता, रूक्षता.

MEAL, *s.* (Flour) सक्तु *m.*, क्षोदः, पिष्टं, चूर्णं, गोधूमचूर्णं, गोधूमक्षोदः, अपूपः, क्षोदितं, गुण्डिकः -का, समीदः; 'barley-meal,' यवक्षोदः.—(Repast) आहारः, भोजनं, भक्षणं, भक्षिका, अशनं, प्राशनं, अभ्यवहारः, अन्नं; 'good meal,' सुभोजनं, इच्छाभोजनं; 'poor meal,' कुभोजनं; 'light meal,' लघ्वाहारः, अल्पाहारः, फलाहारः; 'morning meal,' प्रातर्भोजनं, प्रातरशनं, प्रातराशः; 'meal at noon,' माध्याह्निकं; 'at night,' रात्रिभोजनं; 'meal supplied by another,' परान्नं; 'row or party at a meal,' पंक्तिः *f.*; 'to make a meal,' आहारं कृ, भोजनं कृ; 'one who has made a meal,' कृताहारः -रा -रं, कृतभोजनः -ना -नं; 'making one's meals at irregular hours,' विषमभोजनं; 'meal-time,' भोजनकालः, अन्नकालः.

Mealiness, *s.* सचूर्णता -त्वं, क्षोदितत्वं, कोमलता, शक्तुपूर्णता, मृदुता.

Mealman, *s.* शक्तुविक्रयी *m.* (न्), चूर्णविक्रेता *m.* (तृ), क्षोदविक्रयोपजीवी *m.*

Mealy, *a.* चूर्णमयः -यी -यं, क्षोदमयः -यी -यं, सचूर्णः -र्णा -र्णं, शक्तुपूर्णः -र्णा -र्णं, कोमलः -ला -लं, मृदुलः -ला -लं, मसृणः -णा -णं.

Mealy-mouthed, *a.* मृदुभाषी -षिणी -षि (न्), कोमलमुखः -खी -खं, मृदुमुखः &c.

Mean, *a.* (Base, low-minded) नीचः -चा -चं, दीनः -ना -नं, कृपणः -णा -णं, अपकृष्टः -ष्टा -ष्टं, निकृष्टः -ष्टा -ष्टं, कुत्सितः -ता -तं, क्षुद्रः -द्रा -द्रं, तुच्छः -च्छा -च्छं, हीनः -ना -नं, कदर्य्यः -र्य्या -र्य्यं, अनार्य्यः &c., जघन्यः -न्या -न्यं, खलः -ला -लं, दुष्टः -ष्टा -ष्टं, अधमः -मा -मं, प्राकृतः -ती -तं, पामरः -री -रं, अधमवृत्तिः -त्तिः -त्ति, जघन्यवृत्तिः &c., दीनवृत्तिः &c., पामरवृत्तिः &c., हीनवृत्तिः &c., कृपणबुद्धिः -द्धिः -द्धि, कु or का prefixed, as, 'a mean man,' कुपुरुषः, कापुरुषः.—(Low in rank or birth,' हीनजातिः -तिः -ति, अधमजातिः &c., अधमजातीयः -या -यं, अन्त्यजातीयः -या -यं, जघन्यजातिः &c., नीचजातिः &c., अकुलीनः -ना -नं, अकुलः -ला -लं, दुष्कुलीनः -ना -नं, अधमवर्णजातः -ता -तं.—(Contemptible, worthless,) गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, निर्गुणः -णा -णं, तृणप्रायः -या -यं, क्षुल्लकः -का -कं, लघुः -घुः -घ्वी -घु, लघुप्रभावः -वा -वं.—(Middle, moderate in size) मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यपरिमाणः -णा -णं, मध्यमप्रमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c.—(Intermediate, intervening) मध्यः &c., मध्यमः &c., मध्यस्थः -स्था -स्थं, मध्यस्थितः -ता -तं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तर्गतः -ता -तं, व्यवहितः -ता -तं; 'in the mean time,' अनन्तरं -रे, तदनन्तरं, अत्रान्तरे, इतोमध्ये.—(In geometry or mathematics) मध्यः &c., मध्यमः &c., समः -मा -मं; 'mean anomaly,' मध्यकेन्द्रं; 'mean motion of a planet,' मध्यमगतिः *f.*

Mean, *s.* (Middle place, middle rate, medium) मध्यता -त्वं, समता, साम्यं, मध्यमपरिमाणं, सामान्यपरिमाणं, समपरिमाणं, सामान्यपक्षः, समपक्षः.—(Intervening time) मध्यकालः, अभ्यन्तरकालः, अन्तरकालः, कालान्तरं, कालाभ्यन्तरं, अन्तरं, अन्तर्गतकालः, मध्यान्तरं, मध्यावसरः, मध्यावधिः *m.*, अवधिः *m.*—(In geometry, &c.) समं, मध्यं.—(Instrument, means or medium through which any thing is done) साधनं, उपायः, कारणं, उपकरणं, करणं, द्वारं, द्वार् *f.*, अभ्युपायः, हेतुः *m.*, विधानं, कर्म्मसाधनं, कार्य्यसाधकं, कार्य्यसाधनं, सम्भवः, अङ्गं, उपचारः, योगः, गतिः *f.*, उपपत्तिः *f.*, साहाय्यं, साधनसामग्री -ग्र्यं, सामग्री, साहित्यं; 'by means of,' उपायेन, द्वारेण, द्वारा, हेतुना, हेतोः, कारणेन; 'by means of a lever,' उत्तोलनदण्डोपायेन or उत्तोलनदण्डद्वारेण -द्वारा; 'by lawful means,' धर्म्मोपायेन, धर्म्मोपायैः or expressed by the indecl. part.; as, 'by means of numerous experiments,' अनेकवारं परीक्ष्य; 'means of subsistence,' जीवनोपायः, जीवनहेतुः *m.*, उपजीवकं -विका, उपजीवनं; 'by all means, in all ways,' सर्व्वथा, सर्व्वथैव, सर्व्वप्रकारेण; 'by all means, certainly,' अवश्यं, अवश्यमेव; 'by any means,' कथमपि, कथञ्चन, कथञ्चित्, यथाकथञ्चित्, कथं कथमपि; 'by no means,' न कथञ्चन, न कथञ्चित्.—(Means, resources, income) विभवः, द्रव्यं, धनं, अर्थः, आयः, आगमः, धनागमः, सम्भवः, शक्तिः *f.*, बलं, सामर्थ्यं; 'according to one's means,' यथाविभवं, यथासम्भवं, यथाशक्ति, यथासामर्थ्यं; 'having small means,' अल्पधनः -ना -नं, अल्पविभवः -वा -वं.

To **mean**, *v. a.* (Intend) अभिप्रे (c. 2. अभिप्रैति -तुं, rt. इ), अभिप्रायं कृ, उद्दिश् (c. 6. -दिशति -देष्टुं), मनसा उद्दिश्, अभिसन्धा (c. 3. -दधाति -धातुं), इष् (c. 6. इच्छति, एषितुं), उपलक्ष् (c. 10. -लक्षयति -यितुं) or expressed by the des. form of a verb; as, 'to mean to do,' कृ in des. (चिकीर्षति -र्षितुं); 'to mean to go,' गम् in des. (जिगमिषति -षितुं); 'to mean to say,' वच् in des. (विवक्षति -क्षितुं), or by काम with the infin.; as, 'what do you mean to say?' किं वक्तुकामो ऽसि; 'what do you mean to do?' किं कर्तुकामो ऽसि; 'where do you mean to go?' कुत्र गन्तुकामो ऽसि.—(Signify, indicate) सूच् (c. 10. सूचयति -यितुं), उद्दिश्, निर्दिश्, बुध् (c. 10. बोधयति -यितुं), उद्बुध्.

To **mean**, *v. n.* (Have meaning) अर्थवान् -वती -वद् भू, सार्थः -र्था -र्थं भू, वच् in des. (विवक्षति -क्षितुं), अर्थं सूच् (c. 10. सूचयति -यितुं) or expressed by अर्थ *i.e.* signification, meaning) in comp.; as, 'a speech that means to convey censure,' निन्दार्थो वादः.

Meander, *s.* वक्रता, वक्रगतिः *f.*, वक्रिमा *m.* (न्), जिह्मता, जैह्म्यं, जिह्मगतिः *f.*, कुटिलता, कौटिल्यं, कुटिलगतिः *f.*, तिर्य्यक्त्वं, तिर्य्यग्गतिः *f.*, असमानगतिः, विसर्पणं, सर्पः -र्पणं, सर्पगतिः *f.*; 'of a river's bank,' रोधोवक्रता.

To **meander**, *v. n.* विसृप् (c. 1. -सर्पति -सर्प्तुं), विसर्पणं कृ, वक्रं or जिह्मं गम् (c. 1. गच्छति, गन्तुं), कुटिलं or तिर्य्यग् या (c. 2. याति -तुं), सर्पवद् या.

Meandering, *part.* or *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, वक्रगतिः -तिः -ति, वक्रगामी -मिनी -मि (न्), जिह्मः -ह्मा -ह्मं, जिह्मगतिः &c., जिह्मगामी &c., कुटिलः -ला -लं, कुटिलगतिः &c., कुटिलगामी &c., तिर्य्यङ् तिरश्ची तिर्य्यक् (क्), तिर्य्यग्गतिः &c., तिर्य्यग्गामी &c., विसर्पी -र्पिणी &c., सर्पगतिः &c., वक्रतारः -रा -रं, वक्ररोधाः -धाः -धः (स्), असमानगतिः &c., विषमगतिः &c.

Meaning, *s.* (Intention) अभिप्रायः, अभिप्रेतं, आशयः, उद्देशः, आकांक्षा, अर्थः, तात्पर्य्यं, आकूतं, इङ्गितं, छन्दस् *n.*, सङ्कल्पः, बुद्धिः *f.*, मतिः *f.*, मतं, इङ्गितं, उपलक्षितं, हृदयं, भावः.—(What is intended to be said) विवक्षितं, विवक्षा.—(Sense, signification) अर्थः, अभिप्रायः, विवक्षितं, विवक्षा, आकांक्षा, छन्दस् *n.*, विषयः; 'meaning or force of a word,' पदार्थः, भावार्थः, शक्तिः *f.*, विग्रहः; 'original meaning,' मुख्यार्थः, मुख्यत्वं, मूलार्थः; 'literal meaning,' अक्षरार्थः, पदार्थः; 'metaphorical meaning,' गौणार्थः, गौणत्वं; 'latent or hidden meaning,' मर्म्म *n.* (न्), अन्तर्गर्भः; 'deep in meaning,' गूढार्थः -र्था -र्थं, निगूढार्थः -र्था -र्थं, गुर्वर्थगह्वरः -रा -रं; 'having little meaning,' अल्पार्थः -र्था -र्थं, अल्पविषयः -या -यं.

Meaning, *part.* or *a.* अभिप्रेत्य, उद्दिश्य, अभिसन्धाय.—(Significant) अर्थवान् -वती -वत् (त्), सार्थः -र्था -र्थं, पूर्णार्थः -र्था -र्थं, अर्थान्वितः -ता -तं, साकूतः -ता -तं, उद्बोधकः -का -कं, वाचकः -का -कं.

Meaningless, *a.* अर्थहीनः -ना -नं, निरर्थकः -का -कं, अनर्थकः -का -कं.

Meaningly, *adv.* सार्थं, साकूतं, अर्थवत्, पूर्णार्थतस्, गुर्वर्थतस्.

Meanly, *adv.* (Poorly, in a low way) कृपणं, कार्पण्येन, सकार्पण्यं, कुत्सितं, दीनं, सदैन्यं, अपकृष्टं, निकृष्टं, कृपणवत्, निकृष्टवत्, खलवत्, अधमवत्, अधमप्रकारेण, जघन्यवत्, तुच्छवत्, कदर्य्यवत्, अनार्य्यवत्; 'meanly born,' हीनजातिः -तिः -ति, अधमजातिः &c.—(Moderately) परिमितं, अभृशं.—(Contemptuously) सावमानं, अनादरेण, सलाघवं, लाघवेन, लघु.

Meanness, *s.* (Baseness, lowness) कृपणता -त्वं, कार्पण्यं, दीनता -त्वं,

दैन्यं, अपकृष्टता, निकृष्टता, नीचता, क्षुद्रता, अधमता, हीनता, तुच्छता, कदर्य्यता, अनार्य्यता, जघन्यता, खलता, दुष्टता, पामरता, अधमवृत्तिता, हीनवृत्तित्वं, मनोहीनता, बुद्धिकार्पण्यं, कृपणबुद्धित्वं, अनुदारता; 'of birth,' हीनजातित्वं, अधमजातित्वं, अकुलीनता, दुष्कुलीनता.—(Contemptibleness) गर्ह्यता, तुच्छत्वं, लघुता, लाघवं, कुत्सितत्वं, निर्गुणता.

Mean-spirited, *a.* कृपणबुद्धिः -द्धिः -द्धि, कृपणमतिः &c., दीनबुद्धिः &c.

Means, *s. pl.* (Resources) विभवः.—(Instrument) साधनं, उपायः. *See* Mean, *s.*

Meant, *p.p.* अभिप्रेतः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, विवक्षितः -ता -तं.

Meanwhile, *adv.* अनन्तरं -रे, तदनन्तरं, अत्रान्तरे, इतोमध्ये, अतोमध्ये, मध्यकाले, अभ्यन्तरकाले, यावत्.

Measled, *a.* वक्ष्यमाणरोगग्रस्तः -स्ता -स्तं, गोवरोपहतः -ता -तं.

Measles, *s. pl.* रक्तस्फोटोत्पविलक्षितो रोगविशेषः. The Mahratti words गोवर:, and ग़ुभा, may perhaps be used.

Measurable, *a.* मेयः -या -यं, प्रमेयः -या -यं, परिमेयः -या -यं, मापनीयः -या -यं, माप्यः -प्या -प्यं, मातव्यः -व्या -व्यं, परिमाणयोग्यः -ग्या -ग्यं.

Measure, *s.* मानं, प्रमाणं, परिमाणं, मात्रं, योतुः *m.*, यौतवं, पौतवं, द्रुवयं, पाय्यं; 'of short measure,' अल्पप्रमाणः -णा -णं; 'measure of capacity,' प्रतीमाणं, प्रस्थः; 'of weight,' तुलामानं; 'of length,' अङ्गुलिमानं; 'of time,' कालपरिमाणं. The following are some of the measures of capacity: मुष्टिः *m.* = a handful, कुञ्चिः *f.* = 8 handfuls, कुडवः = 12 handfuls, प्रस्थः = 48 handfuls or 4 kudavas, आढकः = 4 prasthas, द्रोणः = 4 ádhakas, खारी = 16 dronas, कुम्भः = 20 dronas, वाहः = 10 kumbhas, निकुञ्चकः = ¼ of a kudava, गोष्पदं = the measure of a cow's foot. The following are measures of weight: रक्तिका or रतिः = 2¼ grains, गुञ्जा = 2$\frac{3}{16}$ grains, or ⅛ of a másha, काकिणी = ¼ of a másha, माषः = 17 grains, पलं = 2 máshas, धरणः -णं = 10 palas, कर्षः or अक्षः = 16 máshas or 280 grains troy, तोलः = 210 grains, तुला = 100 palas or 145 ounces troy, भारः = 2000 palas, आचितं = 10 bháras. The following are measures of length: यवः = 1 barley-corn, अङ्गुलः = 8 barley-corns, प्रादेशः = 10 angulas or the span of the thumb and forefinger, वितस्तिः *f.* or गोकर्णः = 12 angulas or the span of the thumb and little finger, रत्निः -त्नी *m.f.* = 18 angulas or a cubit measured from the elbow to the end of the closed fist, अरत्निः *m.* = 21 angulas or a cubit measured from the elbow to the tip of the little finger, हस्तः = 24 angulas or a cubit measured from the elbow to the tip of the middle finger, गजः = 2 cubits or between 2 and 3 feet, व्यामः = a fathom or 3½ hastas or the space between the tips of the fingers of either hand when the arms are extended, काकिणी = ¼ of a danda, दण्डः = a pole or 4 cubits, निवर्त्तनं = 200 square cubits or 20 rods, गोचर्म्म *n.* = a hide of land 300 feet long by 10 broad, क्रोशः = a kos or 4000 cubits, गव्यूतिः *m.f.* or गव्यूतं = 2 kos or 2000 dandas or 8000 cubits, योजनं = 4 kos. The following are measures of time, निमेषः or निमिषः = a twinkling of the eye, काष्ठा = 18 twinklings, कला = 30 kashthás or 8 seconds, क्षणः = 30 kalás or 4 minutes, दण्डः or घटिका = 6 kshanas or the 60th part of a day or 24 minutes, मुहूर्त्तः -र्त्तं = 12 kshanas or the 30th part of a day or 48 minutes, अहोरात्रः = a day or 30 muhúrtas, पक्षः = 15 days, पलं, विपलं, and त्रुटिः are short measures of time, equal to about a minute.—(Rule, standard by which any thing is measured) परिमाणं, प्रमाणं.—(Proportion) मानं, परिमाणं, प्रमाणं, मितिः *f.*, परिमितिः, तारतम्यं; 'according to measure,' प्रमाणतस्.—(Portion allotted) भागः, विभागः, अंशः.—(Degree) प्रमाणं, परिमाणं, पर्य्यन्तं, मात्रं; 'in some measure,' किञ्चित्, अल्पमात्रं, ईषत्.—(Limit) पर्य्यन्तं, अन्तः -न्तं, मर्य्यादा, सीमा; 'beyond measure,' अतिमात्रं, अतिमर्य्यादं, नितान्तं, अतिशयेन, अतीव, अति prefixed.—(Moderation) परिमितिः *f.*, परिमितता; 'in measure,' परिमितं.—(Quantity, measure of a vowel, &c.) मात्रा.—(Musical time) तालः, मात्रा; 'in musical measure,' स्वरबद्धः -द्धा -द्धं.—(Metre, measure of verse) छन्दः, छन्दस्, वृत्तं, वर्णवृत्तं, वेदः, पद्यं; 'false measure,' छन्दोभङ्गः.—(Means to an end, step) उपायः, उपचारः, साधनं, अभ्युपायः, योगः, प्रयोगः, युक्तिः *f.*, विधानं, क्रिया, कर्म्म *n.* (न्), कार्य्यं, कारणं, करणं; 'mild measures,' सामोपचारः, सौम्योपचारः, सामोपायः; the four measures of war are 'causing dissension,' भेदः; 'force of arms,' दण्डः; 'bribery,' दानं; 'conciliation,' साम *n.* (न्); 'to take measures,' उपायप्रयोगं कृ.—(Common measure in arithmetic, &c.) अपवर्त्तः; 'having no common measure,' निरपवर्त्तः -र्त्ता -र्त्तं.

To Measure, *v. a.* मा (c. 2. माति, c. 3. मिमीते, c. 4. मायते, मातुं, c. 10. मापयति -यितुं), प्रमा, परिमा, तुल् (c. 10. तुलयति -यितुं), तूल् (c. 10. तूलयति -यितुं), मापनं कृ, परिमाणं कृ.—(Ascertain the degree or extent) मानं or परिमाणं निरूप् (c. 10. -रूपयति -यितुं) or ज्ञा (c. 9. जानाति, ज्ञातुं) or परीक्ष् (c. 1. -ईक्षते -क्षितुं), परिमाणनिरूपणं कृ.—(Compute) गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्.—(Make a comparison of measurement) उपमा.—(Allot) विभज् (c. 1. -भजति -भक्तुं) or परिकॢप् (c. 10. -कल्पयति -यितुं).

To Measure, *v. n.* (Be of a certain extent or size) expressed by परिमाण or परिमित or मित in comp.; as, 'a line which measures eight inches,' अष्टाङ्गुलपरिमिता रेखा; 'to measure an inch,' अङ्गुलपरिमितः -ता -तं भू, अङ्गुलमितः -ता -तं भू, अङ्गुलपरिमाणः -णा -णं भू.

Measured, *p. p.* मितः -ता -तं, प्रमितः -ता -तं, परिमितः -ता -तं, सम्मितः -ता -तं, उन्मितः -ता -तं, मापितः -ता -तं.—(Uniform) समानः -ना -नं, समः -मा -मं, धीरः -रा -रं.—(In music) तालबद्धः -द्धा -द्धं.—(Limited) मितः -ता -तं, परिमितः -ता -तं, निबद्धः -द्धा -द्धं, नियतः -ता -तं.

Measureless, *a.* अमेयः -या -यं, अपरिमेयः -या -यं, अप्रमेयः -या -यं, अमितः -ता -तं, अपरिमितः -ता -तं, अपरिमाणः -णा -णं.

Measurement, *s.* मापनं, परिमाणं, मितिः *f.*, परिमितिः *f.*, प्रमितिः *f.*, प्रमाणं, मानं, मानपरीक्षा, परिमाणपरीक्षा, माननिरूपणं, मापकरणं; 'rough measurement,' स्थूलमानं; 'exact measurement,' सूक्ष्ममानं.

Measurer, *s.* मापकः, परिमापकः, मापनकर्त्ता *m.* (र्तृ), मापनकृत्, माननिरूपकः, परिमाणनिरूपकः, परिमाणपरीक्षकः.

Measuring, *s.* मापनं; 'measuring-line,' प्रमाणसूत्रं; 'rod,' प्रमाणदण्डः.

Meat, *s.* (Flesh) मांसं, आमिषमांसं, मांसाहारः, आमिषं, आमिषाहारः; 'butcher's meat,' सौनं, शौनं, सौनिकं, शौनिकं.—(Food) अन्नं, भोजनं, आहारः, खाद्यं, भक्ष्यद्रव्यं, खाद्यद्रव्यं; 'meat and drink

अन्नोदकं, अन्नजलं, अन्नपानं; 'seller of meat,' मांसिकः, सौनिकः, शौनिकः, कौटिकः, वैतंसिकः.

Meat-offering, *s.* नैवेद्यं, अन्ननिवेदनं, अन्नोपहारः, अन्नोपहरणं.

Mechanic, mechanical, *a.* (Pertaining to machines) यान्त्रः -न्त्री -न्त्रं, यान्त्रिकः -की -कं, यन्त्री -न्त्रिणी -न्त्रि (न्), यन्त्रीयः -या -यं, यन्त्रसम्बन्धी -न्धिनी &c., यन्त्रविषयः -या -यं, शिल्पिकः -की -कं, शिल्पी -ल्पिनी &c., यन्त्रविद्यासम्बन्धी &c., शिल्पविद्यासम्बन्धी &c.—(Constructed or performed by the rules of mechanics) यन्त्रविद्यानुसारी -रिणी &c., यन्त्रशास्त्रानुरूपः -पा -पं, शिल्पशास्त्रानुसारी &c., यन्त्रशास्त्रसिद्धः -द्धा -द्धं, शिल्पविद्याकृतः -ता -तं, यन्त्रविद्यासिद्धः &c., शिल्पविद्यानिर्म्मितः -ता -तं, यौक्तिकः -की -कं; 'mechanical art,' शिल्पं, कला.—(Skilful in mechanical art) यन्त्रविद्यानिपुणः, शिल्पविद्याज्ञः, शिल्पकर्म्मकुशलः.—(Employed in mechanical pursuits) शिल्पी *m.* (न्), शिल्पकर्म्मकारी *m.*, शिल्पजीवी *m.*, शिल्पोपजीवी *m.* (न्), शिल्पिकः.—(Moving like a machine) यन्त्रगतिकः -का -कं, यन्त्रगतिः -तिः -ति, यन्त्रप्रायः -या -यं, यन्त्रतुल्यः -ल्या -ल्यं.

Mechanic, *s.* (Artisan) शिल्पी *m.* (न्), शिल्पकारः, शिल्पकर्म्मकारः, शिल्पिकः, शिल्पोपजीवी *m.* (न्), शिल्पकर्म्मोपजीवी *m.*, कर्म्मकारः, कर्म्मारः, कारुः *m.* -रुकः.

Mechanically, *adv.* यन्त्रविद्यानुसारेण, शिल्पविद्यानुसारेण, यन्त्रशास्त्रानुरूपेण, शिल्पिकं, शिल्पवत्.—(By the mere laws of motion) यन्त्रगतिमात्रौपम्यात्, यन्त्रतुल्यगत्या, अबुद्धिपूर्व्वं, अमतिपूर्व्वं.

Mechanician, *s.* यन्त्रविद्याज्ञः, शिल्पशास्त्रज्ञः, यन्त्रविद्यानिपुणः.

Mechanics, *s.* यन्त्रविद्या, शिल्पविद्या, यन्त्रशास्त्रं, शिल्पशास्त्रं, शिल्पिशास्त्रं, यान्त्रं, गतिविद्या, यन्त्रगतिविद्या, यन्त्रनिर्बन्धः.

Mechanism, *s.* (Construction of a machine) यन्त्ररचना, यन्त्रविधानं, कला, युक्तिः *f.* See Machinery. (Action of a machine) यन्त्रचेष्टा, यन्त्रगतिः *f.*, यन्त्रक्रिया, यन्त्रव्यापारः; 'a piece of mechanism,' कारुजः.

Mechanist, *s.* यन्त्रनिर्म्माता *m.* (तृ), यन्त्रकर्त्ता *m.*, यन्त्रविद्यानिपुणः.

Meconium, *s.* (Of poppies) खसखसरसः, खसखसनिर्यासः, खसखसस्रावः.—(First fæces of infants) सद्योजातबालकानां प्रथमोच्चारः.

Medal, *s.* मुद्रा, प्रतिष्ठामुद्रा, कीर्त्तिमुद्रा, कीर्त्तिदमुद्रा, मानसूचकमुद्रा, निदर्शनमुद्रा.

Medalist, *s.* (Person skilled in medals) मुद्राविद्याज्ञः, मुद्राविद् *m.*, मुद्रापरीक्षकः.—(One who has gained a medal) कीर्त्तिमुद्राधारी *m.* (न्), कीर्त्तिमुद्रावान् *m.* (त्).

Medallion, *s.* प्राचीनकालिकमुद्रा, प्राचीनमुद्रा, महामुद्रा.

To meddle, *v. n.* (Interfere or intrude officiously) परकार्य्याणि चर्च् (c. 1. चर्चति -र्च्चितुं), परव्यापारचर्चां कृ, परनियोगचर्चां कृ, पराधिकारचर्चां कृ, अनुपचारेण or अनधिकारपूर्व्वं परकार्य्याणि निरूप् (c. 10. -रूपयति -यितुं) or परकार्य्यनिरूपणं कृ or परकार्य्येषु व्यापृ in pass. (-प्रियते) or व्यापृतः -ता -तं भू, पराधिकारं प्रविश् (c. 6. -विशति -वेष्टुं), परकार्य्यप्रवेशं कृ, परव्यापारप्रवेशं कृ, चर्चां कृ.—(Have to do with) व्यापृ in pass., व्यापृतः -ता -तं भू.—(Handle) स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).

Meddler, *s.* परकार्य्यचर्चकः, पराधिकारचर्चकः, पराधिकारप्रवेशकः, परकार्य्यनिरूपकः, परचेष्टानिरूपकः, परकार्य्यव्यापारी *m.* (न्), पराधिकारव्यापारी *m.*, परव्यापारानुगामी *m.*

Meddlesome, *a.* पराधिकारचर्चाशीलः -ला -लं, परचेष्टानिरूपणशीलः &c.

Meddling, *a.* परकार्य्यचर्चकः -का -कं, परकार्य्यनिरूपकः -का -कं, पराधिकारप्रवेशकः -का -कं, पराधिकारव्यापारी -रिणी -रि (न्).

Meddling, *s.* पराधिकारचर्चा, अनधिकारचर्चा, पराधिकारप्रवेशः, परकार्य्यप्रवेशः, परव्यापारचर्चा, पराधिकारव्यापारः, परनियोगव्यापारः, परकार्य्यनिरूपणं, परचेष्टानिरूपणं, चर्चा.

To mediate, *v. n.* मध्यस्थः -स्था -स्थं भू or अस्, मध्यवर्त्ती -र्त्तिनी -र्त्ति भू, माध्यस्थ्यं कृ, मध्ये वृत् (c. 1. वर्त्तते -र्त्तितुं) or स्था (c. 1. तिष्ठति, स्थातुं), मध्ये गम् (c. 1. गच्छति, गन्तुं), अन्तर्गम्.

To mediate, *v. a.* माध्यस्थ्येन सन्धिं कृ or सन्धा (c. 3. -दधाति -धातुं).

Mediate, *a.* मध्यस्थः -स्था -स्थं -स्थायी -यिनी -यि (न्), मध्यवर्त्ती -र्त्तिनी &c., मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, अन्तर्गतः -ता -तं, अन्तर्वर्त्ती &c.

Mediately, *adv.* अन्यद्वारेण, अन्यद्वारा, परद्वारेण, माध्यस्थ्येन, माध्यस्थेन, उपकरणद्वारेण, अनुरूपेण.

Mediation, *s.* माध्यस्थ्यं, माध्यस्थं, मध्यस्थत्वं -ता, मध्यवर्त्तित्वं, मध्यवर्त्तनं, मध्यस्थितिः *f.*, अन्तर्गमनं, अन्तरागमनं, अनुरूपं.

Mediator, *s.* मध्यस्थः, मध्यवर्त्ती *m.* (न्), मध्यस्थायी *m.*, माध्यस्थः, मध्यस्थितः, चरपुरुः.

Mediatorial, *a.* मध्यस्थसम्बन्धी -न्धिनी -न्धि (न्), मध्यस्थविषयः -या -यं, माध्यस्थिकः -की -कं.

Mediatorship, *s.* मध्यस्थता -त्वं, माध्यस्थ्यं, मध्यस्थपदं, मध्यस्थाधिकारः, मध्यस्थकर्म्म *n.* (न्).

Medicable, *a.* औषधोपचारसाध्यः -ध्या -ध्यं, वैद्योपचारसाध्यः &c., भेषजप्रयोगसाध्यः &c., औषधोपायसाध्यः &c., उपक्रमसाध्यः &c., वैद्योपक्रमसाध्यः &c., उपक्रमणीयः -या -यं, चिकित्स्यः -त्स्या -त्स्यं.

Medical, *a.* वैद्यः -द्या -द्यं, वैद्यकः -की -कं, वैद्यक्रियासम्बन्धी -न्धिनी -न्धि (न्), वैद्यकसम्बन्धी &c., वैद्यकविषयः -या -यं, चिकित्सासम्बन्धी &c., औषधीयः -या -यं, औषधोपचारसम्बन्धी &c., भेषजप्रयोगसम्बन्धी &c., आयुर्वेदसम्बन्धी &c., आयुर्वेदी -दिनी &c., आयुर्वेदमयः -यी -यं, वैद्यशास्त्रीयः -या -यं; 'medical science,' वैद्यकशास्त्रं, वैद्यशास्त्रं, आयुर्वेदः -दं; 'medical treatment,' वैद्योपचारः, औषधोपचारः, भेषजोपचारः, औषधप्रयोगः, भेषजप्रयोगः, 'medical man,' वैद्यः, चिकित्सकः, चिकित्साजीवी *m.* आयुर्वेदी.

Medically, *adv.* वैद्यकशास्त्रानुसारेण, वैद्यकधर्म्मानुसारेण, वैद्यशास्त्रमुद्दिश्य, वैद्योपचारमुद्दिश्य, उपचारोद्देशेन.

Medicament, *s.* औषधं, भेषजं, भैषजं, भैषज्यं, अगदः, औषधीयद्रव्यं, भेषजद्रव्यं, द्रव्यं, आयुर्द्रव्यं, जायुः *m.*, जारी, जाली, जीवन्तः, तालिका.

Medicaster, *s.* मिथ्याचिकित्सकः, दुश्चिकित्सकः, छद्मवैद्यः, अशास्त्रवैद्यः.

To medicate, *v. a.* (Impregnate with medicinal substances) औषधीकृ, औषधादिना मिश्र् (c. 10. मिश्रयति -यितुं) or संसृज् (c. 6. -सृजति -स्रष्टुं) or संस्कृ, औषधसंस्कृतं -तां कृ, औषधगुणकं -कां कृ, औषधगुणविशिष्टं -ष्टां कृ.—(Dose with drugs) औषधं दा, भेषजं दा, भिषज् (nom. भिषज्यति).

Medicated, *p. p.* औषधसंस्कृतः -ता -तं, औषधीयद्रव्यसंसृष्टः -ष्टा -ष्टं, औषधादिमिश्रितः -ता -तं.

Medication, *s.* औषधसंस्कारः, औषधसंस्करणं, औषधीकरणं, औषधीयद्रव्यसंसर्गः, औषधीयद्रव्यमिश्रणं.

Medicinal, *a.* (Having healing properties) औषधीयः -या -यं, भैषजः -जी -जं, भेषजीयः -या -यं, औषधोपयोगी -गिनी -गि (न्), रोगान्तकः -का -कं, रोगशमकः -का -कं, रोगहरः -रा -रं, रोगहारी -रिणी &c., रोगघ्नः -घ्नी -घ्नं.—(Pertaining to medicine) औषधसम्बन्धी &c., भेषजसम्बन्धी &c.

MEDICINE, *s.* (Substance having the property of mitigating disease) औषधं, भेषजं, भेषजं, भैषज्यं, अगदः, औषधीयद्रव्यं, जायुः *m.*, रोगिवल्लभः; 'administering medicine,' औषधोपचारः, भेषजोपचारः, औषधप्रयोगः, भेषजप्रयोगः; 'mild medicines,' सामोपचारः, साम्योपचारः.—(The practice of medicine) वैद्योपचारः, चिकित्सा, उपचारः, उपचर्या, उपचार्यः, वैद्यक्रिया, उपक्रमः, वैद्योपक्रमः, रुक्प्रतिक्रिया, परानसा.—(Science of medicine) वैद्यकं, आयुर्वेदः -दं; 'a treatise on medicine,' वैद्यकशास्त्रं, वैद्यशास्त्रं; 'a compounder of medicines,' योगविद् *m.*

MEDIEVAL, *a.* मध्यकालीनः -ना -नं, मध्यकालिकः -का -कं.

MEDIOCRE, MEDIOCRAL, *a.* मध्यमः -मा -मं, मध्यः -ध्या -ध्यं, मध्यमगुणः -णा -णं, मध्यमभावः -वा -वं, साधारणगुणः -णा -णं, अवरगुणः -णा -णं, अप्रधानगुणः -णा -णं, विगुणः -णा -णं, प्राकृतः -ती -तं.

MEDIOCRITY, *s.* मध्यमता, मध्यता, मध्यमभावः, मध्यमावस्था, मध्यमदशा, साधारण्यं, साधारणभावः, साधारणदशा, सामान्यता, मध्यममानं, मध्यमपक्षः. —(Moderation) परिमितता.

To MEDITATE, *v. n.* ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, अभिध्यै, सन्ध्यै, प्रध्यै, चिन्त् (c. 10. चिन्तयति -यितुं), सञ्चिन्त्, विचिन्त्, भू (c. 10. भावयति -यितुं), सम्भू, विमृश् (c. 6. -मृशति -मष्टुं), मनसा विचर् (c. 10. -चारयति -यितुं), समाधा (c. 3. -धत्ते -धातुं), वितर्क् (c.10. -तर्कयति -यितुं), ध्यानं कृ, अभिध्यानं कृ, अन्तर्ध्यानं कृ, चिन्तां कृ, चिन्तापरः -रा -रं भू, ध्यानपरः -रा -रं भू, विचारणं कृ, विवेचनं कृ.—(Intend) मनः कृ, बुद्धिं कृ, मतिं कृ. *See To* INTEND.

To MEDITATE, *v. a.* प्रचिन्त् (c. 10. -चिन्तयति -यितुं), परिचिन्त्, चिन्त्, मन्त्र् (c. 10. मन्त्रयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं), कॢप्, मनसा परिकॢप् or कल्पनां कृ; 'to meditate a plan,' उपायचिन्तां कृ, उपायकल्पनां कृ; 'to meditate doing,' कृ in des. (चिकीर्षति -र्षितुं). *See To* INTEND.

MEDITATED, *p. p.* ध्यातः -ता -तं, चिन्तितः -ता -तं, प्रचिन्तितः -ता -तं, भावितः -ता -तं, मनोगुप्तः -प्ता -प्तं, कल्पितः -ता -तं, परिकल्पितः -ता -तं, घटितः -ता -तं; 'being meditated upon,' ध्यायमानः -ना -नं, अभिध्यायमानः -ना -नं; 'to be meditated upon,' ध्येयः -या -यं, ध्यानीयः -या -यं, ध्यातव्यः -व्या -व्यं.

MEDITATION, *s.* ध्यानं, अभिध्यानं, आध्यानं, अन्तर्ध्यानं, समाधिः *m.*, समाधानं, चिन्ता, चिन्तनं, भावना, सम्भावनं -ना, ध्यानपरता, विचारणं -णा, विमर्शः, मनोगुप्तं, आत्मैकाग्रता, ध्याम *n.* (न्); 'religious and abstract meditation,' योगः, ध्यानयोगः, अन्तर्ध्यानं, समाधिः *m.*, समाधियोगः, समाधानं; 'considered as one of the five sacraments,' अयुतः; 'absorbed in meditation,' ध्याननिष्ठः -ष्ठा -ष्ठं, ध्यानस्थः -स्था -स्थं, ध्यानपरः -रा -रं, समाधिस्थः -स्था -स्थं, समाधिनिष्ठः &c., अधिरूढसमाधियोगः -गा -गं; 'posture suited to religious meditation,' ब्रह्मासनं.

MEDITATIVE, *a.* ध्यानशीलः -ला -लं, चिन्ताशीलः -ला -लं, ध्यानपरः -रा -रं, ध्यानतत्परः -रा -रं, चिन्तापरः -रा -रं, चिन्तापरायणः -णा -णं, चिन्तावान् -वती -वत् (त्), समाधिमान् -मती &c., ध्यानी -निनी -नि (न्), भावितात्मा -त्मा -त्म (न्), अचिन्तः -न्ता -न्तं, ध्यायन् -यन्ती -यत् (त्), ध्यानयुक्तः -क्ता -क्तं.

MEDITERRANEAN, MEDITERRANEOUS, *a.* (Inclosed with land) भूवेष्टितः -ता -तं, भूमिवेष्टितः -ता -तं, भूमध्यस्थः -स्था -स्थं, भूवलयितः -ता -तं, भूवलयाङ्कितः -ता -तं.—(Remote from the sea, inland) दूरस्थः -स्था -स्थं, मध्यदेशीयः -या -यं, मध्यदेशस्थः -स्था -स्थं, समुद्रासमीपः -पा -पं.

MEDIUM, *s.* (Means, instrument) साधनं, द्वारं, द्वार् *f.*, अङ्गं, हेतुः *m.*, कारणं, करणं, निमित्तं -त्तकं, निमित्तकारणं, योगः, कर्म्मसाधनं.—(Channel, vehicle) मार्गः, पथः, वाहनं, द्वारं, अङ्गं; 'through the medium of the ear,' श्रवणमार्गेण, श्रुतिमार्गेण, श्रवणद्वारेण, श्रवणद्वारा; 'the medium by which medicine is administered,' भेषजाङ्गं; 'air is the medium of sound,' वायुः शब्दवाहनं or शब्दवाहकः.—(Instrumentality) कारणत्वं -ता, कारकत्वं, हेतुता, निमित्तत्वं, साधकत्वं, कर्त्तृत्वं, कर्त्तृकत्वं.—(Middle place, mean) मध्यता -त्वं, समता, साम्यं, मध्यमपक्षः, सामान्यपक्षः.

MEDLEY, *s.* सङ्करः, नानाद्रव्यसाङ्कर्य्यं, सन्निपातः, द्रव्यसङ्कुलं, नानाद्रव्यसन्निपातः, सङ्कीर्णद्रव्यसमूहः, प्रकीर्णद्रव्यसमूहः, प्रकीर्णकं, सङ्कीर्णकं, सम्मिश्रद्रव्यसन्निपातः, नानासम्मिश्रद्रव्यसमूहः, नानाद्रव्यसम्मिश्रणं.

MEDLEY, *a.* सान्निपातिकः -की -कं, सन्निपतितः -ता -तं, सङ्कीर्णः -र्णा -र्णं, प्रकीर्णः -र्णा -र्णं, सम्मिश्रः -श्रा -श्रं, अस्तव्यस्तः -स्ता -स्तं, छिन्नभिन्नः -न्ना -न्नं, सङ्करीकृतः -ता -तं, नानाजातीयः -या -यं, सङ्करजातीयः -या -यं.

MEDULLAR, MEDULLARY, *a.* मज्जासम्बन्धी -न्धिनी -न्धि (न्), मेदोसम्बन्धी &c., मज्जामयः -यी -यं, अस्थिसारसम्बन्धी &c., मेदस्वी &c.

MEED, *s.* (Recompense) फलं, प्रतिफलं, प्रतिकृतिः *f.*, प्रतिक्रिया, पारितोषिकं.

MEEK, *a.* विनीतः -ता -तं, विनयी -यिनी -यि (न्), सौम्यः -म्या -म्यं, सौम्यवृत्तिः -त्तिः -त्ति, नम्रबुद्धिः -द्धिः -द्धि, नम्रवृत्तिः -त्तिः -त्ति, नम्रशीलः -ला -लं, नम्रचेताः -ताः -तः (स्), निर्विकाः -रा -रं, निर्विकारचेताः &c., मृदुस्वभावः -वा -वं, सविनयः -या -यं, सहनशीलः -ला -लं, विनतः -ता -तं, गर्व्वहीनः -ना -नं, दर्पहीनः -ना -नं, अगर्व्वः -र्व्वा -र्व्वं, निरहङ्कारः -रा -रं, दीनचेताः &c., अनुद्धतः -ता -तं, अनभिमानी -निनी &c., अनहङ्कारी &c., वश्यात्मा -त्मा -त्म (न्), वश्यः -श्या -श्यं, सुवश्यः &c.

MEEK-EYED, *a.* मृदुनेत्रः -त्रा -त्रं, मृदुलोचनः -ना -नं, सौम्यनेत्रः &c.

MEEKLY, *adv.* सविनयं, विनीतवत्, विनयात्, नम्रचेतसा, निर्विकारचेतसा, नम्रं, विनम्रं, मृदुस्वभावेन, अगर्व्वेण, अनभिमानेन, अनहङ्कारेण, अनिर्वेदं, अनुद्धतं, सदैन्यं.

MEEKNESS, *s.* विनयः, विनीतता, विनीतिः *f.*, सौम्यता, नम्रता, निर्विकारता, स्वभावमृदुता, बुद्धिनम्रता, नम्रशीलता, वश्यता, सुवश्यता, दीनता, दैन्यं, अगर्व्वः, गर्व्वहीनता, दर्पहीनता, अनभिमानं -नता, अनौद्धत्यं, माधुर्य्यं, शान्तिः *f.*, विनतिः, सहनशीलता.

MEET, *a.* (Proper, fit) युक्तः -क्ता -क्तं, उचितः -ता -तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, समञ्जसः -सा -सं, उपपन्नः -न्ना -न्नं, सङ्गतः -ता -तं.

To MEET, *v. a.* and *n.* (Come together, encounter) समागम् (c. 1. -गच्छति -गन्तुं), सङ्गम्, उपागम्, मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, समे (c. 2. समेति -तुं, rt. इ), आसद् (c. 10. -सादयति -यितुं), समासद्, प्रतिमुखं or अभिमुखं गम् or या (c. 2. याति -तुं), अभिया, उपाया, सम्मुखीभू.—(Go to meet) प्रतिगम्, प्रत्युद्गम्, अभिगम्, प्रत्युद्या, अभिया, प्रत्याया, प्रतिव्रज् (c. 1. व्रजति -जितुं), प्रतिवृत् (c. 1. -वर्त्तते -र्त्तितुं), अभिवृत्, प्रत्युद्गमनं कृ; 'gone to meet,' प्रत्युद्गतः -ता -तं.—(Rise to meet) प्रत्युत्था (c. 1. -तिष्ठति -त्थातुं, rt. स्था); 'risen to meet,' प्रत्युत्थितः -ता -तं; 'rising to meet,' प्रत्युत्थानं.—(Assemble) समागम्, सङ्गम्, मिल्, सम्मिल्, एकत्र मिल्, एकत्र गम् or आगम्, समे समभ्ये, समावृत्, समूहीभू.—(Encounter in a hostile manner) संयुध् (c. 4. -युध्यते -योद्धुं), युद्धं कृ, युद्धाय समुपागम्, समाघातं कृ, युद्धारम्भं कृ, रणाभियोगं.—(Meet with, find) आसद्, अधिगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, समाप्, अवाप्, आप्, लभ् (c. 1. लभते

लभ्), विद् (c. 6. विन्दति, वेदितुं), अभिविद्; 'hard to meet with,' दुरासदः -दा -दं, दुरधिगमः -मा -मं, दुरधिगम्यः -म्या -म्यं, दुष्प्रापः -पा -पं, दुष्प्राप्यः -प्या -प्यं, दुर्लभः -भा -भं.—(In age) उपगम्, उपागम्, गम्, आप्, प्राप्, इ, अनुभू; 'they met with their death,' विनाशम् उपगताः.—(Meet as waters) सङ्गम्, सम्भु (c. 1. -भवते -भोतुं), सम्भेदं कृ.

Meeting, *s.* (Coming together) सङ्गमः, समागमः, सङ्गः, सङ्गतिः *f.*, सङ्गतं, मिलनं, मेलनं, सम्मिलनं, सम्मेलनं, मेलकः, संयोगः, योगः, एकत्र मिलनं, एकत्र गमनं.—(Assembly, convention) सभा, समाजः, मेला, मेलः, मेलकः, संसद् *f.*, सदस् *n.*, परिषद्, समज्या, मनुष्यसभा, गोष्ठी, समितिः *f.*, आस्थानं -नी, लोकसंघः, जनसमागमः, जनमेला, मण्डलं, जनसमवायः, जनसमुदायः, जनसमूहः; 'dismissal of a meeting,' सभाविसर्जनं; 'person present at a meeting,' सभासद् *m.*, सभास्तारः, सभ्यः, सदस्यः.—(Confluence) सम्भेदः, सङ्गमः, सङ्गः.

Meeting-house, *s.* मनुष्यसभा, सभा, सभागृहं, सभास्थानं, सभामन्दिरं, समागमगृहं, समागमस्थानं.

Meetly, *adv.* यथायोग्यं, यथोचितं, युक्तं, उपयुक्तं, उचितं, यथार्हं.

Meetness, *s.* योग्यता, युक्तता, उपयुक्तता, उचितत्वं, औचित्यं.

Megalosaurus, *s.* महामकरः, बृहन्मकरः.

Megrim, *s.* शिरोवेदना, शिरःपीडा, अर्द्धशिरःपीडा, अर्द्धमस्तकशूलः.

Meiosis, *s.* (Figure of rhetoric) न्यूनालङ्कारः, न्यूनीकरणालङ्कारः.

Melanagogue, *s.* कृष्णपित्तघ्नं, कृष्णपित्तनाशकम् औषधं.

Melancholic, *s.* सदाविषादी *m.* (न्), नित्यविषादी *m.*, कुपितवायुग्रस्तः.

Melancholily, *adv.* सविषादं, अवसादेन, सोद्वेगं, सावसादं, उद्विग्नवत्.

Melancholy, *a.* (Depressed in spirits) विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, विषादी -दिनी -दि (न्), उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), विमनाः &c., दुर्मनाः &c., अन्तर्मनाः &c., उन्मनाः &c., म्लानमनाः &c., दीनमनाः &c., दीनमनस्कः -स्का -स्कं, विमनस्कः &c., दीनचेतनः -ना -नं, म्लानः -ना -नं, क्लान्तः -न्ता -न्तं, ग्लानः -ना -नं, खिन्नः -न्ना -न्नं, खेदयुक्तः -क्ता -क्तं, खेदी -दिनी &c., उदासीनः -ना -नं, चिन्तापरः -रा -रं, चिन्ताकुलः -ला -लं.—(Habitually depressed) सदाविषादी -दिनी &c., नित्यविषादी &c., सदाखेदी &c., नित्यविषण्णः &c., नित्यावसन्नः &c., सदावसन्नः &c., विषण्णवृत्तिः -त्तिः -त्ति, खेदवृत्तिः &c.—(Mournful, expressing or causing sorrow) विषादसूचकः -का -कं, खेदसूचकः -का -कं, विषादात्मकः -का -कं, खेदात्मकः -का -कं, शोकसूचकः -का -कं, शोकजनकः -का -कं, खेदजनकः -का -कं, दुःखकरः -रा -रं; 'to be melancholy,' विषद् (c. 1. -षीदति -षत्तुं), अवसद्, विषण्णीभू, खिद् in pass. (खिद्यते), ग्लै (c. 1. ग्लायति, ग्लातुं), उद्विग्नीभू, दुर्मनस् (nom. दुर्मनायते), उन्मनस्.

Melancholy, *s.* विषादः, विषण्णता, अवसादः, अवसन्नता, खेदः, खिन्नता, उद्वेगः, उद्विग्नता, ग्लानिः *f.*, म्लानिः *f.*, क्लान्तिः *f.*, निर्विण्णता, निर्वेदः, दीनता, दैन्यं, उदासीनता, औदासीन्यं, उत्कण्ठा, चिन्तोद्विग्नता, चिन्ता, विषादवृत्तिः *f.*, विषण्णवृत्तित्वं, विमनस्कता, वैमनस्यं.

Melée, *s.* (Confused fight) रणसङ्कुलं, युद्धसङ्कुलं, सङ्कुलयुद्धं.

Melilot, *s.* त्रिपर्णीभेदः, त्रिपत्रविशिष्ट ओषधिप्रभेदः.

To meliorate, *v. a.* भद्रतरं -रां कृ, भद्रतरीकृ. *See To* improve.

Melioration, *s.* वृद्धिः *f.*, वर्धनं, श्रेयस्त्वं, भद्रतरभावः. *See* Improvement.

Melliferous, *a.* मधुप्रदः -दा -दं, मधुजनकः -का -कं, मधूत्पादकः &c.

Mellification, *s.* मधुकरणं, मधूत्पादनं, मधूत्पत्तिः *f.*, मधुकारित्वं.

Mellifluence, *s.* मधुस्रावः, मधुप्रवाहः, अमृतस्रावः, सुधाप्रवाहः.

Mellifluous, mellifluent, *a.* मधुस्रावी -विणी -वि (न्), अमृतस्रावी &c., मधुरः -रा -रं, मधुमयः -यी -यं.—(As applied to speech) मधुरास्वरः -रा -रं, मधुरवाक्यः -क्या -क्यं.

Mellifluousness, *s.* मधुरता -त्वं, माधुर्य्यं, स्वादुता, वाक्यमाधुर्य्यं.

Mellow, *a.* पक्कः -क्का -क्कं, परिपक्कः -क्का -क्कं, पक्कमृदुः -द्वी -दु, मृदुपक्कः -क्का -क्कं, पक्किमः -मा -मं, विपक्किमः -मा -मं.—(Soft) मृदुः -दुः -द्वी -दु, कोमलः -ला -लं, मृदुलः -ला -लं, स्निग्धः -ग्धा -ग्धं, ललितः -ता -तं, सुखस्पर्शी -र्शी -र्शि.—(To the ear) मृदुशब्दः -ब्दा -ब्दं, कोमलशब्दः &c., मृदुनादः -दा -दं, मञ्जुलः -ला -लं, मधुस्वनः -ना -नं.

To mellow, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पक्कं -क्कां कृ, मृदुपक्कं -क्कां कृ, परिपक्कं -क्कां कृ, परिपक्कीकृ, मृदूकृ, कोमलीकृ.

To mellow, *v. n.* पक्कः -क्का -क्कं भू, परिपक्कः -क्का -क्कं भू, पक्कीभू, पक्कतां or पक्कदशां या (c. 2. याति -तुं) or इ (c. 2. एति -तुं), मृदुपक्कः -क्का -क्कं भू, मृदूभू, कोमलीभू.

Mellowed, *p. p.* पाकेन मृदूकृतः -ता -तं or कोमलीकृतः -ता -तं.

Mellowness, *s.* पक्कता, परिपक्कता, मृदुता, पक्कमृदुता, कोमलता, मार्दवं, म्रदिमा *m.* (न्), पाकः, परिपाकः, पक्तिः *f.*, पक्कदशा, पक्कभावः.—(Of sound) शब्दमृदुता, नादमार्दवं.

Melodious, *a.* मधुरः -रा -रं, सुश्राव्यः -व्या -व्यं, सुस्वरः -रा -रं, सुस्वनः -ना -नं, सुश्राव्यस्वनः -ना -नं, मधुस्वनः -ना -नं, श्रोत्रसुखः -खा -खं, श्रोत्राभिरामः -मा -मं, श्रुतिसुखः -खा -खं, मधुरस्वरः -रा -रं, मधुरास्वरः -रा -रं, मधुकः -का -कं, सुशब्दः -ब्दा -ब्दं, मञ्जुलः -ला -लं.

Melodiously, *adv.* मधुरं, सुस्वरं, मधुरस्वरेण, सुश्राव्यस्वरेण, माधुर्य्येण.

Melodiousness, *s.* मधुरता, माधुर्य्यं, सुश्राव्यता, सुस्वरता, स्वरमधुरता, स्वरमाधुर्य्यं, श्रोत्राभिरामता.

Melody, *s.* सुस्वरः, सुस्वरानुपूर्व्यं, सुस्वरानुपूर्वी, सुस्वरानुक्रमः, स्वरमाधुर्य्यं, स्वरानुक्रममाधुर्य्यं, माधुर्य्यं, मधुरता, सुश्राव्यता, कलता -त्वं, तालः, तालैक्यं, प्रतितालः.

Melon, *s.* (Water melon) तरबुजं, लतापनसः, सेटुः *m.*, कालिङ्गं, कालिन्दकं, गोडुम्बः.

To melt, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), विद्रु (c. 10. -द्रावयति -यितुं), द्रवीकृ, गल् (c. 10. गालयति -यितुं), विद्रावणं कृ, गालनं कृ, विद्रुतीकृ, विलीनीकृ, आर्द्रीकृ, सार्द्रीकृ.—(Soften to love or tenderness) करुणार्द्रीकृ, दयार्द्रीकृ, भावार्द्रीकृ, सार्द्रीकृ, सार्द्रीकृ, वत्सल (nom. वत्सलयति -यितुं), वत्सलीकृ.

To melt, *v. n.* विली (c. 4. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल्, क्षर् (c. 1. क्षरति -रितुं), द्रवीभू, आर्द्रीभू, सार्द्रीभू, विलीनीभू, विद्रुतीभू.—(Be softened to love or tenderness) दयार्द्रीभू, करुणार्द्रीभू, आर्द्रहृदयः -या -यं भू, क्लिन्नहृदयः -या -यं भू, सार्द्रीभू, वत्सल (nom. वत्सलायते), वत्सलीभू.

Melted, *p. p.* द्रुतः -ता -तं, द्रावितः -ता -तं, विद्रुतः -ता -तं, विद्रावितः -ता -तं, द्रवीभूतः -ता -तं, लीनः -ना -नं, विलीनः -ना -नं, विलीनः -ना -नं, गलितः -ता -तं, गालितः -ता -तं, क्षरितः -ता -तं, परिगलितः -ता -तं, द्रवीकृतः -ता -तं, द्रवमाणः -णा -णं, अवदीर्णः -र्णा -र्णं, आर्द्रीकृतः -ता -तं, सार्द्रीकृतः -ता -तं.—(Softened to tenderness) करुणार्द्रीकृतः-ता-तं, दयार्द्रीभूतः-ता-तं, क्लिन्नहृदयीकृतः-ता-तं, वत्सलीकृतः-ता-तं.

Melter, *s.* द्रावकः, विद्रावकः, द्रावकरः, विलयनकृत्, द्रवकारी *m.* (न्).

Melting, *s.* द्रावः -वणं, विद्राव -वणं, विलयः -यनं, द्रवत्वं, गलनं, गालनं, गलितत्वं, द्रवीकरणं, क्षरणं, विलीनता, आर्द्रीकरणं, सार्द्रीकरणं.

Melting, *part.* or *a.* द्रवमाणः -णा -णं, गलन् -लन्ती -लत् (त्), क्षरन् &c., गाली -लिनी -लि (न्), वात्सल्यजनकः -का -कं.

Member, *s.* (Limb of the body) अङ्गं, अवयवः, शरीराङ्गं, शरीरावयवः, गात्रं, पक्षः, प्रतीकः, अपघनः; 'a minor member of the body,' प्रत्यङ्गं; 'having members,' अङ्गी -ङ्गिनी -ङ्गि, अवयवी &c., साङ्गः -ङ्गा -ङ्गं.—(Of a discourse, &c.) अङ्गं, प्रकरणं, खण्डः -ण्डं, देशः, पदं, परिच्छेदः, विच्छेदः.—(Part, division) अङ्गं, भागः, विभागः, अंशः, अवयवः; 'member by member,' अवयवशस्; 'forming a member,' अङ्गभूतः -ता -तं.—(Of a community or association) गणाभ्यन्तरः, संसर्गाभ्यन्तरः.—(Of an assembly) सभासद्, सभ्यः, सभास्थः, सभास्तारः, सभाभ्यन्तरः, सामाजिकः, सदस्यः.—(Individual) व्यक्तिः *f.*, एकजनः.—(Of a compound word) पदं; 'first member of a compound,' उपपदं; 'last member,' उत्तरपदं.

Membered, *a.* अङ्गी -ङ्गिनी -ङ्गि (न्), साङ्गः -ङ्गा -ङ्गं, अवयवी &c.

Membrane, *s.* त्वक् *f.* (च्), आवरणत्वक् *f.*, आवरकत्वक् *f.*, तनुत्वक् *f.*, अन्तस्त्वक् *f.*, चर्म्म *n.* (न्), अन्तश्चर्म्म *n.*, झिल्लिका, झिल्ली, आवरणं.

Membraneous, membranous, *a.* तनुत्वङ्मयः -यी -यं, आवरणत्वङ्मयः -यी -यं, तनुत्वगावृतः -ता -तं.

Membrum virile, *s.* शिश्नः, पुंलिङ्गं, पुंश्चिह्नं, पुरुषाङ्गं, नराङ्गं, लिङ्गं, ध्वजः, इन्द्रियं, जघन्यं, चर्म्मदण्डः -ण्डं.

Memento, *s.* स्मरणार्थकवस्तु *n.*, स्मृतिजनकचिह्नं, स्मरणं.

Memoir, *s.* वृत्तान्तः, वृत्तान्तरचना, वृत्तान्तोपाख्यानं, वृत्तान्तलिखनं, चरित्रं, चरित्ररचना, चरित्रोपाख्यानं, चरित्रलिखनं, इतिहासः.

Memorable, *a.* स्मरणीयः -या -यं, स्मरणयोग्यः -ग्या -ग्यं, स्मरणार्हः -र्हा -र्हं, स्मर्त्तव्यः -व्या -व्यं, स्मरणोपयुक्तः -क्ता -क्तं, चिरस्मरणीयः &c., अविस्मरणीयः &c.

Memorandum, *s.* स्मरणं, स्मरणपत्रं, स्मारकपत्रं, स्मरणार्थकचिह्नं, पत्रकं.

Memorative, memorial, *a.* स्मारकः -का -कं, स्मार्त्तः -र्त्ती -र्त्तं, स्मृतिजनकः -का -कं, स्मरणार्थकः -का -कं, स्मृतिकरः -रा -रं.

Memorial, *s.* स्मरणार्थकविषयः, स्मरणार्थकवस्तु *n.*, स्मारकविषयः, स्मारकवस्तु, स्मरणार्थकचिह्नं, स्मार्त्तविषयः, स्मार्त्तवस्तु *n.*, स्मरणं.—(Petition) निवेदनपत्रं, विज्ञापनपत्रं, प्रार्थनपत्रं.

Memorialist, *s.* निवेदनकर्त्ता *m.* (र्त्तृ), विज्ञापनकृत् *m.*, प्रार्थकः, प्रार्थयिता *m.*, अर्थी *m.* (न्), प्रार्थनपत्रलेखकः.

To **memorialize**, *v.a.* निवेदनपत्रेण प्रार्थ् (c. 10. -अर्थयति -यितुं), निवेदनपत्रं लिख् (c. 6. लिखति, लेखितुं), निवेदनं कृ.

Memory, *s.* स्मरणं, स्मृतिः *f.*, संस्मृतिः *f.*, संस्मरणं, अनुस्मृतिः *f.*, अविस्मृतिः *f.*, संस्कारः, स्मरणशक्तिः *f.*, धारणा -णं; 'retentiveness of memory,' धारणा, धारणाशक्तिः *f.*; 'having a good or retentive memory,' स्मृतिमान् -मती -मत् (त्), स्मरणशीलः -ला -लं, दृढस्मरणशीलः -ला -लं, अधिगतार्थस्मरणशीलः -ला -लं, अधिगतार्थाविस्मरणशीलः -ला -लं; 'to commit to memory,' हृदये कृ, मनसि कृ, अभ्यस् (c. 4. -अस्यति -असितुं), कण्ठे कृ; 'committed to memory,' कण्ठस्थः -स्था -स्थं, हृदयस्थः -स्था -स्थं, हृत्स्थः &c., अभ्यस्तः -स्ता -स्तं; 'within memory,' स्मार्त्तः -र्त्ती -र्त्तं.—(Time to which memory may extend) स्मार्त्तकालः, स्मरणकालः, स्मृतिकालः.

Men, *s. pl.* पुरुषाः *m. pl.*, नराः *m. pl.*, मनुष्याः *m. pl.*, मानुषाः *m. pl.*

To **menace**, *v. a.* भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), अवभर्त्स्, निर्भर्त्स्, अभिभर्त्स्, अभिनिर्भर्त्स्, परिभर्त्स्, तर्ज् (c. 10. तर्जयति -यितुं), अभितर्ज्, समतर्ज्, अपगुर् (c. 6. -गुरते -रितुं), भर्त्सनं कृ, तर्जनं कृ, भयप्रदर्शनं कृ.

Menace, *s.* भर्त्सनं -ना, निर्भर्त्सनं -ना, तर्जनं, भयप्रदर्शनं, भयदर्शनं, परोदितं, अपकारगीः *f.* (र्).

Menaced, *p. p.* भर्त्सितः -ता -तं, अभिभर्त्सितः -ता -तं, तर्जितः -ता -तं.

Menacer, *s.* भर्त्सनकारी *m.* (न्), निर्भर्त्सनकृत् *m.*, भयप्रदर्शकः.

Menagery, menagerie, *s.* पशुपक्षिसङ्ग्रहः, पश्वादिसङ्ग्रहः, विदेशीयजन्तुपालिका, विदेशीयपशुशाला, विदेशीयपशुपालनस्थानं, नानाजातीयपशुसङ्ग्रहः, भिन्नजातीयजन्तुसङ्ग्रहः, वितंसः, वीतंसः.

Menagogue, *s.* ऋतुप्रवर्त्तकम् or ऋतुप्रवाहकम् or ऋतुजनकम् औषधं, पुष्पाकर्षौषधं.

To **mend**, *v. a.* (Repair) सन्धा (c. 3. -दधाति -धत्ते -धातुं), समाधा, प्रतिसमाधा, प्रतिकृ, प्रतिसंस्कृ, पूर्ववत् कृ, साध् (c. 10. साधयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), जीर्णोद्धारं कृ, जीर्णोद्धरणं कृ, सुस्थं -स्थां कृ, स्वस्थं -स्थां कृ, सन्धानं कृ, प्रतिसमाधानं कृ.—(Correct) शुध् (c. 10. शोधयति -यितुं), परिशुध्, विशुध्, संशुध्.—(Help) उपकृ.—(Improve) वृध् (c. 10. वर्धयति -यितुं), संवृध्, अधिकीकृ.

To **mend**, *v. n.* (Grow better) भद्रतरः -रा -रं भू, भद्रतरीभू, अधिकीभू, वृध् (c. 1. वर्धते -र्धितुं), वृद्धिं गम् (c. 1. गच्छति, गन्तुं) or इ (c. 2. एति -तुं), श्रेयान् -यसी -यो भू, सुस्थः -स्था -स्थं भू, स्वस्थः -स्था -स्थं भू.

Mendable, *a.* सन्धेयः -या -यं, समाधेयः -या -यं, प्रतिसमाधेयः -या -यं, साध्यः -ध्या -ध्यं, उद्धार्य्यः -र्य्या -र्य्यं, उद्धरणीयः -या -यं, प्रतिकार्य्यः -र्य्या -र्य्यं.

Mendacious, *a.* असत्यवादी -दिनी -दि (न्), मिथ्यावादी &c., असत्यभाषी -षिणी, अनृतभाषी &c. See Lying, Liar.

Mendacity, *s.* असत्यभाषणं, मिथ्यावादः, अनृतभाषणं, मृषावादः.

Mended, *p. p.* समाहितः -ता -तं, प्रतिसमाहितः -ता -तं, सन्धितः -ता -तं, साधितः -ता -तं, उद्धृतः -ता -तं, जीर्णोद्धृतः -ता -तं, प्रतिकृतः -ता -तं.

Mender, *s.* सन्धानकर्त्ता *m.* (र्त्तृ), सन्धानकृत् *m.*, सन्धाता *m.* (तृ), प्रतिसमाधाता *m.*, साधकः, उद्धर्त्ता *m.* (र्त्तृ), जीर्णोद्धर्त्ता.

Mendicancy, *s.* भिक्षुकता, भिक्षोपजीविता, भैक्ष्यं, भैक्षजीविका.

Mendicant, *s.* (Beggar) भिक्षार्थी *m.* (न्), भिक्षुकः -की *f.*, भिक्षुः *m.*, भिक्षाकः -की, भिक्षोपजीवी *m.* (न्), भैक्षजीवी *m.*, भिक्षाशी *m.* (न्), भिक्षाहारः, भैक्षभुक् *m.* (ज्), भैक्षाशी *m.*, भिक्षाचरः, भिक्षणशीलः, वनीयकः, याचकः, याचनकः. See Beggar. (Religious mendicant) भिक्षुः *m.*, परिव्राजकः -जिका, परिव्राजः, परिव्राट् *m.* (ज्), प्रव्रजितः, पाराशरी *m.* (न्), पराशरी *m.*, योगी *m.* (न्), सन्न्यासी *m.* (न्), यती *m.* (न्). Other kinds of religious mendicants are दण्डी *m.* (न्), त्रिदण्डी *m.* (न्), वैरागी *m.* (न्), भैरवयोगी *m.*, दिगम्बरः, मस्करी *m.* (न्), अघोरपन्थाः *m.* (न्), कर्मन्दी *m.* (न्).

Mendicity, *s.* भिक्षुकता -त्वं, भैक्ष्यं, भैक्षोपजीवनं, भैक्षजीविका, भैक्षचर्य्या, भैक्षचरणं, भिक्षाशित्वं, भिक्षाटनं, भिक्षावृत्तिः *f.*, भिक्षुकवृत्तिः *f.*, भिक्षा, प्रव्रज्या, परिव्रज्या -ज्यं, व्रज्या, याचनावृत्तिः *f.*, याचकवृत्तिः *f.*, यात्रा, याचना, पैङ्गिल्यं.

Mending, *s.* सन्धानं, सन्धानकरणं, समाधानं, प्रतिसमाधानं, साधनं, उद्धारः, उद्धरणं, जीर्णोद्धारः, जीर्णोद्धरणं, सुस्थकरणं, प्रतिकरणं.

Menial, *a.* गृहदाससम्बन्धी -न्धिनी -न्धि (न्), प्रेष्यसम्बन्धी &c., अवकृष्टः -ष्टा -ष्टं, वार्षलः -ली -लं, व्रातीनः -ना -नं; 'menial offices,' प्रेष्यकर्म्म *n.* (न्), भृत्यकर्म्म *n.*; 'menial service,' प्रेष्यभावः, दास्ययोगः.

Menial, *s.* गृहदासः -सी *f.*, प्रेष्यः -ष्या, भृत्यः, चेटः -टी *f.*, सेवकः -की, अवकृष्टः, अवकृष्टकर्म्मकरः, किङ्करः; 'menials,' परिजनः, परिचरः, दासवर्गः.

Meniscus, *s.* अर्द्धचन्द्राकारः, अर्द्धचन्द्राकृतिः *f.*

Menology, *s.* (Register of months) मासविवरणं, मासपञ्जिका.

Men-pleaser, *s.* लोकरञ्जकः, जनरञ्जकः, जनानुसारी *m.* (न्), लोकानुसारी.

Mensal, *a.* भोजनपात्रसम्बन्धी -न्धिनी -न्धि (न्), भोजनाधारसम्बन्धी &c.

Menses, *s. pl.* ऋतुः *m.*, आर्त्तवं, पुष्पं, कुसुमं, रजस् *n.*, योनिरञ्जनं, स्त्री-

धर्म्मः, कला, मलं, योनिमलं; 'first appearance of the menses,' ऋतुदर्शनं, रजोदर्शनं; 'ceremonies on the event,' ऋतुशान्तिः f., ऋतूत्सवः; 'suppression of them,' रजोबन्धः.

MENSTRUAL, *a.* (Monthly) मासिकः -की -कं, मास्यः -स्या -स्यं, मासीयः -या -यं, मासीनः -ना -नं, प्रातिमासिकः -की -कं, मासानुमासिकः -की -कं.

To MENSTRUATE, *v. n.* ऋतुमती भू, पुष्पवती भू, रजस्वला भू.

MENSTRUATION, *s.* ऋतुप्रवाहः, ऋतुस्रावः; 'woman in this state.' *See* the next.

MENSTRUOUS, *a.* (Woman) ऋतुमती, पुष्पवती, रजस्वला, मलिनी, स्त्रीधर्म्मिणी, उदक्या, आत्रेयी -यिका, अविः -वी, वृषली, अस्पर्शा, मरजाः, चाण्डाली, ब्रह्मघातिनी, रजकी, शूद्री.—(Relating to the menses) आर्त्तवः -वी -वं, ऋतुसम्बन्धी -न्धिनी -न्धि (न्), ऋतु in comp.

MENSTRUUM, *s.* (Solvent) द्रावकरसः, द्रावणं, विद्रावकरसः, विद्रावणं. —(Medium for mixing medicines) योगवाही *m.* (न्).

MENSURABILITY, *s.* मेयता, प्रमेयता, परिमेयता, मापनीयत्वं.

MENSURABLE, *a.* मेयः -या -यं, प्रमेयः -या -यं, परिमेयः -या -यं, मापनीयः -या -यं, माप्यः -प्या -प्यं, मापनक्षमः -मा -मं.

MENSURAL, *a.* मानसम्बन्धी &c., मानविषयः -या -यं, परिमाणविषयः &c.

To MENSURATE, *v. a.* मा (c. 2. माति -तुं, c. 10. मापयति -यितुं). *See To* MEASURE.

MENSURATION, *s.* मापनं, परिमाणं, प्रमाणं, मानं, मितिः *f.*, मापकरणं.

MENTAL, *a.* मानसः -सी -सं, मानसिकः -की -कं, मनस्कः -स्का -स्कं, मनसिजः -जा -जं, मनोजः -जा -जं, मनोगतः -ता -तं, मनोभवः -वा -वं, मनःस्थः -स्था -स्थं, बुद्धिस्थः &c., चित्तस्थः -या -यं, चित्तगतः -ता -तं, चित्तजः -जा -जं, मनोमयः -यी -यं, मनःकल्पितः -ता -तं, बुद्धिकल्पितः -ता -तं, मनःसम्बन्धी -न्धिनी &c.; 'mental suffering,' मनस्तापः, मनःपीडा; 'mental abstraction,' योगः, समाधानं, चित्तवृत्तिनिरोधः.

MENTALLY, *adv.* मनसा, बुद्ध्या, चित्तया, बुद्धिमात्रेण; 'mentally blind,' अन्धधीः -धीः -धि, अन्धबुद्धिः -द्धिः -द्धि, अन्धीकृतात्मा -त्मा -त्म (न्).

MENTION, *s.* अभिधानं, अभिधा, आख्यानं, कथनं, उपादानं, ग्रहणं, नामग्रहणं, नामनिर्देशः, निवेदनं, कीर्त्तनं, सङ्कीर्त्तनं, उच्चारणं, उद्देशः, उल्लेखः -खनं, श्रुतिः *f.*; 'no mention whatever,' न गन्धलेशः; 'to make mention.' *See* the next.

To MENTION, *v. a.* ख्या (c. 2. ख्याति -तुं), आख्या, कथ् (c. 10. कथयति -यितुं), सङ्कथ्, निविद् (c. 10. -वेदयति -यितुं), अभिधा (c. 3. -दधाति -धातुं), कृत् (c. 10. कीर्त्तयति -यितुं), अनुकृत्, उच्चर् (c. 10. -चारयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, उद्देशं कृ, अभिधानं कृ. —(By name) नाम ग्रह (c. 9. गृह्णाति, ग्रहीतुं), नामग्रहणं कृ, नामनिर्देशं कृ; 'it will be mentioned,' वक्ष्यते.

MENTIONED, *p.p.* उक्तः -क्ता -क्तं, प्रोक्तः -क्ता -क्तं, कथितः -ता -तं, आख्यातः -ता -तं, अभिहितः -ता -तं, निवेदितः -ता -तं, कीर्त्तितः -ता -तं, स्मृतः -ता -तं; 'by name,' नामाभिहितः -ता -तं; 'before mentioned,' पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं; 'about to be mentioned,' वक्ष्यमाणः -णा -णं.

MENTOR, *s.* उपदेष्टा *m.* (ष्टृ), उपदेशकः, मन्ता *m.* (न्तृ), अभिमन्ता *m.*

MEPHITIC, MEPHITICAL, *a.* पूतिगन्धी -न्धिनी -न्धि (न्), पूतिगन्धः -न्धा -न्धं, पूतिगन्धात्मकः -का -कं, दुर्गन्धी &c., दूषकगन्धी &c., पूतिगन्धमयः -यी -यं, दुर्गन्धमयः -यी -यं, पूतिविषः -षा -षं, विषात्मकः -का -कं.

MERACIOUS, *a.* तेजोमयः -यी -यं, सत्त्वपूर्णः -र्णा -र्णं, रसिकः -का -कं.

MERCANTILE, *a.* वाणिजिकः -की -कं, वाणिजः -जी -जं, वाणिज्यसम्बन्धी -न्धिनी -न्धि (न्), वणिक्पथसम्बन्धी &c., वणिक्सम्बन्धी &c., व्यवहारसम्बन्धी &c., आपणिकः -का -कं, पण्यायासम्बन्धी &c., नैगमः -मी -मं.

MERCATURE, *s.* क्रयविक्रयः, वाणिज्यं, पण्याया, वणिक्पथं.

MERCENARILY, *adv.* लाभलोभात्, लाभापेक्षया, स्वार्थापेक्षया, लाभदृष्ट्या, लाभबुद्ध्या, फललोभात्, वेतनार्थं, फलार्थं, अर्थतस्, भृतकवत्, सकामं.

MERCENARINESS, *s.* लाभलोभः, फललोभः, लाभदृष्टिः *f.*, वेतनार्थित्वं, लाभबुद्धिः *f.*, फलाशा, धनलोभः, धनलुब्धता, स्वार्थापेक्षा, सकामता, सकामबुद्धिः *f.*, वेतनापेक्षा.

MERCENARY, *a.* (Hired, hireling) भृतकः -का -कं, वैतनिकः -की -कं, वेतनार्थी -र्थिनी -र्थि (न्), वस्निकः -का -कं, भृतिभुक् *m.f.n.* (ज्), भरण्यभुक् *m.f.n.*, भृत्यः -त्या -त्यं, वेतनभृत् *m.f.n.*—(Actuated by hope of gain, greedy of gain) लाभलोभी -भिनी &c., लाभार्थी -र्थिनी &c., लाभदृष्टिः -ष्टिः -ष्टि, लाभबुद्धिः -द्धिः -द्धि, धनलोभी &c., धनलुब्धः -ब्धा -ब्धं, धनार्थी &c., फलदर्शी -र्शिनी &c., सार्थः -र्था -र्थं, स्वार्थदर्शी &c., स्वार्थापेक्षकः -का -कं, सकामः -मा -मं, कामात्मा -त्मा -त्म (न्); 'from mercenary motives,' अर्थतस्, स्वार्थतस्, लाभलोभात्, फललोभात्.

MERCENARY, *s.* (A hireling) भृतकः, भृतिभुक् *m.* (ज्), भरण्यभुक् *m.*, वैतनिकः, वस्निकः, वेतनार्थी *m.* (न्), वेतनभुक् *m.*, भृत्यः; 'soldier,' भृतकसैन्यः.

MERCER, *s.* कौशाम्बरविक्रयी *m.* (न्), कौशेयवणिक् *m.* (ज्), कौशिकवणिक्, दुकूलविक्रेता *m.* (तृ), कौशिकवस्त्रव्यवसायी *m.* (न्).

MERCERY, *s.* कौशाम्बरं, कौशिकवस्त्रादि *n.*, कौशिकवस्त्रादिव्यवसायः.

MERCHANDISE, *s.* (Goods) पण्यं, पण्यद्रव्यं, पण्यद्रव्याणि *n. pl.*, पण्यानि *n. pl.*, विक्रेयद्रव्याणि, विदपण्यं, भाण्डकं, पण्यभाण्डकं, पण्यभाण्डानि *n. pl.*, वाणिजभाण्डानि, वाणिजद्रव्यं, वाणिजपण्यं, पणः, पणमः. —(Trade) वाणिज्यं -ज्या, वणिक्पथं, क्रयविक्रयः, पण्याया, व्यापारः, व्यवहारः, व्यवसायः.

To MERCHANDISE, *v. n.* वाणिज्यं कृ, क्रयविक्रयं कृ, व्यापारं कृ.

MERCHANT, *s.* वणिक् *m.* [illegible] -जिकः, वाणिजजनः, महाजनः, सार्थवाहः, सार्थिकः, क्रयविक्रयिकः, आपणिकः, पणिकः, व्यवसायी *m.* (न्), व्यापारी *m.*, व्यवहारी *m.*, व्यवसायकः, वाणिज्योपजीवी *m.* (न्), श्रेष्ठी *m.* (न्), साधुः *m.*, साधुजनः, नैगमः; 'voyaging merchant,' पोतवणिक्, सांयात्रिकः; 'man of the mercantile or third class,' वैश्यः, विट् *m.* (श्); 'company of merchants,' सार्थः, निगमः.

MERCHANTABLE, *a.* पण्यः -ण्या -ण्यं, विक्रेयः -या -यं, पण्यार्हः -र्हा -र्हं.

MERCHANT-MAN, *s.* (Ship employed in trade) वाणिजनौः *f.*, वाणिजनौका.

MERCIFUL, *a.* दयालुः -लुः -लु, दयावान् -वती -वत् (त्), कृपालुः -लुः -लु, कृपावान् &c., दयाशीलः -ला -लं, कृपाशीलः -ला -लं, सदयः -या -यं, सकरुणः -णा -णं, करुणाशीलः -ला -लं, कारुणिकः -की -कं, सानुकम्पः -म्पा -म्पं, अनुकम्पी -म्पिनी -म्पि (न्), सानुक्रोशः -शा -शं, हृदयालुः -लुः -लु, दयामयः -यी -यं, कृपामयः &c., करुणामयः &c., दयाबुद्धिः -द्धिः -द्धि, दयादृष्टिः -ष्टिः -ष्टि, क्षमाशीलः -ला -लं, क्षमावान् &c., अनुकम्पाशीलः -ला -लं, घृणी -णिनी &c., करुणार्द्रः -र्द्रा -र्द्रं, वत्सलः -ला -लं, कृपाकरः -रा -रं, दयायुक्तः -क्ता -क्तं.

MERCIFULLY, *adv.* सदयं, सकारुण्यं, सानुकम्पं, कृपया, दयया, सानुक्रोशं, दयापूर्व्वं, कृपापूर्व्वं, दयाबुद्ध्या, कारुण्येन -ण्यात्, क्षमापूर्व्वं, वात्सल्यात्.

MERCIFULNESS, *s.* दयालुता, कृपालुता, कारुण्यं, दयाशीलता, कृपाशीलता, सदयत्वं, सानुकम्पता, सानुक्रोशता, क्षमाशीलता, दया, कृपा, अनुकम्पा, करुणा, घृणा, वात्सल्यं.

MERCILESS, *a.* निर्दयः -या -यं, अदयः -या -यं, निष्कृपः -पा -पं, निर्घृणः

-णा -णं, निष्करुणः -णा -णं, अकरुणः -णा -णं, दयाहीनः -ना -नं, दयारहितः -ता -तं, दयाशून्यः -न्या -न्यं, कृपाहीनः -ना -नं, वीतघृणः -णा -णं, निष्ठुरः -रा -रं.

MERCILESSLY, *adv.* निर्दयं, निष्कृपं, निष्करुणं, निष्ठुरं, अतिनैष्ठुर्य्येण.

MERCURIAL, *a.* (Containing mercury or quicksilver) पारदमयः -यी -यं, पारदात्मकः -का -कं, सपारदः -दा -दं.—(Volatile, sprightly) चञ्चलः -ला -लं, चपलः -ला -लं, चञ्चलबुद्धिः -द्धिः -द्धि, प्रकृतितरलः -ला -लं, तरलप्रकृतिः -तिः -ति, अस्थिरबुद्धिः &c., अस्थिरः -रा -रं.

MERCURY, *s.* (The planet, fabled as the son of Soma, or the moon, by Rohiṇí) सौम्यः, सोमभूः *m.*, बुधः, रौहिणेयः, रोधनः, बोधनः, राजपुत्रः, ज्ञः, हकाङ्गः, श्यामाङ्गः, एकदेहः, प्रहर्षणः, पञ्चार्चिस् *m.*, अविज्ञाशः.—(Quicksilver) पारदः, पारः -रतः, रसः, रसधातुः *m.*, सिद्धधातुः, दिव्यरसः, चपलः, दारदः. *See* QUICKSILVER. (A preparation of mercury used in medicine) घनसारः, चन्द्रोदयः, चतुर्मुखः; 'Calx or oxid of mercury,' रसभस्म *n.* (न्), पारदभस्म *n.*; 'white sublimate or muriate of mercury,' रसकर्पूरः; 'sulphuret of mercury,' कज्जली.—(Interpreter or preceptor of the gods) बृहस्पतिः *m.*

MERCY, *s.* (Disposition to forgive, clemency) दया, कृपा, दयाशीलता, कृपाशीलता, क्षमाशीलता, दयालुता, कृपालुता, दयाबुद्धिः *f.*, क्षमाबुद्धिः *f.*—(Compassion) अनुकम्पा, कारुण्यं, करुणा, घृणा, अनुक्रोशः, कृपा, दया.—(Grace, favor) अनुग्रहः, प्रसादः, प्रसन्नता, अनुरोधः.—(Pardon) क्षमा, पापमार्जनं, पापशुद्धिः *f.*, निष्कृतिः *f.*; 'ocean or fountain of mercy,' दयासागरः, दयासमुद्रः, दयानिधिः *m.*, करुणाकरः; 'vessel or recipient of mercy,' दयापात्रं, कृपापात्रं, दयाभाजनं, अनुकम्पनीयः -या, अनुग्राह्यः -ह्या; 'to shew or have mercy,' दयां कृ, अनुकम्प् (c. 1. -कम्पते -म्पितुं), दय् (c. 1. दयते -यितुं), क्षम् (c. 1. क्षमते -मितुं, क्षन्तुं); 'mercy!' त्राहि, त्रायस्व, क्षमस्व, क्षम्यतां.

MERCY-SEAT, *s.* करुणासनं, ईश्वरासनं, परमेश्वरासनं, ईश्वरप्रसादासनं.

MERE, *a.* (Only, pure) मात्र in comp., मात्रकः -का -कं, केवलः -ला -ली -लं, केवली -लिनी -लि (न्), शुद्धः -द्धा -द्धं; 'a mere man,' मनुष्यमात्रः; 'mere touch,' स्पर्शमात्रं; 'mere words,' वाङ्मात्रं; 'by mere talk,' वाक्यमात्रेण; 'a mere grammarian,' केवलवैयाकरणः; 'a mere logician,' केवलनैयायिकः.

MERE, *s.* (A lake) सरस् *n.*, ह्रदः, सरोवरः, पयोराशिः *m.*—(Boundary) सीमा, परिसीमा, अन्तः, समन्तः, पर्य्यन्तं.

MERELY, *adv.* मात्रं, मात्रेण -त्रात्, केवलं, कुद्दारं, खलु; 'by merely inspecting,' निरीक्षणमात्रेण; 'from caste merely,' जातिमात्रात्.

MERETRICIOUS, *a.* (Relating to harlots) वेश्यासम्बन्धी -न्धिनी -न्धि (न्), वाराङ्गनीयः -या -यं, पण्याङ्गनीयः -या -यं.—(Having a false show, gaudy) कृत्रिमशोभावान् -वती -वत् (त्), कृत्रिमशोभामयः -यी -यं, मिथ्याशोभनः -ना -नं, कृत्रिमालङ्कारमयः -यी -यं, मिथ्यालङ्कारवान् &c., मिथ्यारागी -गिणी &c.

MERETRICIOUSLY, *adv.* वेश्यारूपेण, कृत्रिमशोभापूर्व्वं, मिथ्याशोभापूर्व्वं.

To MERGE, *v. a.* (Immerge) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, मग्नं -ग्नां कृ, अवगाह् (c. 10. -गाहयति -यितुं), गाह्.—(Cause to be swallowed up or lost) ग्रस्तं -स्तां कृ, विलीनं -नां कृ, निपीतं -तां कृ, नश् (c. 10. नाशयति -यितुं), नष्टं -ष्टां कृ.

To MERGE, *v. n.* मज्ज् (c. 6. मज्जति -ज्जितुं, मंक्तुं), अवगाह् (c. 1. -गाहते -हितुं -गाढुं), ग्रस्तः -स्ता -स्तं भू, निपीतः -ता -तं भू, नश् (c. 4. नश्यति -शितुं), मग्नः -ग्ना -ग्नं भू, विली (c. 4. -लीयते -लेतुं).

MERGED, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः -ग्ना -ग्नं, अवगाढः -ढा -ढं, लीनः -ना -नं, विलीनः -ना -नं, निलीनः -ना -नं, लुप्तः -प्ता -प्तं.

MERIDIAN, *s.* (Midday, noon) मध्याह्नः, मध्याह्नकालः, मध्यन्दिनं, दिनमध्यं.—(Meridian of the place in geography and astronomy) याम्योत्तरवृत्तं, समध्यं; 'meridians of right ascension,' क्रान्तिसूत्राणि *n. pl.*; 'distance from the first meridian,' रेखान्तरं, देशान्तरं; 'distance between the meridians,' स्फुटपरिधिः *m.*—(Height, highest point) उच्चता, उच्चपदं, अग्रं, मध्यं.

MERIDIAN, *a.* (Relating to midday) माध्याह्निकः -की -कं, माध्यन्दिनः -नी -नं, मध्याह्नकालीनः -ना -नं.—(Pertaining to the meridian line) याम्योत्तरवृत्तसम्बन्धी -न्धिनी -न्धि (न्), समध्यसम्बन्धी &c.—(Highest) उच्चतमः -मा -मं, उत्तमः -मा -मं.

MERIDIONAL, *a.* दक्षिणदिक्स्थः -स्था -स्थं, दक्षिणमुखः -खा -खं, दक्षिणाभिमुखः &c., दाक्षिणिकः -की -कं, दक्षिणदेशीयः -या -यं.

MERIT, *s.* (Desert) गुणः, योग्यता, उपयोगः, उपयुक्तता, पात्रता.—(Excellence, great merit) गुणोत्कर्षः, गुणप्रकर्षः, गुणवैशेष्यं, गुणिता, गुणपूर्णं, सगुणता, गुणौघं, गुणवत्ता, गुणता, गुणमहत् *n.*, उत्कर्षः, उत्कृष्टता, श्रेष्ठता, इस्यं, प्रशस्यं, सारता -त्वं; 'appreciating merit,' गुणग्रहणं; 'one who does so,' गुणग्राही *m.* (न्), गुणग्राहकः, गुणज्ञः.—(Merits, good or bad) गुणागुणं, गुणदोषौ *m.* du., गुणदोषं, सारासारं, पुण्यापुण्यं, धर्म्माधर्म्मं; 'testing one's merits,' गुणागुणपरीक्षा, गुणदोषपरीक्षणं.—(Merit acquired through works, according to the Hindu notion) पुण्यं, श्रेयस् *n.*, सुकृतं, धर्म्मः, वृषः, तपस् *n.*, नियमः, पुण्यसामग्री, सञ्चितं; 'acquisition of merit,' पुण्यार्जनं, पुण्यसम्पादनं, श्रेयःसम्पादनं; 'acquired by merit,' पुण्यार्जितः -ता -तं, पुण्यविजितः -ता -तं; 'reward of merits,' पुण्यफलं; 'good fortune, as the result of merits,' पुण्योदयः; 'merit acquired in some former birth,' पूर्व्वपुण्यं; 'mightiness of merit,' पुण्यप्रतापः; 'person of great merit,' पुण्यनिधिः *m.*, श्रेयोनिधिः *m.*, पुण्यसागरः, पुण्यराशिः *m.*, पुण्यात्मा *m.* (न्), पुण्यजनः; 'a work giving an account of the merits of any holy place or object,' माहात्म्यं.

To MERIT, *v. a.* अर्ह् (c. 1. अर्हति -ते -र्हितुं), अर्हः -र्हा -र्हं or उपयुक्तः -क्ता -क्तं or योग्यः -ग्या -ग्यं or उचितः -ता -तं भू or अस्; 'he merits a kingdom,' राज्यम् अर्हति; 'he merits punishment,' दण्डार्हो भवति or अस्ति; 'to merit confidence,' विश्वासपात्रं भू. *See To* DESERVE.

MERITED, *p. p.* उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, अर्हितः -ता -तं.

MERITORIOUS, *a.* (Deserving a reward) वेतनार्हः -र्हा -र्हं, दक्षिणार्हः &c., प्रतिफलार्हः &c.—(Deserving of honor) श्लाघ्यः -घ्या -घ्यं, श्लाघनीयः -या -यं, प्रशंसनीयः -या -यं, शंस्यः -स्या -स्यं, प्रशस्तः -स्ता -स्तं, श्लाघार्हः -र्हा -र्हं, प्रशंसार्हः &c.—(Having great merit) गुणवान् -वती -वत् (त्), गुणसम्पन्नः -न्ना -न्नं, गुणी -णिनी -णि (न्), गुणान्वितः -ता -तं, श्रेष्ठः -ष्ठा -ष्ठं, उत्तमगुणविशिष्टः -ष्टा -ष्टं.—(Having great religious merit) पुण्यवान् -वती &c., पुण्यशाली -लिनी &c., पुण्यरूपः -पा -पं, पुण्यात्मकः -का -कं, कृतपुण्यपुञ्जः -ञ्जा -ञ्जं; 'meritorious act,' पुण्यकं, व्रतः -तं, नियमः, तपस् *n.*

MERITORIOUSLY, *adv.* यथा वेतनम् or प्रतिफलम् अर्हति तथा, श्लाघनीयं.

MERITORIOUSNESS, *s.* योग्यता, उपयुक्तता, वेतनार्हता, वेतनयोग्यता, उपयोगिता, पात्रता, गुणिता, गुणसम्पन्नता, श्लाघ्यता, पुण्यता, पुण्यवत्त्वं.

Merlin, *s.* (Kind of hawk) श्येनभेदः, कपोतारिः *m.*

Mermaid, *s.* मत्स्यकन्या, मत्स्यकुमारी -रिका, कविकल्पितः कन्योर्द्ध्वकायो मत्स्याधःकायो जन्तुविशेषः, समुद्रीयस्त्री.

Merrily, *adv.* सहर्षं, सानन्दं, उल्लासेन, उल्लसितं, सहासं, सहास्यं, सहसितं, परिहासेन, हृष्टमनसा, सकौतुकं, प्रफुल्लमनसा, उल्लसवत्, हृष्टवत्, प्रमोदेन.

Merriment, *s.* उल्लसता, उल्लासः, हर्षः, प्रहर्षः, आनन्दः, सानन्दता, प्रफुल्लता, हास्यं, प्रहसनं, हासिका, परिहासः, परीहासः, आह्लादः, मुदा, प्रमोदः, कौतुकं, प्रहृष्टता, हृष्टता, क्रीडा, क्रीडाकौतुकं, विलासः, लीला, खेला, हास्यविनोदः, उत्सवः, चर्भटी.

Merriness, *s.* हृष्टता, प्रहृष्टता, उल्लसता, उल्लासिता, हास्यमुखता, हास्यवृत्तिः *f.*, सानन्दता, प्रफुल्लता, सदानन्दिता.

Merry, *a.* हृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, प्रहृष्टः -ष्टा -ष्टं, प्रहृष्टचित्तः -त्ता -त्तं, उल्लसः -सा -सं, उल्लासी -सिनी -सि (न्), उल्लासवृत्तिः -त्तिः -त्ति, परिहासशीलः -ला -लं, हास्यवृत्तिः -त्तिः -त्ति, हास्यमुखः -खी -खं, हास्यवदनः -ना -नं, सुहसाननः -ना -नं, आनन्दी -न्दिनी &c., आनन्दवृत्तिः -त्तिः -त्ति, हासी -सिनी &c., प्रमोदी -दिनी &c., मुदान्वितः -ता -तं, मुदितः -ता -तं, विलासी &c., विनोदी &c., सुमनाः -नाः -नः (स्), कौतुकी &c., उपजातकौतुकः -का -कं.—(Causing mirth) हास्यजनकः -का -कं, हास्योत्पादकः -का -कं, विनोदकः -का -कं; 'to make merry,' उत्सवं कृ; 'to be merry,' उल्लस् (c. 1. -लसति -सितुं), सुमन (nom. सुमनायते), कौतुकं कृ.

Merry-andrew, *s.* भण्डः, वैहासिकः, विदूषकः, परिहासवेदी *m.* (न्).

Merry-making, *s.* उत्सवः, उत्सवकरणं, महोत्सवः, विलासकरणं.

Mersion, *s.* मज्जनं, प्रमज्जनं, निमज्जनं, विगाहः -हनं, अवगाहनं.

Meru, *s.* (The sacred mountain, in the centre of the seven continents, at the extremity of the world's axis, where the gods reside, corresponding to Mount Olympus of the Greeks) मेरुः *m.*, सुमेरुः *m.*, सुरालयः, देवालयः, हेमाद्रिः *m.*, रत्नसानुः *m.*

Mesenteric, *a.* अन्त्रपेशीसम्बन्धी -न्धिनी &c., मध्यान्त्रिकः -की -कं.

Mesentery, *s.* अन्त्रपेशी, अन्त्रावरणत्वक् *f.* (च्), मध्यान्त्रावरणत्वक् *f.*, मध्यान्त्रबन्धनत्वक् *f.*; 'enlargement of the mesentery,' प्लीहा *m.* (न्).

Mesh, *s.* (Interstice of a net) जालान्तरं, जालछिद्रं, जालरन्ध्रं.

To mesh, *v. a.* जाले or पाशे पत् (c. 10. पातयति -यितुं), जाले पातयित्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं), जालबद्धं -द्धां कृ.

Meshy, *a.* जालरूपः -पा -पं, जालाकारः -रा -रं, जालमयः -यी -यं, जालवन्निर्मितः -ता -तं जालवद् बहुछिद्रमयः -यी -यं.

Non-resistance, *s.* अप्रतीकारः, अप्रतिक्रिया, अप्रतिरोधः, अनिवारणं.

Non-resumption, *s.* अपुनरादानं, अपुनर्हरणं, अनपकर्म्म *n.* (न्).

Nonsense, *s.* अनर्थकं, आनर्थक्यं, अनर्थकवाक्यं, अनर्थकभाषणं, निरर्थकवाक्यं, अबद्धं, असम्बद्धं, अवध्यं, असम्बद्धवाक्यं, अनिबद्धवाक्यं, असम्बद्धकथा, वृथाकथा, मृषार्थकं, अयाथार्थ्यं, जल्पितं, प्रलपितं, प्रलापः, अनर्थः, अर्थहीनवचनं; 'talking nonsense,' असम्बद्धप्रलापी -पिनी -पि (न्), अनिबद्धप्रलापी &c., अनर्थकवक्ता -क्त्री -क्तृ (क्तृ), जल्पकः -का -कं, जल्पाकः -का -कं, वाचालः -ला -लं, वाचाटः -टा -टं, बहुगर्ह्यवाक् *m.f. n.*

Nonsensical, *a.* अनर्थकः -का -कं, निरर्थकः -का -कं, अनर्थः -र्था -र्थं, अर्थहीनः -ना -नं, अर्थशून्यः -न्या -न्यं, अर्थरहितः -ता -तं, मृषार्थकः &c., वृथार्थकः &c., असम्बद्धः -द्धा -द्धं, असम्बद्धार्थः -र्था -र्थं, अबद्धः &c., अनिबद्धः &c., असङ्गतः -ता -तं, अयथार्थः -र्था -र्थं, अयुक्तिकः -का -कं, अभिधेयरहितः -ता -तं.

Nonsensically, *adv.* निरर्थकं, आनर्थक्यं, असम्बद्धं, वृथा, मृषा.

Nonsensicalness, *s.* अनर्थकता, निरर्थकता, आनर्थक्यं, अर्थहीनता, अर्थाभावः, असङ्गतता, असम्बद्धता, अयाथार्थ्यं, अयुक्तिः *f.*

Non-solution, *s.* अलापनं, अव्याख्या -ख्यानं, अपरिशोधनं, अलापनिका.

Non-suited, *p. p.* अवसन्नः -न्ना -न्नं, अवसादितः -ता -तं, हीनः -ना -नं, अर्थाद्धीनः -ना -नं, हीनवादः -दा -दं, नष्टवादः -दा -दं, हतवादः; 'to be non-suited,' अर्थाद् हा in pass. (हीयते), अवसद् (c. 1. -सीदति -सत्तुं), नष्टवादः -दा -दं भू.

Non-superintendence, *s.* अनधिष्ठानं, अनधिष्ठितिः *f.*, अनधिष्ठातृत्वं, अनधिकारः.

Noodle, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः , जडधीः *m.*

Nook, *s.* कोणः, अस्रः, आरं, विविक्तस्थानं, गुप्तस्थानं.

Noon, noon-day, noon-tide, *s.* मध्याह्नः, मध्याह्नकालः, दिनमध्यं, दिवसमध्यं, दिवामध्यं, मध्यन्दिनं, उह्निनं.

Noon, noon-day, *a.* माध्याह्निकः -की -कं, माध्यन्दिनः -नी -नं.

Noose, *s.* पाशः, पाशबन्धः -न्धं -न्धनं, वागुरा, उन्मायः, कूटपाशः; 'for the neck,' गलपाशः; 'number of nooses,' पाश्या.

To **noose,** *v. a.* पाश (nom. पाशयति -यितुं), पाशीकृ, पाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाशे or उन्माये पत् (c. 10. पातयति -यितुं).

Noosed, *p.p.* पाशितः -ता -तं, पाशीकृतः &c., पाशबद्धः -द्धा -द्धं.

Nor. *adv.* न, न च, sometimes expressed by the prohibitive मा, or sometimes simply by वा in conjunction with a negative. *See* Neither, *conj.*

Normal, *a.* (Regular) वैधिकः -की -कं, यथाविधिः -धिः -धि, यथाक्रमः -मा -मं.—(Relating to rudiments, teaching rudiments) मूलविद्यासम्बन्धी -न्धिनी &c., विद्योपक्रमसम्बन्धी &c., विद्यारम्भोपदेशकः -का -कं, मूलविद्याशिक्षकः -का -कं.

North, *s.* उत्तरा, उत्तरदिक् *f.* (श्), उत्तरदिशा, उत्तराशा, उदीची, कौवेरी, सौम्या. Kuvera, according to the Hindús, is the Regent of the North.

North, *a.* उत्तरः -रा -रं, उत्तरस्थः -स्था -स्थं, उदीचीनः -ना -नं, उदङ् -दीची -दक् (च्), कौवेरः -री -रं: 'north-road,' उत्तरापथः; 'north-country,' उदीच्यः.

North-east, *s.* प्रागुत्तरा, प्रागुदीची, पूर्ब्बोत्तरं -रा, ऐशानी, अपराजिता; 'north-eastwards,' प्रागुत्तरेण, पूर्ब्बोत्तरेण; 'north-east of the city,' प्रागुत्तरेण नगरात्.

North-east, north-easterly, north-eastern, *a.* प्रागुत्तरः -रा -रं, पूर्ब्बोत्तरः -रा -रं, प्रागुदङ् -दीची -दक् (च्), प्रागुदीचीनः -ना -नं, प्रागुत्तरस्थः -स्था -स्थं, पूर्ब्बोत्तरस्थः &c.

Northerly, northern, *a.* उत्तरदिश्यः -श्या -श्यं, उत्तरः -रा -रं, उदीचीनः -ना -नं, उत्तरसम्बन्धी -न्धिनी -न्धि (न्); 'in a northerly direction,' उत्तरदिशि.

North-pole, north-star, *s.* ध्रुवः, मेरुः *m.*, औत्तानपादिः *m.*

Northward, *a.* उत्तरदिश्यः -श्या -श्यं, उत्तरदिक्स्थः -स्था -स्थं, उदङ्मुखः -खी -खं, उत्तरस्थः -स्था -स्थं.

Northwards, *adv.* उत्तरेण -रात्, उत्तरतः, उत्तरदिशि, उत्तरत्र.

North-west. *s.* वायवी, वायुकोणः, वायुदिशा.

North-west, north-westerly, north-western, *a.* वायुकोणस्थः -स्था -स्थं, वायुदिक्स्थः &c., वायवः -वी -वं, वायवीसम्बन्धी -न्धिनी -न्धि (न्).

North-wind, *s.* उत्तरवायुः *m.*, उत्तरदिग्वायुः *m.*, उत्तरदिक्पवनः.

Nose, *s.* नासा -सिका, नसा, नस्या, घ्राणं, घोणा, गन्धवहा, गन्धवाहः, गन्धज्ञा, गन्धनाली, घ्रातिः *f.*, नाः *f.* (स्), नस्तः, नासिक्यं, नासिक्यकं, सिङ्घिनी, विकूणिका, तनुभस्त्रा, नक्रं, नकुटं, नर्कुटकं; 'aquiline nose,' शुकनासिका; 'having a sharp nose,' खरणसः -सा -सं, खरणाः -णाः -णः (स्); 'having a nose like a hoof,' खुरणसः -सा -सं, खुरणाः -णाः -णः (स्); 'having a flat nose,' नतनासिकः -का -कं, अवटीटः -टा -टं, अवनाटः -टा -टं, अवभ्रटः -टा -टं; 'having a prominent nose,' प्रलम्बघोणः -णा -णं; 'having a large nose,' उग्रनासिकः -का -कं; 'tip of the nose,' नासिकाग्रं, नासाग्रं; 'mucus of the nose,' नासिकामलं; 'running at the nose,' नासिकास्रावः, नासापरिस्रावः; 'thickening of the membrane of the nose,' नासानाहः; 'dryness of the nose,' नासाशोषः; 'breathing through the nose,' नासिकन्धमः -मा -मं; 'drinking through the nose,' नासिकन्धयः -यी -यं; 'led by the nose, as cattle, &c. नस्तितः, नस्तोतः, नस्योतः.

Nose-bridle, *s.* (Rein passed through the nose of an ox) नास्यं, नासिकारज्जुः *m.f.*

Nose-cut, *a.* छिन्ननासः -सा -सं, छिन्ननासिकः -का -कं, छिन्ननाः -नाः -नः (स्).

Nosed, *a.* (Having a nose). *See* under Nose.

Nosegay, *s.* कुसुमस्तवकः, पुष्पस्तवकः, पुष्पगुच्छः -च्छकः, गुच्छः -च्छकः, गुत्सः -त्सकः, गुच्छः, गुलुञ्छः, समालो, कुटी, प्रकरः.

Noseless, *a* अनासिकः -का -कं, विनासिकः -का -कं, विनसः -सा -सं, गतनासिकः -का -कं, निर्नासिकः &c., नासिकाहीनः -ना -नं, नासिकाशून्यः -न्या -न्यं, विखः -खा -खं, विखुः -खुः -खु, विख्यः -ख्या -ख्यं, विखुः &c., विख्रुः &c., विग्रः -ग्रा -ग्रं.

Nosology, *s.* रोगनिदानशास्त्रं, निदानविद्या, रोगवर्गकरणविद्या.

Nosopoetic, *a.* रोगकरः -रा -रं, व्याधिजनकः -का -कं, रोगोत्पादकः &c.

Nostril, *s.* नासारन्ध्रं, नासिकारन्ध्रं, नासाग्ररन्ध्रं, नासाविवरं, नासिकाछिद्रं, नासापुटं, नासाबिलं; 'air breathed through the nostrils,' स्वरः.

Nostrum, *s.* गूढौषधं, गुप्तौषधं, अप्रकाशितौषधं, मिथ्यौषधं.

Not, *adv.* In absolute negation, denial, or refusal, 'not' is rendered by न, नो, ना, नहि. When prohibitive, by मा, मास्म, or sometimes by अलं or कृतं with instr. c. When privative, it is expressed by अ, अन्, निर्, वि prefixed; as, 'there is not,' नास्ति; 'he will not go,' न गमिष्यति; 'do not go,' मा गच्छ; 'do not grieve,' अलं शोकेन; 'not regardful,' अनपेक्षः -क्षा -क्षं, निरपेक्षः &c.; 'not at all,' अलेशं, न किञ्चिदपि; 'not so,' नैवं. In prohibitive phrases मा

may be used with the 3d pret., the augment being cut off; as, 'do not grieve' माःशोचीः; 'do not fear,' माःभैषीः. The interrogative 'is not?' is rendered by ननु.

NOTABLE, *a.* (Memorable) स्मरणीयः -या -यं, स्मरणार्हः -र्हा -र्हं.—(Remarkable, distinguished, notorious) विशिष्टः -ष्टा -ष्टं, विशेष in comp., प्रसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., ख्यातः -ता -तं, लोकख्यातः &c., उत्कृष्टः -ष्टा -ष्टं.

NOTABLENESS, *s.* स्मरणीयता, प्रसिद्धता, लोकप्रसिद्धता, विशिष्टता.

NOTABLY, *adv.* प्रसिद्धं, लोकप्रसिद्धं, स्मरणीयं, विशिष्टप्रकारेण.

NOTARY, *s.* कायस्थः, लेखकः, लिपिकारः, लिपिजीवी *m.* (न्), लेख्यपत्रप्रमाता *m.* (तृ), पत्रप्रमाणजीवी.

NOTATION, *s.* अङ्कनं, अङ्ककरणं, चिह्नकरणं.—(In music) प्रस्तरः.

NOTCH, *s.* छेदः, अवच्छेदः, विच्छेदः, छिद्रं; 'of a bow,' अटनी -निः *f.*

To NOTCH, *v. a.* छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, छेदं कृ, अवच्छेदं कृ.

NOTCHED, *p. p.* अवछिन्नः -न्ना -न्नं, छिन्नः &c., सच्छेदः -दा -दं, सावच्छेदः &c.

NOTE, *s.* (Mark, token) चिह्नं, लक्षणं, अङ्कः -ङ्कं, लाञ्छनं, अभिज्ञानं, लक्ष्यं, कलङ्कः.—(Mark made as a memorandum) स्मरणार्थकचिह्नं, स्मरणचिह्नं, स्मरणं.—(Annotation, comment) टीका, भाष्यं, व्याख्या, टिप्पनी, वार्त्तिकं; 'with notes,' सटीकः -का -कं.—(Sound in music) स्वरः, मातृका, मूर्च्छना, कठः, क्वणः, विरिब्धः, विरावः; 'a false note,' अपस्वरः, विस्वरः, अपध्वनः; 'a high note,' तारः; 'a cracked note,' काकस्वरः; 'key note,' वादी *m.* (न्). The notes in music are निषादः or निषदः or निषधः, ऋषभः, गान्धारः, षड्जः, मध्यमः, पञ्चमः, धैवतः, षड्जः.—(Note of birds) रुतं, वाशितं, वाशनं.—(Notice, heed) अवेक्षा -क्षणं, अपेक्षा, मनोयोगः, लक्षं -क्ष्यं.—(Reputation) कीर्त्तिः *f.*, ख्यातिः *f.*, प्रतिष्ठा, यशस् *n.*, गौरवं; 'of little note,' अल्पकीर्त्तिः -र्त्तिः -र्त्ति, अल्पिष्ठकीर्त्तिः &c. *See* NOTED. (Short letter) पत्रकं, पत्रं, लेखः, लेख्यं.—(Note of hand) पत्रलेख्यं.

To NOTE, *v. a.* (Observe) लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, उपलक्ष्, अवेक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, अवेक्षां कृ, आलोक् (c. 10. -लोकयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), आलोच् (c. 10. -लोचयति -यितुं), आलोचनं कृ.—(Set down in writing, make a note of) अङ्क् (c. 10. अङ्कयति -यितुं), चिह्न् (c. 10. चिह्नयति -यितुं), स्मरणार्थकचिह्नं कृ, स्मरणपुस्तके or लेख्यपत्रे समारुह् in caus. (-रोपयति -यितुं) or आरुह्, अभिलिख् (c. 6. -लिखति -लेखितुं).

NOTE-BOOK, *s.* स्मरणपुस्तकं, स्मारकपुस्तकं, अङ्कनपुस्तकं.

NOTED, *p. p.* or *a.* (Observed) लक्षितः -ता -तं, आलक्षितः &c., उपलक्षितः &c., अवेक्षितः &c.—(Set down in writing) लेख्यारूढः -ढा -ढं, लेख्यारोपितः -ता -तं, स्मरणपुस्तकारोपितः &c.—(Celebrated) प्रसिद्धः -द्धा -द्धं, ख्यातः -ता -तं, विख्यातः &c. प्रथितः -ता -तं, विश्रुतः -ता -तं, लब्धशब्दः -ब्दा -ब्दं, लब्धप्रतिष्ठः -ष्ठा -ष्ठं.

NOTHING, *s.* (Not any thing) न किञ्चित्, न किमपि, न किञ्चन.—(Not any thing at all) न किञ्चिदपि, अलेशमपि, न कियदपि, न सूक्ष्ममपि, न स्तोकमपि.—(Non-existence, nonentity) अभावः, नास्तित्वं, नास्ति indec. असत्त्वं, अवस्तु *n.*, अवस्तुता, शून्यता -त्वं, शून्यं, असम्भवः, अविद्यमानता.—(Trifle, thing of no value) अल्पविषयः, स्वल्पविषयः, सुलघुविषयः, अल्पार्थविषयः; 'good for nothing,' व्यर्थः -र्था -र्थं, निरर्थकः -का -कं, किमर्थः -र्था -र्थं, अकिञ्चित्करः -रा -रं.

NOTHING, *adv.* न किञ्चित्, न किमपि, न किञ्चिदपि, न किञ्चन, अलेशमपि, अलेशम्, न कियदपि, न मनागपि, न मनाक्, असूक्ष्ममपि, अस्तोकमपि.

NOTHINGNESS, *s.* शून्यता, शून्यं, अवस्तुत्वं, नास्तित्वं, अभावः. *See* NONENTITY.

NOTICE, *s.* (Observation by the eye or other senses) अवलोकनं, आलोकनं, आलोचनं -ना, निरीक्षा, अवेक्षा -क्षणं, निरूपणं, दर्शनं, सन्दर्शनं, दृष्टिः *f.*, लक्षं.—(Regard, heed) अवेक्षा -क्षणं अपेक्षा, प्रतीक्षा, अवधानं, मनोयोगः, विचारः.—(Intelligence, intimation) सन्देशः, निवेदनं, सूचना -नं, विज्ञप्तिः *f.*, उद्देशः, समुद्देशः -शनं, संवादः, बोधनं, बोधः.—(Mention) अभिधानं, कथनं, ग्रहणं, निर्देशः, उद्देशः.—(Proclamation) घोषः -षणं -णा, विघोषणं -णा, ख्यापनं; 'written notice,' घोषणपत्रं, निवेदनपत्रं, विज्ञापनपत्रं, सूचनपत्रं, बोधनपत्रं, प्रसिद्धिपत्रं.—(Respectful treatment) आदरः, सत्कारः, सत्क्रिया, मानं, सम्मानं, सम्भावना, पूजा, प्रतीतिः *f.*

To NOTICE, *v. a.* (Observe) लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, संलक्ष्, आलोक् (c. 10. -लोकयति -यितुं), अवलोक्, आलोच् (c. 10. -लोचयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, निरीक्ष्, अवेक्षां कृ.—(Heed) अवधा (c. 3. -धत्ते -धातुं), मनो धा, सावधानः -ना -नं भू, अवेक्ष्, अपेक्ष्.—(Mention) अभिधा (c. 3. -दधाति -धातुं), निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, कथ् (c. 10. कथयति -यितुं), निर्देशं कृ, उद्देशं कृ.—(Treat with attention or honor) सत्कृ, सम्मन् (c. 10. -मानयति -यितुं), सम्भू (c. 10. -भावयति -यितुं), आदृ (c. 6. -द्रियते -दर्त्तुं), आदरं कृ.

NOTICEABLE, *a.* लक्ष्यः -क्ष्या -क्ष्यं, लक्षणीयः -या -यं, आलक्ष्यः &c., अवेक्षणीयः &c., प्रतीक्षणीयः &c., प्रतीक्षणार्हः -र्हा -र्हं, निरूपणार्हः &c.

NOTICED, *p. p.* आलक्षितः -ता -तं, अवेक्षितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं.

NOTIFICATION, *s.* घोषणं -णा, विघोषणं -णा, विज्ञापनं -ना, विज्ञप्तिः *f.*, ज्ञप्तिः *f.*, ज्ञापनं, ख्यापनं, निवेदनं, आवेदनं, बोधनं, सूचनं -ना.—(Written notice). *See* under NOTICE.

NOTIFIED, *p. p.* विज्ञप्तः -प्ता -प्तं, विज्ञापितः -ता -तं, ज्ञप्तः &c., ज्ञापितः -ता -तं, निवेदितः &c., घोषितः &c., विघोषितः &c., प्रख्यातः &c., सूचितः &c.

To NOTIFY, *v. a.* ज्ञा in caus. (ज्ञापयति, ज्ञपयति -यितुं), विज्ञा, निविद् (c. 10. -वेदयति -यितुं), आविद्, बुध् (c. 10. बोधयति -यितुं), प्रख्या (c. 2. -ख्याति -तुं), caus. ख्यापयति -यितुं), ख्या सूच् (c. 10. सूचयति -यितुं), घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, कॄत् (c. 10. कीर्त्तयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं).

NOTION, *s.* बुद्धिः *f.*, मतिः *f.*, मनःकल्पना, बुद्धिकल्पना, कल्पना, बुद्धिकल्पितं, सङ्कल्पः, मनोगतं, मनसिजं, वासना, भावना, सम्भावना, बोधः, भासः, आभासः, प्रतिभासः; 'under the notion,' बुद्ध्या.—(Sentiment, opinion) मतं, मतिः *f.*, बुद्धिः *f.*

NOTIONAL, *a.* मनोगतः -ता -तं, मनसिजः -जा -जं, मनोजः &c., मनोभवः -वा -वं, काल्पनिकः -की -कं, मनःकल्पितः -ता -तं, सङ्कल्पजः -जा -जं, मनःसृष्टः -ष्टा -ष्टं.

NOTORIETY, NOTORIOUSNESS, *s.* प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, लोकप्रसिद्धता, प्रसिद्धत्वं, प्रकाशता, प्रकाशः, ख्यातिः *f.*, विख्यातिः *f.*, प्रख्यातिः *f.*, विश्रुतिः *f.*, लोकविश्रुतिः, प्राकट्यं, लौकिकता -त्वं, रूढिः *f.*, प्रथा, सम्प्रथा, प्रथितिः *f.*, सम्प्रतीतिः *f.*—(In a bad sense) वाच्यता, कुकीर्त्तिः *f.*, कुख्यातिः *f.*, कुप्रतिष्ठा, कुप्रसिद्धिः *f.*

NOTORIOUS, *a.* प्रसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., लोकविश्रुतः -ता -तं, लोकप्रथितः -ता -तं, लोकविदितः &c., लोकसिद्धः &c., लौकिकः -की -कं, सार्वलौकिकः &c., ख्यातः -ता -तं, विख्यातः &c., प्रथितः &c., विश्रुतः &c., विज्ञातः &c., रूढः -ढा -ढं, प्रकटः -टी -टं, प्रकटितः -ता -तं.—(In a bad sense) ख्यातगर्हणः -णा -णं, वाच्यः -च्या -च्यं, कुकी-

र्त्तिमान् -मती -मत् (त्), कुख्यातः -ता -तं, कुख्यातिमान् &c., कुप्रसिद्धः &c.; 'a notorious offender,' महापातकी *m.* (न्).

NOTORIOUSLY, *adv.* प्रसिद्धं, लोकप्रसिद्धं, प्रकाशं, प्रकटं, ख्यातगर्हणं.

NOTUS, *s.* (South wind) दक्षिणवायुः, दक्षिणदिग्वायुः *m.*

NOTWITHSTANDING, *conj.* तथापि, परन्तु, परं, किन्तु, अथापि, तत्रापि, तदपि.

NOUGHT. *See* NAUGHT, NOTHING.

NOUN, *s.* नाम *n.* (न्), विशेष्यं, संज्ञा, सत्त्वं, द्रव्यवाचकः, पदार्थवाचकः, आख्या, शब्दः, सङ्केतशब्दः; 'noun of action,' कारकः, क्रिया; 'of agency,' कर्तृवाच्यं; 'animate,' प्राणिवाचकः; 'abstract,' भाववाचकः; 'collective,' समूहवाचकः; 'communicative,' अपादानवाच्यं; 'denominative,' क्रियावाचकः; 'ending in a vowel,' अजन्तः; 'gentile,' जातिवाचकः; 'inanimate,' अप्राणिवाचकः; 'instrumental,' करणवाच्यं; 'inflected, or of any case,' कारकं; 'passive,' कर्मवाचकः, कर्मणिवाच्यशब्दः, सम्प्रदानवाच्यं; 'possessive,' अधिकरणवाच्यं; 'proper,' नामवाचकः; 'simple,' भाववाच्यं, लिङ्गं; 'verbal,' क्रियावाचकः.

To NOURISH, *v. a.* पुष् (c. 10. पोषयति -यितुं, c. 1. पोषति -षितुं, c. 9. पुष्णाति), परिपुष्, पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्तुं), सम्भृ, अन्नेन सन्तुष् (c. 10. -तोषयति -यितुं) or तुष् or सन्तृप् (c. 10. -तर्पयति -यितुं) or तृप् or संवृध् (c. 10. -वर्धयति -यितुं) or बृंह् (c. 10. बृंहयति -यितुं) or आप्यै (c. 10. -प्याययति -यितुं) or जीव् (c. 10. जीवयति -यितुं), पोषणं कृ, पालनं कृ, पालनपोषणं कृ.

NOURISHABLE, *a.* पोषणीयः -या -यं, पोष्यः -ष्या -ष्यं, पालनीयः -या -यं, बृंहणीयः -या -यं, भरणीयः -या -यं, भरण्यः -ण्या -ण्यं, भार्य्यः &c., सम्भार्य्यः &c.

NOURISHED, *p. p.* पुष्टः -ष्टा -ष्टं, पोषितः -ता -तं, पुषितः &c., पालितः &c., प्रतिपालितः &c., भृतः -ता -तं, सम्भृतः &c., भरितः &c., बृंहितः &c.

NOURISHER, *s.* पोष्टा *m.* (ष्टृ), पोषयिता *m.* (तृ), पालयिता *m.*, प्रतिपालयिता *m.*, पालकः, भर्त्ता *m.* (र्त्तृ), पालनकर्त्ता *m.*, अन्नदाता *m.*, बृंहकः, अन्नदः.

NOURISHING, *a.* पोषकः -का -कं, पालकः -का -कं, प्रतिपालकः &c., पौष्टिकः -की -कं, पुष्टिदः -दा -दं, बृंहणः -णा -णी -णं, धातुपोषकः &c.

NOURISHMENT, *s.* (Act of nourishing) पोषः -षणं, पालनं, प्रतिपालनं, भरणं, भरिमा *m.* (न्), भृतिः *f.*, सम्भृतिः *f.*, आप्यायनं, बृंहणं, पुष्टिदानं, अन्नदानं.—(Food, aliment) आहारः, भोजनं, भक्ष्यं, खाद्यं, अन्नं, आहार्य्यं, अभ्याहार्य्यं, अभ्यवहारः, अभ्यवहार्य्यं, शरीरयात्रा, देहयात्रा, जीवनं -नकः, पौष्टिकं, भृतिः *f.*, सम्भृतिः *f.*, सम्भारः.

NOVEL, *a.* नवः -वा -वं, अभिनवः -वा -वं, नवीनः -ना -नं, नूतनः -ना -नं, नूत्नः -त्ना -त्नं, नव्यः -व्या -व्यं, प्रत्यग्रः -ग्रा -ग्रं, अपूर्व्वः -र्व्वा -र्व्वं, अभूतपूर्व्वः &c., अदृष्टपूर्व्वः &c., अश्रुतपूर्व्वः &c., अप्राचीनः -ना -नं, अद्भुतः -ता -तं, अलौकिकः -की -कं, विलक्षणः -णा -णं.

NOVEL, *s.* (Fictitious tale) कल्पितकथा, परिकथा, उपकथा, कथा, उपाख्यानं, आख्यानं, कूटार्थकथा, कूटार्थोपाख्यानं, मिथ्याकथा, प्रबन्धकल्पना.

NOVELTY, *s.* नवता, नवीनता, नूतनता -त्वं, नव्यता, नाव्यं, अभिनवता, प्रत्यग्रता, अपूर्व्वता -त्वं, अद्भुतत्वं, अलौकिकत्वं, विलक्षणता, वैलक्षण्यं.—(A novelty) नववस्तु *n.*, नूतनवस्तु *n.*, कौतुकं, आश्चर्य्यवस्तु.

NOVEMBER, *s.* मार्गशीर्षपूर्व्वार्द्धं, कार्त्तिकोत्तरार्द्धं, मार्गशीर्षः, मार्गशिरः, मार्गः, अग्रहायणः, आग्रहायणः, आग्रहायणिकः, सहाः *m.* (स्), कार्त्तिकः, कार्त्तिकिकः, बाहुलः, ऊर्जः.

NOVENNIAL, *a.* नववर्षीयः -या -यं, नववर्षीणः -णा -णं, नववार्षिकः -की -कं.

NOVERCAL, *a.* वैमात्रिकः -की -कं, वैमात्रीयः -या -यं, विमातृयोग्यः -ग्या -ग्यं.

NOVICE, *s.* नवशिष्यः, नवछात्रः, नूतनशिष्यः, नवीनशिष्यः, प्राथमकल्पिकः, शैक्षः, क्रियाकारः, नवाभ्यासी *m.* (न्), नवीनाभ्यासी *m.*, नूतनाभ्यासी, विद्यारम्भकः.

NOVITIATE, *s.* (State) नवशिष्यत्वं, नवछात्रता -त्वं, नवछात्रदशा, नवाभ्यासित्वं, नूतनाभ्यासित्वं.—(Period of being a novice) नवाभ्यासकालः, नवीनाभ्यासित्वकालः, विद्यारम्भकालः.

NOW, *adv.* (At the present time) इदानीं, अधुना, सम्प्रति, साम्प्रतं, अद्य, एतर्हि, इहसमये, वर्त्तमानकाले, तत्काले, अद्यकाले, साम्प्रतकाले, अधुनातनकाले, प्रस्तुतकाले; 'now and then,' कदाचित्, कदापि, कदाचन, कर्हिचित्, जातु, काले काले, वारं वारं, अनुकालं; 'till now,' अद्यापि, अद्यावधि; 'from now,' अद्यारभ्य, अद्यप्रभृति, इतःपरं; 'just now,' अव्यवहितदीर्घकाले, नूतनकाले; 'it was but now,' नन्विदानीम्.—(As an inceptive or connective particle) अथ, अथो.—(After this) ततस्, अतस्.

NOW-A-DAYS, *adv.* साम्प्रतकाले, अधुनातनकाले, वर्त्तमानकाले, अद्य.

NO WAY, NO WAYS, NO WISE, *adv.* न कथञ्चन, न कथञ्चित्, न कथमपि, न सर्व्वथा, न सर्व्वथैव.

NOWHERE, *adv.* न क्वापि, न कुत्रापि, न क्वचित्, न कुत्रचित्.

NOXIOUS, *a.* हिंस्रः -स्रा -स्रं, हिंसकः -का -कं, हिंसालुः -लुः -लु, हिंसात्मकः -का -कं, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, अनिष्टकारी &c., अहितकारी &c., नृशंसः -सा -सं, शरारुः -रुः -रु, शारुकः -का -कं, दंशेरः -रा -रं, घातुकः -का -कं, उपघातकः &c., नंशुकः &c., अपायजनकः &c., दुष्टः -ष्टा -ष्टं, दूषकः -का -कं, बाधकः -का -कं, कुत्सितः -ता -तं.

NOXIOUSNESS, *s.* हिंस्रता, अपकारकत्वं, दूषकता, दुष्टता, घातुकत्वं.

NOZZLE, *s.* नासाग्रं, नासिकाग्रं, नस्तः, प्रोथः -थं, पोत्रं, मुखं, अग्रं; 'nozzled as an ox,' नस्तितः.

NUBILE, *a.* विवाह्यः -ह्या -ह्यं, विवाहयोग्यः -ग्या -ग्यं, उद्वाह्यः &c.

NUBILOUS, *a.* साभ्रः -भ्रा -भ्रं, अभ्रियः -या -यं, समेघः -घा -घं, मेघाकीर्णः -र्णा -र्णं, मेघाच्छन्नः -न्ना -न्नं, मेघाच्छादितः -ता -तं. *See* CLOUDY.

NUCLEUS, *s.* समुच्चयास्पदं, सञ्चयास्पदं, हृदयं, गर्भः, बीजं.

NUDATION, *s.* नग्नीकरणं, विवस्त्रीकरणं, निर्वस्त्रीकरणं.

NUDE, *a.* नग्नः -ग्ना -ग्नं, विवस्त्रः -स्त्रा -स्त्रं, निर्वस्त्रः &c. *See* NAKED.

To NUDGE, *v. a.* चल् (c. 10. चालयति -यितुं), करांगुलिना तड् (c. 10. ताडयति -यितुं).

NUDITY, *s.* नग्नता -त्वं, विवस्त्रत्वं, वस्त्रशून्यता, अपरिच्छदं. *See* NAKEDNESS.

NUGACITY, *s.* अनर्थकत्वं -ता, मोघता, निष्फलता, लाघवं, लघुता.

NUGATORY, *a.* (Vain) निरर्थकः -का -कं, अनर्थकः -का -कं, तृणप्रायः -या -यं, व्यर्थः -र्था -र्थं.—(Of no force) मोघः -घा -घं, निष्फलः -ला -लं, विफलः &c., फलहीनः -ना -नं, अनिष्पन्नः -न्ना -न्नं, निर्बलः -ला -लं, प्रभावहीनः &c., निष्प्रभावः &c., लुप्तः -प्ता -प्तं, निष्प्रमाणः &c.

NUISANCE, *s.* कष्टं, बाधा, बाधकः, पीडा, व्यथा, विडम्बना, कण्टकः -कं, उत्पातः; 'public nuisance,' लोककण्टकः; 'domestic,' गृहोत्पातः.

NULL, *a.* मोघः -घा -घं, व्यर्थः -र्था -र्थं, अनिष्पन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं, निरर्थकः -का -कं, अनर्थकः -का -कं, निष्फलः -ला -लं, विफलः -ला -लं, निष्प्रभावः -वा -वं, निर्बलः -ला -लं, निर्जीवः -वा -वं, वृथा indec. मुधा indec.

To NULLIFY, *v. a.* मोघीकृ, व्यर्थीकृ, अथरीकृ, निष्फलीकृ, निष्फल (nom. निष्फलयति -यितुं), विफलीकृ, लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोप-

यति -यितुं), खड् (c. 10. खडयति -यितुं), निर्बलीकृ, निष्प्रभावीकृ, मुधा कृ, वृथा कृ.

Nullity, *s.* (Want of force) मोघता, व्यर्थता, निरर्थकता, अनर्थकता, आनर्थक्यं, अनिष्पन्नता, लुप्तता, निष्फलता.—(Nonentity) अभावः, नास्तित्वं, अवस्तु *n.*, शून्यता.

Numb, *a.* सुप्तः -प्ता -प्तं, सुप्तत्वक् *m.f.n.* (च्), जडः -डा -डं, स्तब्धः -ब्धा -ब्धं, स्तब्धचेष्टः -ष्टा -ष्टं, स्तम्भितचेष्टः &c., कुण्ठः -ण्ठा -ण्ठं, गतिशक्तिहीनः -ना -नं, स्पन्दनरहितः -ता -तं, स्तम्भितचेतनः -ना -नं, अचेतनः -ना -नं, चैतन्यरहितः &c.; 'with cold,' शीताकुलः -ला -लं.

To **numb**, *v. a.* जडीकृ, स्तब्धीकृ, चैतन्यं स्तम्भ् (c. 10. स्तम्भयति -यितुं, c. 5. स्तभ्नोति, स्तम्भितुं), चैतन्यस्तम्भं कृ, चेतनास्तम्भनं कृ, चैतन्यं हृ (c. 1. हरति, हर्त्तुं), त्वक्सुप्तिं कृ, शीताकुलीकृ.

Numbed, *p. p.* सुप्तः -प्ता -प्तं, जडीकृतः -ता -तं. *See* **Numb**, *a.*

Number, *s.* संख्या.—(Assemblage of two or more units) राशिः *m.*, संख्या; 'even number,' समसंख्या; 'odd,' विषमसंख्या; 'whole number,' अभिन्नं; 'five in number,' पञ्चसंख्यः -ख्या -ख्यं, पञ्चसंख्यकः -का -कं.—(Amount) संख्या, गणना, परिगणना, समुदायः, परिमाणं.—(Multitude, collection) गणः, समूहः, समवायः, सङ्घः, सङ्घातः, सञ्चयः, वृन्दं, सङ्ग्रहः, स्तोमः, राशिः *m.*, पुञ्जः, पूगः; 'a number of young women,' तरुणीगणः; 'a number of men,' पुरुषसमूहः, पुरुषसमवायः.—(A great number, many) बाहुल्यं, बहुत्वं, बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, बहुसंख्यकः -का -कं, अनेकः &c., प्रचुरः -रा -रं; 'in great number,' बहुशस्, अनेकशस्.—(Figure, arithmetical sign) अङ्कः, संख्या.—(Science of numbers) अङ्कविद्या, गणनाविद्या, गणितं, व्यक्तं; 'table of numbers,' अङ्कपत्रं, अङ्कजालं, सारणी.—(Verse) पद्यं, छन्दस् *n.*, कविता, पद्यरचना.—(In grammar) वचनं; 'singular number,' एकवचनं; 'dual,' द्विवचनं; 'plural,' बहुवचनं, अनेकवचनं.

To **number**, *v. a.* (Count) संख्या (c. 2. -ख्याति -तुं), परिसंख्या, सम्परिख्या, गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्, अङ्क् (c. 10. अङ्कयति -यितुं), कल् (c. 10. कलयति -यितुं), गणनां कृ, गणीकृ.—(Affix a number) अङ्क्, अङ्कं स्था in caus. (स्थापयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

Numbered, *p. p.* संख्यातः -ता -तं, गणितः -ता -तं, अङ्कितः &c., कलितः &c., गणीभूतः -ता -तं, गणीकृतः -ता -तं, परिगणितः &c.

Numberer, *s.* संख्याकृत् *m.*, गणकः, अङ्कगणकः, गणनाकारी *m.* (न्).

Numbering, *s.* गणनं -ना, परिगणनं -ना, संख्यानं, संख्याकरणं, गणितं.

Numberless, *a.* असंख्येयः -या -यं, असंख्यः -ख्या -ख्यं, अगणनीयः -या -यं, अगण्यः -ण्या -ण्यं, असंख्यातः -ता -तं, गणनातीतः -ता -तं, कोट्यवधिः -धिः -धि.

Numbles, *s. pl.* (Entrails of a deer) मृगान्त्रं, मृगान्त्राणि *n. pl.*

Numbness, *s.* त्वक्सुप्तिः *f.*, त्वक्स्वापः, सुप्तिः *f.*, स्वापः, जडता, जाड्यं, चैतन्यस्तम्भः, चेतनास्तम्भः, चैतन्यस्तब्धता, चैतन्यराहित्यं, गतिशक्तिहीनता, कुण्ठता, भिन्नं.

Numerable, *a.* संख्येयः -या -यं, गणनीयः -या -यं, गण्यः -ण्या -ण्यं, गणेयः -या -यं, गणितव्यः -व्या -व्यं, परिगणनीयः -या -यं.

Numeral, *a.* (Pertaining to or consisting of numbers) सांख्यः -ख्यी -ख्यं, संख्यात्मकः -का -कं, संख्याविषयः -या -यं, संख्यासम्बन्धी -न्धिनी &c., संख्यावाचकः &c., गणनासम्बन्धी &c., अङ्की -ङ्किनी &c., अङ्कात्मकः &c.

Numeral, *s.* (Figure) अङ्कः, संख्या, संख्याचिह्नं, गणनाचिह्नं.

Numerally, *adv.* संख्यानुसारात् -रेण, यथासंख्यं, संख्यायात्.

Numerary, *a.* अमुकसंख्यासम्बन्धी -न्धिनी &c., अमुकसंख्यः -ख्या -ख्यं.

Numeration, *s.* संख्यानं, संख्यता, गणना, परिगणना, संख्यापरिमाणं.

Numerator, *s.* (Of a fraction) अंशः, लवः, भागः, हारः, हारकः; 'numerator and denominator together,' राशिः *m.*

Numerical, *a.* सांख्यः -ख्यी -ख्यं, यथासंख्यः -ख्या -ख्यं, संख्यापेक्षकः -का -कं, संख्योद्देशकः -का -कं, संख्यासम्बन्धी &c. *See* **Numeral**, *a.*

Numerically, *adv.* यथासंख्यं, संख्यामपेक्ष्य, संख्यामुद्दिश्य, यथागणनं, गणनां कृत्वा, संख्यां कृत्वा or गणयित्वा.

Numerous, *a.* बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, बहुसंख्यकः -का -कं, बहुसंख्यः -ख्या -ख्यं, महासंख्यः &c., अनेकः -का -कं, प्रचुरः -रा -रं, भूरिः -रिः -रि, भूयिष्ठः -ष्ठा -ष्ठं, भूयान् -यसी -यः (स्), नैकः -का -कं, पुष्कलः -ला -लं, प्राज्यः -ज्या -ज्यं, विपुलः -ला -लं.

Numerously, *adv.* बहुशस्, अनेकशस्, बाहुल्येन, सङ्घशस्.

Numerousness, *s.* बहुत्वं, बाहुल्यं, अनेकत्वं -ता, आनेक्यं, बहुसंख्यत्वं.

Numismatic, *a.* मुद्राविषयः -या -यं, नाणकविषयकः &c., मुद्रासम्बन्धी &c.

Numismatics, *s.* मुद्राविद्या, नाणकविद्या, मुद्राविषयका विद्या.

Numskull, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, अल्पबुद्धिः, जडधीः.

Nun, *s.* मठनिवासिनी, मठवासिनी, संसारत्यागिनी, लोकत्यागिनी, सङ्कल्पत्यागिनी, सन्यासिनी, तपस्विनी, वैरागिणी, तपोनिष्ठा, तपस्यासक्ता, धर्म्मभगिनी, ब्रह्मचारिणी, योगिनी.

Nuncio, *s.* रोमीयधर्म्माध्यक्षसकाशाद् दूतः, महाधर्म्माध्यक्षदूतः.

Nuncupative, Nuncupatory, *a.* साक्षात् कथितः -ता -तं, अलिखितः &c.

Nunnery, *s.* धर्म्मभगिनीमठः, तपस्विनीमठः, ब्रह्मचारिणीमठः.

Nuptial, *a.* वैवाहिकः -की -कं, उद्वाहिकः -का -कं, औद्वाहिकः -की -कं, पाणिग्रहणिकः -की -कं, [illegible]ः -या -यं, विवाही -हिनी -हि (न्), उद्वाही &c., विवाहसम्बन्धी &c., विवाह in comp.; 'nuptial feast,' विवाहमहोत्सवः; 'nuptial gift,' यौतकं, औद्वाहिकं, पारिणाय्यं, हरणं, [illegible] -नं.

Nuptials, *s. pl.* विवाहः, उद्वाहः, परिणयनं, विवाहविधिः *m.*, विवाहक्रिया, विवाहसंस्कारः, पाणिग्रहणं.

Nurse, *s.* धात्री, धात्रेयी -यिका, अङ्कपाली, उपमाता *f.* (तृ), मातृका, प्रतिपालिका, पालयित्री, धन्या, पयुः *f.*—(In sickness) उपचारकर्त्री, उपचारिका, रुग्णपरिचारिका, रोगप्रतिपालिका, रोगसेविका.—(Fosterer, cherisher) पालकः, प्रतिपालकः, पालयिता *m.* (तृ), पोषकः, पोष्टा *m.* (ष्टृ).

To **nurse**, *v. a.* (Foster, take care of a child, &c.) पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, अङ्के पाल्, क्रोडे पाल्, पुष् (c. 1. पोषति, c. 9. पुष्णाति, c. 10. पोषयति -यितुं) or परिपुष्, क्रोडीकृ, अङ्कीकृ.—(Attend upon a sick person) रोगिणम् उपचर् (c. 1. -चरति -रितुं) or परिचर् or पाल् or प्रतिपाल् or सेव् (c. 1. सेवते -वितुं) or उपसेव्.—(Suckle) दुग्धं or स्तन्यं or स्तनं दा (c. 3. ददाति, दातुं) or पा in caus. (पाययति -यितुं) or धे in caus. (धापयति -यितुं), स्तनदानेन or स्तन्यदानेन पुष् or पाल्.—(Nourish, cherish) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, पाल्.

Nursed, *p. p.* पालितः -ता -तं, अङ्के पालितः -ता -तं or प्रतिपालितः &c., पोषितः -ता -तं, पुष्टः -ष्टा -ष्टं, भरितः -ता -तं.—(In sickness, &c.) उपचरितः -ता -तं.

Nursery, *s.* बालस्थानं, बालगृहं, बालकस्थानं, पालनस्थानं, पोषणस्थानं.

Nursery-man, *s.* पुष्पाजीवी *m.* (न्), पुष्पशाकोत्पत्तिजीवी *m.* (न्).

Nursing, *s.* पालनं, अङ्केपालनं, अङ्कपालिका, प्रतिपालनं, पोषणं, भरणं, चुलुम्पः, लालनं, क्रोडीकरणं.—(In sickness, &c.) उपचारः.

Nursling, *s.* स्तनन्धयः -या, स्तनपः -पा -पाः *m.*, स्तनपायी *m.* (न्), बालः.

Nurture, *s.* (Nourishment, food) आहारः, भक्ष्यं, शरीरयात्रा, भृतिः *f.*, सम्भृतिः *f.*, पौष्टिकं.—(Education, bringing up) शिक्षा, उपदेशः, अभ्यासः, पुष्टिः *f.*, पोषः -षणं, पालनं, प्रतिपालनं, भरिमा *m.* (न्).

To nurture, *v. a.* (Nourish) पुष् (c. 10. पोषयति -यितुं), परिपुष्, पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्तुं), पालनं कृ, पोषणं कृ.—(Educate) शिक्ष् (c. 10. शिक्षयति -यितुं), विनी (c. 1. -नयति -नेतुं).

To nustle, *v. a.* अङ्के पाल् (c. 10. पालयति -यितुं), अङ्कीकृ, क्रोडीकृ.

Nut, *s.* खाद्यबीजगर्भम् अण्डाकृति दृढफलं or वनफलबीजं.

Nutant, *a.* प्रणतशिराः -राः -रः (स्), अवनतशिराः &c., नतशिराः &c.

Nut-brown, *a.* पृष्ठीक्तफलवत् श्यावः -वा -वं or श्यामः -मा -मं.

Nut-crackers, *s. pl.* सन्दंशः, सन्दंशकं, सन्दंशका.

Nutmeg, *s.* जातिकोशं, जातिफलं, जातिः -ती *f.*, जातीकोशं, जातीकोषं, जातीफलं, समुद्रान्तं, पुन्नागः, छिद्रात्मकं, लयं, तूलं. *See* Mace.

Nutriment, *s.* (Food) आहारः, भोजनं, पौष्टिकं. *See* Nourishment.

Nutrition, *s.* (Act) पोषणं, पुष्टिः *f.*, पोषः, आप्यायनं. *See* Nourishment.

Nutritious, nutritive, *a.* पौष्टिकः -की -कं, पुष्टिदः -दा -दं, पोषकः -का -कं, धातुपोषकः &c., धातुवर्धकः -का -कं, पुष्टिकरः -री -रं, पुष्टिकारकः -का -कं, पुष्टिजनकः &c., धातुभृत् *m. f. n.*, बलवर्धकः &c., बलवर्धनः -ना -नं, बृंहणः -णा -णी -णं.

Nutshell, *s.* बीजकवचः -चं, बीजकञ्चुकः, बीजपुटः.

Nux-vomica, *s.* (Poisonous fruit) वरखरा.

Nyctalops, *s.* रात्रिदृष्टिः *m. f.*, निशादृष्टिः *m. f.*, रात्रिदृक् *m.* (श्).

Nyctalopy, nyctalopia, *s.* रात्रिदृष्टिः *f.*, निशादृष्टिः *f.*

Nymph, *s.* अप्सराः *f.* (स्), अप्सरा, जलवनदेवता, जलदेवता, वनदेवता, जलदेवी, वनदेवी, जलवनदेवी, नदीदेवता, यक्षिणी, विद्याधरी.—(Beautiful woman, lass) सुन्दरी, मुग्धा, प्रमदा, तन्वङ्गी, कन्या.

Nymph-like, *a.* अप्सरायोग्यः -ग्या -ग्यं, अप्सरस्तुल्यः -ल्या -ल्यं.

Nymphomania, *s.* (A disease) अतिचरणा.

O.

O! *exclam.* (Vocative) भोः, भोस्, भो, भोभो, हे.—(To inferiors) रे, अरे, अरेरे, है, अहो.—(Expressive of surprise, grief, anger, &c.) आ, आः, हा, अहह, अहहा, हन्त, अहो, अहोवत.

Oaf, *s.* स्थूलबुद्धिः *m.*, स्थूलजनः, मन्दबुद्धिः, जडबुद्धिः, मूर्खः, मूढः, बर्बरः.

Oafish, *a.* स्थूलस्वभावः -वा -वं, मन्दस्वभावः &c., अबुद्धिः -द्धिः -द्धि.

Oak, *s.* सिन्दूरः, सिन्दूरवृक्षः, वनवृक्षभेदः, वन्यपादपभेदः, वनराजिः.

Oaken, *s.* सिन्दूरकाष्ठमयः -यी -यं, सिन्दूरवृक्षनिर्म्मितः -ता -तं.

Oakum, *s.* जीर्णरज्जुखण्डः, शणखण्डः, खण्डितरज्जुः *m. f.*, शणसूत्रकं.

Oar, *s.* क्षेपणिः -णी *f.*, क्षिपणिः -णी, क्षपणी, नौकादण्डः, नौदण्डः, अरित्रं, आरित्रं, तरण्डः, तरित्रः.

Oared, *a.* दण्डवान् -वती -वत् (त्), दण्डी -ण्डिनी -ण्डि (न्); 'four-oared,' चतुर्दण्डवान् &c., चतुर्दण्डी &c.

Oarsman, *s.* नौकादण्डधरः -धारी *m.* (न्), नौदण्डचालकः.

Oasis, *s.* मरुभूमिमध्यगतं शाद्वलस्थलं, मरुमध्यस्थं शाद्वलस्थानं.

Oat, *s.* ओट्संज्ञकः शस्यभेदः or धान्यभेदः.

Oaten, *a.* पृष्ठोक्तधान्यमयः -यी -यं, पृष्ठोक्तधान्यचूर्णमयः &c.

Oath, *s.* शपथः, शापः, शपः -पनं, अभिशापः, परिशापः, दिव्यं, सत्यं, समयः, प्रत्ययः, अभीषङ्गः, अभिषङ्गः, परिग्रहः, क्रिया: 'to take an oath,' शप् (c. 1. शपति -ते, c. 4. शप्यति -ते, शप्तुं), अभिशप्, शपथं कृ, शपथं शप्; 'he took an oath,' शपथं शेपे; 'to administer an oath,' शप् (c. 10. शापयति -यितुं); 'made to take an oath,' शापितः -ता -तं; 'with an oath,' सशपथं, शपथपूर्व्वं, शपथपुरःसरं.

Oath-breaking, *s.* शपथभङ्गः, दिव्यभङ्गः, मिथ्याशपथः, मिथ्यादिव्यं.

Oat-meal, *s.* ओट्संज्ञकशस्यचूर्णं, पृष्ठोक्तधान्यक्षोदः.

Obduracy, *s.* स्तब्धचित्तता, चित्तस्तब्धता, स्तब्धता, कठिनचित्तत्वं, चित्तकाठिन्यं, कठिनता, दृढता, दार्ढ्यं, अननुतापशीलता, अनुतापविमुखता, आग्रहः, आग्रहशीलता, पापाग्रहः, पापासक्तिः.

Obdurate, *a.* स्तब्धचित्तः -त्ता -त्तं, कठिनचित्तः &c., दृढचित्तः &c., अननुतापशीलः -ला -लं, अनुतापविमुखः -खा -खं, अनुतापपराङ्मुखः -खा -खं, दुराग्रही -हिणी -हि (न्), पापाग्रही &c., पापासक्ती &c.

Obdurately, *adv.* स्तब्धचित्तत्वात्, कठिनचित्तत्वात्, सकाठिन्यं.

Obedience, *s.* आज्ञानुवर्त्तनं, आज्ञानुसरणं, आज्ञाकरणं, आज्ञापालनं, आज्ञानुवृत्तिः *f.*, आज्ञानुकूलता, आज्ञानुकूल्यं, आज्ञाग्राहित्वं, आज्ञाधारणं, आज्ञाधीनता, आज्ञानुरोधः, आज्ञासेवनं, आदेशकरणं, निदेशकरणं, आज्ञापरता, आज्ञानुविधायिता, वशता, वश्यता, शुश्रूषा -षणं, अनुवर्त्तनं, अनुवृत्तिः *f.*, अनुकूलता, आनुकूल्यं, वशवर्त्तनं, मान्यता, आज्ञामाननं वशीभूतता.

Obedient, *a.* आज्ञानुवर्त्ती -र्त्तिनी -र्त्ति (न्), आज्ञापालकः -का -कं, आज्ञाधीनः -ना -नं, आज्ञानुयायी &c., आज्ञानुसारी &c., आज्ञाकरः -री -रं, आज्ञाकारी &c., आदेशकारी &c., निदेशकारी &c., आदेशकरः &c., वचनकरः &c., वचस्करः &c., आज्ञासेवी &c., आज्ञापरः -रा -रं, अनुशासनपरः &c., वशः -शा -शं, वश्यः -श्या -श्यं, वशवर्त्ती &c., वशानुगः -गा -गं, शुश्रूषुः -षुः -षु, आज्ञावहः -हा -हं, आज्ञावाहकः -का -कं, आज्ञासम्पादकः &c., आज्ञासम्पादी &c., आज्ञाधारी &c., अनुवर्त्ती &c., अनुविधायी &c., विधायी &c., अनुकूलः -ला -लं, सेवी &c., आज्ञाग्राही &c., वचनग्राही &c., निदेशग्राही &c., आश्रवः -वा -वं, अधीनः -ना -नं; 'obedient to a parent,' पितृवाक्यपरः -रा -रं, पितृवचनकरः -रा -रं, पितृवशः -शा -शं, पितृवशानुगः &c.

Obediently, *adv.* शुश्रूषया, सानुवर्त्तनं, आज्ञानुवर्त्तनपूर्व्वं, सानुकूल्यं, आज्ञानुसारेण -रतस्, आज्ञानुवर्त्तनेन, यथादिष्टं, यथादेशं, यथाज्ञं, यथानुज्ञं.

Obeisance, *s.* नमस्कारः, प्रणामः, प्रणतिः *f.*, प्रणिपातः, प्रणिपतनं, नमस् indecl., नमस्या, संनतिः *f.*, नतिः *f.*, नमनं, विनयः, विनीतिः *f.*, उपसङ्ग्रहः; 'from inferiors to superiors,' अञ्जलिः *m.*, अञ्जलिकर्म्म *n.* (न्), अञ्जलिबन्धनं, वन्दनं; 'from a Brahman,' आशीर्वादः; 'from an inferior to a religious preceptor, Guru, &c.,' अभिवादनं, अभिवन्दनं; 'from Hindús of inferior caste,' दण्डवत्; 'to an idol, &c.,' वन्दनं.—(Profound obeisance with all the members of the body) साष्टाङ्गप्रणामः, साष्टाङ्गनमस्कारः, अष्टाङ्गपातः, अष्टाङ्गप्रणामः; 'to make obeisance,' नमस्कृ, प्रणम् (c. 1. -णमति -णन्तुं), शिरसा प्रणम्, कायं प्रणम्, प्रणिपत् (c. 1. -पतति -तितुं), साष्टाङ्गपातं प्रणिपत्; 'having made obeisance,' प्रणम्य.

Obelisk, *s.* सूच्याकारः स्तम्भः, दीर्घप्रस्तरमयः स्तम्भविशेषः.

Oberration, *s.* भ्रमणं -णा, परिभ्रमणं, पर्य्यटनं, इतस्ततो भ्रमणं.

Obese, *a.* मेदस्वी -स्विनी -स्वि (न्), पीनः -ना -नं, पीवरः -रा -रं, स्थूलः -ला -लं, स्थूलकायः -या -यं, मांसलः ला -लं.

Obeseness, obesity, *s.* मेदस्विता, मेदोवृद्धिः *f.*, स्थूलता, पीनता.

To obey, *v. a.* आज्ञाम् or वचनम् अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), यथादिष्टम् अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), यथाज्ञं विधा (c. 3. -दधाति -धातुं) or कृ, श्रु in des. (शुश्रूषते -षितुं), अनुविधा in pass. (-धीयते), अनुरुध् in pass. (-रुध्यते), सेव् (c. 1. सेवते -वितुं), उपसेव्, आज्ञां or

वचनं प्रतीष् (c. 6. -इच्छति -एषितुं) or सम्प्रतीष्, उपचर् (c. 1. -चरति -रितुं), उपाचर्, उपास् (c. 2. -आस्ते -आसितुं), पर्य्युपास्, समुपास्, अभ्युपे (c. 2. अभ्युपैति -तुं, rt. इ), मन् (c. 10. मानयति -यितुं), आज्ञां पाल् (c. 10. पालयति -यितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or प्रतिग्रह् अनुकूल (nom. अनुकूलयति -यितुं), उपजीव् (c. 1. -जीवति -वितुं), आज्ञानुवर्त्तनं कृ.—(Submit to the control of another) परवशीभू, परवशं गम् (c. 1. गच्छति, गन्तुं).

Obeyed, *p. p.* शुश्रूषितः -ता -तं, यथादिष्टम् अनुष्ठितः -ता -तं or विहितः -ता -तं, मानितः -ता -तं, पर्य्युपासितः -ता -तं, सेवितः -ता -तं.

To **obfuscate**, *v. a.* मलिनीकृ, तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, कलुषीकृ, मलिन (nom. मलिनयति -यितुं).

Obfuscated, *p. p.* मलिनीकृतः -ता -तं, तिमिरीकृतः &c., कलुषीकृतः &c.

Obfuscation, *s.* कलुषीकरणं, मलिनीकरणं, निष्प्रभता, सान्धकारता.

Obit, *s.* मृतक्रिया, मृतकर्म्म *n.* (न्), अन्त्यकर्म्म *n.* *See* Obsequies.

Obituary, *s.* (List of the dead) मृतसंख्यापत्रं, मृतपरिसंख्या, मृतनामावलिपत्रं.—(Account of the dead) मृतवर्णनं -ना, मृतचरित्रं, मृतविवरणं.

Object, *s.* (That about which any power or faculty is employed, or by which something is presented to the mind) विषयः, अर्थः, इन्द्रियार्थः, गोचरः, पात्रं, भाजनं, भूमिः *f.*, आस्पदं, स्थानं. The first four of these words refer properly to objects of sense, of which five are given, viz. 'form,' रूपं; 'sound,' शब्दः; 'odour,' गन्धः; 'flavor,' रसः; 'touch,' स्पर्शः. The other words are used elegantly in composition, thus, 'an object of confidence,' विश्वासपात्रं, विश्वासभूमिः *f.*, विश्वासास्पदं, विश्वासस्थानं; 'of affection,' स्नेहभूमिः *f.*, प्रीतिपात्रं; 'of favor,' प्रसादभूमिः *f.*; 'of compassion,' कृपापात्रं, दयाभाजनं; 'of disgrace,' अभिभवास्पदं; 'of blame,' निन्दापात्रं, निन्दाविषयः; 'of praise,' स्तुतिभाजनं; 'of honor,' मानभाजनं; 'of charity or liberality,' दानपात्रं; 'of dispute or litigation,' व्यवहारविषयः, व्यवहारस्थानं; 'of taxation,' शुल्कस्थानं; 'deserving object of charity, &c.,' सुपात्रं, पात्रं; 'undeserving,' कुपात्रं, अपात्रं; 'visible object,' चक्षुर्विषयः.—(Purpose, end, that to which the mind is directed) अभिप्रायः, आशयः, अभिप्रेतं, अर्थः, विषयः, उद्देशः, तात्पर्य्यं, कार्य्यं, कार्य्यवस्तु *n.*, प्रयोजनं, प्रयोगः, अभिसन्धिः *m.*, प्रार्थितं, इष्टं, पदार्थः, लक्षं, लक्ष्यं, हेतुः *m.*, निमित्तं, अग्रभूमिः; 'accomplishment of one's object,' स्वार्थसिद्धिः *f.*, कार्य्यसिद्धिः *f.*, इष्टसिद्धिः *f.*, कृतार्थता, चरितार्थता, इष्टापत्तिः *f.*, आशाप्राप्तिः *f.*; 'one who has accomplished his object,' कृतार्थः -र्था -र्थं, चरितार्थः &c., प्राप्तार्थः &c., कृतकृत्यः -त्या -त्यं, आशाप्राप्तः -प्ता -प्तं; 'I have gained my object,' कृतार्थोऽस्मि, चरितार्थोऽस्मि; 'one's own private object or end,' स्वार्थः, स्वहितं, स्वसाधनं; 'highest object,' परमार्थः; 'important object,' गुर्वर्थः; 'the four objects of human pursuit collectively,' चतुर्वर्गः, चतुर्भद्रं; these are 'virtue,' धर्म्मः; 'wealth,' अर्थः; 'love,' कामः; 'final beatitude,' मोक्षः; 'the three objects without the last,' त्रिवर्गः, त्रिगणं; 'with what object,' किमर्थं, किमुद्दिश्य.—(In grammar) कर्म्म *n.* (न्), कर्म्मपदं.

To **object**, *v. a.* or *n.* बाध् (c. 1. बाधते -धितुं), बाधार्थं हेतुं वद् (c. 1. वदति -दितुं), विरुद्धहेतुं वद्, बाधां कृ, बाधार्थं वचनं वद्, विरुद्धवचनं वद्, अपवद्, विसंवद्, विपरीतं वद्, अधरीकृ, वितण्ड् (c. 1. -तण्डते -ण्डितुं), पर्य्युदस् (c. 4. -अस्यति -असितुं), निरस्, विरोधार्थं वचनं वद्, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, न सम्मन् (c. 4. -मन्यते -मन्तुं), न अनुमन्, न प्रतिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), न अनुमुद् (c. 1. -मोदते -दितुं), न स्वीकृ, अस्वीकारं कृ, असम्मतिं कृ, असम्मतः -ता -तं भू, अननुमोदनं कृ, उद्ग्राहं कृ, परवाक्यं खण्ड् (c. 10. खण्डयति -यितुं), व्याघातं कृ, आपत्तिं कृ.

Objected to, *p. p.* पर्य्युदस्तः -स्ता -स्तं, अपवादितः -ता -तं, अस्वीकृतः -ता -तं.

Objection, *s.* बाधा -धः -धकं, विरुद्धहेतुः *m.*, बाधार्थकहेतुः *m.*, विरोधार्थकहेतुः *m.*, विरुद्धवचनं, उद्ग्राहः, कक्षा, अपवादः, शङ्का, आशङ्का, अपवादः, विपरीतवचनं, वाक्यखण्डनं, वाक्यविरोधः, व्याघातः, प्रतिबन्धः, आपत्तिः *f.*, विप्रतिपत्तिः *f.*, प्रत्यवायः, वितण्डा, आक्षेपः, पर्य्युदासः; 'making an objection,' विरुद्धहेतुवादः, कक्षावादः; 'settling an objection,' समाधिः *m.*, समाधानं.

Objectionable, *a.* बाध्यः -ध्या -ध्यं, बाधनीयः -या -यं, सबाधः -धा -धं, परिहरणीयः -या -यं, परिहार्य्यः -र्य्या -र्य्यं, वर्जनीयः -या -यं, वर्ज्यः -र्ज्या -र्ज्यं, अपवाद्यः -द्या -द्यं, सदोषः -षा -षं, प्रतिषेधार्हः -र्हा -र्हं, निषेधार्हः &c., शङ्कनीयः -या -यं, आशङ्कनीयः &c., प्रतिबन्धार्हः &c.; 'objectionable person or thing,' परिहारः.

Objectionableness, *s.* बाध्यता, सबाधत्वं, बाधः, सदोषता.

Objective, *a.* (Pertaining to the object) स्वाधारस्थितः -ता -तं, स्वाधारनिष्ठः -ष्ठा -ष्ठं, विषयाश्रितः -ता -तं, विषयनिष्ठः &c., पदार्थाश्रितः -ता -तं, विषयसम्बन्धी -न्धिनी &c., पात्रनिष्ठः &c., पात्रसम्बन्धी &c.—(In grammar) कर्म्मपदविषयः -या -यं.

Objector, *s.* बाधकः, विरुद्धहेतुवादी *m.* (न्), कक्षावादी, अपवादकः.

To **objurgate**, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), उपालभ् (c. 1. -लभते -लब्धुं), आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), समाक्रुश्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, आक्षिप्, अधिक्षिप्, धिक्कृ.

Objurgation, *s.* निन्दा, उपालम्भः, तिरस्कारः, भर्त्सनवाक्यं, निर्भर्त्सनं, क्षेपः, अवक्षेपः, धिक्कारः, परीवादः.

Objurgatory, *a.* निन्दकः -का -कं, निन्दार्थकः -का -कं, तिरस्कारार्थकः &c.

Oblation, *s.* (Offering to the gods, &c.) बलिः *m.*, उपहारः, देवोपहारः, उपहरणं, हुतं, हव्यं, होमः, हुतहोमं, आहुतिः *f.*, आहवः -वनं, हवनं, उपायनं, देवोपायनं, कव्यं, निर्वपणं, अवदानं, सत्रं, चरुः *m.*, प्रयागः, इष्टिः *f.*, वैतानं, वितानः -नं, मखः, पात्रीरः, कुण्डपाय्यः.—(Of eatable articles, &c.) नैवेद्यं, निवेदनं.—(Of curds) पृषदाज्यं.—(Of rice-milk and sugar) परमान्नं, पायसः.—(A respectful oblation of rice, &c. with water) अर्घ्यं, अर्घः; 'the presentation of it,' अर्घदानं.—(Oblation to all the deities) वैश्वदेवं, वैश्वदेवकर्म्म *n.*—(To the manes) कव्यं. *See* Manes. (To the gods and manes) हव्यकव्यं; 'dressed oblation,' हव्यपाकः; 'grand and extraordinary oblation,' महाबलिः *m.*, महानैवेद्यं; 'proper for an oblation,' हव्यः -व्या -व्यं; 'to make an oblation to fire,' अनले होमं कृ.

Oblectation, *s.* आनन्दः, आह्लादः, हर्षः, प्रमोदः, मदः.

To **obligate**, *v. a.* बन्ध् (c. 9. बध्नाति, बन्द्धुं), निबन्ध्, बद्धं -द्धां -द्धं कृ, नियमेन बन्ध्, नियमपूर्व्वं or प्रतिज्ञापूर्व्वं, बन्ध्.

Obligation, *s.* (Binding power, as of a vow, promise, debt, &c., incumbency) अवश्यकता -त्वं, आवश्यकता, अवश्यकर्त्तव्यता -त्वं, अवश्यकार्य्यता, कर्त्तव्यता, विधेयता, अवश्यम्भावः, आवश्यं, भारः, ऋणं; 'under the obligation of a debt,' ऋणी -णिनी -णि (न्); 'free from obligation,' अनृणी &c., अवतीर्णर्णः -र्णा -र्णं, उत्तीर्णः

6 Y

&c., ऋणमुक्तः -क्ता -क्तं; 'religious obligation,' व्रतं, यमः, नियमः, विषयः; 'under a religious obligation,' व्रती &c., व्रतस्थः -स्था -स्थं; 'observing or taking on one's self a religious obligation,' व्रताचरणं, व्रतसङ्ग्रहः; 'violating it,' व्रतलोपः -पनं. —(Engagement, compact) नियमः, समयः, प्रतिज्ञा -ज्ञानं, संविद् *f.*, संस्कारः, उपगमः, अभ्युपगमः, अभ्युपायः, सन्धा, सन्धानं, सन्धिः *m.*, संश्रयः.—(Bound state) बद्धता, निबद्धता.—(Favor, any act by which a person becomes bound to another) उपकारः, अनुग्रहः, उपकृतं, सुकृतं, हितं, प्रियं, उपचारः, कृतोपकारः; 'to lay under an obligation,' उपकृ, उपकारेण बद्धं -द्धां कृ, उपकारबद्धं -द्धां कृ.

OBLIGATORY, *a.* अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यः -श्या -श्यं, अवश्यकार्य्यः -र्य्या -र्य्यं, अवश्यमन्तव्यः -व्या -व्यं, अवश्यमाननीयः -या -यं, अवश्यपालनीयः -या -यं.

To OBLIGE, *v. a.* (Constrain, compel). Expressed by the causal form usually in conjunction with बलात् or बलेन or बलात्कारेण; as, 'to oblige a man to do any thing,' बलेन पुरुषं किञ्चित् कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं); 'to oblige to pay,' दा in caus. (दापयति -यितुं); 'to oblige to go,' बलेन गम् (c. 10. गमयति -यितुं); 'he obliged me to take the book,' शास्त्रं मां ग्राहयामास. The root अर्ह is sometimes used in this sense. *See To* COMPEL. (Bind) बन्ध् (c. 9. बध्नाति, बन्द्धुं), निबन्ध्.—(By a compact or agreement) नियमेन or नियमपूर्व्वं or प्रतिज्ञापूर्व्वं बन्ध्.—(By a favor or kindness) उपकारेण बन्ध् or बद्धं -द्धां कृ, उपकारबद्धं -द्धां कृ. —(Favor, do a favor to) अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुग्रहं कृ, अनुरुध् (c. 4. -रुध्यति -ते -रोद्धुं), उपकृ, उपकारं कृ, साहाय्यं कृ, हितं कृ, प्रियं कृ; 'to be obliged.' *See* the next.

OBLIGED, *p. p.* (Compelled) expressed by the pass. part. of the causal form. *See* COMPELLED, CONSTRAINED. (Bound) बद्धः -द्धा -द्धं; 'by a favor,' उपकारबद्धः &c.—(Favored, indebted) अनुगृहीतः -ता -तं, उपकृतः -ता -तं; 'I am obliged to you for your advice,' अनुगृहीतोऽस्मि or अनुगृहीतोऽहं तवोपदेशेन.

OBLIGING, *a.* (Having the disposition to do favors) उपकारशीलः -ला -लं, उपकारी -रिणी -रि (न्), परोपकारी &c., उपकारबुद्धिः -द्धिः -द्धि, अनुग्राही &c., अनुरोधी &c., अनुकूलः -ला -लं, प्रियङ्करः -रा -रं, सुशीलः -ला -लं.

OBLIGINGLY, *adv.* उपकारशीलत्वात्, उपकारबुद्ध्या, सानुग्रहं, अनुग्रहेण, अनुरोधेन, सानुकूल्यं, प्रीत्या, सुशीलवत्, सुशीलत्वात्.

OBLIGINGNESS, *s.* उपकारशीलता, परोपकारशीलता, परोपकारिता, अनुग्रहः, अनुग्रहशीलता, अनुरोधः, अनुकूलता, आनुकूल्यं, सुशीलता.

OBLIQUE, *a.* (Not direct) वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, कुटिलः -ला -लं, जिह्मः -ह्मा -ह्मं, विजिह्मः &c., तिर्य्यङ् -रश्ची -र्यक् (च्), असरलः -ला -लं, अनृजुः -जुः -जु, वक्री -क्रिणी -क्रि (न्), विषमः -मा -मं. —(As language, &c.) वक्रः -क्रा -क्रं, अस्पष्टः -ष्टा -ष्टं, उपरोधी &c.; 'oblique speech,' वक्रोक्तिः *f.*, वक्रभणितं.—(In grammar) कारकविभक्तिकः -का -कं; 'oblique case,' कारकं, कारकविभक्तिः *f.*, कारकं.—(Oblique vision) वक्रदृष्टिः *f.*; 'having it,' वक्रदृष्टिः -ष्टिः -ष्टि, तिर्य्यग्दृष्टिः &c.

OBLIQUELY, *adv.* वक्रं, कुटिलं, तिर्य्यक्, तिरस्, जिह्मं, विजिह्मं, असरलं.

OBLIQUENESS, OBLIQUITY, *s.* वक्रता, कुटिलता, कौटिल्यं, जिह्मता, तिर्य्यक्त्वं, असरलता, असारल्यं, अनृजुता -त्वं, विषमता; 'of vision,' वक्रदृष्टिः *f.*, दृष्टिवक्रता, वक्रदृष्टित्वं, तिर्य्यग्दृष्टित्वं.—(Deviation from moral rectitude) विमार्गगमनं, विपथगमनं, उत्पथगमनं, कुपथगमनं, सत्पथभ्रंशः, सत्पथत्यागः, असदाचारः, व्यभिचारः.

To OBLITERATE, *v. a.* अपमृज् (c. 2. -मार्ष्टि -र्ष्टुं), व्यामृज्, प्रमृज्, अवमृज्, व्यामृश् (c. 6. -मृशति -म्रष्टुं), अवमृश्, व्यामर्षं कृ, अवमर्षणं कृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, विनश् (c. 10. -नाशयति -यितुं), उन्मूल् (c. 10. -मूलयति -यितुं); 'is obliterated from the memory,' विस्मार्य्यते.

OBLITERATED, *p. p.* अपमृष्टः -ष्टा -ष्टं, व्यामृष्टः &c., उन्मृष्टः &c., उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं, वितीर्णः -र्णा -र्णं.

OBLITERATION, *s.* मार्ज्जना, अपमार्ज्जना, व्यामर्षः, अवमर्षणं, लोपः.

OBLIVION, *s.* विस्मृतिः *f.*, विस्मरणं, अस्मृतिः *f.*, अस्मरणं, स्मृतिनाशः, स्मृतिहानिः *f.*, व्यामोहः.—(Remission of offences) दोषविस्मरणं, सकलापराधमोचनं.

OBLIVIOUS, *a.* (Causing forgetfulness) विस्मारकः -का -कं, विस्मृतिजनकः -का -कं, विस्मृतिकारकः &c.—(Forgetful) विस्मरणशीलः -ला -लं.

OBLIVIOUSNESS, *s.* विस्मरणशीलता, विस्मृतिः *f.* *See* FORGETFULNESS.

OBLONG, *a.* आयतः -ता -तं, आयतिमान् -मती -मत् (त्), दीर्घचतुरस्रः -स्रा -स्रं, दीर्घचतुरस्राकारः -रा -रं, दीर्घाकारः &c.

OBLONG, *a.* (The figure) आयतः -तं, दीर्घचतुरस्रः -स्रं.

OBLOQUY, *s.* निन्दा, परीवादः, परिभाषणं, अपवादः, निन्दोक्तिः *f.*, परुषोक्तिः *f.*, दुर्वाक्यं, दुरुक्तं, वाच्यता, तिरस्कारः.

OBMUTESCENCE, *s.* मौनं, अभाषणं, वाक्स्तम्भः, वाग्रोधः, गतवाक्त्वं.

OBNOXIOUS, *a.* (Liable, subject) योग्यः -ग्या -ग्यं, अधीनः -ना -नं, वशः -शा -शं, अर्हः -र्हा -र्हं, उपयुक्तः -क्ता -क्तं, पात्र in comp., आस्पद in comp., विषय in comp., अधिकारी -रिणी &c.; 'obnoxious to punishment,' दण्डयोग्यः &c., दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डनीयः -या -यं, दण्डार्हः -र्हा -र्हं; 'to disease,' रोगाधीनः -ना -नं, रोगपात्रं, रोगास्पदं; 'to death,' मरणाधीनः &c., मरणपात्रं; 'to blame,' निन्दाविषयः -या -यं.—(Odious, offensive) द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, द्वेषी &c., अप्रियः -या -यं, विप्रियः &c., अनिष्टः -ष्टा -ष्टं, असन्तोषकरः -रा -रं, अप्रीतिकरः &c.

OBNOXIOUSLY, *adv.* द्वेषणीयं, अप्रियं, विप्रियं, व्यलीकं, विरुद्धं.

OBNOXIOUSNESS, *s.* (Liability) योग्यता, अधीनता, वशता.—(Odiousness) द्वेष्यता, द्वेषणीयता, अप्रियता, अनिष्टता.

OBSCENE, *a.* अवाच्यः -च्या -च्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, अशुद्धः -द्धा -द्धं, अवचनीयः -या -यं, अनक्षरः -रा -रं, अपवित्रः -त्रा -त्रं, कुत्सितः -ता -तं, बीभत्सः -त्सा -त्सं, दुरुक्तः -क्ता -क्तं, कुवाच्यः -च्या -च्यं; 'obscene word,' अपशब्दः, दुर्वचनं.—(Ill-omened) अशुभः -भा -भं, अमङ्गलः -ला -लं, अभद्रः -द्रा -द्रं, अमङ्गलसूचकः -का -कं.

OBSCENELY, *adv.* अवाच्यं, गर्हितं, गर्हणीयं, अशुद्धं, कुत्सितं.

OBSCENENESS, OBSCENITY, *s.* अवाच्यता, गर्ह्यता, अशुद्धता -त्वं, कुत्सितत्वं, बीभत्सता; 'of language,' दुर्वचनं, दुर्वाक्यं, दुर्भाषणं, दुरुक्तिः *f.*, अपशब्दः.

OBSCURATION, *s.* (Act) कलुषीकरणं, तिमिरीकरणं, मलिनीकरणं, प्रकाशहरणं, कान्तिहरणं.—(State) निष्प्रभता, सान्धकारता, तेजःक्षयः, तेजोहानिः *f.*, प्रभाक्षयः, प्रकाशक्षयः.—(Of a planet) अस्तः -स्तं.

OBSCURE, *a.* (Dark, dim) निष्प्रभः -भा -भं, निःप्रभः &c., अप्रभः &c., मलिनः -ना -नं, मलिनप्रभः &c., निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, अप्रकाशः -शा -शं, सान्धकारः -रा -रं, सतिमिरः -रा -रं, तमस्वी -स्विनी -स्वि (न्), दुर्दर्शः -र्शा -र्शं.—(Not easily understood, not clear) गूढः -ढा -ढं, गूढार्थः -र्था -र्थं, गूढार्थकः -का -कं, निगूढः

-ढा -ढं, दुर्ज्ञेयः -या -यं, दुर्गमः -मा -मं, दुर्बोधः -धा -धं, बोधागम्यः -म्या -म्यं, व्याख्यागम्यः &c., अव्याख्येयः -या -यं, अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, अस्फुटः -टा -टं, गहनार्थः &c., कठिनः -ना -नं.—(Not noted) अप्रसिद्धः -द्धा -द्धं, अख्यातः -ता -तं, अविख्यातः &c., अल्पप्रतिष्ठः -ष्ठा -ष्ठं, अल्पकीर्त्तिः -र्त्तिः -र्त्ति.

To OBSCURE, *v. a.* (Darken) निष्प्रभीकृ, तिमिरीकृ, मलिनीकृ, तिमिर (nom. तिमिरयति -यितुं), मलिन (nom. मलिनयति -यितुं), प्रछद् (c. 10. -छादयति -यितुं), कलुषीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं), प्रकाशं हृ, कान्तिं हृ, प्रभां हृ, प्रकाशरहितं कृ.—(With clouds) मेघावृतं -तां कृ, मेघाछन्नं -न्नां कृ.—(Make difficult to be understood) गूढीकृ, निगूढीकृ, दुर्ज्ञेयं -यां कृ, दुर्गमीकृ, अस्पष्टीकृ.

OBSCURED, *p. p.* तमोवृतः -ता -तं, नष्टप्रभः -भा -भं, मलिनप्रभः &c., हतप्रभः &c., क्षीणप्रभः &c., नष्टप्रकाशः -शा -शं, हतप्रकाशः &c., तमोभूतः -ता -तं, कलुषीकृतः -ता -तं, नष्टतेजाः -जाः -जः (स्), नष्टतेजस्कः -स्का -स्कं, हततेजाः &c., नष्टकान्तिः -न्तिः -न्ति, क्षीणकान्तिः &c., विगततेजाः &c., मलिनितः -ता -तं, मलिनः -ना -नं, क्षततेजाः &c., क्षतप्रभः &c., क्षतकान्तिः &c., क्षतौजाः &c., हतौजाः &c., हतज्योतीः -तीः -तिः (स्), अरोकः -का -कं.

OBSCURELY, *adv.* (Darkly) सान्धकारं, निष्प्रभं, सतिमिरं, अप्रकाशं.—(Not clearly) अस्पष्टं, अव्यक्तं, गूढं, निगूढं, दुर्ज्ञेयं.

OBSCURITY, OBSCURENESS, *s.* (Darkness) निष्प्रभता, सान्धकारता, तिमिरं, तमिस्रं, तमस् *n.*, अन्धकारः, तेजोहीनता, तेजोहानिः *f.*, अप्रकाशत्वं, अल्पप्रकाशः, प्रभाहीनता, प्रभाहानिः *f.*, अवतमसं.—(Darkness of meaning) गूढार्थता, गूढता, निगूढता, दुर्ज्ञेयता, दुर्बोधता, अस्पष्टता, अव्यक्तता -त्वं, गहनता, दुर्गमता, बोधागम्यता, व्याख्यागम्यता, अव्याख्या -ख्यानं.—(State of being unknown to fame) अप्रसिद्धिः *f.*, अप्रसिद्धता, अख्यातिः *f.*, अविख्यातिः *f.*, अल्पप्रतिष्ठा, अल्पकीर्त्तिः *f.*, कीर्त्तिन्यूनता, कीर्त्त्यभावः.

To OBSECRATE, *v. a.* निर्बन्धेन प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), विनयेन प्रार्थ्.

OBSECRATION, *s.* निर्बन्धपूर्व्वं प्रार्थनं or प्रार्थना, विनयेन प्रार्थनं.

OBSEQUIAL, *a.* और्द्ध्वदेहिकः -की -कं, आन्तकर्म्मिकः -की -कं, उत्तरक्रियासम्बन्धी -न्धिनी -न्धि (न्), अन्त्येष्टिसम्बन्धी &c., अन्त्येष्टियोग्यः -ग्या -ग्यं.

OBSEQUIES, *s. pl.* उत्तरक्रिया, उत्तरकर्म्म *n.* (न्), उत्तरकार्य्यं, प्रेतक्रिया, प्रेतकर्म्म *n.*, प्रेतकृत्यं, प्रेतकार्य्यं, प्रेतसंस्कारः, अन्त्यकर्म्म *n.*, अन्त्यक्रिया, अन्तकर्म्म *n.*, अन्त्येष्टिः *f.*, अन्त्येष्टिक्रिया, शावकर्म्म *n.*, मृतकर्म्म *n.*, मृतक्रिया, मृतकार्य्यं, मृतसंस्कारः, अतीतसंस्कारः, और्द्ध्वदेहिकं -कं, मृतसत्क्रिया, अन्तसत्क्रिया, मृतकं, श्राद्धं, श्राद्धादिकर्म्म *n.*, पारलौकिकं, अशुभकर्म्म *n.*, अशुभकार्य्यं. The श्राद्धं consists of obsequial oblations to the manes of deceased ancestors. *See* MANES; 'monthly obsequies,' अन्वाहार्य्यं -र्य्यकं, अनुहार्य्यः, मासिकं.

OBSEQUIOUS, *a.* अत्यनुकूलः -ला -लं, अत्यनुरोधी -धिनी -धि (न्) वशवर्त्ती &c., छन्दोनुवर्त्ती &c., छन्दोनुरोधी &c., अनुवर्त्ती &c., अनुविधायी &c., वशंवदः -दा -दं, वशानुगः -गा -गं, विनतः -ता -तं, नम्रः -म्रा -म्रं, आज्ञाकारी &c.

OBSEQUIOUSLY, *adv.* अत्यनुकूलं, अत्यनुरोधेन, छन्दोनुरोधपूर्व्वं.

OBSEQUIOUSNESS, *s.* अत्यनुकूलता, अत्यानुकूल्यं, अत्यनुरोधः -धनं, छन्दोनुरोधः, छन्दोनुवृत्तिः *f.*, छन्दोनुवर्त्तनं, छन्दोनुवृत्तं.

OBSERVABLE, *a.* दृश्यः -श्या -श्यं, दर्शनीयः -या -यं, दृष्टिगोचरः -रा -रं, लक्ष्यः -क्ष्या -क्ष्यं, आलोकनीयः -या -यं, प्रेक्ष्यः -क्ष्या -क्ष्यं, प्रेक्षणीयः -या -यं.—(That may be practised) व्यवहार्य्यः -र्य्या -र्य्यं, व्यवहर्त्तव्यः -व्या -व्यं.

OBSERVANCE, *s.* (Act of keeping or performing) पालनं, रक्षणं, सेवनं, निषेवनं, धारणं, आचरणं, अनुष्ठानं.—(Practising) आचरणं, अनुष्ठानं, करणं, विधानं, अभ्यासः, निषेवनं.—(Following) अनुसारः, अनुसरणं.—(Custom, practice) व्यवहारः, आचारः, चर्य्या, चरित्रं, रीतिः *f.*—(Religious observance) व्रतं, नियमः, यमः, नियामः, विधिः *m.*, विधानं.—(Respect) आदरः, सत्कारः, मानं.

OBSERVANT, *a.* (Taking notice) निरीक्षकः -का -कं, प्रेक्षकः -का -कं.—(Keeping, practising, following) पालकः -का -कं, निषेवकः -का -कं, अनुष्ठायी -यिनी -यि (न्), धारी &c., अनुसारी &c., आस्थितः -ता -तं, निष्ठितः -ता -तं, आश्रितः -ता -तं.—(Of orders) आज्ञापालकः.—(Of benefits received) कृतवेदी &c., कृतज्ञः -ज्ञा -ज्ञं.

OBSERVATION, *s.* (Act of looking at or taking notice) निरीक्षणं, निरीक्षा, अवेक्षणं, अवेक्षा, अवलोकनं, आलोकनं, आलोचनं, निरूपणं, सन्दर्शनं, दृष्टिः *f.*, लक्ष्यं, लक्षं.—(Result of taking notice) लिखितं, चर्चा. *See* NOTE, NOTICE; 'in one's observation,' प्रत्यक्षे -क्षतम्.

OBSERVATORY, *s.* ताराकुर्य्या, ग्रहनक्षत्रादिदर्शनस्थानं.

To OBSERVE, *v. a.* and *n.* (See, look at) दृश (c. 1. पश्यति, द्रष्टुं), अनुदृश्, प्रतिदृश्, अभिदृश्, परिदृश्, प्रदृश्, सम्प्रदृश्, सन्दृश्, लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, संलक्ष्, उपलक्ष्, समुपलक्ष्, ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, वीक्ष्, प्रेक्ष्, निरीक्ष्, अवेक्ष्, प्रत्यवेक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, उदीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक्, अवलोक्, विलोक्, आलोच् (c. 10. -लोचयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), विलोकनं कृ, अवलोकनं कृ.—(With the intellect) उपलभ् (c. 1. -लभते -लब्धुं), विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), विज्ञप् (c. 10. -ज्ञापयति -यितुं), विभावनं कृ, अनुभू.—(Keep, perform, practise) पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, परिपाल्, अनुपाल्, संपाल्, अभिपाल्, रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, आचर् (c. 1. -चरति -रितुं), समाचर्, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, समास्था, समुपास्था, विधा (c. 3. -दधाति -धातुं), सेव् (c. 1. सेवते -वितुं), निषेव्, उपसेव्, समासेव्; 'observe propriety,' विनयं रक्ष्.—(Utter, make a remark) वाक्यं वद् (c. 1. वदति -दितुं) or प्रवद्, चर्चां कृ.—(Adhere to) आश्रि (c. 1. -श्रयति -यितुं), अवलम्ब् (c. 1. -लम्बते -म्बितुं), उपास् (c. 2. -आस्ते -आसितुं).

OBSERVED, *p. p.* (Noted by the eye) दृष्टः -ष्टा -ष्टं, ईक्षितः -ता -तं, निरीक्षितः -ता -तं, प्रेक्षितः -ता -तं, आलोकितः -ता -तं, आलोचितः -ता -तं, निरूपितः -ता -तं.—(Kept, performed) पालितः -ता -तं, आचरितः &c., अनुष्ठितः &c., सेवितः &c., निषेवितः &c., अनुसृतः &c.

OBSERVER, *s.* (Looker on) प्रेक्षकः, वीक्षकः, प्राश्निकः, द्रष्टा *m.* (ष्टृ), दर्शी *m.* (न्), आलोचकः. *See* OBSERVANT.

OBSERVINGLY, *adv.* सुनिरूपणपूर्व्वं, अवेक्षया, मनोयोगेन, सावधानं.

OBSOLETE, *a.* अव्यवहारितः -ता -तं, निरूढः -ढा -ढं, नैरूढः -ढी -ढं, कालान्तरितः -ता -तं, गतकालिकः -का -कं, लुप्तः -प्ता -प्तं, अप्रचलः -ला -लं, अप्रचलितः -ता -तं, अचलितः -ता -तं, अप्रचरितः -ता -तं, अव्यवहार्य्यः -र्य्या -र्य्यं, अनुपस्थितः -ता -तं, अनुपलब्धः -ब्धा -ब्धं, विकटः -टा -टं.

OBSOLETENESS, *s.* अव्यवहार्य्यता, अव्यवहारितत्वं, लुप्तता, अप्रचलितत्वं, अप्रचारः, लोपः, अनुपस्थितिः *f.*, अनुपलब्धिः *f.*

OBSTACLE, *s.* विघ्नः, अन्तरायः, व्याघातः, प्रत्यूहः, प्रतिबन्धः -न्धकं, रोधः -धनं, अवरोधः, उपरोधः, विरोधः, संरोधः, निरोधः, स्तम्भः -म्भनं, प्रतिष्टम्भः, विष्टम्भः, विघातः -तं, विष्कम्भः, बाधा -धः -धकः, व्यवधानं, विष्कम्भः; 'removal of obstacles,' विघ्नसिद्धिः *f.*, विघातसिद्धिः *f.*

विघ्ननाशः -शनं, विघ्नहरणं; 'causing obstacles,' विघ्नकरः -रा -रं, विघ्नकारी -रिणी -रि (न्).

Obstetric, *a.* प्रसवकर्म्मसम्बन्धी -न्धिनी &c., सूतिकर्म्मसम्बन्धी &c., गर्भमोचनसम्बन्धी &c., गर्भमोचनविषयकः -का -कं, साधकः -धिका -कं.

Obstetrics, *s.* प्रसवकर्म्म *n.* (न्), प्रसवकार्य्यं, गर्भमोचनविद्या.

Obstinacy, obstinateness, *s.* स्तब्धता, स्तब्धिः *f.*, स्तब्धमतित्वं, धैर्य्यं, धीरता -त्वं, निर्बन्धः, दृढता, दार्ढ्यं, कठिनता, काठिन्यं, धृतिः *f.*, जडता, जाड्यं, अवश्यता, अविनयता, स्वैरिता, स्वैरता, प्रतीपता, दुष्टता, आग्रहः, दुराग्रहः, दुर्मदः, अभिनिवेशः, निर्बन्धशीलता, हठः; 'in adhering to belief,' श्रद्धाजाड्यं.

Obstinate, *a.* स्तब्धः -ब्धा -ब्धं, निर्बन्धशीलः -ला -लं, स्तब्धमतिः -तिः -ति, धीरः -रा -रं, दृढः -ढा -ढं, कठिनः -ना -नं, जडः -डा -डं, अवश्यः -श्या -श्यं, अविनेयः -या -यं, दुराग्रही -हिणी -हि (न्), आग्रही &c., स्वैरी &c., स्वैरः -रा -रं, प्रतीपः -पा -पं, दुष्टः -ष्टा -ष्टं.—(Difficult of cure) कृच्छ्रसाध्यः -ध्या -ध्यं, दुःखसाध्यः &c., दुःसाध्यः &c., दुरुपचारः -रा -रं.

Obstinately, *adv.* निर्बन्धेन, सनिर्बन्धं, धैर्य्येण, सधैर्य्यं, सदार्ढ्यं, सजाड्यं, सकाठिन्यं, दुराग्रहेण, प्रतीपवत्, स्वैरवत्, दुष्टवत्.

Obstipation, *s.* मलावरोधः, मलावष्टम्भः, मलस्तम्भः, मलस्तब्धिः *f.*

Obstreperous, *a.* (Vociferous) उच्चैःस्वरकारी -रिणी -रि (न्), तुमुलकारी &c., बहुघोषः -षा -षं, कोलाहलकारी &c.—(Perverse) प्रतीपः -पा -पं.

Obstreperously, *adv.* उच्चैःस्वरेण, बहुघोषेण, कोलाहलेन, सकोलाहलं.

Obstreperousness, *s.* घोषवत्त्वं, बहुघोषत्वं, तुमुलकारित्वं, प्रतीपता.

To obstruct, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, उपरुध्, विरुध्, संरुध्, स्तम्भ् (c. 10. स्तम्भयति -यितुं, c. 9. स्तभ्नाति, स्तम्भितुं), विष्टम्भ्, प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), बाध् (c. 1. बाधते -धितुं), विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, विघ्न (nom. विघ्नयति -यितुं), वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, आवृ, समावृ, प्रतिवृ, प्रतिषिध् (c. 1. -षेधति -षेद्धुं), रोधं कृ, अवरोधं कृ, गतिरोधं कृ, प्रतिबन्धं कृ, निराकृ.

Obstructed, *p. p.* रुद्धः -द्धा -द्धं, प्रतिरुद्धः &c., विरुद्धः &c., निरुद्धः &c., उपरुद्धः &c., स्तम्भितः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः &c., प्रतिबद्धः &c., विहतः -ता -तं, प्रतिहतः -ता -तं, पराहतः -ता -तं, बाधितः -ता -तं, विघ्नितः -ता -तं, वारितः -ता -तं, निवारितः -ता -तं, अन्तरितः -ता -तं, सार्गलः -ला -लं.

Obstructer, *s.* विघ्नकारी *m.* (न्), रोधकः, अवरोधकः, प्रतिबन्धकः, बाधकः.

Obstruction, (Act) रोधः -धनं, स्तम्भनं, प्रतिबन्धनं, विघ्नकरणं, वारणं, आवरणं.—(Impediment) विघ्नः, रोधः, प्रतिरोधः, उपरोधः, संरोधः, निरोधः, प्रतिबन्धः, स्तम्भः, विष्टम्भः, प्रतिष्टम्भः, हेतुः. *See* Obstacle, Hinderance. (In any organ of the body) नाहः, आनाहः, अवरोधः, निबन्धः.

Obstructive, obstructing, obstruent, *a.* विघ्नकारी -रिणी &c., विघ्नकरः -री -रं, प्रतिरोधी &c., विरोधी &c., रोधकः -का -कं, अवरोधकः &c., प्रतिरोधकः &c., विघाती &c., व्याघातकः -का -कं, विष्टम्भी &c., औपरोधिकः -की -कं, वारकः -का -कं, निवारकः &c., निराकरिष्णुः -ष्णुः -ष्णु, क्षिप्नुः -प्नुः -प्नु, व्याघातजनकः -का -कं, बाधकः -का -कं, प्रतिबाधकः -का -कं, विघ्नजनकः &c., प्रतिबन्धकारी &c., प्रतिबन्धकः &c.

To obtain, *v. a.* आप् (c. 5. आप्नोति, आप्तुं), प्राप्, सम्प्राप्, अवाप्, समवाप्, समाप्, लभ् (c. 1. लभते, लब्धुं), उपलभ्, अर्ज् (c. 10. अर्जयति -यितुं, c. 1. अर्जति -र्जितुं), उपार्ज्, आसद् (c. 10. -सादयति -यितुं), समासद्, अधिगम् (c. 1. -गच्छति -गन्तुं), गम्, सम्पद् (c. 10. -पादयति -यितुं), प्रतिपद् (c. 4. -पद्यते -ति -पत्तुं), आपद्, अभिपद्, समापद्, इ (c. 2. एति -तुं), अभी, ऋछ् (c. 1. ऋच्छति, अर्त्तुं), विद् (c. 6. विन्दति, वेत्तुं, वेदितुं), अभिविद्, प्रतिविद्, आविश् (c. 6. -विशति -वेष्टुं), समाविश्, अश् (c. 5. अश्नुते, अशितुं), समश्, उपाश्, स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).

To obtain, *v. n.* (Be in use, be established) प्रचलीभू, प्रचलितः -ता -तं भू, प्रचर् (c. 1. -चरति -रितुं), प्रचल् (c. 1. -चलति -लितुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), स्थापितः -ता -तं भू, प्रसिद्धीभू, प्रचलीभू, प्रभू, संस्था (c. 1. -तिष्ठति -स्थातुं).

Obtainable, *a.* प्राप्यः -प्या -प्यं, प्रापणीयः -या -यं, प्राप्तव्यः -व्या -व्यं, लभ्यः -भ्या -भ्यं, उपलभ्यः &c., आसादनीयः -या -यं, आसाद्यः -द्या -द्यं, समासाद्यः &c., अधिगम्यः -म्या -म्यं, अधिगमनीयः -या -यं, अधिगन्तव्यः -व्या -व्यं; 'easily obtainable,' सुलभः -भा -भं, सुप्राप्यः -प्या -प्यं, सुसाध्यः -ध्या -ध्यं; 'difficultly,' दुर्लभः &c., दुःप्राप्यः &c., दुष्प्राप्यः &c., दुःखलभ्यः &c., दुष्प्रापः -पा -पं, दुरापः -पा -पं; 'with exertion,' यत्नलभ्यः &c.

Obtained, *p. p.* प्राप्तः -प्ता -प्तं, आप्तः &c., अवाप्तः &c., लब्धः -ब्धा -ब्धं, उपलब्धः &c., अर्जितः -ता -तं, उपार्जितः -ता -तं, आसादितः -ता -तं, समासादितः -ता -तं, अधिगतः -ता -तं, आपन्नः -न्ना -न्नं, विन्नः -न्ना -न्नं, भावितः -ता -तं, भूतः -ता -तं, लम्भितः -ता -तं, सम्पन्नः &c., सम्पादितः -ता -तं, अभिरम्भितः -ता -तं.

Obtainer, *s.* प्रापकः, लब्धा *m.* (ब्धृ), उपार्जकः, सम्पादकः.

Obtainment, *s.* प्राप्तिः *f.*, सम्प्राप्तिः *f.*, आप्तिः *f.*, प्रापणं, आपत्तिः *f.*, लब्धिः *f.*, लाभः, आसादनं, समासादनं, अर्जनं, उपार्जनं, प्रतिपत्तिः *f.*, सम्पादनं, अधिगमः.

To obtest, *v. a.* विनयेन प्रार्थ् (c. 10. प्रार्थयति -यितुं) or याच् (c. 1. याचति -चितुं).

Obtestation, *s.* अञ्जलिकर्म्मपूर्व्वं प्रार्थनं, विनयेन प्रार्थनं, अभ्यर्थना.

To obtrude, *v. a.* धर्षेण or बलेन or परानिच्छया प्रविश् (c. 10. -वेशयति -यितुं) or प्रसृ (c. 10. -सारयति -यितुं) or अनधिकारपूर्व्वं प्रविश्.—(Urge upon another with unreasonable importunity) अतिनिर्बन्धेन अनिच्छन्तं जनं किञ्चिद् ग्रह् (c. 10. ग्राहयति -यितुं), अतिनिर्बन्धपूर्व्वम् उपस्था in caus. (-स्थापयति -यितुं) or उपहृ (c. 1. -हरति -हर्त्तुं) or प्रदा.

To obtrude, *v. n.* धर्षेण or बलेन or परानिच्छया प्रविश् (c. 6. -विशति -वेष्टुं), अनाहूतः प्रविश् or आविश् or आगम् (c. 1. -गच्छति -गन्तुं) or आक्रम् (c. 1. -क्रामति -क्रमितुं) or अभिक्रम्.

Obtruded, *p. p.* धर्षेण or परानिच्छया प्रवेशितः -ता -तं or प्रसारितः &c.

Obtrusion, *s.* धर्षेण or परानिच्छया प्रवेशः -शनं, अनधिकारपूर्व्वं प्रवेशनं, अनाहूतप्रवेशनं, अनाहूतागमनं.

Obtrusive, *a.* परानिच्छया प्रवेशकः -का -कं, धृष्टः -ष्टा -ष्टं.

To obtund, *v. a.* घनीकृ, अतीक्ष्णीकृ, अतीव्रीकृ, स्थूलीकृ, जडीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं), विरुग्नीकृ, तेजोहीनं -नां कृ.

Obtuse, *a.* (Blunt, not acute) अतीक्ष्णः -क्ष्णा -क्ष्णं, अतीव्रः -व्रा -व्रं, अनग्रः -ग्रा -ग्रं, निरग्रः &c., अप्रखरः -रा -रं, धाराहीनः -ना -नं, तेजोहीनः &c., घनः -ना -नं, स्थूलः -ला -लं, निस्तेजाः -जाः -जः (स्); 'obtuse angle,' वहिर्लम्बकोणः.—(Dull, stupid) जडः -डा -डं, मन्दः -न्दा -न्दं, स्थूलः -ला -लं, मूढः -ढा -ढं, मन्दबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, मन्दमतिः -तिः -ति, जडमतिः &c., अविदग्धः -ग्धा -ग्धं.

Obtuse-angled, obtuse-angular, *a.* वहिर्लम्बः -म्बा -म्बं, वहिर्लम्बकोणः -णा -णं.

Obtusely, *adv.* अतीक्ष्णं, अतीव्रं, अप्रखरं, स्थूलवत्, जाड्येन, सजाड्यं, जडवत्.

OBTUSENESS, *s.* (Bluntness) अतीक्ष्णता, अतीव्रता, निरग्रता, धाराहीनता, तेजोहीनता, घनता, स्थूलता.—(Of intellect) जडता, जाड्यं, स्थूलता, स्थूलबुद्धित्वं, मूढता, मन्दता, मन्दमतित्वं, बुद्धिमान्द्यं, अविदग्धता.

To OBUMBRATE, *v. a.* प्रछद् (c. 10. -छादयति -यितुं), तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, छायां कृ. *See To* OBSCURE.

To OBVIATE, *v. a.* वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, प्रतिवृ, आवृ, रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, विरुध्, अवरुध्, प्रतिरुध्, उपरुध्, निवृत् (c. 10. -वर्त्तयति -यितुं), विछिद् (c. 7. -छिनत्ति -छेत्तुं), परिछिद्, बाध् (c. 1. बाधते -धितुं), प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, निरस् (c. 4. -अस्यति -असितुं), परिहृ (c. 1. -हरति -हर्त्तुं).

OBVIATED, *p. p.* वारितः -ता -तं, निवारितः -ता -तं, रुद्धः -द्धा -द्धं, अवरुद्धः &c., बाधितः -ता -तं, परिहृतः &c., अपहृतः &c., निवृत्तः -त्ता -त्तं.

OBVIOUS, *a.* स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, व्यक्तः -क्ता -क्तं, सुव्यक्तः &c., सुस्पष्टः &c., प्रव्यक्तः &c., अभिव्यक्तः &c., भिन्नार्थः &c., प्रकाशः -शा -शं, सुप्रकाशः &c., सुग्राह्यः -ह्या -ह्यं, स्फुटः -टा -टं, सुज्ञेयः -या -यं, सुगमः -मा -मं, सुगोचरः -रा -रं.—(To the eye) दृष्टिगोचरः -रा -रं, नयनगोचरः &c., दृष्टः -ष्टा -ष्टं, सुदर्शः -र्शा -र्शं, सुलक्ष्यः &c., समक्षः -क्षी -क्षं, प्रत्यक्षः -क्षा -क्षं; 'obvious danger,' दृष्टं.

OBVIOUSLY, *adv.* स्पष्टं, सुस्पष्टं, स्पष्टार्थतस्, व्यक्तं, सुव्यक्तं, प्रकाशं, सुप्रकाशं, प्रत्यक्षतस् -क्षेण, साक्षात्, स्फुटं, प्रादुस्.

OBVIOUSNESS, *s.* स्पष्टता, सुस्पष्टता, व्यक्तता, सुव्यक्तता -त्वं, स्पष्टार्थता -त्वं, सुग्राह्यता, सुज्ञेयता, सुगमता, प्रत्यक्षता, प्रकाशता, सुप्रकाशता, स्फुटता, सुगोचरता, सुलक्ष्यता.

OCCASION, *s.* (Opportunity, favorable season) अवसरः, अवकाशः, समयः, प्रस्तावः, प्रसङ्गः, प्रसरः, कालः, कालयोगः, कार्य्यकालः, वारः, सन्धिः *m.*, कालसन्धिः *m.*, सन्धिवेला, वेला, स्थानं; 'according to the occasion,' यथावसरं, यथावकाशं, यथाप्रसङ्गं, प्रसङ्गवशात्; 'suitable to the occasion,' प्रस्तावसदृशः -शी -शं, प्रास्ताविकः -की -कं, प्रस्तावयोग्यः -ग्या -ग्यं; 'on this particular occasion,' इह समये.—(Incident, event) वृत्तं, भूतं, सम्भवः, मङ्गतं, सङ्गतिः *f.*, समुपागतं, समुपस्थितं, घटना -नं; 'as occasion may be,' यथासम्भवं.—(Need) प्रयोजनं, प्रयोगः, प्रयुक्तिः *f.*, उपयोगः -गिता, कार्य्यं, कारणं; 'there is no occasion for me,' मया न प्रयोजनं; 'there is occasion for a straw,' तृणेन प्रयोजनं or कार्य्यं.—(Accidental cause) प्रयोजनं, हेतुः *m.*, कारणं, निमित्तं, उपाधिः *m.*

To OCCASION, *v. a.* उत्पद् (c. 10. -पादयति -यितुं), समुत्पद्, उपपद्, सम्पद्, जन् (c. 10. जनयति -यितुं), सञ्जन्, साध् (c. 10. साधयति -यितुं), भू (c. 10. भावयति -यितुं), उद्भू, कृ, निमित्त (nom. निमित्तायते), कारणीभू, निमित्तीभू.

OCCASIONAL, *a.* (Occurring at times, but not regular) कादाचित्कः -त्की -त्कं, अनियतः -ता -तं, विरलागतः -ता -तं, विरलः -ला -लं, अनुकालः -ला -लं, क्वाचित्कः -त्की -त्कं, कार्हिचित्कः &c., अनियतः -ता -तं, आगन्तुकः -का -कं, अनियतकारणकः -का -कं.—(Produced or occurring on some special occasion) नैमित्तिकः -की -कं, प्रासङ्गिकः -की -कं, प्रास्ताविकः -की -कं, सामयिकः &c., प्रसङ्गप्राप्तः -प्ता -प्तं, प्रसङ्गोत्पन्नः -न्ना -न्नं, प्रसङ्गागतः -ता -तं, प्रसङ्गोपस्थितः -ता -तं, प्रसङ्गकारणकः -का -कं.

OCCASIONALLY, *adv.* (From time to time) कदाचित्, कदापि, कदाचन, कर्हिचित्, काले काले, वारं वारं, जातु, अनुकालं, अनुवेलं.—(According to the exigence) यथाप्रसङ्गं, यथावसरं, प्रसङ्गानुसारेण, प्रसङ्गानुरूपेण, प्रसङ्गवशात्.

OCCASIONED, *p. p.* उत्पादितः -ता -तं, उत्पन्नः -न्ना -न्नं, जनितः -ता -तं, जातः -ता -तं, प्रयुक्तः -क्ता -क्तं, प्रयोजितः -ता -तं, उद्भवः -वा -वं, प्रभवः -वा -वं, प्रवृत्तः -त्ता -त्तं, उदितः -ता -तं, समुदितः -ता -तं, निमित्तकः -का -कं, हेतुकः -का -कं, कर्तृकः -का -कं; 'misery occasioned by crime,' पापप्रयुक्तं दुःखं, पापनिमित्तकं दुःखं; 'fever occasioned by fasting,' उपवासप्रयुक्तो ज्वरः.

OCCIDENT, *s.* पश्चिमदिक् *m.* (श्), पश्चिमदिशा, पश्चिमा, प्रतीची.

OCCIDENTAL, *a.* पश्चिमः -मा -मं, प्रतीचीनः -ना -नं, प्रत्यङ् -तीची -त्यक् (च्).

OCCIPUT, *s.* मस्तकपृष्ठं, शिरःपृष्ठं, मस्तकस्य पश्चाद्भागः.

OCCULT, *a.* गूढः -ढा -ढं, गूढार्थः -र्था -र्थं, गूढार्थकः -का -कं, निगूढः -ढा -ढं, गुप्तः -प्ता -प्तं, गुह्यः -ह्या -ह्यं, निभृतः -ता -तं, दुर्ज्ञेयः -या -यं, अज्ञातः -ता -तं, अविदितः -ता -तं, अप्रसिद्धः -द्धा -द्धं, अगम्यः -म्या -म्यं, दुर्गम्यः &c.

OCCULTATION, *s.* (In astronomy) समागमः.

OCCULTNESS, *s.* गूढता, गुप्तता, निगूढता, गुह्यता, दुर्ज्ञेयता, अप्रसिद्धिः *f.*

OCCUPANCY, *s.* अधिकारः, अधिकृतिः *f.*, आधिकारत्वं, भोगः, परिभोगः, भुक्तिः *f.*, आवेशः -शनं, समावेशः, आक्रमणं.

OCCUPANT, *s.* अधिकारी *m.* (न्), भोक्ता *m.* (क्तृ), परिभोक्ता *m.*, भोगी *m.* (न्), परिभोगी *m.*, शाली *m.* (न्), भोगकारी *m.* (न्).

OCCUPATION, *s.* (Act of taking possession) परिग्रहः -हणं, आवेशनं, समावेशनं, आक्रमणं, अधिकारकरणं, भोगकरणं, अधिवासः -सनं, अधिष्ठानं.—(Possession). *See* OCCUPANCY. (Employment, business) व्यापारः, कार्य्यं, कर्म्म *n.* (न्), व्यवसायः, व्यवहारः, उद्योगः, उद्यमः, प्रवृत्तिः *f.*, प्रवर्त्तनं, वृत्तिः *f.*, कार्य्योद्योगः, कर्म्मोद्योगः, चरितं, व्यवस्था; 'daily or settled occupation,' नियतकर्म्म *n.*, नियतकृत्यं.—(Something to be done) कर्त्तव्यं, कार्य्यं, करणीयं, कृत्यं, 'customary morning occupations,' प्रभातकरणीयानि.—(Vocation, trade, profession) वृत्तिः *f.*, वर्त्तनं, जीवनवृत्तिः *f.*, जीविका, उपजीविका, उपजीवनं, जीवनोपायः, आजीवनार्थं.—(Office, appointed duty) नियोगः, नियुक्तिः *f.*, स्वकर्म्म *n.*, स्वधर्म्मः, प्रकरणं; 'appropriated occupation,' अपदानं, अवदानं.

OCCUPIED, *p. p.* (Possessed, tenanted) भुक्तः -क्ता -क्तं, परिभुक्तः &c., आविष्टः -ष्टा -ष्टं, समाविष्टः &c., अध्युषितः -ता -तं, अध्यासितः -ता -तं, अधिष्ठितः -ता -तं, आश्रितः -ता -तं, अधिगतः -ता -तं.—(Employed, engaged) व्यापृतः -ता -तं, व्यापारी -रिणी -रि (न्), व्यवसायी &c., प्रवृत्तः -त्ता -त्तं, सव्यापारः -रा -रं, कर्म्मनिष्ठः -ष्ठा -ष्ठं, कर्म्मरतः -ता -तं, कर्म्मी &c., कर्म्मोद्युक्तः -क्ता -क्तं, कार्य्यवान् -वती -वत् (त्), क्रियावान् &c.; 'in reading,' अध्ययनरतः &c. *See* ENGAGED; 'to be occupied,' व्यापृ in pass. (-प्रियते) with loc. c., वृत् (c. 1. वर्त्तते -र्त्तितुं) with loc. c.; 'he is occupied in the affairs of others,' परकार्य्येषु व्याप्रियते; 'in penance,' तपसि व्याप्रियते.

OCCUPIER, *s.* *See* OCCUPANT, *s.*

To OCCUPY, *v. a.* (Take possession) आविश् (c. 6. -विशति -वेष्टुं), प्रथमभोगं कृ, आक्रम् (c. 1. -क्रामति -क्रमितुं), अध्याक्रम्.—(Possess, hold) धृ (c. 10. धारयति -यितुं), भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उपभुज्, परिभुज्, धा (c. 3. धत्ते, धातुं), शील् (c. 10. शीलयति -यितुं), भोगं कृ, परिभोगं कृ.—(Take up, pervade) व्याप् (c. 5. -आप्नोति -आप्तुं), पॄ (c. 10. पूरयति -यितुं), व्यतिक्रम्.—(Tenant) अध्यास् (c. 2. -आस्ते -आसितुं), समध्यास्, अधिवस् (c. 1. -वसति -वस्तुं), अध्यावस्, आश्रि (c. 1. -श्रयति -ते -यितुं), अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), वासं कृ.—

(Employ) व्यापृ (c. 10. -पारयति -यितुं), प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रयुज् (c. 7. -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), उपयुज्, कार्य्ये नियुज्. —(Occupy one's self) व्यापृ in pass. (-प्रियते), व्यापृतः -ता -तं भू or अस्; 'do not occupy yourself with the affairs of others,' मा परकार्य्येषु व्यापृतो भूः.

To OCCUPY, *v. n.* व्यापारं कृ, व्यवसायं कृ, व्यवहारं कृ, वाणिज्यं कृ.

To OCCUR, *v. n.* (Meet, come to) उपस्था (c. 1. -तिष्ठति -स्थातुं), समुपस्था, आगम् (c. 1. -गच्छति -गन्तुं), उपागम्, समुपागम्.—(Arise, be found) उत्पद् (c. 4. -पद्यते -पत्तुं), विद् in pass. (विद्यते), जन् in pass. (जायते), वृत् (c. 1. वर्त्तते -र्त्तितुं), संवृत्.—(Take place, happen) घट् (c. 1. घटते -टितुं), सम्पद्, समापद्, उपपद्, उपस्था, उपस्थितः -ता -तं भू, आपत् (c. 1. -पतति -तितुं), निपत्, सम्भू, भू.—(Suggest itself to the mind) स्फुर् (c. 6. स्फुरति -रितुं).

OCCURRED, *p. p.* उपस्थितः -ता -तं, समुपस्थितः &c., उपागतः -ता -तं, समुपागतः &c., आगतः -ता -तं, उत्पन्नः -न्ना -न्नं, समुत्पन्नः &c., वृत्तः -त्ता -त्तं, संवृत्तः &c., घटितः -ता -तं, सम्भूतः &c.

OCCURRENCE, *s.* वृत्तं, उत्पन्नं, समुत्पन्नं, उत्पत्तिः *f.*, समुत्पत्तिः *f.*, उपागतं, उपागमः, समुपागतं, उपस्थितं, समुपस्थितं, सङ्गतं, सङ्गतिः *f.*, सम्भवः, भूतं, सम्भूतं, घटना -नं, समुदयः, उपस्थानं, उपस्थितिः *f.*; 'of rare occurrence,' चिरलागतः -ता -तं, दुर्लभः -भा -भं, चिरचेष्टितः -ता -तं, चिरलब्धः -ब्धा -ब्धं.

OCEAN, *s.* समुद्रः, अर्णवः, महार्णवः, सागरः, महासागरः, जलनिधिः *m.*, उदधिः *m.*, महोदधिः *m.*, पयोनिधिः *m.*, जलधिः *m.*, अब्धिः *m.*, अम्बुधिः *m.*, तोयनिधिः *m.*, तोयधिः *m.*, पाथोधिः *m.*, वारिधिः *m.*, वारिनिधिः *m.*, धारान्निधिः *m.*, वार्द्धिः *m.*, अपान्निधिः *m.*, कीलालधिः *m.*, सलिलनिधिः *m.*, पयोधिः *m.*, पयोधाः *m.* (स्), अम्भोधिः *m.*, अम्भोनिधिः *m.*, नीरधिः *m.*, नीरनिधिः *m.*, अम्बुराशिः *m.*, अम्भोराशिः *m.*, वारिराशिः *m.*, नदीपतिः *m.*, सरित्पतिः *m.*, अपान्नाथः, सिन्धुनाथः, जलपतिः *m.*, यादःपतिः *m.*, यादसाम्पतिः *m.*, सिन्धुः *m.*, उदन्वान् *m.* (त्), सरस्वान् *m.* (त्), रत्नाकरः, पारावारः, परापारः, दूरपारः, अकूपारः, द्वीपवान् *m.* (त्), महाकच्छः, धरणीप्लवः, तरीषः, स्तिम्भिः *m.*, धेनः, दभः, मीरः, तीर्थराजः; 'the southern ocean,' दक्षिणार्णवः; 'ocean-bound,' सागरान्तः -न्ता -न्तं, समुद्रमेखलः -ला -लं, समुद्रवलयः -या -यं, समुद्ररसनः -ना -नं, अर्णवमेखलः &c.; 'ocean-king,' जलनिधिनाथः; 'ocean of trouble,' दुःखसागरः; 'of business,' कार्य्याब्धिः *m.*; 'of misery,' व्यसनार्णवः. Seven oceans are fabled to exist by the Hindús, viz. 'the ocean of salt,' लवणोदः; 'of syrup or sugar-cane juice,' इक्षुरसोदः; 'of spirituous liquor,' सुरोदः; 'of ghee or clarified butter,' घृतोदः; 'of milk,' क्षीरोदः; 'of curds,' दध्युदः; 'of pure water,' शुद्धोदः; 'churning of the ocean,' समुद्रमन्थनं. The mountain मन्दरः is fabled to have been used by the Suras and Asuras in the churning of the ocean after the deluge, for the recovery or production of fourteen sacred things. These were, 1. 'the goddess Lakshmí,' लक्ष्मीः, 2. 'the jewel of Krishṇa,' कौस्तुभः, 3. 'the tree of paradise,' पारिजातः, 4. 'spirituous liquor personified as a nymph,' सुरा -री, 5. 'the physician of the gods,' धन्वन्तरिः *m.*, 6. 'the moon,' चन्द्रः, 7. 'the cow of plenty,' कामधेनुः *f.*, कामदुघा, कामधुक् *f.* (-दुह्), 8. 'the elephant of Indra,' ऐरावतः, 9. 'the horse of Indra,' उच्चैःश्रवाः *m.* (स्), 10. 'nymph of Indra's heaven,' अप्सराः *f.* (स्), अप्सरा, 11. 'a deadly poison,' विषं, हलाहलः -लं, हालाहलं, हालहलं, कालकूटः -टं, 12. 'nectar or ambrosia,' अमृतं, 13. 'Indra's bow,' इन्द्रधनुस्, 14. 'conch,' शङ्खः. The mountain Mandara is also called इन्द्रकीलः.

OCEAN, OCEANIC, *a.* सामुद्रः -द्री -द्रं, सामुद्रिकः -की -कं, समुद्रीयः -या -यं, समुद्रियः -या -यं, सैन्धवः -वी -वं, समुद्रसम्बन्धी -न्धिनी &c., महासागरसम्बन्धी &c.

OCHER, OCHRE, *s.* रक्तोपलं, सुवर्णं, सुवर्णगैरिकं.

OCHLOCRACY, *s.* अधमवर्णाधिपत्यं, अधमवर्णप्रभुत्वं, अधमलोकप्रभुत्वं.

OCTAGON, *s.* अष्टकोणः -णं, अष्टास्रं, अष्टभुजः, अष्टकोणाकृतिः *f.*

OCTAGONAL, OCTANGULAR, *a.* अष्टकोणः -णा -णं, अष्टास्रयः -या -यं, अष्टास्रः -स्रा -स्रं, अष्टभुजः -जा -जं, अष्टभुजविशिष्टः -ष्टा -ष्टं.

OCTAVE, *s.* अष्टकं, अष्टमी; 'division of an octave,' श्रुतिः *f.*

OCTAVO, *a.* अष्टपत्रकः -का -कं, अष्टफलकः -का -कं, अष्टकः -का -कं.

OCTENNIAL, *a.* (Happening every eight years) प्रत्यष्टाब्दिकः -का -कं, अष्टवार्षिकः -की -कं, अष्टवर्षीणः -णा -णं.—(Lasting eight years) अष्टवर्षस्थायी -यिनी -यि (न्), वर्षाष्टकस्थायी.

OCTOBER, *s.* आश्विनोत्तरार्द्धं, कार्त्तिकपूर्वार्द्धं, आश्विनः, इषः, आश्वयुजः, कार्त्तिकः, बाहुलः, ऊर्जः, कार्त्तिकिकः.

OCTOGENARIAN, OCTOGENARY, *a.* अशीतिकः -का -कं, अशीतिवयस्कः -स्का -स्कं.

OCTOPETALOUS, *a.* अष्टदलः -ला -लं, अष्टदलयुक्तः -क्ता -क्तं.

OCTUPLE, *a.* अष्टगुणः -णा -णं, अष्टविधः -धा -धं, अष्टकः -का -कं.

OCULAR, *a.* चाक्षुषः -षी -षं, प्रत्यक्षः -क्षा -क्षं, नेत्रसम्बन्धी -न्धिनी -न्धि (न्), चक्षुःसम्बन्धी &c.; 'ocular demonstration or proof,' प्रत्यक्षप्रमाणं, चक्षुःप्रमाणं, चाक्षुषप्रमाणं, चाक्षुषज्ञानं, प्रत्यक्षं.

OCULARLY, *adv.* चक्षुषा, चाक्षुषप्रमाणेन, प्रत्यक्षेण, प्रत्यक्षप्रमाणेन.

OCULIST, *s.* चक्षुर्वैद्यः, नेत्रवैद्यः, नयनवैद्यः, चक्षूरोगचिकित्सकः.

ODD, *a.* (Not even) विषमः -मा -मं, असमः -मा -मं, अयुग्मः -ग्मा -ग्मं, अयुगः -गा -गं, अयुगलः -ला -लं, अयुक् *m. f. n.* (ज्).—(Remaining over a specified number) विवक्षितसंख्यातिरिक्तः -क्ता -क्तं.—(Strange, singular) विलक्षणः -णा -णं, असङ्गतः -ता -तं, अपरूपः -पा -पं, अद्भुतः -ता -तं, अपूर्वः -र्वा -र्वं, चित्रः -त्रा -त्रं, विचित्रः &c. (Uncommon) असामान्यः -न्या -न्यं, असाधारणः -णी -णं; 'game of odd and even,' मुष्टिद्यूतं.

ODDITY, ODDNESS, *s.* (State of being not even) विषमता, वैषम्यं, असमता, असाम्यं, विषमभावः, असमभावः, अयुग्मता.—(Strangeness) वैलक्षण्यं, विलक्षणता, विलक्षणभावः, असङ्गतत्वं, असङ्गतिः *f.*, अपरूपता, अद्भुतता -त्वं, अपूर्वता.—(Odd thing) कौतुकं.

ODDLY, *adv.* (Unevenly) विषमं, असमं, वैषम्येन.—(Strangely) असङ्गतं, विलक्षणं, सवैलक्षण्यं, अद्भुतं, विचित्रं, चित्रं, अपूर्वं.

ODDS, *s.* (Inequality, difference) न्यूनाधिकं, न्यूनाधिकभावः, वैषम्यं, विषमता, तारतम्यं.—(Superiority) आधिक्यं, श्रेष्ठता, विशिष्टता, वैशिष्ट्यं.

ODE, *s.* गीतं, गेयं, गानं, स्तोत्रं, काव्यं, कविता.

ODIOUS, *a.* (Hateful) द्वेष्यः -ष्या -ष्यं, द्वेषार्हः -र्हा -र्हं, विद्वेषणीयः -या -यं, विद्वेष्यः &c., गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, कुत्सितः -ता -तं, द्वेषयोग्यः -ग्या -ग्यं, कुत्सितः -ता -तं, कुत्सनीयः -या -यं, द्वेषपात्रं, द्वेषभाजनं, द्वेषास्पदं, द्वेषविषयः, घृण्यः -ण्या -ण्यं, अप्रियः -या -यं.—(In a high degree) अतिद्वेष्यः &c., अतिगर्हितः -ता -तं, अत्यप्रियः -या -यं.—(Causing hatred, invidious) द्वेषजनकः -का -कं, द्वेषोत्पादकः &c., द्वेषावहः -हा -हं, द्वेषकारकः &c., असूयाजनकः &c.

ODIOUSLY, *adv.* द्वेषणीयं, विद्वेषणीयं, गर्हणीयं, गर्हितं, कुत्सितं.

Odiousness, *s.* द्वेष्यता, द्वेषणीयता, विद्वेष्यता, गर्ह्यता, द्वेषार्हत्वं.

Odium, *s.* (Hatred) द्वेषः, विद्वेषः, प्रद्वेषः, द्वेष्यता, विद्विष्टता, जनविद्वेषः, गर्हा, घृणा.—(Invidiousness) द्वेषजनकता, असूयाजनकता -त्वं.

Odontalgy, *s.* दन्तशूलः, दन्तवेदना, दन्तव्यथा, दन्तपीडा.

Odorate, *a.* उग्रगन्धः -न्धा -न्धं -न्धी -न्धिनी -न्धि (न्), तीक्ष्णगन्धः &c.

Odoriferous, **odorous**, *a.* गन्धवान् -वती -वत् (त्), गन्धी -न्धिनी -न्धि (न्), सगन्धः -न्धा -न्धं, गन्धवहः -हा -हं, सुगन्धः -न्धा -न्धं, सौगन्धिकः -की -कं, सुगन्धिकः -का -कं, सुवासिकः -का -कं, सवासः -सा -सं, सामोदः -दा -दं, आमोदी &c., सुरभिः -भिः -भि, सुगन्धिः &c., परिमलयुक्तः -क्ता -क्तं, परिमलविशिष्टः -ष्टा -ष्टं, परिमली &c., सपरिमलः -ला -लं.

Odoriferously, *adv.* सगन्धं, सुगन्धेन, सामोदं, सवासं, सपरिमलं, सुरभि.

Odoriferousness, *s.* सगन्धता, सुगन्धता, सौगन्ध्यं, सामोदत्वं, सपरिमलत्वं.

Odour, *s.* गन्धः, वासः; 'fragrant odour,' सुगन्धः, सुगन्धिः *m.*, सौगन्ध्यं, सुवासः, सौरभ्यं, आमोदः, मोदः, वासः, परिमलः; 'bad odour,' दुर्गन्धः, दौर्गन्धिः *m.*, दौर्गन्ध्यं, कुत्सितगन्धः; 'bad odour, disfavor,' अरुचिः *f.*, अदृष्टिः *f.*, कुदृष्टिः *f.*

Œconomical, **œconomy**. *See* Economical, economy.

Œcumenical, *a.* सार्व्वलौकिकः -की -कं, विश्वलौकिकः &c., सर्व्वसाधारणः -णी -णं.

Œsophagus, *s.* अन्नवाहिस्रोतस् *n.*, अन्नमार्गः, अन्नपथः.

Of, *prep.* expressed generally by the genitive case; as, 'of me,' मम; 'of him,' तस्य; 'of that man,' तस्य पुरुषस्य. It is frequently expressed by the crude form of a noun in the first member of a compound; as, 'best of all,' सर्व्वश्रेष्ठः -ष्ठा -ष्ठं; 'lord of men,' नरपतिः *m.*; 'made of wood,' काष्ठनिर्म्मितः -ता -तं. When it denotes 'out of,' 'from amongst,' it is expressed by मध्यात् or मध्ये, affixed to the gen. c., or crude form; as, 'of all men,' सर्व्वपुरुषमध्यात् or सर्व्वपुरुषाणां मध्यात् or मध्ये. It may sometimes be rendered by the abl. c., in phrases where 'from' may be substituted in English; as, 'of a child, or from childhood,' बाल्यात्; 'of a race of kings, or descended from a race of kings,' राजकुलात् प्रसूतः or राजकुलप्रसूतः. It may even be rendered by the instr. c., in phrases where 'by' may be substituted in English; as, 'hospitably entertained of the king,' *i.e.* 'by the king,' राज्ञा सत्कृतः. Where 'of' denotes 'property,' 'possession,' 'connexion with,' 'belonging to,' &c., it may either be expressed by the use of such words as सम्बन्धी -न्धिनी &c., विषयः -या -यं, विषयकः &c., or by the gen. case, as in some of the foregoing examples. Very frequently an adjective compound involves some of these senses of the preposition; as, 'a bird of a red color,' रक्तवर्णः पक्षी; 'a man of great valor,' महावीर्य्यः पुरुषः; 'a woman of great wealth,' महाधना स्त्री. For the other senses of this preposition, *see* 'by,' 'from,' 'out,' 'among.' 'Of late,' अर्व्वाक्, अर्व्वाक्काले, नूतनकाले; 'of old,' पुरा, पुरस्तात्, पूर्व्वं, प्राक्काले; 'son of a grandson,' प्रपौत्रः; 'pupil of a pupil,' प्रशिष्यः.

Off, *adv.* or *prep.* (Denoting distance) दूरं -रे -रतस्, विदूरतस्, अन्तरं -रेण; 'be off, get off,' दूरम् अपसर or अपैहि; 'far off,' दूरस्थः -स्था -स्थं, दूरस्थायी -यिनी -यि (न्); 'a good distance off,' अतिदूरस्थः &c., अतिदूरं; 'one off,' एकान्तरः -रा -रं, द्व्येकान्तरः -रा -रं.—(Denoting separation) expressed by अप, अव, वि, नि, उत्; as, 'to cut off,' अवच्छिद्, अवकृत्, निकृत्, उच्छिद्; 'to take off,' अवमुच्, विमुच्, अपनी, अवतॄ, उत्सद्, उत्कृष्; 'to cast off,' अपास्; 'to break off,' अवभञ्ज्, अवभिद्; 'to get off, alight from,' अवतॄ, अवरुह्, अवपत्.—(Denoting departure, abatement, remission) expressed by अप, वि, अव, नि, उप; as, 'to go off,' अपगम्, अपया, विगम्; 'to leave off,' विरम्, उपरम्, निवृत्, विनिवृत्, विगम्, विच्छिद्, अवमुच्; 'go off, explode,' विभिद्, विदॄ; 'creep off, slink off,' अपसृप्, व्यपसृप्.—(Away, from) अप, अव.—(Off hand) अचिन्तापूर्व्वः -र्व्वा -र्व्वं, आकस्मिकः -की -कं, प्रस्तुतः -ता -तं, प्रत्युत्पन्नः -न्ना -न्नं.—(Badly off) दुःस्थः -स्था -स्थं, दुःस्थितः -ता -तं, दुर्गतः -ता -तं, अनुपपन्नः -न्ना -न्नं, आपन्नः &c.—(Well off) सुस्थः &c., सुस्थितः -ता -तं, सुखी -खिनी -खि (न्), सम्पन्नः -न्ना -न्नं.

Off, *a.* (Distant) दूरस्थः -स्था -स्थं, दूरस्थितः -ता -तं, दूरस्थायी -यिनी -यि (न्), दूरवर्त्ती -र्त्तिनी &c.

Off, *interj.* दूरमपसर, दूरमपैहि, दूरमपेहि, अपगच्छ.

Offal, *s.* उच्छिष्टमांसं, उच्छिष्टं, उच्छिष्टान्नं, विमांसं, मांसावशिष्टं, मांसोच्छिष्टं, भुक्तावशिष्टं, अवशिष्टमांसं, मांसावशेषः -षं, मांससमुज्झितं, शेषान्नं, शेषमांसं, मलं.

Offence, *s.* (Displeasure, anger) कोपः, क्रोधः, रोषः, मन्युः *m.*, अमर्षः, अतुष्टिः *f.*, असन्तोषः, अप्रीतिः *f.*; 'easily taking offence,' सुलभकोपः -पा -पं, सुलभमन्युः -न्युः -न्यु, शीघ्रकोपी -पिनी &c.—(Affront) विप्रियं, अपमानं, अवज्ञा, विध्वंसः.—(Crime, transgression) अपराधः, पातकं, पापं, दोषः, आगस् *n.*, अघं, दुरितं, मन्तुः *m.*, अन्यायः, दुष्कृतं, दुष्कर्म्म *n.* (न्), कुकर्म्म *n.*, कुक्रिया, दुष्कृतिः *f.*, दूषणं.—(Cause of stumbling, impediment) स्खलनं, बाधा, विघ्नः, प्रत्यूहः, व्याघातः, [illegible] रोधः.

Offenceless, *a.* निरपराधः -धा -धं, निर्दोषः -षा -षं. *See* Innocent.

To **offend**, *v. a.* (Make angry) कुप् (c. 10. कोपयति -यितुं), प्रकुप्, सङ्कुप्, क्रुध् (c. 10. क्रोधयति -यितुं), रुष् (c. 10. रोषयति -यितुं), कोपं जन् (c. 10. जनयति -यितुं), क्रोधं or रोषं जन्.—(Displease, affront any one) कस्यापि विप्रियं or अप्रियं or व्यलीकं or अनार्य्यं कृ, कस्मिन्नपि or कस्यापि अपराध् (c. 4. -राध्यति, c. 5. -राध्नोति -राद्धुं), कस्यापि अतुष्टिं or अप्रसादं जन्.—(Pain, wound, distress) पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10 व्यथयति -यितुं), सन्तप् (c. 10. -तापयति -यितुं), व्यथां कृ, क्लेशं दा.—(Transgress, violate) अपराध्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं), लुप् (c. 10. लोपयति -यितुं), अतिचर् (c. 1. -चरति -रितुं), लङ्घनं कृ.—(Cause to stumble, impede) स्खल् (c. 10. स्खलयति -यितुं), प्रस्खल्, बाध् (c. 1. बाधते -धितुं), रुध् (c. 7. रुणद्धि, रोद्धुं), अन्तरायं जन्.

To **offend**, *v. n.* (Commit a crime or sin) अपराधं कृ, पापं कृ, पातकं कृ, अन्यायं कृ, अपराध् (c. 4. -राध्यति, c. 5. -राध्नोति -राद्धुं), अपराधी -धिनी -धि भू.—(Cause anger) कोपं जन् (c. 10. जनयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं), रोषं जन्.—(Offend against, transgress) अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, अतिचर् (c. 7. -चरति -रितुं), व्यभिचर्, भञ्ज् (c. 7. भनक्ति, भंक्तुं), भिद् (c. 7. भिनत्ति, भेत्तुं).

Offended, *p. p.* (Displeased, made angry) कुपितः -ता -तं, प्रकु-

पितः -ता -तं, दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं, प्रकोपितः -ता -तं, क्रुद्धः -द्धा -द्धं, संक्रुद्धः &c., जातामर्षः -र्षा -र्षं, जातरोषः -षा -षं, कृतमन्युः -न्युः -न्यु, आगतमन्युः &c., उपजातकोपः -पा -पं, विरुद्धः &c., असन्तुष्टः -ष्टा -ष्टं.—(Caused to stumble, impeded) जातस्खलनः -ना -नं, बाधितः -ता -तं, व्याहतः -ता -तं, जातान्तरायः -या -यं.—(To be offended or made angry) कुप् (c. 4. कुप्यति, कोपितुं), प्रकुप्, क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं), रुष् (c. 4. रुष्यति, रोषितुं).

Offender, *s.* अपराधी *m.* (न्), पापकारी *m.* (न्), पापी *m.* (न्), दोषी *m.*, सापराधः, कृतापराधः, अपराद्धः, पातकी *m.*, दुष्कृती *m.*, कुकर्म्मा *m.* (न्), कुकर्म्मकारी *m.*, सदोषः, दोषयुक्तः, दोषवान् *m.* (त्), अपराधकृत् *m.*, अपराधकारी *m.*, अन्यायी *m.*, अन्यायकृत् *m.*, अन्यायकर्त्ता *m.* (र्तृ), कृतान्यायः, एनस्वी *m.*, जातदोषः ; 'grievous offender,' महापातकी *m.*, महापातककारी *m.*

Offensive, *a.* (Causing anger) कोपजनकः -का -कं, क्रोधजनकः &c., कोपोत्पादकः &c.—(Displeasing, disagreeable) अप्रियः -या -यं, विप्रियः -या -यं, विरुद्धः -द्धा -द्धं, अतुष्टिकरः -री -रं, अप्रीतिकरः &c., व्यलीकः -का -कं, अरुचिरः -रा -रं, अरुचिजनकः &c., अरम्यः -म्या -म्यं, असुखदः -दा -दं, असभ्यः -भ्या -भ्यं ; 'to the ear,' कर्णकटुः -टुः -टु, कुश्राव्यः -व्या -व्यं, विस्वरः -रा -रं ; 'to the taste,' विरसः -सा -सं.—(Disgusting) बीभत्सकरः -री -रं, बीभत्सजनकः -का -कं, घृणोत्पादकः -का -कं, कुत्सितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं ; 'offensive smell,' कुत्सितगन्धः, दुर्गन्धः, पूतिगन्धः.—(Injurious) अपकारकः -का -कं, अपकारी -रिणी &c., आपकरः -री -रं, अहितकारः &c., अनिष्टकरः &c., घातुकः -का -कं, उपघातकः &c. ; 'as a weapon,' मारकः -का -कं, परघातोपयोगी &c.—(Assailant, opposed to defensive) आक्रामकः -की -कं, आक्रमकः &c., पराक्रामकः &c., पराक्रमणकः &c., आघातकः &c., अभियाती &c. ; 'offensive and defensive alliance,' परस्परोपकारः.

Offensively, *adv.* अप्रियं, विप्रियं, विरुद्धं, व्यलीकं, सापकारं, अपकारेण.

Offensiveness, *s.* (Quality of causing anger) क्रोधजनकता, कोपजनकता, क्रोधोत्पादकत्वं.—(Unpleasantness) अप्रियता, विप्रियता, विरुद्धता, व्यलीकता -त्वं, अरुचिरता, कुत्सितत्वं.—(Injuriousness) अपकारकता -त्वं, घातुकता, उपघातकत्वं, आक्रामकत्वं.

To offer, *v. a.* (Present for acceptance) उपहृ (c. 1. -हरति -हर्त्तुं), समुपहृ, आहृ, उपाहृ, अभ्याहृ, उपहारीकृ, उपस्था in caus. (-स्थापयति -यितुं), उपनी (c. 1. -नयति -नेतुं), प्रदा (c. 3. -ददाति -दातुं), अभिदा, सम्प्रदा, उपदा, प्रयम् (c. 1. -यच्छति -दातुं), सम्प्रयम्, प्रतिपद् (c. 10. -पादयति -यितुं), ऋ in caus. (अर्पयति -यितुं), समृ, निविद् (c. 10. -वेदयति -यितुं), उपढौक (nom. उपढौकयति -यितुं), ग्रह् (c. 10. ग्राहयति -यितुं), प्रतिग्रह्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), लभ् in caus. (लम्भयति -यितुं), स्पृश् (c. 10. स्पर्शयति -यितुं), उपहरणं कृ.—(Propose, make a proposal) उपन्यस् (c. 4. -अस्यति -असितुं), अभिधा (c. 3. -दधाति -धातुं), निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, आदिश्, उपन्यासं कृ, प्रतिज्ञां कृ.—(Exhibit) दृश् (c. 10. दर्शयति -यितुं), प्रदृश्, प्रसृ (c. 10. -सारयति -यितुं), प्रत्यक्षीकृ.—(Present, as a sacrifice or oblation) उपहृ, उपहारीकृ, निविद्, निवेदनं कृ, निर्वप् (c. 1. -वपति -वप्तुं), निर्वपणं कृ, उत्सर्गं कृ, उत्सृज् (c. 6. -सृजति -स्रष्टुं), बलिं कृ, बलिदानं कृ, उपायनं कृ, अर्पणं कृ, समर्पणं कृ.—(Offer a burnt offering) होमं कृ, हु (c. 3. जुहोति, होतुं), हव्यं कृ, हवनं कृ, आहवनं कृ.—(Offer a price) अमुकमूल्यं दित्सामीति or दातुमिच्छामीति वद् (c. 1. वदति -दितुं) or अभिधा, मूल्यम् अभिधा.—(Offer violence) बलात्कारं कृ.

To offer, *v. n.* (Present itself, be at hand) उपस्था (c. 1. -तिष्ठति -स्थातुं), उपस्थितः -ता -तं भू, प्रस्तुतः -ता -तं भू, दृश् in pass. (दृश्यते), लभ् in pass. (लभ्यते), प्रादुर्भू, आविर्भू.—(Declare a willingness) expressed by the desid. form, or by the future or present tense in conjunction with the root वद् ; as, 'he offers to go,' जिगमिषामि or गमिष्यामि or गच्छामि इति वद् (c. 1. वदति -दितुं) or प्रवद्.—(Make an attempt) उद्यमं कृ, उद्योगं कृ, उद्यतः &c. भू, उद्युक्तः &c. भू or अस्.

Offer, *s.* (Proposal) उपन्यासः, प्रतिज्ञा, निवेदनं, निर्देशः, प्रदेशनं, वाक्यं, अभिधानं.—(Of a price) मूल्यदित्सा, अमुकमूल्यं दित्सामीति वादः or स्थापनं.—(Attempt) उद्यमः, उद्योगः, प्रवृत्तिः *f.*, उपक्रमः.

Offered, *p.p.* (Presented for acceptance) उपहृतः -ता -तं, समुपहृतः -ता -तं, उपनीतः &c., उपस्थापितः &c., प्रदत्तः -त्ता -त्तं, प्रत्तः &c., अर्पितः &c., समर्पितः &c., प्रतिपादितः &c., उपनिहितः &c.—(As an oblation) उपहृतः &c., उपहारीकृतः &c., निर्वापितः &c., निवेदितः &c., उत्सृष्टः -ष्टा -ष्टं, अर्पितः &c.—(As a burnt-offering) हुतः -ता -तं, आहुतः &c.—(Proposed) उपन्यस्तः -स्ता -स्तं, अभिहितः &c., निर्दिष्टः &c., आदिष्टः &c.—(Exhibited, presented) प्रसारितः &c., दर्शितः -ता -तं.

Offerer, *s.* उपहर्त्ता *m.* (र्तृ), उपनेता *m.* (तृ), निवेदकः, अर्पकः, समर्पकः.—(Of oblations) बलिकरः, बलिदाता *m.* (तृ), बलिकर्त्ता *m.*, होता *m.* (तृ), हवनकृत्.

Offering, *s.* (The act) उपहरणं, उपनयनं, निवेदनं, अर्पणं, समर्पणं, अभिवाद्यं.—(Act of offering oblations) बलिदानं, बलिकरणं, बलिकर्म्म *n.* (न्), उत्सर्गकरणं, निर्वपणं, निर्वापणं, हवनं, आहवनं.—(Oblation) बलिः *m.*, उपहारः, उत्सर्गः, देवोपहारः, नैवेद्यं. *See* Oblation. (Burnt offering) होमः, हुतं, हव्यं, हुतहोमं, आहुतिः *f.*, अवदानं ; 'of sesamum,' तिलहोमं.—(Respectful or complimentary offering) अर्घ्यं, अर्घः, उपढौकनं, उपायनं, उपदा, प्राभृतं. *See* Oblation.

Office, *s.* (Post, charge, trust) अधिकारः, पदं, पदवी, अधिकारपदं, नियोगः, स्थानं, आस्पदं. 'invested with office, in office,' अधिकारप्राप्तः -प्ता -प्तं, प्राप्ताधिकारः -रा -रं, अधिकारापन्नः -न्ना -न्नं, अधिकृतः -ता -तं, अधिकारस्थः -स्था -स्थं, अधिकारारूढः -ढा -ढं, पदारूढः &c., अधिकारस्थितः -ता -तं ; 'resignation of office,' अधिकारत्यागः, अधिकारोत्सर्गः ; 'dismissed from office,' अधिकारच्युतः -ता -तं, अधिकारभ्रष्टः -ष्टा -ष्टं, अधिकारभ्रंशितः -ता -तं, पदच्युतः &c., पदभ्रष्टः &c., च्युताधिकारः -रा -रं ; 'hereditary office,' स्थिराधिकारः ; 'temporary,' चलाधिकारः.—(Function, particular business or duty) कर्म्म *n.* (न्), कार्य्यं, कृत्यं, क्रिया, व्यापारः, व्यवसायः, वृत्तिः *f.*, प्रवृत्तिः *f.*, व्यवहारः, धर्म्मः, गुणः, विषयः, व्रतं.—(Act of kindness, good office) उपकारः, उपकृतिः *f.*, उपक्रिया, उपकृतं, सुकृतं, सुकृतिः *f.*—(Ill office) अपकारः, अपकृतिः *f.*, अपक्रिया.—(Formulary) पद्धतिः *f.*, विधिसङ्ग्रहः, विधानसङ्ग्रहः, विधानमाला.—(Place for transacting business) लेख्यस्थानं, लेख्यगृहं, उद्योगस्थानं, व्यापारस्थानं, उद्योगागारं, कर्म्मस्थानं, ग्रन्थकुटी.—(Outhouses) उपगृहाणि *n. pl.*, महानसादि *n.*

Officer, *s.* (Person appointed to perform any duty) नियोगी *m.* (न्), नियुक्तः, अधिकारी *m.* (न्), अधिकारवान् *m.* (त्), आधिकारिकः, कर्म्मकरः, कार्य्यसाधकः, कार्य्यप्रवर्त्तकः, भृत्यः, आयुक्तः.—(Of the king or government) राजभृत्यः, राजनियोगी *m.*, राजकर्म्मकरः,

राजमन्त्री *m.* (न्), प्रकृतिः *f.*, प्रकृतिपुरुषः, राजपुरुषः, पुरुषः.—(Of justice) धर्म्माधिकारी *m.*, धर्म्माध्यक्षः, न्यायाधिपतिः *m.*, राजपुरुषः. —(In the army) सेनायाम् अधिकारी *m.* or अधिकारवान् *m.* (त्) or पदवान् *m.* or पदभाक् *m.* (ज्) or अधिकारस्थः, सैनिकाध्यक्षः, सैनिकाधिकृतः, सैनिकाधिपतिः *m.*—(In the navy) नाविकाध्यक्षः, नाविकाधिकृतः.—(Superintendent) अध्यक्षः.

Official, *a.* (Pertaining to an office) आधिकारिकः -की -कं, अधिकारसम्बन्धी -न्धिनी &c., पदसम्बन्धी &c., अधिकारविषयः -या -यं.—(Derived from or communicated by authority) अधिकारप्रयुक्तः -क्ता -क्तं, आधिकारिकः &c.

Official, *s.* आधिकारिकः, अधिकारी *m.* (न्), नियोगी *m.*, राजपुरुषः, पुरुषः, राजभृत्यः, कर्म्मकरः, भृत्यः.

Officially, *adv.* अधिकारेण, अधिकारतस्, अधिकारप्रयुक्तं, अधिकारपूर्व्वं, अधिकारानुसारात् -रेण.

To officiate, *v. n.* अधिकारिकर्म्म कृ, नियोगिकर्म्म कृ, आधिकारिककार्य्यं कृ or निर्वह् (c. 10. -वाहयति -यितुं) or अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), कर्म्म कृ or विधा (c. 3. -दधाति -धातुं).

Officious, *a.* (Obliging) उपकारी -रिणी -रि (न्), उपकारशीलः -ला -लं.—(Over-obliging) अत्युपकारी &c., अत्युपचारी &c., अत्युपचारः -रा -रं.—(Meddlesome) परकार्य्यचर्चकः -का -कं, पराधिकारप्रवेशकः &c., अनधिकारचर्चाशीलः &c.

Officiously, *adv.* अत्युपचारेण, अत्युपकारशीलत्वात्, अनधिकारचर्चया.

Officiousness, *s.* अत्युपचारशीलता, अत्युपकारशीलता, परकार्य्यचर्चा, अनधिकारचर्चा, पराधिकारचर्चा, परकार्य्यप्रवेशः, पराधिकारप्रवेशः, परव्यापारचर्चा.

Offing, *s.* तीरदूरस्थः or तीरदूरवर्त्ती समुद्रभागः.

Offscouring, *s.* मलं, अवस्करः, अपकरः, अपस्करः, उच्छिष्टं, कल्कं.

Offset, *s.* प्ररोहः, अङ्कुरः, पल्लवः, किसलयः.

Offspring, *s.* सन्तानं -नः, सन्ततिः *f.*, अपत्यं, प्रजा, प्रजोत्पत्तिः *f.*, सृतिः *f.*, प्रसूतिः *f.*, प्रसवः, तन्तुः *m.*, सूनुः *m.*, भवः, प्रवरं, डिम्भः, तोकं, शावकः, वंशः, कुलं; 'male offspring,' पुत्रसन्तानं -नः, पुत्रसन्ततिः *f.*, पुंसन्तानं, पुंसन्ततिः *f.*, पुमपत्यं, पुत्रपौत्रादिवंशः; 'female offspring,' कन्यासन्तानं, कन्यासन्ततिः *f.*, स्त्रीसन्तानं, स्त्रीसन्ततिः *f.*, स्त्र्यपत्यं; 'tender offspring,' बालापत्यं; 'having offspring,' प्रजायान् -वती -वत् (त्), सप्रजः -जा -जं, सापत्यः -त्या -त्यं, अपत्यवान् &c., सन्ततिमान् &c., ससन्तानः -ना -नं; 'having male offspring,' पुत्री *m.* (न्); 'want of offspring,' अनपत्यता.

To offuscate, offuscation. *See* Obfuscate, obfuscation.

Oft, often, oftentimes, ofttimes, *adv.* बहुशस्, अनेकशस्, असकृत्, बहुवारं, अनेकवारं, अनेकदा, बहुकृत्वस्, बहुवेलं, अनेककृत्वस्, पुनः पुनर्, वारं वारं, भूयस्, मुहुस्, मुहुर्मुहुस्, अभीक्ष्णं; 'how often?' कतिकृत्वस्, कतिवारं; 'as often as,' यावत्, यतिवारं; 'so often,' तावत्, ततिवारं.

Ogle, *s.* कटाक्षः, कटाक्षावेक्षणं, कटाक्षदर्शनं, अपाङ्गदर्शनं, अपाङ्गवीक्षणं, भ्रूक्षेपः, भ्रूविलासः, भ्रूविकारः.

To ogle, *v. n.* कटाक्षेण दृश् (c. 1. पश्यति, द्रष्टुं), कटाक्षदर्शनं कृ, कटाक्षेण वीक्ष् (c. 1. -ईक्षते -क्षितुं) or अवेक्ष्, कटाक्षावेक्षणं कृ, अपाङ्गवीक्षणं कृ, भ्रूक्षेपं कृ, भ्रूविलासं कृ.

Ogling, *s.* कटाक्षावेक्षणं, अपाङ्गदर्शनं, भ्रूक्षेपालापः.

Oglio, *s.* *See* Olio.

Ogre, *s.* राक्षसः, दैत्यः, दानवः, उग्रशरीरः, क्रव्याद् *m.*, पुरुषादः.

Oh, *interj.* अहो, अहोबत, हा, हन्त, आ, आस्, अहह. *See* O

Oil, *s.* तैलं, स्नेहः, तिलस्नेहः, तिलरसः, तिलतैलं, तेलं, अभ्यञ्जनं; 'a small quantity of oil,' तैलकं; 'dressed or cooked with oil,' स्नेहपक्वः -क्वा -क्वं.

To oil, *v. a.* तैलेन or स्नेहेन लिप् (c. 6. लिम्पति, लेप्तुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं, c. 10. अञ्जयति -यितुं) or दिह् (c. 2. देग्धि -ग्धुं), तैलाक्तं -क्तां कृ, तैलाभ्यक्तं -क्तां कृ, तैलाक्तीकृ, स्निग्धीकृ.

Oil-bottle, *s.* कुतूः *f.*; 'small one,' कुतुपः.

Oil-cake, *s.* तैलकिट्टं, पिण्यकं, तैलपिण्डकः, पिण्याकः.

Oil-cloth, *s.* तैलपटः, तैलाक्तम् आस्तरणवस्त्रं.

Oiled, *p. p.* तैलाक्तः -क्ता -क्तं, तैलाभ्यक्तः &c., स्नेहाक्तः &c., स्नेहाभ्यक्तः &c., तैललिप्तः -प्ता -प्तं, अभ्यक्तः &c.

Oiliness, *s.* सतैलता, स्निग्धता, स्निग्ध्यं, तैलाक्तत्वं, सस्नेहता, तैलवत्त्वं, स्नेहः, चिक्कणता -त्वं, तैलप्राचुर्य्यं.

Oil-man, *s.* तैलकारः, तैलिकः, तैली *m.* (न्), तैलकः, चाक्रिकः, स्नेहकारः, तिलादिबीजानां पेष्टा *m.* (ष्टृ).

Oil-mill, oil-press, *s.* तैलिकयन्त्रं, तैलिकचक्रं, तिलपेषणचक्रं, तिलादिबीजपेषणार्थं चक्रं, तैलिशाला.

Oil-shop, *s.* तैलविक्रयस्थानं, तैलविक्रयगृहं.

Oily, *a.* सतैलः -ला -लं, तैली -लिनी -लि (न्), तैलमयः -यी -यं, तैलयुक्तः -क्ता -क्तं, तैलवान् -वती -वत् (त्), स्नेही &c., स्नेहवान् &c., सस्नेहः -हा -हं, स्निग्धः -ग्धा -ग्धं, चिक्कणः -णा -णं, तैलाक्तः &c., तैलाभ्यक्तः &c.

Ointment, *s.* लेपः -पनं, विलेपनं, प्रलेपः, अनुलेपनं, अभ्यञ्जनं, अञ्जनं, स्नेहः, उपदेहः, मर्द्दनद्रव्यं.

Old, *a.* (Advanced in years or life) वृद्धः -द्धा -द्धं, जीर्णः -र्णा -र्णं, स्थविरः -रा -रं, वयोवृद्धः &c., गतायुः -युः -युः (स्), गतवयस्कः -स्का -स्कं, वयोगतः -ता -तं, जरी -रिणी -रि (न्), जरणः -णा -णं, जरठः -ठा -ठं, जरातुरः -रा -रं, जरापरिणतः -ता -तं, अत्यूढः -ढा -ढं, जरत् -रती -रत् (त्), जीर्णवान् -वती -वत् (त्), वयस्कः &c., प्रवयाः -याः -यः (स्), वयोधिकः -का -कं, अतिवयाः &c., उत्तरवयाः &c., उत्तरवयस्कः &c., अतिवयस्कः &c., वर्षीयान् -यसी -यः (स्), वर्षिष्ठः -ष्ठा -ष्ठं, ज्यायान् &c., पुराणः -णा -णं, क्षीनः -ना -नं, जर्णः -र्णा -र्णं; 'to grow old,' जॄ (c. 4. जीर्य्यति, जरितुं -रीतुं), परिजॄ, वृद्धीभू; 'an old man,' जरी *m.* (न्), जरन् *m.* (त्), पलितः; 'an assembly of old men,' वृद्धसंघः, वार्द्धकं; 'old woman,' जरती, पलिता, पलिक्नी.—(Ancient) पुराणः -णा -णी -णं, प्राचीनः -ना -नं, पुरातनः -नी -नं, प्राक्तनः -नी -नं, प्रत्नः -नी -नं, प्रत्नः -त्ना -त्नं, पौराणः -णी -णं, प्राक्कालीनः -ना -नं, पूर्व्वकालीनः &c., प्राक्कालिकः -की -कं, पूर्व्वकालिकः &c., पुरावृत्तः -त्ता -त्तं.—(Of long continuance) चिरकालिकः &c., चिरकालीनः &c., चिरन्तनः -नी -नं, चिरः -रा -रं, चिरस्थायी &c., चिरकालस्थायी &c., बहुकालिकः &c., बहुकालस्थायी &c.; 'an old friend,' चिरमित्रं, कालमित्रं; 'an old servant,' चिरसेवकः, चिरभृत्यः, मूलभृत्यः; 'old retainer,' चिराश्रितः.—(Decayed or worn out by time) जीर्णः -र्णा -र्णं, जर्जरः -रा -रं, जर्जरीकः -का -कं, जर्णः -र्णा -र्णं; 'old cloth,' जीर्णवस्त्रं, पटच्चरं; 'an old bambu,' जर्जरवंशः.—(Of any duration whatever) expressed by वर्ष, वर्षीण, वर्षीय, आयुस् &c. in comp.; as, 'two years old,' द्विवर्षीणः -णा -णं, द्विवर्षः -र्षा -र्षं; 'a son twenty years old,' विंशतिवर्षीयः पुत्रः; 'a three years old heifer,' त्रिवर्षिका; 'more than ninety years old,' दशमी -मिनी -मि (न्), दशमीकृतः -ता -तं, दशमीस्थः -स्था -स्थं; 'a hundred years old,' शतायुः

-यूः -युः (स्); 'how old?' किंवर्षीणः -णा -णं, किंवर्षीयः &c.; 'how old are you?' किंवर्षीणोऽसि.—(Former) पूर्व्वः -र्व्वा -र्व्वं, पूर्व्वतनः -नी -नं; 'of old.' पुरा, पूर्व्वं.

OLD-AGE, s. वृद्धता -त्वं, वार्धक्यं, वार्धकं, वृद्धावस्था, वृद्धभावः, वार्धक्यावस्था, जरा, जीर्णत्वं -ता, जीर्णिः f., ज्यानिः f., जीर्णावस्था, स्थाविरं, स्थविरत्वं; 'bowed down with old age,' जरापरिणतः -ता -तं; 'reverence for old age,' वृद्धसेवा.

OLD-CLOTHES, s. pl. जीर्णवस्त्रं -स्त्राणि n. pl., जर्जरवस्त्रं -स्त्राणि.

OLDEN, a. पुराणः -णा -णी -णं, प्राचीनः -ना -नं, पुरातनः &c. See OLD.

OLDER, a. ज्यायान् -यसी -यः (स्), अधिकवयाः &c. See ELDER.

OLDEST, a. ज्येष्ठः -ष्ठा -ष्ठं, वयोज्येष्ठः &c., वर्षिष्ठः &c., श्रेष्ठः &c.

OLD-FASHIONED, a. पुराणरीत्यनुसारी -रिणी -रि (न्), प्राचीनव्यवहारानुरूपः -पा -पं, प्राक्तनमतानुयायी &c.

OLDISH, a. ईषद्वृद्धः -द्धा -द्धं, ईषज्जीर्णः -र्णा -र्णं, ईषत्पुराणः &c.

OLDNESS, s. (Old age). See the word. (Antiquity, state of being of long standing) पुराणता -त्वं, प्राचीनता -त्वं, प्राक्तनता, पुरातनत्वं, प्रत्नता, प्राक्कालिकत्वं, प्राक्कालीनता, चिरकालीनता, चिरता.—(As of clothes, &c.) जीर्णता, जर्जरता.

OLEAGINOUS, a. स्निग्धः -ग्धा -ग्धं, स्नेही -हिनी -हि (न्), चिक्कणः -णा -णं, मेदुरः -रा -रं, स्नेहवान् &c. See OILY.

OLEAGINOUSNESS, s. स्निग्धता, स्नैग्ध्यं, चिक्कणता, मेदुरता. See OILINESS.

OLEANDER, s. प्रतिहासः, प्रतीहासः, शतप्रासः, चण्डातः, हयमारकः, करवीरः, अश्वमारः, कृकरः, तरङ्गारिः m.

OLERACEOUS, a. शाकसम्बन्धी -न्धिनी -न्धि (न्), शाकविषयकः -का -कं.

OLFACTORY, a. घ्राणेन्द्रियसम्बन्धी -न्धिनी &c., घ्राणेन्द्रियविषयकः -का -कं, घ्राणसम्बन्धी &c., घ्राणबोधकः -का -कं, नस्यः -स्या -स्यं.

OLIBANUM, s. (The perfume) कुन्दुः f., कुन्दुरः -रुः m. f., कुन्दुरुकः, रसालं, खोटीरसः, कूर्मधूपः.—(The tree) रसालः, कुन्दुरुकः -की, खोटी.

OLIGARCHAL, OLIGARCHICAL, a. अल्पजनाधिपत्यसम्बन्धी -न्धिनी &c., कतिचिज्जनप्रभुत्वविषयः -या -यं, अल्पजनस्वामिकः -का -कं, कतिपयस्वामिकः &c.

OLIGARCHY, s. अल्पजनाधिपत्यं, अल्पजनप्रभुत्वं, कतिपयजनप्रभुत्वं, कतिचिज्जनाधिपत्यं, कतिपयाधिपत्यं, कतिपयजनपालितं राज्यं, कुलीनाधिपत्यं.

OLIO, s. प्रकीर्णकं, नानाद्रव्यसन्निपातः, प्रकीर्णद्रव्यसमूहः.

OLIVE, s. (Tree) जितवृक्षः.—(Berry) जितफलं.

OMELET, s. अण्डशाकादिनिर्म्मितः पिष्टकविशेषः, अण्डपिष्टकः.

OMEN, s. पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, शुभाशुभलक्षणं, मङ्गलामङ्गललक्षणं, भाविसूचकचिह्नं, भविष्यत्सूचकचिह्नं, शकुनं -नः, चिह्नं, लक्षणं, अजन्यं, निमित्तं, उत्पातः, पूर्व्वरूपं, भविष्यद्बोधकचिह्नं; 'good omen,' सुचिह्नं, सुलक्षणं; 'bad omen,' दुर्लक्षणं, दुश्चिह्नं, अवचिह्नं, अवलक्षणं, अपशकुनं -नः, दुःशकुनं -नः, अनिष्टसूचकचिह्नं, अशुभलक्षणं, अशुभचिह्नं, अमङ्गलचिह्नं, उपलिङ्गं; 'interpretation of omens,' शाकुनिकं.

OMENED, a. (Ill-omened) अनिष्टसूचकः &c. See ILL-OMENED.

OMENTUM, s. मेदोधरा, अन्त्रवेष्टनं, अन्त्रावरणं, अन्त्रावरकं.

OMINOUS, a. (Pertaining to omens) शाकुनिकः -की -कं, शाकुनः -नी -नं, शकुनसम्बन्धी -न्धिनी &c., शुभाशुभसूचकः -का -कं, भाविसूचकः &c., भविष्यत्सूचकः &c., भविष्यद्बोधकः &c.—(Foreboding evil) अनिष्टसूचकः &c., अशुभसूचकः &c., अमङ्गलसूचकः &c., अभद्रसूचकः &c., अनिष्टावेदी &c., अनिष्टशंसी &c., अशुभशंसी &c., दुर्लक्षणी &c.—(Foreboding good) शुभशंसी &c., शुभसूचकः &c., मङ्गलसूचकः &c.

OMINOUSLY, adv. अशुभसूचनापूर्व्वं, दुर्लक्षणेन, अशुभलक्षणपूर्व्वं.

OMINOUSNESS, s. अनिष्टसूचकत्वं, अशुभसूचकता, शाकुनिकत्वं.

OMISSION, s. त्यागः, परित्यागः, वर्जनं, अपासनं, लङ्घनं, अन्तरं, लोपः, परिलोपः, उपात्ययः, विसंयोगः, उत्सर्गः, विसर्गः, भ्रमः, भ्रान्तिः f., 'failure to do something,' अननुष्ठानं, अकरणं, अपक्रिया, अकरणिः f., अनाचरणं, अविधानं; 'without omission,' निरन्तरं, नैरन्तर्य्येण; 'making omission,' औत्सर्गिकः -की -कं.

To OMIT, v. a. परित्यज् (c. 1. -त्यजति -त्यक्तुं), त्यज्, हा (c. 3. जहाति, हातुं, caus. हापयति -यितुं), अपहा, विहा, अपाहा, वृज् (c. 10. वर्जयति -यितुं), परिवृज्, विवृज्, अपास् (c. 4. -अस्यति -असितुं), व्युदस्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, लङ्घ् (c. 10. लङ्घयति -यितुं).—(Not to perform) न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), न कृ, न विधा (c. 3. -दधाति -धातुं); 'omitting this, including that,' एतद् वर्जयित्वा तत्सहितः.

OMITTED, p. p. परित्यक्तः -क्ता -क्तं, त्यक्तः -क्ता -क्तं, वर्जितः -ता -तं, अपास्तः -स्ता -स्तं, अपासितः -ता -तं, विसर्जितः -ता -तं, विसृष्टः -ष्टा -ष्टं, अन्तरितः -ता -तं, अननुष्ठितः -ता -तं, अकृतः -ता -तं.

OMNIFARIOUS, a. सर्व्वविधः -धा -धं, सर्व्वप्रकारः -रा -रं, सर्व्वरूपः -पा -पं.

OMNIGENOUS, a. सर्व्वविधः -धा -धं, सर्व्वजातीयः -या -यं.

OMNIPOTENCE, OMNIPOTENCY, s. सर्व्वशक्तित्वं, अनन्तशक्तित्वं, अमितशक्तित्वं, सर्व्वशक्तता, अपारशक्तिः f., अनन्तसामर्थ्यं, सर्व्वकार्य्यशक्तिः f., सर्व्वसामर्थ्यं.

OMNIPOTENT, a. सर्व्वशक्तिमान् -मती -मत् (त्), सर्व्वशक्तिकः -का -कं, अनन्तशक्तिः -क्तिः -क्ति, दुरन्तशक्तिः &c., अमितशक्तिः -क्तिः -क्ति, अपारशक्तिकः &c., सर्व्वसमर्थः -र्था -र्थं.

OMNIPRESENCE, s. व्याप्तिः f., सर्व्वत्र व्याप्तिः f., सर्व्वव्याप्तिः f., विश्वव्याप्तिः f., विश्वव्यापकत्वं, सर्व्वव्यापित्वं, विश्वव्यापिता, अभिव्याप्तिः f., सर्व्वगत्वं, त्रैलोक्यविस्तारः, सर्व्वत्र विस्तारः, सर्व्वत्रविद्यमानता.

OMNIPRESENT, a. सर्व्वव्यापी -पिनी -पि (न्), सर्व्वव्यापकः -का -कं, विश्वव्यापी &c., विश्वव्यापकः -का -कं, सर्व्वगः -गा -गं, सर्व्वत्रगामी &c., सर्व्वगतः -ता -तं, सर्व्वात्मकः -का -कं, त्रैलोक्यविस्तीर्णः -र्णा -र्णं, सर्व्वत्र विस्तीर्णः &c. or विद्यमानः -ना -नं, विश्वरूपः -पा -पं, सर्व्वभूतभूतान्तरः -रा -रं.

OMNISCIENCE, s. सर्व्वज्ञता, सर्व्वज्ञानं, सर्व्वविषयज्ञानं, अनन्तज्ञानं, अपारज्ञानं, सर्व्वज्ञातृत्वं.

OMNISCIENT, a. सर्व्वज्ञः -ज्ञा -ज्ञं, सर्व्वविद् m. f. n., सर्व्ववेदी -दिनी -दि (न्), सर्व्वज्ञाता -त्री -तृ (तृ), कृत्स्नज्ञः &c., कृत्स्नविद् m. f. n., अनन्तज्ञानी &c., सर्व्वदर्शी &c., सर्व्वसाक्षी -क्षिणी -क्षि (न्), त्रिकालज्ञः &c., त्रिकालविद् m. f. n., त्रिकालदर्शी &c.

OMNIVAGANT, OMNIVAGOUS, a. सर्व्वगः -गा -गं, सर्व्वत्रगः &c., सर्व्वत्रगामी -मिनी &c., सर्व्वभ्रमकः -का -कं, सर्व्वत्रविहारी &c.

OMNIVOROUS, a. सर्व्वभक्षः -क्षा -क्षं, सर्व्वभक्षकः -का -कं, सर्व्वान्नभक्षकः &c., सर्व्वभोजी -जिनी -जि (न्), सर्व्वाशी &c., सर्व्वखादकः -का -कं, स्वेच्छाहारः -रा -रं, सर्व्वान्नीनः -ना -नं.

OMPHALIC, a. नाभ्यः -भ्या -भ्यं, नाभिसम्बन्धी -न्धिनी -न्धि (न्).

OMPHALOCELE, s. नाभिवर्धनं, नाभिगोलकः, नाभिगुडकः, नाभिकण्टकः.

OMPHALOTOMY, s. नाभिच्छेदः -दनं, नाभिनालीछेदनं

ON, prep. अधि, नि prefixed, उपरि affixed.—(Denoting contact with the upper part of a thing) expressed by the loc. c., or by उपरि affixed to the crude form or gen. c.; as, 'on the table,' फलके or फलकोपरि or फलकस्योपरि; 'rain falls on the ground,' भूमौ पतति वृष्टिः; 'having placed the wood on his shoulder,' काष्ठं स्कन्धे कृत्वा; 'placed on the fire,' अग्निष्ठः

PAD, *s.* (An easy paced horse) सुखायनः, सुखचारः.—(Foot-pad) सारणिकघ्नः, पादविक्रमः, परिपन्थी *m.* (न्), पारिपन्थिकः.—(Bolster, cushion) उपधानं -नीयं, पिण्डः, विस्तरः, वालिशं, आस्तरणं, उपबर्हः, अजिनं, पट्टः, पटः.—(Hair or other soft substance) लोमादि मृदुवस्तु.

To PAD, *v. a.* (Stuff or furnish with hair or other soft substance) लोमादिमृदुवस्तुना आस्तॄ (c. 5. -स्तृणोति -स्तरितुं -रीतुं), मृदुलोमादिना पू (c. 10. पूरयति -यितुं) or युज् (c. 10. योजयति -यितुं) or समायुज्.

To PAD, *v. n.* (Travel slowly) क्रमे क्रमे or शनैः शनैर् व्रज् (c. 1. व्रजति -जितुं).

PADDED, *p. p.* or *a.* मृदुलोमादिपूरितः -ता -तं, मृदुवस्तुपूरितः -ता -तं.

PADDING, *s.* मृदुलोमादि *n.*, लोमादिमृदुवस्तु *n.*, पूरणं, भरणं.

To PADDLE, *v. n.* (Beat the water with an oar) नौकादण्डेन जलं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or तड् (c. 10. ताडयति -यितुं), जलक्षेपणं कृ.—(Play in the water) जले क्रीड् (c. 1. क्रीडति -डितुं), जलक्रीडां कृ.—(Finger) अङ्गुलिचेष्टां कृ, अङ्गुलिव्यापारं कृ.

To PADDLE, *v. a.* (Propel by a paddle) नौकादण्डेन चल् (c. 10. चालयति -यितुं).

PADDLE, *s.* (Oar) नौकादण्डः, क्षेपणिः -णी *f.*, क्षिपणिः -णी *f.*, अरित्रं, नौचालनी. *See* OAR.—(Blade of the oar) क्षेपणिफलकं.

PADDLE-BOX, *s.* क्षेपणिकोशः, क्षेपणिकोषः, क्षेपण्याधारः.

PADDLE-WHEEL, *s.* क्षेपणिचक्रं, नौचालनचक्रं, नौचालनी.

PADDOCK, *s.* वाटी, वाटिका, वाटः -टं, विवीतः, प्राचीरपरिवृतं क्षेत्रं.

PADLOCK, *s.* तालकं, तालः -ला, तालयन्त्रं, प्रतिताली, द्वारकीलः.—(Clasp) कुडुपः.

To PADLOCK, *v. a.* तालकेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), तालबद्धं -द्धां कृ.

PÆAN, PEAN, *s.* जयगानं, जयशब्दः, जयध्वनिः *m.*, जयगीतं.

PAGAN, *s.* देवतार्चकः, देवतापूजकः, प्रतिमापूजकः, मूर्त्तिपूजकः, देवतासेवी *m.* (न्), असद्धर्म्मसेवी *m.* (न्), असद्धर्मावलम्बी *m.* *See* IDOLATER.

PAGAN, *a.* प्रतिमापूजकसम्बन्धी -न्धिनी -न्धि (न्), मूर्त्तिपूजकसम्बन्धी.

PAGANISM, *s.* प्रतिमापूजा, मूर्त्तिपूजा, देवतार्चा, देवतार्चनं -ना, मूर्त्तिसेवा -वनं, असद्धर्म्मावलम्बनं. *See* IDOLATRY, HEATHENISM.

PAGE, *s.* (Of a book) पृष्ठं, फलकः -कं, पत्रं, पत्रिका.—(Boy attendant) पार्श्वानुचरः, पार्श्वपरिचरः, बालसेवकः, बालानुचरः.

To PAGE, *v. a.* पृष्ठाङ्कनं कृ, पत्राङ्कनं कृ, पृष्ठसंख्याङ्कनं कृ.

PAGEANT, *s.* (Statue in show, &c.) शोभामूर्त्तिः *f.*, शोभाप्रतिमा.—(Show, spectacle) कौतुकं, चमत्कारः, चमत्कृतिः *f.*, चमत्करणं, आडम्बरं, प्रेक्षा, प्रेक्षणं, शोभा, यात्रा.

PAGEANT, *a.* कौतुकी -किनी -कि (न्), आडम्बरी &c., चमत्कारकः -का -कं, शोभनः -ना -नं, अतिशोभनः &c., यात्रिकः -की -कं.

PAGEANTRY, *s.* कौतुकं, चमत्कारः, आडम्बरं, शोभा. *See* PAGEANT, *s.*

PAGINAL, *a.* पृष्ठ्यः -ष्ठ्या -ष्ठ्यं, पुस्तकपत्रसम्बन्धी &c.

PAGODA, *s.* देवतामन्दिरं, देवताभवनं, देवतायतनं, देवमन्दिरं.

PAID, *p. p.* शोधितः -ता -तं, परिशोधितः &c., परिशुद्धः -द्धा -द्धं, अपाकृतः -ता -तं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, निर्गणितः -ता -तं, निस्तारितः -ता -तं, निरादिष्टः -ष्टा -ष्टं, गृहीतवेतनः -ना -नं.

PAIL, *s.* पात्रं, भाजनं, काष्ठपात्रं, जलपात्रं, जलभाजनं; 'for milk,' दोहनं -नी, गोदोहनी, दुग्धभाण्डं. *See* MILK-PAIL.

PAIN, *s.* दुःखं, पीडा, वेदना -नं, व्यथा, आर्त्तिः *f.*, तापः, सन्तापः, परितापः, बाधा, विबाधा, आबाधा, यातना, कृच्छ्रं, कष्टं, क्लेशः, खेदः, उद्वेगः, यन्त्रणं, दुःखं, दुःखितं, असुखं, तोदः -दनं, रायणं, विघातकं, विराधनं, प्रसूतिजं, आमनस्यं, आमानस्यं, अमानस्यं, आभीलं; 'bodily pain as opposed to mental,' शरीरपीडा, वेदना, कृच्छ्रं, व्याधिः *m.*; 'pain in the head,' शिरोवेदना, शिरःपीडा, शिरोर्त्तिः *f.*; 'in the teeth,' दन्तवेदना; 'sharp pain,' शूलः -लं, तीव्रवेदना; 'creeping or flying pain,' वेगः; 'rheumatic pains in the bones,' अस्थिशूलः -लं; 'in the loins,' कटिवेदना; 'pains of hell,'

यातना, कारणा, यान्त्ययातना; 'of labor,' प्रसववेदना, गर्भवेदना, प्रसवव्यथा; 'of death,' प्राणान्तवेदना; 'suffering pain,' दुःखभागी -गिनी -गि (न्), दुःखभोगी &c., दुःखी &c.; 'accession of pain,' दुःखसंयोगः; 'causing pain,' पीडाकरः -रा -रं, दुःखकरः &c.; 'act of causing pain,' पीडाकरणं, पीडनं; 'freed from pain,' दुःखातीतः -ता -तं.—(Mental pain, disquietude) मनोदुःखं, मनःपीडा, मनस्तापः, मनोव्यथा, मानसी व्यथा, चित्तवेदना, चित्तोद्वेगः, आधिः m.—(Pains, toil, effort) यत्नः, प्रयत्नः, कष्टं, आयासः, प्रयासः, उद्योगः, उत्साहः, व्यवसायः, चेष्टा, उद्यमः, श्रमः, परिश्रमः, क्लेशः, आस्था; 'to take pains,' यत् (c. 1. यतते -तितुं), प्रयत्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, घट् (c. 1. घटते -टितुं), उद्योगं कृ, यत्नं कृ, उत्साहं कृ.—(Penalty) दण्डः, साहसं, शिष्टिः f., शिक्षा.

To PAIN, *v. a.* पीड् (c. 10. पीडयति -यितुं), आपीड्, उपपीड्, दुःख् (c. 10. दुःखयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), तप् (c. 10. तापयति -यितुं), सन्तप्, परितप्, उपतप्, बाध् (c. 1. बाधते -धितुं), उद्विज् (c. 10. -वेजयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं, क्लेष्टुं), अर्द् (c. 10. अर्दयति -यितुं), दुःखं कृ or दा, पीडां कृ, व्यथां कृ.

PAINED, *p. p.* पीडितः -ता -तं, दुःखितः -ता -तं, व्यथितः &c., आर्तः -र्ता -र्तं in comp., दुःखार्तः &c., दुःखी -खिनी खि (न्), दुःखान्वितः -ता -तं, दुःखोपेतः &c., बाधितः -ता -तं, तापितः &c., सन्तापितः &c., तप्तः -प्ता -प्तं, सन्तप्तः &c., उद्वेजितः &c., क्लेशितः &c., क्लिष्टः &c., आतुरः -रा -रं, अर्दितः &c., अभ्यर्दितः &c., अनुभूतवेदनः -ना -नं, कृच्छ्रगतः &c., क्लेशी &c., कष्टी &c., कष्टः -ष्टा -ष्टं, आधिमान् -मती -मत् (त्), दूनः -ना -नं, सव्यथः -था -थं, सवेदनः -ना -नं; 'being pained,' पीड्यमानः -ना -नं, तप्यमानः &c., बाध्यमानः &c., क्लिश्यमानः &c., धूपायितः -ता -तं; 'to be pained,' पीड् in pass. (पीड्यते), दुःख (nom. दुःखायते, दुःखीयति), दुःखार्तीभू, व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ्, तप् in pass. (तप्यते), परितप्, सन्तप्, क्लिश् (c. 4. क्लिश्यते).

PAINFUL, *a.* (Causing pain) पीडाकरः -रा -रं, दुःखकरः -रा -रं, पीडाकारकः -का -कं, पीडाजनकः -का -कं, दुःखजनकः &c., दुःखदः -दा -दं, दुःखप्रदः -दा -दं, दुःखावहः -हा -हं, वेदनाकारकः -का -कं, वेदनाजनकः &c., व्यथाकरः &c., व्यथकः -का -कं, कष्टकरः &c., कष्टकारकः &c., कष्टावहः -हा -हं, क्लेशकरः &c., क्लेशदः &c., क्लेशावहः -हा -हं, क्लेशकः -का -कं, बाधकः -का -कं, उद्वेजकः -का -कं, सन्तापकः -का -कं, दूदः -दा -दं.—(Full of pain) दुःखमयः -यी -यं, दुःखी -खिनी -खि (न्), क्लेशी &c., सबाधः -धा -धं, सव्यथः -था -थं, सवेदनः -ना -नं.—(Requiring labor or toil) कष्टसाध्यः -ध्या -ध्यं, श्रमसाध्यः &c., दुःसाध्यः &c., दुष्करः -रा -रं, कठिनः -ना -नं.

PAINFULLY, *adv.* (With pain) सव्यथं, सवेदनं, सबाधं, सदुःखं, सक्लेशं, सोद्वेगं, सकष्टं, दुःखपूर्वं.—(With toil) श्रमेण, सश्रमं, आयासेन, सायासं, कृच्छ्रेण, सकृच्छ्रं.

PAINFULNESS, *s.* दुःखकारकत्वं, पीडाजनकत्वं, कष्टकारकत्वं, दुःखिता, सदुःखत्वं, दुःखं, सक्लेशत्वं, सोद्वेगता, कष्टं, सकष्टत्वं, सकष्टता.

PAINLESS, *a.* दुःखहीनः -ना -नं, दुःखरहितः -ता -तं, व्यथाहीनः -ना -नं, दुःखशून्यः -न्या -न्यं, निर्दुःखी -खिनी -खि (न्), निर्व्यथः -था -थं.

PAINS, *s. pl.* यत्नः, प्रयत्नः, उद्योगः, कष्टं. *See* PAIN.

PAINSTAKER, *s.* उद्योगी *m.* (न्), उत्साही *m.*, उद्यमी *m.*, व्यवसायी.

PAINSTAKING, *a.* कृतप्रयत्नः -त्ना -त्नं, कृतयत्नः &c., प्रयत्नवान् -वती -वत् (त्), यत्नशीलः -ला -लं, प्रयत्नशीलः -ला -लं, उद्योगशीलः &c., उद्यमशीलः &c., उद्योगी -गिनी -गि (न्), व्यवसायी &c., कृतश्रमः -मा -मं, प्रसितः -ता -तं. *See* INDUSTRIOUS.

To PAINT, *v. a.* (Draw in colors) चित्र् (c. 10. चित्रयति -यितुं), लिख् (c. 6. लिखति, लेखितुं), आलिख्, अभिलिख्.—(Cover or besmear with color) रञ्ज् (c. 10. रञ्जयति -यितुं), वर्ण् (c. 10. वर्णयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), रङ्गेण लिप्, रञ्जनं कृ.—(Describe) वर्ण्, अनुवर्ण्, उपवर्ण्, संवर्ण्, वर्णनं कृ, विलिख्.

PAINT, *s.* रङ्गः, वर्णकः -का, चित्रं, लेपः, विलेपः, रञ्जनलेपः, रञ्जनं.

PAINTED, *p. p.* चित्रितः -ता -तं, चित्रगतः -ता -तं, चित्रार्पितः -ता -तं, आलिखितः &c., अभिलिखितः &c., आलेख्यगतः &c., आलेख्यसमर्पितः &c., वर्णितः -ता -तं, वर्णगतः &c., रञ्जितः &c., चित्रः -त्रा -त्रं; 'painted on the surface,' चित्रतलः -ला -लं.

PAINTER, *s.* चित्रकरः, चित्रकारः, चित्रलेखकः, चित्रलिख् (ख्), चित्रकृत् *m.*, चित्रकः, चित्रकर्मविद् *m.*, रङ्गाजीवः -वी *m.* (न्), रञ्जकः, वर्णी *m.* (न्), वर्णकारकः, वर्णाटः, लेखकः, आलेखकः, आलेख्यकृत् *m.*, पटकारः, तौलिकः, तौलिकिकः; 'painter's brush,' तूलिः *f.*, तूलिका, ईषिका, वर्तिका.

PAINTING, *s.* (The act) चित्रलिखनं, चित्रलेखनं, चित्रलिपिः *f.*, लिपिः *f.*, आलेखनं, लेखनं, लिखनं, चित्रकरणं, रञ्जनं, वर्णनं.—(The art or business) चित्रकर्म *n.* (न्), चित्रविद्या, चित्रक्रिया.—(A painting or picture) चित्रलेखा, चित्रं, आलेख्यं, चित्रलिखितं, चित्रगतं.—(Painting the body) पत्रलेखा, पत्राङ्गुलिः *f.*, पत्रावली -लिः *f.*, वर्णः.

PAIR, *s.* मिथुनं, द्वयं, द्वन्द्वं, युगं, युग्मं, युगलं, यमलं, यामलं, यमः, यमकं, युतकं; 'a pair of doves,' पारावतमिथुनं; 'a pair of oxen,' गोमिथुनं, गोयुगं; 'a pair of birds,' पक्षिजोर मिथुनं, पक्षिमिथुनं, पक्षिद्वयं; 'a married pair,' दम्पती *m.* du., भार्यापती *m.* du., स्त्रीपुरुषौ. The word द्वन्द्वः is used to denote that form of grammatical combination which unites two or more words of similar or opposite signification; thus, 'hand and foot,' पाणिपादं; 'affection and hatred,' रागद्वेषौ *m.* du.

To PAIR, *v. n.* (Suit, fit) युज् in pass. (युज्यते), संयुज्, उपयुज्.—(Be joined in pairs) स्त्रीपुरुषवत् or दम्पतिवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or संयुज्, मैथुनार्थं सङ्गम्, मैथुनं कृ.

To PAIR, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), युज्, संयोगं कृ, मिथुनसंयोगं कृ, मैथुनार्थं संयुज्.

PALACE, *s.* राजगृहं, राजमन्दिरं, नृपगृहं, नृपमन्दिरं, राजवेश्म *n.* (न्), नृपवेश्म *n.*, राजधाम *n.* (न्), नृपधाम *n.*, राजभवनं, राजसदनं, राजप्रासादः, राजहर्म्यं, राजवसतिः *f.*, नृपतिवसतिः *f.*, राजशाला, राजधानी, प्रासादः, हर्म्यं, मन्दिरं -रा, भवनं, सौधं, अट्टालः -लिका, विमानं, शाला, चिरिशं, विडङ्कः, नाडिः *m.*, उपकार्या, उपकारी -रिका; 'palace-court,' राजसभा; 'palace-yard,' राजाङ्गनं.

PALÆSTRA, *s.* मल्लभूः *f.*, मल्लभूमिः *f.*, यमराट् *m.* (ज्), मल्लयात्रा.

PALANKEEN, PALANQUIN, *s.* शिबिका, डयनं, डलकं, याप्ययानं, नरयानं, प्रवहणं, डुला, शिरस्का.

PALATABLE, *a.* रुचिकरः -री -रं, रुच्यः -च्या -च्यं, आस्वाद्यः -द्या -द्यं, स्वादुः -द्वी -दु, सुरसः -सा -सं, सरसः -सा -सं, रसिकः -का -की -कं, मुखप्रियः -या -यं.

PALATABLENESS, *s.* रुच्यता -त्वं, आस्वाद्यता, स्वादुता, सरसता, रसिकत्वं.

PALATAL, PALATIAL, PALATIC, *a.* (Pertaining to the palate) तालव्यः -व्या -व्यं, तालुसम्बन्धी &c.; 'a palatal letter,' तालव्यं.

PALATE, *s.* तालु *n.*, तालुकं, काकुदं -दः; 'soft palate,' घुण्टिका,

शूना, सूना, अलिजिह्वा, अधोजिह्विका. *See* Uvula.

Palatial, *a.* राजप्रासादीयः -या -यं, प्रासादीयः &c., राजगृहयोग्यः -ग्या -ग्यं, राजमन्दिरयोग्यः &c.

Palaver, *s.* चाटूक्तिः *f.*, चाटुकारः, सान्त्वोक्तिः *f.*, मधुरवाक्यं, मिथ्योक्तिः.

To palaver, *v. a.* चाटूक्त्या सान्त्व (c. 10. सान्त्वयति -यितुं), मिथ्या सान्त्व्.

Pale, *a.* पाण्डुः -ण्डुः -ण्डु, पाण्डुरः -रा -रं, पाण्डरः -रा -रं, विपाण्डुरः &c., विवर्णः -र्णा -र्णं, गतवर्णः &c., नीरक्तः -क्ता -क्तं, रागहीनः -ना -नं; 'pale in color,' पाण्डुवर्णः &c.; 'having a pale face,' विवर्णवदनः -ना -नं.—(Dim, not bright) मन्दप्रभः -भा -भं, हततेजाः -जाः -जः (स्), मन्दच्छायः -या -यं, निस्तेजाः &c., हतकान्तिः -न्तिः -न्ति, न्यूनकान्तिः &c., न्यूनप्रभः &c., मलिनप्रभः &c., म्लानतेजाः &c., म्लानकान्तिः &c.—(Light in color) expressed by ईषत्, आ, श्वेत; as, 'pale red,' ईषद्रक्तः -क्ता -क्तं, आरक्तः &c., श्वेतरक्तः &c.; 'pale blue,' आनीलः -ला -लं, श्वेतनीलः &c.

Pale, *s.* (Stake) शङ्कुः *m.*, कीलः, स्थाणुः *m.*, शल्यं, शूलं.—(Inclosure, limit) आवरणं, वृतिः *f.*, वेष्टनं, आवेष्टनं, अवरोधकं, वारणं, वरणः, वलयः.

To pale, *v. a.* शङ्कुवलयेन परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

Pale-eyed, *a.* पाण्डुनेत्रः -त्रा -त्रं, पाण्डुनयनः &c., न्यूनप्रभाक्षः &c.

Pale-faced, *a.* विवर्णवदनः -ना -नं, पाण्डुमुखः -खी -खं, म्लानवदनः &c.

Paleness, *s.* पाण्डुता -त्वं, पाण्डुरता -त्वं, पाण्डुवर्णः, पाण्डुरागः, विवर्णता, वैवर्ण्यं, मुखवैवर्ण्यं, नीरक्तता, रागहीनता.—(Dimness) प्रभाहानिः *f.*, तेजोहानिः *f.*, न्यूनप्रभा, न्यूनकान्तिः *f.*

Palette, *s.* *See* Pallet.

Palfrey, *s.* स्त्रीलोकारोहणयोग्यः क्षुद्रघोटक.

Palindrome, *s.* अनुलोमविलोमश्लोकः, मुरजबन्धः.

Paling, *s.* शङ्कुपंक्तिः *f.*, आवरणं, आवारः, वारणं -णी, काष्ठघ्नं.

Palisade, *s.* दुर्गपरिगता स्तम्भपंक्तिः or शङ्कुपंक्तिः शङ्कुवलयः, यष्टिवलयः, स्तम्भवलयः, दुर्गावरोधका स्तम्भपंक्तिः, दुर्गावरोधकं.

Palish, *a.* ईषत्पाण्डुः -ण्डुः -ण्डु, आपाण्डुः &c., आपाण्डुरः -रा -रं.

Pall, *s.* (Mantle of state) राजप्रावारः, राजकीयप्रावारः.—(Cloak) प्रावारः, प्रच्छदपटः, आच्छादनपटः.—(For a dead body) शवाच्छादनं.

To pall, *v. n.* विरसीभू, विरसः -सा -सं भू, अरुचिरः -रा -रं भू.

To pall, *v. a.* विरसीकृ, अरुचिं or बीभत्सं जन् (c. 10. जनयति -यितुं).

Palladium, *s.* पुरदेवता नगरदेवता.—(Defence) रक्षा -क्षणं.

Pallet, *s.* (Board for mixing colors) वर्णपत्रं -त्रः, रङ्गपत्रं.—(Small bed) खट्वा, क्षुद्रखट्वा, तल्पः, क्षुद्रतल्पः.

To palliate, *v. a.* (As a fault, crime, &c.) दोषं or पापं शम् (c. 10. शमयति -यितुं) or उपशम् or छद् (c. 10. छादयति -यितुं) or आछद् or मृज् (c. 2. मार्ष्टि -ष्टुं), पापशमनं कृ, दोषमार्जनं कृ, दोषक्षालनं कृ, पापापनोदनं कृ, पापाच्छादनं कृ, न्यूनीकृ.

Palliated, *p. p.* शमितः -ता -तं, आच्छादितः -ता -तं, न्यूनीकृतः &c.

Palliation, *s.* (Of a fault or crime) पापशमनं, पापशान्तिः *f.*, दोषाच्छादनं, पापशान्तिः *f.*, पापमार्जना, दोषक्षालनं, दोषप्रक्षालनं, पापापनोदनं, पापापनुत्तिः *f.*, दोषन्यूनीकरणं, उपशमः, उपशमनं, लघूकरणं, उपशान्तिः *f.*

Palliative, *a.* (Extenuating) पापशमनः -ना -नं, दोषशमकः -का -कं, दोषाच्छादकः &c.—(Mitigant) शान्तिकः -की -कं. *See* Mitigant.

Palliative, *s.* (That which extenuates) पापशमनं, दोषशमनं, शान्तिकं.—(That which mitigates pain) वेदनाशान्तिकं, वेदनाशमकम् औषधं, क्लेशापहं, शूलघ्नं, उपशमनं.

Pallid, *a.* पाण्डुः -ण्डुः -ण्डु, पाण्डुवर्णः -र्णा -र्णं, पाण्डुरः -रा -रं, विपाण्डुरः -रा -रं, विवर्णः -र्णा -र्णं &c. *See* Pale.

Pallor, *s.* पाण्डुता -त्वं, पाण्डुरता -त्वं, विवर्णता. *See* Paleness.

Palm, *s.* (Of the hand) तलः -लं, हस्ततलः -लं, करतलः -लं, तालः -लिका, प्रतलः, प्रहस्तः, प्रपाणिः *m.*, चपेटः, चर्पटः, चपटः, कर्परीकं, अलघुषः, गोच्छालः; 'the palms joined,' संहतलः, सिंहतलः, संहततलः; 'the hollowed palm,' प्रसृतः, प्रसृतिः *f.*, चुलुकः; 'the hollowed palms joined,' अञ्जलिः *m.*; 'having the palms hollowed and placed one above the other in sign of reverence,' कृताञ्जलिः -लिः -लि, कृताञ्जलिपुटः -टा -टं, बद्धाञ्जलिः &c.—(Tree) तालः, तृणद्रुमः, दीर्घतरुः *m.*, दीर्घद्रुः *m.*, गुच्छपत्रः, लेख्यपत्रकः, द्रुमश्रेष्ठः, द्रुमेश्वरः, दुरारोहः; 'date-palm,' खर्जूरः -री -खर्जूरवृक्षः; 'cocoa-nut palm,' नारिकेलः &c. *See* Cocoa-nut. 'Palm-leaf,' तालपत्रं, तालपर्णं; 'fibres,' तालजटा, तालप्रलम्बं; 'spirituous juice of the palm,' ताली, तालकी.

To palm, *v. a.* (Conceal in the palm) करतले गुप्, करतलगुप्तं -प्तां कृ, हस्ततलस्थं -स्थां कृ.—(Impose by fraud) छल् (c. 10. छलयति -यितुं), छलेन प्रचलीकृ, वञ्च् (c. 10. वञ्चयते -ति -यितुं), प्रतृ &c.

Palma-christi, *s.* (Castor-oil tree) एरण्डः -ण्डकः, उरुबूकः, उरुवुकः, रुबूकः, रूवुकः, रुवुकः, रुवुः *m.*, रुचकः, व्यडम्बकः, व्यडम्बनः, व्यडम्बरः, व्याघ्रपुच्छः, गन्धर्वहस्तकः, चञ्चुः *m.*, मण्डः, अमण्डः, आमण्डः, वर्धमानः, पञ्चाङ्गुलः.

Palmate, palmated, *a.* हस्ततलाकारः -रा -रं, करतलाकृतिः -तिः -ति.

Palmer, *s.* तालपत्रभृत् कार्पटिकविशेषः or यात्रिकविशेषः.

Palmer-worm, *s.* लोमावृतः कीटविशेषः or कृमिप्रभेदः.

Palmified, *a.* जालपादः -दा -दं, जालपाद् *m. f. n.*, जालाकारपादः &c.

Palmister, *a.* हस्तरेखादिनिरीक्षणाद् दैवकथकः or शुभाशुभदर्शकः, करतलरेखानिरीक्षणेन भविष्यत्सूचकः, सामुद्रिकः, सामुद्रविद् *m.*, हस्तरेखाविद्.

Palmistry, *s.* हस्तरेखादिनिरीक्षणाद् दैवकथनं or शुभाशुभदर्शनं, करतलरेखादिनिरीक्षणेन भविष्यत्सूचनं, हस्तरेखाविद्या, हस्तसामुद्रिकं, सामुद्रविद्या.

Palmy, *a.* (Bearing or abounding with palms) तालवान् -वती -वत् (त्), तालावृतः -ता -तं, तालसङ्कीर्णः -र्णा -र्णं.—(Flourishing) समृद्धः -द्धा -द्धं, वर्धिष्णुः -ष्णुः -ष्णु, श्रीमान् -मती &c., अधिकर्द्धिः -र्द्धिः -र्द्धि.

Palmyra, *s.* (Tree) तृणद्रुमः, तृणराजः, आसवद्रुः *m.*, महोन्नतः. *See* Palm.

Palpability, palpableness, *s.* स्पृश्यता, स्पर्शनीयता, स्पर्शेन्द्रियग्राह्यता, स्पर्शगोचरता.—(Clearness) व्यक्तता, प्रत्यक्षता.

Palpable, *a.* (Perceptible by the touch) स्पृश्यः -श्या -श्यं, स्पर्शनीयः -या -यं, स्पर्शेन्द्रियग्राह्यः -ह्या -ह्यं, स्पर्शगोचरः -रा -रं, स्पर्शवेद्यः -द्या -द्यं, स्पर्शज्ञेयः -या -यं, त्वगिन्द्रियज्ञेयः &c., सूचीभेद्यः -द्या -द्यं.—(Gross, thick) स्थूलः -ला -लं, घनः -ना -नं; 'palpable darkness,' घनान्धकारः.—(Plain, clear) व्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, प्रत्यक्षः -क्षा -क्षं, सुग्राह्यः &c.

Palpably, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, सुस्पष्टं, प्रत्यक्षतस्, प्रत्यक्षेण, स्फुटं, प्रादुस्.

To palpitate, *v. n.* स्पन्द् (c. 1. स्पन्दते -न्दितुं), प्रतिस्पन्द्, परिस्पन्द्, कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, वेप् (c. 1. वेपते -पितुं), स्फुर् (c. 6. स्फुरति -रितुं), क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), उच्छ्वस् (c. 2. -च्छ्वसिति -तुं, rt. श्वस्), पिठ् (c. 1. पेठति -ठितुं); 'my heart palpitates,' वेपते मे हृदयं.

Palpitating, *part.* स्पन्दमानः -ना -नं, वेपमानः -ना -नं, कम्पमानः -ना -नं, स्फुरितः -ता -तं, उच्छ्वासी -सिनी -सि (न्).

Palpitation, *s.* स्पन्दनं, प्रतिस्पन्दनं, वेपनं, वेपथुः *m.*, कम्पः -म्पनं.

स्फुरणं, क्षोभः; 'of the heart,' हृदयवेपनं, हृदयकम्पः, हृत्कम्पः.

PALSICAL, PALSIED, *a.* पक्षाघाती -तिनी -ति (न्), पक्षवायुग्रस्तः -स्ता -स्तं, कम्पवायुग्रस्तः &c., अर्द्धाङ्गवायुग्रस्तः &c.

PALSY, *s.* (Paralysis) स्तम्भः, संस्तम्भः, विष्टम्भः, अवष्टम्भः, स्वापः, सुप्तिः *f.* —(Hemiplegia) पक्षाघातः, पक्षवायुः *m.*, अर्द्धाङ्गवायुः *m.*, अर्द्धाङ्गं, भङ्गः.—(Shaking palsy) कम्पवायुः *m.*, कम्पवातः.

To PALSY, *v. a.* स्तम्भं or स्वापं जन् (c. 10. जनयति -यितुं), स्तब्धीकृ, जडीकृ.

PALTRINESS, *s.* तुच्छता, लघुता, लाघवं, असारता, कुत्सितत्वं, क्षुद्रता.

PALTRY, *a.* तुच्छः -च्छा -च्छं, लघुः -घुः -घ्वी -घु, क्षुद्रः -द्रा -द्रं, कुत्सितः -ता -तं, असारः -रा -रं, सारहीनः -ना -नं, तृणप्रायः -या -यं, लघुप्रभावः -वा -वं, क्षुल्लकः -का -कं, अपकृष्टः -ष्टा -ष्टं, अधमः -मा -मं, or expressed by कु prefixed; as, 'a paltry action,' कुकर्म्म *n.* (न्).

To PAMPER, *v. a.* परमान्नेन तृप् (c. 10. तर्पयति -यितुं) or सन्तृप् or पॄ (c. 10. पूरयति -यितुं) or परिपॄ or भृ (c. 3. बिभर्त्ति, c. 1. भरति, भर्त्तुं) or संवृध् (c. 10. -वर्धयति -यितुं) or पुष् (c. 10. पोषयति -यितुं) or आप्यै (c. 10. -प्याययति -यितुं), अत्यन्तं पुष् or आप्यै.

PAMPERED, *p. p.* अतिपुष्टः -ष्टा -ष्टं, सुपुष्टः &c., अतिपोषितः -ता -तं, सुपोषितः &c., हृष्टपुष्टः &c., परमान्नपोषितः &c., परमान्नभृतः &c.

PAMPERING, *s.* अतिपोषणं, परमान्नपोषणं, परमान्नसंवर्धनं, भरणं, अतिभरणं, परमान्नभृतिः *f.*, आप्यायनं, सुपोषणं.

PAMPHLET, *s.* पत्रिका, पुस्तकं -की, क्षुद्रपुस्तकं, लघुपुस्तकं.

PAN, *s.* पात्रं, भाजनं, भाण्डं, आधारः, कटाहः, पिठरः, स्थाली, कन्दुः -न्दूः *m. f.*, स्वेदनी -निका; 'frying pan,' अम्बरीषं, भ्राष्टः, ऋजीषं.

PANACEA, *s.* सर्व्वरोगशमकभेषजं, सर्व्वरोगघ्नभेषजं, सर्व्वरोगप्रतीकारकम् औषधं, सर्व्वौषधिचूर्णं, त्रैलोक्यचिन्तामणिः *m.*

PAN-CAKE, *s.* कन्दुपक्वपिष्टकः, अम्बरीषपक्वपिष्टकः, भृष्टपिष्टकः.

PANCRATIC, PANCRATICAL, *a.* मल्लयुद्धकुशलः -ला -लं, मल्लयुद्धनिपुणः -णा -णं.

PANCRATIUM, *s.* मल्लयुद्धं, मल्लक्रीडा, बाहुयुद्धं, बाहुप्रहरणं.

PANDECT, *s.* विद्यासङ्ग्रहः.—(Of laws) संहिता, स्मृतिशास्त्रसंहिता.

PANDEMIC, *a.* सार्व्वलौकिकः -की -कं, सर्व्वव्यापकः -का -कं, सर्व्वजनव्यापकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, विश्वजनीनः -ना -नं, सर्व्वसाधारणः -णी -णं.

PANDEMONIUM, *s.* पिशाचसभा, सर्व्वपिशाचसभा, सर्व्वभूतसभा.

PANDER, *s.* विटः, कुण्डाशी *m.* (न्), रतताली *m.* (न्), सञ्चारकः, दूतः, वेश्याचार्य्यः, कौट्टिन्यकर्त्ता *m.* (र्त्तृ), सन्धानकर्त्ता *m.*, लाम्पट्यप्रयोजकः.

To PANDER, *v. a.* or *n.* परकामान् सम्पद् (c. 10. -पादयति -यितुं) or प्रयुज् (c. 10. -योजयति -यितुं), कौट्टिन्यं कृ, लाम्पट्यं प्रयुज्.

PANDERING, PANDERISM, *s.* कौट्टिन्यं, विटकर्म्म *n.* (न्), लाम्पट्यप्रयोजकत्वं.

PANDICULATION, *s.* जृम्भणं, विजृम्भणं, हाफिका. *See* YAWNING.

PANDIT, *s.* (Learned Brahman) पण्डितः. *See* PUNDIT.

PANE, *s.* (Of glass) काचशिला, काचमयसमानशिला.

PANEGYRIC, *s.* स्तुतिवादः, स्तुतिवाक्यं, प्रशंसावादः, स्तुतिपाठः, वन्दिपाठः, स्तुतिः *f.*, गुणस्तुतिः *f.*, गुणोत्कीर्त्तनं, गुणगानं, स्तोत्रं, श्लाघा, वन्दना, वर्णना. *See* ENCOMIUM.

PANEGYRICAL, *a.* स्तुतिमयः -यी -यं, प्रशंसकः -का -कं, प्रशंसाकरः -रा -रं, गुणवर्णकः -का -कं, गुणश्लाघी -घिनी -घि (न्). *See* LAUDATORY.

PANEGYRIST, *s.* स्तुतिपाठकः, वन्दी *m.* (न्), वन्दिजनः, स्तोता *m.* (तृ), वर्णकः.

PANEL, *s.* (Of a door) कपाटः -टी -टं, द्वारकपाटः, कवाटः -टा -टं, द्वारशाखा.—(Whole body of the jury) ज्ञापितप्रमाणपुरुषगणः, स्थेयगणः.

PANG, *s.* व्यथा, यातना, वेदना, शूलः -लं, अतिवेदना, अतिव्यथा; 'of childbirth,' गर्भवेदना, प्रसववेदना.

PANIC, *s.* (Sudden fright) आकस्मिकभयं, आकस्मिकत्रासः, अकस्मादु-त्पन्नभयं, निष्कारणभयं, विद्रवः, विप्लवः, त्रासः; 'general panic in a country,' पाकः; 'struck with panic,' भयविप्लुतः -ता -तं; 'as an army,' पिञ्जः -ञ्जा -ञ्जं, पिञ्जलः -ला -लं, समुत्पिञ्जः &c., समुत्पिञ्जलः &c.—(Sort of seed or grain) अणुः *m.*, प्रियङ्गुः -ङ्गूः *f.*, कङ्गुः -ङ्गूः *f.*, कङ्गुनी; 'field of it,' अणव्यं.

PÁNINI, *s.* (The grammarian) पाणिनिः *m.*, पाणिनः, दाक्षीपुत्रः, दाक्षेयः, सालातुरीयः, शालातुरीयः; 'connected with him,' पाणिनीयः -या -यं.

PANJÁB, *s.* (The country) पञ्चनदः, वाहीकः; 'the Chenáb river,' चन्द्रभागा.

PANNEL, *s.* (Kind of saddle) पर्य्याणं.—(Of a door). *See* PANEL.

PANNIER, *s.* (Basket) करण्डः, डलकं, डल्लकं, कण्डोलः, पेटकः.

PANOPLIED, *a.* संवर्मितः -ता -तं, कवचसंवृतः -ता -तं, कृतसन्नाहः -हा -हं.

PANOPLY, *s.* सर्व्वाङ्गकवचः -चं, सर्व्वशरीरवर्म्म *n.* (न्), सर्व्वगात्रत्राणी.

PANORAMA, *s.* चतुर्दिग्दर्शकचित्रं, सर्व्वदिग्दर्शकचित्रं.

To PANT, *v. n.* (Palpitate) स्पन्द्, परिस्पन्द्, कम्प्, विकम्प्, वेप्, उच्छ्वस्.—(Have the breast heave with difficult respiration) कृच्छ्रेण श्वस् (c. 2. श्वसिति -तुं), कृच्छ्रेण श्वासप्रश्वासं कृ, उच्छ्वासं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), प्राणकृच्छ्रोपहतः -ता -तं भू.—(Long for) अभिलष्, आकांक्ष्, अभिवाञ्छ् &c.

PANT, *s.* स्पन्दनं, प्रतिस्पन्दनं, कम्पः -म्पनं, वेपनं, उद्गमः.

PANTALOON, *s.* (Kind of trowsers) अशिथिलकञ्चुकविशेषः, जङ्घाच्छादनयोग्यम् अशिथिलवस्त्रं, जङ्घापरिधानं.—(Buffoon) भण्डः, विदूषकः.

PANTHEISM, *s.* जगदीश्वरमतं, जगदीश्वरवादः, अद्वैतमतं, अद्वैतवादः, अभेदमतं, अभेदवादः, विराट्स्वरूपमतं.

PANTHEIST, *s.* जगदीश्वरवादी *m.* (न्), जगदीश्वरमतावलम्बी *m.*, जगदीश्वरमताश्रयी *m.*, अद्वैतवादी *m.*, अभेदवादी *m.*, अद्वैतमतावलम्बी *m.*

PANTHEISTIC, PANTHEISTICAL, *a.* जगदीश्वरमतसम्बन्धी -न्धिनी &c., जगदीश्वरमतविषयकः -का -कं, अद्वैतमतसम्बन्धी &c., अद्वैतमतविषयकः &c.

PANTHEON, *s.* सर्व्वदेवतामन्दिरं, सर्व्वदेवालयं, सर्व्वदेवतायतनं, सर्व्वदेवभवनं.

PANTHER, *s.* द्वीपी *m.* (न्), अतिक्रूरशीलो वनमार्जारभेदः or क्षुद्रव्याघ्रभेदः.

PANTING, *s.* उच्छ्वासः, दुःश्वासः, श्वासकृच्छ्रं, प्राणकृच्छ्रं, उद्गमः, स्पन्दनं.

PANTING, *part.* उच्छ्वसन् -सन्ती &c., कृच्छ्रेण श्वसन् &c., स्पन्दमानः -ना -नं, कम्पमानः &c. *See* GASPING, HEAVING.

PANTOMIME, *s.* (One that represents by dumb show) मुग्धाभिनयी *m.* (न्), मुग्धाभिनेता *m.* (तृ), मुग्धनर्त्तकः, मुग्धनाटकः, केवलाभिनयी *m.* (न्), हस्तपादादिसञ्चालनमात्रेण अभिनयी *m.* or अभिनेता *m.*, रङ्गावतारी *m.*—(Representation by dumb show) मुग्धनाट्यं, मुग्धनृत्यं, मुग्धाभिनयः, हस्तपादादिसञ्चालनं, हस्तपादादिसञ्चालनाभिनयः, लास्यं, ताण्डवं.

PANTOMIME, PANTOMIMIC, *a.* मुग्धनाट्यसम्बन्धी &c., मुग्धाभिनयविषयकः &c.

PANTRY, *s.* कोष्ठः -ष्ठकं, खाद्यद्रव्यागारः -रं, खाद्यकोष्ठकं, कुटिः -टी *m. f.*

PAP, *s.* (Nipple) स्तनाग्रं, स्तनमुखः -खं, कुचाग्रं.—(Breast) स्तनः, कुचः, कुचतटं; 'the paps,' स्तनौ *m.* du.—(Soft food for infants) बालकपोषणयोग्यं मृद्वन्नं, मृद्वाहारः, मृदुखाद्यं, बालकाहारः.

PAPA, *s.* पिता *m.* (तृ), तातः &c. *See* FATHER.

PAPAL, *a.* रोमीयधर्म्माधिपतिसम्बन्धी -न्धिनी &c., रोमीयधर्म्माध्यक्षसम्बन्धी.

PAPAVEROUS, *a.* खसखसगुणोपेतः -ता -तं, खसखसतुल्यगुणः -णा -णं.

PAPER, *s.* (The substance) कार्पासं, कार्पासिकपत्रं.—(For writing) पत्रं, लिखनपत्रं, लेखनपत्रं, लेख्यपत्रं.—(Written sheet) पत्रं, पत्रकं.

पत्रिका, लेखः.—(Document, deed) पत्रं -त्री, लेख्यं, लेख्यपत्रं, साधनपत्रं, लेख्यप्रसङ्गः.

Paper, *a.* (Made of paper) कार्पासिकः -की -कं, कार्पासः -सी -सं.

To **paper**, *v. a.* चित्रकार्पासेन or कार्पासिकपत्रेण छद् (c. 10. छादयति -यितुं) or आछद् or आस्तृ (c. 5. -स्तृणोति -स्तरितुं, -रीतुं).

Paper-maker, *s.* कार्पासकृत्, कार्पासकारः, कार्पासिकपत्रकृत्.

Papescent, *a.* मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं.

Papilio, *s.* चित्रपतङ्गः, पतङ्गः. *See* Butterfly.

Papillary, **papillous**, *a.* स्तनाग्रसदृशः -शी -शं, चूचुकोपमः -मा -मं.

Papist, *s.* रोमीयधर्म्मावलम्बी *m.* (न्), रोमीयधर्म्मनिष्ठितः, रोमीयधर्म्मस्थः. रोमीयमतधारी *m.* (न्).

Pappy, *a.* मज्जामयः -यी -यं, मज्जावान् -वती -वत् (त्), मज्जागुणकः -का -कं, समज्जः -ज्जा -ज्जं, मृदुः -द्वी -दु, आर्द्रमृदुः &c., कोमलः -ला -लं.

Papulæ, *s. pl.* दद्रुः *m.*, कण्डूः *f.*, वरटी, वरण्डकः, रक्तस्फोटः.

Papulose, **papulous**, *a.* दद्रुणः -णा -णं, सस्फोटः -टा -टं.

Par, *s.* (State of equality) समता, साम्यं, समभावः, समानता, तुल्यता, साम्यता; 'that is at par,' समानकक्षः -क्षा -क्षं, समकक्षः &c.; 'that is above par,' अधिकोत्तरः -रा -रं.

Parable, *s.* दृष्टान्तः, दृष्टान्तरूपकथा, उत्प्रेक्षा, उपमा, समासोक्तिः *f.*, समासोक्तिरूपकथा, निदर्शनं, उदाहरणं, हितोपदेशः.

Parabola, *s.* (A conic section) समकल्लितं.

Parabolic, **parabolical**, *a.* (Allegorical, expressed by parable) दृष्टान्तरूपः -पा -पं, दृष्टान्तोक्तः -क्ता -क्तं, दार्ष्टान्तिकः -की -कं.—(Having the form of a parabola) समकल्लिताकारः -रा -रं.

Parabolically, *adv.* दृष्टान्तरूपेण, दृष्टान्ततस्, दृष्टान्तपूर्व्वं.

Paracentric, **paracentrical**, *a.* मण्डलत्यागी -गिनी -गि (न्).

Parade, *s.* (Ostentation) कौतुकं, दम्भः, आडम्बरं. *See* the word.—(Place for military exercise) खलूरिका, प्रेक्षणं.—(Military exercise) अस्त्रशिक्षा, योग्या, युद्धाभ्यासः, शस्त्राभ्यासः, सैन्यव्यायामः.—(Procession) यात्रा, सैन्ययात्रा.

To **parade**, *v. a.* (Exhibit ostentatiously) दम्भार्थं or कौतुकार्थं or प्रेक्षार्थं दृश् (c. 10. दर्शयति -यितुं) or प्रदृश् or प्रकाश्.—(Marshal soldiers) सैन्यान् अस्त्रशिक्षार्थं or युद्धाभ्यासार्थं व्यूह् or विन्यस्.

To **parade**, *v. n.* (Go about in military procession) प्रेक्षार्थं or अस्त्रशिक्षार्थं यात्रां कृ.

Paradigm, *s.* (Example) प्रतिमा, प्रतिरूपं, उपमा.—(In grammar) निदर्शनार्थप्रदर्शितविभक्तिः *f.*, निदर्शनार्थप्रदर्शितक्रियारूपं.

Paradise, *s.* स्वर्गः, आनन्दलोकः, आनन्दभुवनं, नन्दनं, सुखलोकः, सुखभुवनं, सुखाधारः, सुखदं, सुखधाम *n.* (न्), अमर्त्यभुवनं, स्वर्लोकः, त्रिदिवः -वं, दिवं, द्यौः *f.* (दिव्), द्यौ *f.* (द्यो), नाकः, अपरलोकः, ताविषः, ऋभुक्षः, वैकुण्ठं; the last word refers properly to the paradise of Vishnu, that of Indra is स्वर्गः.

Paradisiacal, *a.* स्वर्गीयः -या -यं, स्वर्ग्यः -र्ग्या -र्ग्यं, स्वर्गयोग्यः -ग्या -ग्यं, आनन्दलोकसम्बन्धी -न्धिनी &c., स्वर्गसम्बन्धी &c.

Paradox, *s.* लोकविरुद्धाभासः, असत्याभासः, अयुक्ताभासः, लोकविरुद्धमतं.

Paradoxical, *a.* (Said of opinions) लोकमतविरुद्धः -द्धा -द्धं, अयुक्ताभासरूपः -पा -पं.—(Of persons) लोकविरुद्धाभासवादी *m.* (न्), लोकविरुद्धाभाससेवी *m.* (न्), लोकविरुद्धमतावलम्बी *m.*, अयुक्ताभासवादी *m.*

Paragon, *s.* (Model) प्रतिमा, प्रमाणं, प्रमाता *m.* (तृ), उपमा, प्रतिरूपं, उत्तमप्रमाणं.—(An unequalled object) अनुपमवस्तु *n.*, निरुपमवस्तु *n.*, अद्वितीयवस्तु *n.*, अप्रतिरूपवस्तु.

Paragraph, *s.* परिच्छेदः, विच्छेदः, खण्डः, लेखपरिच्छेदः, लेखखण्डः, वाक्यपरिच्छेदः, वाक्यखण्डः, वाक्यं.

Paralipomena, *s.* शेषग्रन्थः, उपग्रन्थः, परिशिष्टं, उत्तरखण्डः.

Parallax, *s.* (In astronomy) क्षीणः, लम्बनं, स्थानभेदः.

Parallel, *a.* (In geometry) एकदिक्तुल्यसमान्तरः -रा -रं, एकदिग्गतसमान्तरः -रा -रं, समान्तरः -रा -रं, सरलसमान्तरः -रा -रं; 'two parallel lines,' एकदिग्गतसमान्तररेखाद्वयं, सरलसमान्तररेखाद्वयं, सरलरेखाद्वयं.—(Like, similar) सदृशः -शी -शं, समानः -ना -नं, तुल्यः -ल्या -ल्यं, सदृक्षः -क्षी -क्षं, अनुरूपः -पा -पं, समभावः -वा -वं, समरूपः -पा -पं.

Parallel, *s.* (A line equidistant from another) समान्तररेखा; 'of latitude,' स्वदेशपरिधिः *m.*, अक्षवृत्तं, अक्षांशवृत्तं.—(Likeness, conformity) सादृश्यं, सदृशता, सारूप्यं, अनुरूपता, आनुरूप्यं, समरूपता, समता, साम्यं, समानता.—(Comparison) उपमा, औपम्यं.

To **parallel**, *v. a.* (Make parallel) समान्तरीकृ, समान्तरं -रां कृ.—(Compare) उपमा, तुल्, साधर्म्यीकृ, समीकृ.—(Correspond, be equal to) समीभू, सदृशीभू, अनुरूपः -पा -पम् अस् or भू.

Parallelism, *s.* समान्तरता -त्वं, समान्तरभावः.—(Resemblance) सादृश्यं, सदृशता, अनुरूपता, आनुरूप्यं, समता, तुल्यता.

Parallelogram, *s.* दीर्घचतुरस्रं, दीर्घचतुर्भुजः, आयतचतुरस्रं, दीर्घचतुष्कोणः, समद्विभुजः, समसमद्विभुजः.

Parallelogramic, **parallelogramical**, *a.* दीर्घचतुरस्रः -स्रा -स्रं, समद्विभुजः -जा -जं.

Parallelopiped, *s.* (In geometry) समखातः.

Paralogism, **paralogy**, *s.* आभासः, सिद्धान्ताभासः, हेत्वाभासः, पक्षाभासः, मिथ्याहेतुः *m.*, अयुक्तिः *f.*

Paralysis, *s.* स्तम्भः, अवष्टम्भः, विष्टम्भः, संस्तम्भः, सुप्तिः *f.*, त्वक्सुप्तिः *f.*, स्वापः, जाड्यं; 'of the thigh,' ऊरुस्तम्भः.—(Paralytic stroke) पक्षाघातः, पक्षवायुः *m.*, अर्द्धाङ्गवायुः *m.*, अर्द्धाङ्गं, भङ्गः.

Paralytic, **paralytical**, *a.* (Affected with paralysis) पक्षाघाती -तिनी -ति (न्), पक्षाघातरोगी &c., पक्षवायुग्रस्तः -स्ता -स्तं, अर्द्धाङ्गरोगी &c., सुप्तत्वक् *m. f. n.* (च्).

To **paralyze**, *v. a.* स्तम्भं जन् (c. 10. जनयति -यितुं), स्तम्भीकृ, स्तम्भ् (c. 5. स्तभ्नोति, c. 9. स्तभ्नाति, c. 10. स्तम्भयति -यितुं), विष्टम्भ्, जडीकृ, जाड्यं कृ, स्वापं जन्.

Paralyzed, *p. p.* स्तम्भितः -ता -तं, स्तम्भीकृतः -ता -तं, जडीकृतः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः &c., अवष्टब्धः &c., निस्तब्धः &c., स्तम्भितः -ता -तं. *See* Numb, *a.*

Paramount, *a.* परमः -मा -मं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, श्रेष्ठः &c., अधिकः -का -कं, सर्व्वाधिकः &c., प्रमुखः -खा -खं, प्रधान in comp.; 'possessing paramount dominion,' साम्राज्यिकः -की -कं, सार्व्वभौमः -मी -मं; 'paramount sovereign,' सम्राट् *m.* (ज्), सर्व्वेश्वरः, सर्व्वेशः, सर्व्वस्वामी *m.* (न्); 'sway of a lord paramount,' साम्राज्यं.

Paramour, *s.* (Gallant) जारः, उपपतिः *m.*, पापपतिः *m.*, रमणः, विटः, चेटकः.—(Mistress) उपपत्नी, उपपाली, जारिणी.

Parapet, *s.* वक्षःपर्य्यन्तः प्राकारः, भित्तिः *f.*, परिसरः.

Paraphernalia, *s. pl.* (Articles which a wife brings with her) स्त्रीधनं, यौतकं, औद्वाहिकं, पारिणाय्यं.—(Appendages, trappings) परिच्छदः, सामग्र्यं, पारिबर्हं, उपकरणं, आभरणं.

Paraphrase, *s.* टीका, अविस्तरव्याख्या, अविस्तरभाषान्तरं अविस्तरार्थकथनं, अविस्तरविवरणं, मूलशब्दविस्तारः, भाष्यं, टिप्पनी.

To PARAPHRASE, *v. a.* विस्तरशस् or विस्तरेण or मूलशब्दविस्तारेण व्याख्या (c. 2. -ख्याति -तुं) or भावार्थरीकृ or मूलार्थविवरणं कृ or मूलशब्दव्याख्यां कृ, मूलशब्दविस्तारं कृ, मूलशब्दाधिक्यं कृ.

PARAPHRASED, *p. p.* मूलशब्दविस्तारेण व्याख्यातः -ता -तं or विवृतः -ता -तं.

PARAPHRAST, *s.* मूलशब्दविस्तारेण व्याख्याता *m.* (तृ), टीकालेखकः.

PARAPHRASTIC, PARAPHRASTICAL, *a.* अधिकशब्दकः -का -कं, मूलाधिकशब्दकः &c., मूलशब्दविस्ताररूपः -पा -पं, विस्ताररूपः -पा -पं.

PARAPHRASTICALLY, *adv.* मूलशब्दविस्तारेण, मूलशब्दाधिक्यपूर्वं.

PARAQUET, PARAQUITO, *s.* क्षुद्रशुकः, अल्पशरीरः कीरभेदः.

PARASITE, *s.* (One who dines with others or sponges on his neighbor) परान्नः, परान्नभोजी *m.* (न्), परान्नभक्षी *m.*, परान्नपुष्टः, परान्नरुचिः *m.*, परपाकरुचिः *m.*, परपिण्डादः, पात्रेसमितः, पीठकेलिः *m.*, पीठमर्द्दः.—(In botany, a plant which attaches itself to others) वृक्षरुहा, तरुरुहा, तरुरोहिणी, तरुभुक् *m.* (ज्), वृक्षादनी, पराश्रया, वन्दा, वन्दाका, वन्दका, जीवन्तिका, आकाशवल्ली, खवल्ली, उपदी.

PARASITIC, PARASITICAL, *a.* (As a plant) वृक्षरुहः -हा -हं, तरुरुहः &c., तरुरोही -हिणी -हि (न्), तरुभुक् *m. f. n.* (ज्), पराश्रयः -या -यं.—(Sponging on others) पराश्रयी &c., परान्नपुष्टः -ष्टा -ष्टं.

PARASOL, *s.* आतपत्रं, आतपवारणं, छत्रं, उष्णवारणः -णं, जनत्रा; 'royal one,' नृपछत्रं, नृपलक्ष्म *n.* (न्).

To PARBOIL, *v. a.* ईषत् क्वथ्, अर्द्धेन क्वथ्, ईषत् स्थाल्यां पच् or श्रा.

PARBOILED, *p. p.* अर्द्धक्वथितः -ता -तं, ईषत्क्वथितः &c., अर्द्धश्राणः -णा -णं.

PARCEL, *s.* (Small bundle) पोटलिका, पोट्टली, कूर्चः, वीटिका.—(Portion, part) भागः, विभागः, अंशः, वण्टः -ण्टकः, उद्धारः, भाजितं, खण्डः.—(Quantity) राशिः *m.*, सञ्चयः, निचयः, चयः, सङ्घः, समूहः.—(Number of persons) गणः, समूहः, वृन्दं, मण्डलं.

To PARCEL, *v. a.* विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, विभागशः or अंशांशि क्लृप् (c. 10. कल्पयति -यितुं) or विन्यस् (c. 4. -अस्यति -असितुं), वण्ट् (c. 10. वण्टयति -यितुं).

PARCENARY, *s.* समांशिता, समाधिकारिता, अविभक्तदायभोगः.

PARCENER, *s.* समांशी *m.* (न्), समभागी *m.*, समाधिकारी *m.*, अंशकः.

To PARCH, *v. a.* तप् (c. 1. तपति, तप्तुं, c. 10. तापयति -यितुं), सन्तप्, दह् (c. 1. दहति, दग्धुं), परिदह्, भ्रज्ज् (c. 6. भृज्जति -ते, भ्रष्टुं, भर्ष्टुं), भृज् (c. 1. भर्जते -र्जितुं).

PARCHED, *p. p.* तप्तः -प्ता -प्तं, उपतप्तः &c., अभितप्तः &c., तापितः -ता -तं, दग्धः -ग्धा -ग्धं, भृष्टः -ष्टा -ष्टं, भ्रष्टः &c., भर्जितः -ता -तं, निर्जलः -ला -लं, शोषितजलः &c.; 'having the throat parched with thirst,' पिपासाक्षामकण्ठः -ण्ठा -ण्ठं.

PARCHMENT, *s.* चर्म्मपटः, चर्म्मपत्रं -त्रकं, झिल्ली, झिल्लिका, लेखनचर्म्म *n.* (न्), लिखनचर्म्म *n.*, चर्म्म *n.*

To PARDON, *v. a.* क्षम् (c. 1. क्षमते -ति, क्षन्तुं), संक्षम्, मुच् (c. 6. मुञ्चति, मोक्तुं), विमुच्, अवसृज्, मृष्, मृज्, अनुज्ञा, सह्, निर्यत्, क्षमां कृ, अपराधक्षमां कृ, अपराधमोचनं कृ, पापमुक्तिं कृ; 'deign to pardon my offence,' अपराधं मे क्षन्तुम् अर्हसि. *See To* FORGIVE.

PARDON, *s.* क्षमा, क्षान्तिः *f.*, मोचनं, विमोचनं, पापमोचनं, अपराधमुक्तिः *f.*, अपराधमोचनं, दोषमुक्तिः *f.*, अपराधक्षमा, अपराधमार्जना -नं, पापमार्जना, निष्कृतिः *f.*, दया, कृपा; 'to beg pardon,' क्षम् (c. 10. क्षमयति -यितुं), क्षमां प्रार्थ्, क्षमस्व or क्षम्यताम् इति वद्.

PARDONABLE, *a.* क्षमाप्यः -प्या -प्यं, क्षमणीयः -या -यं, क्षमार्हः -र्हा -र्हं, क्षमायोग्यः -ग्या -ग्यं, क्षमोचितः -ता -तं, सहव्यः -व्या -व्यं, सहनीयः -या -यं, उपेक्षणीयः -या -यं.

PARDONABLY, *adv.* यथाक्षमार्थं, यथाक्षमणीयं, यथासहव्यं, क्षमणीयं.

PARDONED, *p. p.* क्षान्तः -न्ता -न्तं, दोषमुक्तः -क्ता -क्तं, दण्डमुक्तः &c., शासनमुक्तः &c., मुक्तदण्डः -ण्डा -ण्डं, मुक्तदोषः -षा -षं, मुक्तशासनः -ना -नं, मुक्तापराधः -धा -धं, दण्डमोचितः -ता -तं.

To PARE, *v. a.* (Clip, chip, cut off) तक्ष् (c. 1. तक्षति -क्षितुं), त्वक्ष् (c. 1. त्वक्षति -क्षितुं), तनूकृ, छिद्, अवछिद्, अवकृत्, कृत्, लू, खण्ड्, खण्डीकृ, विदलीकृ, क्लृप्; 'to pare the nails,' नखखण्डनं कृ, नखरञ्जनं कृ, नखकल्पनं कृ.—(Peel, skin) त्वच् (nom. त्वचयति -यितुं), निस्त्वचीकृ, त्वक्परिपुटनं कृ, निस्तुषीकृ.

PARED, *p. p.* तष्टः -ष्टा -ष्टं, त्वष्टः &c., तनूकृतः -ता -तं, क्लृप्तः -प्ता -प्तं, छिन्नः -न्ना -न्नं, अवछिन्नः &c., खण्डितः -ता -तं, उल्लिखितः -ता -तं, 'pared nails,' खण्डकः; 'having pared nails,' क्लृप्तनखः -खा -खं.

PAREGORIC, *a.* दुःखशमकः -का -कं, उपशमकः &c., शान्तिदः -दा -दं.

PARENT, *s.* (He or she that produces) जननः *m.* -नी *f.*, जनकः *m.*, जनिका *f.*, जनयिता *m.* -त्री *f.* (तृ), जन्मदः, धाता *m.* (तृ), सम्भूः *m.*, जः, पिता *m.*, माता *f.* *See* FATHER, MOTHER. 'Parents,' मातापितरौ *m. du.*, मातरपितरौ *m. du.*, तातजनयित्र्यौ *f. du.*, जनकजनन्यौ *f. du.*; 'parent of all,' विश्वधाता *m.*—(Cause, source) कारणं, हेतुः *m.*, उत्पादकः, जन्महेतुः *m.*, प्रभवः.

PARENTAGE, *s.* जन्म *n.* (न्), जातिः *f.*, वंशः, कुलं, उत्पत्तिः *f.*; 'of royal parentage,' राजवंश्यः -श्या -श्यं, नृपात्मजः -जा -जं, राजबीजी &c.; 'of honorable parentage,' महाकुलः -ला -लं.

PARENTAL, *a.* (Pertaining to parents) मातापितृसम्बन्धी -न्धिनी &c., जननसम्बन्धी &c., पैतृकः -की -कं.—(Becoming parents) मातापितृयोग्यः -ग्या -ग्यं, मातापितृसदृशः -शी -शं: 'parental affection,' अपत्यस्नेहः, पुत्रस्नेहः, सुतस्नेहः, वात्सल्यं, वत्सलता.

PARENTHESIS, *s.* निवेशितवाक्यं, प्रक्षिप्तवाक्यं, अप्रधानवाक्यं, प्रासङ्गिकवाक्यं, उपवाक्यं, प्रक्षिप्ताप्रधानवाक्यं, अनन्वितवाक्यं.

PARENTHETIC, PARENTHETICAL, *a.* प्रासङ्गिकः -की -कं, अनन्वितः -ता -तं, अप्रधान in comp., मूलवाक्यानन्वितः &c.

PARENTHETICALLY, *adv.* प्रसङ्गतस्, प्रसङ्गक्रमेण, मूलवाक्यानन्वितं.

PARENTLESS, *a.* मातापितृहीनः -ना -नं, मातापितृरहितः -ता -तं.

PARER, *s.* तष्टा *m.* (ष्टृ), त्वष्टा *m.*; 'nail-parer,' नखरञ्जनी.

PARHELION, *s.* सूर्य्याभासः, मिथ्यासूर्य्यः, कृत्रिमसूर्य्यः.

PARING, *s.* (The act) तक्षणं, त्वक्षणं.—(That which is pared off) तष्टं, तक्षितं, विदलं, शकलं, खण्डः, भिन्नं.

PARISH, *s.* पुरोहिताधीनः प्रदेशः or ग्रामः, धर्म्माध्यापकाधीनो देशः or ग्रामः, पौरोहित्यदेशः, पौरोहित्यभूमिः *f.*; 'parish-priest,' ग्रामयाजकः, ग्रामपुरोहितः.

PARISHIONER, *s.* ग्रामवासी *m.* (न्), ग्रामस्थः, ग्रामेवासी *m.*, ग्रामिकः, ग्रामीयः, पुरोहिताधीनदेशस्थः.

PARITY, *s.* समता, साम्यं, समानता, तुल्यता -त्वं, तौल्यं, साम्यता, समभावः, कक्षा; 'parity of reason,' न्यायसाम्यं, न्यायसमता, समानन्यायत्वं, तुल्यन्यायत्वं; 'by parity of reason,' न्यायसाम्यात्.

PARK, *s.* उद्यानं, राजोद्यानं, क्रीडावनं, क्रीडावाटिका, आक्रीडः -डं, प्रमदवनं, साधारणवनं, साधारणोद्यानं, कृत्रिमवनं, मृगयास्थानं, मृगयालयं, मृगयाभूमिः *f.*; 'open space in a town,' सन्निवेशः, निकर्षणं.

PARKER, PARK-KEEPER, *s.* उद्यानपालः -लकः, उद्यानरक्षकः.

PARLANCE, *s.* सम्भाषणं, संवादः, संलापः, आलापः, कथोपकथनं.

To PARLEY, *v. n.* (Confer) सम्भाष्, संवद्, संलप्; 'with an enemy,' युद्धमध्ये शत्रुणा सह सम्भाष्, सन्धिप्रसङ्गं कृ.

PARLEY, s. सम्भाषा -षणं, संलापः, वादः, संवादः; 'in war,' युद्धमध्ये शत्रुणा सह सम्भाषा, सन्धिसम्भाषणं, सन्धिप्रसङ्गः.

PARLIAMENT, s. विचारसभा, सम्मन्त्रणसभा, वादशाला, संवादशाला, मन्त्रशाला, महासभा, शिष्टसभा, प्रजाप्रतिनिधिसभा.

PARLOR, s. आलापशाला, संलापशाला, कथोपकथनशाला, उपवेशनशाला.

PAROCHIAL, a. पुरोहिताधीनदेशसम्बन्धी -न्धिनी &c., पौरोहित्यदेशसम्बन्धी &c., ग्रामिकः -की -कं, ग्रामीयः -या -यं, ग्राम्यः -म्या -म्यं.

PARODY, s. विनोदार्थानुकरणकविता, हास्यकरणार्थम् अनुकरणकाव्यं.

To PARODY, *v. a.* विनोदार्थं or हास्यकरणार्थं शब्दपरिवर्त्तनं कृ.

PAROLE, PAROL, s. वचनं, प्रतिज्ञा, अङ्गीकारः, स्वीकारः, उरीकारः.

PARONOMASIA, PARONOMASY, s. श्लेषः, श्लेषवाक्यं, द्व्यर्थवाक्यं.

PARONYCHIA, a. नखम्पचः, कुनखः m., चिप्यं, नखरोगः.

PAROTIS, s. (The parotid gland) लालाशयः, लालाधारः.

PAROXYSM, s. आवेशः, अवतारः -तरणं, आक्रमः -मणं, वेगः; 'of anger,' क्रोधावेशः; 'of lust,' कामावेशः. *See* FIT, s.

PARRICIDAL, PARRICIDIOUS, a. (Pertaining to parricide) पितृहत्यासम्बन्धी &c., पितृवधविषयकः -का -कं, पितृहत्यारूपः -पा -पं, पितृवधात्मकः -का -कं.—(Committing parricide) पितृघ्नः -घ्नी -घ्नं, पितृघातकः &c.

PARRICIDE, s. (One who murders his father) पितृहा m. (न्), पितृहन्ता m. (न्), पितृघ्नः, पितृघाती m. (न्), पितृघातकः, पितृघातुकः, —(Murder of a father) पितृहत्या, पितृवधः, पितृघातः, पितृहिंसा.

PARROT, s. शुकः, कीरः, वक्रचञ्चुः m., वक्रतुण्डः, रक्ततुण्डः, चिमिः m., चिरिः m., रक्तपादः, कुमारः, किङ्किरातः, फलाशनः, फलादनः, दाडिमप्रियः, मेधावी m. (न्); 'a flock of parrots,' शौकं.

To PARRY, निवृ (c. 10. -वारयति -यितुं), वृ, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं), प्रतिघातं कृ, वारणं कृ.

To PARSE, *v. a.* पदभञ्जनं कृ, पदच्छेदं कृ, लिङ्गनिर्देशं कृ, शब्दान्वयनिरूपणं कृ.

PARSEE, s. (Persian) पारसीकः, पारसिकः.

PARSIMONIOUS, a. अल्पव्ययी -यिनी -यि (न्), व्ययशङ्कितः -ता -तं, व्ययपराङ्मुखः -खा -खं, परिमितव्ययी &c., मितव्ययी &c., कृपणः -णा -णं, अर्थपरः &c. *See* MISERLY.

PARSIMONIOUSLY, *adv.* अल्पव्ययेन, अल्पव्ययपूर्व्वं, सकार्पण्यं, कृपणवत्.

PARSIMONIOUSNESS, PARSIMONY, s. अल्पव्ययः, स्वल्पव्ययः, कार्पण्यं, कृपणता-त्वं, व्ययशङ्का, व्ययपराङ्मुखता, परिमितव्ययः, मितव्ययः, दृढमुष्टित्वं.

PARSING, s. पदभञ्जनं, पदच्छेदः, शब्दान्वयनिरूपणं, लिङ्गनिर्देशः.

PARSLEY, s. (Apium involucratum) अजमोदा.

PARSON, s. ग्रामपुरोहितः, ग्रामयाजकः, ग्रामधर्म्माध्यक्षः, ग्रामगुरुः m., ग्रामाचार्य्यः, धर्म्माध्यापकः, उपाध्यायः.

PARSONAGE, s. धर्म्माध्यापकगृहं, ग्रामपुरोहिताध्युषितं गृहादि.

PART, s. (Portion, piece) भागः, अंशः, खण्डः -ण्डकः, विभागः, शकलः -लं, भिन्नं, भित्तं, भित्तिः f., लवः, दलं, विदलं, अर्द्धः.—(A portion or division considered by itself, but not really separated) देशः, प्रदेशः, उद्देशः, एकदेशः, भागः, अङ्गं, अवयवः; 'part of a wood,' वनैकदेशः, वनोद्देशः.—(Component part, member) अङ्गं, अवयवः; 'inward part,' अन्तरङ्गं.—(Particular division) प्रकरणं, विषयः, अङ्गं; 'minor part,' प्रत्यङ्गं.—(Share, portion allotted) विभागः, भागः, अंशः, उद्धारः, भाजितं, भाज्यं, खण्डः -ण्डकः.—(Interest, concern in) सम्बन्धः, अभिसम्बन्धः.—(Side, party) पक्षः; 'to take one's part,' पक्षं ग्रह् or उद्ग्रह्, पक्षोद्ग्राही or पक्षपाती &c. भू.—(Particular business or duty) कर्म्म n. (न्), कार्य्यं, धर्म्मः, स्वकर्म्म n., स्वधर्म्मः, वृत्तिः f., प्रवृत्तिः f., गुणः.—(Character in a drama) भूमिका, वृत्तिः f.; 'act the part of a dear friend towards the rival wives,' कुरु प्रियसखीवृत्तिं सपत्नीजने.—(Parts, qualities) गुणाः m. pl., बुद्धिः f.—(Parts, region) देशः, प्रदेशः, उद्देशः; 'for the most part,' प्रायस्, प्रायशस्, प्रायेण, भूयस्, भूयिष्ठं, बाहुल्येन, बहुशस्, बहुतरं; 'by parts, in parts,' अंशतस्, भागतस्, भागशस्, अवयवशस्; 'in part, partly,' अंशतस्, भागतस्, किञ्चित्, ईषत्; 'in two parts,' द्विधा; 'in four parts,' चतुर्धा; 'in many parts,' बहुधा; 'in how many parts?' कतिधा; 'in good part,' सानुग्रहं, प्रसन्नं, हितं, प्रियं, अनुकूलं.

To PART, *v. a.* (Disunite, divide, separate) वियुज्, विश्लिष्, भिद्, विभिद्, विच्छिद्, विचिन्, पृथक्कृ, शकलीकृ.—(Distribute, divide into shares) विभज्, प्रविभज्, संविभज्, पृथक् पृथग् विभज्, अंश् (c. 10. अंशयति -यितुं), व्यंस् (c. 10. -अंसयति -यितुं), वण्ट्, परिकॢप्.—(Part the hair) सीमन्त (nom. सीमन्तयति -यितुं).

To PART, *v. n.* (Be separated or divided) वियुज् in pass. (-युज्यते), विभिद् in pass. (-भिद्यते), भिद्, विश्लिष् (c. 4. (-श्लिष्यति -श्लेष्टुं), विच्छिद् in pass., विगम् (c. 1. -गच्छति -गन्तुं), वियुक्तः -क्ता -क्तं भू.—(Open in two, cleave open) स्फुट् (c. 1. स्फोटति, c. 6. स्फुटति -टितुं), दल् (c. 1. दलति -लितुं), विदल्, विदलीभू, विदलितः -ता -तं भू.—(Depart) अपगम्, व्यपगम्, अपया, व्यपया.—(Bid farewell) आमन्त्र्, अनुमन्त्र्.—(Part with) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्. *See* RESIGN.

To PARTAKE, *v. n.* अंशं or भागं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or हृ (c. 1. हरति, हर्त्तुं), भागी -गिनी -गि भू, भज् (c. 1. भजते, भक्तुं), संविभज्, अंशं भुज् (c. 7. भुनक्ति, भुङ्क्ते, भोक्तुं); 'in common with another,' अन्येन सह भुज् or भज्.

PARTAKER, s. भागी m. -गिनी f. (न्), अंशी m. -शिनी f. (न्), संविभागी &c., भागहारी m. (न्), भागहरः, भागग्राही m., अंशहारी m., अंशहरः, अंशग्राही m., अंशकः, अंशभोगी m., सहभोगी m., सहभागी m., भाक् m. (ज्) in comp., भुक् m. (ज्) in comp.

PARTED, *p. p.* (Separated) वियुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, विभक्तः &c., विविक्तः &c., विगतः -ता -तं: 'as the hair,' सीमन्त्यमानः -ना -नं.

PARTERRE, s. पुष्पवाटी -टिका, कुसुमाकरः, पुष्पाकरः, उद्यानं.

PARTIAL, a. (Inclined to favor one side) पक्षपाती -तिनी -ति (न्), पक्षस्नेही &c., स्वपक्षस्नेही &c., पक्षानुरागी &c., पक्षोद्ग्राही &c., सपक्षपातः -ता -तं, पक्षपातकृतस्नेहः -हा -हं, स्वपक्षकृतस्नेहः &c., सङ्गी &c., सङ्गवान् -वती -वत् (त्), सङ्गयुक्तः -क्ता -क्तं, पाक्षिकः -की -कं.—(Not fair) असमः -मा -मं, असमदर्शी &c., असमदृष्टिः -ष्टिः -ष्टि, असमानवृत्तिः -त्तिः -त्ति.—(Not general or total) असार्व्वत्रिकः -की -कं, अपूर्णः -र्णा -र्णं, असम्पूर्णः &c., असकलः -ला -लं, असमग्रः -ग्रा -ग्रं, अव्यापी &c., अव्यापकः -का -कं, अव्याप्तः -प्ता -प्तं, असाधारणः -णा -णी -णं, असर्व्वव्यापी &c., एकाङ्गी &c., एकदेशी &c., एकपक्षी &c., खण्डितः -ता -तं, खण्ड in comp.; 'partial deluge,' खण्डप्रलयः; 'partial shower,' खण्डवृष्टिः f.; 'partial eclipse,' खण्डग्रासः.

PARTIALITY, s. (Inclination to favor one side) पक्षपातः -तिता, पक्षस्नेहः, स्वपक्षस्नेहः, पक्षोद्ग्राहः -हित्वं, सङ्गः, स्नेहः, असमता, असमदृष्टिः f., असमबुद्धिः f., पक्षता, पक्षानुरागः.—(Fondness for) स्नेहः, रुचिः f., अभिरुचिः f., अनुरागः, अनुरक्तिः f., प्रणयः, प्रेम n. (न्).

PARTIALLY, *adv.* (With undue bias to one side) सपक्षपातं, सपक्षभेदं, पक्षपातपूर्व्वं, सङ्गपूर्व्वं, असमं, असमदृष्ट्या.—(Not generally or totally) असर्व्वतस्, असर्व्वथा, सखण्डतस्, सखण्डशस्, अंशतस्, असकलं, असाकल्येन, अकृत्स्नशस्, असमग्रं, भागतस्, एकदेशेन, एकभागेन, एकाङ्गतस्, अपूर्णं, असम्पूर्णं, खण्ड or खण्डित in comp.; as, 'partially learned,' खण्डविद्यः -द्या -द्यं or खण्डितविद्यः.

PARTIBLE, *a.* विभाज्यः -ज्या -ज्यं, अंशनीयः -या -यं, अंश्यः -श्या -श्यं, अंशयितव्यः -व्या -व्यं, विघटनीयः -या -यं, पृथक्करणीयः &c.

PARTICIPANT, *a.* भागी -गिनी -गि (न्), संविभागी &c., अंशी &c., समांशी &c., अंशग्राही -हिणी &c., भाक् *m.f.n.* (ज्). *See* PARTAKER.

To PARTICIPATE, *v. n.* भज्, संविभज्, भागं or अंशं ग्रह् or हृ. *See To* PARTAKE.

PARTICIPATION, *s.* अंशग्रहणं, भागग्रहणं, अंशहरणं, भागहरणं, भजनं, संविभागः -गित्वं, संविभजनं, अंशभोगः, अंशप्राप्तिः *f.*, अंशप्रापणं, सहभोगः, सहभुक्तिः *f.*

PARTICIPIAL, *a.* सकालकृदन्तरूपः -पा -पं, कृदन्तधर्म्मकः -का -कं.

PARTICIPLE, *s.* सकालकृदन्तः, कालबोधककृदन्तः, कृदन्तः.

PARTICLE, *s.* कणः, कणिका, कणिकः, लवः, लेशः, अणुः *m.*, परमाणुः *m.*, कला, काकिणिका, सूक्ष्मः, सूक्ष्माणुः, तिलः, अंशुः *m.*, अंशः, क्षुद्रांशः, सूक्ष्मांशः, तृत्तं, रेणुः *m.*; 'very minute particle,' अणुरेणुः *m.f.*, अतिसूक्ष्माणुः *m.*, सूच्यग्रमृत्तिका.—(In grammar) अव्ययः -यं, अव्ययशब्दः, निपातः; 'declinable particle,' अर्द्धाव्ययं.

PARTICULAR, *a.* (Noting something peculiar or distinctive) विशेष in comp., विशिष्टः -ष्टा -ष्टं, विशेषकः -का -कं, सविशेषः -षा -षं, विशेषवान् -वती -वत् (त्), विशेषणः -णा -णं, अवच्छेदकः -का -कं, विच्छेदकः &c., परिच्छेदकः &c.; 'particular mark,' विशेषलक्षणं; 'particular duty,' विशेषधर्म्मः; 'particular condition,' दशाविशेषः; 'at particular times,' विशेषकाले, कालविशेषे.—(Distinct individual) विशिष्टः &c., विशेष in comp., व्यक्तः -क्ता -क्तं, व्यक्तिकः -का -कं, पृथग्व्यक्तिकः &c., पृथगात्मकः &c., उद्दिष्टः -ष्टा -ष्टं, उद्देशकः -का -कं, भिन्नः -न्ना -न्नं, विविक्तः &c.; 'particular person,' अमुकजनः, अमुकव्यक्तिः *f.*—(Not general) असाधारणः -णा -णी -णं, असामान्यः -न्या -न्यं, अव्यापी -पिनी -पि (न्), अव्यापकः -का -कं, अव्याप्यः -प्या -प्यं.—(Not common) अप्राकृतः -ती -तं, अलौकिकः -की -कं, अप्रसिद्धः -द्धा -द्धं.—(Special, more than ordinary) विशेष in comp., विशेषकः &c., अधिकोत्तरः -रा -रं, लोकोत्तरः &c.; 'particular rule,' विशेषविधिः *m.*; 'particular occasion,' समयविशेषः.—(Odd, singular) विलक्षणः -णा -णं, अपूर्व्वः -र्व्वा -र्व्वं, अलौकिकः -की -कं.—(Minute, attentive to particulars, strict) सूक्ष्मदर्शी -र्शिनी &c., सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मः -क्ष्मा -क्ष्मं.

PARTICULAR, *s.* विशेषः, अवच्छेदः, व्यवच्छेदः, विच्छेदः.—(Single or distinct point) अर्थः, विषयः, प्रकरणं, विशेषः; 'the particulars of a story,' वृत्तान्तः; 'he told all the particulars,' सर्व्ववृत्तान्तम् अकथयत्; 'in particular,' विशेषतस्.

PARTICULARITY, *s.* (Distinct notice of particulars) एकैकशो निर्देशः or समुद्देशः or उद्देशः, विशेषकथनं, सर्व्ववृत्तान्तकथनं, विशेषनिर्देशः, व्यवच्छेदः.—(Individuality) व्यक्तता, अव्याप्तिः *f.*, अव्यापकत्वं, असाधारणता.—(Distinctness) भिन्नता, व्यक्तिः *f.*, पार्थक्यं, विशिष्टता.—(Detail) विवरणं, विस्तारः.

PARTICULARIZATION, *s.* विशेषवर्णनं -ना, विशेषनिर्देशः, विशेषकथनं, सर्व्ववृत्तान्तकथनं, समुद्देशः, व्यवच्छेदः, परिसंख्या -ख्यानं.

To PARTICULARIZE, *v. a.* एकैकशो निर्दिश् (c. 6. -दिशति -देष्टुं) or उद्दिश् or समुद्दिश् or कथ् (c. 10. कथयति -यितुं) or वर्ण् (c. 10. वर्णयति -यितुं), विशेषवर्णनं कृ, विशेषनिर्देशं कृ, विशेषकथनं कृ, विशेष (nom. विशेषयति -यितुं), विशिष् (c. 7. -शिनष्टि -शेष्टुं).

PARTICULARIZED, *p. p.* एकैकशो निर्दिष्टः -ष्टा -ष्टं or समुद्दिष्टः &c. or उद्दिष्टः &c. or कथितः -ता -तं, विशेषितः &c., व्यवच्छिन्नः -न्ना -न्नं.

PARTICULARLY, *adv.* (In an especial manner) विशेषतस्, विशेषेण, सविशेषं, मुख्यशस्, प्रधानतस्.—(Distinctly, severally) व्यक्तं, विविक्तं, पृथक्, अवयवशस्.—(Minutely) अतिसूक्ष्मत्वेन.

PARTING, *s.* (Separation) वियोगः, विप्रयोगः, विगमः, विरहः, विश्लेषः, प्रविश्लेषः, विप्रलम्भः, भेदः, विभेदः, विभागः, प्रविभागः, पृथग्भावः, पृथक्त्वं, अपगमः.—(Of the hair) सीमन्तः.

PARTING, *a.* (Given at parting) प्रस्थानिकः -की -कं, प्रास्थानिकः -की -कं, प्रस्थान or प्रयाण in comp.; as, 'a parting embrace,' प्रस्थानालिङ्गनं.

PARTISAN, *s.* पक्षपाती *m.* (न्), सपक्षः, एकपक्षः, पक्षकः, पक्षधारी *m.*, पक्षधरः, पक्षावलम्बी *m.* (न्), पक्षः, पार्श्वकः, पार्श्विकः, सहोत्थायी *m.* (न्), अर्थी *m.*, अानुग्राहकः, सङ्गी *m.*, अनुषङ्गी *m.* (न्).

PARTISANSHIP, *s.* पक्षपातिता, पक्षपातः, पक्षधारणं -रिता, पक्षावलम्बनं.

PARTITION, *s.* (Separation) परिच्छित्तिः *f.*, परिच्छेदः. *See* PARTING, *s.*—(Division of shares) विभागः, विभागकल्पनं -ना, भागकरणं, भागः, अंशनं, उद्धारः, उद्धारविभागः, वण्टनं.—(That by which separation is made, a wall, &c.) भित्तिः *f.*, भित्तिका, व्यवधानं, व्यवधा, सन्धिः *m.*

To PARTITION, *v. a.* (Divide) विभिद्, भिद्, विच्छिद्, परिच्छिद्, छिद्, विभज्, पृथक्कृ.—(Distribute into shares) विभज्, प्रविभज्, संविभज्, अंश्, अंशं, अंशांशि दा or कॢप् or परिकॢप्, वण्ट्, वण्टनं कृ.

PARTITIONED, *p. p.* विभक्तः -क्ता -क्तं, प्रविभक्तः &c., संविभक्तः &c., अंशितः -ता -तं, परिकल्पितः &c., उद्धृतः &c., कृतवण्टनः -ना -नं.

PARTLY, *adv.* अंशतस्, भागतस्, किञ्चित्, ईषत्, कियत्, कियत्पर्य्यन्तं, अल्पं, अल्पमात्रं.

PARTNER, *s.* सहायः, सहकारी *m.* (न्), सङ्गी *m.* (न्), सम्भूयकारी *m.*, अंशी *m.*, समांशी *m.*, संसर्गी *m.*, अंशग्राही *m.*, अंशभोगी *m.*, सहभोगी *m.*, सहभागी *m.*, सहवर्त्ती *m.*, भागी *m.*, प्रतियोगी *m.*, उपसङ्गी *m.*, अनुषङ्गी *m.*, सजुः *m.* (स्), पक्षकः.—(Partner of joys and sorrows, as a husband or wife) समदुःखसुखः -खा. *See* HUSBAND, WIFE, MATE, &c.

PARTNERSHIP, *s.* समांशिता -त्वं, सहायता, सम्भूयकारिता -त्वं, सम्भूयसमुत्थानं, संसर्गिता -त्वं, प्रतियोगिता, सहकारिता.

PARTRIDGE, *s.* तित्तिरः, तित्तिरिः *m.*, चकोरः -रकः, कृकणः, क्रकणः, क्रकरः, कपिञ्जलः, टिट्टिभः; 'flock of partridges,' तैत्तिरं.

PARTURIENT, *a.* आसन्नप्रसवा, आसन्नप्रसववेदना, प्रसवोन्मुखा, उपस्थितप्रसवकाला, आसन्नप्रसवकाला.

PARTURITION, *s.* प्रसवः, प्रसूतिः *f.*, सूतिः *f.*, सूः *f.*, सूत्या, जननं, उत्पादनं.

PARTY, *s.* (Side, cause) पक्षः, मतं; 'one's own party,' आत्मपक्षः, स्वपक्षः; 'belonging to one's own party,' स्वपक्षावलम्बी *m.*, स्वपक्षपाती, आत्मपक्षधारी *m.* (न्); 'one of the opposite party,' विपक्षः, प्रतिपक्षः; 'attachment to a party,' पक्षपातः. *See* PARTIALITY, PARTISANSHIP.—(Number of persons associated in opposition to others) पक्षः, सपक्षाः *m. pl.*, सपक्षाणां गणः

or संसर्गः or समूहः or सङ्घातः or सङ्घः, शाखा.—(One of two litigants) वादी m. (न्), अर्थी m.—(Set of people) गणः, पंक्तिः f., समूहः, सङ्घः, सङ्घातः, मण्डलं, दलं; 'a party of men,' पुरुषगणः, जनसमूहः; 'of soldiers,' सैन्यदलं; 'of rogues,' धूर्त्तमण्डलं.—(Assembly) सभा, पंक्तिः f., समाजः, रासेरसः.—(Convivial party) सहभोजनं, सम्भोजनं, सहपानं, सम्प्रीतिः f., उत्तालं.—(Person particularized) विवक्षितजनः, व्यक्तिः f., मनुष्यः, जनः, विवक्षितमनुष्यः.—(One concerned or interested) सम्बन्धी m. (न्), भागी m., अंशी m.

PARTY, *a.* पक्ष in comp., पाक्षिकः -की -कं, पाक्षः -क्षी -क्षं.

PARTY-COLORED, *a.* नानावर्णः -र्णा -र्णं, नानारङ्गः -ङ्गा -ङ्गं, चित्रविचित्रः -त्रा -त्रं, विचित्रवर्णः &c., विचित्ररङ्गः &c.

PARTYISM, *s.* पक्षपातिता. *See* PARTISANSHIP, PARTIALITY.

PARTY-MAN, *s.* पक्षपाती m. (न्), पक्षकः, पाक्षिकः. *See* PARTISAN.

PARTY-WALL, *s.* भित्तिः f., भित्तिका, कुड्यं -ड्यकं. *See* PARTITION.


PHARMACOPOLIST, *s.* औषधविक्रेता *m.* (तृ), भेषजविक्रेता *m.*, अगदविक्रयी *m.* (न्).

PHARMACY, *s.* औषधसंस्कारः, भेषजसंस्कारः, अगदसंस्कारः, औषधक्रिया, औषधसंस्कारविद्या, औषधकरणविद्या, अगदसंस्कारविद्या, चिकित्सा.

PHAROS, *s.* दीपस्तम्भः, दीपगृहं, दीपागारं, आकाशदीपः.

PHASE, PHASIS, *s.* दर्शनं, सन्दर्शनं, दर्शनभेदः, दर्शनप्रकारः.

PHEASANT, *s.* जीवञ्जीवः, जीवजीवः, जिवाजिवः, चीजनः, कृकणः.

PHENIX, *s.* स्वभस्मजपक्षी *m.* (न्), कविकल्पितः स्वभस्मोत्पन्नमानः पक्षिविशेषः.—(Singularly eminent person) अद्वितीयः. *See* PARAGON.

PHENOMENON, *s.* (Any thing visible, an appearance of any kind) दृष्टिविषयः, दृष्टि[illegible], दृग्गोचरो विषयः, दृष्टिगोचरो विषयः, दर्शनं.—(Remarkable or unusual appearance) अद्भुतदर्शनं, अद्भुतविषयः, अद्भुतं, उत्पातः, उपद्रवः.

PHIAL, *s.* क्षुद्रकूपी, काचकूपी, काचपात्रं, अल्पपरिमाणा काचकूपी.

PHILANTHROPIC, PHILANTHROPICAL, *a.* जनप्रियः -या -यं, लोकप्रियः &c., नरप्रियः &c., जनवल्लभः -भा -भं, जनहितैषी -षिणी -षि (न्), जनहितेच्छुः -च्छुः -च्छु, जनहितेप्सुः -प्सुः -प्सु, जनोपकारशीलः -ला -लं, जनोपकारी &c., लोकोपकारी &c., परोपकारशीलः &c., सर्व्वोपकारी &c., विश्वोपकारी &c., सर्व्वहितैषी &c., जगदुपकारी &c., विश्वमित्रः -त्रा -त्रं, जगन्मित्रः &c., जगद्वत्सलः -ला -लं, जगत्सुहृद् *m. f. n.*

PHILANTHROPIST, *s.* जनहितैषी *m.* (न्). *See* PHILANTHROPIC.

PHILANTHROPY, *s.* जनप्रियता, लोकप्रियता, नरप्रियता, जनप्रीतिः *f.*, जनहितैषा, जनहितेच्छा, जनहितेप्सा, सर्व्वजनप्रीतिः *f.*, सर्व्वजनहितैषा, सर्व्वप्राणिप्रियता, सर्व्वभूतदया, जनोपकारशीलता, सर्व्वोपकारशीलता, विश्वप्रीतिः *f.*, जगत्सौहृदं.

PHILIPPIC, *s.* भर्त्सनार्थकवाक्यं, भर्त्सनात्मकवाक्यं, भर्त्सनवाक्यं, भर्त्सनारूपभाषणं, भर्त्सनारूपवाक्प्रबन्धः.

PHILOLOGER, PHILOLOGIST, *s.* शब्दशास्त्रज्ञः, शब्दविद्याज्ञः, शाब्दिकः, शब्दशास्त्री *m.* (न्), शब्दशास्त्रवेत्ता *m.* (तृ), शब्दशास्त्रविद्, वैयाकरणः, व्युत्पत्तिज्ञः.

PHILOLOGICAL, *a.* शाब्दिकः -की -कं, शब्दशास्त्रीयः -या -यं, शब्दशास्त्रसम्बन्धी, शब्दव्युत्पत्तिविषयः -या -यं, शब्दोत्पत्तिविषयकः -का -कं.

PHILOLOGY, *s.* शब्दविद्या, शब्दशास्त्रं, शब्दव्युत्पत्तिविद्या, शब्दोत्पत्तिविद्या, शब्दशासनविद्या.

PHILOMATH, *s.* विद्यानुरागी *m.* (न्), विद्याप्रियः, विद्यानुसेवी *m.*, विद्याव्यसनः, विद्याभक्तः, जिज्ञासुः *m.*

PHILOMATHY, *s.* विद्यानुरागः, विद्यानुसेवनं, विद्याभक्तता, जिज्ञासा.

PHILOPROGENITIVENESS, *s.* अपत्यस्नेहः, पुत्रस्नेहः, प्रजास्नेहः.

PHILOSOPHER, *s.* ज्ञानी *m.* (न्), महाज्ञानी *m.*, ज्ञानवान् *m.* (त्), विद्वान् *m.* (स्), पण्डितः, पण्डितबुद्धिः *m.*, विद्यावान् *m.* (त्), ज्ञाननिष्ठः, ज्ञानविज्ञाननिष्ठः, प्राज्ञः, प्रज्ञावान् *m.*, तत्त्ववित् *m.*, तत्त्वज्ञः, तत्त्वज्ञानी *m.*, तत्त्वविचारकः, तात्त्विकः, पदार्थविज्ञानी *m.*, पदार्थपरिज्ञानी *m.*, तार्किकः, नैयायिकः, भट्टः, दमनः.

PHILOSOPHER'S-STONE, *s.* स्पर्शमणिः *m.*, स्पर्शप्रस्तरः, रसेन्द्रः; 'the gold proceeding from its touch,' स्पर्शमणिप्रभवं.—(Possession securing every thing desired, fabled by the Hindús either as a tree, or cow, or gem) कल्पद्रुमः, कल्पवृक्षः, कल्पतरुः *m.*, कल्पलता, कामधेनुः *f.*, कामदुघा, कामधुक् *f.*, कामदः, चिन्तामणिः *m.*

PHILOSOPHIC, PHILOSOPHICAL, *a.* (Pertaining to philosophy) तत्त्वज्ञानविषयकः -का -कं, तत्त्वज्ञानसम्बन्धी &c., ज्ञानविज्ञानसम्बन्धी &c., ज्ञानसम्बन्धी &c., विद्यासम्बन्धी &c., तर्कादिविद्यासम्बन्धी &c., न्यायादिविद्याविषयः -या -यं.—(Skilled in philosophy) तत्त्वज्ञाननिष्ठः -ष्ठा -ष्ठं, ज्ञाननिष्ठः &c., ज्ञानपरः -रा -रं, विद्यापरः -रा -रं, ज्ञानविज्ञाननिष्ठः &c., तत्त्वविचारनिष्ठः &c., तत्त्वविचारपरः &c.

PHILOSOPHICALLY, *adv.* तत्त्वशास्त्रानुसारेण, न्यायशास्त्रानुसारात्, तत्त्वज्ञानतस्, ज्ञानतस्, ज्ञानविज्ञानतस्, तत्त्वतस्.

To PHILOSOPHIZE, *v. n.* तत्त्वान्वीक्षणं कृ, तत्त्वविचारं कृ, तत्त्वजिज्ञासां कृ, तत्त्वनिरूपणं कृ, तत्त्वनिर्णयं कृ, ज्ञानविज्ञानविचारं कृ.

PHILOSOPHY, *s.* तत्त्वज्ञानं, तत्त्वविज्ञानं, तत्त्वविद्या, ज्ञानं, विज्ञानं, ज्ञानविज्ञानं, तत्त्वशास्त्रं, ज्ञानशास्त्रं, पाण्डित्यं.—(Moral philosophy) नीतिः *f.*, नीतिविद्या, नीतिशास्त्रं.—(Logical) तर्कविद्या, तर्कशास्त्रं, तर्कः, न्यायः, न्यायशास्त्रं, न्यायविद्या, विचारविद्या, आन्वीक्षिकी.—(Natural) पदार्थविज्ञानं, पदार्थविद्या, पदार्थशास्त्रं.—(Stoicism) औदास्यं, उदासीनता.

PHILTER, *s.* वशीकरणार्थं पेयौषधं, वशीकरणौषधं, अभिचारौषधं, संवदनौषधं, संवदनं, वशक्रिया.

PHIZ, *s.* मुखं, वदनं, आननं, आस्यं, वक्त्रं, श्रीमुखं.

PHLEBOTOMIST, *s.* सिरावेधकः, शिरावेधकः, रक्तस्रावकः, रक्तस्रावी, शिराछेदकः, शिरामोक्षकः, शिराच्छिद् *m.*, शिराविद् *m.* (ध्), रक्तमोचकः.

PHLEBOTOMY, *s.* शिरावेधनं, सिरावेधनं, शिरावेधः, शिरावेधनविद्या, शिराछेदः -दनं, शिरामोक्षः -क्षणं, रक्तमोक्षणं, रक्तमोचनं, रक्तस्रावणं, असृक्स्रावः.

PHLEGM, *s.* कफः, श्लेष्मा *m.* (न्), श्लेष्मकः, क्लेदनः, क्लेदकः, शिङ्घाणकः, सिङ्घाणकः, सङ्घातः, लसनः, खटः, बलाशः, बलहा *m.* (न्), निद्रासञ्जननं.—(Dulness, coldness) जडता, जाड्यं, मन्दता, मान्द्यं.—(Removing phlegm) श्लेष्मघ्नः -घ्नी -घ्नं, कफनाशनः -ना -नं.

PHLEGMAGOGUE, *s.* श्लेष्मघ्नं, श्लेष्महः, कफनाशनं, कफसारकम् औषधं.

PHLEGMATIC, *a.* (Relating to phlegm) कफसम्बन्धी &c., श्लेष्मसम्बन्धी &c.—(Abounding in it, having it) श्लेष्मलः -ला -लं, श्लेष्मणः -णा -णं, श्लेष्मवान् -वती -वत् (त्), कफी -फिनी -फि (न्), कफेलुः -लूः -लु, कफमयः -यी -यं, कफप्रचुरः -रा -रं, बहुकफः -फा -फं.—(Generating or exciting it) कफकरः -री -रं, कफवर्धकः -का -कं, कफवर्धनः -नी -नं, कफजनकः &c., कफोत्पादकः &c., श्लैष्मिकः -की -कं, श्लेष्मजनकः &c.—(Proceeding from it) श्लेष्मजः -जा -जं.—(Dull, apathetic) जडः -डा -डं, जडप्रकृतिः -तिः -ति, जडस्वभावः -वा -वं, शीतप्रकृतिः &c., शीतः -ता -तं, मन्दः -न्दा -न्दं.

PHLEME, *s.* पशुसिरावेधनी, पशुरक्तमोक्षणयन्त्रं. *See* FLEAM.

PHŒNIX, *s.* कल्पितकल्पितः स्वभस्मजन्मपक्षी *m.* (न्). *See* PHENIX.

PHONETIC, *a.* शाब्दिकः -की -कं, शाब्दः -ब्दी -ब्दं, यथाशब्दः -ब्दा -ब्दं, यथाक्षरः -रा -रं, ध्वनिसम्बन्धी &c., स्वरसम्बन्धी &c., ध्वनिविषयकः -का -कं.

PHONETICS, PHONICS, *s.* ध्वनिविद्या, ध्वनिशास्त्रं, स्वरविद्या.

PHONOCAMPTIC, *a.* ध्वनिपरिवर्तकः -र्का -कं, ध्वनिपरिवर्तनकारी -रिणी &c.

PHOSPHOR, PHOSPHORUS, *s.* (In chemistry) प्रकाशदः.—(Morning star) प्रातर्नक्षत्रं, प्रातरुदितनक्षत्रं, शुक्रः.

PHRASE, *s.* (Short sentence) वाक्यं, वाक् *f.* (च्), उक्तिः *f.*, उक्तं, वचनं.—(Particular mode of speech) विशेषवाक्यं, वाक्यविशेषः, वाक्यप्रकारः, वाक्यभेदः, वाग्व्यापारः, वाग्रीतिः *f.*, वाग्व्यवहारः, वाग्धारा, भाषणसम्प्रदायः, भाषणपर्यायः, भाषणप्रकारः.

PHRASEOLOGY, *s.* वाग्व्यापारः, वाग्रीतिः *f.*, वाक्यरीतिः *f.*, वाग्व्यवहारः, वाग्वृत्तिः *f.*, वाक्यपर्यायः, भाषणपर्यायः, वाक्यरचना, शब्दरचना, उक्तिपर्यायः, उक्तिव्यापारः, उक्तिः *f.*; 'dramatic phraseology,' नाट्योक्तिः *f.*

PHRENETIC, *a.* उन्मत्तः -त्ता -त्तं, सोन्मादः -दा -दं. *See* FRANTIC.

PHRENITIS, PHRENSY, *s.* (In medicine) सन्निपातज्वरः.—(Madness) उन्मादः, सम्मादः, उन्मादवायुः *m.*

PHRENOLOGY, *s.* कपाललक्षणविद्या, कपालविद्या, कपालसामुद्रिकं.

PHTHISIC, *s.* (Dyspnœa) श्वासावरोधः, श्वासकृच्छ्रं, दुःश्वासः.

PHTHISICAL, *a.* क्षयरोगी -गिणी -गि (न्), क्षयी -यिणी -यि (न्), श्वासावरोधविशिष्टः -ष्टा -ष्टं, श्वासकृच्छ्रविशिष्टः &c., दुःश्वासी &c.

PHTHISIS, *s.* क्षयः, क्षयरोगः, क्षयथुः *m.*, कफक्षयः, यक्ष्मा *m.* (न्), राजयक्ष्मा *m.*, यक्ष्मरोगः, राजयक्ष्मा *m.*, रोगराजः. *See* CONSUMPTION.

PHYLACTERY, *s.* रक्षणी, कवचः -चं, रक्षणलिपिः *f.*

PHYSIC, *s.* (Art of healing diseases) चिकित्सा -त्सनं, वैद्यकं, वैद्यकर्म्म *n.* (न्), वैद्यक्रिया, वैद्योपचारः, उपचारः, उपचार्यः, उपचर्या, औषधोपचारः, औषधप्रयोगः, भेषजप्रयोगः, रुक्प्रतिक्रिया.—(Medicine) औषधं, भेषजं, भैषजं -ज्यं, अगदः.

To PHYSIC, *v. a.* औषधं दा, भेषजं दा, कित् in des. (चिकित्सति -त्सितुं), भिषज् (nom. भिषज्यति), उपचर् (c. 1. -चरति -रितुं), औषधप्रयोगं कृ, औषधोपचारं कृ, उपचारं कृ.

PHYSICAL, *a.* (Pertaining to natural or material things as opposed to moral) साकारपदार्थसम्बन्धी &c., साकारवस्तुसम्बन्धी &c., साकारपदार्थरूपः -पा -पं, साकारद्रव्यरूपः &c., स्थूलपदार्थसम्बन्धी &c., स्थूलपदार्थरूपः &c., सिद्धपदार्थसम्बन्धी &c., साकारः -रा -रं, स्थूलः -ला -लं, जडः -डा -डं; 'physical force,' बाहुबलं, साकारद्रव्यबलं, जडबलं; 'physical substance,' साकारवस्तु *n.*, साकारद्रव्यं, स्थूलवस्तु *n.*, स्थूलपदार्थः, अनात्मीयद्रव्यं. *See* MATERIAL.—(Medicinal). *See* the word.

PHYSICALLY, *adv.* स्वभावतस्, स्वभावेन -वात्, भावतस्, प्रकृतितस्, प्रकृत्या, जन्मतस्, जातितस्. *See* NATURALLY.

PHYSICIAN, *s.* चिकित्सकः, वैद्यः, भिषक् *m.* (ज्), चिकित्साजीवी *m.* (न्), भिषग्वृत्त्युपजीवी *m.*, रोगज्ञायकः, रोगहृत् *m.*, रोगहारी *m.*, रोगहा *m.* (न्), अगदङ्कारः, आयुर्वेदी *m.*, आयुर्वेदवृक् *m.* (श्), दोषज्ञः, प्राणाचार्यः. The physician of the gods is धन्वन्तरिः or काशिराजः. The twin sons of अश्विनी, called अश्विनौ, आश्विनेयौ, अश्विनीकुमारौ, अश्विनीपुत्रौ, अश्विनीसुतौ, are also physicians of heaven.

Hence some of the following names for an eminent physician: धन्वन्तरिः *m.*, अश्विनीकुमारः, अश्विनीपुत्रः, राजवैद्यः, शतमारी *m.* (न्).

Physicked, *p. p.* चिकित्सितः -ता -तं, कृतोपचारः -रा -रं.

Physics, *s. pl.* साकारपदार्थविज्ञानं, स्थूलपदार्थविज्ञानं, साकारपदार्थविद्या, साकारपदार्थशास्त्रं, पदार्थविज्ञानं, सिद्धपदार्थविज्ञानं.

Physiognomist, *s.* मुखलक्षणज्ञः, मुखलक्षणविद् *m.*, मुखसामुद्रिकः.

Physiognomy, *s.* (Art of discerning the character from the features) मुखलक्षणनिरूपणविद्या, मुखलक्षणनिरूपणात् स्वभावपरिच्छेदः. —(Countenance) मुखं, वदनं, आननं, आस्यं, वक्त्रं.

Physiologic, physiological, *a.* प्राणिधर्म्मगुणविद्यासम्बन्धी &c., प्राणिधर्म्मगुणविद्याविषयकः -का -कं.

Physiologist, *s.* प्राणिधर्म्मगुणविद्याज्ञः, प्राणिधर्म्मगुणवेत्ता *m.* (तृ).

Physiology, *s.* प्राणिधर्म्मगुणविद्या, प्राणिधर्म्मगुणज्ञानं, प्राणिधर्म्मगुणशास्त्रं, जन्तुगुणधर्म्मविद्या, द्रव्यतत्त्वज्ञानं.

Piacular, piaculous, *a.* प्रायश्चित्तकारी -रिणी -रि (न्), अघनाशकः -का -कं.

Pia-mater, *s.* मस्तिष्कावरणत्वक् *f.* (च्), मस्तिष्कावरणं.

Piano, *s.* (In music) मन्दं.—(A kind of instrument) तन्त्रीकवाद्यविशेषः.

Piazza, *s.* स्तम्भपंक्तिप्रान्तितो मण्डपपथः or मण्डपस्य छन्नपथः.

Picaroon, *s.* समुद्रयायी दस्युविशेषः or अपहारकविशेषः.

To pick, *v. a.* (Gather by plucking) अङ्गुलिभिर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं) or चि (c. 5. चिनोति, चेतुं) or अवचि or लू or छिद्; 'he picks a branch from the tree,' वृक्षपल्लवम् आदत्ते.—(Clean with the teeth or claws) दन्तैः or नखैः or अङ्गुलिभिः शुध् or मृज् or परिष्कृ.—(Pick a bone) अस्थिमांसम् दन्तैर् उत्कृष् (c. 1. -कर्षति -क्रष्टुं) or निष्कृष् or चर्व् (c. 1. चर्वति -र्वितुं), अस्थिपरिष्कारं कृ, अस्थिशोधनं कृ.—(Cull, select) उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, उद्ग्रह्, वृ, उद्धृ, चूर्णिं कृ.—(Separate with the fingers) अङ्गुलिभिः पृथक्कृ or खण्डीकृ.—(Pick off) प्रत्येकं or एकैकशो हृ or उद्धृ, पृथक् पृथग् उद्धृ.—(Pick out, select) उद्धृ, समुद्धृ.—(Pick out, pluck out) उत्पट् (c. 10. -पाटयति -यितुं), उल्लुच् (c. 1. -लुचति -चितुं), उद्धृ, समुद्धृ, उत्कृष्, उल्लुचनं कृ.—(Pick up) उद्धृ, समुद्धृ, आदा, ग्रह्, उद्ग्रह्, प्रतिग्रह्, उत्था in caus. (-थापयति -यितुं, rt. स्था), समुत्था.—(Pick the ear) कर्णशोधनं कृ, कर्णनिर्घर्षणं कृ.—(Pick the nose) नासाशोधनं कृ, नासानिर्घर्षणं कृ.—(Pick the teeth) दन्तशोधनं कृ, दन्तनिर्घर्षणं कृ.—(Pick the pocket) कोषस्थद्रव्यं छलेन अपहृ or हृ, कोषं छित्त्वा तत्रस्थद्रव्यम् अपहृ.—(Pick holes) छिद्रान्वेषणं कृ.

To pick, *v. n.* (Eat by morsels) अल्पाल्पशः or अल्पखण्डशः खाद्.

Pick, *s.* (Axe) पाषाणदारणः. *See* the next.—(Choice) उद्धारः, उद्धरणं, उद्धरणाधिकारः, वरणाधिकारः, विकल्पः -ल्पकः.

Pick-axe, *s.* पाषाणदारणः, पाषाणभेदनी, टङ्कः, शैलभित्तिः *f.*, शिलाकुट्टकः, खनित्रं.

Picked, *p. p.* उद्धृतः -ता -तं, उद्गृहीतः &c., हृतः &c., परिगणितः &c.

Picket, *s.* सेनायाः पुरतः स्थापितं रक्षकदलं, सञ्जनं, उपरक्षणं, सेनारक्षः. —(Stake) शङ्कुः *m.*, शल्यं.

Picking, *s.* (Plucking, selecting) ग्रहणं, अङ्गुलिभिर् ग्रहणं, उद्धरणं, उद्धारः, उद्धरणं.—(Stealing) अपहारः, अपहरणं, क्षुद्रद्रव्यहरणं.—(Extra gain) अधिकलाभः, अधिकप्राप्तिः *f.*, अयाचितलाभः.

Pickle, *s.* (Vegetable, &c., pickled) सन्धितं, सन्धानं, लवणशाकः, सन्धितशाकः, लवणितशाकः.—(Brine) लवणोदं, लवणं.—(State of difficulty) दुर्दशा, दुर्गतिः *f.*, दुरवस्था.

To pickle, *v. a.* सन्धा (c. 3. -दधाति -धातुं), सन्धितं -तां कृ, लवणीकृ, लवण (nom. लवणयति -यितुं), सलवणीकृ, उपस्कृ.

Pickled, *p. p.* सन्धितः -ता -तं, लवणितः -ता -तं, लवणीकृतः &c., उपस्कृतः &c.

Pick-pocket, *s.* कोषच्छेदकः, कोषस्थद्रव्यापहारकः, ग्रन्थिच्छेदकः, चित्ताभः.

Pic-nic, *s.* वनभोजनं, अरण्यभोजनं, गणभोजनं.

Pictorial, *a.* (Pertaining to pictures) चित्रसम्बन्धी &c., चित्रलेखसम्बन्धी &c.—(Illustrated by pictures) सचित्रः -त्रा -त्रं, चित्रयुक्तः -क्ता -क्तं, चित्रलिखितः -ता -तं.

Picture, *s.* चित्रं, चित्रलेखा, चित्रलिखितं, आलेख्यं, प्रतिमा -मानं, चित्रफलकः, प्रतिकृतिः *f.*, प्रतिरूपं, प्रतिच्छाया, प्रतिच्छन्दकं, प्रतिबिम्बं, बिम्बः -म्बं, रूपकीयः, प्रतिनिधिः *m.*, प्रतियातना; 'represented in a picture,' आलिखितः -ता -तं; 'immoveable as in a picture,' आलिखित इव निश्चलः.

To picture, *v. a.* (Paint a resemblance) चित्र् (c. 10. चित्रयति -यितुं), आलिख् (c. 6. -लिखति -लेखितुं), लिख्, चित्रं लिख्, वर्ण् (c. 10. वर्णयति -यितुं), बिम्ब (nom. बिम्बयति -यितुं), प्रतिबिम्ब, प्रतिमानं कृ, आलेख्यं कृ.—(Figure to one's self mentally) मनसा कॢप् or संकॢप् or भू (c. 10. भावयति -यितुं) or विभू.

Pictured, *p. p.* or *a.* चित्रगतः -ता -तं, चित्रसंस्थः -स्था -स्थं, आलिखितः -ता -तं, चित्रलिखितः &c., आलेख्यसमर्पितः &c., चित्रसमर्पितः &c., चित्रितः &c., प्रतिबिम्बितः &c., चित्रागतः &c.—(In the mind) मनसा कल्पितः -ता -तं.

Picture-frame, *s.* चित्रावरणकाष्ठं, चित्रपरिगतकाष्ठं, चित्रावरणं.

Picture-gallery, *s.* चित्रशाला, चित्ररक्षणशाला, आलेख्यशाला.

Picture-maker, *s.* चित्रकरः, चित्रकारः, चित्रकृत् *m.*, चित्रकर्म्मा *m.* (न्).

Picturesque, *s.* (Like a picture) चित्रसदृशः -शी -शं, चित्रोपमः -मा -मं, चित्रलेखातुल्यः -ल्या -ल्यं.—(Diversified with hill, dale, wood, &c.) आकुलः -ला -लं, आकीर्णः -र्णा -र्णं, पर्व्वतवननदीमिश्रितः &c., पर्व्वतनदीवनादिमिश्रितः &c.

To piddle, *v. n.* (Deal in trifles). *See To* peddle.—(Make water, as a child) बालकवद् मूत्रं कृ or मूत्रोत्सर्गं कृ, मूत्र् (c. 10. मूत्रयति -यितुं).

Pie, *s.* शष्कुली; 'number of pies,' शाष्कुलिकं.

Piebald, *a.* नानावर्णः -र्णा -र्णं, नानाङ्कः -ङ्का -ङ्कं, शबलः -ला -लं, कर्बुरः -रा -रं, चित्राङ्गः -ङ्गी -ङ्गं, चित्रविचित्रः -त्रा -त्रं; 'piebald horse,' हलाहः -हा, हालाहः -हा.

Piece, *s.* (Fragment, part separated from the whole) खण्डः -ण्डं -खण्डकः, लवः, अंशः, भागः, शकलः -लं, भिन्नं, भित्तं, भित्तिः *f.*, दलं, विदलं; 'in pieces,' खण्डशस्, खण्डं खण्डं, लवशस्, भागशस्; 'to break in pieces,' खण्डशः कृ, खण्डं खण्डं कृ, लवशः कृ, विदलीकृ, शकलीकृ, लवशः खण्ड् (c. 10. खण्डयति -यितुं); 'in many pieces,' बहुखण्डशः कृ, बहुलवशः कृ; 'in a hundred pieces,' शतखण्डशः कृ; 'to fall to pieces,' विदल् (c. 1. -दलति -लितुं), विदलीभू; 'broken in a hundred pieces,' शतचूर्णः -र्णा -र्णं.—(Part of any thing) भागः, अंशः, विभागः, खण्डः -ण्डकः, कल्कं; 'piece of wood,' काष्ठखण्डः; 'piece of cloth,' वस्त्रखण्डः.—(Separate composition or performance) रचना, प्रबन्धः, बन्धः or expressed by the word itself; as, 'a piece of poetry,' काव्यरचना, काव्यबन्धः, काव्यप्रबन्धः, कविता; 'piece of work,' कर्म्म *n.* (न्), कर्म्मप्रबन्धः.—(Piece of money) मुद्रा; 'gold piece,'

मुखबीमुद्रा.—(Piece of water) सलिलराशिः *m.*, जलराशिः *m.*, पयश्चयः, जलगुल्मः, जलाधारः, वारिचत्वरः -रं.—(Piece at chess, &c.) शारः -रिः *m.* -रिका, सारिः *m.* -री *f.* -रिका, सारः, खेलनी, नरः, नयः, शतुघ्नकः.—(A piece to each) प्रत्येकं, एकैकशस्, पृथक् पृथक्.—(Of a piece, of the same sort) एकप्रकारः -रा -रं.—(Of a piece with) सदृशः -शी -शं, अनुरूपः -पा -पं.—(Of a piece, without juncture) अखण्डः -ण्डा -ण्डं.

To PIECE, *v. a.* सन्धा (c. 3. -दधाति -धत्ते -धातुं), समाधा, संयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), अधिकखण्डं निविश् (c. 10. -वेशयति -यितुं). *See To* PATCH.

PIECED, *p. p.* सन्धितः -ता -तं, कृतसन्धिः -न्धिः -न्धि, सखण्डः -ण्डा -ण्डं.

PIECELESS, *a.* अखण्डः -ण्डा -ण्डं, खण्डहीनः -ना -नं, खण्डरहितः -ता -तं.

PIECEMEAL, *adv.* खण्डशस्, खण्डं खण्डं, खण्डशः खण्डशः, लवशस्, अंशतस्, भागशस्, विभागशस्, भागतस्, अंशांशि, पृथक्.

PIECEMEAL, *a.* खण्डी -ण्डिनी -ण्डि (न्), भागी &c., अंशी &c.

PIED, *a.* नानावर्णः -र्णा -र्णं, शबलः -ला -लं, चित्रितः -ता -तं, चित्राङ्गः -ङ्गी -ङ्गं, कर्बुरितः &c., चित्रविचित्रः -त्रा -त्रं.

PIER, *s.* (Mole, projecting into the sea) समुद्रीयसेतुः *m.*, सेतुः *m.*, सेतुबन्धः.—(Support of a bridge, &c.) स्तम्भः, उपस्तम्भः, स्थूणा.

To PIERCE, *v. a.* (Penetrate, enter) व्यध् (c. 4. विध्यति, व्यद्धुं), प्रतिव्यध्, परिव्यध्, प्रविश्, निविश्, छिद्, भिद्, निर्भिद्, छिद्, निखन्, वेधनं कृ, व्यधनं कृ, रन्ध्रं कृ, शुषिरीकृ.

To PIERCE, *v. n.* (Enter) प्रविश्, निविश्, आविश्, विश्, प्रवेशं कृ.

PIERCED, *p. p.* विद्धः -द्धा -द्धं, वेधितः -ता -तं, अपविद्धः &c., छिद्रितः -ता -तं, भिन्नः -न्ना -न्नं, निर्भिन्नः &c., छिन्नः &c.; 'pierced through the heart,' भिन्नहृदयः -या -यं; 'having the ears pierced,' विद्धकर्णः -र्णा -र्णं, छिद्रकर्णः &c.; 'pierced by an arrow,' शरविद्धः &c., बाणनिकृत्तः -त्ता -त्तं.

PIERCER, *s.* वेधकः, वेधी *m.* (न्), भेदकः, छेदकः, वेधनकृत्.—(Instrument) वेधनिका, वेधनी.

PIERCING, *s.* वेधः -धनं, व्यधः -धनं, भेदनं, निर्भेदः, छेदः -दनं, सूचिः *f.*, सूचनं -ना, सूचा; 'in the wrong direction,' अपवेधः.

PIERCING, *part.* or *a.* वेधकः -का -कं, वेधी -धिनी -धि (न्), भेदकः -का -कं, भेदी &c., सूची &c., सूचकः -का -कं, छेदकः &c., छेदी &c., प्रवेशकः -का -कं, भिद् or छिद् in comp.; 'piercing the heart,' हृदयभिद् *m.f.n.*, हृदयभेदी &c.

PIERCINGNESS, *s.* वेधकत्वं, भेदकत्वं, वेधिता, प्रवेशकत्वं.

PIETISM, *s.* धर्म्माभिमानं, भक्त्यभिमानं, साधुम्मन्यता.

PIETIST, *s.* धर्म्माभिमानी *m.* (न्), भक्त्यभिमानी *m.*, साधुम्मन्यः.

PIETY, *s.* ईश्वरभक्तिः *f.*, परमेश्वरभक्तिः *f.*, देवभक्तिः *f.*, भगवद्भक्तिः *f.*, धर्म्मः -र्म्मत्वं, धर्म्मनिष्ठा, धर्म्मासक्तिः *f.*, धर्म्मशीलता, धर्म्मपरता, धर्म्मनिबन्धः, धर्म्मपरायणबुद्धिः *f.*, धर्म्मसेवा, ईश्वरसेवा, ईश्वरनिष्ठा, भक्तिः *f.*, भक्तता -त्वं, भक्तिपरायणबुद्धिः *f.*, पुण्यता, ईश्वरपूजा, परमेश्वरपूजा, देवपूजा, पूजा, पवित्रता -त्वं, शुचिता -त्वं, ब्रह्मण्यता, सौजन्यं; 'eminent in piety,' धर्म्मप्रधानः -ना -नं; 'path of piety,' भक्तिमार्गः.—(Reverence of parents, &c.) मातापितृभक्तिः *f.* -भक्तता, मातापितृसेवा, पुत्रधर्म्मः, अपत्यधर्म्मः.

PIG, *s.* शूकरशावकः, सूकरशावकः, शूकरः, सूकरः, ग्राम्यशूकरः, ग्राम्यः, गृहशूकरः, गृहसूकरः, पङ्कक्रीडः, बहुप्रजः, विट्चरः. *See* HOG.—(Of metal) कुशी, लोहपिण्डः -ण्डं, असंस्कृतलोहपिण्डः.

To PIG, *v. a.* शूकरशावकान् सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू or जन्.

PIG-IRON, *s.* असंस्कृतलोहः, अशोधितलोहः, आकरीयलोहः.

PIGEON, *s.* कपोतः, पारावतः, पारवतः, पारापतः, कलरवः, कपोतिका, गृहनाशनः, धूम्रलोचनः, कोकदेवः, मदगामी *m.* (न्), रक्तदृक् *m.* (श्), क्लिन्नीकण्ठः; 'domestic pigeon,' गृहकपोतः, गृहकपोतः; 'wood-pigeon,' हारितः, हारीतः.

PIGEON-HEARTED, *a.* हरिणहृदयः -या -यं, भीरुहृदयः &c., चकितहृदयः &c.

PIGEON-HOLE, *s.* कपोतविवरं, कपोतबिलं, कपोतरन्ध्रं.

PIGEON-HOUSE, PIGEON-COT, *s.* कपोतपालिका, कपोतपाली, कपोतगृहं, कपोतालयः -यं, कपोतागारः -रं, पारावतालयः, विटङ्कः.

PIGGERY, *s.* शूकरालयः -यं, शूकरगृहं, शूकरपालिका, शूकरावासः.

PIGGISH, *a.* सौकरः -री -रं, सूकरोपमः -मा -मं, शूकरसदृशः -शी -शं.

PIG-HEADED, *a.* स्थूलमस्तकः -का -कं, स्थूलशिराः -राः -रः (स्), स्थूलः &c.

PIGMENT, *s.* वर्णकः -का, वर्णः, रङ्गः. *See* PAINT.

PIGMY, *s.* वामनः, वामनमूर्त्तिः *m.*, खर्व्वः, ह्रस्वमूर्त्तिः *m.*

PIGMY, PIGMEAN, *a.* वामनशरीरः -रा -रं, अल्पमूर्त्तिः -र्त्तिः -र्त्ति, अल्पतनुः -नुः -नु.

PIG-STY, *s.* शूकरालयः -यं, शूकरगृहं, शूकरस्थानं, शूकरागारं.

PIG-TAIL, *s.* अवटुजः, शूकरपुच्छाकारेण रचितः पश्चाद्ग्रीवाकेशः, पुच्छवत् पृष्ठतो लम्बमानः केशपाशः.

PIKE, *s.* (Weapon) शूलः -लं, प्रासः, शल्यं, शक्तिः *f.*, कीलः, शङ्कुः *m.*, कुन्तः -न्ती, सर्वलं, कोटिः *f.*, परिघः; 'for driving an elephant,' तोत्रं, वैणुकं.—(The fish) जलसूचिः *m.*

PIKEMAN, *s.* शूली *m.* (न्), शूलधरः, शूलधारी *m.* (न्), शूलपाणिः *m.*, शक्तिग्रहः, शक्तिधरः, शाक्तीकः, कौन्तिकः, प्रासिकः.

PIKE-STAFF, *s.* शूलदण्डः -ण्डं, प्रासदण्डः, शक्तिदण्डः, कुन्तदण्डः.

PILASTER, *s.* चतुष्कोणस्तम्भः, चतुष्कोणाकृतिर् अर्द्धस्तम्भः.

PILE, *s.* (Heap) राशिः *m.*, चयः, सञ्चयः, निचयः, चितिः *f.*, उत्करः, प्रकरः, निकरः, पुञ्जः, ओघः, स्तूपः, स्तोमः, समयः, समूहः, व्रातः.—(Funeral pile) चितिः *f.*, चिता, चित्या, स्तूपः, कूपकः, काष्ठमठी मुः *m.*—(Stake for support) स्थूणा, स्थाणुः *m.*, स्तम्भः, उपस्तम्भः, शङ्कुः *m.*, कीलः.—(Edifice) हर्म्यं, महामन्दिरं, महागृहं, महाभवनं, बृहन्मन्दिरं, बृहद्धर्म्यं.—(Disease). *See* PILES.

To PILE, *v. a.* (Heap) राशीकृ, आचि, समाचि, सञ्चि, समाक्षिप् &c.

PILED, *p. p.* राशीकृतः -ता -तं, राशीभूतः &c., चितः &c., उपरिचितः &c. *See* HEAPED.

PILES, *s. pl.* (Disease) अर्शस् *n.*, अर्शः, अर्शोरोगः, गुदरोगः, गुदाङ्कुरः, गुदकीलः, मूलव्याधिः *m.*, अर्शस् *n.*; 'having them,' अर्शी -र्शिनी -र्शि (न्), अर्शोरोगी -गिणी &c., अर्शोरोगयुतः -ता -तं; 'destroying them,' अर्शोघ्नः -घ्नी -घ्नं.

To PILFER, *v. a.* and *n.* मुष् (c. 9. मुष्णाति, मोषितुं), परिमुष्, प्रमुष्, अल्पाल्पं चुर् (c. 10. चोरयति -यितुं) or अपहृ (c. 1. -हरति -हर्त्तुं).

PILFERED, *p. p.* अल्पाल्पशो मुषितः -ता -तं or अपहृतः -ता -तं.

PILFERER, *s.* मोषकः, मूषकः, मूषिकः, आमोषी *m.* (न्), मोषी *m.*, मुमुषिषुः *m.*, अल्पचौर्य्यकृत्, अल्पस्तेयकृत् *m.*, धनहरी *m.* (न्), धनहारी *m.*, चौरः, पाश्चिकः.

PILFERING, *s.* मूषणं, मोषा -षणं, मुषिः *f.*, मुष्टं, अल्पचौर्य्यं, अल्पस्तेयं.

PIL-GARLIC, PILLED-GARLIC, *s.* तपस्वी *m.* (न्), हताशः, गलितकेशः.

PILGRIM, *s.* यात्रिकः, तीर्थयात्रिकः, तीर्थसेवी *m.* -विनी *f.* (न्), कार्पटिकः, यात्राकारी *m.* (न्), यात्राकृत्, उदासीनः, सार्थिकः, पथिकः; 'a company of pilgrims,' यात्रा, सार्थः, यात्रिकसंघः.

PILGRIMAGE, *s.* यात्रा, तीर्थयात्रा, यात्राप्रसङ्गः, तीर्थगमनं, तीर्थाटनं, तीर्थसेवा -वनं; 'setting out on a pilgrimage,' यात्राकरणं; 'place

of pilgrimage,' तीर्थः -र्थं, पुण्यतीर्थं, वरदानं, गोपीथं, अवतारः, प्रापयः; 'the great place of pilgrimage, or Benares,' तीर्थराजी; 'pilgrimage to it,' महायात्रा; 'to the Ganges,' गङ्गायात्रा; 'ceremonies to be observed at a place of pilgrimage,' तीर्थविधिः m.; 'favors granted by the idol at a place of pilgrimage, consisting of flowers, ashes, holy water, &c.,' तीर्थप्रसादः.

PILL, s. गुली, गुलिका, गुटिका, घटः -टी, वटिका; 'magical pill, by putting which in the mouth a person has the power of ascending to heaven,' विद्या.

To PILLAGE, PILL, v. a. लुण्ट् (c. 1. लुण्टति -ण्टितुं), हृ, लुण्ट्, लुण्ट्, धनद्रव्यादि हृ (c. 1. हरति, हर्तुं), अपहृ, अभिहृ, लुण्ठनं कृ, लुण्टनं कृ, विलुप् (c. 6. -लुम्पति -लोप्तुं), लुप्, कल् (c. 10. कालयति -यितुं), प्रकल्.

PILLAGE, s. लुण्ठनं, लुण्टा, लुण्टनं, लुण्टा, अपहारः, हरणं, लोप्त्रं, लोत्रं, लोतः -तं, लुप्तं, अभिग्रहः, धनापहारः.

PILLAGER, s. अपहारकः, अपहारी m. (न्), हारकः, लुण्टाकः, लुण्टनकृत्.

PILLAR, s. स्तम्भः, अवष्टम्भः -म्भनं, उपस्तम्भः -म्भनं, स्थूणा, सूर्म्मिः f. -र्म्मी, शूर्म्मिः f. -र्म्मी, यूपः -पं, यष्टिः m.f.; 'of a house,' गृहस्तम्भः, गृहस्थूणा, गृहमेधीयान् m. (स्); 'main pillar of a house,' मूलस्तम्भः.

PILLORY, s. हडिः m., अपराधिनो हस्तमस्तकादिबन्धनार्थं काष्ठयन्त्रं.

PILLOW, s. उपधानं -नीयं, उपबर्हः, बालिशं, उच्छीर्षकं, उपस्तम्भः, गण्डुः m.f., चातुरः, गल्लचातुरी, मसूरिका; 'a round pillow,' चक्रगण्डुः.

PILLOW-CASE, s. उपधानावेष्टनं, उपधानाच्छादनं, बालिशवेष्टनं, बालिशकोशः, उपधानकोशः.

PILLOWED, p.p. or a. उपहितः -ता -तं, आलम्बितः &c., उपधानालम्बितः &c.

PILOSE, PILOUS, a. लोमशः -शा -शं, रोमशः &c., बहुलोमा -मा -म (न्).

PILOSITY, s. लोमशत्वं, रोमशत्वं, लोमप्राचुर्य्यं, लोमबाहुल्यं.

PILOT, s. कर्णधारः, कर्णधारी m. (न्), कर्णग्राहः, कर्णिकः, कर्णी m., नाविकः, समुद्रमार्गप्रदर्शकः, समुद्रपथदर्शकः, नौकावाहकः.—(Guide) मार्गदर्शकः.

To PILOT, v. a. कर्णेन or कर्णिकवद् नावम् आनी (c. 1. -नयति -नेतुं) or वह् (c. 10. वाहयति -यितुं), नौमार्गं दृश् (c. 10. दर्शयति -यितुं), नौपथं दृश्, नौकानयनं कृ, नौकावाहनं कृ, नौमार्गदर्शनं कृ.

PILOTAGE, s. कर्णधारवेतनं, कर्णग्राहवेतनं, कर्णिकवेतनं, कर्णिकमूल्यं.

PIMP, s. विटः, कुट्टाशी m. (न्), रतताली m. (न्), सुरतताली m., सञ्चारकः, रतोपकारी m., रतप्रवर्त्तकः, रतसम्पादकः, सुरतप्रवर्त्तकः.

To PIMP, v. n. विटवृत्तिं कृ or अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), रतोपकारी भू.

PIMPLE, s. रक्तस्फोटः -टकः, क्षुद्रस्फोटः, सूक्ष्मस्फोटः, रक्तपिडकः, तनुव्रणः, सूक्ष्मव्रणः, क्षुद्रव्रणः, गण्डः, रक्तगण्डः, सूक्ष्मगण्डः, अवगण्डः, वरण्डः -ण्डकः, कच्छपिका, रक्तवटी, रक्तवटी, पिडकः -का, लक्ष्मः, मुखगण्डः, इरावेल्लिका.

PIMPLED, PIMPLY, a. सस्फोटः -टा -टं, रक्तस्फोटपूर्णः -र्णा -र्णं, तनुव्रणवान् -वती -वत् (त्), रक्तवटीपूर्णः &c., व्रणी -णिनी -णि (न्), दद्रुणः -णा -णं, दद्रूणः &c.

PIN, s. कीलः -लकः, शलाका, सूक्ष्मकीलकः, शङ्कुः m., शल्यं.—(Peg, bolt) कीलः -लकः, शङ्कुः m., अर्गलं, अपलं, अचलः, वर्कुटः.—(Of a carriage, axle) अक्षाग्रकीलः -लकः, अक्षाग्रशङ्कुः m., अक्षाग्रशलाका, अणिः m.—(Trifle, pin's head) बालाग्रं.

To PIN, v. a. कील् (c. 10. कीलयति -यितुं), कीलकेन बन्ध् (c. 9. बध्नाति, बन्द्धुं).

PINAFORE, s. अग्रप्रलम्बवस्त्रं, बालकैर् भृतं वक्षस्स्थलच्छादनयोग्यम् उत्तरीयवस्त्रं, मलनिवारणयोग्यम् उत्तरवस्त्रं.

PINCERS, s. pl. सन्दंशः -शकं, सन्दंशिका, कङ्कमुखं, ... दया-

To PINCH, v. a. (With the fingers) अङ्गुलिभिः ... &c., अग्राङ्गुलिभिः पीड् (c. 10. पीडयति -यितुं) or सम्पीड् ..., पीड् or सम्पीड्, कूर्चं कृ, सम्पीडनं कृ.—(Gripe) ... सङ्ग्रह्, मुष्टिसङ्ग्राहेण पीड्, सङ्ग्राहं कृ.—(Straiten, distress) बाध् (c. 1. बाधते -धितुं), सम्बाध्, सङ्कुच् (c. 1. -कोचति, ...), -हरति -हर्तुं), सङ्कटीकृ, क्लिश् (c. 9. क्लिश्नाति, ...), मथति -थितुं), संघट्ट् (c. 1. -घट्टते -ट्टितुं), आर्त्तीकृ, कृपणः, ... -र्णं. (Pinch with cold) शीतेन पीड्, शीतार्त्तीकृ.

PINCH, s. कूर्चः -र्चं, अङ्गुल्यग्रैः पीडनं or सम्पीडनं ... दयापूर्वं, सङ्ग्रहणं, ग्रहः, अङ्गुलिसङ्कोचः -चनं.—(Of snuff) नस्यचूर्णकूर्चः -र्चं.—(Strait, distress) बाधा -धनं, सम्बाधः, ... कष्टं, ...

PINCHED, p.p. पीडितः -ता -तं, सम्पीडितः &c., अङ्गुलिसङ्कोचपीडितः &c., अङ्गुलिपीडितः &c., अग्राङ्गुलिपीडितः &c., बाधितः -ता -तं, सम्बाधितः &c., सङ्कुचितः &c., मथितः &c., घट्टितः &c., क्लिष्टः -ष्टा -ष्टं, क्लेशितः -ता -तं, आर्त्त in comp.; 'with cold,' हिमार्त्तः -र्त्ता -र्त्तं, हिमपीडितः &c.

PINCH-FIST, s. दृढमुष्टिः m., गाढमुष्टिः m., बद्धमुष्टिः m., अमुक्तहस्तः.

PINCUSHION, s. सूक्ष्मकीलकाधारः, सूक्ष्मशलाकाधारः, स्त्रीकीलकाधारः.

PINE, s. (The tree) सरलः, शरलः, देवदारुः -रु m. n., पीतदारुः m., दारु n. -रुकं, मर्म्मरः; 'juice of the pine,' सरलद्रवः -द्रव्यं.

To PINE, v. n. (Languish) म्लै (c. 1. म्लायति, म्लातुं), परिम्लै, ग्लै, परिग्लै, अवसद्, विषद्, व्यवसद्, सद्, तम्, आतम्, प्रतम्, क्षि in pass., खिद् in pass., प्रली, विषण्णीभू.—(Languish with desire for) उत्कण्ठ्, उत्सुक.

PINE-APPLE, s. अनननसः or अननासः may be used.

PINING, s. म्लानिः f., म्लानता, अवसादः, विषादः, उत्कण्ठा.

PINING, p... म्लायमानः -ना -नं, म्लायत् -यन्ती यत् (त्), ग्लायमानः &c., क्षीयमाणः &c., खिद्यमानः ..., ... -दिनी -दि (न्), अवसादितः -ता -तं, म्लानः -ना -नं, क्षीणः -णा -णं.—(With desire) उत्कण्ठितः -ता -तं, उत्सुकः -का -कं, पर्य्युत्सुकः &c., उत्कः -का -कं.

PINION, s. (Wing) पक्षः.—(Joint of a wing) पक्षसन्धिः m.—(Fetters for the arms) बाहुबन्धः -न्धनं, बाहुपाशः.

To PINION, v. a. (Bind the wings) पक्षौ बन्ध् (c. 9. बध्नाति, बन्द्धुं), पक्षबन्धनं कृ.—(The arms) बाहू बन्ध्, बाहुबन्धनं कृ.

PINIONED, p. p. बद्धबाहुः -हुः -हु, बाहुबद्धः -द्धा -द्धं, बाहुबन्धनः -ना -नं, बद्धपक्षः -क्षा -क्षं, पक्षबद्धः &c.

PINK, s. (The color) पाटलः, पाटलवर्णः, पाटलरक्तः, श्वेतरक्तः.—(Pinnacle of perfection) अग्रं, शिखरं, सीमा.

PINK, a. (Of a pink color) पाटलः -ला -लं, पाटलवर्णः -र्णा -र्णं श्वेतरक्तः -क्ता -क्तं.

To PINK, v. a. व्यध् (c. 4. विध्यति, व्यद्धुं), छिद्र् (c. 10. छिद्रयति -यितुं), त्वक्छेदं कृ, त्वग्भेदं कृ, शुषिरीकृ.

PINK-EYED, a. गजनेत्रः -त्रा -त्रं, गजनयनः -ना -नं, सूक्ष्मनयनः &c.

PIN-MAKER, s. शलाकाकारः, सूक्ष्मशलाकाकृत्, कीलककर्त्ता m. (र्तृ).

PIN-MONEY, s. स्त्रीधनं, स्त्रियाः स्ववस्त्राभ्यञ्जनादिक्रयणार्थं भर्त्तृदत्तं वार्षिकधनं.

PINNACE, s. क्षुद्रनौका, लघुनौका, अरित्रचालिता नौका.

PINNACLE, s. शिखरं, गृहशिखरं, शृङ्गं, अग्रं, प्रासादशृङ्गं, प्रासादाग्रं, कलसः, वडभिः f., शिखा, पृष्ठं, तल्पः, लासकः.

PINNED, p. p. कीलितः -ता -तं, कीलायितः &c., कीलकबद्धः -द्धा -द्धं.

PINT, s. अर्द्धकुडवः, द्रवद्रव्याणां परिमाणविशेषः.

मुषर्वं .... [illegible] स्थाणुच्छेदक:, आटविक:, स्थाणुच्छेदक:, स्थाणुछिद् *m.*, पथ ... [illegible] कणयधी *m.* (न्), मार्गशोधक:, सैन्यपथशोधक:.
&c. ... स्थाणुसम्भादिछेदेन सैन्यमार्गं शुध् (c. 10. शोधयति -यितुं), ... स्थाणुस्तम्भादि छिद् (c. 7. छिनत्ति, छेत्तुं) or अपनी ... [illegible]

... धार्मिक: -की -कं, धर्मशील: -ला -लं, धर्मी -र्मिणी -र्मि (न्), ... [illegible] (न्), भक्तिमान् -मती -मत् (त्), ईश्वरभक्तिमान् &c.,
To ... *v. a.* -कं, ईश्वरपूजक: -का -कं, पूजाशील: &c., पूजक: -का -युक्त: -युक्ते - &c., पुण्यात्मा &c., भजनशील: &c., ईश्वरसेवी &c.,
To PATCH ... शुचिव्रत: -ता -तं, व्रती &c., धर्माचारी &c., धर्मिष्ठ:

PIECED, *p. p.* ... मनस्क: -स्का -स्कं, पूजामनस्क: &c., ईश्वरपरायण: -णा -णं, देवपूजक &c., देवभक्तिनिष्ठ: &c., भक्तिनिष्ठ: &c., धर्मनिष्ठ: &c., भक्तिप्रवण:&c., धर्मप्रवण: &c., भक्तिपरायण: &c., धर्मनिबन्धी &c., परमार्थपरायण: &c., परमार्थी &c.; 'for pious purposes,' धर्मार्थं.—(Proceeding from piety) धर्मप्रयुक्त: -क्ता -क्तं, धर्ममूलक: -का -कं, भक्तिमूलक: &c., ईश्वरभक्तिमूल: -ला -लं.

PIOUSLY, *adv.* धार्मिकवत्, धर्मशीलत्वात्, ईश्वरभक्त्या, भक्त्या, पुण्यशीलत्वात्, पुण्यं, भक्तियुक्त्या, पूजाशीलत्वात्, देवपूजकवत्.

PIP, *s.* (Of fruit) बीजं, बीजकं.—(Spot) बिन्दु: *m.*, चिह्नं, अङ्क:.

To PIP, *v. n.* पक्षिशावकवत् कूज् (c. 1. कूजति -जितुं), कूजितं कृ.

PIPE, *s.* (Musical instrument) वंश: -शी, वेणु: *m.*, सानेयी -यिका, नालिका, मुरली, ध्वनिनाला, विवरनालिका, दर्दुर:, सुषिरं, नन्द:.—(Tube) नाल: -लि: *f.* -ली -लं, नाडि: -डी *f.*, प्रणालिका, प्रणाल: -ली, सुषि: *f.*—(Iron pipe) लोहनाल:.—(Water pipe) सारणी -णि: *f.*, प्रणाल: -ली -लिका.

To PIPE, *v. n.* (Play on a pipe) वंशीं or वेणुं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा or वद् (c. 10. वादयति -यितुं) or प्रवद्.—(Cry) उच्चस्वरेण क्रुश् or क्रन्द् or रुद्.

PIPER, *s.* वेणुध्म:, वेणुवाद: -दक:, वंशवादक:, वांशिक:, वंशीधर:.

PIPKIN, *s.* क्षुद्रभाण्डं, क्षुद्रपिठर:, क्षुद्रस्थाली.

PIQUANCY, *s.* उग्रता, कटुता, तिग्मता, तीव्रता, तीक्ष्णता, रसिकता, सरसत्वं.

PIQUANT, *a.* (Pungent) उग्र: -ग्रा -ग्रं, कटु: -टु: -टु, तिग्म: -ग्मा -ग्मं, तीक्ष्ण: -क्ष्णा -क्ष्णं, खर: -रा -रं, प्रखर: -रा -रं, उष्ण: -ष्णा -ष्णं, चण्ड: -ण्डा -ण्डं.—(Seasoned, having flavor) सुसंस्कृत: -ता -तं, मिष्ट: -ष्टा -ष्टं, सरस: -सा -सं, रसिक: -का -कं.

PIQUANTLY, *adv.* तीक्ष्णं, उग्रं, तिग्मं, प्रखरं, कटु, सरसं.

PIQUE, *s.* ईषत्कोप:, ईषद्वैरक्तं, ईषद्विरक्ति: *f.*, ईषद्रोष:, ईषद्वितुष्टि:.

To PIQUE, *v. a.* (Offend slightly) ईषत् कुप् (c. 10. कोपयति -यितुं) or प्रकुप् or रुष् (c. 10. रोषयति -यितुं), ईषत्कोपं or ईषद्वैरक्तं जन्.—(Stimulate, excite) उत्तप्, उत्तिज्, प्ररुच्, प्रवृत्, उत्सह्, प्रोत्सह्.—(Pique one's self) आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं), अभिमन् (c. 4. -मन्यते -मन्तुं), विकत्थ् (c. 1. -कत्थते -त्थितुं); 'to pique one's self on one's learning,' पण्डितम्मन्य: -न्या -न्यं भू or अस्; 'on one's good looks,' दर्शनीयमानी &c. भू.

PIQUED, *p. p.* ईषत्कुपित: -ता -तं, ईषद्रुषित: &c., ईषद्विरक्त: -क्ता -क्तं.

PIQUET, *s.* सनारद्य: -द्यक:, उपरक्षणं. *See* PICKET.

PIRACY, *s.* समुद्रीयचौर्यं, समुद्रीयलुण्ठनं, समुद्रीयापहार:, समुद्रीयापहरणं, समुद्रीयसाहसं, समुद्रीयस्तेयं, समुद्रीयदस्युत्वं.—(Of printed books, &c.) मुद्रितग्रन्थापहार:, ग्रन्थलिखितापहार:, ग्रन्थापहरणं, मुद्रितशब्दचौर्यं.

PIRATE, *s.* समुद्रयायी दस्यु: *m.*, समुद्रीयदस्यु: *m.*, समुद्रगामी साहसिक: or अपहारक: or अपहारी, समुद्रीयसाहसिक:, समुद्रीयचौर:, समुद्रीयलुण्ठाक:.—(Ship) साहसिकनौ: *f.*, साहसिकनौका.—(Of printed books, &c.) मुद्रितग्रन्थापहारक:, ग्रन्थलिखितापहारी *m.* (न्), ग्रन्थापहारक:, शब्दचोर:, मुद्रितशब्दचौर:, पुस्तकापहारी *m.*

To PIRATE, *v. a.* or *n.* अपहृ (c. 1. -हरति -हर्तुं), अभिद्रुह्, लुण्ट् (c. 1. लुण्टयति -यितुं).

PIRATED, *p. p.* अपहृत: -ता -तं, अनधिकारपूर्वं हृत: -ता -तं.

PIRATICAL, *a.* साहसिक: -की -कं, साहसी -सिनी -सि (न्), अपहारक: -का -कं, साहसार्थक: -का -कं, अपहारार्थक: &c., साहसैकरसिक: -का -कं.

PISCATION, *s.* मत्स्यबन्धनं, मत्स्यग्रहणं, मत्स्यधरणं, मत्स्यघातनं.

PISCATORIAL, PISCATORY, *a.* मात्सिक: -की -कं, मात्स्यिक: &c., मात्स्य: -त्स्यी -त्स्यं, मैनर: -रा -रं, मत्स्यसम्बन्धी &c., मत्स्यविषयक: -का -कं, मत्स्यग्रहणसम्बन्धी &c.

PISCES, *s.* (Sign of the Zodiac) मीन:, मीनराशि: *m.*, मीनलग्नं, झष:.

PISCINAL, *a.* मीनालयसम्बन्धी &c., मत्स्यालयसम्बन्धी &c.

PISCIVOROUS, *a.* मत्स्याशी -शिनी -शि (न्), मत्स्याशन: -ना -नं, मत्स्याद: -दा -दं, मत्स्यभुक् *m. f. n.* (ज्), मत्स्यभोजी &c., मत्स्याहारी &c.

PISMIRE, *s.* (Emmet) पिपीलिका, पुत्तिका.

To PISS, *v. a.* मूत्र् (c. 10. मूत्रयति -यितुं), अवमूत्र्, मिह् (c. 1. मेहति, मेढुं), मूत्रं कृ, मूत्रोत्सर्गं कृ, मूत्रत्यागं कृ, प्रस्रावं कृ, मूत्रप्रस्रावं कृ, मूत्रप्रस्रवणं कृ.

PISS, *s.* मूत्रं, मेह:, प्रस्राव:, वस्तिमलं. *See* URINE, *s.*

PISTIL, *s.* स्त्रीकेसर:, स्त्रीकेसर:, गर्भकेसर:, पुष्पगर्भतन्तु: *m.*

PISTOL, *s.* गुलिकाप्रक्षेपणी हस्तनाडि: -डी, सूक्ष्मगुलिप्रक्षेपणी.

PISTON, *s.* यन्त्रस्तम्भ:, यन्त्रनालस्तम्भ:, नालस्तम्भ:, यन्त्राङ्गं.

PIT, *s.* (Cavity, hole) गर्त:, विवरं, बिलं, अवट: -टि: *m.*, कुहरं, कूप:, गुहा, कुण्डं, सन्धिका.—(Of the stomach) मणिपूरं, मूत्रपुटं, उदरमूलं, जठरमूलं.—(Of the arm) कक्ष:, खण्डिक:, बाहुमूलं, भुजकोटर:, दोर्मूलं.—(Of a theatre) अङ्गनं, रङ्गाङ्गणं.

To PIT, *v. a.* (With little hollows) सूक्ष्मकूपकैर् अङ्क् (c. 10. अङ्कयति -यितुं) or चिह्न् (c. 10. चिह्नयति -यितुं), सूक्ष्मकूपाङ्कितं -तां कृ.—(Set in competition) प्रतियोधनाय or परस्परयोधनाय एकत्र स्था in caus. (स्थापयति -यितुं), प्रतियुध् in caus.

PITAPAT, *s.* or *adv.* पटपटा, पटपटाशब्द:, कटकटा.

PITCH, *s.* (Resinous substance used for calking boats, &c.) शिलितसारक:, तिन्दु: *m.*, तिन्दुकी, अग्निवल्लभ:, वह्निवल्लभ:, यक्षधूप:, सर्जरस:, तीक्ष्णतैलं, राल:, कराल:.—(Mineral pitch). *See* BITUMEN.—(Point of elevation) अग्रं, शिखरं, सीमा, पदं; 'highest pitch,' उत्तमाग्रं, उत्तमपदं, उत्तमता.—(Degree) परिमाणं, पर्यन्तं, क्रम:; 'to such a pitch,' एतावत्पर्यन्तं, एतावत्.—(Of a hill) उत्सङ्ग:, कटक:.—(Of a note or voice) स्वर:.

To PITCH, *v. a.* (Cast, throw) क्षिप्, प्रक्षिप्, अस्, प्रास्, पत् in caus.—(Fix a tent, camp, &c.) शिबिरं निविश् (c. 10. -वेशयति -यितुं) or स्था in caus. (स्थापयति -यितुं) or रुह् in caus. (रोपयति -यितुं) or समावस् in caus.—(A note or the voice) स्वर् (c. 10. स्वरयति -यितुं), स्वरस्थितिं कृ.—(Smear with pitch) तिन्दुना लिप् or अञ्ज्, तिन्दुलिप्तं -प्तां कृ, करालाक्तं -क्तां कृ.

To PITCH, *v. n.* (Light, settle) अध्यास्, निली, निषद्, अवस्था, संस्था, अवरुह्, अवपत्, आपत्, निपत्, अवतॄ, उत्तॄ, अधो गम्.—(Encamp) निविश्, उपविश्, शिबिरे वस् or समावस् or अध्यास्.—(Fall headlong) अधोमुख: पत्, अधोमुखेन पत्, अवाङ्मुखेन पत्, अवाक् पत्.—(Pitch upon). *See To* CHOOSE.

PITCHED, *p. p.* (Fixed, set) स्थापित: -ता -तं, रोपित: &c., निवेशित: &c.

—(Thrown) क्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं.—(As a note) स्वरितः -ता -तं.

Pitcher, *s.* कुम्भः, कलशः -शी -शं, घटः, कुटः -टी -टिका, उदकपात्रं, उदपात्रं, जलपात्रं, उदकभाण्डं, मृत्पात्रं, मृद्भाण्डं -ण्डकं, मृत्कांस्यं, मृद्भाजनं, मृन्मयपात्रं, जलभाजनं, मृत्तिकाभाण्डकं, आलुः *f.*, आलूः *m.*, पृथुग्रीवः, मणिकं, कर्करी, अलिञ्जरः, गलन्तिका; 'half of a broken pitcher,' कपालः -लं; 'bottom of a pitcher,' मृत्पिण्डः.

Pitch-fork, *s.* शूलः -लं, त्रिशिखशूलं, त्र्यग्रशूलः.

Pitchy, *a.* (Covered with pitch) अरालाक्तः -क्ता -क्तं, तिन्दुलिप्तः -प्ता -प्तं, तीक्ष्णतैलमयः -यी -यं.—(Resembling it) अरालगुणकः -का -कं, तिन्दुगुणकः &c., तीक्ष्णतैलोपमः -मा -मं.—(Dark as pitch) अतिकृष्णः -ष्णा -ष्णं, अतिश्यामः -मा -मं, अतितामसः -सी -सं.

Pit-coal, *s.* खनिजाङ्गारः, आकरजाङ्गारः, आकरोद्भवाङ्गारः.

Piteous, *a.* (Deserving or exciting pity) करुणोत्पादकः -का -कं, दयाजनकः &c., अनुकम्पाजनकः &c., अनुकम्प्यः -म्प्या -म्प्यं, अनुकम्पनीयः -या -यं, करुणारसोत्पादकः &c., करुणायोग्यः -ग्या -ग्यं, दयायोग्यः &c., करुणः -णा -णं, कारुणिकः -की -कं; 'piteous accents,' करुणस्वरः, करुणशब्दः.—(Wretched) दीनः -ना -नं, कृपणः -णा -णं, दुःखान्वितः -ता -तं.—(Compassionate). *See* Pitiful.

Piteously, *adv.* करुणं, यथा दया or करुणा जायते or उत्पद्यते तथाप्रकारेण, अनुकम्पनीयं, सकरुणं.

Piteousness, *s.* करुणोत्पादकत्वं, दयाजनकत्वं, अनुकम्प्यता, करुणायोग्यता, दयायोग्यता, कारुण्यं, दीनता.

Pit-fall, *s.* गूढकूपः, अन्धकूपः, छन्नकूपः, गूढगर्त्तः.

Pith, *s.* (Of plants, &c.) सारः, मज्जा, गर्भः, साररसः.—(Essence) सारः -रता, सारांशः, वस्तु *n.*, सारवस्तु *n.*, मूलवस्तु *n.*, रसः, साररसः, सत्त्वं, मूलं, पदार्थः, तत्त्वं, तत्त्वार्थः, निर्म्याणं, निकरः, गर्भः, मण्डः.—(Essential extract) निर्यासः, रसः, मण्डः -ण्डं.—(Energy, spirit, vigor) सत्त्वं, सारः, सारता, वीर्य्यं, तेजस् *n.*, प्रभावः, शक्तिः *f.*, बलं.

Pithily, *adv.* सारतस्, सारेण, ससत्त्वं, सत्त्वतस्, सवीर्य्यं, वीर्य्यतस्.

Pithiness, *s.* सारता -त्वं, सारवत्त्वं, सारपूर्णता, ससारत्वं, सत्त्वपूर्णता, ससत्त्वता, सत्त्ववत्त्वं, सत्त्वं, मज्जावत्त्वं, वीर्य्यं, वीर्य्यवत्त्वं.

Pithless, *a.* असारः -रा -रं, निःसारः &c., निस्सारः &c., सारहीनः -ना -नं, गतसारः -रा -रं, सत्त्वहीनः &c., निःसत्त्वः -त्त्वा -त्त्वं, वीर्य्यहीनः &c., सारवर्जितः -ता -तं, फल्गुः -ल्गुः -ल्गु, विरसः -सा -सं, निरसः &c., रसहीनः &c., वितानः -ना -नं, सारभङ्गः -ङ्गा -ङ्गं.

Pithy, *a.* (Having pith) सारवान् -वती -वत् (त्), ससारः -रा -रं, सारपूर्णः -र्णा -र्णं, सारमयः -यी -यं, ससत्त्वः -त्त्वा -त्त्वं, मज्जावान् &c., मज्जामयः &c., सगर्भः -र्भा -र्भं, सरसः -सा -सं, रसिकः -का -कं, रसवान् &c.—(Forcible, energetic) ससत्त्वः -त्त्वा -त्त्वं, सत्त्ववान् &c., वीर्य्यवान् &c., सप्रभावः -वा -वं, तेजोवान् &c.

Pitiable, *a.* अनुकम्प्यः -म्प्या -म्प्यं, अनुकम्पनीयः -या -यं, दयायोग्यः -ग्या -ग्यं, करुणायोग्यः &c., घृणायोग्यः &c., अनुकम्पायोग्यः &c., दयाविषयः, दयापात्रं, दयाभाजनं.—(Wretched) दीनः -ना -नं, कृपणः -णा -णं, अतिदुःखी -खिनी -खि (न्), अतिदुःखान्वितः -ता -तं.

Pitiableness, *s.* अनुकम्प्यता, अनुकम्पनीयता -त्वं, दयायोग्यता.

Pitiably, *adv.* करुणं, अनुकम्पनीयं. *See* Piteously.

Pitied, *p. p.* अनुकम्पितः -ता -तं, घृणितः -ता -तं, दयितः -ता -तं.

Pitiful, *a.* (Compassionate) कारुणिकः -की -कं, करुणः -णा -णं, सकरुणः -णा -णं, करुणाशीलः -ला -लं, दयालुः -लुः -लु, दयावान् -वती -वत् (त्), सदयः -या -यं, दयायुक्तः -क्ता -क्तं, दयामयः -यी -यं, दयाविशिष्टः -ष्टा -ष्टं, दयान्वितः -ता -तं, दयापूर्णः -र्णा -र्णं, दयार्द्रः -र्द्रा -र्द्रं, दयासम्पन्नः -न्ना -न्नं, दयार्द्रः -र्द्रा -र्द्रं, दयार्द्रचित्तः -त्ता -त्तं, दयार्द्रमनस्कः -स्का -स्कं, दयारूपः -पा -पं, करुणामयः &c., कृपामयः &c., कृपावान् &c., कृपालुः &c., सानुकम्पः -म्पा -म्पं, घृणावान् &c., घृणी &c., घृणाशीलः &c., हृदयालुः &c., हृदयवान् &c. The following are phrases for a pitiful person: दयासागरः, दयानिधिः *m.*, दयाकरः, करुणासागरः, करुणानिधिः *m.*, अनाथनाथः, अनाथबन्धुः *m.*, दीननाथः, दीनबन्धुः *m.*, दीनवत्सलः.—(Exciting pity) *See* Piteous.—(Miserable, wretched) दीनः -ना -नं, कृपणः -णा -णं, तुच्छः -च्छा -च्छं, क्षुद्रकः -का -कं.

Pitifully, *adv.* सदयं, सानुकम्पं, सकारुण्यं, सकरुणं, करुणं, दयापूर्व्वं, दयापुरःसरं. *See* Piteously.

Pitifulness, *s.* दयालुता -त्वं, कारुण्यं, सकरुणता, दयार्द्रता, करुणार्द्रता, सानुकम्पता, कृपालुता, दया, कृपा.

Pitiless, *a.* निर्दयः -या -यं, अदयः -या -यं, दयाहीनः -ना -नं, दयारहितः -ता -तं, निष्करुणः -णा -णं, अकरुणः -णा -णं, निष्कृपः -पा -पं, कृपाहीनः -ना -नं, निर्घृणः -णा -णं, वीतघृणः &c., निठुरः -रा -रं, क्रूरः -रा -रं.

Pitilessly, *adv.* निर्दयं, निष्करुणं, निष्कृपं, निर्घृणं, निठुरं, क्रूरं.

Pitilessness, *s.* निर्दयत्वं, दयाहीनता, दयाशून्यता, निष्करुणत्वं, क्रूरता.

Pittance, *s.* (Small quantity allowed) अल्पांशः, अत्यल्पांशः, अल्पभागः, अल्पवेतनं, परिमितवेतनं, अल्पमूल्यं.—(Allowance of food, &c., barely sufficient for the day) दिननिर्वाहः, दिनचर्य्या, ग्रासाच्छादनं, अन्नाच्छादनं.

Pitted, *p. p.* (With small hollows) सूक्ष्मकूपाङ्कितः -ता -तं, त्वक्कूपचिह्नितः -ता -तं.—(For combat) परस्परयोधनार्थं or परस्परजयार्थम् एकत्र स्थापितः -ता -तं or एकत्रीकृतः &c., विजिगीषार्थम् एकत्रीकृतः &c.

To pitter-patter, *v. n.* पटपटा (nom. पटपटायते), पटपटाशब्दं कृ.

Pituitary, … कफोत्पादकः -का -कं, कफकरः -री -रं, श्लेष्मजनकः &c.

Pituitous, *a.* कफमयः -यी … श्लेष्मलः -ला -लं, कफगुणकः -का -कं.

Pity, *s.* दया, करुणा, अनुकम्पा, कृपा, घृणा, कारुण्यं, करुणारसः, अनुक्रोशः, माया, करुणः, अनुग्रहः; 'full of pity,' दयायुक्तः -क्ता -क्तं. *See* Pitiful.—(Ground of pity, cause of grief) दयाहेतुः *m.*, दुःखहेतुः *m.*, दुःखकारणं.

To pity, *v. a.* अनुकम्प् (c. 1. -कम्पते -म्पितुं), समनुकम्प् with acc. c., दयां कृ, अनुकम्पां कृ, करुणां कृ, कृपां कृ, दय् (c. 1. दयते -यितुं), with gen. c., करुण (nom. करुणायते), कृपा (nom. कृपायते), अनुकृपा.

Pivot, *s.* परिवर्त्तनकीलः -लकः, विवर्त्तनकीलः -लकः.

Pizzle, *s.* चर्म्मदण्डः -ण्डं, आयुदण्डः, पशूनां मूत्रशुक्रादिमार्गः.

Placability, placableness, *s.* शाम्यता -त्वं, सान्त्वनीयता -त्वं, आराध्यता, आराधनीयता, सुखाराध्यता, सान्त्वनशक्यता.

Placable, *a.* शाम्यः -म्या -म्यं, सान्त्वनीयः -या -यं, आराध्यः -ध्या -ध्यं, सुखाराध्यः &c., आराधनीयः -या -यं, शमनीयः &c., सुखशाम्यः &c., सान्त्वनशक्यः -क्या -क्यं, सान्त्वनयोग्यः -ग्या -ग्यं, तोषणीयः -या -यं, सन्तोषणीयः &c., प्रसाद्यः -द्या -द्यं.

Placard, *s.* लोकसेवितस्थाने स्थापितं प्रकटनपत्रं or घोषणपत्रं or विघोषणपत्रं or विज्ञापनपत्रं or बोधनपत्रं.

To placard, *v. a.* लोकसेवितस्थाने प्रकटनपत्राणि or घोषणपत्राणि स्था in caus. (स्थापयति -यितुं).

Place, *s.* (Particular portion of space) स्थानं, स्थलं -ली, देशः, प्रदेशः, भूः *f.*, भूमिः *f.*, निलयः -यं, धिष्ण्यं; 'in one place,' एकत्र; 'in many places,' बहुत्र; 'in both places,' उभयत्र; 'from

various places,' नानादिग्देशात् -शेभ्यः.—(Situation) स्थानं, अवस्थानं, पदं, आस्पदं, पदविः -वी *f.*, भूमिः *f.*, स्थितिः *f.*; 'place of residence,' वासस्थानं, निवासस्थानं, वसतिः *f.*, निवसतिः *f.*—(Rank) पदं, आस्पदं, पदविः *f.*; 'highest place,' उत्तमपदं, परमपदं.—(Passage of a book) स्थलं, देशः, एकदेशः.—(Proper place of) स्थानं, शाला; 'place for dancing,' नृत्यस्थानं, नृत्यशाला; 'in its proper place,' स्थाने, स्वस्थाने; 'out of place,' अस्थाने, अपदे.—(Office, post) पदं, पदविः -वी *f.*, अधिकारः, अधिकारपदं, स्थानं, स्थलं, आस्पदं, नियोगः; 'out of place, dismissed from place,' पदच्युतः -ता -तं, स्थानभ्रष्टः -ष्टा -ष्टं, पदभ्रष्टः &c., अधिकारभ्रष्टः &c., च्युताधिकारः -रा -रं, स्थलच्युतः &c.; 'having no place,' अपदः -दा -दी -दं, अस्थानः -ना -नं.—(Room, stead) स्थानं, स्थलं, भूमिः *f.*; 'in the place of,' स्थाने, स्थले, भूमौ; 'she stands in the place of a friend,' सखीभूमौ वर्त्तते; 'in the place of a parent,' पितृस्थाने.—(Ground, cause) आस्पदं, स्थानं, हेतुः *m.*, कारणं; 'place for doubt,' शङ्कास्पदं; 'for fear,' भयस्थानं, भयहेतुः *m.*—(Room, space) अवकाशः, अवसरः, प्रसरः.—(Degree in order of proceeding) क्रमः, पदं or expressed by adverbial affixes; as, 'in the first place,' प्रथमतस्, पूर्व्वतस्, प्रथमं, प्रथमपदे; 'in the second place,' द्वितीयतस्, द्वितीयपदे; 'in the third place,' तृतीयतस्, तृतीयपदे; 'in the fourth place,' चतुर्थतस्, तुरीयतस्, चतुर्थपदे; 'in the last place,' अन्ततस्; 'in the next place,' पुनर्, पुनश्च, परं, परञ्च, अपरं, अपरञ्च.—(To give place) स्थानं or पदं त्यज् (c. 1. त्यजति, त्यक्तुं), अपसृ (c. 1. -सरति -सर्त्तुं), पन्थानं or मार्गं त्यज्.—(To take place). *See To* HAPPEN.

To PLACE, *v. a.* (Put, set) स्था in caus. (स्थापयति -यितुं), न्यस् (c. 4. -अस्यति -असितुं), विन्यस्, धा (c. 3. दधाति, धातुं), निधा, आधा, समाधा, निविश् (c. 10. -वेशयति -यितुं), विनिविश्, रुह् in caus. (रोपयति -यितुं) आरुह्, धृ (c. 1. धरति, धर्त्तुं), दा (c. 3. ददाति, दातुं), कृ (c. 8. करोति, कर्त्तुं), with acc. of the thing placed, and loc. or instr. or gen. of the thing on which it is placed; as, 'he places his hand in the serpent's mouth,' हस्तं सर्पमुखे न्यस्यति; 'let not the burden be placed on such as me,' न मद्विधे न्यस्यतां भारः; 'having placed the goat on his shoulder,' स्कन्धे or स्कन्धेन छागं कृत्वा; 'he places his hand on my shoulder,' मत्स्कन्धे हस्तं ददाति; 'having placed his knee on my shoulder,' मत्स्कन्धस्य जानु दत्त्वा; 'having placed the end of a straw in water,' तृणाग्रं जलान्तः कृत्वा; 'to place near,' सन्निधा, उपन्यस्; 'to place over,' अधिकृ, अधिष्ठा.—(Establish, fix) प्रतिष्ठा, अवस्था, संस्था, विधा.—(In any office, &c.) पदे or अधिकारे नियुज् (c. 10. -योजयति -यितुं) or विनियुज्.—(Place out, invest) निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रयोगं कृ.

PLACED, *p. p.* स्थापितः -ता -तं, न्यस्तः -स्ता -स्तं, विन्यस्तः &c., निवेशितः -ता -तं, विनिवेशितः &c., आहितः &c., विहितः &c., उपहितः &c., प्रणिहितः &c., रोपितः &c., निक्षिप्तः -प्ता -प्तं; 'placed near,' उपन्यस्तः -स्ता -स्तं, सन्निहितः -ता -तं; 'placed over,' अधिकृतः -ता -तं, अधिष्ठितः -ता -तं; 'placed upon or on,' रोपितः -ता -तं, आरूढः -ढा -ढं, स्थः -स्था -स्थं in comp.; 'placed on the fire,' अग्निस्थः -स्था -स्थं; 'on the arm,' दोःस्थः -स्था -स्थं; 'on a dish,' पात्रस्थः &c.; 'placed in any office or post,' पदनियुक्तः -क्ता -क्तं, पदारूढः -ढा -ढं, अधिकारारूढः &c., अधिकारस्थः &c., अधिकारस्थितः -ता -तं, स्थानारूढः &c.

PLACENTA, *s.* गर्भपरिस्रवः, गर्भवेष्टनं, गर्भपरिवेष्टनं.

PLACER, *s.* स्थापकः, स्थापयिता *m.* (तृ), रोपकः, विधायी *m.* (न्).

PLACID, *a.* शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, उपशान्तः &c., शान्तमनस्कः -स्का -स्कं, शान्तचित्तः -त्ता -त्तं, शान्तात्मा -त्मा -त्म (न्), उपशान्तात्मा &c., उपशमशीलः -ला -लं, प्रसन्नचेताः -ताः -तः (स्), प्रसन्नः -न्ना -न्नं, प्रसादचित्तः &c., सुप्रसादः -दा -दं, निराकुलचित्तः &c., सुसमाहितः &c. अचण्डशीलः -ला -लं, मितक्रोधः -धा -धं, जितरोषः -षा -षं, अक्रोधः -धा -धं, विनीतः -ता -तं, सौम्यः -म्या -म्यं, सम्भ्रमहीनः -ना -नं, सुमनस्कः &c., अन्तर्वेगहीनः -ना -नं; 'in countenance,' सुप्रसन्नमुखः -खा -खी -खं, प्रसादमुखः &c.

PLACIDLY, *adv.* शान्त्या, शान्तं, चित्तशान्त्या, चित्तप्रसादेन, प्रसन्नचेतसा, सुप्रसादेन, सुप्रसादं, शान्तचेतसा, प्रशान्तचेतसा, निराकुलचेतसा, निराकुलं.

PLACIDNESS, PLACIDITY, *s.* शान्तता, प्रशान्तता, शान्तिः *f.*, प्रशान्तिः *f.* उपशान्तिः *f.*, उपशान्तता, शमः, उपशमः, चित्तशान्तिः *f.*, शान्तचित्तत्वं प्रसादः, प्रसन्नता, सुप्रसादः, चित्तप्रसादः, निराकुलता, अव्याकुलता सौम्यता, अक्रोधः, असम्भ्रमः, सौमनस्यं.

PLAGIARISM, *s.* शब्दचौर्य्यं, काव्यचौर्य्यं, ग्रन्थचौर्य्यं, वागपहारः, हरणं पुस्तकचौर्य्यं, पुस्तकापहारः -हरणं.

PLAGIARIST, PLAGIARY, *s.* (Literary thief) शब्दचोरः, काव्यचौरः काव्यचोरः, वागपहारी *m.* (न्), वागपहारकः, पुस्तकापहारी *m.*, अननुज्ञाप्यायी *m.*, कुम्भिलः, चन्द्ररेणुः *m.*

PLAGUE, *s.* मारी -रिः *f.*, मारकः, मारः, मरकः, महामारी, महाव्याधिः *m.* तीक्ष्णं, प्रतीवापः.—(Great calamity) उत्पातः, विनिपातः, विनिहितः अरिष्टं, अरिष्टापातः, अनर्थः, अनर्थापातः, उपप्लवः, उपद्रवः.—(Pest) कण्टकः, दूषकः, शल्यं.

To PLAGUE, *v. a.* (Infest with pestilence) मारीग्रस्तं -स्तां कृ, मारीपीडितं -तां कृ, मारकग्रस्तं -स्तां कृ.—(Harass) बाध्, परिबाध्, प्रबाध् अभिबाध्, पीड्, अभिपीड्, तप्, व्यथ्, क्लिश्, दुःख्.

PLAGUING, PLAGUY, *a.* बाधकः -का -कं, क्लेशकः -का -कं, क्लेशकरः -रा -रं, क्लेशदः -दा -दं, दुःखकरः &c., पीडकः -का -कं, तापकः -का -कं.

PLAIN, *a.* (Even, level) समः -मा -मं, समानः -ना -नं, सपाटः -टा -टं, श्लक्ष्णः -क्ष्णा -क्ष्णं, अरूक्षः -क्षा -क्षं.—(Neat) विनीतः -ता -तं, आकारशुद्धः -द्धा -द्धं.—(Void of ornament) अभूषितः -ता -तं, अनलङ्कृतः &c., अनलङ्कारः -रा -रं, निरलङ्कारः &c., अलङ्कारहीनः -ना -नं, निर्भूषणः -णा -णं, भूषणहीनः -ना -नं.—(Artless, simple) निर्व्याजः -जा -जं, निष्कपटः -टा -टं, कपटहीनः -ना -नं, अमायिकः -की -कं, अमायः -या -यं, मायाहीनः -ना -नं, सरलः -ला -लं, दक्षिणः -णा -णं, छलहीनः -ना -नं.—(Open, frank, honest) अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, निर्व्यलीकः -का -कं, निर्व्याजः -जा -जं, विमलः -ला -लं, सरलः -ला -लं, सरलमतिः -तिः -ति, सरलबुद्धिः -द्धिः -द्धि, शुद्धः -द्धा -द्धं, शुद्धमतिः -तिः -ति, श्लक्ष्णः -क्ष्णा -क्ष्णं, सात्त्विकः -की -कं.—(Mere, bare) केवलः -ला -लं, शुद्धः -द्धा -द्धं, मात्रकः -का -कं, मात्र in comp.—(Clear, intelligible) स्पष्टः -ष्टा -ष्टं, विस्पष्टः &c., स्पष्टार्थः -र्था -र्थं, सुस्पष्टः &c., व्यक्तः -क्ता -क्तं, अभिव्यक्तः &c., सुव्यक्तः &c., स्फुटार्थः &c., सुबोधः -धा -धं, सुगम्यः -म्या -म्यं, सुगमः -मा -मं, सुगः -गा -गं, सुग्राह्यः -ह्या -ह्यं, भिन्नार्थः -र्था -र्थं, अगूढः -ढा -ढं, अगूढार्थः -र्था -र्थं, विशदः -दा -दं, विमलः -ला -लं.—(Evident, manifest) प्रत्यक्षः -क्षा -क्षं, स्फुटः -टा -टं, प्रस्फुटः &c., प्रकाशः -शा -शं, सुप्रकाशः &c., प्रकटः -टी -टं, स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, समक्षः -क्षी -क्षं, सुदृश्यः -श्या -श्यं, साविष्कारः -रा -रं, प्रसिद्धः -द्धा -द्धं, पुरःस्फुरत् -रन्ती -रत् (त्), उल्बणः -णा -णं.—(Not figurative) अव्यञ्जनः -ना -नं, निर्व्यञ्जनः

&c., व्यञ्जनहीनः -ना -नं.—(Not seasoned) अव्यञ्जनः -ना -नं, व्यञ्जनशून्यः -न्या -न्यं, असंस्कृतः -ता -तं, अनुपस्कृतः &c., उपस्कारहीनः -ना -नं.—(Not beautiful, not handsome) असुन्दरः -रा -री -रं, कुरूपः -पा -पं, कुरूपी -पिणी -पि (न्), साधारणरूपः &c., मध्यमरूपः &c., कुदृश्यः -श्या -श्यं.—(Fair, unobstructed) समः -मा -मं, असम्बाधः -धा -धं, निर्व्विघ्नः -घ्ना -घ्नं, अरुद्धः -द्धा -द्धं, निरवरोधः -धा -धं.

PLAIN, *s.* (Level land) समभूमिः *f.*, समभूभागः, समभूः *f.*, समस्थलं -ली, समस्थानं, सपाटभूः *f.*, पाटः, तैमं, आजिः *f.*

PLAIN, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, अगूढं. *See* PLAINLY.

To PLAIN, *v. a.* समीकृ, समस्थलीकृ, सपाटीकृ, समतलीकृ.

PLAIN-DEALING, *a.* न्यायाचारी -रिणी -रि (न्), सरलाचारी &c., सरलकर्म्मा -र्म्मा -र्म्म (न्), शुद्धाचारी &c., समाचारी &c., शुचिकर्म्मा &c., ऋजुः -जुः -जु, ऋजुकर्म्मा &c., निर्व्याजकर्म्मा &c., निर्व्याजाचारी &c.

PLAIN-DEALING, *s.* ऋजुता, आर्जवं, निर्व्याजाचारः, निष्कपटाचारः, सारल्यं.

PLAINLY, *adv.* (Clearly, intelligibly) स्पष्टं, सुस्पष्टं, स्पष्टार्थं -र्थतस्, व्यक्तं, सुव्यक्तं, भिन्नार्थं -र्थतस्, अगूढं, अगूढार्थतस्; 'too plainly,' अतिव्यक्तं, सुव्यक्तं.—(Evidently, manifestly) प्रत्यक्षतस् -क्षेण, प्रकाशं, सुप्रकाशं, स्पष्टं, व्यक्तं, स्फुटं, प्रकटं, आविष्कारं, साक्षात्, प्रादुस्, आविस्.—(Without disguise or cunning) निर्व्याजं, अव्याजेन, व्याजेन विना, कपटं विना, अमायया, मायां विना, कपटव्यतिरेकेण, सरलं, सारल्येन, सदाक्षिण्यं, छलेन विना.—(Neatly, without ornament) विनीतं, विनीतवत्, अपरिष्कारं, अलङ्कारं विना, भूषणं विना; 'plainly dressed,' विनीतवेशः -शा -शं.—(Frankly, honestly) अवक्रं, अजिह्मं, निर्व्यलीकं, निर्व्याजं, निष्कपटं, न्यायतस्, सरलवत्, शुचिवत्, समं.

PLAINNESS, *s.* (Levelness) समता, साम्यं, समानता, श्लक्ष्णता.—(Neatness) विनीतता -त्वं, विनयः, आकारशुद्धता: 'of dress,' वेशविनीतत्वं.—(Want of ornament) अभूषितत्वं, अनलङ्कृतत्वं, अलङ्कारहीनता भूषणहीनता, भूषणाभावः, अलङ्काराभावः.—(Artlessness, simplicity) अव्याजः, अकापट्यं, अमाया, व्याजहीनता, कपटाभावः, निर्व्याजत्वं, कपटहीनता, सरलता, सारल्यं, दाक्षिण्यं, अनौद्धत्यं.—(Frankness, honesty) सारल्यं, अवक्रता, ऋजुता, आर्जवं, शुचिता, अकपटः, न्यायिता, निर्व्यलीकता, विमलता, शुद्धता -त्वं.—(Clearness) व्यक्तता -त्वं, सुव्यक्तत्वं, स्पष्टता, सुस्पष्टत्वं, व्यक्तिः *f.*, अभिव्यक्तिः *f.*, सुबोधता, सुगम्यता, भिन्नार्थत्वं, अगूढता -त्वं, विशदता, वैशद्यं, प्रत्यक्षता, स्फुटता -त्वं, प्रकाशता, प्राकट्यं, प्रसिद्धता, सुदृश्यता.—(Ugliness) कुरूपता, असौन्दर्य्यं.

PLAIN-SPOKEN, *a.* स्पष्टवाक् *m.f.n.* (च्), स्पष्टवक्ता -क्त्री -क्तृ (क्तृ), व्यक्तवाक् &c.

PLAINT, *s.* (Complaint) विलापः, विलपनं, विलापेन स्वार्त्तनिवेदनं.—(In law) पूर्व्वपक्षपादः, भाषापादः -दं, पूर्व्ववादः, अभियोगः.

PLAINTIFF, *s.* वादी *m.* (न्), पूर्व्ववादी *m.*, अग्रवादी *m.*, पूर्व्ववादकः, परिवादी *m.*, परिवादकः, क्रियावादी *m.*, कारणवादी *m.*, अर्थी *m.* (न्), विवादार्थी *m.*, अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), कार्य्यी *m.* (न्), पूर्व्वावेदकः, व्यवहर्त्ता *m.* (र्त्तृ); 'plaintiff and defendant,' अर्थिप्रत्यर्थिनौ *m. du.*

PLAINTIVE, *a.* (Complaining) विलापी -पिनी -पि (न्), परिदेवी &c., परिदेवकः -का -कं, विलपनकारी &c.—(Expressing sorrow) शोकसूचकः -का -कं, खेदसूचकः &c., दुःखबोधकः &c., शोकार्थकः -का -कं.

PLAINTIVELY, *adv.* विलापेन, सविलपनं, सपरिदेवनं, करुणं.

PLAIT, *s.* (Fold) ऊर्म्मिः *m.f.*, ऊर्म्मी -र्म्मिका, व्यावर्त्तनं, तरङ्गः, पुटः, चूणः.—(Braid) वेणिः -णी, प्रवेणिः, कबरः -री, धम्मिल्लः, केशग्रन्थिः *m.*

To PLAIT, *v. a.* (Braid, fold) ग्रन्थ्, वेणीकृ, वेणीरूपेण ग्रन्थ् or रच्, व्यावृत्, पुटीकृ, वे.

PLAN, *s.* (Scheme, project) उपायः, कल्पना, सङ्कल्पः, निश्चितं, कल्पितं, अनुसन्धानं, प्रयोगः, प्रयुक्तिः *f.*, युक्तिः *f.*, व्यवसायः, अपदेशः, व्यपदेशः, अभिप्रायः, उद्देशः, बुद्धिः *f.*, मन्त्रणा, चिन्ता; 'a good plan,' सुयुक्तिः *f.*, सुकल्पना.—(Draught, representation on paper) सूत्रं, सूत्रपातः, आलेख्यं, वस्तु *n.*, वस्तुमात्रं.—(Mode of construction) कल्पना, कॢप्तिः *f.*, कला.

To PLAN, *v. a.* (Devise) मनसा कॢप् or परिकॢप्, उपायं कॢप्, मन्त्र्, प्रचिन्त्, परिचिन्त्, अनुसन्धा, घट्, व्यवसो, आलोच्.—(Form a draught) सूत्रपातं कृ, आलिख् (c. 6. -लिखति -लेखितुं), आलेख्यं कृ.

To PLANCH, PLANCHED. *See To* PLANK, PLANKED.

PLANE, *a.* (Level) समः -मा -मं, समानः -ना -नं, समतलः -ला -लं.

PLANE, *s.* (In geometry, a level, surface) समं, समतलं, समपृष्ठं, पाटः, तलं; 'a plane figure,' क्षेत्रं.—(The tool) तक्षणी, त्वक्षणी, तक्षणयन्त्रं.

To PLANE, *v. a.* (Make smooth) समीकृ, श्लक्ष्णीकृ.—(Pare with a carpenter's plane) तक्ष् (c. 1. तक्षति -क्षितुं), त्वक्ष् (c. 1. त्वक्षति -क्षितुं).

PLANED, *p. p.* तष्टः -ष्टा -ष्टं, तक्षणयन्त्रेण श्लक्ष्णीकृतः &c.

PLANET, *s.* ग्रहः, भ्रमन् ग्रहः, तारा, तारका -कं, ज्योतिस् *n.*, ज्योतिषी, ज्योतिष्कः, खेचरः, खगः, गगणेचरः, गगणाध्वगः, विहगः, खोल्कः, नक्षत्रं, ऋक्षः, द्युसद् *m.*, धुसद् *m.*, भं; 'minor planet,' उपग्रहः; 'the planets collectively,' ग्रहगणः, ज्योतिर्गणः, ग्रहमण्डलं, भ्रमन्तो ग्रहाः *m. pl.*; 'the nine planets,' नवग्रहाः *m. pl.* These, according to the Hindús, are 1. the sun, सूर्य्यः; 2. the moon, चन्द्रः; 3. Mercury, बुधः; 4. Venus, शुक्रः; 5. Mars, मङ्गलः; 6. Jupiter, गुरुः *m.*; 7. Saturn, शनिः *m.*; 8. the ascending node, राहुः *m.*; 9. the descending node, केतुः *m.* The two last are considered to be minor planets. The other names of the planets will be found under each separate head of Sun, Moon, &c.—(Auspicious planet) शुभग्रहः, सुग्रहः, सौम्यग्रहः; of these there are four, viz. Mercury, Venus, Jupiter, and the Moon.—(Inauspicious planet) कुग्रहः, अशुभग्रहः, पापग्रहः; of these there are five, viz. Mars, Saturn, the Sun, and the two nodes. 'Planet at its apex,' तुङ्गी *m.* (न्); 'motion of the planets,' ग्रहचारः; 'motion in their orbits' गतिः *f.*; 'passage of a planet,' सङ्क्रमः, सङ्क्रान्तिः *f.*; 'conjunction,' सङ्गमः; 'aspect,' ग्रहदशा; 'influence,' ग्रहयोगः, ग्रहावेशः; 'unpropitious influence,' ग्रहपीडा, ग्रहबाधा; 'propitious influence,' ग्रहानुकूल्यं, ग्रहबलं; 'worship of the planets,' ग्रहपूजा; 'propitiation of them,' ग्रहशान्तिः *f.*, ग्रहसाधनं; 'sacrifice in propitiation of them,' ग्रहयागः, ग्रहयज्ञः, ग्रहमखः; 'presents made to Bráhmans for propitiating them,' ग्रहदानं; 'incantations to render them propitious,' ग्रहजपः; 'ascertainment of their aspect,' ग्रहसाधनं; 'calculations or tables for determining their position,' ग्रहसारणी; 'diagram representing their aspect,' ग्रहकुण्डली; 'meeting of the seven planets under one sign,' सप्तग्रहसङ्गमः.

PLANETARY, *a.* ग्रह in comp., ग्रहसम्बन्धी &c., ग्रहविषयकः -का -कं, नाक्षत्रिकः -की -कं, नाक्षत्रः -त्री -त्रं, तारकी -किणी -कि (न्); 'planetary influence,' ग्रहावेशः; 'planetary conjunction,' ग्रहसङ्गमः.

Planet-struck, *a.* ग्रहपीडितः -ता -तं, ग्रहोपहतः &c., ग्रहाविष्टः -ष्टा -ष्टं.

Planing, *s.* तक्षणं, त्वक्षणं, श्लक्ष्णीकरणं, समीकरणं.

Plank, *s.* फलकः -कं, काष्ठफलकः -कं, दारुफलकः, दीर्घकाष्ठं, दीर्घदारुः *m.*, सूक्ष्मदारुः *m.*, काष्ठं, किलिञ्जः, कटः.

To **plank**, *v. a.* फलकैः or दीर्घकाष्ठैः or काष्ठफलकैर् आस्तॄ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), फलक (nom. फलकयति -यितुं), सफलकीकृ.

Planked, *p. p.* फलकास्तीर्णः -र्णा -र्णं, फलकी -किनी -कि (न्), सफलकः &c.

Planned, *p. p.* कल्पितः -ता -तं, परिकल्पितः &c., मनसा कल्पितः &c., मन्त्रितः &c., प्रचिन्तितः &c., घटितः &c., विहितः &c.

Planning, *s.* उपायकल्पना, उपायपरिकल्पना, अनुसन्धानं, घटनं.

Plant, *s.* उद्भिद् *m. f. n.*, ओषधिः -धी *f.*, औषधिः -धी *f.*, उद्भिज्जं, उद्भिदं, पल्लवः -वं, अङ्कुरः, प्ररोहः, रोहः, शाकः; 'gramineous,' तृणं.

To **plant**, *v. a.* (Put in the ground for growth) रुह् in caus. (रोपयति -यितुं), निरुह्, निखन् (c. 1. -खनति -नितुं), रोपणं कृ.—(Fix, set, place) स्था in caus., प्रतिष्ठा, न्यस्, विन्यस्, धा, निधा, निविश्, रुह् or आरुह् in caus.; 'to plant the foot,' पादं न्यस्. (Plant a colony) वस् in caus. (वासयति -यितुं).

Plantain, *s.* (Tree) कदली -लः, कदलकः, रम्भा, तृणसारा, गुच्छफला, ततपत्री, मोचा, मोचकः, अंशुमत्फला, काष्ठीला, वारणबुषा, वारणबुसा, वारणवल्लभा, वारबुषा; 'the fruit,' कदलीफलं, मोचं, मोचाटः, रम्भा; 'wild plantain tree,' काष्ठकदली; 'mixture of sugar and milk with plantains and spices,' शिखरिणी.

Plantation, *s.* (Act of planting) रोपणं, आरोपणं, आरोपः.—(Place planted) वृक्षवाटिका, वृक्षवाटी, वाटः -टी -टिका, कृत्रिमवनं, उपवनं, वनं, कर्म्मान्तः, शाकटं or शाकिनं in comp.; as, 'a plantation of sugar canes,' इक्षुशाकटं, इक्षुशाकिनं.

Planted, *p. p.* रोपितः -ता -तं, आरोपितः &c., निखातः -ता -तं, न्यस्तः -स्ता -स्तं, विन्यस्तः &c., स्थापितः -ता -तं.

Planter, *s.* रोपयिता *m.* (तृ), आरोपयिता *m.*, रोपकः, आरोपकः, रोपणकृत् *m.*, आरोपणकृत्; 'of trees,' वृक्षरोपयिता *m.*, वृक्षरोपकः.—(Owner of a plantation) वाटिकापतिः *m.*, वाटिकेश्वरः.

Plash, *s.* वर्त्मकः, क्षुद्रजलौघः, क्षुद्रजलगुल्मः, पङ्कगुल्मः.

To **plash**, *v. n.* जले or पङ्के क्रीड् (c. 1. क्रीडति -डितुं).

Plashy, *a.* अनूपः -पा -पं, जलाढ्यः -ढ्या -ढ्यं, जलपङ्कमयः -यी -यं.

Plaster, *s.* (For covering a wall, &c.) लेपः, विलेपः, चूर्णलेपः, कर्करलेपः, सुधा, उद्वेपः.—(For a wound) उपनाहः, उपदेहः, अनुलेपनं.

To **plaster**, *v. a.* लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, आलिप्, विलिप्, प्रलिप्, उपलिप्, दिह् (c. 2. देग्धि -ग्धुं), लेपनं कृ, अनुलेपनं कृ, विलेपनं कृ, प्रलेपनं कृ, उपनाहनं कृ.

Plastered, *p. p.* लिप्तः -प्ता -प्तं, अनुलिप्तः &c., उपलिप्तः &c., आलिप्तः &c., प्रलिप्तः &c., दिग्धः -ग्धा -ग्धं, निदिग्धः &c., उपचितः &c., 'with cement,' सुधालिप्तः &c., सुधाधवलितः &c., सुधामयः -यी -यं.

Plasterer, *s.* लेपकः, प्रलेपकः, विलेपकः, लेपकारः, विलेपनकृत् *m.*, सुधाजीवी *m.* (न्).

Plastering, *s.* लेपनं, विलेपनं, अनुलेपनं, उपलेपः -पनं, लिपिः *f.*, पुस्तं.

Plastic, *a.* रूपकारी -रिणी -रि (न्), रूपकरः -रा -रं, आकारदः -दा -दं, आकारकरः -रा -रं, मूर्त्तिदः &c., कल्पकः -का -कं, कल्पनक्षमः -मा -मं.

To **plat**, *v. a.* (Weave) ग्रन्थ्, उद्ग्रन्थ्, वे, वप्, उत्वप्, गुम्फ्.

Plat, *s.* (Of ground). *See* Plot.

Plate, *s.* (Vessel from which food is eaten) पात्रं, भोजनपात्रं, शरावः, भाजनं, भाण्डं.—(Wrought silver, &c.) कोशः, कोषः सुवर्णरूप्यादिमयभाण्डानि *n. pl.*—(Flat piece of metal) पत्रं, फलकं -कं; 'gold plate,' सुवर्णपत्रं; 'copper-plate,' ताम्रपत्रं.—(Plate of metal for engraving or inscription) पट्टः -ट्टं, पत्रं, फलकं; 'copper-plate,' ताम्रपट्टं, ताम्रफलकं; 'a plate of copper on which a grant or edict is inscribed,' शासनपत्रं, पट्टः.

To **plate**, *v. a.* रूप्यपत्रपिनद्धं -द्धां कृ, राजतीकृ, राजतान्वितं -तां कृ.

Plated, *p. p.* or *a.* राजतान्वितः -ता -तं, राजितः -ता -तं, राजतपत्रपिनद्धः -द्धा -द्धं, रूप्यप्रतिबद्धः -द्धा -द्धं, रूप्यपत्रोपेतः -ता -तं.

Platform, *s.* मञ्चः, मञ्चकः, शिबिका, कर्णवंशः, इन्द्रकोषः; 'for any particular ceremony,' मञ्चमण्डपः.—(Plan). *See* the word.

Platinum, *s.* No Sanskrit equivalent. प्लाटिनं may be used.

Platoon, *s.* (Particular array of soldiers) पत्तिः *m.*

Platter, *s.* शरावः, पात्रं, भाजनं, भोजनपात्रं, बृहत्पात्रं.

Plaudit, *s.* प्रशंसा, प्रसादः, जयशब्दः, धन्यवादः, प्रशंसाशब्दः.

Plausibility, *s.* सत्याभासः -सत्वं, प्रमाणाभासः -सत्वं, सत्यसङ्काशता -त्वं सत्यसादृश्यं, सत्यसन्निभता.

Plausible, *a.* सत्यसङ्काशः -शा -शं, सत्यसन्निभः -भा -भं, सत्यसदृशः -शी -शं, सत्याभासरूपः -पा -पं, सत्याभासात्मकः -का -कं, प्रमाणाभासरूपः &c., सव्याजः -जा -जं, ग्राह्यः -ह्या -ह्यं, ग्रहणीयः -या -यं, वाह्यतः दर्शनीयः -या -यं or सुदृश्यः -श्या -श्यं or रमणीयः -या -यं.—(Using plausible arguments) आभासवादी -दिनी -दि (न्).

Plausibly, *adv.* सत्याभासपूर्व्वं, प्रमाणाभासपूर्व्वं, प्रमाणाभासेन, सत्यसादृश्येन सत्यसदृशं, सत्यसन्निभं, सव्याजं.

To **play**, *v. n.* (Frolic, sport) क्रीड् (c. 1. क्रीडति -ते -डितुं), आक्रीड्, विक्रीड्, संक्रीड्, परिक्रीड्, अनुक्रीड्, दिव् (c. 4. दीव्यति -ते, देवितुं), खेला (nom. खेलायति), रम् (c. 1. रमते, रन्तुं), विहृ (c. 1. -हरति -हर्त्तुं), विलस् (c. 1. -लसति -सितुं), तेव् (c. 1. तेवते -वितुं), लल् (c. 1. ललति -लितुं), कुर्द् or कूर्द् (c. 1. कूर्दते -र्दितुं), क्रीडां कृ, खेलां कृ.—(Play as a child) कुमार् (c. 10. कुमारयति -यितुं) or कुमाल्, कुड् (c. 6. कुडति -डितुं), कुमारवत् क्रीड्.—(Play at dice or any game) दिव्, प्रदिव्, प्रतिदिव्, अक्षैः or अक्षान् दिव्, अक्षैः क्रीड्, ग्लह् (c. 1. ग्लहते -हितुं), अक्षादिक्रीडां कृ, द्यूतक्रीडां कृ, अक्षद्यूतं कृ.—(On a musical instrument) वद् (c. 10. वादयति -यितुं), संवद्, वादित्रं वद्.—(Act in any character) अभिनयं कृ, नट्, often expressed by a nominal verb; as, 'he plays the king,' राजायते; 'he plays the lion,' सिंहायते; 'he plays the fool,' मूर्खायते.—(Move about, wanton) इतस्ततश् चल् (c. 1. चलति -लितुं) or सृ (c. 1. सरति, सर्त्तुं), विलस्.—(Operate, be in action or motion) चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, चल्.

To **play**, *v. a.* (Put in action or motion) प्रवृत् (c. 10. -वर्त्तयति -यितुं), चल् (c. 10. चालयति -यितुं), सञ्चल्, सृ (c. 10. सारयति -यितुं), चर् (c. 10. चारयति -यितुं), सञ्चर्.—(A musical instrument) वादित्रं or तूर्य्यं वद् (c. 10. वादयति -यितुं) or संवद् or मूर्च्छ् (c. 10. मूर्च्छयति -यितुं); 'a finger instrument,' सृ or चल्.—(Represent dramatically) अभिनी (c. 1. -नयति -नेतुं), नट् (c. 10. नाटयति -यितुं), रूप् (c. 10. रूपयति -यितुं), अभिनयं कृ.—(Perform, act, do) कृ, विधा (c. 3. -दधाति -धातुं), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था.

Play, *s.* क्रीडा -डनं, खेला -लनं, केलिः *m. f.*, देवनं, विलासः, विलसितं, लीला, विनोदः, परिहासः, परीहासः, विहारः, क्रीडाकौतुकं, कौतुकं, नर्म्म *n.* (न्), कूर्दनं, कुर्दनं, तेवनं, खेलितं; 'play of fancy'

बुद्धिविलासः; 'in play,' परिहासेन, लीलया, विलासेन; 'play of children,' बालक्रीडा, बाललीला; 'game of play,' रासः, रासरसः.—(Playing at dice, &c.) अक्षादिक्रीडा, अक्षक्रीडा, द्यूतक्रीडा, अक्षद्यूतं, द्यूतं, पणपूर्व्विका क्रीडा, देवनं.—(Action, operation) चेष्टा, चेष्टितं, प्रवृत्तिः *f.*, प्रवर्त्तनं, क्रिया, व्यवसायः, व्यापारः.—(Motion) चलनं, चरणं, सञ्चलनं, चरणं, सञ्चरणं, चारः, सरणं, खेलितं, खेलिका, खेल्या.—(Room for free motion) अवकाशः, प्रसरः, अवसरः, चेष्टापर्य्याप्तस्थलं-स्थानं.—(Drama, dramatic composition) नाटकः, प्रकरणं, रूपं -पकं.—(Dramatic show) प्रेक्षणं, प्रेक्षा, कौतुकं.

PLAY-DAY, *s.* क्रीडादिवसः, क्रीडनदिनं, विश्रामदिवसः, अनध्यायदिवसः, अनध्यायतिथिः *m.f.*, अस्वाध्यायतिथिः *m.f.*

PLAYED, *p.p.* क्रीडितः -ता -तं.—(As an instrument) वादितः -ता -तं, प्रवादितः &c.—(Set in motion) चालितः -ता -तं, सञ्चालितः &c., सारितः &c., सञ्चारितः &c.—(Acted) अभिनीतः -ता -तं.—(Performed) कृतः -ता -तं, अनुष्ठितः &c.

PLAYER, *s.* (One who sports) क्रीडकः, क्रीडाकारी *m.* (न्), देवकः, देवी *m.*, खेलाकारी *m.*—(Actor) नटः, कुशीलवः, रङ्गाजीवः, रङ्गोपजीवकः, अभिनेता *m.* (तृ), रङ्गावतारकः, नर्त्तकः; 'manager of a company of players,' सूत्रधारः, मारिषः.—(At dice, &c.) द्यूतक्रीडकः, अक्षक्रीडकः, अक्षदेवी *m.* (न्), अक्षद्यूतः, अक्षधूः *m.*, देवी *m.*—(On an instrument of music) वाद्यवादकः, भाण्डवादकः.

PLAY-FELLOW, PLAY-MATE, *s.* सहक्रीडकः, सहदेवी *m.* (न्), सहदेवकः.

PLAYFUL, *a.* क्रीडावान् -वती -वत् (त्), क्रीडाशीलः -ला -लं, लीलाशीलः -ला -लं, क्रीडापरः -रा -रं, लीलापरः -रा -रं, लीलाखेलः -ला -लं, विलासी -सिनी -सि (न्), क्रीडासक्तः -क्ता -क्तं, विनोदी &c., सलीलः -ला -लं, लीलावान् &c., केलिकः -का -कं, केलिपरः &c., खेलापरः -रा -रं, कलाकेलिः -लिः -लि, कौतुकी &c., कृतकौतुकः -का -कं, अभिलुलितः -ता -तं, चञ्चलः -ला -लं, क्रीडापरायणः -णा -णं, क्रीडकः -का -कं; 'playful anger,' क्रीडाकोपः.

PLAYFULLY, *adv.* विलासेन, सकौतुकं, लीलया, परिहासेन, क्रीडापूर्व्वं.

PLAYFULNESS, *s.* क्रीडाशीलता, सलीलत्वं, सविलासत्वं, चञ्चलता, क्रीडासक्तिः *f.*, क्रीडापरता, लीलापरता, लीलासक्तता.

PLAY-GROUND, *s.* क्रीडास्थानं, केलिस्थानं, क्रीडारामः, तेवनं, निकषणः.

PLAY-HOUSE, *s.* नाटकशाला, रङ्गशाला, नाटकमन्दिरं, नृत्यशाला, रङ्गः.

PLAY-THING, *s.* क्रीडनकं, क्रीडाद्रव्यं, खेलनी, क्रीडावस्तु *n.*, क्रीडामृगः.

PLEA, *s.* (Excuse) छद्म *n.* (न्), उत्तरं, व्यपदेशः, अपदेशः, उपदेशः, निमित्तं, कारणं.—(In law) उत्तरं, उत्तरवादः, उत्तरपादः; 'special plea,' कारणोत्तरं, प्राङ्न्यायः; 'false plea,' अपार्थकरणं; 'raising a plea,' छलीकरणं.

To PLEAD, *v.n.* उत्तरं वद् (c. 1. वदति -दितुं), उत्तरं कृ or दा, निमित्तं वद्, व्यपदेशं कृ, व्यपदिश् (c. 6. -दिशति -देष्टुं), अपदेशं कृ.—(Supplicate earnestly) विनयेन प्रार्थ् (c. 10. -अर्थयति -यितुं), विनयेन स्वार्थं निविद् (c. 10. -वेदयति -यितुं).

To PLEAD, *v.a.* (Adduce in proof) प्रमाणीकरणार्थम् उपन्यस् (c. 4. -अस्यति -असितुं), हेतुम् or निमित्तम् उपन्यस्, हेतूपन्यासं कृ, निमित्तोपन्यासं कृ.—(Alledge in excuse) व्यपदेशार्थं वद् (c. 1. वदति -दितुं) or उपन्यस्, अपदेशार्थं वद्.—(Plead the cause of another) परार्थं वद्, परार्थम् उत्तरं वद्.

PLEADABLE, *a.* व्यपदेशार्थं or प्रमाणीकरणार्थम् उपन्यसनीयः -या -यं or उपन्यास्यः -स्या -स्यं.

PLEADED, *p.p.* व्यपदेशार्थं or प्रमाणीकरणार्थम् उपन्यस्तः -स्ता -स्तं.

PLEADER, *s.* उत्तरवादी *m.* (न्), हेतुवादी *m.*, निमित्तवादी *m.*—(For another) परार्थं वादी *m.* or उत्तरवादी *m.*

PLEADING, *s.* उत्तरवादः, हेतुवादः, निमित्तवादः, व्यपदेशकरणं, छद्मकरणं, प्रमाणीकरणार्थं or व्यपदेशार्थं हेतूपन्यासः or निमित्तोपन्यासः.

PLEASANT, *a.* रम्यः -म्या -म्यं, रमणीयः -या -यं, प्रियः -या -यं, सुप्रियः -या -यं, मनःप्रियः &c., मनोरमः -मा -मं, रामः -मा -मं, अभिरामः -मा -मं, मनोभिरामः -मा -मं, मनोज्ञः -ज्ञा -ज्ञं, सुभगः -गा -गं, अभिमतः -ता -तं, यथाभिमतः -ता -तं, सुखः -खा -खं, सुखदः -दा -दं, सुखावहः -हा -हं, सुखप्रदः -दा -दं, सुखकरः -रा -रं, सुखदायकः -का -कं, यथासुखः -खा -खं, काम्यः -म्या -म्यं, कमनीयः -या -यं, कान्तः -न्ता -न्तं, नन्दकः -का -कं, आनन्ददः -दा -दं, आनन्दकरः &c., हर्षकः &c., हर्षणः -णा -णं, हर्षकरः &c., हर्षावहः -हा -हं, मोदकः -का -कं, मधुरः -रा -रं, रुचिकरः &c., रुचिरः -रा -रं, रुच्यः -च्या -च्यं, प्रशस्तः -स्ता -स्तं, तुष्टिकरः &c., हृदयङ्गमः -मा -मं, हृद्यः -द्या -द्यं, सुरभिः -भिः -भि, मनोरञ्जकः &c., मनोरञ्जनः &c., चोक्षः -क्षा -क्षं, चौक्षः -क्षी -क्षं.

PLEASANTLY, *adv.* सुखेन, सुखं, यथासुखं, सुखरूपेण, रम्यं, रमणीयं, मनोरमं, सुभगं, यथाभिमतं, प्रियं, सुप्रियं, मधुरं, रुचिरं.

PLEASANTNESS, *s.* रम्यता, रमणीयता, अभिरामता, प्रियता, सुप्रियता, काम्यत्वं, कान्तता, अभिमतत्वं, सुखत्वं, सौख्यं, सुखदायकत्वं.

PLEASANTRY, *s.* विनोदः, विनोदवाक्यं, विनोदोक्तिः *f.*, नर्म्मोक्तिः *f.*, नर्म्मभाषणं, परिहासः, परीहासः, हासिका.

To PLEASE, *v.a.* (Gratify) सुख् (c. 10. सुखयति -यितुं), सन्तुष् (c. 10. -तोषयति -यितुं), परितुष्, प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं), तृप्, प्रमुद्, रम्, ह्लाद्, आह्लाद, हृष्, विनुद् (c. 10. -नोदयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), आराध् (c. 10. -राधयति -यितुं), सभाज्, सुखं कृ or दा, प्रीतिं कृ or दा; 'anxious to please,' अनुग्रहकातरः -रा -रं.—(Approve itself to) रुच् (c. 1. रोचते -चितुं) with dat. or gen. of the person, [illegible] -भितुं), अभिमतः -ता -तं भू, अनुमतः -ता -तं भू, [illegible]; 'that pleases me,' तन् मह्यं or मम रोचते, तन् मया or मम अनुमतं or अभिमतं. *See To* LIKE.

To PLEASE, *v.n.* (Choose) रुच् (c. 1. रोचते -चितुं, c. 10. रोचयति -यितुं), इष् (c. 6. इच्छति, एषितुं); 'as you like,' यथा भवते रोचते, यथाकामं. *See To* LIKE, *v.n.*—(Condescend, as a word of ceremony) कृपां or दयां कृ. Usually expressed by the 2d or 3d person of the rt. अर्ह्, or by the use of तावत्, or some other particle; as, 'Be pleased to speak to me,' मां वक्तुम् अर्हसि or अर्हति भवान्; 'please to go,' गच्छ तावत्.

PLEASED, *p.p.* प्रीतः -ता -तं, प्रीतात्मा -त्मा -त्म (न्), तुष्टः -ष्टा -ष्टं, सन्तुष्टः &c., परितुष्टः &c., हृष्टः &c., हृष्टचित्तः -त्ता -त्तं, प्रसन्नः -न्ना -न्नं, प्रसादितः -ता -तं, मोदितः &c., मुदितः &c., आह्लादितः &c., प्रह्लादितः &c., आनन्दितः &c., अभिहर्षितः &c., तृप्तः -प्ता -प्तं, रममाणः -णा -णं, प्रतीतः -ता -तं; 'in mind,' प्रीतमनाः -नाः -नः (स्).

PLEASING, *a.* रम्यः -म्या -म्यं, मनोरमः -मा -मं, रमणीयः -या -यं, सुभगः -गा -गं, नन्दकः -का -कं, मोदकः &c., कमनीयः -या -यं, रुचिरः -रा -रं, रोचिष्णुः -ष्णुः -ष्णु, चन्दकः -का -कं, मञ्जुलः -ला -लं, मनोज्ञः -ज्ञा -ज्ञं, मनोनुकूलः -ला -लं, मनआपः -पा -पं, मनोरञ्जकः &c. *See* PLEASANT, *a.*—(To the eye) चाक्षुष्यः -ष्या -ष्यं, सुदृश्यः -श्या -श्यं, चारुरूपः -पा -पी -पं, दृश्यः &c. *See* BEAUTIFUL.—(To the ear) सुखश्रवः -वा -वं, श्रोत्रसुखः -खा -खं, श्रुतिसुखः &c., श्रोत्राभिरामः -मा -मं, सुचारुस्वनः -ना -नं, मधुस्वनः &c., सुश्राव्यः -व्या -व्यं; 'pleasing language,' चाटुः -टु *m. n.*, चाटूक्तिः *f.*

PLEASINGLY, *adv.* सुभगं, रमणीयं, रम्यं, मनोरमं, सुख or चारु or मधु in comp.; as, 'singing pleasingly,' चारुस्वनः -ना -नं, सुखस्वनः &c., मधुस्वनः &c.

PLEASURABLE, *a.* रम्यः -म्या -म्यं, रमणीयः -या -यं, सौख्यीयः -या -यं, सुखावहः -हा -हं, भोगवान् -वती -वत् (त्). *See* PLEASANT.

PLEASURE, *s.* (Gratification, enjoyment) प्रीतिः *f.*, सुखं, सौख्यं, आनन्दः, तुष्टिः *f.*, सन्तोषः, परितोषः, तोषः, हर्षः, मोदः, आमोदः, प्रमोदः, आह्लादः, प्रह्लादः, रतिः *f.*, उल्लासः, अभिरुचिः *f.*, नन्दः, ह्लादः, मुदा, मुद् *f.*, विलासः, कुतूहलं, कौतुकं, शर्म्म *n.* (न्), उत्साहः; 'intense pleasure,' परमानन्दः, अत्यानन्दः, रोमहर्षः -र्षणं, पुलकः, रोमाञ्चः; 'in pleasure and pain,' सुखदुःखयोः loc. du.—(Liking, friendship for) रुचिः *f.*, अभिरुचिः *f.*, इच्छा, अभिमतता, अनुरक्तिः *f.*, अभिलाषः, अभिलषितं, छन्दं, छन्दस् *n.*; 'one's own pleasure,' स्वेच्छा; 'at one's pleasure,' स्वेच्छया, स्वेच्छातस्, कामतस्, यथाकामं, कामं, अनुकामं.—(Sensual pleasure) विषयभोगः, विषयकामः, विषयसुखं, विषयानुरागः, कामः, भोगः.—(Sexual pleasure) रतिः *f.*, सुरतं, रतं, भोगः, भोगविलासः.—(Cause of pleasure) सुखहेतुः *m.*, सुखकारणं; 'goddess of pleasure,' रतिदेवता.

PLEASURE-BOAT, *s.* क्रीडानौका, केलिनौका, विलासनौका.

PLEASURE-GROUND, *s.* उद्यानं, क्रीडोद्यानं, आरामः, क्रीडारामः, क्रीडावनं, विलासवनं, क्रीडाकाननं, विलासकाननं, केलिकाननं, केलिवनं, प्रमदवनं, किलोद्यानं, तेवनं.

PLEASURE-HOUSE, *s.* केलिगृहं, क्रीडागृहं, विलासगृहं, विलासमन्दिरं.

PLEASURIST, *s.* भोगासक्तः, विषयासक्तः, विषयसेवी *m.* (न्), केलिनागरः, केलिपरः, विषयी *m.* (न्), वैषयिकः, भोगपरायणः.

PLEBEIAN, *a.* प्राकृतः -ती -तं, दुष्कुलीनः -ना -नं, अकुलीनः -ना -नं, लौकिकः -की -कं, साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, अवरवर्णः -र्णा -र्णं, अधमवर्णः &c., अन्त्यवर्णः &c., अधमजातीयः -या -यं, अन्त्यजातीयः -या -यं, पामरः -री -रं.

PLEBEIAN, *s.* प्राकृतजनः, पृथग्जनः, निहीनजनः, इतरजनः, अकुलीनजनः, वृषलः, अपसदः, नीचजनः, पामरजनः.

PLECTRUM, *s.* कोणः, शारिका, परिवादः, रणः.

PLEDGE, *s.* (Any thing deposited as a security) न्यासः, निक्षेपः, आधिः *m.*, आधानं, उपन्यासः, बन्धकः, उपनिधिः *m.*, उपनिक्षेपः, उपनिधानं, औपनिधिकं, अन्वाधिः *m.*, पणः, परिपणनं, आधमनं, आधीकरणं; 'counter-pledge,' प्रतिपाणं.—(Any thing deposited as security for the repayment of something borrowed) गृहीतस्य द्रव्यस्योपरि विश्वासार्थम् अधमर्णेनोत्तमर्णे न्यस्त आधिः; 'act of depositing a pledge,' आधीकरणं.—(Hostage) बन्धकः, शरीरबन्धकः.—(Token) अभिज्ञानं.

To PLEDGE, *v. a.* आधीकृ, न्यस् (c. 4. -अस्यति -असितुं), प्रतिन्यस्, उपन्यस्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपनिक्षिप्, निधा (c. 3. -दधाति -धातुं), आधा, पण् (c. 1. पणते -णितुं), परिपण्, न्यासीकृ.—(Pledge one's self, pledge one's word) प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), प्रतिज्ञां कृ, प्रतिज्ञाबद्धः -द्धा -द्धं भू, वचनबद्धः -द्धा -द्धं भू, अङ्गीकृ, उरीकृ.

PLEDGED, *p. p.* आधीकृतः -ता -तं, न्यस्तः -स्ता -स्तं, उपन्यस्तः &c., निक्षिप्तः -प्ता -प्तं, परिपणितः -ता -तं, न्यासीकृतः -ता -तं.—(Promised) प्रतिज्ञातः -ता -तं, अङ्गीकृतः &c., अभ्युपेतः &c.; 'that has pledged his word,' कृतप्रतिज्ञः -ज्ञा -ज्ञं, प्रतिज्ञाबद्धः -द्धा -द्धं, वचनबद्धः &c., दत्तप्रतिज्ञः &c., दत्तवचनः &c.

PLEDGET, *s.* (In surgery) विकेशिका, पट्टः -ट्टकः, आवेष्टनं, कवलिका.

PLEIADS, PLEIADES, *s. pl.* कृत्तिका, बहुला: *f. pl.*

PLENARY, *a.* सम्पूर्णः -र्णा -र्णं, परिपूर्णः &c., निःशेषः -षा -षं.

PLENILUNAR, PLENILUNARY, *a.* पूर्णचन्द्रसम्बन्धी &c., पूर्णेन्दुसम्बन्धी &

PLENIPOTENCE, *s.* पूर्णसामर्थ्यं, सामर्थ्यपूर्णता, पूर्णशक्तित्वं, शक्तिपूर्णता.

PLENIPOTENT, *a.* पूर्णशक्तिः -क्तिः -क्ति, पूर्णशक्तिमान् -मती -मत् (त्).

PLENIPOTENTIARY, *s.* पूर्णशक्तियुक्तः, पूर्णशक्तिविशिष्टः, पूर्णशक्तिकः.

PLENIST, *s.* पूर्णतावादी *m.* (न्), पूर्णतावादी *m.*

PLENITUDE, *s.* पूर्णता, सम्पूर्णता -त्वं, परिपूर्णता -त्वं, पूर्तिः *f.*, आपूर्तिः, पुष्कलता, विपुलता, समृद्धिः *f.*, सामृद्ध्यं, प्राचुर्य्यं, उत्सेकः.

PLENTEOUS, PLENTIFUL, *a.* बहुलः -ला -लं, बहुः -हुः -ह्वी -हु, प्रचुरः -रा -रं, पुष्कलः -ला -लं, विपुलः -ला -लं, समृद्धः -द्धा -द्धं, परिपूर्णः -र्णा -र्णं, भूरिः -रिः -रि, अतिरिक्तः -क्ता -क्तं, उद्रिक्तः &c., उत्सि &c., उपचितः &c.

PLENTEOUSLY, PLENTIFULLY, *adv.* बाहुल्येन, बहुशस्, प्राचुर्य्येण, प्रचु पुष्कलं, विपुलं, वैपुल्येन, भूरिशस्, भूरि, बहु, अनेकशस्, अतिरिक्तं, उद्रेके

PLENTEOUSNESS, PLENTIFULNESS, *s.* बाहुल्यं, प्राचुर्य्यं, पुष्कलत्वं. *See* NEX

PLENTY, *s.* बाहुल्यं, बहुत्वं -ता, प्राचुर्य्यं, प्रचुरता -त्वं, वैपुल्यं, विपुलत पुष्कलता, समृद्धिः *f.*, सामृद्ध्यं, वृद्धिः *f.*, समृद्धता, प्रभूतता, उद्रेक अतिरेकः, उत्सेकः, अतिरिक्तता, उत्सिक्तता, स्फीतिः *f.*, स्फातिः *f.* 'time of plenty or abundance of corn, &c.,' सुभिक्षं, धान्य वृद्धिः *f.*; 'cow of plenty,' कामदा, कामदुघा, कामधुक् *f.* (ह *See* PHILOSOPHER'S STONE.

PLEONASM, *s.* शब्दातिशयः, शब्दबाहुल्यं, शब्दाधिक्यं, स्वार्थं, मार्थं.

PLEONASTIC, *a.* स्वार्थः -र्था -र्थं, अतिरिक्तः -क्ता -क्तं, अतिरिक्तशब्दः -ब्दा -

PLEONASTICALLY, *adv.* शब्दबाहुल्येन, शब्दाधिक्येन, स्वार्थतस्.

PLETHORA, *s.* रक्तपित्तं -त्तः, पित्तरक्तं, अस्रपित्तं, रक्तातिशय्यं, रक्ताधिक अतिपुष्टिः *f.*

PLETHORIC, *a.* रक्तपित्तरोगी -गिणी -गि (न्), अतिपुष्टिशीलः -ला -ल अतिपुष्टः -ष्टा -ष्टं, अतिशयपुष्टः -ष्टा -ष्टं.

PLEURISY, *s.* (Disease of the chest) उरोग्रहः, वक्षोग्रहः.

PLEURITIC, *a.* उरोग्रहरोगी -गिणी -गि (न्), उरोग्रही &c., वक्षोग्रही &

PLIABILITY, PLIANCY, *s.* सुनम्यता, सुनमनीयत्वं, नमनशीलता, आनम्यत आयम्यता, मृदुता, मार्दवं, कोमलता, शिथिलता, शैथिल्यं, अदृढता.

PLIANT, PLIABLE, *a.* सुनम्यः -म्या -म्यं, सुखनम्यः &c., सुनमनीयः - -यं, नमनशीलः -ला -लं, आनम्यः &c., नम्यः &c., नमनीयः &c आयम्यः &c., मृदुः -दुः -द्वी -दु, कोमलः -ला -लं, शिथिलः -ला -लं अदृढः -ढा -ढं.

To PLIGHT, *v. a.* *See To* PLEDGE.

PLIGHT, *s.* (Condition) अवस्था, दशा, स्थितिः *f.*, भावः, वृत्तिः *f.*, गतिः *f.* 'bad plight,' दुर्दशा, दुःस्थितिः *f.*, दुर्गतिः *f.*; 'in bad pligh दुर्दशाग्रस्तः -स्ता -स्तं, दुःस्थः -स्था -स्थं.—(Gage). *See* PLEDGE

PLIGHTED, *p. p.* परिपणितः -ता -तं, न्यस्तः -स्ता -स्तं, उपन्यस्तः & प्रतिज्ञातः -ता -तं, कृतप्रतिज्ञः -ज्ञा -ज्ञं; 'in marriage,' प्रतिज्ञा वाहितः &c., वाग्दत्तः -त्ता -त्तं.

PLINTH, *s.* प्राकारमूलं, भित्तिमूलं, प्राकारतलं, स्तम्भमूलं, स्तम्भतलं.

To PLOD, *v. n.* मन्दं मन्दं निरन्तरायासेन or अविरतक्लेशेन श्रम् (c. श्राम्यति, श्रमितुं) or अविरतश्रमेण आयस् (c. 4. -यस्यति -यसि अतिमान्द्येन नित्यश्रमं कृ or नित्यायासं कृ or नित्यकष्टं कृ or नित्य कृ or नित्यप्रवृत्तिं कृ.

PLODDER, *s.* अतिमान्द्येन निरन्तरायासी *m.* (न्) or अविरतायासी *m.* निरन्तरश्रमी or नित्यश्रमी *m.* (न्) or नित्योद्योगी *m.* (न्) or नि

व्यवसायी, आयासाध्ययनी *m.* (न्), श्रमाध्यायी *m.*, आयासव्यासङ्गी *m.*, आयासगामी *m.*, पिपीलिकाधर्म्मी *m.* (न्).

Plodding, *s.* अतिमान्द्यपूर्ब्बो निरन्तरायासः or अविरतायासः, अतिमान्द्येन नित्यश्रमः or नित्योद्योगः or नित्यव्यवसायः, आयासाध्ययनं, श्रमाध्ययनं, पिपीलिकाधर्म्मः.

Plodding, *a.* अतिमान्द्यपूर्ब्बं निरन्तरायासी -सिनी -सि (न्) or नित्यश्रमी &c.

Plot, *s.* (Complicated scheme, deep-laid stratagem) कपटप्रबन्धः, छलप्रबन्धः, कापट्यप्रबन्धः, उपायप्रबन्धः, कूटप्रबन्धः, कल्पना, उपायकल्पना, सङ्कल्पः, उपायप्रयोगः, प्रयोगः, युक्तिः *f.*, अपदेशः, व्यपदेशः, मन्त्रणा, उपायः.—(Scheme of mischief) कुसङ्कल्पः, कुकल्पना, कुमन्त्रणा, कुकर्म्मसम्पादनार्थं or द्रोहसम्पादनार्थं कपटप्रबन्धः.—(Of a drama, &c.) वस्तु *n.*; 'secondary plot,' प्रतिमुखं; 'good plot,' सुवस्तु; 'a play with a plot composed by Kālidāsa,' कालिदासग्रथितवस्तुनाटकः.—(Of ground) स्थलं -ली -ला, भूमिभागः, भूभागः, भूप्रदेशः, भूमिप्रदेशः, भूमिः *f.*, वसुधा.

To plot, *v. a.* or *n.* (Form a scheme) मनसा उपायप्रबन्धं कृप् (c. 10. कल्पयति -यितुं) or प्रचिन्त् (c. 10. -चिन्तयति -यितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), मन्त्र् (c. 10. मन्त्रयते -यितुं), सम्मन्त्र्, उपायकल्पनां कृ, कपटप्रबन्धं कृ, उपायप्रबन्धं कृ, सङ्कल्पं कृ.—(Form a scheme of mischief) कुसङ्कल्पं कृ, कुकर्म्मसम्पादनार्थं कपटप्रबन्धं कृ or उपायकल्पनां कृ, द्रोहकरणार्थं कुमन्त्रणां कृ or सम्मन्त्रणां कृ.—(Plot against) द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), अभिद्रुह्, द्रोहं चिन्त् or प्रचिन्त्, कपटप्रबन्धेन द्रोहं कृ.

Plotter, *s.* कपटप्रबन्धकारी *m.* (न्), उपायकल्पकः, उपायचिन्तकः, द्रोहचिन्तकः, कुमन्त्रणाकृत्, कुकल्पनाकृत् *m.*, कुसङ्कल्पकारी *m.* (न्).

Plough, *s.* हलं, लाङ्गलं, गोदारणं, सीरः, शीरः, हालः, गोकीलः, गोकिलः, कृन्तत्रं, कर्षणी, आकर्षणी, राधरङ्कुः, कुनलः; 'body of a plough,' फालः, फलं, निरीशं, निरीषं, कुटकं; 'the share,' *see* Ploughshare; 'the pole or shaft,' ईषा, ईशा, लाङ्गलदण्डः; 'the yoke,' युगं, कुशः; 'pin of it,' युगकीलकः; 'tie of it,' योक्त्रं, योत्रं, आबन्धः; 'handle of a plough,' ईषादण्डः, ईशादण्डः; 'relating or belonging to a plough,' हालिकः -की -कं, लाङ्गलिकः &c., सैरिकः -की -कं; 'to hold, drive or follow the plough,' लाङ्गलं or हलं ग्रह (c. 9. गृह्णाति, ग्रहीतुं) or भृ or धृ or वह् (c. 10. वाहयति -यितुं) or चल् (c. 10. चालयति -यितुं).

To plough, *v. a.* हलेन or लाङ्गलेन कृष् (c. 1. कर्षति, क्रष्टुं) or कर्षणं कृ, लाङ्गलेन भूमिं दॄ (c. 10. दारयति -यितुं) or भिद् (c. 7. भिनत्ति, भेत्तुं), हल् (c. 1. हलति -लितुं, c. 10. हलयति -यितुं), हलहतिं कृ, लाङ्गलहतिं कृ, हलहतं -तां कृ, हलकृष्टं -ष्टां कृ.

To plough, *v. n.* (Drive a plough) लाङ्गलं or हलं वह् (c. 10. वाहयति -यितुं) or चल् (c. 10. चालयति -यितुं).

Ploughable, *a.* कर्षणीयः -या -यं, कृषियोग्यः -ग्या -ग्यं, सीत्यः -त्या -त्यं, हल्यः -ल्या -ल्यं, हलहतियोग्यः &c.

Plough-boy, *s.* बालकृषकः, बालकर्षकः, बालहालिकः.

Ploughed, *p.p.* कृष्टः -ष्टा -ष्टं, कर्षितः -ता -तं, हलकृष्टः &c., फालकृष्टः &c., फालकर्षितः &c., सीत्यः -त्या -त्यं, शीत्यः &c., हल्यः -ल्या -ल्यं; 'twice-ploughed,' द्विगुणाकृतः -ता -तं, द्वितीयाकृतः &c., द्विहल्यः &c., द्विसीत्यः -त्या -त्यं, शम्बाकृतः -ता -तं, सम्बाकृतः &c.; 'thrice-ploughed,' त्रिसीत्यः &c., त्रिगुणाकृतः &c., तृतीयाकृतः &c., त्रिहल्यः &c.; 'ploughed by two ploughs,' हलद्वयेन कृष्टः &c. or द्वाहितः; 'a ploughed field,' फालकृष्टक्षेत्रं, फालकृष्टं, हल्यक्षेत्रं; 'land ploughed after sowing,' बीजाकृतः -ता -तं, उप्तकृष्टः -ष्टा -ष्टं.

Plougher, *s.* कृषकः, कर्षकः, कर्षी *m.* (न्), हालिकः, सैरिकः.

Plough-gear, *s.* हलोपकरणं, लाङ्गलोपकरणं, लाङ्गलसामग्री, हलसज्जा.

Plough-handle, *s.* ईषादण्डः, ईशादण्डः, ईषायष्टिः *m.-f.*

Ploughing, *s.* कर्षणं, कृषिः *f.*, कार्षिः *f.*, उत्कर्षणं, प्रकर्षणं, सङ्कर्षणं, लाङ्गलकर्षणं, भूमिकर्षणं, क्षेत्रकर्षणं, भूमिदारणं, हलहतिः *f.*, हलभृतिः *f.*, लाङ्गलग्रहणं, उत्कर्षणं.

Plough-land, *s.* हल्यक्षेत्रं, हल्यभूमिः *f.*, फालकृष्टं, हल्यं, सीत्यं, शीत्यं, हालिकं, हालिकक्षेत्रं, लाङ्गलिकं. *See* Ploughed.

Plough-man, *s.* हालिकः, लाङ्गलिकः, लाङ्गली *m.* (न्), लाङ्गलग्रहः, हलधरः, लाङ्गलधरः, हलभृत् *m.*, लाङ्गलभृत् *m.*, हलवाहकः, कृषिकः, कृषकः, कर्षकः, कृषिजीवी *m.* (न्), कर्षी *m.* (न्), कार्षकः -र्षिकः, कृषीवलः, क्षेत्रकर्षकः, भूमिकर्षकः, सैरिकः, शैरिकः.

Plough-share, *s.* फालः, कृषिकः -का, कृषकः, फलं, सिता, कुशी, कुटकं.

Plough-tail, *s.* लाङ्गलपृष्ठं, लाङ्गलस्य पश्चाद्भागः or पश्चिमभागः.

To pluck, *v. a.* (Pull off, out or from) उत्कृष् (c. 1. -कर्षति -क्रष्टुं), निष्कृष्, कृष्, उद्धृ (c. 1. -हरति -हर्तुं), निर्हृ, हृ, उत्पट् (c. 10. -पाटयति -यितुं), उत्पाटनं कृ.—(As the hair) लुञ्च् (c. 1. लुञ्चति -ञ्चितुं), उल्लुञ्च्, अवलुञ्च्, केशान् उत्पट्, केशोत्पाटनं कृ, केशोल्लुञ्चनं कृ.—(As feathers, &c.) पक्षान् or पर्णान् उत्पट् or निष्कृष् or निर्हृ or हृ, पक्षोत्पाटनं कृ, निष्पक्षीकृ, निष्पर्णीकृ, निष्पत्रीकृ.—(Gather by plucking) अङ्गुलिभिर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं) or चि or अवचि or लू or छिद्.—(Pluck up) उत्पट्, उद्धृ, समुद्धृ, उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, उच्छिद्, उत्खन्.

Pluck, *s.* (Of an animal) पशोर् हृद्यकृदादि *n.*—(Mettle, courage) वीर्य्यं, सत्त्वं, साहसं, पौरुषं.

Plucked, *p. p.* हृतपर्णः -र्णा -र्णं, उद्धृतपर्णः &c., हृतलोमा -मा -म (न्).

Plucker, *s.* उत्पाटयिता *m.* (तृ), उत्पाटी *m.* (न्), उद्धर्त्ता *m.* (र्तृ).

Plucking, *s.* उत्पाटः -टनं, उत्क्षेपः, निष्कर्षणं, उद्धरणं.—(As of hair) उल्लुञ्चनं, अवलुञ्चनं.—(Gathering) चयः, चयनं, अवचयः, ग्रहणं.

Plug, *s.* रोधनी, निरोधनी, स्तम्भनी, पिधानं.

To plug, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, स्तम्भ् (c. 10. स्तम्भयति -यितुं), पिधा (c. 3. -दधाति -धातुं).

Plum, *s.* (Fruit) सप्तफलभेदः.—(Sum of one hundred thousand) लक्षं -क्षा, लक्ष्यं; 'one who is worth a plum,' लक्षाधीशः.

Plumage, *s.* पक्षः, पर्णः, पक्षिपर्णाः *m. pl.*, पक्षिपत्त्राणि *n. pl.*, पत्त्रं, पिच्छं, गरुत् *m.*; 'of a peacock,' गुच्छः -च्छकः, वृषं; 'having good or beautiful plumage,' सुपर्णः -र्णा -र्णं, सुपर्णी -र्णिनी -र्णि (न्), सुपक्षवान् -वती -वत् (त्), चारुपर्णः &c., चारुपर्णी &c.

Plumb, *s.* लम्बः -म्बकः, लम्बसीसकं, ससीसकसूत्रं. *See* Plummet.

Plumb, *a.* लम्बः -म्बा -म्बं, लम्बरूपः -पा -पं, ऋजुः -जुः -जु.

To plumb, *v. a.* (Adjust with a line) सूत्र् (c. 10. सूत्रयति -यितुं), सूत्रेण समायुज् (c. 10. -योजयति -यितुं) or युज्.—(Sound depth) सूत्रेण वेधपरिमापणं कृ or गाम्भीर्य्यपरिमापणं कृ.

Plumbean, plumbeous, *a.* सीसमयः -यी -यं, सीसगुणकः -का -कं, सैसकः &c.

Plumber, *s.* सीसकारः -रकः, सीसकर्त्ता *m.* (र्तृ), सीसकव्यापारी *m.*

Plumb-line, *s.* लम्बसीसकं, लम्बसूत्रं. *See* Plumb, *s.*

Plum-cake, *s.* चित्रापूपः, चित्रपिष्टकः, शुष्कफलपूरितापूपः.

Plume, *s.* (Feather) पक्षः, पर्णः, पिच्छं.—(Feather worn as ornament, crest) शेखरः, चूडा, शिखा, किरीटः, मुकुटं, मौलिः *m.-f.*

To PLUME, *v. a.* (Adjust feathers) पक्षान् or पर्णान् रच् (c. 10. रचयति -यितुं) or विरच्.—(*Strip of feathers*) पक्षान् or पर्णान् उत्कृष् or निष्कृष् or हृ or उत्पट्, निष्पक्षीकृ *See To* PLUCK.—(Pride one's self) अभिमन् (c. 4. -मन्यते -मन्तुं), आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं); 'to plume one's self on one's learning,' पण्डितम्मन्यः -न्या -न्यं भू or अस्.

PLUMELESS, *a.* पक्षहीनः -ना -नं, चूडाहीनः &c., अपक्षः -क्षा -क्षं.

PLUMIGEROUS, *a.* पक्षवान् -वती -वत् (त्), पक्षी -क्षिणी -क्षि (न्), सपक्षः -क्षा -क्षं.

PLUMIPED, *a.* सपक्षपादः -दा -दं, सपर्णपादः &c., सपक्षचरणः &c.

PLUMMET, *s.* लम्बः -म्बकः, लम्बसीसकं, ससीसकसूत्रं, सीसालम्बितसूत्रं, सीसलग्नसूत्रं, सूत्रलग्नसीसकं, लम्बसूत्रं, लम्बकसूत्रं.

PLUMOSE, PLUMOUS, *s.* सपक्षः -क्षा -क्षं, सपिच्छः -च्छा -च्छं, पक्षवान् -वती -वत् (त्), पिच्छिलः -ला -लं. *See* FEATHERED.

PLUMP, *a.* पीवरः -रा -रं, पीनः -ना -नं, घनः -ना -नं, घनमांसः -सा -सं, उन्नतमांसः &c., उन्नतः -ता -तं, पुष्टः -ष्टा -ष्टं, परिपुष्टः &c., मांसपुष्टः &c., स्थूलमांसः &c., सुललितः -ता -तं, सुललितमांसः &c., आप्यानः -ना -नं, स्थूलः -ला -लं, उच्छूनः -ना -नं, तुन्दी -न्दिनी -न्दि (न्), तुन्दिकः -का -कं, स्फीतः -ता -तं, स्फातः &c., फुल्लः -ल्ला -ल्लं.

PLUMP, *adv.* अकस्मात्, आकस्मिकशब्देन, आस्फोटनशब्देन.

To PLUMP, *v. a.* आप्यै (c. 10. -प्याययति -यितुं), स्थूलीकृ, पीवरीकृ, स्फाय् (c. 10. स्फाययति -यितुं), श्वि (c. 10. श्वाययति -यितुं), उच्छूनीकृ, शूनीकृ.

To PLUMP, *v. n.* अकस्मात् or आकस्मिकशब्देन or आस्फोटनशब्देन पत् (c. 1. पतति -तितुं), अतिभारेण पत्.

PLUMPLY, *adv.* सुव्यक्तं, सुस्पष्टं, अतिव्यक्तं, व्यक्तार्थतस्, अवक्रं.

PLUMPNESS, *s.* घनता, स्थूलता -त्वं, पीवरत्वं, पीनत्वं, पुष्टता, सुपुष्टता, पुष्टिः *f.*, सुपुष्टिः *f.*, स्फीतिः *f.*, स्फीतता -त्वं, स्फातिः *f.*, फुल्लता, आप्यानं, उन्नतिः *f.*

PLUM-PUDDING, *s.* चित्रापूपः, चित्रपोलिका, मोदकादिपूरितपोलिका.

PLUMY, *a.* सपक्षः -क्षा -क्षं, पक्षविशिष्टः -ष्टा -ष्टं. *See* FEATHERED.

PLUNDER, *s.* लोप्त्रं, लोत्रं, लप्त्रं, लोतः -तं, लुण्ठनं, लुण्ठा, लुण्टनं, लुण्टा, हरणं, अपहारः, अभिग्रहः, धनापहारः -हरणं, नष्टाभिसृत्वं, होढं.

To PLUNDER, *v. a.* धनद्रव्यादि हृ (c. 1. हरति, हर्त्तुं) or अपहृ or अभिहृ, लुण्ठ् (c. 1. लुण्ठति -ण्ठितुं) or लुण्ट् or लुण्ड् or लुण्ड् or लुण्ट्, चुर् (c. 10. चोरयति -यितुं), विलुप् (c. 6. -लुम्पति -लोप्तुं), लुप्, कल् (c. 10. कालयति -यितुं), प्रकल्, साहसेन or साहसपूर्व्वम् अपहृ.

PLUNDERED, *p. p.* हृतधनः -ना -नं, हृतद्रव्यः -व्या -व्यं, हृतस्वः -स्वा -स्वं, अपहृतस्वः &c., लुण्ठितः -ता -तं, साहसेन or साहसपूर्व्वम् अपहृतः -ता -तं, लुप्तः -प्ता -प्तं, होढः -ढा -ढं.

PLUNDERER, *s.* अपहारकः, अपहारी *m.* (न्), हारकः, हारी *m.*, अपहर्त्ता *m.* (र्तृ), लुण्टाकः, लुण्टनकृत् *m.*, साहसेन or साहसपूर्व्वम् अपहारी *m.*, साहसिकः.

PLUNDERING, *s.* अपहारः, अपहरणं, हरणं, धनापहारः, लुण्ठनं, लुण्टनं.

To PLUNGE, *v. a.* (Immerse) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, प्लु (c. 10. प्लावयति -यितुं), आप्लु, अवगाह् (c. 10. -गाहयति -यितुं), जलं प्रविश् in caus., जले निविश्, स्ना in caus.

To PLUNGE, *v. n.* (Dive) मज्ज् (c. 6. मज्जति -ज्जितुं, मंक्तुं), निमज्ज्, अवगाह् (c. 1. -गाहते -हितुं -गाढुं), व्यवगाह्, विगाह्, आप्लु (c. 1. -प्लवते -प्लोतुं), जलमध्ये प्रविश्, जलान्तः प्रविश्, जलं प्रविश्, जलान्तः-प्रवेशं कृ, जलान्तःप्लवनं कृ, स्ना.

PLUNGE, PLUNGING, *s.* मज्जनं, निमज्जनं, प्रमज्जनं, प्लवनं, आप्लवः, आप्लावः -वनं, अवगाहनं, विगाहः -हनं, गाहनं, जलप्रवेशः, जलान्तःप्रवेशः, जलान्तःप्रवेशः, निमज्जनं; 'of an elephant,' निर्वाणं.

PLUNGED, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः &c., मज्जितः -ता -तं, निमज्जितः &c., प्रमग्नः &c., गाहितः -ता -तं, अवगाहितः &c., अवगाढः -ढा -ढं, विगाढः &c., आप्लुतः -ता -तं, निवेशितः &c., अभिनिवेशितः &c., निविष्टः -ष्टा -ष्टं, अभिनिविष्टः &c., लीनः -ना -नं, निर्वाणः -णा -णं; 'in a sea of sorrow,' शोकसागरमग्नः &c., शोकसागरावगाढः -ढा -ढं. *See* IMMERSED.

PLUNGEON, *s.* (The Diver bird) प्लवः, प्लावी *m.* (न्).

PLUNGER, *s.* गाहिता *m.* (तृ), अवगाहिता *m.*, मंक्ता *m.* (क्तृ), निमंक्ता *m.*

PLURAL, *a.* अनेकः -का -कं, बहुः -हुः -ह्वी -हु, बहुलः -ला -लं.—(Plural number, in grammar) अनेकवचनं, बहुवचनं.

PLURALITY, *s.* अनेकत्वं -ता, अनैक्यं, बहुत्वं -ता, बाहुल्यं, अनेकसंख्यत्वं; 'of gods,' देवबहुत्वं; 'of wives,' सापत्न्यं.

PLUS, *s.* (In Algebra) धनं, स्वं.

PLUSH, *s.* स्थूलदुकूलं, घनदुकूलं, घनलोमवद् दुकूलं.

PLUTO, *s.* (God of the infernal regions) यमः. *See* YAMA.

PLUTUS, *s.* (God of wealth) कुवेरः, धनपतिः *m.* *See* KUVERA.

PLUVIAL, PLUVIOUS, *a.* वृष्टिमान् -मती -मत् (त्), वर्षुकः -का -कं, वर्षिकः -की -कं, वार्षिकः &c., वृष्टिमयः -यी -यं, प्रचुरवृष्टिः -ष्टिः -ष्टि, बहुवृष्टिः &c.

PLUVIAMETER, *s.* वृष्टिमापनयन्त्रं, वृष्टिमापकः, वृष्टिमापनी.

To PLY, *v. a.* (Lay on) ऋ in caus. (अर्पयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), न्यस्, आधा, धा, पत् in caus.; 'to ply with repeated blows,' पुनः पुनः पत्, मुहुर्मुहुः पत् or दण्डपातनं कृ.—(Employ diligently) यत्नतः or निर्बन्धेन प्रयुज् or उपयुज् or प्रवृत्.—(Keep in motion) प्रचालनम् or अविरतं चल् (c. 10. चालयति -यितुं), or सञ्चल्.—(Urge, press perseveringly) निर्बन्धेन प्रत्युपस्था (c. 1. -तिष्ठति -ष्ठातुं) or उपस्था or आक्रम् (c. 1. -क्रामति -क्रमितुं); 'with entreaties,' अतिनिर्बन्धेन प्रार्थ् or अभ्यर्थ् or प्रार्थनं कृ.

To PLY, *v. n.* (Be steadily employed) अनालस्येन or अतन्द्रितम् or अविरतं व्यापृ in pass. (-प्रियते) or व्यापृतः -ता -तं भू or निविष्टः -ष्टा -ष्टं भू or प्रवृत् or यत्, अविरतयत्नं कृ.

PLY, *s.* (Fold) ऊर्म्मिः *m. f.*, ऊर्म्मी -र्म्मिका, व्यावर्त्तनं, तरङ्गः, पुटः.

PNEUMATIC, PNEUMATICAL, *a.* (Consisting of air) वायुमयः -यी -यं, वायुरूपः -पा -पं.—(Pertaining to air) वायवः -वी -वं, वायुसम्बन्धी -न्धिनी -न्धि (न्), वायुविषयकः -का -कं, वायु in comp.—(Moved or played by air) वायु in comp., वायुसञ्चारितः -ता -तं, वायुवादितः -ता -तं; 'pneumatic instrument,' वायुयन्त्रं, वायुवाद्यं.

PNEUMATICS, *s. pl.* वायुविद्या, वायुधर्म्मविद्या, वायुगुणविद्या, वायुशास्त्रं, वायुगुणविषयका विद्या.

PNEUMONIA, *s.* (Inflammation of the lungs) फुप्फुसदाहः.

PNEUMONIC, *a.* फुप्फुससम्बन्धी &c., फुप्फुसविषयकः -का -कं.

To POACH, *v. a.* (Boil eggs slightly) अण्डानि तप्तजलान्तः कृत्वा ईषत् पच् (c. 1. पचति, पक्तुं) or क्वथ् or अर्द्धसिद्धानि कृ.—(Steal or pocket game) वनपक्ष्यादि or जङ्गलपश्वादि चुर् or गूढकोषान्तः कृत्वा अपहृ. *See* the next.

To POACH, *v. n.* कूटयत्नेन वनपक्षिणो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), कूटोपायेन जङ्गलपश्वादि ग्रह् or चुर् (c. 10. चोरयति -यितुं) or अपहृ (c. 1. -हरति -हर्त्तुं), जाङ्गलजन्तुचौर्य्यं कृ, वन्यजन्तुहरणं कृ, वन्यजन्तुस्तेयं कृ, मृगयाचौर्य्यं कृ.

Poacher, *s.* कौटिकः, कौटकिकः, कौठिलिकः, कूटयत्नेन वन्यपशुग्राहकः, कूटोपायेन वन्यजन्तुहारी *m.* (न्) or जाङ्गलपशुहारकः, जाङ्गलचौरः, मृगयाचौरः, वनचौरः, मृगयाचोरः, वैतंसिकः.

Poaching, *s.* कूटयत्नेन वनपशुग्रहणं, कूटोपायेन जाङ्गलपशुग्रहणं or जाङ्गलजन्तुहरणं, मृगयाचौर्य्यं, जाङ्गलचौर्य्यं, वन्यजन्तुचौर्य्यं, वन्यजन्तुस्तेयं, वनचौर्य्यं, वनस्तेयं.

Pock, *s.* रक्तवरटी, रक्तवटी, वटी, वरटी, रक्तस्फोटः, मसूरस्फोटः -टकः, स्फोटः -टकः, विस्फोटः, किसिमं, किम्म *n.* (न्), गुटिका.

Pocket, *s.* वस्त्रान्तःस्यकोषः, वस्त्रस्थकोषः, वस्त्रान्तरस्यकोषः, कोषः, कोशः, आधारः.

To **pocket**, *v. a.* कोषान्तः कृ, कोषे or कोशे निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं), वस्त्रान्तर्गतं -तां कृ, कोषान्तः स्था in caus. (स्थापयति -यितुं), कोषस्थं -स्थां कृ.—(Put up with) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते, क्षन्तुं).

Pocket-book, *s.* कोषस्थपुस्तकं, कोषगतपुस्तकं, कोषपुस्तकं.

Pocketed, *p. p.* कोषान्तःकृतः -ता -तं, कोषान्तः स्थापितः -ता -तं, कोषनिवेशितः &c., कोषगतः -ता -तं, कोषान्तर्गतः &c., कोषान्तर्हितः &c., कोषगुप्तः -प्ता -प्तं.

Pocket-handkerchief, *s.* नासामार्जनी, नासिकामार्जनी, मुखमार्जनी, नक्तकः, वरकं.

Pocket-hole, *s.* कोषच्छिद्रं, कोशच्छिद्रं, वस्त्रान्तःस्यकोषच्छिद्रं.

Pocket-money, *s.* क्षुद्रद्रव्यक्रयार्थं वारे वारे दत्तं धनं.

Pocky, *a.* रक्तवरटीपूर्णः -र्णा -र्णं, रक्तस्फोटविशिष्टः -ष्टा -ष्टं.

Pod, *s.* बीजकोशः, बीजगुप्तिः *f.*, सिम्बा -म्बिः -म्बी *f.*, शिम्बा म्बिः -म्बी *f.*, शिम्बिका, शमिः *f.*, शमी, पुटः; 'grain in pods,' शमीधान्यं.

Podagrical, *a.* वातकी -किनी -कि (न्), वातरोगी -गिणी &c., वातिकः -की -कं, वातुलः -ला -लं, सन्धिवायुरोगी &c., सन्धिवायुग्रस्तः -स्ता -स्तं.

Podded, *a.* शिम्बियुक्तः -क्ता -क्तं, शिम्बीयुक्तः &c., शमियुक्तः &c.

Poem, *s.* काव्यं, कविता, कवनं, काव्यबन्धः; 'interspersed with prose,' चम्पूकाव्यं.

Poesy, *s.* (Art of composing poems) कविता, काव्यविद्या, काव्यरचनविद्या, काव्यलेखनविद्या, काव्यरचना, श्लोकरचना, कविताशक्तिः *f.*, कविकर्म्म *n.* (न्), रसविद्या, रसज्ञता.—(Metrical composition) कविता, काव्यं, छन्दोनुवृत्तिः *f.* *See* Poetry.

Poet, *s.* कविः *m.*, काव्यरचकः, कवितारचकः, पद्यरचकः, काव्यकर्त्ता *m.* (र्तृ), कविताकर्त्ता *m.*, रसज्ञः, वप्ता *m.* (प्तृ), भविनः, वागीशः; 'a quasi poet,' कविकल्पः; 'a ready poet,' शीघ्रकविः *m.*

Poetaster, *s.* कुकविः *m.*, कविकल्पः, कविदेशीयः, कविदेश्यः.

Poetess, *s.* काव्यकर्त्री, कविताकर्त्री, काव्यरचिका.

Poetic, poetical, *a.* (Relating to poetry, suitable to it) कवितासम्बन्धी -न्धिनी &c., कविताविषयः -या -यं, काव्यरचनयोग्यः -ग्या -ग्यं, काव्ययोग्यः &c.—(Possessing the beauties of poetry) रसिकः -का -कं, सरसः -सा -सं, रसी -सिनी &c., रसवान् -वती -वत् (त्), काव्यरसवान् &c., कविता or काव्य in comp.; as, 'poetical genius,' कविताशक्तिः *f.*—(Expressed in poetry or measure) श्लोकबद्धः -द्धा -द्धं, पद्यरूपः -पा -पं, श्लोकरूपः &c., काव्यरूपः -पा -पं, कवितारूपः &c., कवितामयः -यी -यं, श्लोकमयः &c., छन्दोरूपः &c., छन्दोबद्धः &c.

Poetically, *adv.* कवितायोग्यं, कविताक्रमेण, पद्यरूपेण, कवितापूर्वं, छन्दोनुसारेण, काव्यरसपूर्वं, सरसं.

Poetics, *s.* काव्यशास्त्रं, कविताशास्त्रं, रसशास्त्रं, पद्यशास्त्रं.

To **poetize**, *v. n.* काव्यं रच् (c. 10. रचयति -यितुं), काव्यरचनां कृ, कवितां कृ.

Poet-laureate, *s.* बन्दी *m.* (न्), वन्दारुः *m.*, राजबन्दी *m.*, राजस्तुतिपाठकः.

Poetry, *s.* (Metrical composition, verse) कविता -त्वं, काव्यं, कवनं, पद्यं.—(Art or practice of composing in verse) कविता -त्वं, काव्यरचना, श्लोकरचना, काव्यविद्या, काव्यरचनविद्या, कविकर्म्म *n.* (न्), कविताविद्या, रसविद्या, रसज्ञता.—(Poetical works) काव्यशास्त्रं, पद्यशास्त्रं, साहित्यं.

Poignancy, *s.* तीक्ष्णता, तीव्रता, तिग्मता, उग्रता -त्वं, कटुता, मार्म्मिकत्वं.

Poignant, *a.* तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, उग्रः -ग्रा -ग्रं, कटुः -टुः -टु, अरुन्तुदः -दा -दं, मर्म्मस्पृक् *m.f.n.* (श्), मर्म्मभेदी -दिनी -दि (न्), मार्म्मिकः -की -कं.

Point, *s.* (Sharp end) अग्रं, शिखा, शिखरं, अग्निः *m.*, अश्रिः *m.*, अंशुः *m.*, अग्रांशुः *m.*, मुखं, कण्टकः, शलाका; 'of a needle,' सूच्यग्रं, कण्टकः; 'of the foot,' पादाग्रं, प्रपदं.—(Of a blade, &c.) धारा -रं, कोटिः *f.*, अश्रिः *f.*, पालिः -ली *f.* -लिका, अश्रिः *m.*, शिखरं, अग्रं; 'a sharp point,' तीक्ष्णाग्रं.—(Of land, head-land) भूमिनासिका, उदग्रभूमिः *f.*, उदग्रस्थलं, भशलाका.—(Sting, wit of an epigram, &c.) दंशः, उपदंशः, मर्म्म *n.* (न्), रसः, रहस्यं.—(Of space or time) अणुः *m.*, परमाणुः *m.*, सन्धिः *m.*—(Of the compass) दिक् *f.* (श्), दिशा, ककुभ् *f.*, काष्ठा, आशा, हरित् *f.*, दिग्विभागः; 'intermediate point,' विदिक् *f.*, प्रदिक् *f.*, अपदिशं.—(Dot) बिन्दुः *m.*, शून्यं, विप्रुट् *f.* (ष्), अङ्कः, चिह्नं.—(Mark in punctuation) चिह्नं, विश्रामचिह्नं, विरामचिह्नं.—(Particular subject, case under discussion) विषयः, अर्थः, पदं, स्थलं, आस्पदं, प्रकरणं, प्रसङ्गः, प्रस्तावः; 'being to the point,' प्रासङ्गिकः -की -कं, प्रास्ताविकः &c.; 'on this point at least,' अत्र तावत्.—(Aim, object) लक्षं, लक्ष्यं, अर्थः, आशय., उद्देशः, अभिप्रायः.—(Characteristic mark, as of a horse, &c.) लक्षणं, विशेषणं, गुणः.—(Degree, pitch) पर्य्यन्तं, अन्त., न्तं, परिमाणं, पदं, आस्पदं, पर्य्यायः, क्रमः; 'highest point,' उत्तमपदं, परमपदं, परमास्पदं; 'to such a point,' एतावत्पर्य्यन्तं, एतावत्; 'to what point?' किम्पर्य्यन्तं, कियत्पर्य्यन्तं; 'to that point,' तदन्तं, तत्पर्य्यन्तं.—(Critical moment) सन्धिः *m.*, कालसन्धिः *m.*, समयः; 'on the point of, at the point of,' उद्यतः -ता -तं, उद्युक्तः -क्ता -क्तं, उन्मुखः -खा -खं, or expressed by the desiderative or other forms of adjective, thus, 'on the point of dying, at the point of death,' मरणोन्मुखः -खा -खं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, आसन्नमरणः -णा -णं, मृतप्रायः -या -यं, मृतकल्पः -ल्पा -ल्पं, अन्त्यावस्थः -स्था -स्थं; 'on the point of going,' गमनोद्यतः -ता -तं, गमनुमुद्यतः &c., गमनोन्मुखः &c., जिगमिषुः -षुः -षु, गन्तुकामः -मा -मं; 'on the point of bringing forth,' प्रसवोन्मुखी, आसन्नप्रसवा, आसन्नप्रसवकाला; 'he is on the point of rising,' उत्थातुमुद्यतोऽस्ति, उत्थातुम् इच्छति.—(Point of view) दृष्टिः *f.*—(Punctilio, nicety) सूक्ष्मता, सौक्ष्म्यं.

To **point**, *v. a.* (Sharpen to a point) तीक्ष्णाग्रीकृ, तीक्ष्णीकृ, तीक्ष्णधारीकृ, शिताग्रीकृ, निशो (c. 4. -श्यति -शातुं), तिज् (c. 10. तेजयति -यितुं), साग्रीकृ.—(Direct towards, aim at) लक्षीकृ, उद्दिश्, समुद्दिश्, निर्दिश्, अभिसन्धा, लक्ष्; 'pointing to,' उद्दिश्य.—(Punctuate) विश्रामचिह्नानि or विरामचिह्नानि अङ्क् (c. 10. अङ्कयति -यितुं) or कृ.—(Point out, show by the finger, &c.) प्रदिश्

(c. 6. -दिशति -देष्टुं), निर्दिश्, उद्दिश्, विनिर्दिश्, सन्दिश्, आदिश्, अङ्गुल्या निर्दिश् or प्रदिश् or दृश् (c. 10. दर्शयति -यितुं) or प्रदृश् or सूच् (c. 10. सूचयति -यितुं) or संसूच्; 'point out the way,' मार्गम् आदेशय.

To POINT, *v. n.* (With the finger) अङ्गुलिनिर्देशं कृ, अङ्गुल्या निर्दिश् or प्रदिश्. *See* the last.—(Have direction or aim) उद्दिश्, उद्देशकः -का -कं भू, उद्देशं कृ, लक्षीकृ or expressed by दिश्य or मुख or अय in comp.; as, 'to point towards the south,' दक्षिणदिश्यः -श्या -श्यं भू, दक्षिणमुखः &c. भू, दक्षिणायः &c. भू.

POINT-BLANK, *a.* or *adv.* समसूत्रः -त्रा -त्रं, एकसूत्रः &c., समरेखः -खा -खं, क्षितिजैकसूत्रः &c., समसूत्रेण, एकसूत्रेण.

POINTED, *p. p.* or *a.* (Have a sharp end) तीक्ष्णाग्रः -ग्रा -ग्रं, शिताग्रः &c., अग्रः &c., तीक्ष्णशिखः -खा -खं, शातशिखः &c., अंशुमान् -मती -मत् (त्), तीक्ष्णांशुमान् &c., शिखावलः -ला -लं, शिखाधरः -रा -रं, शितः -ता -तं, निशितः &c., शैक्ष्यः -क्ष्या -क्ष्यं.—(Epigrammatical, keen, witty) रसिकः -का -कं, सरसः -सा -सं, रसवान् &c., मार्मिकः -की -कं, मर्मस्पृक् *m. f. n.* (श्), अरुन्तुदः -दा -दं, दंशकः -का -कं; 'pointed words,' वाग्विशः *f.*—(Pointed out) निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः &c., प्रदिष्टः &c., सूचितः -ता -तं, अङ्गुलिनिर्दिष्टः &c.

POINTEDLY, *adv.* अमुकममुद्दिश्य, उद्दिश्य, उद्देशपूर्व्वं, सममर्म्मभेदं.

POINTEDNESS, *s.* रसिकता -त्वं, सरसता, दंशकता -त्वं, मार्म्मिकत्वं.

POINTER, *s.* निर्देशकः, देशकः, प्रदेशकः, निर्देष्टा *m.* (ष्टृ), निदेष्टा *m.*, निर्देशी *m.* (न्), प्रदेशी *m.*, देशी *m.*, दर्शकः, प्रदर्शकः, सूचकः.—(Dog) वनपक्षिनिर्देशको मृगयाकुक्कुरः, वन्यपक्षिनिर्देशने शिक्षितो मृगयाश्वा *m.* (न्).

POINTING, *s.* निर्देशः -शनं, अङ्गुलिनिर्देशः, निदेशः, सूचनं, अङ्गुलिप्रदर्शनं.

POINTLESS, *a.* (Having no point or edge) निरग्रः -ग्रा -ग्रं, अग्रहीनः -ना -नं, धाराहीनः &c., अतीक्ष्णः -क्ष्णा -क्ष्णं.—(Destitute of wit) विरसः -सा -सं, अरसिकः -का -कं, रसहीनः &c., फल्गुः -ल्गुः -ल्गु.

POISE, *s.* (Weight) भारः, तुला, तोलः.—(Balance, equilibrium) भारतुल्यता, भारसमता, भारसाम्यं, समतौल्यं, समतोलः, तुल्यता, तुलासाम्यं.

To POISE, *v. a.* समभारीकृ, तुल्यभारीकृ, समतोलीकृ, समीकृ, तुल्यीकृ, तुल् (c. 10. तुलयति -यितुं).

POISON, *s.* विषं, गरं -रः, गरलं, गरदं, भूगरं, जीवनाघातं, अङ्कुलं, आकुलं, हलाहलं -लः, हालाहलं, हालहलं, हालहलं, हलहलं, हाहलं -लः, कालकूटं -टः, कलाकुलं, काकोलं -लः, सौराष्ट्रिकं, सोराष्ट्रिकं, दारदः, प्रदीपनः, ब्रह्मपुत्रः, शौल्किकेयः, वत्सनाभः, धूलकं, निदः, क्ष्वेडः; 'administering poison,' विषप्रयोगः, विषविधानं, विषदानं; 'taking poison,' विषभक्षणं; 'worthy of death by poison,' विष्यः -ष्या -ष्यं; 'yielding poison,' विषदः -दा -दं; 'removing or curing poison,' विषघ्नः -घ्नी -घ्नं, विषनाशी -शिनी -शि (न्), विषघाती &c., विषहरः -री -रं, विषापहः -हा -हं, गरघ्नः &c.; 'art of curing poisons,' विषविद्या, विषनाशनविद्या; 'curer of poisons,' विषवैद्यः, विषभिषक् *m.* (ज्), जाङ्गुलिकः, जाङ्गुलिः *m.*, गारुडिकः; 'charm against poison,' गारुडः -डं.

To POISON, *v. a.* (Infect with poison) विषाक्तं -क्तां कृ, विषयुक्तं -क्तां कृ, विषेण दुष् (c. 10. दूषयति -यितुं), विषदिग्धं -ग्धां कृ.—(Administer poison, kill by it) विषं दा, विषप्रयोगं कृ, विषेण हन् or मृ in caus., विषदानेन हन्.—(Poison one's self, take or eat poison) विषं भुज् or भक्ष् or खाद्, विषेण or विषप्रयोगेण आत्मानं हन्.—(Corrupt, taint) दुष्, सन्दुष्, लिप्, नश् in caus.

POISONED, *p. p.* or *a.* (Infected with poison) विषाक्तः -क्ता -क्तं, विषदिग्धः -ग्धा -ग्धं, विषलिप्तः -प्ता -प्तं, विषदूषितः -ता -तं; 'a poisoned arrow,' दिग्धः, लिप्तकः.—(Killed by poison) विषमारितः -ता -तं, विषनाशितः &c.

POISONER, *s.* विषदः, विषदायी *m.* (न्), गरदः, गरदायी *m.*, तीक्ष्णरसदायी

POISONING, *s.* विषप्रयोगः, विषदानं, विषविधानं, विषेण मारणं.

POISONOUS, *a.* विषालुः -लुः -लु, गरली -लिनी -लि (न्), विषमयः -यी -यं, सविषः -षा -षं, विषधरः -रा -रं, विषगुणकः -का -कं, विषधर्म्मकः -का -कं, विषदः -दा -दं, सगरः -रा -रं, तीक्ष्णविषः -षा -षं, विषपूर्णः -र्णा -र्णं, विषमुखः -खा -खं, दूषकः -का -कं, विष in comp.; as 'poisonous snake,' विषभुजङ्गः.

POISONOUSLY, *adv.* सविषं, सगरं, सगरलं, सदूषणं, दूषकप्रकारेण.

POISONOUSNESS, *s.* विषालुता, सविषत्वं, सगरत्वं, विषपूर्णता, दूषकत्वं.

POITREL, *s.* उरस्त्राणं, वक्षस्त्राणं, उरश्छदः, वक्षस्त्रं.

To POKE, *v. a.* (Thrush, push against, stick) तड् (c. 10. ताडयति -यितुं), दण्डादि प्रसारयित्वा तड् or आहन् (c. 2. -हन्ति -न्तुं) or अभ्याहन् or प्रहृ (c. 1. -हरति -हर्त्तुं), प्रणुद् (c. 10. -चारयति -यितुं), प्रविश् (c. 10. -वेशयति -यितुं), ताडनं कृ, आघातं कृ, प्रहारं कृ.—(Search for, grope for, with a long instrument) दण्डादि प्रसारयित्वा परामृश् (c. 6. -मृशति -म्रष्टुं) or अन्विष् (c. 4. -इष्यति -एषितुं).

To POKE, *v. n.* (Grope) तमः प्रविश्य परामृश् or परिमृश्, अन्धकारे दण्डादि प्रसारयित्वा अन्विष् or निरूप्.—(Dawdle, trifle) विलम्बेन किञ्चित् कृ, विलम्ब्. *See To* PEDDLE.

POKE, *s.* ताडनं, आघातः, प्रहारः, अभिघातः, आहतिः *f.*, दण्डप्रचारणं.

POKER, *s.* शलाका, लोहशलाका, अङ्गारचालनशलाका, अङ्गारचालकः, अङ्गारचालकदण्डः, अङ्गारोत्थापकः.

POLAR, *a.* ध्रुवसम्बन्धी -न्धिनी -न्धि (न्), मेरुसम्बन्धी &c., ध्रुवविषयकः -का -कं, ध्रुवस्थः -स्था -स्थं, केन्द्रस्थः &c., ध्रुवनिकटस्थः &c.; 'polar star,' ध्रुवः, औत्तानपादिः *m.*, उत्तानपादजः, नक्षत्रनेमिः *m.*, ध्रुतिकरः, ज्योतीरथः; 'polar circle,' कदम्बभ्रमवृत्तं; 'polar distance,' द्युज्याचापांशः.

POLARITY, *s.* ध्रुवाभिसरणशीलता, ध्रुवाभिगमनशीलता, ध्रुवाभिजिगमिषा, ध्रुवाभिमुखशीलता, ध्रुवाभिमुखता, केन्द्राभिमुखता.

POLARY, *a.* ध्रुवाभिसरणशीलः -ला -लं, ध्रुवाभिगमनशीलः &c., ध्रुवाभिजिगमिषुः -षुः -षु, ध्रुवाभिगामी -मिनी -मि (न्), ध्रुवाभिसारी &c., ध्रुवाभिमुखशीलः &c.

POLE, *s.* (Long piece of wood) दण्डः -ण्डं, यष्टिः *m. f.*, दीर्घकाष्ठं, काष्ठं; 'for carrying burdens,' भारयष्टिः *m. f.*, विहङ्गिका; 'raised on a pole,' उद्दण्डः -ण्डा -ण्डं.—(Of a carriage) धूः *f.* (धुर्), धुरा, धूर्वी, कूवरः, युगन्धरः, यानमुखं.—(Of a plough) ईषा, ईशा, हलदण्डः, लाङ्गलदण्डः.—(The measure) दण्डः.—(In astronomy) ध्रुवः, मेरुः *m.*, केन्द्रं; 'north pole,' उत्तरध्रुवः, ध्रुवः, मेरुः *m.*, उत्तराग्रं; 'south pole,' दक्षिणध्रुवः, कुमेरुः *m.*, दक्षिणाग्रं; 'elevation of the pole,' ध्रुवोन्नतिः *f.*; 'pole of the ecliptic,' कदम्बः.

POLE-AXE, *s.* परशुः *m.*, कुठारः, दीर्घयष्टिलग्नपरशुः *m.*, दीर्घटङ्कः.

POLE-CAT, *s.* पूतिशारिका, लोमशमार्जारः, गन्धमार्जारः, गन्धोतुः *m.*, पूतिका, खाङ्कः, मृगचेटकः, कस्तूरीमृगः, गात्रसङ्कोची *m.* (न्), खट्वाशः -शी.

POLEMIC, POLEMICAL, *a.* विवादी -दिनी -दि (न्), विवादात्मकः -का -कं, वादानुवादात्मकः -का -कं, वादानुवादार्थकः -का -कं, वादानुवादी &c.,

वादप्रतिवादी &c., विसंवादी &c., विप्रतिपत्तिकः -का -कं.

'OLEMIC, POLEMICAL, *s.* वादानुवादशीलः, वादानुवादप्रियः, वादानुवादकुशलः, विवादप्रियः, विवादकुशलः, वादरतः, वादानुवादकारी *m.* (न्), वादविवादकर्त्ता *m.* (र्तृ).

OLEMICS, *s.* धर्म्मविषयो वादानुवादः or विवादः or विसंवादः.

OLE-STAR, *s.* (Fabled as the son of Uttánapáda, and grandson of the first Manu) ध्रुवः, औत्तानपादिः *m.*, उत्तानपादजः. *See* POLAR, *a.*

OLICE, *s.* (Government of a city or town) नगरव्यवस्था, नगरव्यवस्थितिः *f.*, नगरानुशासनं, नगरकार्य्यानुशासनं.—(Internal regulation of a kingdom) राष्ट्रानुशासनं, देशानुशासनं, देशकार्य्यानुशासनं, राष्ट्रव्यवस्था, देशव्यवस्था, राष्ट्रव्यवस्थितिः *f.*—(Body of police-officers) नगररक्षिणः *m.pl.*, नगररक्षकाः *m.pl.*, नगररक्षिपुरुषाः *m.pl.*, नगरपालाः *m.pl.*, नगरपालकाः *m.pl.*, नगररक्षिगणः, नगरपालगणः, नगरपालवर्गः; 'rural police,' ग्रामरक्षिणः *m.pl.*, ग्रामरक्षकाः *m.pl.*, ग्रामपालाः; 'highway police,' मार्गपालाः -लकाः, मार्गरक्षकाः *m.pl.*

PROPORTIONATENESS, PROPORTIONABLENESS, *s.* प्रमाणसमता, परिमाणसमता, समप्रमाणकता, सम्मितिः *f.*, अनुगुणता, आनुगुण्यं, सदृशता, सादृश्यं, समता, तुल्यता, अनुरूपता, आनुरूप्यं, परस्परानुगुण्यं. *See* PROPORTION.

PROPORTIONABLY, *adv.* अनुरूपतस्, अनुरूपं, अनुसारेण -रतस्, सादृश्येन, सदृशं, प्रमाणतस्, यथाप्रमाणं, यथापरिमाणं, प्रमाणानुसारात् -रेण, यथांशतस्, विभागशस्; 'to one's strength,' *see* under PROPORTION.

PROPORTIONED, *p. p.* यथाप्रमाणं परिकल्पितः -ता -तं, प्रमाणानुसारात् कल्पितः &c. or विहितः &c. *See* PROPORTIONATE.

PROPOSAL, *s.* उपन्यासः, कर्त्तव्योपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, कर्त्तव्यसूचना -नं, कर्त्तव्यप्रतिज्ञा, कर्त्तव्यनिर्देशः, अभिधानं, अभिहितं, उक्तं, वाक्यं.—(Of marriage), *see* the next.

To PROPOSE, *v. a.* उपन्यस् (c. 4. -अस्यति -असितुं), उपन्यासं कृ, उपन्यासीकृ, कर्त्तव्योपन्यासं कृ, कर्त्तव्यसूचनं कृ, प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), प्रतिज्ञां कृ, कर्त्तव्यप्रतिज्ञां कृ, निविद् (c. 10. -वेदयति -यितुं), निवेदनं कृ, अभिधा (c. 3. -दधाति -धातुं), कर्त्तव्यं or यथाकर्त्तव्यं निर्दिश् (c. 6. -दिशति -देष्टुं) or सूच् (c. 10. सूचयति -यितुं), कर्त्तव्यनिर्देशं कृ.—(Intend), *see* the word.—(Make an offer of marriage) विवाहप्रतिज्ञां कृ, प्रेमनिवेदनं कृ.

PROPOSED, *p. p.* उपन्यस्तः -स्ता -स्तं, उपन्यासीकृतः -ता -तं, प्रतिज्ञातः &c., निवेदितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, अभिहितः &c.

PROPOSITION, *s.* उपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, वाक्यं, उक्तं, वचनं.—(In logic, geometry, &c.) प्रतिज्ञा, प्रतिज्ञेयं, फक्किका, प्रमेयं, पूर्व्वपक्षः, प्रतिज्ञातार्थः; 'abandonment of the original proposition,' प्रतिज्ञासंन्यासः, प्रतिज्ञाहानिः *f.*; 'denial of a proposition,' प्रतिज्ञाविरोधः; 'completing it,' आकांक्षापूरणं; 'subsequent proposition,' प्रतिज्ञान्तरं.

To PROPOUND, *v. a.* (Propose) उपन्यस्, प्रतिज्ञा, निर्दिश्, अभिधा, सूच् (c. 10. सूचयति -यितुं), निविद्, प्रतिपद् (c. 10. -पादयति -यितुं).

PROPOUNDED, *p.p.* उपन्यस्तः -स्ता -स्तं, प्रतिज्ञातः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

PROPRIETARY, *a.* स्वामिसम्बन्धी -न्धिनी -न्धि (न्), स्वाम्यधीनः -ना -नं; 'proprietary right,' स्वत्वं, अधिकारः -रिता, स्वामित्वं, स्वाम्यं, प्रभुत्वं -ता.

PROPRIETOR, *s.* स्वामी *m.* (न्), अधिकारी *m.* (न्), प्रभुः *m.*, पतिः *m.*, ईश्वरः, स्वत्ववान् *m.* (त्), अधिकारवान् *m.*, स्वत्वाधिकारी *m.*; 'without title,' अस्वामी *m.*, स्वत्वहीनः.

PROPRIETORSHIP, *s.* स्वामित्वं, स्वाम्यं, स्वत्वं, अधिकारिता -त्वं, प्रभुत्वं.

PROPRIETRESS, *s.* स्वामिनी *f.*, अधिकारिणी *f.*, स्वत्वाधिकारिणी *f.*

PROPRIETY, *s.* यथायोग्यता, युक्तता, योग्यता, यथायुक्तता, युक्तिः *f.*, उपयुक्तता, उपयोगिता -त्वं, उचितत्वं, औचित्यं, यथोचितत्वं, उपपत्तिः *f.*, सामञ्जस्यं, समञ्जसं, सम्भावना, न्यायः -यता, सङ्गतत्वं, साङ्गत्यं, याथार्थ्यं, यथार्हता, याथातथ्यं, अभ्रेषः, पर्य्याप्तिः, पात्रं -त्रता; 'of conduct,' मर्य्यादा, मर्य्यादानतिक्रमः, विनयः, विनीतता, सुचर्य्या, सुचरितं, स्थितिः *f.*, संस्था, अनतिक्रमः, अव्यभिचारः, कर्त्तव्यता, इतिकर्त्तव्यता; 'pattern of propriety,' न्यायाधारः.

PROROGATION, *s.* चिरकालपर्य्यन्तं महासभाविसर्जनं or कार्य्यनिवृत्तिः *f.* or कार्य्यत्यागः.—(Prolongation) दीर्घीकरणं.

To PROROGUE, *v. a.* (Adjourn to a distant period) चिरकालपर्य्यन्तं महासभां विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं) or कार्य्यनिवृत्तिं कृ or कार्य्यत्यागं कृ.—(Prolong) द्राघ (nom. द्राघयति -यितुं), दीर्घीकृ, दीर्घकालस्थं, -स्थां कृ, चिरकालस्थं -स्थां कृ.

PROROGUED, *p. p.* चिरकालपर्य्यन्तं विसर्जितः -ता -तं or विसृष्टः -ष्टा -ष्टं.

PROSAIC, *a.* गद्यरूपः -पा -पं, गद्यमयः -यी -यं, गद्यात्मकः -का -कं, छन्दोहीनः -ना -नं, छन्दोरहितः -ता -तं.—(Dull) विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु, रसहीनः -ना -नं, तेजोहीनः &c., लवणहीनः &c.

To PROSCRIBE, *v. a.* (Doom to destruction) घोषणापूर्व्वं वधदण्डार्हं ख्या in caus. (ख्यापयति -यितुं), प्रकाशलेखेन वधार्हं ज्ञा in caus., or वधदण्डार्हं निर्दिश् or वध्यं निर्दिश् or घातव्यं निर्दिश्, अमुकजनो वध्यो ऽस्ति इति सूचनार्थं प्रकटनपत्रे नाम लिख् (c. 6. लिखति, लेखितुं) or अभिलिख्, मृत्युपात्रं निर्दिश्.—(Denounce and expel) प्रकटनपत्रेण वहिष्कृ or निरस् or प्रत्यादिश्.—(Interdict) प्रकाशनपत्रेण निषिध् or प्रतिषिध्, प्रकटनलेखेन निवृ or बाध्.

PROSCRIBED, *p. p.* वध्यनामावलिपत्राभिलिखितः -ता -तं, वधदण्डार्हः -र्हा -र्हं, प्रकाशपत्रेण निषिद्धः -द्धा -द्धं or प्रतिषिद्धः &c. or निवारितः -ता -तं.

PROSCRIPTION, *s.* प्रकाशनपत्रेण वध्यजननिर्देशः or वध्यनामावलिनिर्देशः, घोषणापूर्व्वं वधदण्डार्हख्यापनं, प्रकटनपत्रेण वधार्हज्ञापनं.

PROSE, *s.* गद्यं, हारकः, छन्दोरहितवाक्यं; 'prose and verse,' गद्यपद्यं; 'alternate prose and verse,' चम्पूः *m.*

To PROSE, *v. n.* दीर्घोच्चारणेन विरसवाक्यानि or विरसकथाः वद् (c. 1. वदति -दितुं), दीर्घसूत्रतया or दीर्घसूत्रवद् विरसकथोपाख्यानं कृ.

To PROSECUTE, *v. a.* (Pursue, follow up, carry on continuously) अनवरतम् अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अविरतम् अनुसेव् (c. 1. -सेवते -वितुं) or उपसेव् or सेव्, नित्यं प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), अविरतप्रवृत्तिं कृ, निर्वह् (c. 10. -वाहयति -यितुं); 'to prosecute one's efforts,' अविरतयत्नं कृ, अनवरतप्रयत्नं कृ, नित्योत्साहं कृ; 'one's undertakings,' प्रारब्धानि सम्पद् (c. 10. -पादयति -यितुं); 'one's studies,' नित्याध्ययनं कृ, अविरताध्ययनं कृ, विद्यानुसेवनं कृ.—(In law) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभियोगं कृ, अभिशंस् (c. 1. -शंसति -सितुं), अभिशंसनं कृ, व्यवहाराभियोगं कृ, व्यवहाराभिशंसनं कृ.

PROSECUTED, *p. p.* (Carried on continuously) अविरतम् अनुष्ठितः -ता -तं or अनुसेवितः &c. or सेवितः &c., निर्वाहितः &c.—(In law) अभियुक्तः -क्ता -क्तं, अभिशस्तः -स्ता -स्तं, व्यवहाराभियुक्तः -क्ता -क्तं, व्यवहाराभिशस्तः -स्ता -स्तं.

PROSECUTION, *s.* (Carrying on continuously) अविरतानुष्ठानं, नित्यानुष्ठानं, नित्यानुसेवनं, नित्यसेवनं, नित्यप्रवृत्तिः *f.*, अविरतप्रवृत्तिः *f.*, नित्यप्रवर्त्तनं, निर्वाहनं; 'of efforts,' अविरतयत्नकरणं, नित्योद्योगः; 'of study,' नित्याध्ययनं, अविरताध्ययनं, विद्यानुसेवनं, विद्यानुपालनं, प्रवृत्तिः *f.*—(In law) अभियोगः, अभिशंसनं, व्यवहाराभियोगः, व्यवहाराभिशंसनं, अभियुक्तता.

PROSECUTOR, *s.* (One who carries on continuously) अविरतानुष्ठायी *m.* (न्), अविरतानुसेवी *m.*, निर्वाहकः.—(In law) अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभिशंसकः, व्यवहाराभियोगकृत्, व्यवहाराभिशंसनकृत् *m.*, अभियोगकारी *m.* (न्), विवादार्थी *m.*, अर्थी *m.*

PROSELYTE, *s.* धर्म्मपरिवर्त्तकः, धर्म्मान्तरग्राही *m.* (न्), मतान्तरग्राही *m.*, धर्म्मान्तरावलम्बी *m.*, स्वधर्म्मग्राही *m.*, स्वधर्म्मावलम्बी *m.*, अन्यधर्म्मग्राही *m.*, अन्यधर्म्मावलम्बी *m.*, स्वधर्म्मी *m.*, धर्म्मान्तरप्राप्तः, परधर्म्माश्रितः, स्वधर्म्मत्यागी *m.*, स्वधर्म्मत्यागपूर्व्वं धर्म्मान्तरग्राही *m.*; 'to Judaism,' यिहुदीयधर्म्मग्राही *m.*; 'to Christianity,' ख्रीष्टीयधर्म्मग्राही *m.*, ख्रीष्टीयमतग्राही *m.*

To PROSELYTE, PROSELYTIZE, *v. a.* धर्म्मान्तरं or स्वधर्म्मं ग्रह् in caus., मतान्तरं or स्वमतं ग्रह्, धर्म्मपरिवर्त्तकं कृ; 'to Judaism,' यिहुदीयमतं ग्रह् in caus.

PROSELYTISM, *s.* धर्म्मपरिवर्त्तनं, धर्म्मान्तरग्रहणं, धर्म्मान्तरप्रापणं.

PROSER, *s.* दीर्घोच्चारणेन विरसकथाख्यायकः, दीर्घसूत्री *m.* (न्).

PROSING, *s.* दीर्घोच्चारणेन विरसकथोपाख्यानं, दीर्घसूत्रता -त्वं.

PROSODIAL, PROSODICAL, *a.* छान्दसः -सी -सं, छन्दःशास्त्रसम्बन्धी &c., छन्दःशास्त्रविषयकः -का -कं, छन्दोविषयकः &c., छन्दःसम्बन्धी &c.

PROSODIAN, *s.* छन्दःशास्त्रज्ञः, छन्दःशास्त्रविद् *m.*, छन्दःशास्त्रव्युत्पन्नः.

PROSODY, *s.* छन्दस् *n.*, छन्दःशास्त्रं, छन्दोविद्या, छन्दोज्ञानं.

PROSOPOPŒIA, *s.* *See* PERSONIFICATION.

PROSPECT, *s.* (View) दृष्टिः *f.*, दर्शनं, दृष्टिपातः, दृक्पातः.—(View of future events, expectation) भाविदर्शनं, भविष्यद्दर्शनं, भाविघटनादर्शनं, अनागतदर्शनं, मानसिकदृष्टिः *f.*, अपेक्षा, उदीक्षणं, आशा, प्रत्याशा.—(That which is presented to the view) दृक्पातविषयः, दृष्टिपातविषयः, दृष्टिगतदेशः, दृक्पातान्तर्गतदेशः, दृष्टिपातगतप्रदेशः, दृष्टिगोचरदेशः, दृग्गोचरप्रदेशः.

PROSPECTIVE, *a.* भाविकालापेक्षकः -का -कं, उत्तरकालापेक्षकः &c., भाविकालसापेक्षः -क्षा -क्षं, भविष्यदपेक्षकः &c., आगामिकालसापेक्षः &c., भाविस्पृक् *m. f. n.* (श्).

PROSPECTIVELY, *adv.* भाविकालापेक्षया, उत्तरकालापेक्षया, भविष्यदपेक्षया, भाविकालसापेक्षं, आगामिकालसापेक्षं, भाविकालमपेक्ष्य, उत्तरकालमपेक्ष्य.

PROSPECTIVENESS, *s.* भाविकालापेक्षा, उत्तरकालापेक्षा -क्षकता -त्वं.

PROSPECTUS, *s.* कर्त्तव्यसूचनपत्रं, कर्त्तव्यार्थसूचनपत्रं, कर्त्तव्यार्थबोधनपत्रं.

To PROSPER, *v. a.* (Render successful, favor) सफलीकृ, सिद्धिं or सिद्धतां कृ or नी (c. 1. नयति, नेतुं) or साध् (c. 10. साधयति -यितुं), सिद्धीकृ, सिद्धिमन्तं -मतीं -मत् कृ, वृध् (c. 10. वर्धयति -यितुं), संवृध्, ऋध् (c. 10. ऋधयति -यितुं), समृद्धीकृ, उपकृ, अनुग्रह्, उपग्रह्, प्रतिपाल्, अनुपाल्.

To PROSPER, *v. n.* (Thrive) ऋध् (c. 4. ऋध्यति, c. 5. ऋध्नोति, अर्धितुं), समृध्, समृद्धीभू, समृद्धः -द्धा -द्धं भू, वृध् (c. 1. वर्धते -र्धितुं), संवृध्, विवृध्, एध् (c. 1. एधते -धितुं), समेध्, सम्पत्तिं गम्, समृद्धिम् इ or गम्, सश्रीकः -का -कं भू, श्रीमान् -मती &c. भू or अस्.—(Be successful) सिध् (c. 4. सिध्यति, सेद्धुं), सिद्धिं गम् or इ, कृतार्थीभू, प्राप्तार्थीभू, सिद्धार्थीभू, सम्पद् (c. 4. -पद्यते -पत्तुं), सम्पदं or सम्पत्तिं गम्, सफलीभू, सफलः -ला -लं भू.

PROSPERITY, *s.* समृद्धिः *f.*, सामृद्ध्यं, ऋद्धिः *f.*, सम्पत्तिः *f.*, सम्पद् *f.*, सुसम्पद् *f.*, वृद्धिः *f.*, संवृद्धिः *f.*, उदयः, पुण्योदयः, अभ्युदयः, श्रीः *f.*, लक्ष्मीः *f.*, सौभाग्यं, भाग्यं, भूतिः *f.*, क्षेमः -मं, एधा, कुशलं -लता, कौशल्यं, शर्म्म *n.*

(त्), कल्याणं, मङ्गलं, माङ्गल्यं, भद्रं, शुभं, शिवं, भूतिः *f.*, ऋद्धं, उपचयः; 'season of prosperity,' समृद्धिसमयः, समृद्धिकालः, उदयकालः.—(Success) सिद्धिः *f.*, साध्यसिद्धिः *f.*, अर्थसिद्धिः *f.*, कृतार्थता, सफलता, साफल्यं; 'national,' योगक्षेमः.

PROSPEROUS, *a.* (Thriving) समृद्धः -द्धा -द्धं, वर्धमानः -ना -नं, वर्धिष्णुः -ष्णुः -ष्णु, श्रीमान् -मती -मत् (त्), लक्ष्मीवान् &c., क्षेमवान् &c., वृद्धिमान् &c., समृद्धिमान् &c., उदयी -यिनी -यि (न्), शर्म्मवान् &c., विपद्रहितः -ता -तं, निरापद् *m. f. n.*, सुस्थः -स्था -स्थं, ऋध्यमानः -ना -नं, समेधमानः &c., श्रीलः -ला -लं, सश्रीकः -का -कं, लक्षणः -णा -णं, श्रीयुक्तः -क्ता -क्तं, अधिकर्द्धिः -र्द्धिः -र्द्धि.—(Successful) सफलः -ला -लं, सिद्धिमान् &c., सिद्धः -द्धा -द्धं, सिद्धार्थः -र्था -र्थं, कृतार्थः &c.—(Fortunate, favorable, auspicious) कल्याणः -णा -णं, कल्याणी &c., मङ्गलः -ला -लं, माङ्गलिकः -की -कं, शुभः -भा -भं, शिवः -वा -वं, शुभान्वितः -ता -तं, सौभाग्यवान् &c., भाग्यवान् &c., धन्यः -न्या -न्यं, कुशलः -ला -लं, क्षेमः -मा -मं, क्षेम्यः -म्या -म्यं, भद्रः -द्रा -द्रं, प्रसन्नः -न्ना -न्नं, शङ्करः -रा -रं, शिवङ्करः &c., श्रीकरः &c.

PROSPEROUSLY, *adv.* समृद्ध्या, सम्पदा, सुसम्पदा, श्रिया, सक्षेमं, सौभाग्येन, कौशल्येन, सकल्याणं, कल्याणं, कुशलं, शुभं, अभ्युदयेन, सफलं, सवृधा.

PROSPICIENCE, *s.* प्रदर्शनं. *See* FORESIGHT.

PROSTITUTE, *s.* वेश्या, गणिका, पण्यस्त्री, वारस्त्री, साधारणस्त्री, वाराङ्गना, भोग्या, पण्याङ्गना, सामान्या स्त्री, बन्धुरा. *See* HARLOT.

To PROSTITUTE, *v. a.* गर्ह्यकर्म्मार्थं or कुत्सितकर्म्मार्थं प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं) or उपयुज् or विनियुज्, गर्ह्यकर्म्मणि or कुत्सितकर्म्मणि नियुज्, पण्यं -ण्यां कृ, साधारणीकृ, सर्व्वोपभोग्यं -ग्यां कृ.

PROSTITUTION, *s.* वेश्यात्वं, वेश्यावृत्तिः *f.*, पौंश्चल्यं, वारसेवा, भगवृत्तिः *f.*, भगव्यापारः, भगजीविका, वेश्याजीविका. *See* HARLOTRY.—(Devoting to infamous purposes) गर्ह्यकर्म्मार्थं प्रयोगः, कुत्सितकर्म्मार्थं विनियोगः, गर्ह्यकर्म्मणि or कुत्सितकर्म्मणि नियोजनं, पण्यकरणं, सर्व्वोपभोग्यकरणं; 'wages of prostitution,' पण्यस्त्रिया भृतिः *f.* or भाटकं, वेशः.

PROSTRATE, *a.* (Lying at length) अवमूर्द्धशयः -या -यं, क्षिप्तदेहः -हा -हं, भूमिशायी -यिनी -यि (न्), भूमिलग्नः -ना -तं, अवनिलग्नः &c.—(In supplication, adoration, &c.) साष्टाङ्गपतितः -ता -तं, साष्टाङ्गप्रणतः &c., साष्टाङ्गनमस्कारं प्रणिपतितः &c., चरणागतः -ता -तं, चरणपतितः -ता -तं, पादपतितः &c., दण्डवत् पतितः &c., पादप्रणतः &c., प्रणिपतितः &c., प्रपतितः &c., उपनतः &c., प्रणतः &c., नतः &c.

To PROSTRATE, *v. a.* (Throw down) पत् (c. 10. पातयति -यितुं), निपत्, अधःपत्, ध्वंस् (c. 10. ध्वंसयति -यितुं), प्रध्वंस्, नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, अधरोत्तरीकृ, भूमिं गम् in caus.—(One's self in reverence, &c.) प्रणिपत् (c. 1. -पतति -तितुं), साष्टाङ्गं or साष्टाङ्गपातं प्रणिपत् or पत्, प्रणिपतनं कृ, प्रणम् (c. 1. -णमति -णन्तुं), कायं प्रणम्, साष्टाङ्गप्रणामं कृ, साष्टाङ्गनमस्कारं कृ, अष्टाङ्गपातं कृ, अष्टाङ्गप्रणामं कृ, प्रणिपातं कृ, पादप्रणामं कृ, चरणप्रणामं कृ, दण्डवत् पत् or भू or पतनं कृ, चरणपतनं कृ, पादपतनं कृ, दण्डवत् प्रणामं कृ.—(The strength) सर्व्वशक्तिं हृ (c. 1. हरति, हर्त्तुं), शक्तिपातं कृ, शक्तिनाशं कृ, क्षीणशक्तिं कृ.

PROSTRATED, *p.p.* पातितः -ता -तं, निपातितः &c., अधःपातितः &c., दण्डवत् पातितः &c., प्रणिपातितः &c., प्रणिपतितः &c., भूमिं गमितः &c.—(As strength) हृतशक्तिः -क्तिः -क्ति, नष्टशक्तिः &c., क्षीणशक्तिः &c., गतशक्तिः &c., हृतौजाः -जाः -जः (स्), गतौजाः &c., नष्टौजाः &c.

PROSTRATION, *s.* (Of the body in reverence, &c.) प्रणिपातः, प्रणिपतनं, अष्टाङ्गपातः, अष्टाङ्गप्रणिपातः, साष्टाङ्गप्रणामः, साष्टाङ्गपातः, साष्टाङ्गनमस्कारः, दण्डवत् पतनं or पातः, दण्डवत् प्रणामः, चरणपतनं, पादपतनं, पादप्रणामः, देहपातनं, शरीरपातनं, प्रपतनं.—(Of strength) शक्तिपातः, शक्तिहानिः *f.*, सत्त्वहानिः *f.*, शक्तिक्षयः, विस्रंसः -सा, ग्लानिः *f.*—(Of spirits) अवसादः, अवसन्नता, विषादः, विषण्णता, ग्लानिः *f.*

PROSY, *a.* विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु. *See* PROSER.

To PROTECT, *v. a.* (Guard) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, गुप् (c. 1. गोपायति, c. 10. गोपयति -यितुं), अनुगुप्, निर्गुप्, अभिगुप्, प्रगुप्, संगुप्, अभिसंगुप्, पाल्, परिपाल्, अनुपाल्, प्रतिपाल्, अभिपाल्, सम्पाल्, उपपाल्, पा, परिपा, त्रै, परित्रै, संत्रै, तॄ in caus., अव्, पुष्, गुप्तिं कृ, गोपनं कृ, संगोपनं कृ, रक्षणं कृ, संरक्षणं कृ, पालनं कृ, परिपालनं कृ, पोषणं कृ.

PROTECTED, *p.p.* रक्षितः -ता -तं, संरक्षितः &c., अभिरक्षितः &c., परिरक्षितः &c., सुरक्षितः &c., गुप्तः -प्ता -प्तं, गोपितः -ता -तं, गोपायितः &c., सङ्गोपितः &c., पालितः &c., उपपालितः &c., अनुपालितः &c., प्रतिपालितः &c., त्रातः &c., त्राणः -णा -णं, अवितः -ता -तं, तारितः &c., अभ्युपपन्नः -न्ना -न्नं, आश्रितः &c., समाश्रितः &c.

PROTECTION, *s.* (The act) रक्षा, रक्षणं, संरक्षणं, अभिरक्षा -क्षणं, परिरक्षणं, प्रतिरक्षणं, गुप्तिः *f.*, गोपनं, सङ्गोपनं, पालनं, परिपालनं, प्रतिपालनं, अनुपालनं, अभिपालनं, त्राणं, परित्राणं, अवनं, क्षेमकरणं, क्षेमः, अभ्युपपत्तिः *f.*—(That which protects or shelters) आश्रयः, संश्रयः, समाश्रयः, अयनं, आश्रयणं, शरणं, शरण्यता, शरण्यं; 'to seek the protection of, go for protection,' आश्रि (c. 1. -श्रयति -यितुं), संश्रि, समाश्रि, शरणार्थं गम्.—(Favor, countenance) प्रसादः, अनुग्रहः, सङ्ग्रहः, अनुपालनं, आश्रयः.—(Writing that protects) अभयपत्रं.

PROTECTIVE, *a.* रक्षकः -का -कं, संरक्षकः &c., पालकः -का -कं, प्रतिपालकः &c., गोपकः &c., रक्षाकारी -रिणी -रि (न्), पोषकः -की -कं.

PROTECTOR, *s.* रक्षकः, रक्षी *m.* (न्), रक्षिता *m.* (तृ), गोप्ता *m.* (तृ), गोपकः, गोपायकः, गोपी *m.* (न्), गोपः, संरक्षकः, पालकः, प्रतिपालकः, पालयिता *m.* (तृ), पालः, पः in comp., त्राता *m.* (तृ), भयत्राता *m.*, शरणं, शरण्यं, आश्रयः, आश्रयभृत्, शरणभृत्, आश्रयदाता *m.* (तृ).

PROTECTRESS, *s.* रक्षका, रक्षिणी, रक्षित्री, पालका, पालयित्री, रक्षाकारिणी, गोपिनी, गोपिका, गोपी, त्रायन्ती, आश्रयदात्री.

PROTEGÉ, *s.* आश्रितः, संश्रितः, रक्षणीयः, पालनीयः, पोष्यः, शरणागतः.

To PROTEND, *v. a.* प्रसृ (c. 10. -सारयति -यितुं), प्रसारणं कृ. *See To* EXTEND.

To PROTEST, *v. n.* (Declare solemnly) दृढनिश्चयपूर्व्वं or दृढप्रतिज्ञापूर्व्वं वद्, दृढोक्त्या वद्, दार्ढ्येन वद्, दृढं वद्, दृढोक्तिपूर्व्वं ख्या or आख्या or प्रख्या, दृढोक्तिं कृ.—(Make a solemn declaration expressive of dissent or opposition) अस्वीकारसूचकं दृढवाक्यं वद् or दृढवादं कृ or दृढनिषेधं कृ, असम्मतिसूचकां दृढोक्तिं कृ, विरोधसूचकां दृढप्रतिज्ञां कृ, दृढोक्तिपूर्व्वम् अस्वीकारं ख्या in caus. or ज्ञा in caus., दृढनिश्चयपूर्व्वं or दृढप्रतिज्ञापूर्व्वम् असम्मतिं ज्ञा in caus. or प्रकाश् (c. 10. -काशयति -यितुं), दृढोक्तिपूर्व्वं निषेधं कृ, दृढवाक्यपूर्व्वं न सम्मन्ये or न स्वीकरोमि इति वद्, दृढोक्तिपूर्व्वं मतान्तरं ख्या or प्रकाश्, दृढप्रतिज्ञापूर्व्वं न सम्मन् or विपरीतं मन् or अन्यथा मन्.—(In writing) असम्मतिलेखं प्रकाश्, अस्वीकारपत्रं प्रकाश्.

PROTEST, *s.* अस्वीकारसूचकं दृढनिषेधवाक्यं, असम्मतिसूचकं दृढविरोधवाक्यं, अस्वीकारवादः, दृढोक्तिपूर्व्वो निषेधः, दृढप्रतिज्ञापूर्व्वो निषेधः, दृढनि-

चयपूर्व्वम् अस्वीकारप्रकाशनं, दृढप्रतिज्ञापूर्व्वम् असम्मतिप्रकाशनं, दृढोक्तिपूर्व्वं मतान्तरख्यापनं or असम्मतिख्यापनं or विपरीतमतख्यापनं, दृढनिश्चयपूर्व्वम् अस्वीकारवाक्यं or असम्मतिवाक्यं or अनङ्गीकारवाक्यं.—(In writing) दृढनिषेधसूचकं or दृढविरोधार्थकम्, अस्वीकारपत्रं or असम्मतिपत्रं or अनङ्गीकारपत्रं.

PROTESTANT, *s.* असम्मतः, अस्वीकारवादी *m.* (न्), अस्वीकर्त्ता *m.* (र्तृ), रोमीयमतविरोधी *m.* (न्), रोमीयमतविरुद्धः, रोमीयधर्म्मासम्मतः.

PROTESTATION, *s.* (Solemn declaration) दृढोक्तिः *f.*, दृढवाक्यं, दृढवादः, दृढप्रतिज्ञापूर्व्वो वादः, दृढभाषणं, दृढप्रतिज्ञापूर्व्वं भाषणं. *See* PROTEST.

PROTEUS, *s.* (Taking any shape at will) कामरूपी *m.* (न्), कामरूपः, स्वरूपी *m.*, स्वरूपः, ऋतुः *m.*

PROTOTYPE, *s.* मूलरूपं, मूलप्रतिमा, मूलमूर्त्तिः *f.*, आदर्शः, मूलादर्शः, मूलं, प्रतिरूपं, प्रतिकृतिः *f.*, प्रत्युपमा -मानं, प्रतिमूर्त्तिः *f.*

To PROTRACT, *v. a.* (Lengthen) दीर्घीकृ, द्राघ (nom. द्राघयति -यितुं). *See To* PROLONG, LENGTHEN.—(Delay) विलम्ब्. *See* the word.

PROTRACTED, *p. p.* दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (त्), विलम्बितः -ता -तं, चिरायितः &c., चिरस्थः -स्था -स्थं, चिरस्थितः -ता -तं; 'sound,' प्लुतः -तं.

PROTRACTION, *s.* दीर्घीकरणं, द्राघिमा *m.* (न्), दीर्घता, विलम्बः -म्बनं.

To PROTRUDE, *v. a.* (Thrust forward) प्रसृ (c. 10. -सारयति -यितुं), वहिःसृ, वहिर् निःसृ, वहिर् गम् (c. 10. गमयति -यितुं), प्रसारणं कृ.

To PROTRUDE, *v. n.* वहिः सृ (c. 1. सरति, सर्त्तुं), प्रसृ, वहिर् निःसृ, वहिर् गम् (c. 1. गच्छति, गन्तुं), वहिर् भू, वहिःस्था, वहिर् वृत्, अतिवृत्, अतिक्रम्, उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, उद्भेदं कृ, प्रलम्ब्, वहिर् लम्ब्. *See To* PROJECT, *v. n.*

PROTRUDED, *p. p.* वहिर्गतः -ता -तं वहिःसृतः &c., वहिर्भूतः -ता -तं, वहिःस्थितः &c., वहिर्वर्त्तितः &c., निःसारितः &c., वहिःसारितः &c., वहिर् निःसारितः &c., प्रसृतः &c., प्रसारितः &c., उद्भिन्नः -न्ना -न्नं, प्रोद्भिन्नः &c.

PROTRUDING, *part.* वहिःस्थः -स्था -स्थं, वहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), वहिर्गतः -ता -तं, वहिर्लम्बः &c. *See* PROJECTING.

PROTRUSION, *s.* वहिर्वर्त्तनं, वहिःसरणं, उद्भेदः, प्रोद्भेदः. *See* PROJECTION.

PROTUBERANCE, *s.* (Tumour, prominence) स्फोटः, विस्फोटः, गुल्मः, गण्डः -ण्डका, शोथः, आभोगः, उन्नतिः *f.*, प्रलम्बता. *See* PROJECTION.

PROTUBERANT, *a.* उन्नतः -ता -तं, प्रलम्बः -म्बा -म्बं, वहिर्लम्बः &c., गुल्मी -ल्मिनी -ल्मि (न्), आभोगी &c., वृहन्निवेशः -शा -शं. *See* PROJECTING.

To PROTUBERATE, *v. n.* उन्नतः -ता -तं भू, प्रलम्ब्, वहिर्लम्ब्. *See To* PROJECT, *v. n.*

PROUD, *a.* गर्व्वितः -ता -तं, गर्व्वी -र्व्विणी -र्व्वि (न्), सगर्व्वः -र्व्वा -र्व्वं, गर्व्वरः -रा -रं, गर्व्ववान् -वती -वत् (त्), गर्व्वितचित्तः -त्ता -त्तं, दृप्तः -प्ता -प्तं, सदर्पः -र्पा -र्पं, दर्पवान् &c., दृप्तः -प्ता -प्तं, दर्पी &c., मानी &c., मानवान् &c., अभिमानी &c., अभिमानवान् &c., साभिमानः -ना -नं, अहङ्कारी &c., अहङ्कारवान् &c., अहंयुः -युः -यु, साहङ्कारः -रा -रं, अहम्मानी &c., प्रगल्भः -ल्भा -ल्भं, उद्धतः -ता -तं, उद्धतचित्तः -त्ता -त्तं, उद्धतमनाः -नाः -नः (स्), समुद्धतः &c., प्रौढः -ढा -ढं, उन्नद्धः -द्धा -द्धं, उन्नद्धचेताः &c., समुन्नद्धः &c., साटोपः -पा -पं, आटोपी &c., उत्सिक्तः -क्ता -क्तं, उन्नतशिरस्कः -स्का -स्कं, उन्नतमनस्कः &c., समुन्नतचित्तः &c., ऊर्द्ध्वदृष्टिः -ष्टिः -ष्टि, अवलिप्तः -प्ता -प्तं, दर्पध्मातः &c., सावहेलः -ला -लं, प्रधृष्टः -ष्टा -ष्टं; 'proud of one's beauty,' रूपगर्व्वितः -ता -तं, रूपाभिमानी &c.; 'of one's birth,' कुलाभिमानी &c.; 'of one's learning,' पाण्डित्याभिमानी &c., पण्डितम्मन्यः -न्या -न्यं; 'of the body,' देहमानी &c.; 'to be proud,' गर्व्व् (c. 1. गर्व्वति -र्व्वितुं, c. 10. गर्व्वयते -यितुं), गर्व्वितः &c. भू, सगर्व्वीभू, दृप् (c. 4. दृप्यति, दर्प्तुं, द्रप्तुं), मन् (c. 4. मानयते -यितुं), प्रगल्भ् (c. 1. -गल्भते -ल्भितुं); 'to render proud,' दृप् (c. 10. दर्पयति -यितुं), गर्व्वितं -तां कृ.

PROUDLY, *adv.* सगर्व्वं, सदर्पं, समानं, साभिमानं, साहङ्कारं, साटोपं, सोन्मादं, गर्व्वितं, उन्नतचेतसा, सावहेलं, सावलेपं, गर्व्वितवत्, दृप्तवत्, प्रगल्भवत्.

PROVABLE, *a.* प्रमेयः -या -यं, साधनीयः &c., साध्यः -ध्या -ध्यं, उपपादनीयः &c., उपपाद्यः -द्या -द्यं, प्रतिपाद्यः &c., प्रतिपादनीयः &c., समर्थनीयः &c., सूच्यः -च्या -च्यं.

To PROVE, *v. a.* (Establish as truth) साध् (c. 10. साधयति -यितुं), सिद्धीकृ, प्रमाण (nom. प्रमाणयति -यितुं), प्रमाणीकृ, सप्रमाणं -णां कृ, उपपद् (c. 10. -पादयति -यितुं), प्रतिपद्, विभू (c. 10. -भावयति -यितुं), भू, निर्णी (c. 1. -णयति -णेतुं), सत्याकृ, सत्यीकृ; 'by testimony or other evidence,' साक्षिणा or साक्ष्येण or प्रमाणेन साध् or or उपपद्.—(Evince, demonstrate) सूच् (c. 10. सूचयति -यितुं), दृश् (c. 10. दर्शयति -यितुं), अभिदृश्, अनुदृश्, निर्दिश् (c. 6. -दिशति -देष्टुं), विनिर्दिश्, प्रदिश्, निर्णी, समर्थ (c. 10. -अर्थयति -यितुं), प्रकाश्.—(Try, ascertain, bring to the test) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ, निरूप्, ज्ञा in des., निर्णी, निश्चि, अनुभू, प्रतीतिं कृ.—(Experience) अनुभू, अनुभवं कृ, अनुभूतिं कृ.

To PROVE, *v. n.* (Be found, turn out) सम्भू (c. 1. -भवति -वितुं), सम्पद् (c. 4. -पद्यते -पत्तुं), उत्पद्, उपपद्, विद् in pass. (विद्यते), सिध् (c. 4. सिध्यति -ते), आपत् (c. 1. -पतति -तितुं), संवृत्, वृत्.—(Be ascertained or shown to be true) निर्णी in pass. (-णीयते), निश्चि in pass. (-चीयते), सूच् in pass. (सूच्यते), अनुभू in pass. (-भूयते), विभू, प्रमाणीभू, प्रती in pass. (-ईयते).

PROVED, *p. p.* (Established as true) सिद्धः -द्धा -द्धं, साधितः -ता -तं, उपपादितः &c., उपपन्नः -न्ना -न्नं, प्रमाणितः -ता -तं, प्रमाणीकृतः &c., भावितः &c., विभावितः &c., प्रतिपादितः &c., प्रमितः -ता -तं.—(Evinced, demonstrated) सूचितः -ता -तं, दर्शितः &c., निर्दिष्टः -ष्टा -ष्टं, निर्णीतः -ता -तं, समर्थितः &c.—(Tested, ascertained) परीक्षितः -ता -तं, निरूपितः -ता -तं, निश्चितः &c., निर्णीतः &c., अनुभूतः &c., प्रतीतः -ता -तं; 'thing to be proved,' साध्यं, प्रमेयं; 'proved by evidence,' साक्षिभावितः &c., साक्ष्यसिद्धः &c.

PROVENDER, *s.* पाथेयं, यात्रिकं, शम्बलं, सम्बलः -लं, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पश्वादिखाद्यद्रव्यं, शुष्कतृणादि *n.*, शुष्कघासादि, माषादि, धान्यादि.

PROVER, *s.* उपपादकः, सिद्धिकर्त्ता *m.* (र्तृ), साधकः, प्रमाता *m.* (तृ), प्रतिपादकः, उपपत्तिकारी *m.* (न्), प्रतिपत्तिकारकः, निर्णेता *m.*, विभावकः.

PROVERB, *s.* लोकवाक्यं, लोकोक्तिः *f.*, प्राचीनवाक्यं, पुराणवाक्यं, लोकप्रचलितवाक्यं, वाक्यं, वचनं, वाक् *f.* (च्), सूत्रं, प्राचीनसूत्रं, पुराणसूत्रं, उपमानं, उपदेशवाक्यं, उपदेशसूत्रं, न्यायः, न्यायवाक्यं.

PROVERBIAL, *a.* (Mentioned in a proverb) प्राचीनसूत्रप्रोक्तः -क्ता -क्तं, पुराणसूत्रप्रोक्तः &c., लोकप्रोक्तः &c., लोकोक्तः &c.—(Comprised in a proverb, current as one) प्राचीनसूत्ररूपः -पा -पं, पुराणसूत्ररूपः &c., लोकप्रसिद्धः -द्धा -द्धं, लोकप्रचलितः -ता -तं, लोकप्रचलः -ला -लं, न्यायरूपः &c., न्यायप्रसिद्धः &c.

PROVERBIALLY, *adv.* लोकप्रसिद्धं, जनप्रसिद्धं, प्राचीनसूत्रानुसारेण.

To PROVIDE, *v. a.* (Procure or prepare beforehand) सज्जी or क्लृप् (c. 10. कल्पयति -यितुं) or उपक्लृप् or परिक्लृप् or सम्प्रक्लृप्

सोपकारद्रव्याणि क्लृप् or विधा or उपस्था in caus. or उपपद् in caus. or सम्भृ or पुरस्कृ or प्रस्तुतीकृ or निर्मा, अग्रे द्रव्यपरिकल्पनं कृ or द्रव्यसम्भारं कृ or उपकरणसम्भारं कृ or द्रव्यसामग्र्यं परिक्लृप्. *See To* PREPARE.—(Make a previous stipulation) पूर्व्वनियमं कृ, पूर्व्वपणं कृ, पूर्व्वसन्धिं कृ, पूर्व्वसङ्केतं कृ, पूर्व्वप्रतिज्ञां कृ.—(Provide against or for) expressed by some of the above roots in conjunction with अर्थं or अर्थे in comp.; 'to provide necessaries against a time of want,' आपदर्थं द्रव्याणि सम्भृ or आपदर्थं द्रव्यसम्भारं कृ; 'to provide thick clothing against the cold,' शीतनिवारणार्थं स्थूलवस्त्राणि क्लृप्; 'to provide for another,' परार्थं प्रयोजनीयद्रव्याणि परिक्लृप् or परं प्रयोजनीयद्रव्ययुक्तं कृ; 'to provide for another comfortably,' परस्वास्थ्यं कृ or जन्, परसुस्थतां कृ, परं सुस्थं कृ; 'to provide for, take measures against,' पूर्व्वोपायं कृ, अग्रे उपायं कृ, पूर्व्वोपायं प्रयुज्, उपायप्रयोगं कृ.

PROVIDED, *p. p.* (Furnished or prepared beforehand) अग्रे परिकल्पितः -ता -तं or परिक्लृप्तः -प्ता -प्तं or उपक्लृप्तः -प्ता -प्तं or सम्यक्लृप्तः &c. or कल्पितः -ता -तं, पूर्व्वं सम्भृतः -ता -तं or युक्तः -क्ता -क्तं or समायुक्तः &c. or संयुक्तः &c. or अन्वितः -ता -तं or समन्वितः &c. or उपेतः &c. or संहितः &c. or निर्म्मितः -ता -तं; 'provided for,' प्रयोजनीयद्रव्ययुक्तः -क्ता -क्तं, सर्व्वसोपकारद्रव्ययुक्तः &c., जातस्वास्थ्यः -स्थ्या -स्थ्यं, अन्नवस्त्रयुक्तः &c.—(Stipulated previously) पूर्व्वनियमितः -ता -तं, पूर्व्वपणितः &c., पूर्व्वसङ्केतितः &c.; 'provided that, with this condition,' पूर्व्वनियमे कृते, पूर्व्वसङ्केते कृते, एतेन सन्धिना.

PROVIDENCE, *s.* (Fore-sight, fore-thought) पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, दूरदृष्टिः *f.*, दूरदर्शनं, दीर्घदृष्टिः *f.*, दीर्घदर्शनं, पूर्व्वचिन्ता, अग्रचिन्ता, पूर्व्वविवेचनं, पूर्व्वविचारः -रणं -णा, अग्रविचारः, भविष्यद्दर्शनं, भविष्यच्चिन्ता, भाविचिन्ता, भाविकालावलोकनं, पूर्व्वविमर्शः, प्रसमीक्षा.—(The providence of God) ईश्वरानुसन्धानं, ईश्वरविधिः *m.*, ईश्वरविधानं.—(Divine Providence himself) विधाता *m.* (तृ), धाता *m.*, अनागतविधाता *m.*, भविष्यद्विधाता *m.*, विधिः *m.*, ईश्वरः, परमेश्वरः.

PROVIDENT, *a.* दीर्घदर्शी -र्शिनी -र्शि (न्), दूरदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, दूरदृष्टिः &c., परिणामदर्शी &c., अग्रदर्शी &c., भविष्यद्दर्शी &c., अनागतदर्शी &c., भविष्यच्चिन्तकः -का -कं, भाविचिन्तकः &c., पूर्व्वविचारी &c., पूर्व्वविवेकी &c., अन्तरज्ञः -ज्ञा -ज्ञं.

PROVIDENTIAL, *a.* ईश्वरकृतः -ता -तं, ईश्वरविहितः &c., ईश्वरानुसन्धानप्रयुक्तः -क्ता -क्तं, ईश्वरविधानप्रयुक्तः &c., विधातृकृतः -ता -तं, विधातृसिद्धः -द्धा -द्धं, ईश्वरसिद्धः &c.

PROVIDENTIALLY, *adv.* ईश्वरविधानेन, ईश्वरविधिना, ईश्वरानुसन्धानात्, दिष्ट्या.

PROVIDENTLY, *adv.* दीर्घदृष्ट्या, अग्रदर्शनात्, परिणामदर्शनात्, भविष्यद्दर्शनात्, चिन्तापूर्व्वं, विवेचनापूर्व्वं, पूर्व्वविचारेण, पूर्व्वविचारं कृत्वा, पूर्व्वविवेचनं कृत्वा, प्रसमीक्ष्य, प्रविमृश्य.

PROVIDER, *s.* परिकल्पकः, उपकल्पकः. *See* PROCURER, &c.

PROVINCE, *s.* (Division of a kingdom) मण्डलं, चक्रं, देशः, प्रदेशः, विषयः, राष्ट्रं, निर्गः, ग्रामशतं; 'governor of a province,' मण्डलेश्वरः, मण्डलपतिः *m.*, मण्डलाध्यक्षः, मण्डलाधिपतिः *m.*, माण्डलिकः.—(Peculiar office or business) स्वधर्म्मः, स्वकर्म्म *n.* (न्), कर्म्म *n.*, कार्य्यं, अधिकारः, प्रकरणं, क्रिया, नियोगः, निबन्धनं; 'woman's province,' स्त्रीधर्म्मः, स्त्रीनिबन्धनं.—(Department of science, &c.) प्रकरणं, देशः, अङ्गं, विषयः.

PROVINCIAL, *a.* दैशिकः -की -कं, देशीयः -या -यं, प्रदेशीयः &c., देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), माण्डलिकः -की -कं, मण्डलसम्बन्धी &c., राष्ट्रिकः -की -कं, राष्ट्रीयः -या -यं, देश in comp., ग्रामीयः -या -यं, ग्राम्यः -म्या -म्यं, जानपदः -दी -दं.

PROVINCIAL, *s.* देशस्थः, देशजः, देशवासी *m.* (न्), ग्रामस्थः, ग्राम्यजनः.

PROVINCIALISM, *s.* देशभाषा, प्रादेशिकभाषा, ग्रामीयभाषा, ग्रामिकभाषा.

PROVISION, *s.* (Act of providing) उपकल्पनं, परिकल्पनं, कल्पनं, सम्भारः, विधानं, उपस्थापनं, उपपादनं, प्रस्तुतीकरणं.—(Measures taken beforehand) पूर्व्वोपायः, अग्रोपायः, उपायः, पूर्व्वकल्पना, पूर्व्वविधानं; *see* PREPARATION.—(Store or stock collected) सम्भारः, संग्रहः, सञ्चयः, सञ्चितं, सामग्री -ग्र्यं, साहित्यं; 'provision of victuals,' अन्नसम्भारः, अन्नसंग्रहः, खाद्यद्रव्यसामग्री; 'of materials,' द्रव्यसामग्री, उपकरणसामग्री, उपकरणसम्भारः.—(Victuals, provisions) अन्नं, भोजनं, भोज्यं, भक्ष्यं, आहारः, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पाथेयं, यात्रिकं, निर्वाहः, शम्बलं, सम्बलः -लं; 'furnished with provisions,' खाद्यद्रव्ययुक्तः -क्ता -क्तं, पाथेयवान् -वती -वत् (त्).—(Previous stipulation) पूर्व्वनियमः, पूर्व्वसन्धिः *m.*, पूर्व्वसङ्केतः, पूर्व्वप्रतिज्ञा, पूर्व्वपणः, पूर्व्वसमयः, *See* PROVISO.

To PROVISION, *v. a.* (Furnish with provisions) खाद्यद्रव्ययुक्तं -क्तां कृ, खाद्यद्रव्याणि सम्भृ or उपक्लृप्, खाद्यद्रव्यसम्भारं कृ, अन्नसम्भारं कृ, खाद्यद्रव्यसम्भृतं -तां कृ.

PROVISIONAL, *a.* आपाततः स्थापितः -ता -तं, आपाततो नियोजितः -ता -तं, सामयिकः -की -कं, प्रासङ्गिकः &c., समयोपयोगी -गिनी -गि (न्), समयानुरूपः -पा -पं, अल्पकालीनः -ना -नं.

PROVISIONALLY, *adv.* आपाततस्, यथासमयं, यथाप्रयोजनं, अल्पकालमात्रं.

PROVISIONARY, PROVISORY, *a.* *See* PROVISIONAL.

PROVISO, *s.* उपनियमः, प्रकरणं, नियमप्रकरणं, सङ्केतः, उपसङ्केतः, प्रतिबन्धः, अनुबन्धः, नियमानुबन्धः, नियमपत्रानुबन्धः, नियमपत्राङ्गं, नियमपत्रखण्डः, नियमपत्रावयवः, नियमैकदेशः; 'to annex one,' अर्थान्तरोपन्यासं कृ.

PROVISORY, *a.* (Conditional) साङ्केतिकः -की -कं, सप्रतिबन्धः -न्धा -न्धं.

PROVOCATION, *s.* (Act of exciting anger) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं, क्रोधोत्पादनं, कोपोत्पादनं, क्रोधोद्दीपनं, क्रोधोत्तेजनं.—(Cause of anger) कोपकारणं, क्रोधकारणं, कोपहेतुः *m.*—(Act of exciting) उत्तेजनं, उद्दीपनं, उद्बोधनं, प्रवर्त्तनं.

PROVOCATIVE, *a.* उद्दीपकः -का -कं, अग्निवर्धकः &c., क्षुधाजनकः &c.

PROVOCATIVE, *s.* अग्निवर्धनं, रोचकः -कं, रुचकं, प्ररोचनं, खर्जिका.

To PROVOKE, *v. a.* (Excite to anger) प्रकुप् (c. 10. -कोपयति -यितुं), कुप्, क्रुध् (c. 10. क्रोधयति -यितुं), कोपं or क्रोधं जन् or उत्तिज् or उद्दीप् or उत्पद् (c. 10. -पादयति -यितुं), कोपोत्पादनं कृ, क्रोधोत्तेजनं कृ, क्रोधोद्दीपनं कृ.—(Excite) उद्दीप् (c. 10. -दीपयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), उत्पद् in caus., प्रवृत् in caus., प्ररुच् in caus.—(Challenge) आह्वे, समाह्वे, उपाह्वे.

PROVOKED, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः &c., कुपितः &c., कोपितः &c., उपजातकोपः -पा -पं, जातकोपः &c., इद्धमन्युः -न्युः -न्यु, इद्धक्रोधः -धा -धं, उद्दीप्तमन्युः &c., कोपदीप्तः -प्ता -प्तं, उत्पन्नमन्युः &c., उत्तेजितः -ता -तं, उद्दीपितः &c., उत्तापितः &c., उत्तप्तः -प्ता -प्तं, सन्तप्तः &c., सन्तापितः &c.

PROVOKING, *part.* or *a.* प्रकोपजनकः -का -कं, कोपजनकः &c., क्रोधजनकः &c., प्रकोपकः -का -कं, क्रोधोत्पादकः &c., क्रोधोद्दीपकः &c., कोपोद्दीपकः &c., क्रोधोत्तेजकः &c., उत्तेजकः &c., उद्दीपकः &c., उद्बोधकः &c.

Provokingly, *adv.* यथा कोपो जायते तथा, यथा क्रोध उद्दीप्यते तथा.

Provost, *s.* अध्यक्षः, अधीशः, अधिकारी *m.* (न्), अधिपतिः, श्रेष्ठी *m.*

Prow, *s.* नौकाग्रं, नौकाग्रभागः, नौपृष्ठभागः, नौकोदग्रभागः.

Prowess, *s.* पराक्रमः, विक्रमः, सुविक्रमः, शौर्य्यं, वीर्य्यं, सुवीर्य्यं, रणशौर्य्यं, रणोत्साहः, पौरुषं, कृतपौरुषं, अतिशक्तिता, जनौजस् *n.*, प्रौढिः *f.*, कर्म्मोदारं; 'personal prowess,' बाहुवीर्य्यं; 'gained by one's own prowess,' स्वहस्तार्जितः -ता -तं, स्वभुजोपार्जितः &c.; 'man of great prowess,' सुपराक्रमी *m.* (न्), सुविक्रमी *m.*, पराक्रान्तः, अतिशक्तिमान् *m.* (त्); 'to show prowess,' पराक्रम् (c. 1. -क्रामति -क्रमति -मितुं), विक्रम्.

To prowl, *v. n.* मांसार्थं or आमिषार्थं भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम्, मांसान्वेषणार्थं भ्रम् or पर्य्यट् (c. 1. -अटति -टितुं).

Prowler, *s.* मांसार्थं भ्रमणकारी *m.* (न्) or परिभ्रमणकारी *m.*, परिभ्रमी *m.*

Prowling, *s.* मांसार्थं or मांसान्वेषणार्थं भ्रमणं or परिभ्रमणं or पर्य्यटनं.

Proximate, *a.* समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निरन्तरः -रा -रं, सन्निहितः -ता -तं, निरन्तरालः -ला -लं, उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), आसन्नः -न्ना -न्नं, अन्तिकः -का -कं, उपश्लिष्टः -ष्टा -ष्टं, संसक्तः -क्ता -क्तं, सन्निकृष्टः -ष्टा -ष्टं, समीपगः &c. *See* Near, Next; 'proximate cause,' उपादानकारणं, उपादानं.

Proximately, *adv.* समीपतस्, सन्निहितं, सन्निकृष्टं, निरन्तरालं, अनन्तरालं.

Proximity, *s.* समीपता, सामीप्यं, सन्निकर्षः, सन्निकृष्टता, सन्निधिः *m.*, सान्निध्यं, सन्निधानं, सन्निधं, आन्तिक्यं -कता, उपस्थानं, उपस्थितिः *f.*, नैकट्यं, प्रत्यासत्तिः *f.*, प्रत्यासन्नता, संसक्तिः *f.*, संसर्गः, उपश्लेषः, आनन्तर्य्यं, तादस्थ्यं. *See* Nearness.

Proxy, *s.* (Agency of another who acts as substitute) प्रतिनिधित्वं -ता.—(Person who acts) प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तः -स्तकः; 'by proxy,' प्रतिनिधिद्वारा, प्रतिनिधिद्वारेण; 'one who signs a paper by proxy,' लेखनिकः.

Prude, *s.* मिथ्याविनीता, अत्यन्तविनयनिष्ठा, विनयाभिमानिनी, अतिविनीताम्मन्या, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारिणी, अत्याचारसेविनी, सुव्रीडिताम्मन्या, अतिविनयसेविनी, अत्यन्तविनीता.

Prudence, *s.* पूर्व्वविचारः -रणा, परिणामदृष्टिः *f.*, पूर्व्वसमीक्षा, प्रसमीक्षा, समीक्षा -क्षणं, समीक्ष्यकारिता -त्वं, विमृश्यकारिता, परिणामदर्शनं, दीर्घदृष्टिः, सदसद्दर्शनं, सदसद्विवेकः, विनयः, विनीतता, नीतिः *f.*, नीतिज्ञता, प्राज्ञता, प्रज्ञता, विज्ञता, विवेकः, मनस्विता, विचारशीलता, पूर्व्वापरविचारः, मतिमत्त्वं, बुद्धिः *f.*, मनीषा, हिताहितविवेकः, पूर्व्वचिन्ता, चिन्ता, कार्य्यचिन्ता, परिवेदना, सावधानता, पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, विमर्शः, विवेचना, पूर्व्वविवेचना.

Prudent, *a.* परिणामदर्शी -र्शिनी -र्शि (न्), पूर्व्वविचारशीलः -ला -लं, दीर्घदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, समीक्ष्यकारी -रिणी &c., विमृश्यकारी &c., समीक्ष्यकारी &c., प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., विज्ञः &c., मनस्वी -स्विनी &c., मतिमान् -मती -मत् (त्), बुद्धिमान् &c., प्रज्ञावान् &c., मनीषी -षिणी &c., परिवेदी -दिनी &c., परिवेदकः -का -कं, बुधः -धा -धं, सुबोधः -धा -धं, विनीतः &c., विनयवान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, पूर्व्वापरविचारी &c., विचारशीलः -ला -लं, सदसद्दर्शी &c., सदसद्विवेकी &c., दूरदर्शी &c., हिताहितविवेकी &c., पूर्व्वचिन्तकः -का -कं, पूर्व्वचिन्ताशीलः &c., कार्य्यचिन्तकः &c., धीरः -रा -रं, सावधानः -ना -नं, कृतावधानः -ना -नं, कृतधीः -धीः -धि, प्रयतः -ता -तं.

Prudential, *a.* पूर्व्वविचारप्रयुक्तः -क्ता -क्तं, पूर्व्वसमीक्षाप्रयुक्तः &c., प्रसमीक्षाप्रयुक्तः &c., सविचारः -रा -रं, सविवेकः -का -कं.

Prudently, *adv.* सविचारं, समीक्षापूर्व्वं, प्रसमीक्ष्य, सुसमीक्ष्य, सुविमृश्य परिणामदर्शनात्, परिणामदृष्ट्या, पूर्व्वविचारेण, सावधानं, सपरिवेदनं प्राज्ञवत्, विज्ञवत्.

Prudery, *s.* मिथ्याविनयः, मिथ्यालज्जा, एकान्तविनयः, सूक्ष्मविनयनिष्ठा सूक्ष्माचारनिष्ठा, अत्याचारनिष्ठा, विनयाभिमानं, अतिसूक्ष्मशीलता, अतिसूक्ष्मता, अतिविनीतता.

Prudish, *a.* मिथ्याविनीतः -ता -तं, एकान्तविनीतः &c., अत्यन्तविनीत &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, विनयाभिमानी -निनी &c. *See* Prude, Precise, *a.*

To prune, *v. a.* क्षुद्रपल्लवान् or निरर्थकविटपान् अपछिद् (c. 7. -छिनत्ति -छेत्तुं) or अवकृत् (c. 6. -कृन्तति -कर्त्तितुं) or लू (c. 9. लुनाति लवितुं) or लुप् (c. 6. लुम्पति, लोप्तुं).

Pruned, *p. p.* छिन्नपल्लवः -वा -वं, छिन्नविटपः -पा -पं, लूनविटपः &c.

Pruner, *s.* विटपच्छिद् *m.*, पल्लवच्छिद् *m.*, निरर्थकविटपच्छेत्ता *m.* (तृ).

Pruning, *s.* पल्लवापच्छेदः, विटपापच्छेदः, निरर्थकविटपापकर्त्तनं.

Pruning-hook, pruning-knife, *s.* पल्लवच्छेदनी, विटपच्छेदनी, पल्लवकर्त्तनी

Prurience, pruriency, *s.* कण्डूतिः *f.*, कण्डूः *f.*, कण्डुः *f.*, कण्डूया, कण्डूयनं.—(Longing desire for any thing) अतिस्पृहा, अत्यन्तस्पृहा अतिशयेच्छा, अत्यभिलाषः.

Prurient, *a.* कण्डूलः -ला -लं, कण्डूतिमान् -मती -मत् (त), सकण्डूतिः -तिः -ति.

Prurigo, *s.* कण्डूः *f.*, कण्डुः *f.*, खर्ज्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f.*

To pry, *v. a.* सूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं), सूक्ष्मं निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or दृश् (c. 1. पश्यति, द्रष्टुं), सूक्ष्मदर्शनं कृ, सूक्ष्मम् अन्विष् (c. 4. -इष्यति -एषितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), सूक्ष्मान्वेषणं कृ, सूक्ष्मानुसन्धानं कृ, सूक्ष्मं चर्च् (c. 1. चर्चति -र्चितुं), सूक्ष्मचर्चां कृ, चर्चां कृ, अनधिकारचर्चां कृ, मर्म्मान्वेषणं कृ, सूक्ष्मगवेषणं कृ, मर्म्मगवेषणं कृ.

Prying, *s.* सूक्ष्मनिरूपणं, सूक्ष्मनिरीक्षणं, सूक्ष्मदर्शनं, सूक्ष्मदृष्टिः *f.*, सूक्ष्मान्वेषणं, सूक्ष्मानुसन्धानं, सूक्ष्मचर्चा, अनधिकारचर्चा, चर्चा, मर्म्मान्वेषणं

Psalm, *s.* गीतं, स्तुतिगीतं, गानं, स्तुतिगानं, स्तोत्रं, सङ्गीतं, सङ्गीतं ईश्वरस्तुतिगीतं, भक्तिगीतं, भक्तिगानं, धर्म्मगीतं.

Psalmist, *s.* गीतरचकः, स्तुतिगीतरचकः, स्तोत्ररचकः, गीतकारः, गीतकविः *m.*

Psalmody, *s.* स्तुतिगानं, स्तोत्रगानं, स्तोत्रगीतिः *f.*, ईश्वरस्तुतिगानं.

Psalmography, *s.* गीतरचनं, स्तुतिगीतरचनं, स्तोत्ररचनं, गीतकरणं.

Psalter, *s.* गीतपुस्तकं, गीतसंहिता, गीतसंग्रहः, स्तोत्रपुस्तकं, खिलं.

Pseudo. A prefix expressed in Sanskrit by मिथ्या, मृषा, कृत्रिम कु &c. prefixed, or कल्प, देशीय &c. affixed; as, 'a pseudo poet,' मिथ्याकविः *m.*, कुकविः, कविकल्पः, कविदेशीयः; pseudology मिथ्यावादः, मृषावादः; 'pseudo-morphous,' कृत्रिमरूपः -पा -पं 'pseudonymous,' कृत्रिमनामा &c.

Pshaw, *exclam.* धिक्, चै, अवे, अरे, रे, कित्, हुम्, अपेहि.

Psychological, *a.* आत्मतत्त्वविषयः -या -यं, अध्यात्मविषयकः -का -कं

Psychology, *s.* आत्मतत्त्वविद्या, अध्यात्मविद्या, अध्यात्मशास्त्रं.

Puberty, pubescence, *s.* यौवनं, यौवनावस्था, तारुण्यं, तारुण्यावस्था तरुणत्वं, युवत्वं, यौवनकालः, प्रौढता, प्रौढिः *f.*, प्रौढदशा; 'attained to puberty,' प्राप्तयौवनः -ना -नं, प्राप्तयौवनकालः -ला -लं; 'not attained to it,' अप्राप्तयौवनः &c.

Pubescent, *a.* प्राप्तयौवनः -ना -नं, अङ्कुरितयौवनः &c., प्राप्ततारुण्यः -ण्या -ण्यं.

Public, *a*. (Pertaining to the community) सर्व्वसम्बन्धी -न्धिनी -न्धि (न्), सर्व्वलोकसम्बन्धी &c., प्रजासम्बन्धी &c., लोक in comp., प्रजा in comp. (General, common to many,) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्व्वसाधारणः &c., सर्व्वसामान्यः &c., सार्व्वलौकिकः -की -कं, लौकिकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, सर्व्वजनीयः -या -यं, विश्वजनीनः &c., विश्वजनीयः -या -यं, सार्व्वः -र्व्वी -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सर्व्वीयः -या -यं, लोक or जन in comp., (Commonly known or current) प्रसिद्धः -द्धा, लोकप्रसिद्धः &c., सर्व्वप्रसिद्धः &c., जनप्रसिद्धः &c., सर्व्वजनप्रसिद्धः &c., सर्व्वलोकप्रसिद्धः &c., जगत्प्रसिद्धः &c., देशप्रसिद्धः &c., लोकविश्रुतः -ता -तं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं, लोक or जन in comp., *see* Popular.—(Open to all) प्रकाशः -शा -शं, सर्व्वप्रकाशः &c., सर्व्वलोकप्रकाशः &c., प्रकटः -टा -टं, सर्व्वप्रकटः &c., लोकप्रकाशः &c., अविविक्तः -क्ता -क्तं; 'public sale,' प्रकाशविक्रयः प्रकाशक्रयः; 'public benefit,' लोकोपकारः; 'public business,' लोकव्यवहारः व्यवहारः; 'public odium,' जनविद्वेषः; 'public property,' गणद्रव्यं; 'public feeling,' लोकचित्तं, प्रकृतिचित्तं.

Public, *s*. लोकः, सर्व्वलोकः, सर्व्वजनाः *m. pl.*, प्रजा, प्रजालोकः; 'for the benefit of the public,' प्रजार्थं, लोकार्थं, लोकोपकारार्थं; 'in public,' प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, सर्व्वप्रकाशं, लोकसाक्षात्, लोकसम्मुखं; 'in public and in private,' प्रकाशं विविक्तं च, प्रकाशम् एकान्ततश्च; 'regard for the public or public opinion,' लोकलज्जा, जनलज्जा.

Publican, *s*. (Collector of tribute or toll) करग्रहः, करग्राही *m.* (न्), करसंग्राही *m.*, शुल्कग्राही *m.*—(Retailer of beer and spirits) शौण्डिकः, शुण्डी *m.* (न्), यवसुरादिविक्रयी *m.* (न्) शुण्डादिविक्रेता *m.* (तृ) सुराविक्रयी *m.*

Publication, *s*. (The act) प्रकाशनं, प्रकटनं, प्रकटीकरणं, प्रसिद्धीकरणं, प्रकाशीकरणं.—(A published book) प्रकाशितपुस्तकं, प्रसिद्धपुस्तकं.

Public-house, *s*. शुण्डास्थानं, मद्स्थानं, पानगोष्ठिका, शुण्डापानं, शुण्डा, मदिरागृहं, मदिराशाला, आपानं, यवसुरादिविक्रयस्थानं, शुण्डादिविक्रयस्थानं, सुराविक्रयस्थानं.

Publicity, *s*. प्रकाशता, लोकप्रकाशता, लोकप्रकाशः, जनप्रकाशः, प्रकाशः, प्राकट्यं, लोकप्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, प्रसिद्धता, लोकप्रसिद्धता -त्वं, लोकविश्रुतिः *f.*, विश्रुतिः, जनप्रसिद्धिः *f.*, प्रख्यातिः *f.*, विख्यातिः *f.*, ख्यातिः *f.*, लौकिकता -त्वं, स्फुटता, व्यक्तता, स्पष्टता.

Publicly, *adv.* (Openly, before the world) प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, लोकप्रकाशं, सर्व्वप्रकाशं, प्रसिद्धं, अविविक्तं; 'publicly and privately,' *see* Public, *s*.—(Without concealment) व्यक्तं, सुव्यक्तं, स्पष्टं, स्फुटं, साक्षात्, प्रादुस्, आविस्, साविष्कारं, अगूढं.

Public-spirited, public-minded, *a*. लोकोपकारशीलः -ला -लं, लोकोपकारबुद्धिः -द्धिः -द्धि, लोकार्थबुद्धिः &c., जनार्थबुद्धिः &c., लोकार्थी -र्थिनी -र्थि (न्), जनार्थी &c., लोकहितेच्छुः -च्छुः -च्छु, लोकहितः -ता -तं, सर्व्वजनहितैषी &c., साधारणमङ्गलेच्छुः &c.

Public-spiritedness, *s*. लोकोपकारशीलता, लोकोपकारबुद्धिः *f.*, लोकहितेच्छा.

To **publish**, *v. a.* (Make generally known) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), प्रसिद्धीकृ, ख्या in caus. (ख्यापयति -यितुं), प्रख्या, विख्या, आख्या, घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, प्रचर् (c. 10. -चारयति -यितुं), विज्ञा in caus. (-ज्ञापयति -ज्ञपयति -यितुं), बुध् (c. 10. बोधयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), विद्, आविष्कृ, प्रादुष्कृ.—(Publish a book) पुस्तकं प्रकाश् or प्रसिद्धीकृ.—(Put into circulation) प्रचलीकृ, प्रचल् (c. 10. -चलयति -यितुं), प्रचर्.

Published, *p.p.* प्रकाशितः -ता -तं, प्रकटीकृतः -ता -तं, प्रकटितः -ता -तं, प्रसिद्धीकृतः &c., ख्यापितः -ता -तं, घोषितः &c., विघोषितः &c., आघोषितः &c., विज्ञापितः &c., प्रख्यातः -ता -तं, प्रचलीकृतः &c., प्रचारितः &c., आविष्कृतः &c., प्रादुष्कृतः &c., प्रथितः &c.

Publisher, *s*. प्रकाशकः, प्रकाशयिता *m.* (तृ), ख्यापकः, विज्ञापकः, प्रसिद्धकर्त्ता *m.* (र्तृ), आविष्कर्त्ता *m.*, प्रादुष्कर्त्ता *m.*

To **pucker**, *v. a.* संकुच् (c. 1. -कोचति -चितुं), कुञ्च् (c. 1. कुञ्चति -ञ्चितुं), आकुञ्च्, संहृ (c. 1. -हरति -हर्त्तुं), पुटीकृ, सम्पुटीकृ, सङ्कोचं कृ.

Pucker, puckering, *s*. पुटः, पुटीकरणं, सङ्कोचः -चनं, कुञ्चनं, आकुञ्चनं.

Pudder, *s*. तुमुलं, कोलाहलः, सम्भ्रमः, विप्लवः, व्यग्रता, व्यस्तता.

Pudding, *s*. चोलिका, पोलिका; 'plum-pudding,' *see* the word.

Puddle, *s*. वर्षकूपः, पङ्कजलौघः, कर्दमजलौघः, सपङ्कजलौघः, पङ्कजलगुल्मः, मलिनजलौघः, समलजलौघः, पङ्कगुल्मः.

To **puddle**, *v. a.* समलीकृ, पङ्किलीकृ, कलुषीकृ, आविलीकृ. *See* Muddle.

Pudency, pudicity, *s.*, *see* Modesty.

Pudendum, pudenda, *s*. (Of a woman) भगं, योनिः *f.*, अधोङ्गं, अधोपरं, अधोवशः, अधस्, अधस्तात्, उपस्थः, गुह्याङ्गं, रतिकुहरं, रतिमन्दिरं, रतिगृहं. *See* Privity.

Puerile, *a*. बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालयोग्यः -ग्या -ग्यं, शिशुयोग्यः &c., बालधर्म्मकः -का -कं, बालबुद्धिः -द्धिः -द्धि.

Puerility, *s*. बालिश्यं, बालेयत्वं -ता, बालकीयता, बालयोग्यता.

Puerperal, *a*. प्रासूतिकः -की -कं, प्रसवसम्बन्धी -न्धिनी -न्धि (न्).

Puerperous, *a*. बालप्रसविनी, बालप्रसवकर्त्री, प्रसूतिका, सूतिका.

Puff, *s*. (Breath from the mouth) श्वासः, श्वसितं, मुखमरुतः, वदनमरुतः.—(A puff or sudden wind) फुत्कृतं, फूत्कारः, फूत्कृतं, फूत्कारः फूत् indec.—(Blast, gust) ध्मानं, आध्मानं, ध्मातं, वातः, वातरूपः, वात्या, निर्घातः, प्रभञ्जनः.—(Kind of cake) पिष्टकं, आपूपिकं.—(Tumid commendation) अतिशयप्रशंसा, अत्युक्तिरूपा प्रशंसा, अधिकप्रशंसा, अतिशयोक्तिः *f.*

To **puff**, *v. n.* (Breathe) श्वस् (c. 2. श्वसिति -तुं), श्वासं कृ, प्रश्वासं कृ.—(Pant) कृच्छ्रेण श्वस्, कृच्छ्रेण श्वासप्रश्वासं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), उद्गमं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.—(Blow) वा, प्रवा.—(Eject air from the mouth suddenly) अकस्मात् वदनमरुतं or मुखमरुतं निरस् (c. 4. -अस्यति -असितुं) or निःसृ in caus.—(Blow upon with a puffing noise) फुत्कृ, फूत्कृ, फुत्कारं कृ, फूत्कारं कृ, फुत्कारेण or फुत्शब्देन प्रश्वस्.—(Swell or be inflated with air) ध्मा in pass. (ध्मायते), आध्मा, वातेन पॄ in pass. (पूर्य्यते).

To **puff**, *v. a.* (Inflate, dilate with air) ध्मा (c. 1. धमति, ध्मातुं), आध्मा, समाध्मा, प्रध्मा, उपध्मा, वातेन पॄ (c. 10. पूरयति -यितुं), श्वासेन पॄ, वायुपूरितं -तां कृ.—(Blow away) अपध्मा, विध्मा.—(Puff up with pride, &c.) दर्पाध्मातं -तां कृ, गर्व्वाध्मातं -तां कृ, उद्धतीकृ, उन्मत्तीकृ.—(Praise with exaggeration) अत्युक्त्या or अतिशयोक्त्या प्रशंस्, अतिशयप्रशंसां कृ.

Puffed, *p. p.* (Inflated) ध्मातः -ता -तं, आध्मातः &c., समाध्मातः &c., प्रध्मातः &c., वातपूरितः -ता -तं, वायुपूर्णः -र्णा -र्णं, श्वासपूरितः &c.—(Puffed up with pride, &c.) दर्पाध्मातः -ता -तं, गर्व्वाध्मातः &c., उद्धतः &c., दर्पोद्धतः &c., मदोद्धतः &c.

PUFFY, *a.* आध्मातः -ता -तं, वातमयः -यी -यं, शब्दमात्रः -त्रा -त्रं.

PUG-DOG, *s.* मर्कटमुखः क्षुद्रकुक्कुरभेदः.

PUG-FACED, *a.* वानरमुखः -खी -खं, मर्कटवदनः -ना -नं, कपिमुखः &c.

PUG-NOSE, *s.* चिपिटः, चिपिटकः, चिपुटः, चिकिनः, अवभटः.

PUGILISM, *s.* मुष्टियुद्धं, मुष्टियोधनं, मुष्टिपातः, मल्लयुद्धं, मुष्टीमुष्टि, बाहुयुद्धं.

PUGILIST, *s.* मुष्टियोद्धा *m.* (द्धृ), मुष्टियोधः, मुष्टियोधी *m.* (न्), बाहुयोधी *m.*

PUGILISTIC, *a.* मुष्टियुद्धसम्बन्धी -न्धिनी -न्धि (न्), बाहुयुद्धसम्बन्धी &c.

PUGNACIOUS, *a.* युयुत्सुः -त्सुः -त्सु, कलहप्रियः -या -यं, युद्धप्रियः &c., रणप्रियः &c., युद्धेच्छुः -च्छुः -च्छु, युद्धकारी -रिणी -रि (न्), कलहकारी &c., रणकामी -मिनी &c., युद्धकामी &c.

PUGNACITY, *s.* युयुत्सा, युद्धेच्छा, युद्धप्रियता, कलहप्रियता, कलहेच्छा.

PUISNE, *a.* अवरः -रा -रं, अवरपदस्थः -स्था -स्थं, अवरजः -जा -जं.

PUISSANCE, *s.* पराक्रमः, विक्रमः, प्रभावः, ऐश्वर्य्यं, तेजस् *n.*, प्राबल्यं.

PUISSANT, *a.* पराक्रमी -मिणी -मि (न्), विक्रमी &c., पराक्रान्तः -न्ता -न्तं, विक्रान्तः &c., महाबलः -ला -लं, बलवान् -वती -वत् (त्), महाशक्तिः -क्तिः -क्ति, महाविक्रमः -मा -मं.

To PUKE, *v.n.* वम् (c. 1. वमति -मितुं), वमनं कृ, छर्द् (c. 10. छर्दयति -यितुं).

PUKE, *s.* वान्तिकारकम् औषधं, वान्तिकृत्, छर्दनकृत्.

PUKING, *s.* वान्तिः *f.*, वमनं, छर्दनं; *part.*, वमी -मिनी -मि (न्).

PULCHRITUDE, *s.* *See* BEAUTY.

To PULE, *v. n.* (Like a child) बालकवत् रु (c. 2. रौति, रवितुं), शिशुवत् रुद् (c. 2. रोदिति -तुं); 'like a chicken,' पक्षिशावकवत् कूज् (c. 1. कूजति -जितुं).

To PULL, *v. a.* or *n.* (Draw, drag) कृष् (c. 1. कर्षति, c. 6. कृषति -ते, क्रष्टुं, कर्ष्टुं), आकृष्, समाकृष्, परिकृष्, प्रतिकृष्, संकृष्, कर्षणं कृ.—(Pull forcibly) हृ (c. 1. हरति, हर्तुं), हरणं कृ.—(Pluck, gather by plucking) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), आदा (c. 3. -ददाति -दत्ते -दातुं), अङ्गुलिभिर् ग्रह् or आदा or चि or अवचि; 'to pull the hair,' केशग्रहं कृ, केशग्रहणं कृ, केशान् ग्रह्.—(Pull down) अपकृष्, अवकृष्, व्यपकृष्, पत् in caus., अधःपत्.—(Pull off) अपकृष्, अवकृष्, व्यपकृष्, उत्कृष्, अपहृ, व्यपहृ, अपनी, अवतृ in caus. (-तारयति -यितुं); 'he pulls off his clothes,' वस्त्रम् अवतारयति.—(Pull out) उत्कृष्, निष्कृष्, उद्धृ, निर्हृ, उत्पट् (c. 10. -पाटयति -यितुं), उत्खन् (c. 1. -खनति -नितुं), निर्णी in caus., उत्पाटनं कृ; 'the hair,' लुञ्च् (c. 1. लुञ्चति -ञ्चितुं), उल्लुञ्च्, अवलुञ्च्, विलुञ्च्, उत्पट्, केशोल्लुञ्चनं कृ, केशोत्पाटनं कृ.—(Pull towards) आकृष्, समाकृष्, प्रतिकृष्.—(Pull in pieces, pull in two) विदृ (c. 10. -दारयति -यितुं), अवदृ, विभिद्, विदलीकृ, खण्डशः कृ, खण्डं खण्डं कृ.—(Pull up) उत्पट्, उद्धृ, समुद्धृ, उच्छिद्, उत्खन्; 'by the roots,' उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, समूलं or आमूलम् उद्धृ.

PULL, *s.* कर्षणं, कृष्टिः *f.*, कर्षः, आकर्षः -र्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षणं.

PULLED, *p. p.* कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, आकर्षितः &c., आकृष्टः &c., अवकृष्टः &c., विकर्षितः &c., विकृष्टः &c., हृतः -ता -तं, गृहीतः -ता -तं; 'pulled by the hair,' केशगृहीतः &c., केशेषु गृहीतः; &c.; 'pulled off, as clothes, &c.,' अवतारितः -ता -तं; pulled out,' उत्कृष्टः -ष्टा -ष्टं, निष्कर्षितः &c., उद्धृतः &c., उत्पाटितः &c.; 'as the hair,' उल्लुञ्चितः &c.; 'pulled up,' उन्मूलितः -ता -तं, उत्पाटितः &c., उत्खातः &c., व्यपरोपितः &c.

PULLET, *s.* कुक्कुटीशावकः, कुक्कुटशावकः, पक्षिशावकः, पक्षिणीशावकः.

PULLEY, *s.* काष्ठान्तर्गतं क्षुद्रचक्रं, काष्ठान्तःस्थं सूक्ष्मचक्रं तच्च रज्जुसहितं भूत्वा कीलकोपरि परिवर्त्तते, कीलकोपरि परिवर्त्तमानं क्षुद्रचक्रं.

PULLING, *s.* कर्षणं, कृष्टिः *f.*, आकर्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षः -र्षणं उत्कर्षः, हरणं, ग्रहणं, अङ्गुलिग्रहणं; 'pulling the hair,' केशग्रहणं; 'mutual pulling of the hair,' केशाकेशि indec.; 'pulling up the hair,' केशलुञ्चनं, केशोल्लुञ्चनं.

To PULLULATE, *v. n.* (Germinate) स्फुट्, फुल्ल्, अङ्कुर्, विकस्.

PULLULATION, *s.* स्फुटनं, फुल्लतिः *f.*, फुल्लिः *f.*, उद्भेदः, विकसनं.

PULMONARY, PULMONIC, *a.* फुप्फुससम्बन्धी -न्धिनी -न्धि (न्), फुप्फुसनिष्ठ -ष्ठा -ष्ठं, फुप्फुसस्थः -स्था -स्थं, फुप्फुसीयः -या -यं.

PULP, *s.* मज्जा, मज्जा *m.* (न्), मज्जनं, सारः, गर्भः.—(Of fruit) फलसारः, फलगर्भः, फलस्य कोमलभागः or मृदुभागः.

PULPINESS, *s.* समज्जता, मज्जावत्त्वं, मज्जागुणकत्वं, कोमलता, मृदुता.

PULPIT, *s.* उपदेशासनं, उपदेशपीठं, धर्म्मोपदेशपीठं, पीठं, पुरोहितासनं धर्म्मोपदेशकासनं, धर्म्माध्यापकासनं, धर्म्माध्यापकपीठं.

PULPOUS, PULPY, *a.* मज्जागुणकः -का -कं, मज्जोपमः -मा -मं, मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं, मांसलः -ला -लं, मांसगुणकः -का -कं कोमलः -ला -लं, आर्द्रमृदुः -द्वी -दु, मृदुः &c.

To PULSATE, *v. n.* (Palpitate) स्पन्द्, स्फुर्, कम्प्, वेप्.

PULSATION, *s.* स्पन्दनं, प्रतिस्पन्दनं, स्पन्दितं, कम्पः -म्पनं, स्फुरणं, विष्पन्दः चलत्वं; 'of the heart,' हृदयस्पन्दनं, हृत्कम्पः; 'of an artery नाडिस्फुरणं, नाड्याघातः.

PULSE, *s.* (Of the blood or an artery) नाडिः -डी *f.*, नाली -लिः *f.* नाडीस्फुरणं, नालीस्फुरणं, नाडीस्पन्दनं, नाड्याघातः; 'feeling the pulse,' नाडीपरीक्षा; 'to feel the pulse,' नाडीपरीक्षां कृ.—(Leguminous plant) कलायः, सतीनः -नकः, सतीलः -ला -लकः सितीलकः, सातीलकः, सातिलकः, द्विदलं, त्रिपुटः, खण्डिकः, हरेणुः *m.* शमीधान्यं, वनसङ्कटः, धान्यवीरः, मुद्गः, वर्त्तुलः; 'pulse ground and fried,' वडा, वटकः,

PULVERABLE, *a.* क्षोदनीयः -या -यं, चूर्णनीयः &c., चूर्णीकरणयोग्यः &c

PULVERIZATION, *s.* चूर्णीकरणं, क्षोदीकरणं, चूर्णनं, सञ्चूर्णनं, क्षोदनं.

To PULVERIZE, *v. a.* चूर्ण् (c. 10. चूर्णयति -यितुं), संचूर्ण्, प्रचूर्ण्, विचूर्ण् चूर्णीकृ, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), प्रक्षुद्, संक्षुद्, क्षोदीकृ, पिष्, गुण्ठ &c. *See* *To* POUND, POWDER.

PULVERIZED, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, संचूर्णितः &c. चूर्णीभूतः -ता -तं, क्षोदितः -ता -तं, क्षोदीकृतः &c., पिष्टः -ष्टा -ष्टं, गुण्ठितः -ता -तं, गुण्डितः -ता -तं.

PULVERULENT, *a.* चूर्णमयः -यी -यं, पांशुलः -ला -लं. *See* POWDERY

PUMMEL, *s.* (Of a saddle) वङ्गा.

PUMP, *s.* जलोत्तोलनयन्त्रं, जलोत्तोलननाडिः -डी *f.*, जलोत्क्षेपणयन्त्रं, जलोत्क्षेपकयन्त्रं, जलोत्क्षेपकनाडी, जलोत्तोलनी, जलोत्क्षेपणी, जलनाडी, जलनाली; 'place where water is distributed,' प्रपा.

To PUMP, *v. a.* or *n.* नाडीद्वारेण जलम् उत्तुल् (c. 10. -तोलयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or जलोत्तोलनं कृ or जलोत्क्षेपणं कृ, जलनाडीं सञ्चल् (c. 10. -चालयति -यितुं), जलोत्तोलनयन्त्रं सञ्चल्.—(Interrogate artfully) सव्याजं प्रच्छ् or अनुप्रच्छ् or परिप्रच्छ्, प्रश्नेन परीक्ष् or अनुसन्धा.

PUMPKIN, *s.* कुष्माण्डः -ण्डा -ण्डी, कुष्माण्डकः, कूष्माण्डः -ण्डी -ण्डकः, अलाबूः *f.*, अलाबुः *f.*, आलाबुः *f.*, तुम्बी, कर्कारुः *m.*

PUN, *s.* श्लेषः, श्लेषोक्तिः *f.*, श्लेषवाक्यं, श्लेषालङ्कारः, द्व्यर्थवाक्यं, अर्थापत्तिः *f.*

To PUN, *v. n.* श्लेषोक्तिं कृ, श्लेषवाक्यं वद् (c. 1. वदति -दितुं)

PUNCH, *s.* (Instrument for perforating) वेधनी, वेधनिका.—(Thrust, blow) आघातः, अभिघातः, प्रहारः; 'with the elbow,' कफोणिः

-ला, कीलाघातः, अरत्निप्रहारः.—(Kind of drink) शर्करादिमिश्रितं मद्यमक्षीरादिरसमयं पानीयं.—(In a puppet show) पुत्तलिकाक्रीडायां वैहासिकः or विदूषकः.

To Punch. *v. a.* (Pierce with a punch) पूर्वोक्तयन्त्रेण व्यध्.—(With the elbow) अरत्निना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्तुं), अरत्निं प्रसार्य्य तड्, कीलाघातं कृ.

Puncheon, *s.* (Instrument), *see* Punch.—(A measure), *see* Cask.

Punchy, *a.* ह्रस्वस्थूलः -ला -लं स्थूलह्रस्वः -स्वा -स्वं, घनह्रस्वः &c.

Punctilio, *s.* सूक्ष्मविषयः, सूक्ष्मविधिः *m.*, सूक्ष्मनियमः, सूक्ष्मता, अतिसूक्ष्मता, सौक्ष्म्यं, अतिसौक्ष्म्यं, शिष्टाचारसौक्ष्म्यं, सभ्याचारसूक्ष्मता.

Punctilious, *a.* अतिसूक्ष्मदृष्टिः -ष्टिः -ष्टि, अतिसूक्ष्मदर्शी -र्शिनी -र्शि (न्), अतिसूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मोपचारदर्शी, सूक्ष्माचारनिष्ठः -ष्ठा -ष्ठं, अतिसूक्ष्माचारी &c., सूक्ष्मनियमनिष्ठः &c., सूक्ष्मोपचारनिष्ठः &c., सूक्ष्मोपचारशीलः -ला -लं, सूक्ष्मादरनिष्ठः &c., सूक्ष्मनियमी &c., नियमनिष्ठः &c., सदाचारी &c.

To reduce, *v. a.* (Bring to a former state) पूर्ववत् कृ, पूर्वावस्थां or पूर्वस्थितिं नी (c. 1. नयति, नेतुं) or आनी or गम् in caus.—(Bring to any state) नी, आनी, गम् in caus. (गमयति -यितुं), कृ in comp.; 'to reduce to proverty,' दारिद्र्यं गम्, दरिद्रीकृ; 'to subjection,' वशीकृ; 'to one's own power,' स्ववशीकृ, आत्मसात्कृ; 'to ashes,' भस्मसात्कृ, भस्मीकृ; 'to a heap of ashes,' भस्मराशीकृ; 'to nothing,' निष्किञ्चनीकृ. Or expressed by आपन्न or सम्पन्न in comp.; as, 'to reduce to poverty,' दारिद्र्यापन्नं -न्नां कृ.—(Diminish, lower) न्यूनीकृ, अल्पीकृ, लघूकृ, ऊनीकृ, न्यून् (c. 10. न्यूनयति -यितुं), ऊन्, ह्रस् (c. 10. ह्रासयति -यितुं), लघ (nom. लघयति -यितुं), कन् (c. 10. कनयति -यितुं), शिथिलीकृ; 'to reduce one's strength,' बलं or वीर्यं शिथिलीकृ.—(Make thin) कृशीकृ, क्षीणीकृ, मांसक्षयं कृ, क्षि in caus. (क्षपयति -यितुं), शुष्कीकृ.—(Subdue) वशीकृ, पराजि, विजि, जि, अवग्रह्.—(In arithmetic) रूपान्तरं कृ, रूपं दा or कृ.—(Reduce to order), *see To* methodize, arrange.

Reduced, *p. p.* (Brought to a former state) पूर्ववत्कृतः -ता -तं, पूर्ववद्भूतः &c., पूर्वावस्थाङ्गतः &c., पूर्वदशाङ्गमितः &c., पूर्वस्थितिङ्गतः &c.—(Brought to any state) गमितः -ता -तं, परिगमितः &c., गतः -ता -तं, कृतः &c. in comp. भूतः &c. in comp.; 'reduced to poverty,' दारिद्र्यगतः -ता -तं, दारिद्र्यङ्गतः &c., दरिद्रीकृतः &c., दरिद्रीभूतः &c., गतधनः -ना -नं, गतविभवः -वा -वं, प्रचलितविभवः &c., शिथिलवसुः -सुः -सु, *see* Poverty; 'reduced to misery,' कृच्छ्रगतः -ता -तं, कृच्छ्रङ्गमितः &c.; 'reduced to ashes,' भस्मीकृतः &c., भस्मीभूतः &c., भस्मसात्कृतः &c.; 'to powder,' चूर्णीकृतः &c.; 'to nothing,' निष्किञ्चनः -ना -नं.—(Brought into subjection) वशीकृतः -ता -तं, वशीभूतः &c.—(Diminished, lowered) न्यूनीकृतः -ता -तं, न्यूनीभूतः &c., अल्पीकृतः &c., लघूकृतः &c., शिथिलीकृतः &c., शिथिलितः &c.; 'in strength of body,' शिथिलबलः -ला -लं, क्षीणबलः &c., विकलबलः &c., क्षीणः &c., कृशः -शा -शं.

Reducible, *a.* आनेयः -या -यं, आनेतव्यः -व्या -व्यं, करणीय in comp.; as, 'reducible to a former state,' पूर्ववत्करणीयः &c.; 'to ashes,' भस्मसात्करणीयः &c., भस्मीकरणीयः &c.

Reduction, *s.* (Bringing to any state) करणं in comp.; as, 'reduction to ashes,' भस्मीकरणं; 'to powder,' चूर्णीकरणं.—(Diminution, impairment) न्यूनीकरणं, न्यूनता -त्वं, अल्पीकरणं, लघूकरणं, ऊनीकरणं, ह्रासः, वैकल्यं, विकलीकरणं, शिथिलीकरणं, शैथिल्यं.—(Subjugation) वशीकरणं, [illegible], अवग्रहणं.—(In arithmetic) रूपान्तरं, रूपान्तरकरणं.

Redundance, redundancy, *s.* आधिक्यं, अधिकता -त्वं, अतिरेकः, उद्रेकः, आतिरेक्यं, अतिरिक्तता, आतिशय्यं, उत्सेकः, उद्वर्त्तः, गाढता. *See* Excess, Exuberance.

Redundant, *a.* अधिकः -का -कं, अतिरिक्तः -क्ता -क्तं, उद्रिक्तः &c., समतिरिक्तः &c., अतिशय in comp., अतिशयितः -ता -तं, अतिशयी -यिनी &c., अतिशायनः -ना -नं, अत्ययनः -ना -नं, व्यर्थः -र्था -र्थं, उत्सिक्तः &c., उद्वर्त्तः -र्त्ता -र्त्तं, गाढः -ढा -ढं. *See* Excessive, Exuberant.

Redundantly, *adv.* अतिरिक्तं, उद्रिक्तं, अतिशयेन, सातिशयं, व्यर्थं.

To reduplicate, *v. a.* (Double) द्विगुणीकृ.—(A syllable or letter) आम्रेड् (c. 10. -म्रेडयति -यितुं), अक्षराम्रेडनं कृ, अक्षराभ्यासं कृ, अक्षरद्वित्वं कृ, द्विरुक्तिं कृ.

Reduplicated, *p. p.* आम्रेडितः -ता -तं, अभ्यस्तः -स्ता -स्तं, द्विरुक्तः -क्ता -क्तं.

Reduplication, *s.* आम्रेडनं, आम्रेडितं, द्विरुक्तिः *f.*; 'of a letter, द्वित्वं; 'the reduplicated syllable,' अभ्यासः; 'word formed by reduplication,' प्रतिशब्दः. Reduplication is denoted by the symbol द्वि.

Red-wood, *s.* (Kind of red sandal) पत्राङ्गं, रक्तचन्दनं.

To re-echo, re-echoing, *see To* echo, echoing.

Reed, *s.* नलः, नडः, वेत्रं -त्रः, वेतसः -सी, वेणुः *m.*, वंशः, शरः, धमन-नालः -ली, नाडिः -डी *f.*, कीचकः, तृणं, तृणध्वजः, तृणकेतुः, पोटगलः, कुक्षिरन्ध्रः, छिद्रान्तरः, खेखीरकः, त्वक्सारः, शतपर्वा (न्), मस्करः; 'leaf of a reed,' वेतसपत्रं; 'reed-mat,' नलपट्टिका. 'reed for writing, reed pen,' कलमः, लेखनी, आलेखनी.

Reedy, *a.* (Abounding with reeds) वेत्रकीयः -या -यं, वैत्रकः -की -कं, वेत्रवान् -वती -वत् (त्), वेत्रमयः -यी -यं, वेत्रपूर्णः -र्णा -र्णं नडकीयः -या -यं, नडमः -मा -मं, नड्वलः -ला -लं, नलमयः -यी -यं वेतस्वान् -स्वती -स्वत् (त्), वेतसपूर्णः -र्णा -र्णं, शरमयः &c.—(Sounding like a reed) कीचकस्वरः -रा -रं.

Reef, *s.* (Of a sail) वातवसनपुटः, नौकावसनपुटः.—(Of rocks) समुद्रमध्ये शैलसेतुः *m.* or शैलश्रेणी or शैलपंक्तिः *f.*

To reef, *v. a.* वातवसनानि संहृ (c. 1. -हरति -हर्तुं) or संवृ or सम्पुटीकृ.

Reefy, *a.* शैलसेतुपूर्णः -र्णा -र्णं, शैलश्रेणीपूर्णः -र्णा -र्णं.

Reek, *s.* वाष्पः, उष्णवाष्पः, तप्तजलवाष्पः, धूमः -मिका, मेनः, स्वेदः.

To reek, *v. n.* वाष्प (nom. वाष्पायते), वाष्पम् उद्गॄ or उत्क्षिप् or उद्गम् in caus. or मुच्, वाष्पोद्गतिं कृ, वाष्पोद्गारं कृ, धूम (nom. धूमायते).

Reeking, reeky, *a.* वाष्पायमानः -ना -नं, वाष्पोद्गारी -रिणी &c., वाष्पमयः -यी -यं, वाष्पार्द्रः -र्द्रा -र्द्रं, आर्द्रः &c., धूममयः -यी -यं, धूमायमानः -ना -नं.

Reel, *s.* (For winding thread) आवापनं.—(Lively dance) लघुनृत्यं.—(Movement on one side) विचलनं, चलनं.

To reel, *v. n.* विचल् (c. 1. -चलति -लितुं), सञ्चल्, चल्, इतस्ततो विचल्, एकपार्श्वे पत् in des. (पिपतिषति -षितुं, पित्सति -त्सितुं).

To re-enforce, *s.* बलाधिक्यं कृ, सेनाधिक्यं कृ. *See* Re-inforce.

To re-enter, *v. a.* पुनः प्रविश् (c. 6. -विशति -वेष्टुं), पुनर् आगम्.

To RE-ESTABLISH, *v. a.* पुनः स्था in caus. (स्थापयति -यितुं) or प्रतिष्ठा, पुनः संस्था.

REFECTION, *s.* अल्पाहारः, लघुभोजनं, अल्पभोजनं, लघ्वाहारः, आहारः, उपहारः, अल्पान्नखादनं, श्रमापहारः, श्रमपरिच्छेदः, क्लमपरिच्छेदः, शरीराप्यायनं.

REFECTORY, *s.* उपहारगृहं, उपहारशाला, आहारशाला, भोजनशाला.

To REFER, *v. a.* (Deliver over, consign to another for decision) निष्पादनार्थं परस्मिन् समृ in caus. (-अर्पयति -यितुं) or ऋ or निक्षिप् or न्यस् or परस्मै प्रतिपद् in caus.—(Leave to the decision of another) परविचारं प्रार्थयित्वा कार्यं or अर्थं त्यज् (c. 1. त्यजति, त्यक्तुं) or अपास् (c. 4. -अस्यति -सितुं) or विसृज् (c. 6. -सृजति -स्रष्टुं) or अवसृज् or मुच् or अवमुच् or हा.—(Assign) आरुह् in caus. (-रोपयति-यितुं), समारुह्, अध्यारुह्, अभिसम्बन्ध् (c. 9. -बध्नाति-बन्द्धुं), सम्बन्ध्.

To REFER, *v. n.* (Have reference) अपेक्ष् (c. 1. -ईक्षते -क्षितुं), अवेक्ष्, प्रतीक्ष्, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, निर्दिश्, अभिसम्बन्ध् in pass. (-बध्यते), सम्बन्ध् in pass.—(Allude) उद्दिश्, समुद्दिश्, सूच् (c. 10. सूचयति -यितुं).

REFERABLE, *a.* आरोपणीयः -या -यं, समारोपणीयः &c., अध्यारोपणीयः &c., समर्पणीयः -या -यं, अर्पणीयः &c., सम्बन्धनीयः -या -यं, अभिसम्बन्धनीयः -या -यं, सम्बन्धीयः -या -यं.

REFEREE, *s.* मध्यस्थः, प्रमाणपुरुषः, स्थेयः, निर्णेता *m.* (तृ), विचारकृत्.

REFERENCE, *s.* (Directing or consigning to another for information, &c.) समर्पणं, अर्पणं, प्रतिपादनं, निवेदनं, आरोपणं, समारोपणं, आरोपः.—(Relation, regard, allusion) अपेक्षा, अवेक्षा, प्रतीक्षा, उद्देशः, समुद्देशः, सम्बन्धः, अभिसम्बन्धः, अन्वयः, समन्वयः, विषयत्वं -ता, विषयः, सम्पर्कः, गोचरत्वं -ता; 'containing a reference,' सापेक्षः -क्षा -क्षं; 'in reference to,' अपेक्षया, अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, उद्देशेन, समुद्दिश्य, सापेक्षं.

REFERRED, *p. p.* (Consigned or directed to another) परसमर्पितः -ता -तं, परप्रतिपादितः &c., परनिवेदितः &c., अर्पितः &c., प्रस्थापितः &c.—(Assigned) आरोपितः -ता -तं, समारोपितः &c., अध्यारोपितः &c., अभिसम्बद्धः -द्धा -द्धं, निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः &c.

REFERRIBLE, *a.* आरोपणीयः -या -यं. *See* REFERABLE, *a.*

To REFINE, *v. a.* (Purify) शुध् (c. 10. शोधयति -यितुं), संशुध्, विशुध्, शुद्धीकृ, शोधनं कृ, विमलीकृ, निर्मलीकृ, पवित्रीकृ, विमल (nom. विमलयति -यितुं), मलं हृ or अपनी.—(Make elegant or polite, polish) परिष्कृ, संस्कृ, शिष्टीकृ, शिष्टं -ष्टां कृ, सभ्यं -भ्यां कृ, शिष्टतां or सभ्यतां जन् (c. 10. जनयति -यितुं) or दा, सूक्ष्मीकृ.

To REFINE, *v. n.* (Become pure) शुध् (c. 4. शुध्यति -ते, शोद्धुं), संशुध्, विशुध्, शुद्धीभू, विमलीभू.—(Be over nice) अतिसूक्ष्मीभू, अतिसूक्ष्मतां सेव्.

REFINED, *p. p.* (Purified) शोधितः -ता -तं, संशोधितः &c., शुद्धः -द्धा -द्धं, संशुद्धः &c., विशोधितः &c., शुद्धीकृतः &c., विमलीकृतः &c., निर्मलीकृतः &c., हृतमलः -ला -लं, पवित्रीकृतः &c.—(Polished) परिष्कृतः -ता -तं, संस्कृतः &c., शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, सभ्यतापन्नः -न्ना -न्नं, सभ्यतासम्पन्नः &c.—(Nice, over nice) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः &c.

REFINEMENT, *s.* (Act of purifying) शोधनं, संशोधनं, विशोधनं, शुद्धीकरणं, शोधः.—(Purity) शुद्धिः *f.*, संशुद्धिः *f.*, विशुद्धिः *f.*, शोधितत्वं, शुद्धता -त्वं, पवित्रता, *see* PURITY.—(Act of polishing) परिष्कारः, परिष्कृतिः *f.*, परिष्करणं, संस्कारः, संस्कृतिः *f.*, संस्करणं, सभ्यकरणं, शिष्टकरणं.—(State of being polished, elegance) शिष्टता -त्वं, सभ्यता -त्वं, परिष्कारः, परिष्कृतत्वं, सुजनता, सौजन्यं; 'of manners,' शिष्टाचारत्वं, सभ्याचारत्वं, सभ्याचारसम्पन्नता, शिष्टाचारसम्पन्नता, सभाचातुर्यं, सुशीलता, सुनीतिः *f.*, विनयः; 'of mind,' मनःशुद्धिः *f.*, चित्तशुद्धिः *f.*—(Nicety, over nicety) सूक्ष्मता, अतिसूक्ष्मता, सौक्ष्म्यं, अतिसौक्ष्म्यं.

REFINER, *s.* शोधकः, संशोधकः, शोधयिता *m.* (तृ), मलापहारकः.—(Of metals) धातुशोधकः, धातुमलहारी *m.* (न्), धातुकलङ्कहारी *m.*

REFINING, *s.* (Of metals) धातुशोधनं, धातुमलापहारः, धातुकलङ्कहरणं.

To REFIT, *v. a.* प्रतिसंकृ, प्रतिकृ, समाधा, प्रतिसमाधा, जीर्णोद्धारं कृ, जीर्णसमाधानं कृ, पुनः कृप् or परिकृप्, पुनः सज्जीकृ, पुनः समायुज्. *See* To REPAIR.

To REFLECT, *v. a.* (Throw back, cause to return, as a mirror, &c.) प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) प्रतिहन् (c. 2. -हन्ति -न्तुं), पराहन्, परावृत् in caus. (-वर्त्तयति -यितुं), प्रत्यावृत्, परावर्त्तनं कृ, प्रतिक्षेपं कृ, प्रतिबिम्ब (nom. प्रतिबिम्बयति -यितुं), बिम्ब, प्रतिबिम्बितं -तां कृ, प्रतिबिम्बं कृ, प्रतिमूर्त्तिं कृ, प्रतिरूपं कृ; 'a body which reflects all the rays of light,' पदार्थो यस्मात् सर्व्वकिरणाः परावर्त्तन्ते or परावर्ज्जन्ति, पदार्थो यः सर्व्वकिरणान् परावर्त्तयति; 'a lake which reflects the stars,' ताराप्रतिबिम्बं सरस्, ताराछायं सरस्; 'the mirror reflects the image,' दर्पणो मूर्त्तिबिम्बं प्रतिक्षिपति, दर्पणो मूर्त्तिं प्रतिबिम्बयति, दर्पणो मूर्त्तिप्रतिबिम्बं करोति.

To REFLECT, *v. n.* (In the mind, consider) चिन्त् (c. 10. चिन्तयति -यितुं), संचिन्त्, विचिन्त्, मनसा विचर् (c. 10. -चारयति -यितुं), ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, संध्यै, अभिध्यै, विमृश् (c. 6. -मृशति -म्रष्टुं), परिमृश्, वितर्क् (c. 10. -तर्कयति -यितुं), अनुतर्क्, तर्क्, भू (c. 10. भावयति -यितुं), विभू, सम्भू, मनसा विगण् (c. 10. -गणयति -यितुं), समाधा (c. 3. -धत्ते -धातुं), निरूप् (c. 10. -रूपयति -यितुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), समवेक्ष्, समीक्ष्, प्रसमीक्ष्, मन् (c. 4. मन्यते, मन्तुं), चिन्तां कृ, विचारणां कृ.—(Bring reproach or censure upon) तिरस्कारम् आवह्, कलङ्कं or दोषं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), यशोहानिं or कीर्त्तिहानिं or कलङ्कम् आवह्, यशो or कीर्त्तिं न्यूनीकृ.

REFLECTED, *p. p.* (Thrown back as in a mirror, &c.) प्रतिबिम्बितः -ता -तं, बिम्बितः &c., बिम्बागतः &c., बिम्बगतः &c., प्रतिहतः &c., प्रतिक्षिप्तः -प्ता -प्तं, परावर्त्तितः -ता -तं, पराहतः &c., प्रतिफलितः &c., संक्रान्तः -न्ता -न्तं; 'reflected in water,' जलप्रतिबिम्बितः -ता -तं; 'to be reflected,' परावृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रतिहन् in pass. (-हन्यते); 'the rays of the sun are reflected,' सूर्य्यकिरणाः परावर्त्तन्ते; 'it is seen by reflected light,' परावृत्तकिरणैर् विलोक्यते; 'reflected image,' प्रतिबिम्बं, बिम्बः -म्बं, प्रतिच्छाया, छाया, प्रतिच्छन्दः -न्दकं, प्रतिफलनं; 'reflected light,' प्रतिभा.

REFLECTING, *part.* or *a.* (Throwing back as a mirror, &c.) परावर्त्तनकारी -रिणी -रि (न्), प्रतिबिम्बकारी &c., बिम्बप्रतिक्षेपकः -का -कं, प्रतिक्षेपकः &c., परावर्त्तकः &c.; 'a lake reflecting the stars,' ताराप्रतिबिम्बं सरस्, ताराछायं सरस्.—(Given to meditation) चिन्ताशीलः -ला -लं, ध्यानशीलः &c., विचारशीलः &c., चिन्तयन् -यन्ती -यत् (त्), चिन्तावान् &c. *See* MEDITATIVE.

REFLECTION, *s.* (Act of throwing back) प्रतिक्षेपः -पणं, प्रतिहतिः *f.*, परावर्त्तनं, प्रतिबिम्बकरणं, संक्रान्तिः *f.*; 'reflection of rays of light,' किरणपरावर्त्तनं; 'the angle of reflection,' परावर्त्तनकोणः.—(That which is reflected, image &c. reflected) प्रतिबिम्बं, बिम्बं -म्बः, प्रतिच्छाया, छाया, छायात्मा *m.* (न्), प्रतिभासः, आभासः,

प्रतिमा, प्रतिरूपं, प्रतिमूर्त्तिः f., प्रतिफलं -लनं, प्रतिकृतिः f.; 'reflection of the moon,' प्रतिमेन्दुः m.—(Consideration, thought) चिन्ता -न्तनं, सुचिन्ता, विचारः, विचारणं -णा, विमर्शः, ध्यानं, आध्यानं, अभिध्यानं, अनुध्यानं, चर्चा, समाधिः m., समाधानं, भावना, सम्भावना, चिन्तितं, चिन्तितिः f., चिन्तिया.—(Reproach, censure) कलङ्कः, कीर्त्तिहानिः f., यशोहानिः f.

Reflector, s. (Something polished for reflecting) प्रतिबिम्बातः, आदर्शः, दर्शनं, दर्पणः.—(One who considers) विचारकृत् m., विचारकः, चिन्ताकारी m. (न्).

Reflexibility, s. परावर्त्तनीयता, परावर्त्तनयोग्यता, प्रतिबिम्बयोग्यता.

Reflexible, a. परावर्त्तनीयः -या -यं, परावर्त्तनक्षमः -मा -मं, परावर्त्तनयोग्यः &c., प्रतिबिम्बयोग्यः &c., प्रतिक्षेपणीयः -या -यं, प्रतिहननीयः -या -यं.

Reflexive, a. पूर्व्वापेक्षकः -का -कं, पूर्व्वोद्देशकः &c., पूर्व्वप्रतीक्षकः &c.

Refluent, a. परावर्त्ती -र्त्तिनी -र्त्ति (न्), पश्चात्प्रवाही &c., विपरिवर्त्ती &c.

Reflux, refluence, s. पश्चाद्वेला, विपरीतवेला, पश्चात्प्रवाहः, विपरीतप्रवाहः, वेलाया विपरीतगतिः f., वेलापरावर्त्तः -र्त्तनं, वेलापरिवर्त्तनं, वेलाविपरिवर्त्तनं.

To reform, v. a. (Cause to cease from wickedness, bad conduct, &c.) पापात् or दुष्कर्म्मणो निवृत् (c. 10. -वर्त्तयति -यितुं) or विनिवृत् or परावृत् or परिवृत् or विरम् (c. 10. -रमयति -यितुं), अधर्म्मात् or कुकर्म्मणो निवर्त्तयित्वा धर्म्मे प्रवृत् in caus. or नियुज् in caus., पापाद् विप्रतिसृ in caus. (-सारयति -यितुं), विप्रतिसारं जन्, पापनिवर्त्तनं कृ, पापपरिवर्त्तनं कृ, निवृत्तपापं -पां कृ; 'to reform a bad habit,' दोषनिवर्त्तनं कृ, दोषखण्डनं कृ.—(Amend, correct) शुध् (c. 10. शोधयति -यितुं), विशुध्, समाधा, प्रतिसमाधा, प्रतिकृ प्रतिसंकृ. *See To* rectify.

To reform, v. n. (Cease from bad conduct and return to good) पापात् or दुष्कर्म्मणो निवृत् (c. 1. -वर्त्तते -र्त्तितुं) or विनिवृत् or परावृत् or विरम् (c. 1. -रमति -रन्तुं), अधर्म्मात् or कुकर्म्मणो निवृत्य धर्म्मप्रवृत्तिं कृ or धर्म्मे प्रवृत्, पापाद् विप्रतिसृ (c. 1. -सरति -सर्त्तुं) विप्रतिसारं कृ, विप्रतीसारं कृ, निवृत्तपापः -पा -पं भू, पापत्यागं कृ, पापपरित्यागं कृ, दोषत्यागं कृ, त्यक्तपापः -पा -पं भू, त्यक्तदोषः -षा -षं भू.

Reform, reformation, s. पापनिवर्त्तनं, दोषनिवर्त्तनं, पापनिवृत्तिः f., दोषनिवृत्तिः f., निवर्त्तनं, निवृत्तिः f., परिवर्त्तनं, परिवृत्तिः f., विनिवर्त्तनं, पापत्यागः, दोषत्यागः, दोषपरित्यागः, दोषखण्डनं, दोषपरिच्छेदः, दोषच्छेदः, दोषप्रतिकारः, दोषप्रतीकारः, दोषशोधनं, दोषसमाधानं, प्रतिसमाधानं, विप्रतिसारः, विप्रतीसारः, शोधनं.—(Of religion) धर्म्मपरिवर्त्तनं, दुष्टधर्म्मपरिवर्त्तनं, धर्म्मपरिवृत्तिः f., दूषितधर्म्मशोधनं, धर्म्मशोधनं.

Reformed, p. p. निवृत्तपापः -पा -पं, निवृत्तदोषः -षा -षं, त्यक्तपापः &c., त्यक्तदोषः &c., गतपापः &c., गतदोषः &c., विगतदोषः &c., हृतदोषः &c., गतमायः -या -यं, विरतपापः &c., विनिवृत्तपापः &c., खण्डितदोषः &c., छिन्नदोषः &c., शोधितः -ता -तं, शुद्धः -द्धा -द्धं, विशोधितः &c., जातविप्रतीसारः -रा -रं, कृतविप्रतीसारः &c.

Reformer, s. निवर्त्तकः, पापनिवर्त्तकः, पापनिवृत्तिकर्त्ता m. (र्तृ), दोषनिवर्त्तकः, दोषखण्डकः, दोषच्छेदकः, दोषहारी m. (न्), शोधनकारी m., शोधकः.—(Of religion) धर्म्मशोधकः, दूषितधर्म्मशोधकः.

To refract, v. a. वक्रीकृ, गतिवक्रतां कृ, वक्रगतिं कृ; 'to refract rays of light,' किरणवक्रतां कृ.

Refracted, p. p. वक्रीभूतः -ता -तं, वक्रीकृतः &c.; 'to be refracted,' वक्रीभू; 'the rays are refracted downwards,' अधो वक्रीभवन्ति किरणाः.

REF

Refraction, s. किरणवक्रता, किरणवक्रीभावः, किरणवक्रीभवनं, किरणवक्रगतिः f., किरणवक्रीकरणं.

Refractoriness, s. प्रतीपता -त्वं, विप्रतीपता, अवश्यता, दुःशास्यता, अविनेयता, दुःसाध्यता, दुर्दान्तता, अविधेयता, दुर्निग्रहता, अनायत्तता.

Refractory, a. प्रतीपः -पा -पं, विप्रतीपः &c., प्रतीपकारी -रिणी -रि (न्), विपरीतकारी &c., अवश्यः [illegible] -श्यं, दुःशास्यः -स्या -स्यं, दुःशासनः -ना -नं, अविनेयः -या -यं, अविधेयः &c., दुर्निग्रहः -हा -हं, दुःसाध्यः -ध्या -ध्यं, अनिवार्य्यः -र्य्या -र्य्यं, उल्लंघितशासनः -ना -नं. *See* Intractable, Perverse; 'to be refractory,' प्रतीप (nom. प्रतीपायते), प्रतीपीभू.

Refragable, a. खण्डनीयः -या -यं, खण्ड्यः -ण्ड्या -ण्ड्यं, खण्डितव्यः &c.

To refrain, v. a. (Restrain) यम्, नियम्, विनियम्, संयम्, निग्रह्, निरुध्, अवरुध्, संहृ, वृ, निवृ, निषिध्, निवृत् in caus.

To refrain, v. n. (Forbear, restrain one's self) निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. c., विरम् (c. 1. -रमति -रन्तुं) with abl. c., आत्मानं यम् (c. 1. यच्छति, यन्तुं) or संयम्, परिहृ (c. 1. -हरति -हर्त्तुं) with acc., वृज् (c. 10. वर्ज्जयति -यितुं) with acc., परिवृज्, विवृज्, प्रोज्झ्, त्यज्, हा; 'he should refrain from eating flesh,' निवर्त्तेत मांसभक्षणात् or मांसं वर्ज्जयेत्.

Refrangible, a. वक्रीकरणीयः -या -यं, वक्रीभवनीयः &c., वक्रताक्षमः &c.

To refresh, v. a. (Invigorate, relieve from fatigue) क्लान्तिं or श्रमं हृ (c. 1. हरति, हर्त्तुं), श्रमापहारं कृ, क्लान्त्यपहारं कृ, क्लान्तिच्छेदं कृ, श्रमच्छेदं कृ, विश्रान्तिं दा, आप्यै (c. 10. -प्याययति -यितुं), समाप्यै, बलं or तेजो or सत्त्वं वृध् (c. 10. वर्धयति -यितुं), सत्त्वं or वीर्य्यं दा.—(Revive, cheer) आश्वस् (c. 10. -श्वासयति -यितुं), प्रत्याश्वस्, पुनराश्वस्, पुनर् जीव् (c. 10. जीवयति -यितुं), पुनर्जीवनं दा, सुख् (c. 10. सुखयति -यितुं), आनन्द् in caus., हृष् in caus., ह्लाद् in caus.—(Cool) शीतल (nom. शीतलयति -यितुं), शीतलीकृ, निर्वा in caus. (-वापयति -यितुं), निर्वापनं कृ.—(Make new or fresh) नवीकृ.

Refreshed, p. p. (Relieved from fatigue) हृतक्लान्तिः -न्तिः -न्ति, हृतश्रमः -मा -मं, हृतक्लमः &c., अपहृतक्लान्तिः &c., अपहृतश्रमः &c., गतक्लमः &c., गतश्रमः &c., विगतश्रमः &c., छिन्नक्लान्तिः &c., छिन्नश्रमः &c., विश्रान्तः -न्ता -न्तं, विक्लान्तः -ना -नं, आप्यायितः -ता -तं.—(Revived, cheered) आश्वासितः &c., समाश्वासितः &c., प्रत्याश्वस्तः -स्ता -स्तं, आनन्दितः -ता -तं, अनुभूतसुखः -खा -खं.—(Cooled) शीतलीकृतः -ता -तं, निर्वापितः &c.—(Made fresh) नवीकृतः -ता -तं.

Refreshing, a. क्लान्तिहरः -रा -रं, क्लान्तिहारकः -का -कं, श्रान्तिहरः &c., श्रमहारी -रिणी -रि (न्), श्रमापहारी &c., श्रमापहः -हा -हं, क्लान्त्यपहः &c., श्रान्त्यपहः &c., क्लान्तिच्छिद् m. f. n., विश्रान्तिदः -दा -दं, श्रमच्छेदकः -का -कं, आप्यायकः -का -कं, आश्वासकः &c., आनन्ददः -दा -दं, बलवर्धकः &c., निर्वापकः &c.

Refreshment, s. (Act of refreshing) श्रमापहारः, श्रमापहरणं, क्लान्तिहरणं, क्लान्त्यपहारः, क्लान्त्यपहरणं, क्लान्तिच्छेदः, श्रमच्छेदः, श्रान्तिच्छेदः, आप्यायः -यनं, विश्रान्तिदानं, बलवर्धनं, सत्त्ववर्धनं, सत्त्वदानं, आश्वासनं, विक्लापनं.—(State) विश्रान्तिः f., विश्रामः, विक्लान्तिः f., विक्लान्तता.—(Food, slight repast) उपाहारः, लघुभोजनं, लघ्वाहारः, अल्पाहारः, आहारः.

Refrigerant, a. तापहरः -रा -रं, सन्तापहरः &c., दाहहरः &c., दाहनाशकः -का -कं, शीतलकारी -रिणी -रि (न्), निर्वापकः -का -कं.

Refrigerant, s. (Medicine) निर्वापनं, दाहहारकं, तापनाशकम् औषधं.

To refrigerate, v. a. तापं or दाहं हृ (c. 1. हरति, हर्त्तुं) or नश्

(c. 10. नाशयति [illegible]), शीतलीकृ, शीतल (nom. शीतलयति -यितुं), निर्वा in caus. (-[illegible]यति -यितुं).

REFRIGERATION, *s.* निर्वा[illegible], निर्वाणं, तापहरणं, दाहहरणं, शीतलीकरणं.

REFUGE, *s.* (Shelter, protection) आश्रयः, समाश्रयः, आश्रयणं, संश्रयः, शरणं, आशयः, अयणं, [illegible], गतिः *f.*, अवस्थानं, त्राणं.—(That which shelters, [illegible] protection) आश्रयः, शरणं, संश्रयः, आश्रयभूतः -ता -[illegible], शर[illegible]भूतः -ता -तं, आश्रयस्थानं, शरण्यं, शरण्युः *m.*, पालकः, रक्षकः.—(Resource, expedient) गतिः *f.*, आश्रयः, उपायः, युक्तिः *f.*; 'to take refuge,' आश्रि (c. 1. -श्रयति -यितुं), समाश्रि, संश्रि, उपाश्रि, समुपाश्रि, शरणार्थं गम् (c. 1. गच्छति, गन्तुं) or आगम् or उपे (c. 2. उपैति -तुं, rt. इ), अवलम्ब् (c. 1. -लम्बते -म्बितुं), आश्रयणं कृ; 'having but one refuge,' अनन्यगतिः -तिः -ति, अनन्यगतिकः -का -कं; 'come for refuge,' शरणागतः -ता -तं, शरणार्थम् आगतः &c., शरणापन्नः -न्ना -न्नं, प्रपन्नः &c.; 'seeking refuge,' शरणार्थी -र्थिनी &c., शरणैषी &c.; 'one who affords refuge,' शरणापकः.

REFUGEE, *s.* शरणागतः, शरणार्थम् आगतः, शरणार्थी *m.* (न्), शरणैषी *m.* (न्), शरणार्थम् आश्रितः, अवलम्बी *m.* (न्), अवलम्बितः, प्रपन्नः; 'protector of refugees, kind to them,' शरणागतपालकः, शरणागतवत्सलः, प्रपन्नपालः -लकः.

REFULGENCE, *s.* प्रतापः, अतितेजस् *n.*, महातेजस् *n.*, उज्ज्वलता, अतिप्रभा, विभा.

REFULGENT, *a.* प्रतापवान् -वती -वत् (त्), अतिप्रतापी -पिनी -पि (न्), सुप्रभः -भा -भं, उज्ज्वलः -ला -लं, द्योती &c., विभ्राजमानः -ना -नं. *See* SPLENDID, BRIGHT.

To REFUND, *v. a.* प्रतिदा (c. 3. -ददाति -दातुं), पुनर् दा or प्रदा or प्रयम्.

REFUSAL, *s.* (Denial of a thing demanded) प्रत्याख्यानं, प्रत्यादेशः, अपह्नवः, अपह्नुतिः *f.*, अपलापः, निरसनं, निरासः, निराकरणं, निराकृतिः *f.*, अपवादः, निह्नवः, निह्नुतिः *f.*, निषेधः, प्रतिषेधः, व्यपाकृतिः *f.*, प्रणयविहतिः *f.*—(Declining to accept) अग्रहणं, अप्रतिग्रहः, अपरिग्रहः, अस्वीकारः, अस्वीकरणं, अनङ्गीकारः, अनङ्गीकरणं, निरसनं, निराकरणं, अननुज्ञानं.—(Of a lover) अवधीरणं -णा, धीरता -त्वं.—(Right of buying or taking in preference) पूर्व्वक्रयाधिकारः, पूर्व्वग्रहणाधिकारः.

To REFUSE, *v. a.* (Deny a request or demand, decline to do what is asked) प्रत्याख्या (c. 2. -ख्याति -तुं), अन्तःख्या, अतिख्या, प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपह्नु (c. 2. -ह्नुते -ह्नोतुं), निह्नु, अपलप् (c. 1. -लपति -पितुं), निरस् (c. 4. -अस्यति -असितुं), अपास्, निराकृ, प्रत्याचक्ष् (c. 2. -चष्टे), अपवद् (c. 1. -वदति -दितुं), निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्, अपव्यय् (c. 1. -व्ययते -यितुं), प्रत्यादेशं कृ, निरासं कृ, न अनुज्ञा, न अनुमन्, न सम्मन्.—(Decline to accept, reject) न ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), न प्रतिग्रह्, अग्रहणं कृ, न स्वीकृ, न अङ्गीकृ, निरस्, अपास्, निराकृ, अवधीर् (c. 10. अवधीरयति -यितुं). The sense of 'refuse' may be expressed simply by the negative particle न; as, 'to refuse to give,' न दा or even by अलं as अलन्दा.

REFUSE, *a.* उच्छिष्टः -ष्टा -ष्टं, अवशिष्टः &c., असारः -रा -रं, निःसारः &c.

REFUSE, *s.* उच्छिष्टं, अवशिष्टं, शेषः, अवशेषः, शेषभागः, उद्वासः, जुष्टं, समुज्झितं, असारः, असारद्रव्यं, निःसारद्रव्यं, मलं. *See* LEAVINGS.

REFUSED, *p. p.* प्रत्याख्यातः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, अपह्नुतः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, अपवादितः &c., निषिद्धः -द्धा -द्धं, अस्वीकृतः &c., अनङ्गीकृतः &c., अननुज्ञातः -ता -तं, अननुमतः &c., असम्मतः &c., अवधीरितः &c.

REFUTABLE, *a.* खण्डनीयः -या -यं, खण्ड्यः -ण्ड्या -ण्ड्यं, खण्डितव्यः -व्या -व्यं, प्रत्याख्येयः -या -यं, निरसनीयः &c., उपमर्दनीयः &c., खण्डनशक्यः -क्या -क्यं.

REFUTATION, *s.* खण्डनं, वाक्यखण्डनं, पक्षाघातः, बाधा -धः, निरासः, वाक्यनिरासः, वाक्यनिरसनं, निराकरणं, वाक्यनिराकरणं, प्रत्याख्यानं, उपमर्दः, अधरीकरणं, आधर्षणं, विक्षेपः, वितण्डा, जल्पः, अनिश्चयः; 'other side of the argument,' उत्तरपक्षः.

To REFUTE, *v. a.* वाक्यं खण्ड् (c. 10. खण्डयति -यितुं) or निरस् (c. 4. -अस्यति -असितुं) or निराकृ, बाध् (c. 1. बाधते -धितुं), प्रत्याख्या (c. 2. -ख्याति -तुं), अधरीकृ, आधृष् (c. 10. -धर्षयति -यितुं), संसूच् (c. 10. -सूचयति -यितुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपमर्दं कृ, वाक्योपमर्दं कृ, अपवद्, वितण्डां कृ.

REFUTED, *p. p.* खण्डितः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, बाधितः &c., अधरीकृतः &c., प्रत्याख्यातः &c., आधर्षितः &c., विक्षिप्तः -प्ता -प्तं, उपमर्दितः &c., निर्धूतः &c., वितण्डितः &c., निस्तीर्णः -र्णा -र्णं, विखण्डितः &c.

REFUTER, *s.* उपमर्दकः, वाक्यखण्डकः, बाधकः, निरासकारी *m.* (न्).

To REGAIN, *v. a.* प्रतिलभ् (c. 1. -लभते -लब्धुं), पुनर् लभ्, पुनर् उपलभ्, पुनः प्राप् (c. 5. -आप्नोति -आप्तुं), पुनर् आप्, पुनर् अवाप्, अनुप्राप्, प्रत्यवाप्, प्रत्यादा (c. 3. -ददाति -दत्ते -दातुं), पुनर् आदा, प्रतिपद् (c. 4. -पद्यते -पत्तुं), पुनर् आपद्, प्रत्याहृ, पुनर् ग्रह्. *See* *To* RECOVER, *v. a.*

REGAINED, *p. p.* प्रतिलब्धः -ब्धा -ब्धं, पुनर्लब्धः &c., पुनरुपलब्धः &c., प्रत्युपलब्धः &c., पुनः प्राप्तः -प्ता -प्तं, पुनराप्तः &c., पुनरवाप्तः &c., प्रतिपन्नः -न्ना -न्नं, आपन्नः &c. *See* RECOVERED.

REGAL, *a.* राजकीयः -या -यं, राजयोग्यः -ग्या -ग्यं, राजार्हः -र्हा -र्हं, नृपोचितः -ता -तं, राजलक्ष्मी -क्ष्मिनी &c., [illegible] -री -रं, ऐशिकः -की -कं, ऐशः -शी -शं. *See* [illegible], PRINCELY, MAJESTIC.—(Man of the regal class) राजन्यः, विराट् *m.* (ज्), क्षत्रियः, मूर्द्धाभिषिक्तः, बाहुजः.

To REGALE, *v. a.* सन्तुष् (c. 10. -तोषयति -यितुं), तुष्, सन्तृप् (c. 10. -तर्पयति -यितुं), तृप्, संवृध् (c. 10. -वर्धयति -यितुं), सुख् (c. 10. सुखयति -यितुं), आनन्द् in caus. 'with choice food,' परमान्नैः or भोजनविशेषैः सन्तुष्, उत्तमाहारं भुज् in caus.—(Regale one's self) उत्तमान्नैः सन्तुष् (c. 4. -तुष्यति -तोष्टुं) or आत्मानं सन्तुष् in caus., or सन्तृप् (c. 4. -तृप्यति) or आत्मानं सन्तृप् in caus., उत्तमाहारं कृ, उत्तमभोजनं कृ, उत्सवं कृ, महोत्सवं कृ.

REGALED, *p. p.* सन्तोषितः -ता -तं, सन्तर्पितः &c., संवर्धितः -ता -तं.

REGALIA, *s.* राजलक्षणानि *n. pl.*, राजचिह्नानि *n. pl.*, राजलिङ्गानि *n. pl.*, नृपचिह्नानि *n. pl.*, नृपलिङ्गानि *n. pl.*, नृपलक्षणानि *n. pl.*, राजैश्वर्य्यचिह्नानि *n. pl.*

REGALITY, *s.* राजत्वं -ता, नृपत्वं, राज्यं. *See* KINGSHIP, ROYALTY.

To REGARD, *v. a.* (Look at, observe) अवेक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, प्रतीक्ष्, प्रत्यवेक्ष्, अभिप्रेक्ष्, प्रेक्ष्, निरीक्ष्, वीक्ष्, समीक्ष्, ईक्ष्, दृश् (c. 1. पश्यति, द्रष्टुं), प्रतिदृश्, अनुदृश्, अभिदृश्, आलोक् (c. 10. -लोकयति -यितुं), समालोक्, आलोच्, आलक्ष्, समालक्ष्, लक्ष्.—(Point or be directed towards) उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्.—(Mind, heed) मन् (c. 4. मन्यते, मन्तुं), अनुमन्, मननं कृ, अपेक्ष्, अवेक्ष्, अवेक्षणं कृ, अपेक्षां कृ, अवधा (c. 3. -धत्ते -धातुं), अवधानं कृ, सावधानः -ना -नं भू, अवहितः -ता -तं भू or अस्.—(Esteem,

respect) मन् (c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्, अभिमन्, पूज्, सेव्, निषेव्, भज्, अवेक्ष्, आदृ, अभिनन्द्, सम्मानं कृ.—(Keep, observe) पाल्, प्रतिपाल्, सेव्, निषेव्, उपसेव्.—(Have relation to) प्रतीक्ष्, अपेक्ष्, उद्दिश्.

REGARD, s. (Look) दृष्टिः *f.*, लक्ष्यं, *see* LOOK.—(Attention of the mind towards any thing, respect unto) प्रतीक्षा, अवेक्षा, अपेक्षा, अवेक्षणं, अन्ववेक्षा, निरीक्षा -क्षणं, उद्देशः, आस्था, अनुसन्धानं; 're-gard to results,' फलोद्देशः.—(Relation, reference) अपेक्षा, प्रतीक्षा, उद्देशः, समुद्देशः, सम्बन्धः, अन्वयः, समन्वयः, विषयत्वं -ता, विषयः, सम्पर्कः; 'having regard to,' सापेक्षः -क्षा -क्षं; 'in re-gard to,' अपेक्षया, अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, उद्देशेन, सापेक्षं, विषये.—(Esteem, respect) मानं, सम्मानं, मान्यता -त्वं, आदरः, पूजा.—(Love, affection) स्नेहः, प्रणयः, प्रश्रयः, प्रेम *n.* (न्), अनुरागः, अनुरक्तिः *f.*, प्रीतिः *f.*

REGARDED, *p. p.* प्रतीक्षितः -ता -तं, अवेक्षितः &c., अपेक्षितः &c., मतः &c.

REGARDFUL, *a.* प्रतीक्षकः -का -कं, अवेक्षकः &c., अवेक्षाकारी -रिणी -रि (न्), अपेक्षकः &c.—(Heedful) सावधानः -ना -नं, अवहितः -ता -तं.

REGARDFULLY, *adv.* सावेक्षं, सापेक्षं, अपेक्षया, अवेक्षया, सावधानं.

REGARDING, *part.* प्रतीक्षकः -का -कं, अपेक्षकः &c., सापेक्षः -क्षा -क्षं.—(Relating to) सम्बन्धी -न्धिनी &c., विषयकः -का -कं.

REGARDLESS, *a.* निरपेक्षः -क्षा -क्षं, अनपेक्षः &c., अनपेक्षकः -का -कं, अपेक्षाहीनः -ना -नं, उपेक्षकः &c., विरक्तः -क्ता -क्तं, उदासीनः -ना -नं, अनुत्सुकः &c.

REGARDLESSLY, *adv.* निरपेक्षं, अनपेक्षं, अनपेक्षया, अनवेक्षया, उपेक्षया.

REGARDLESSNESS, *s.* अनपेक्षा, अनवेक्षा, निरपेक्षता -त्वं, उपेक्षा.

REGATTA, *s.* नौकाक्रीडा, नौकाकौतुकं, बहुनौकानां क्रीडायुद्धं.

REGENCY, *s.* राजप्रतिनिधेर् अधिकारः or पदं, राजप्रतिनिधित्वं.—(Body of persons governing vicariously) राजप्रतिनिधिमण्डलं, राजप्रतिनिधिसमाजः.

REGENERACY, *s.* पुनर्जन्म *n.* (न्), पुनर्जातत्वं, पुनर्जातावस्था.

To REGENERATE, *v. a.* पुनर् जन् (c. 10. जनयति -यितुं), पुनर्जन्म दा, पुनर्जातं -तां कृ, जन्मान्तरं दा, पुनः सृज् (c. 6. सृजति, स्रष्टुं).

REGENERATE, REGENERATED, *a.* पुनर्जातः -ता -तं, पुनर्भवः -वा -वं, द्विजन्मा -न्मा -न्म (न्), पुनर्जन्मा &c., पुनर्भूः -भूः -भू, द्विजः -जा -जं, पुनः सृष्टः -ष्टा -ष्टं, पुनरुत्पन्नः -न्ना -न्नं.

REGENERATION, *s.* पुनर्जन्म *n.* (न्), पुनर्जातिः *f.*, पुनर्भवं, पुनर्जन्मावस्था, द्विजन्मावस्था, पुनर्जातावस्था, जन्मान्तरं, पुनरुत्पत्तिः *f.*, नवसृष्टिः *f.*, नव्यसृष्टिः *f.*

REGENT, *s.* (Ruler) अधिपतिः *m.*, शासिता *m.* (तृ), शास्ता *m.*, शासकः.—(Vicarious ruler) राजप्रतिनिधिः *m.*—(Regent of the quarter) दिक्पालः; 'the eight regents of the quarters,' अष्टदिक्पालाः *m. pl.* These are, 'of the East,' इन्द्रः; 'of the S. E.' अग्निः or वह्निः; 'of the S.,' यमः or पितृपतिः *m.*; 'of the S. W.,' नैर्ऋतिः; 'of the W.,' वरुणः; 'of the N. W.,' मरुत्; 'of the N.,' कुवेरः; 'of the N. E.,' ईशः or शिवः. Their elephants are ऐरावतः, पुण्डरीकः &c., *see* under ELEPHANT.

REGENT, *a.* शासनकारी -रिणी &c., शासिता -त्री -तृ (त), राज्याधिकारी &c.

REGICIDE, *s.* (Killer of a king) राजघातुकः, राजघाती *m.* (न्), राजघातकः, राजहा *m.* (न्), राजहन्ता *m.* (न्तृ), राजघः, राजघ्नः, राजहिंसकः, नृपहा *m.* &c.—(Killing of a king) राजहत्या, राजवधः, राजघातः, नृपघातः, राजहिंसा.

REGIME, *s.* *See* GOVERNMENT, ADMINISTRATION.

REGIMEN, *s.* (Regulation of diet) पथ्यं, पथ्यापथ्यं, पथ्यापथ्यविचारः, पथ्यापथ्यनियमः; 'violation of it,' अपथ्यं; 'one under it,' पथ्याशी -शिनी -शि (न्).

REGIMENT, *s.* सैन्यदलं, सैन्यव्यूहः, सैन्यगुल्मः, सैन्यसमूहः, सैन्यगणः.

REGIMENTAL, *a.* सैन्यदलसम्बन्धी -न्धिनी -न्धि (न्), सैन्यगुल्मविषयकः -का -कं.

REGIMENTALS, *s.* सैन्यवेषः, सैन्यवेशः, सैन्यदलविशेषस्य वेशः.

REGION, *s.* (Country) देशः, प्रदेशः, विषयः, राष्ट्रं, भूमिः *f.*, चक्रं, मण्डलं, प्रान्तः, धिष्ण्यं, निर्गः; 'the lower regions,' अधोलोकः, अधोभुवनं, अवाची; 'the upper regions,' ऊर्द्ध्वलोकः, ऊर्द्ध्वभुवनं, उदीची; 'centre of a region,' मध्यदेशः.—(Quarter of the sky) दिक् *f.* (श्), दिशा, दिशाः *f.* (स्), दिशी, आशा, काशा, ककुप् *m. f.*, *see* QUARTER.—(Part of the body) देशः, चक्रं, मण्डलं; 'the region of the heart,' हृदयदेशः; 'of the liver,' यकृद्देशः; 'umbilical region,' नाभिदेशः, स्वाधिष्ठानचक्रं; 'of the head,' मस्तकमण्डलं.

REGISTER, *s.* लेख्यं, लेखः, लेख्यपत्रं, पञ्जिः -ञ्जी *f.*, पञ्जिका, पदभञ्जिका.

To REGISTER, *v. a.* लेख्ये or लेख्यपत्रे आरुह् in caus. (-रोपयति -यितुं) or समारुह् or अभिलिख् (c. 6. -लिखति -लेखितुं), or लिख्, लेख्यारूढं -ढां कृ. *See To* RECORD.

REGISTERED, *p. p.* लेख्यारूढः -ढा -ढं, लेख्यारोपितः &c., अभिलिखितः &c., लेख्यसमर्पितः &c. *See* RECORDED.

REGISTRAR, *s.* लेखकः, अभिलेखकः, कायस्थः, पञ्जिकाकारकः, लिपिकृत्.

REGISTRY, REGISTRATION, *s.* (The act of registering) अभिलिखनं, अभिलेखनं, लेख्यारोपणं, लेख्यसमर्पणं, नामाभिलेखनं, नामाभिलिखनं.—(The place) अभिलिखनस्थानं, लेख्यस्थानं, लेखस्थानं, लेख्यगृहं.

REGNANT, *a.* शासनकारी -रिणी -रि (न्), राज्याधिकारी -रिणी &c., राजाधिकारयुक्तः -क्ता -क्तं, राज्यधारी &c., प्रबलः -ला -लं.

REGRESS, REGRESSION, *s.* व्यतिक्रमः, विपरीतगतिः *f.*, परावर्त्तः -र्त्तनं.

REGRET, *s.* पश्चात्तापः, अनुतापः, अनुशोकः, अनुशोचनं, मनस्तापः, तापः, सन्तापः, उद्वेगः, अनुशयः, शोकः, खेदः, उत्कण्ठा, औत्कण्ठ्यं, उत्सुकता, औत्सुक्यं, दुःखं, मनोदुःखं, मनोव्यथा, उद्भ्रमः, उत्कः.

To REGRET, *v. a.* अनुतप् in pass. (-तप्यते), पश्चात् तप्, सन्तप्, तप्, अनुशुच् (c. 1. -शोचति -चितुं), शुच्, खिद् (c. 4. खिद्यते, खेत्तुं), उद्विज् (c. 6. -विजते -जितुं), उत्कण्ठ् (c. 1. -कण्ठते -ठितुं), उत्सुक (nom. उत्सुकायते), अनुशी (c. 2. -शेते -शयितुं), उन्मनस् (nom. उन्मनायते), दु (c. 5. दुनोति c. 4. दूयते, दोतुं), विदु, अवदु.

REGRETFUL, *a.* अनुशोचकः -का -कं, अनुतापी -पिनी -पि (न्), पश्चात्तापी &c., उत्कण्ठितः -ता -तं, उत्सुकः -का -कं, उद्विग्नः -ग्ना -ग्नं, उत्कः -त्का -त्कं.

REGRETTED, *p. p.* अनुशोचितः -ता -तं, शोचितः &c., अवदूनः -ना -नं.

REGULAR, *a.* (According to rule) यथाविधिः -धिः -धि, वैधिकः -की -कं, वैधः -धी -धं, सविधिः -धिः -धि, विधियुक्तः -क्ता -क्तं, विध्यनुसारी -रिणी -रि (न्), नैयमिकः -की -कं, नियमानुसारी &c., यथामार्गः -र्गा -र्गं, यथाशास्त्रः -स्त्रा -स्त्रं, यथापद्धतिः -तिः -ति, सूत्रानुसारी &c., ससूत्रः -त्रा -त्रं, सौत्रः -त्री -त्रं.—(According to established usage) आचारिकः -की -कं, व्यवहारिकः &c., व्यावहारिकः &c., यथाव्यवहारः -रा -रं, यथारीतिः -तिः -ति, यथामार्गः -र्गा -र्गं, मार्गानुसारी &c., नित्यः -त्या -त्यं, नैत्यिकः -की -कं, स्थावरः -रा -रं.—(Governed by rule, steady in a course, said of persons) नियमनिष्ठः -ष्ठा -ष्ठं, नियमशीलः -ला -लं, नियमपरः -रा -रं, नियमी &c., नियमानुसारी &c., नियमानुयायी &c., विधिनिष्ठः &c., विध्यनुयायी &c., विधिवर्त्ती

&c., नियमवर्त्ती &c., विध्यनुवर्त्ती &c., यथामार्गचारी &c., यथाविधिचारी &c., यथानियमचारी &c., अव्यभिचारी &c., व्यवस्थितः -ता -तं. —(In due order or course) यथाक्रमः -मा -मं, यथानुक्रमः &c., क्रमिकः -का -कं, क्रमकः &c., सक्रमः -मा -मं, क्रमानुगतः -ता -तं, क्रमानुसारी &c., अनुक्रान्तः -न्ता -न्तं, यथापर्य्यायः -या -यं, पारम्परिकः -की -कं, अनुलोमः -मा -मं, अनुपूर्व्वः -र्व्वा -र्व्वं, आनुलोमिकः -की -कं, अविकलः -ला -लं.—(Periodical) नियतकालिकः -की -कं, नियतः -ता -तं, नित्यः -त्या -त्यं.

Regularity, *s.* (Agreeableness to rule) विध्यनुसारः -रिता, नियमानुसारः -रिता, यथाविधिता, सविधिता, नैयमिकत्वं, सूत्रानुसारः -रिता, नियमः, समूत्रता.—(Steadiness in a course, observance of rule) नियमनिष्ठा, विधिनिष्ठा, नियमशीलता, नियमपरता, विध्यनुवर्त्तनं, नियमानुयायिता, नियमानुवर्त्तित्वं, अव्यभिचारः, व्यवस्थितिः *f.*—(Method, regular course) क्रमः, अनुक्रमः, यथाक्रमता, सक्रमता, क्रमिकता -त्वं, यथानुक्रमता, पर्य्यायः, व्यवस्था, व्यवस्थितिः *f.*, परिपाटिः -टी *f.*, पारिपाट्यं, परम्परा, पारम्पर्य्यं, आनुपूर्व्यं, आनुपूर्व्वी, आनुलोम्यं.—(Regular arrangement) विन्यासः, विन्यसनं, व्यूहनं, व्यूढिः *f.*, रचनं -ना, विरचना.

Regularly, *adv.* (According to rule) यथाविधि, विधिवत्, विधितस्, विध्यनुसारेण, विध्यनुरूपेण, यथानियमं, नियमानुसारेण, यथामार्गं, मार्गानुसारेण, यथापद्धति, यथासूत्रं, विधिपूर्व्वं -र्व्वकं.—(Methodically, in due order or course) यथाक्रमं, यथानुक्रमं, सक्रमं, क्रमतस्, क्रमशस्, क्रमेण, क्रमात्, यथापर्य्यायं, पर्य्यायेण, अनुपूर्व्वशस्, आनुपूर्व्येण, शनकैः, शनैः शनैः.

To regulate, *v. a.* (Adjust by rule) विधिवत् or यथाविधि व्यवस्था in caus. (-स्थापयति -यितुं) or परिक्लृप् (c. 10. -कल्पयति -यितुं) or संविधा (c. 3. -दधाति -धातुं) or विधा, यथासूत्रं विधा, सूत्र (nom. सूत्रयति -यितुं), परिमाणं निरूप् (c. 10. -रूपयति -यितुं), परिमा, परिमितं -तां कृ.—(Direct, subject to rules and good management) अनुशास् (c. 2. -शास्ति -शासितुं), समनुशास्, शास्, विनियम (c. 1. -यच्छति -यन्तुं), नियम्, विधा, संविधा, विधृ (c. 10. -धारयति -यितुं), अनुशासनं कृ.—(Dispose, put in good order) विधा, संविधा, परिक्लृप्, व्यवस्था in caus., प्रणी, सम्प्रणी, विन्यस्, विरच्, व्यूह्, व्यवस्थां कृ, नियमं कृ.

Regulated, *p. p.* व्यवस्थितः -ता -तं, व्यवस्थापितः &c., विनियतः -ता -तं, नियतः &c., नियमितः &c., विहितः &c., अनुशासितः &c., शासितः &c., यन्त्रितः -ता -तं, परिमितः &c., प्रमितः &c., सूत्रितः &c.; 'well regulated,' सुव्यवस्थितः -ता -तं, सुविहितः &c., सुयन्त्रितः &c.; 'ill-regulated,' अव्यवस्थितः -ता -तं, अयन्त्रितः &c.; 'having regulated,' विनियम्य.

Regulation, *s.* (The act of regulating) व्यवस्थापनं, व्यवस्थितिः *f.*, विनियमः, व्यवस्था, अनुशासनं, शासनं, विधानं, संविधानं, परिकल्पनं, विधारणं -णा, यन्त्रणं, प्रणयनं, अनुनयः -यनं.—(Rule) नियमः, विनियमः, विधिः *m.*, विधानं, व्यवस्था, व्यवस्थितिः *f.*, स्थितिः *f.*, सूत्रं, क्रमः, मर्य्यादा.

Regulator, *s.* नियन्ता *m.* (न्तृ), विनियन्ता *m.*, अनुशासकः, शासकः, शास्ता *m.* (स्तृ), अनुशास्ता *m.*, विधाता *m.* (तृ), व्यवस्थापकः, परिकल्पकः.

Rehearsal, *s.* (Repetition of the words of another) पठनं, पाठः, अनुवादः, वाचनं, अनुवाचनं, उल्लेखः -खनं.—(Narration) कथनं, आख्यानं.—(Recital in preparation for the public representation) भाव्यनुकरणं, पूर्व्वाभिनयः -यनं.

To rehearse, *v. a.* (Repeat the words of another) पठ् (c. 1. पठति -ठितुं), सम्पठ्, अनुपठ्, पठनं कृ, अनुवादं कृ.—(Narrate) कथ्, आख्या, श्रु in caus.—(Recite, preparatory to a public representation) भाव्यनुकरणं कृ, पूर्व्वाभिनयं कृ.

Rehearsed, *p. p.* पठितः -ता -तं, अनुवादितः &c., पूर्व्वाभिनीतः -ता -तं.

To reign, *v. n.* राज्यं कृ, राजत्वं कृ, राज्यपालनं कृ, राज्यशासनं कृ, राज्याधिकारं कृ, राजव्यवहारं कृ, राजकार्य्यं कृ, आधिपत्यं कृ, सिंहासनारूढः -ढा -ढं भू.

Reign, *s.* राज्यं, राजत्वं -ता, आधिपत्यं.—(Period of rule) राज्यशासनकालः, राज्यकालः, आधिपत्यकालः.—(Prevalence), *see* the word.

Reigning, *part.* or *a.* राज्यकारी -रिणी -रि (न्), राज्यशासनकारी &c., राज्यारूढः -ढा -ढं, सिंहासनारूढः &c., राजपदारूढः &c., राज्याधिकारी &c.

To re-imburse, *v. a.* प्रतिदा, पुनर् दा, क्षतिपूरणं कृ, हानिपूरणं कृ, निष्कृतिं दा, अपाकृ, प्रतिकृ, प्रत्युपकृ, परिशोधनं कृ.

Re-imbursement, *s.* पुनर्दानं, प्रतिदानं, क्षतिपूरणं, हानिपूरणं, परिशोधनं.

Rein, *s.* (Of a horse) रश्मिः *m.*, अभीशुः *m.*, अभीषुः *m.*, प्रग्रहः, प्रग्राहः, यमः *m.*, वागा, वल्गा, दन्तालिका.—(Reins), *see* the word.

To rein, *v. a.* अश्वं रश्मिभिर् यम् (c. 1. यच्छति, यन्तुं) or संयम् or नियम् or निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or प्रग्रह्.

Re-infect, *a.* अकृतार्थः -र्था -र्थं, असिद्धार्थः &c., अकृतार्थीभूतः &c.

To re-inforce, re-inforcement. *See To* recruit.

Reins, *s. pl.* (Lower part of the back) कटिः -टी, कटिदेशः, श्रोणिः -णी *f.*, श्रोणिदेशः, कटिपश्चाद्भागः.—(Kidneys), *see* Kidney.

To re-instate, *v. a.* पुनः स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, प्रत्यवस्था, पुनर् अवस्था, पुनर् नियुज् (c. 10. -योजयति -यितुं), पुनः स्थापनं कृ.

Re-instated, *p. p.* पुनः स्थापितः -ता -तं, पुनर् अवस्थापितः &c. or नियोजितः &c.

Re-instatement, *s.* पुनःस्थापनं, पुनरवस्थापनं, प्रतिष्ठापनं -ना, प्रत्यवस्थापनं, पुनर्नियोगः, पुनर्नियोजनं.

To re-iterate, *v. a.* (Say again) पुनर् वद्, पुनःपुनर् वद्, मुहुर् वद्, अनुवद्, पुनरुक्तिं कृ, आम्रेड्.—(Do again) पुनः कृ, पुनःपुनः कृ, मुहुः कृ, वारं वारं कृ, मुहुर् मुहुः कृ.

Re-iterated, *p. p.* पुनःपुनः कृतः -ता -तं, वारं वारं कृतः &c., मुहुर् मुहुः कृतः &c., पौनःपुनिकः -की -कं, पुनरुक्तः -क्ता -क्तं, पुनःपुनरुक्तः &c.

Re-iteration, *s.* पुनःपुनःकरणं, मुहुःकरणं, पौनःपुन्यं, पुनरुक्तिः *f.*, पौनरुक्त्यं, पुनर्वचनं, अनुवादः, आम्रेडनं, समभिहारः.

To reject, *v. a.* निरस् (c. 4. -अस्यति -सितुं), अपास्, व्युदस्, प्रत्याख्या (c. 2. -ख्याति -तुं), निराकृ, पराकृ, प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विक्षिप्, त्यज् (c. 1. त्यजति, त्यक्तुं), निर्णुद् (c. 6. -णुदति -णोत्तुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपाहा (c. 3. -जहाति -हातुं), प्रत्याचक्ष् (c. 2. -चष्टे), निर्धू (c. 5. -धूनोति -धोतुं), अपव्यध् (c. 4. -विध्यति -व्यद्धुं), व्यपव्यध्, वृज् (c. 10. वर्जयति -यितुं), अवधीर् (c. 10. अवधीरयति -यितुं), न स्वीकृ, न ग्रह्, अस्वीकारं कृ, अग्रहणं कृ. *See To* refuse.

Rejected, *p. p.* निरस्तः -स्ता -स्तं, अपास्तः &c., व्युदस्तः &c., प्रत्याख्यातः -ता -तं, निराकृतः -ता -तं, पराकृतः &c., प्रतिक्षिप्तः -प्ता -प्तं, निक्षिप्तः &c., विक्षिप्तः &c., प्रत्यादिष्टः -ष्टा -ष्टं, अपविद्धः -द्धा -द्धं, निर्धूतः -ता -तं, अवधीरितः &c., त्यक्तः -क्ता -क्तं, परित्यक्तः &c., वर्जितः &c., अस्वीकृतः &c.

Rejection, *s.* निरसनं, निरासः, निराकृतिः *f.*, निराकरणं, निकृतिः *f.*, प्रत्याख्यानं, प्रत्यादेशः, प्रतिक्षेपः, त्यागः, परित्यागः, वर्जनं, अपवर्जनं,

विसर्जनं, अस्वीकारः, अनङ्गीकारः, अग्रहणं, अवधीरणं -णा.

To REJOICE, *v. n.* आनन्द् (c. 1. -नन्दति -न्दितुं), अभिनन्द्, विनन्द्, नन्द्, हृष् (c. 4. हृष्यति, हर्षितुं), प्रहृष्, संहृष्, सम्प्रहृष्, ह्लाद् (c. 1. ह्लादते -दितुं), आह्लाद्, प्रह्लाद्, उल्लस् (c. 1. -लसति -सितुं), समुल्लस्, प्रोल्लस्, रम् (c. 1. रमते, रन्तुं), अभिरम्, आरम्, संरम्, तुष् (c. 4. तुष्यति, तोष्टुं), परितुष्, सन्तुष्, मुद् (c. 1. मोदते -दितुं), प्रमुद्, प्रतिमुद्, प्री (c. 4. प्रीयते, प्रेतुं), सम्प्री, मद् (c. 4. माद्यति, मदितुं), आनन्दितः -ता -तं भू, हृष्टः -ष्टा -ष्टं भू, हर्षं or आनन्दं गम् or इ.

To REJOICE, *v. a.* आनन्द् (c. 10. -नन्दयति -यितुं), अभिनन्द्, नन्द्, हृष्, (c. 10. हर्षयति -यितुं), प्रहृष्, परिहृष्, ह्लाद् (c. 10. ह्लादयति -यितुं), प्रह्लाद्, आह्लाद्, रम् (c. 10. रमयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, तृप् (c. 10. तर्पयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), मुद्, प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं), आनन्दं or हर्षं जन् (c. 10. जनयति -यितुं), आनन्दितं -तां कृ, आनन्दं दा.

REJOICED, *p. p.* आनन्दितः -ता -तं, नन्दितः &c., आह्लादितः &c., हर्षितः &c., हृष्टः -ष्टा -ष्टं, प्रहर्षितः -ता -तं, उल्लसितः &c., उल्लासितः &c., तुष्टः -ष्टा -ष्टं, परितुष्टः &c., हर्षयुक्तः -क्ता -क्तं, हर्षाविष्टः -ष्टा -ष्टं; 'in mind,' हृष्टमनाः -नाः -नः (स्), हृष्टमानसः -सा -सं, हृष्टहृदयः -या -यं.

REJOICING, *part. act.* नन्दकः -का -कं, आनन्दकः &c., नन्दनः -ना -नं, आनन्दनः &c., आनन्ददः -दा -दं, आनन्दकरः -रा -रं, हर्षदः -दा -दं, हर्षकः -का -कं, हर्षप्रदः &c., आह्लादकः &c., मोदकः &c., हर्षणः -णा -णं, उत्सवकरः -रा -रं.—*Neut. part.* हर्षमाणः -णा -णं, रममाणः -णा -णं, मोदमानः -ना -नं, प्रीयमाणः &c., सम्प्रीयमाणः &c.

REJOICING, *s.* आनन्दः -न्दनं, हर्षः -र्षणं, आह्लादः -दनं, नन्दनं, प्रमोदः -दनं, सन्तोषणं, *see* JOY.—(Public rejoicing) उत्सवः, उत्सवकरणं.

To REJOIN, *v. n.* प्रतिवच् (c. 2. -वक्ति -क्तुं), पुनर्वच्, प्रतिवद्, प्रत्युत्तरं कृ.

REJOINDER, *s.* प्रतिवाक्यं, प्रतिवचनं, उत्तरं, प्रत्युत्तरं, उत्तरपक्षः, प्रत्युक्तिः *f.*, प्रत्युक्तं, प्रत्यर्थं, कक्षा, उत्तरोत्तरं. *See* REPLY.

To RELAPSE, *v. n.* पुनः पत (c. 1. पतति -तितुं), पुनर् आगम् (c. 1. -गच्छति -गन्तुं), पुनर् आवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रत्यावृत्, पर्यावृत्, आवृत्, पुनर्ग्रस्तः -स्ता -स्तं भू, पुनः पीडितः &c. भू, पुनराविष्टः -ष्टा -ष्टं भू; 'relapse into a former state,' पूर्व्वावस्थां or पूर्व्वदशां गम् or आपद् or इ or प्राप्, पूर्व्ववद् भू; 'relapse into vice,' पुनर् व्यसनी भू, पुनर् व्यभिचारी भू, पुनर् व्यभिचारं कृ, पुनर् व्यभिचर्, पुनर् धर्म्माद् भ्रंश्, पुनर् धर्म्मं त्यज्, पुनः सत्पथाद् भ्रंश् or च्यु or विचल् or उत्क्रम्; 'relapse into a fever,' पुनर् ज्वरग्रस्तः -स्ता -स्तं भू, पुनर्ज्वरी -रिणी &c. भू, पुनर्ज्वरातुरः -रा -रं भू.

RELAPSE, *s.* पुनःपतनं, आवृत्तिः *f.*, आवर्त्तनं, प्रत्यावृत्तिः *f.*, प्रत्यावर्त्तनं, पर्यावर्त्तः, प्रत्यागमः; 'into a former state,' पूर्व्वावस्थाप्राप्तिः *f.*; 'into vice,' पुनर्व्यभिचारः, पुनर्धर्म्मत्यागः, पुनर्धर्म्माद्भ्रंशः, पुनःसत्पथाद्भ्रंशः; 'into a fever,' पुनर्ज्वरग्रस्तता.

To RELATE, *v. a.* कथ् (c. 10. कथयति -यितुं), संकथ्, आख्या (c. 2. -ख्याति -तुं), समाख्या, ख्या in caus. (ख्यापयति -यितुं), अभिख्या, शंस् (c. 1. शंसति -सितुं), श्रु in caus., आश्रु, संश्रु, वद्, निविद्, आविद्, आचक्ष्, समाचक्ष्, प्रचक्ष्, वर्ण्, उपवर्ण्, अनुवर्ण्, संवर्ण्, निगद्, उदाहृ, व्याहृ, अभिधा, विवृ, विवरणं कृ, कृत्, अनुकृत्, वृत् in caus., कथनं कृ, *see* *To* NARRATE, TELL; 'to relate over again,' पुनर् आख्या, सम्प्रत्याचक्ष्.

To RELATE, *v. n.* (Have reference) उद्दिश् (c. 6. -दिशति -देष्टुं), अपेक्ष् (c. 1. -ईक्षते -क्षितुं), विषयकः -का -कं भू, सम्बन्ध् in pass. (-बध्यते),

सम्बद्धः -द्धा -द्धं भू, सम्बन्धी &c. भू. *See* *To* REFER.

RELATED, *p. p.* (Narrated) कथितः -ता -तं, [illegible]ख्यातः -ता -तं, समाख्यातः &c., *see* TOLD.—(Connected) सम्बद्धः [illegible] -द्धं, सम्बन्धी -न्धिनी -न्धि (न्), ससम्बन्धः -न्धा -न्धं, कृतसम्बन्धः -न्धा -न्धं, अनुबद्धः &c., अनुसम्बद्धः &c., सम्पृक्तः -क्ता -क्तं, सम्पर्की [illegible]णी &c., अनुषङ्गी &c., आनुषङ्गिकः -की -कं, संसक्तः -क्ता -क्तं, [illegible] -या -यं, अन्वितः -ता -तं, समन्वितः &c.; 'mutually related,' व्यतिष[illegible] &c.—(Related by consanguinity, or by blood on the father's side) गोत्रसम्बन्धी -न्धिनी &c., गोत्रसम्बद्धः -द्धा -द्धं, एकगोत्रः -त्रा -त्रं, सगोत्रः &c., गोत्रजः -जा -जं, एकगोत्रजः &c., गोत्री &c., एकशरीरः -रा -रं, एकशरीरसम्बन्धी &c., एकरक्तः -क्ता -क्तं, एकरक्तसम्बन्धी &c., एकशरीरावयवः -वा -वं, एकशरीरान्वयी &c., सकुल्यः -ल्या -ल्यं, सजातीयः -या -यं, स्वजातीयः &c., सवंशीयः &c., स्ववंशीयः &c., आत्मीयसम्बन्धी &c., *see* KINDRED, *a.*—(Related by blood on the mother's side or by marriage) योनिसम्बन्धी &c., योनिसम्बद्धः -द्धा -द्धं, शरीरसम्बन्धी &c., आप्तसम्बन्धी &c., यौनः -नी -नं.

RELATER, *s.* कथकः, आख्यायकः, ख्यापकः, उपकथकः, काथिकः.

RELATING, *part.* (Having reference) विषयकः -का -कं, सम्बन्धी -न्धिनी -न्धि (न्), उद्देशकः -का -कं or expressed by the affix ईय, *see* REFERENCE, REGARD, REGARDING.

RELATION, *s.* (Act of telling) कथनं, आख्यानं, उपकथनं, उपाख्यानं, ख्यापनं, वर्णनं -ना, शंसनं, विवरणं, व्याहरणं, अनुकीर्त्तनं, निरूपणं, श्रावणं, निवेदनं, उद्गारः; 'exact relation of particulars,' वस्तुकथनं, वृत्तान्तकथनं, वस्तुस्थितिकथनं.—(Reference) विषयत्वं, सम्बन्धः, उद्देशः, अन्वयः, अपेक्षा, गोचरत्वं; 'in reference to,' अपेक्षया, उद्दिश्य *see* REFERENCE, REGARD.—(Connexion) सम्बन्धः -न्धित्वं, अभिसम्बन्धः, सम्पर्कः, अन्वयः, समन्वयः, सन्दर्भः, अनुषङ्गः, संसक्तिः *f.*, समासक्तिः *f.* संसर्गः; 'mutual relation,' अन्योन्यसम्बन्धः, मिथःसम्बन्धः, व्यतिषङ्ग; 'intimate and inseparable relation, as of properties wit substances,' समवायः, समवायसम्बन्धः, नित्यसम्बन्धः; 'as of materia with produce,' समवायिकारणं.—(Connexion by blood, allianc of kin) एकशरीरता, एकशरीरसम्बन्धः, एकशरीरान्वयः, एकशरीर वयवत्वं, ज्ञातित्वं, ज्ञातिभावः, सम्बन्धित्वं, बन्धुता, बान्धवत्वं, सजाति सगर्भत्वं, समानोदर्य्यता, सोदर्य्यता, सगोत्रत्वं, एकगोत्रता, समगोत्रता, गो सम्बन्धः, एकरक्तसम्बन्धः, समरक्तसम्बन्धः, सपिण्डता, एकपिण्डता, सापिण्ड —(Connexion on the mother's side, or by marriag योनिसम्बन्धः, शरीरसम्बन्धः, आप्तभावः, आप्तता.—(Kinsman) बान्धव बन्धुः *m.*, बन्धुजनः, गोत्रबन्धुः *m.*, ज्ञातिः *m.*, स्वज्ञातिः *m.*, गोत्रजन गोत्रपुरुषः, गोत्रजः, सम्बन्धी *m.* (न्), सपिण्डः, समानोदकः, कुटुम्बी *m* स्वकुटुम्बी, *see* KINSMAN; 'relations,' बन्धुवर्गः, बान्धवाः *m. p* ज्ञातिवर्गः, बान्धवगणः, *see* KINDRED; 'having relations,' सबान्ध -वा -वं, कौटुम्बिकः -की -कं. The सपिण्डः is a relation co nected by the offering of the funeral cake to the man of common ancestors; the समानोदकः is connected by t offering of water only.

RELATIONSHIP, *s.* सम्बन्धः, सम्बन्धित्वं, बन्धुता -त्वं, बान्धवत्वं -ता, ज्ञाति ज्ञातिभावः, ज्ञातेयं, सजातित्वं. *See* under RELATION.

RELATIVE, *a.* (Having relation) सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्ध -का -कं, सम्बन्धीयः -या -यं, विषयकः -का -कं, अनुषङ्गी &c., आनु ङ्गिकः -की -कं, सम्पर्की &c., ससम्बन्धः -न्धा -न्धं, ससम्पर्कः -र्का - सान्वयः -या -यं, उद्देशकः -का -कं, परायणः -णा -णं.—(Not abs

lute) अन्यापेक्षकः -का -कं, अन्यसापेक्षः -क्षा -क्षं, सापेक्षः &c., अन्योद्देशकः &c., अकेवलः -ला -लं.—(Correlative, mutually related) अन्योन्यसम्बन्धी &c., अन्योन्याश्रितः -ता -तं, अन्योन्यान्वितः &c.—(In grammar) तत्पदापेक्षकः -का -कं, तत्पदापेक्षी &c.

RELATIVE, *s.* बन्धुः *m.*, बान्धवः, सम्बन्धी *m.* (न्), ज्ञातिः *m.* *See* KINSMAN.

RELATIVELY, *adv.* अपेक्षया, अन्यापेक्षया, सापेक्षं, उद्देशेन, उद्दिश्य, अन्योद्देशेन, अन्यमधिकृत्य, अन्यमपेक्ष्य, अन्यसापेक्षं. *See* REGARD.

To RELAX, *v. a.* शिथिलीकृ, शिथिल (nom. शिथिलयति -ते -यितुं), श्लथ् (c. 10. श्लथयति -यितुं), प्रश्लथ्, श्रथ (c. 1. श्रथति, c. 10. श्रथयति -यितुं), श्रन्थ् (c. 9. श्रथ्नाति, श्रन्थितुं), श्लथीकृ, स्रंस् (c. 10. स्रंसयति -यितुं), विस्रंस्, स्रस्तीकृ, विस्रस्तीकृ, विगल् in caus.—(Remit) मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, अवमुच्, अवसृज् (c. 6. -सृजति -स्रष्टुं), विसृज्.—(Abate, diminish) शम् (c. 10. शमयति -यितुं), उपशम्, लघूकृ, न्यूनीकृ; 'relax one's efforts,' उद्योगशैथिल्यं कृ.—(Relax the mind) विनुद् (c. 10. -नोदयति -यितुं), विनोदनं कृ, मनोविनोदं कृ.—(The bowels) कोष्ठमृदुतां जन्, नाडिमृदुतां जन्, कोष्ठलघुतां जन्, लघुकोष्ठतां कृ, अतिसारं or सारणं जन्, *see To* PURGE.—(Untie) उद्ग्रन्थ्, उन्मुच्, वियुज्, विसन्धा, विपाश्, उत्सूत्रीकृ.

To RELAX, *v. n.* शिथिलीभू, शिथिल (nom. शिथिलायते), श्लथ (nom. श्लथायते), श्रथ (nom. श्रथायते), श्रन्थ् (c. 1. श्रन्थते -न्थितुं), श्लथीभू, स्रंस् (c. 1. स्रंसते -सितुं), स्रस्तीभू.—(Abate) शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, न्यूनीभू.—(Remit in close attention) उद्योगशैथिल्यं कृ, शिथिलोद्योगः -गा -गं भू.

RELAXATION, *s.* (Act) शिथिलीकरणं, श्रन्थनं, श्रथनं, विस्रंसनं, मोचनं.—(State) शैथिल्यं, शिथिलता, विस्रंसा, विस्रंसः, प्रश्रयः, मुक्तिः *f.*, मुक्तता.—(Abatement, remission) शमः, उपशमः, शान्तिः *f.*, उपशान्तिः *f.*, न्यूनता.—(Amusement, remission of labor) विनोदः -दनं, मनोविनोदः, विश्रामः, विश्रान्तिः *f.*, उद्योगविश्रामः, उद्योगविश्रान्तिः *f.*, उद्योगविच्छेदः, उद्योगशैथिल्यं, अनध्यायः.—(Of bowels) कोष्ठमृदुता, मृदुकोष्ठता, कोष्ठलघुता, लघुकोष्ठता, अतिसारः, सारणं.

RELAXED, *p. p.* शिथिलितः -ता -तं, शिथिलीकृतः &c., शिथिलः -ला -लं, श्लथः -था -थं, प्रश्लथः &c., विश्लथः &c., स्रस्तः -स्ता -स्तं, विस्रस्तः &c., विगलितः -ता -तं, मुक्तः -क्ता -क्तं, मोचितः -ता -तं; 'in the body,' विश्लथाङ्गः -ङ्गा -ङ्गं, स्रस्ताङ्गः &c.; 'in strength,' शिथिलबलः -ला -लं, शिथिलशक्तिः -क्तिः -क्ति; 'in the bowels,' मृदुकोष्ठः -ष्ठा -ष्ठं, लघुकोष्ठः &c.; 'one who has relaxed his hold,' स्रस्तहस्तः -स्ता -स्तं, शिथिलितहस्तः &c.

RELAXING, *part.* or *a.* शैथिल्यकारी -रिणी -रि (न्), शैथिल्यजनकः -का -कं, ग्लानिकारकः &c., ग्लानिकरः &c., बलशैथिल्यकारकः &c., बलशैथिल्यजनकः &c.

RELAY, *s.* मार्गे निरूपितस्थानेषु सज्जीकृतो जवाश्वगणः, जवाश्वस्थानं.

To RELEASE, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, प्रविमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, उद्धृ (c. 1. -हरति -हर्त्तुं), त्रै (c. 1. त्रायते, त्रातुं), परित्रै, निस्तॄ (c. 10. -तारयति -यितुं), उत्सृ, विसृज्, त्यज्. *See To* FREE, LIBERATE.

RELEASE, *s.* मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः -क्षणं, विमोक्षः -क्षणं, मोचनं, विमोचनं, उद्धारः, उद्धरणं, समुद्धरणं, त्राणं, परित्राणं, निस्तारः, निस्तरणं, उत्तरणं, विसर्जनं, त्यागः; 'from confinement,' बन्धनमुक्तिः *f.*

RELEASED, *p. p.* मुक्तः -क्ता -क्तं, विमुक्तः &c., मोचितः -ता -तं, विमोचितः &c., मोक्षितः &c., उद्धृतः &c., *see* LIBERATED; 'from obligation,' ऋणमुक्तः -क्ता -क्तं, उत्तीर्णः -र्णा -र्णं, अवतीर्णः &c.; 'from confinement,' बन्धनमुक्तः &c.

RELEASER, *s.* मोचकः, विमोचकः, उद्धर्त्ता *m.* (र्तृ). *See* LIBERATOR.

To RELENT, *v. n.* दयार्द्रः -र्द्रा -र्द्रं भू, दयार्द्रचित्तः -त्ता -त्तं भू, दयार्द्रीभू, मृदूभू, मृदुचित्तः -त्ता -त्तं भू, दयां कृ, करुणां कृ, कृपां कृ, सकरुणः -णा -णं भू, करुण (nom. करुणायते), कृपा (nom. कृपायते), पुनर् दयां कृ, पुनर् अनुग्रहं कृ, कोमलचित्तः -त्ता -त्तं भू, स्निग्धीभू, द्रवीभू, शम् (c. 4. शाम्यति, शमितुं), शान्तिं or सान्त्वं गम्.

RELENTLESS, *a.* निर्दयः -या -यं, निष्करुणः -णा -णं, अकरुणः &c., निष्कृपः -पा -पं, अशाम्यः -म्या -म्यं, अशमनीयः -या -यं, उग्रदण्डः -ण्डा -ण्डं, उग्रः -ग्रा -ग्रं, निष्ठुरः -रा -रं, कठोरः &c., पाषाणहृदयः -या -यं, निर्दयहृदयः &c.; 'a relentless foe,' दृढवैरी *m.* (न्).

RELENTLESSLY, *adv.* निर्दयं, निष्करुणं, निष्कृपं, निष्ठुरं, कठोरं, उग्रदण्डेन.

RELEVANCE, RELEVANCY, *s.* प्रासङ्गिकत्वं, प्रसङ्गयोग्यता, प्रसङ्गानुसारः, प्रसङ्गसङ्गतिः *f.*, प्रसङ्गोचितत्वं, प्रसङ्गान्वयः, प्रकरणयोग्यता, प्रकरणानुसारः, प्रकरणसङ्गतिः *f.*, प्राकरणिकत्वं, प्रस्तावानुसारः, प्रस्तावान्वयः, प्रस्तावौचित्यं, प्रस्तावानुषङ्गः, प्रस्तुतानुषङ्गः, प्रस्तुतसङ्गतिः *f.*, युक्तिः *f.*, योग्यता, यौक्तिकत्वं, विषयकत्वं.

RELEVANT, *a.* प्रासङ्गिकः -की -कं, प्रसङ्गानुसारी -रिणी -रि (न्), प्रसङ्गसङ्गतः -ता -तं, प्रसङ्गोचितः -ता -तं, प्रसङ्गयोग्यः -ग्या -ग्यं, प्रसङ्गसदृशः -शी -शं, प्रसङ्गान्वयी &c., प्रकरणयोग्यः &c., प्रकरणानुसारी &c., प्रकरणसङ्गतः &c., प्राकरणिकः -की -कं, प्रस्तावोचितः -ता -तं, प्रस्तावानुसारी &c., प्रस्तावानुषङ्गी &c., प्रस्तुतानुषङ्गी &c., प्रस्तावसदृशः -शी -शं, प्रास्ताविकः -की -कं, यौक्तिकः -की -कं, प्रयुक्तः -क्ता -क्तं, युक्तिमान् -मती -मत् (त्), प्रतीक्षकः -का -कं, सपेक्षकः &c., उद्देशकः &c., विषयकः &c.

RELIANCE, *s.* विश्वासः, प्रत्ययः, विश्रम्भः, निष्ठा, आश्रयः, उपाश्रयः, संश्रयः, समाश्रयः, आशयः, अयणं, आयः, अवलम्बनं, तन्त्रता.

RELIC, *s.* शेषः -षं, अवशेषः -षं, शिष्टं, अवशिष्टं, अवशिष्टांशः, नष्टशिष्टांशः, परिशेषः, परिशिष्टं, शेषभागः, अवशिष्टभागः, शवशेषः.—(Corpse) शवः -वं.

RELICT, *s.* (Widow) विधवा, गतभर्तृका, मृतपतिका.

RELIEF, *s.* (Removal of pain or distress, alleviation) दुःखशमनं, दुःखशान्तिः *f.*, दुःखोद्धरणं, दुःखापहरणं, दुःखापहारः, दुःखमोचनं, दुःखमुक्तिः *f.*, दुःखपरिहारः, दुःखापनयनं, श्रमापनयनं, श्रमापहारः, श्रमपरिहारः, अनिष्टापनयनं, दुःखपरिमार्जनं, उद्धरणं, उद्धारः, शमनं, प्रशमनं.—(Ease or alleviation obtained) सुखं, शान्तिः *f.*, प्रशान्तिः *f.*, शमः, उपशमः, शान्तता, विश्रान्तिः *f.*, विश्रामः, स्वास्थ्यं, स्वस्थता, सुस्थता, सुस्थितिः *f.*, निर्वृतिः *f.*, समाधानं.—(In sculpture), *see* BASS-RELIEF.

RELIEVABLE, *a.* उद्धरणीयः -या -यं, शमनीयः &c., शाम्यः -म्या -म्यं.

To RELIEVE, *v. a.* (Free from pain, remove distress) उद्धृ (c. 1. -हरति -हर्त्तुं), दुःखम् अपहृ or हृ or अपनी (c. 1. -नयति -नेतुं), दुःखाद् मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), दुःखं शम् (c. 10. शमयति -यितुं), दुःखशमनं कृ, दुःखोद्धरणं कृ, दुःखापहरणं कृ, श्रमम् अपहृ or हृ, श्रमापनयनं कृ, श्रमापहरणं कृ, दुःखमोचनं कृ.—(Alleviate) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, शान्तिं दा or कृ, शमनं कृ, प्रशमनं कृ, विश्रामं दा, विश्रान्तिं दा, लघ (nom. लघयति -यितुं), लघूकृ.—(Help) उपकृ, साहाय्यं कृ, सहायत्वं कृ, उपचर्.—(Relieve guard) सैनिकपरिवर्त्तनं कृ, रक्षकपरिवृत्तिं कृ, जागरणाद् मुच्.—(Set off by contrast) विपरीतगुणप्रकाशेन अधिकशोभां दा.

RELIEVED, *p.p.* (Freed from pain, &c.) मुक्तदुःखः -खा -खं, शान्तदुःखः

&c., शमितदुःख: &c., दुःखमुक्तः -क्ता -क्तं, श्रममुक्तः &c., मुक्तः &c., दुःखोद्धृतः -ता -तं, उद्धृतः &c., उद्धृतदुःखः -खा -खं, उद्धृतश्रमः -मा -मं, परिहृतदुःखः &c., विगतदुःखः &c., गतदुःखः &c., विगतश्रमः &c.; 'relieved of anxiety,' विगतोद्वेगः -गा -गं, गताधिः -धिः -धि; 'of fever,' विगतज्वरः -रा -रं, गतज्वरः &c., ज्वरमुक्तः &c., शान्तज्वरः &c.—(Alleviated) शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः &c., उपशान्तः &c., प्राप्तविश्रामः -मा -मं, प्राप्तविरामः -मा -मं —(Helped) उपकृतः -ता -तं.—(Relieved from watching) जागरणमुक्तः -क्ता -क्तं.—(Set off by contrast) विपरीतगुणप्रकाशेन प्राप्तशोभः -भा -भं.

RELIGION, *s.* धर्म्मः, ईश्वरभक्तिः *f.*, देवभक्तिः *f.*, भक्तिः *f.*, ईश्वरसेवा. *See* PIETY.—(System of faith) धर्म्मः, धर्म्ममार्गः, मतं, मार्गः; 'establishment of a religion,' धर्म्मसंस्थापनं; 'extinction of one,' धर्म्मोच्छेदः; 'good religion,' सद्धर्म्मः; 'of the same religion,' सधर्म्मा -र्म्मा -र्म्म (न्), एकधर्म्मा &c., अपृथग्धर्म्मशीलः -ला -लं.

RELIGIOUS, *a.* (Devoted to the practice of religion) धार्म्मिकः -की -कं, धर्म्मपरः -रा -रं, धर्म्मपरायणः -णा -णं, धर्म्मशीलः -ला -लं, भक्तिमान् -मती -मत् (त्), भजनशीलः &c., पुण्यात्मा -त्मा -त्म (न्), पुण्यशीलः &c., धर्म्माचारी &c., भक्तिनिष्ठः &c., व्रती &c., कर्म्मनिष्ठः &c., क्रियानिष्ठः &c., क्रियावान् &c., कर्म्मिष्ठः &c., नियमनिष्ठः &c., नियमशीलः &c., नियमपरः -रा -रं, *see* PIOUS.—(Pertaining to religion) धर्म्मसम्बन्धी &c., धर्म्मविषयकः -का -कं, धर्म्मप्रकरणः -णा -णं, धर्म्म in comp., देव in comp.: 'religious rite,' कर्म्म *n.* (न्), क्रिया, दैवकर्म्म *n.*

RELIGIOUSLY, *adv.* धार्म्मिकवत्, ईश्वरभक्त्या. *See* PIOUSLY.

RELIGIOUSNESS, *s.* धार्म्मिकत्वं, धर्म्मशीलता, कर्म्मनिष्ठा, नियमनिष्ठा, नियमपरता.

To RELINQUISH, *v. a.* त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, संत्यज्, हा (c. 3. जहाति, हातुं), विहा, अपहा, समाहा, प्रहा, प्रोञ्झ् (c. 6. -उज्झति -ज्झितुं), उज्झ्, विमुच् (c. 6. -मुञ्चति -मोक्तुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अपसृज्, व्यपसृज्, अतिसृज्, परिहृ (c. 1. -हरति -हर्त्तुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), रह् (c. 10. रहयति -यितुं), विरह्, वृज् (c. 10. वर्जयति -यितुं), पृष्ठतः कृ.

RELINQUISHED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः &c., उत्सृष्टः -ष्टा -ष्टं, प्रोज्झितः -ता -तं, समुज्झितः &c., उज्झितः &c., प्रोत्सारितः &c.

RELINQUISHMENT, *s.* त्यागः, त्यजनं, परित्यागः, उत्त्यागः, विसर्जनं, विसर्गः, उत्सर्जनं, उत्सर्गः, प्रोज्झनं, वर्जनं, विमोचनं, मोचनं, परिहारः, परिहरणं, प्रत्यादेशः; 'of right or title,' स्वत्वनिवृत्तिः *f.*, स्वत्वनिवृत्तिः *f.*, स्वत्वत्यागः.

RELIQUARY, *s.* शिष्टभाण्डं, शिष्टपात्रं, शिष्टसम्पुटकः, अवशिष्टभाण्डं.

RELISH, *s.* रुचिः *f.*, स्वादः -दनं, आस्वादः -दनं, रसः, *see* TASTE.—(Relish for, liking for) अभिरुचिः *f.*, रुचिः *f.*, अभिनन्दनं, अभिलाषः, अनुमोदनं.—(Something eaten with food to increase the pleasure of eating or to provoke thirst) अवदंशः, उपदंशः, खर्जिका, मद्यपासनं

To RELISH, *v. a.* (Give a nice taste) रसं दा, सुरसं दा, सुस्वादं दा, स्वादूकृ, सरसं -सां कृ, सरसीकृ, सुरसीकृ, स्वादुरसीकृ.—(Taste) आस्वाद (c. 1. -स्वादति -दितुं), रसम् आस्वाद्, रस् (c. 10. रसयति -यितुं), प्राश् (c. 9. -अश्नाति -अशितुं), प्राशनं कृ, आस्वादनं कृ, रसास्वादनं कृ.—(Like the taste of) रुच् (c. 10. रोचयति -यितुं), अभिरुच्, अभिनन्द्. *See To* LIKE.

To RELISH, *v. n.* (Have a nice taste) स्वद् (c. 1. स्वदते, स्वादते -दितुं), सुरसः -सा -सं भू, सरसः -सा -सं भू, सरसीभू, स्वादुरसीभू, रुचिरः -रा -रं भू.

RELISHED, *p. p.* आस्वादितः -ता -तं, रुचितः &c., अनुमोदितः -ता -तं.

RELUCTANCE, RELUCTANCY, *s.* अकामः, अकामता, निष्कामता, अनिच्छा, अनिच्छुता, विमुखता, अरुचिः *f.*, अनभिरुचिः *f.*, अस्पृहा, असन्तोषः.

RELUCTANT, *a.* अनिच्छुः -च्छुः -च्छु, अकामः -मा -मं, निष्कामः -मा -मं, अनिच्छुकः -का -कं, विमुखः -खा -खं, विमनाः -ता -तं, असन्तोषी -षिणी -षि (न्).

RELUCTANTLY, *adv.* अकामतस्, अकामेन, अनिच्छया, अनिच्छातस्, कृच्छ्रेण, निष्कामं, परिक्लिष्टं.

To RELY, *v. n.* अवलम्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, आलम्ब्, आश्रि (c. 1. -श्रयति -ते -यितुं), समाश्रि, उपाश्रि, संश्रि, विश्वस् (c. 2. -श्वसिति -तुं), विश्रम्भ् (c. 1. -श्रम्भते -म्भितुं), अवलम्बनं कृ.

RELYING, *part.* अवलम्बी -म्बिनी -म्बि (न्), अवलम्बितः -ता -तं, आश्रितः -ता -तं, उपाश्रितः &c., संश्रितः &c., विश्वासी &c., विश्रम्भी &c. संश्रय in comp.

To REMAIN, *v. n.* (Continue) स्था (c. 1. तिष्ठति, स्थातुं), अवस्था, पर्य्यवस्था, वृत् (c. 1. वर्त्तते -र्त्तितुं), आस् (c. 2. आस्ते), *see To* CONTINUE, *v. n.*—(Dwell, reside) स्था, अधिष्ठा, वृत्, वस् (c. 1. वसति -स्तुं), निवस्, आवस्, निली.—(Be left) शिष् in pass. (शिष्यते) अवशिष्, समवशिष्, परिशिष्, उच्छिष्, शिष्टः -ष्टा -ष्टं भू, अवशिष्टः &c. भू, उच्छिष्टः &c. भू, उद्धृत्; 'by subtracting two from six, four remain,' षड्भ्यो द्वयस्य वर्जनेन चत्वारः शिष्यन्ते; 'that which remains of the whole,' सर्व्वशेषः -षा -षं; 'those who remain alive, or those who remained out of the slain,' हतशेषः -षा -षं, हतशिष्टः -ष्टा -ष्टं.

REMAINDER, *s.* शेषः -षं, अवशेषः, अवशिष्टं, शिष्टं, उच्छिष्टं, परिशिष्टं, परिशेषः, शिष्टांशः, अवशिष्टांशः, शेषभागः, शेषखण्डः -ण्डं, परभागः, उद्धृतः, उद्धृतं, उच्छेषणं, स्थितं.—(In arithmetic) अन्तरं, अन्तरितं; 'for the remainder of one's life,' यावज्जीवं.

REMAINING, *part.* or *a.* शिष्टः -ष्टा -ष्टं, अवशिष्टः &c., अवशेषितः -ता -तं, उच्छिष्टः &c., परिशिष्टः &c., शेषः -षा -षं, उद्धृतः -ता -तं, उद्धृतः -ता -तं, अन्तरितः -ता -तं, उद्धरितः -ता -तं.

REMAINS, *s. pl.* शेषाणि *n. pl.*, शिष्टानि. *See* REMAINDER, RELIC, CORPSE.

To REMAND, *v. a.* पुनः प्रेर् (c. 10. प्रेरयति -यितुं, rt. ईर्) or प्रत्या in caus. (-स्थापयति -यितुं), पुनर् आह्वे (c. 1. -ह्वयति -ह्वातुं), पुनराह्वानं कृ, पुनरर्पणं कृ.

REMARK, *s.* (Act of taking notice) अवेक्षा -क्षणं, निरीक्षा, अपेक्षा, निरूपणं, आलोकनं, *see* OBSERVATION.—(Notice expressed in words) लिखितं, चर्चा, व्याख्या, अभिधानं, ग्रहणं, कथनं. *See* NOTE, NOTICE.

To REMARK, *v. a.* अवेक्ष्, अपेक्ष्, निरूप्, भण्. *See To* OBSERVE, NOTICE.

REMARKABLE, *a.* (Notable, extraordinary) प्रसिद्धः -द्धा -द्धं, विशिष्टः -ष्टा -ष्टं, विशेष in comp., लोकप्रसिद्धः &c., ख्यातः -ता -तं, लोकख्यातः &c., उत्कृष्टः -ष्टा -ष्टं, स्मरणीयः -या -यं, स्मरणार्हः -र्हा -र्हं, अपूर्व्वः -र्व्वा -र्व्वं, आश्चर्य्यः -र्य्या -र्य्यं, अद्भुतः -ता -तं.—(To be observed) विभाव्यः -व्या -व्यं, *see* OBSERVABLE, NOTICEABLE.

REMARKABLY, *adv.* विशिष्टप्रकारेण, उत्कृष्टप्रकारेण, अद्भुतं, स्मरणीयं.

REMARKED, *p. p.* अभिहितः -ता -तं, भणितः &c., कथितः &c., निरूपितः &c.

REMARRIED, *p. p.* पुनरूढः -ढा -ढं, पुनर्विवाहितः -ता -तं, पुनरुद्वाहितः &c.

REMEDIABLE, *a.* प्रतिकार्य्यः -र्य्या -र्य्यं, प्रतीकार्य्यः &c., उपायसाध्यः -ध्या -ध्यं, उपायप्रतिकार्य्यः &c., चिकित्स्यः -त्स्या -त्स्यं, चिकित्सनीयः -या -यं.

चिकित्सितुं शक्यः &c., शमनीयः -या -यं, उपायपरिहार्य्यः &c., परिहार्य्यः &c., समाधेयः -या -यं, प्रतिसमाधेयः &c., परिच्छेद्यः -द्या -द्यं, उपाययोग्यः -ग्या -ग्यं, उपचारयोग्यः &c., शक्यप्रतिकारः -रा -रं, शक्यपरिच्छेदः -दा -दं, शक्योपचारः -रा -रं, शक्योपायः -या -यं, विद्यमानप्रतीकारः &c.

REMEDIAL, *a.* प्रतिकारकः -रिका -कं, प्रतीकारी -रिणी -रि (न्), उपायसाधकः -का -कं, उपायदः -दा -दं, उपायकारी &c., परिहारकः &c., अभिघाती &c., प्रतिघाती &c.

REMEDIED, *p.p.* प्रतिकृतः -ता -तं, परिच्छिन्नः -न्ना -न्नं, परिहृतः -ता -तं, चिकित्सितः -ता -तं, शमितः &c., उपायसाधितः &c., उपायप्रतिकृतः &c., लब्धौषधः -धा -धं.

REMEDILESS, *a.* निरुपायः -या -यं, अनुपायः &c., उपायहीनः -ना -नं, निरुपचारः -रा -रं, उपचारशून्यः -न्या -न्यं, उपायासाध्यः -ध्या -ध्यं, गतिहीनः -ना -नं, अप्रतिकारः -रा -रं, अपरिच्छेदः -दा -दं. *See* IRREMEDIABLE, INCURABLE.

REMEDY, *s.* (Medicine) भेषजं, भैषज्यं, भैषजं, औषधं, अगदः, वैद्योपचारः.—(That which cures or counteracts an evil of any kind) प्रतिकारः, प्रतीकारः, प्रतिक्रिया, प्रतिविधिः *m.*, उपायः, उपचारः, परिच्छेदः, प्रतिसमाधानं, समाधानं, अभिघातः, प्रतिघातः, उपचर्य्या, उपक्रमः, चिकित्सा; 'mild remedy,' सामोपायः, सामोपचारः, सौम्योपचारः; 'violent remedy,' राक्षसोपायः.

To REMEDY, *v. a.* प्रतिकृ, प्रतिसमाधा (c. 3. -दधाति -धातुं), समाधा, उपायेन प्रतिकृ or शम् (c. 10. शमयति -यितुं), कित् in des. (चिकित्सति -त्सितुं), स्वस्थं -स्थां कृ, परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उपचारं कृ, उपायप्रयोगं कृ, भिषज (nom. भिषज्यति), औषधीकृ; 'by mild measures,' सामोपायैः प्रतिकृ.

To REMEMBER, *v. a.* स्मृ (c. 1. स्मरति, स्मर्त्तुं), अनुस्मृ, संस्मृ, अनुसंस्मृ, अभिसंस्मृ, अनुचिन्त् (c. 10. -चिन्तयति -यितुं), समनुचिन्त्, अनुबुध् (c. 4. -बुध्यते -बोद्धुं), स्मरणं कृ, हृदये कृ, मनसि कृ.—(Recollect) स्मृ, अभिज्ञा. *See To* RECOLLECT.

REMEMBERED, *p.p.* स्मृतः -ता -तं, संस्मृतः &c., हृदयस्थः -स्था -स्थं, हृद्गतः &c.

REMEMBERER, *s.* स्मर्त्ता *m.* (र्त्तृ), स्मरणकृत्, स्मृतिमान् *m.* (त्), अनुचिन्तकः.

REMEMBRANCE, *s.* स्मरणं, स्मृतिः *f.*, संस्मृतिः *f.*, संस्मरणं, अनुस्मृतिः *f.*, स्मर्त्तृत्वं, अविस्मृतिः *f.*, अनुचिन्ता, धारणं -णा, अवधारणं; 'continual remembrance,' सततस्मरणं. *See* RECOLLECTION.—(Memorial, memento) स्मारकवस्तु *n.*, स्मारकविषयः, स्मारणं, स्मरणार्थकवस्तु *n.*, स्मृतिचिह्नं; 'of friendship,' प्रीतिदानं, प्रीतिदायं. *See* MEMORIAL.

REMEMBRANCER, *s.* स्मारकः, स्मारणः -णं, उद्बोधकः, स्मरणकारी *m.* (न्).

To REMIND, *v. a.* स्मृ (c. 10. स्मारयति -यितुं), संस्मृ, अनुस्मृ, बुध् (c. 10. बोधयति -यितुं), उद्बुध्, प्रबुध्, प्रतिबुध्, सूच् (c. 10. सूचयति -यितुं), स्मारणं कृ, स्मृतिं or स्मरणं जन् (c. 10. जनयति -यितुं), सूचनं कृ. The construction of the sentence will require 2 acc.; as, 'the Kandalí with its flowers reminds me of her eyes,' कुसुमैः कन्दली स्मारयति मां लोचने तस्याः; 'the Vimba reminds me of her lower lip,' विम्बं स्मारयति माम् अधरं तस्याः.

REMINDED, *p. p.* स्मारितः -ता -तं, उद्बोधितः -ता -तं, उद्बुद्धः -द्धा -द्धं.

REMINDING, REMINDER, *part.* or *s.* स्मारकः -का -कं, स्मृतिजनकः -का -कं, स्मारणः -णा -णं, उद्बोधकः -का -कं, उपलम्भकः -का -कं.

REMINISCENCE, *s.* स्मृतिः *f.*, स्मरणं. *See* MEMORY, RECOLLECTION.

REMISS, *a.* अनवधानः -ना -नं, अनवहितः -ता -तं, असावधानः &c., उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, मन्दादरः -रा -रं, अव्यवसायी -यिनी -यि (न्), अव्यवसायवान् -वती -वत् (त्), शिथिलः -ला -लं, शिथिलोद्योगः -गा -गं, शिथिलयत्नः -त्ना -त्नं, अलसः -सा -सं, प्रमत्तः -त्ता -त्तं.

REMISSION, *s.* (Relaxation) शैथिल्यं, शिथिलता, मोचनं, मुक्तिः *f.*—(Abatement) शान्तिः *f.*, उपशान्तिः *f.*, शमः, उपशमः.—(Release) मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः, उद्धारः, निस्तारः, विसर्जनं.—(Pardon) क्षमा, क्षान्तिः *f.*, मोचनं, मुक्तिः *f.*, निष्कृतिः *f.*; 'of sin,' पापमोचनं, पापमुक्तिः *f.*, पापमार्जना.—(Intermission) विरामः, विरतिः *f.*, अवरतिः *f.*, निवृत्तिः *f.*, विच्छेदः, छेदः; 'of study, &c.,' अवकाशः, अनध्यायः, अध्ययनविरामः, अध्ययननिवृत्तिः *f.*

REMISSLY, *adv.* अनवधानेन, अनवहितं, मन्दादरं, अनपेक्षया, सशैथिल्यं.

REMISSNESS, *s.* अनवधानं -नता, अनवहितत्वं, उपेक्षा, अनपेक्षा, अनवेक्षा, अव्यवसायः, प्रमादः, प्रमत्तता, शैथिल्यं, शिथिलता, यत्नशैथिल्यं, अयत्नः.

To REMIT, *v. a.* (Relax, slacken) शिथिलीकृ, शिथिल (nom. शिथिलयति -यितुं), मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, अवसृज्, विसृज्.—(Abate, diminish) शम् (c. 10. शमयति -यितुं), उपशम्, न्यूनीकृ, लघूकृ.—(Release, relinquish) मुच्, विमुच्, मोक्ष्, विसृज् (c. 6. -सृजति -स्रष्टुं), अवसृज्, त्यज्.—(Pardon) क्षम् (c. 1. क्षमते -ति, क्षन्तुं), संक्षम्, मुच्, विमुच्, पापमोचनं कृ.—(Transmit, as money, &c.) संचर् in caus., धनादि संक्रम् in caus., हुण्डिकापत्रद्वारा or लेख्यपत्रादिद्वारा धनं समृ in caus.

To REMIT, *v. n.* (Become less intense) शिथिलीभू, शम् (c. 4. शाम्यति शमितुं), उपशम्, प्रशम्, न्यूनीभू.

REMITTANCE, *s.* (The act) हुण्डिकापत्रद्वारा or लेख्यपत्रादिद्वारा धनसमर्पणं or धनसंक्रान्तिः *f.*—(The sum) लेख्यपत्रद्वारा समर्पितधनं.

REMITTED, *p.p.* मुक्तः -क्ता -क्तं, मोचितः -ता -तं, अवसृष्टः -ष्टा -ष्टं, शान्तः -न्ता -न्तं, उपशान्तः &c., क्षान्तः &c., त्यक्तः -क्ता -क्तं.

REMITTENT, *a.* विषमः -मा -मं, सन्ततः -ता -तं, आवरतः -ता -तं; 'fever' विषमज्वरः, सन्ततज्वरः.

REMNANT, *s.* शेषः -षं, शिष्टं, अवशिष्टं, उच्छिष्टं. *See* REMAINDER.

REMONSTRANCE, *s.* आपत्तिः *f.*, आपत्तिवचनं, आपत्त्यभिभाषणं, आपत्तिलेखः, प्रत्यादेशकवादः, प्रबोधवाक्यं, औपदेशिकवादः. *See* EXPOSTULATION.

To REMONSTRATE, *v. n.* आपत्तिं कृ, आपत्तिपूर्व्वं वद् (c. 1. वदति -दितुं) or भाष्, आपत्तिवादं कृ, प्रत्यादिश् (c. 6. -दिशति -देष्टुं). *See To* EXPOSTULATE.

REMORSE, *s.* पश्चात्तापः, पश्चात्सन्तापः, अनुतापः, मनस्तापः, अनुशोकः, अनुशोचनं, अन्वाधिः *m.*, अनुशयः.

REMORSEFUL, *a.* पश्चात्तापी -पिनी -पि (न्), अनुतापी &c., अनुतप्तः -प्ता -प्तं.

REMORSELESS, *a.* निर्दयः -या -यं, उग्रदण्डः -ण्डा -ण्डं. *See* RELENTLESS.

REMOTE, *a.* दूरः -रा -रं, दूरस्थः -स्था -स्थं, दूरस्थितः -ता -तं, दूरस्थायी -यिनी -यि (न्), दूरवर्त्ती -र्त्तिनी &c., विदूरः &c., विप्रकृष्टः -ष्टा -ष्टं, असन्निकृष्टः &c., असन्निहितः -ता -तं, दविष्ठः -ष्ठा -ष्ठं, दवीयान् -यसी -यः (स्), अनुपस्थायी &c., अनुपस्थः -स्था -स्थं, नोपस्थः &c., नोपस्थाता -त्री -तृ (तृ), असमीपः -पा -पं, आरातीयः -या -यं, परः -रा -रं.

REMOTELY, *adv.* दूरं, दूरात् -रेण, विदूरं, विप्रकृष्टं, असमीपं.

REMOTENESS, *s.* दूरता -त्वं, विदूरता -त्वं, दूरस्थता, असन्निधानं, असान्निध्यं, विप्रकर्षः, असमीपता, असामीप्यं, असन्निकर्षः.

REMOVABLE, *a.* अपनेयः -या -यं, अपनेतव्यः -व्या -व्यं, अपनयनीयः -या -यं, अपहरणीयः -या -यं, अपहार्य्यः -र्य्या -र्य्यं, हार्य्यः &c., परिहार्य्यः &c., अपादेयः -या -यं, व्यावर्त्त्यः -र्त्त्या -र्त्त्यं, विनेयः -या -यं, अपसार्य्यः &c., स्थानान्तरकरणीयः &c.

REMOVAL, *s.* (Act of removing or causing to change place) अपनयनं, विनयनं, अपसारणं, उत्सारणं, निःसारणं, सारणं, अपहरणं,

हरणं, अपहारः, परिहारः, अपकर्षणं, अपादानं, अपवर्जनं, अपनोदः -दनं, अपनुत्तिः *f.*, चालनं, विचालनं, स्थानान्तरीकरणं, स्थलान्तरीकरणं. —(State of being removed, change of place, going away) स्थानभेदः, स्थलभेदः, स्थानान्तरं, स्थलान्तरं, अपगमः, अपायः, विचलनं, अपसरः -रणं, अपयानं, व्यावृत्तिः *f.*, व्यावृतिः *f.*—(Act of displacing or expelling) निरसनं, निरासः, अपासनं, निराकरणं, निराकृतिः *f.*, अपाकृतिः *f.*, अपाकरणं, निष्कासनं, निःकासनं, अपसारणं, अपनोदनं, बहिष्करणं, दूरीकरणं, निकृतिः *f.*; 'from an office,' पदात् or स्थानात् प्रभ्रंशनं or निराकरणं, पदभ्रंशनं.—(Putting an end to) खण्डनं, नाशः -शनं, परिच्छेदः, उच्छेदः, उद्धरणं, अभिघातः, प्रतिघातः, साधनं, सिद्धिः *f.*, प्रतिकारः, प्रतीकारः; 'removal of obstacles,' विघ्ननाशनं, विघ्नसिद्धिः *f.*, विघ्नखण्डनं; 'of ignorance,' अज्ञानखण्डनं; 'of disease,' रोगनाशः, रोगप्रतीकारः; 'of fear,' भयप्रतीकारः.

To REMOVE, *v. a.* (Take away) अपनी (c. 1. -नयति -नेतुं), विनी, व्यपनी, अपसृ (c. 10. -सारयति -यितुं), उत्सृ, निःसृ, सृ, अपहृ (c. 1. -हरति -हर्तुं), हृ, अपकृष् (c. 1. -कर्षति -क्रष्टुं), व्यपकृष्, अवकृष्, अपादा (c. 3. -ददाति -दातुं), अपनुद् (c. 6. -नुदति -नोत्तुं), अपानुद्, व्यपनुद्, व्यपानुद्, अपोह् (c. 1. अपोहते -ति -हितुं, rt. ऊह्), व्यपोह्.—(Move, cause to change place) विचल् (c. 10. -चालयति -यितुं), चल्, स्थानान्तरं गम् in caus., स्थानान्तरीकृ, स्थलान्तरीकृ, अन्यत्र कृ.—(Displace, expel) निरस् (c. 4. -अस्यति -सितुं), अपास्, निराकृ, अपाकृ, निष्कस् (c. 10. -कासयति -यितुं), अपसृ in caus., अपनुद्, अपसिध् (c. 1. -सेधति -सेद्धुं), बहिष्कृ, बहिः कृ, दूरीकृ; 'from an office, &c.,' पदात् or स्थानात् प्रभ्रंश् (c. 10. -भ्रंशयति -यितुं) or भ्रंश् or च्यु in caus. (च्यावयति -यितुं) or निराकृ.—(Put an end to) खण्ड् (c. 10. खण्डयति -यितुं), नश् (c. 10. नाशयति -यितुं), उद्धृ (c. 1. उद्धरति, उद्धर्तुं, rt. हृ), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), परिच्छिद्, प्रतिकृ; 'doubt is removed,' अपनीयते or निर्णीयते संशयः.

To REMOVE, *v. n.* (Move or change place) चल् (c. 1. चलति -लितुं), विचल्, स्थानान्तरं गम् (c. 1. गच्छति, गन्तुं), स्थलान्तरं गम् or या.—(Change residence) वासान्तरं गम् or या, गृहान्तरं गम्.—(Go away) अपगम्, अपसृ (c. 1. -सरति -सर्त्तुं), अपया (c. 2. -याति -तुं).

REMOVE, *s.* (Removing or changing place), *see* REMOVAL.—(Going away) अपगमः, अपसरः -रणं, अपयानं.—(Step in a scale) पदं, पदविः -वी *f.*, क्रमः.

REMOVED, *p.p.* (Taken away) अपनीतः -ता -तं, अपसारितः &c., उत्सारितः &c., निःसारितः &c., अपहृतः -ता -तं, हृतः &c., अपकर्षितः &c., अपनोदितः &c., अपोढः -ढा -ढं.—(Moved, changed in place) चालितः -ता -तं, विचालितः &c., स्थानान्तरीकृतः -ता -तं, स्थानान्तरगतः &c., स्थानान्तरकृतः &c., स्थानान्तरक्रमितः &c., स्थानान्तरप्राप्तः -प्ता -प्तं, स्थलान्तरीकृतः &c., व्यावृत्तः -त्ता -त्तं, व्यावृतः &c.—(Displaced, expelled) निरस्तः -स्ता -स्तं, अपास्तः &c., उदस्तः &c., परास्तः &c., निराकृतः -ता -तं, अपाकृतः &c., निष्कासितः &c., बहिष्कृतः &c., दूरीकृतः &c., निर्धूतः -ता -तं, अवधूतः &c., निकृतः &c., विप्रकृतः &c., अपकृष्टः -ष्टा -ष्टं, अवसृष्टः &c., प्रत्यादिष्टः -ष्टा -ष्टं, प्रत्याख्यातः -ता -तं; 'from office,' स्थानभ्रष्टः -ष्टा -ष्टं, स्थानात्प्रभ्रंशितः &c., पदच्यावितः -ता -तं.

REMOVER, *s.* अपनेता *m.* (तृ), अपनायकः, विनायकः, अपहारकः, अपहारी *m.* (न्), हारी *m.*, हारकः, हरः in comp., अभिहरः, अपकर्षी *m.* (न्), अपनोदकः, अपहः in comp., हः in comp., घ्नः in comp., नाशकः, नाशी *m.*, अन्तकः in comp.; 'remover of obstacles,' विघ्नविनायकः, विघ्नहारी *m.*, विघ्नहृत्, विघ्नान्तकः, विघ्ननाशनः; 'of fear,' भयापहः; 'of disease,' रोगघ्नः, रोगापहः, रोगान्तकः; 'of wind,' मारुतापहः.

To REMUNERATE, *v. a.* *See To* RECOMPENSE, REWARD, COMPENSATE.

REMUNERATED, *p.p.* गृहीतपारितोषिकः -का -कं, गृहीतवेतनः -ना -नं.

REMUNERATION, *s.* पारितोषिकं, वेतनं, फलं, निस्तारः, *see* COMPENSATION.

RENCOUNTER, *s.* *See* ENCOUNTER, CLASH, COLLISION.

To REND, *v. a.* दॄ (c. 9. दृणाति, दरितुं -रीतुं, c. 10. दारयति -यितुं), विदॄ, अवदॄ, भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, निर्भिद्, विदल् (c. 10. -दलयति -यितुं), विदलीकृ, दल्, छिद्, व्यवछिद्, विच्छिद्, खण्ड् (c. 10. खण्डयति -यितुं); 'in two,' द्विधा भिद् or छिद्, द्विखण्डीकृ.

RENDER, *s.* (One who tears) विदारकः, दारकः, विभेदकः.

To RENDER, *v. a.* (Pay back, restore) प्रतिदा, पुनर् दा, प्रत्यृ in caus. (प्रत्यर्पयति -यितुं, rt. ऋ), प्रतिपद् in caus.—(Give, afford) दा, प्रदा, प्रयम् (c. 1. -यच्छति -यन्तुं), प्रतियम्, प्रतिपद् (c. 10. -पादयति -यितुं), ऋ in caus. (अर्पयति -यितुं), उपस्था in caus., उपकृप्.—(Cause to be, make, effect) कृ, जन् (c. 10. जनयति -यितुं), साध् (c. 10. साधयति -यितुं), उत्पद् (c. 10. -पादयति -यितुं), युक्तं -क्तां कृ, विशिष्टं -ष्टां कृ, कल् (c. 10. कलयति -यितुं). Or more commonly expressed by the use of the caus. form of any verb; as 'to render proud,' दृप् in caus. (दर्पयति -यितुं); 'to render fat,' प्यै in caus. (प्याययति -यितुं); 'to render illustrious,' यशस्विनं कृ, कीर्त्तिं दा.—(Translate) भाषान्तरीकृ, अनुवद्.

RENDERED, *p.p.* (Restored) प्रतिदत्तः -त्ता -त्तं, प्रत्यर्पितः -ता -तं, प्रतिपादितः &c.—(Given) दत्तः -त्ता -त्तं, अर्पितः &c.—(Made, caused to be) कृत in comp., जात in comp., जनितः -ता -तं, or expressed by the pass. part. of the caus. form; 'rendered poor,' दरिद्रीकृतः -ता -तं; 'rendered proud,' जातदर्पः -र्पा -र्पं, दर्पितः -ता -तं; 'rendered beautiful,' शोभितः -ता -तं; 'rendered populous,' वासितः -ता -तं; 'rendered unfriendly,' विकारितः -ता -तं.

RENDERING, *s.* (Version) भाषान्तरं, पाठः, पाठान्तरं.

RENDEZ-VOUS, *s.* समागमस्थानं, सङ्गमस्थानं, सङ्केतस्थानं, सङ्केतस्थलं.

To RENDEZ-VOUS, *v. n.* सङ्केतस्थाने समागम् (c. 1. -गच्छति -गन्तुं) or संगम्.

RENDING, *s.* विदारः -रणं, दारणं, विदरः, विभेदनं, भिदा, स्फुटनं.

RENEGADE, RENEGADO, *s.* स्वपक्षत्यागी *m.* (न्), स्वधर्मत्यागी *m.*, स्वधर्मभ्रष्टः.

To RENEW, *v. a.* (Make new) नवीकृ, नवीनीकृ, नवं -वां कृ, नवीनं -नां कृ, नूतनं -नां -नं कृ, नूतनीकृ.—(Restore to a former state, repair) पूर्ववत् कृ, पूर्वावस्थां or पूर्वदशां गम् (c. 10. गमयति -यितुं) or नी (c. 1. नयति, नेतुं), प्रतिसमाधा, प्रतिकृ, प्रतिसंकृ, उद्धृ (c. 1. उद्धरति, उद्धर्तुं, rt. हृ), उद्धरणं कृ, जीर्णोद्धारं कृ.—(Make or do again) पुनः कृ, वारं वारं कृ, मुहुः कृ.—(Begin again) पुनर् आरभ्, पुनरारम्भं कृ.

RENEWABLE, *a.* नवीकरणीयः -या -यं, पुनःकरणीयः &c., उद्धरणीयः &c.

RENEWAL, *s.* (Making new) नवीकरणं, नवीनीकरणं, नूतनीकरणं.—(Restoration to a former state, repairing) पूर्ववत्करणं, प्रतिसमाधानं, सन्धानं, समाधानं, उद्धरणं, उद्धारः, जीर्णोद्धारः.—(Doing again, beginning again) पुनःकरणं, पुनरारम्भः.

RENEWED, *p.p.* नवीकृतः -ता -तं, नवीनीकृतः &c., पुनःकृतः &c., पूर्ववत्कृतः &c.

To RENOUNCE, *v. a.* (Disown, disclaim) प्रत्याख्या (c. 2. -ख्याति -तुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपह्नु, निरस्

(c. 4. -अस्यति -सितुं), अपास्, उदस्, व्युदस्, निराकृ, प्रत्याचक्ष्, न स्वीकृ, न ग्रह्, न अङ्गीकृ.—(Relinquish) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, संत्यज्, हा (c. 3. जहाति, हातुं), विहा, अपहा, अपाहा, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अवसृज्, व्यपसृज्, अपसृज्, प्रोज्झ् (c. 6. -उज्झति -उज्झितुं), उज्झ्, पृष्ठतः कृ; 'to renounce the world,' संन्यस्, संन्यासं कृ, सर्व्वसङ्गान् परित्यज्.

Renounced, *p. p.* प्रत्याख्यातः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, त्यक्तः -क्ता -क्तं, परित्यक्तः &c., निरस्तः -स्ता -स्तं, अपास्तः &c., संन्यस्तः &c.

To renovate, *v. a.* नवीकृ, नवीनीकृ, नूतनीकृ, पूर्व्ववत् कृ. *See To* renew.

Renovated, *p.p.* नवीकृतः -ता -तं, पूर्व्ववत्कृतः &c. *See* Renewed.

Renovation, *s.* नवीकरणं, नवीनीकरणं, नवता, नवीनता, नूतनावस्था, नवताप्राप्तिः *f.*, उद्धारः. *See* Renewal.

Renown, *s.* कीर्त्तिः *f.*, ख्यातिः *f.*, यशस् *n.*, विश्रुतिः *f.*, प्रतिपत्तिः *f.*, प्रख्यातिः *f.*, प्रतिख्यातिः *f.*, आख्या, प्रख्या. *See* Fame.

Renowned, *a.* कीर्त्तिमान् -मती -मत् (त्), यशस्वी -स्विनी -स्वि (न्), ख्यातः -ता -तं, आख्यातः &c., प्रख्यातः &c., प्रसिद्धः -द्धा -द्धं, सुप्रसिद्धः &c., जगत्प्रसिद्धः &c., ख्यातापन्नः -न्ना -न्नं, प्रतिष्ठितः -ता -तं, आख्यासम्पन्नः -न्ना -न्नं, प्रथितः -ता -तं, विश्रुतः &c., महायशाः -शाः -शः (स्), प्राप्तयशाः &c., कीर्त्तियुतः -ता -तं, कीर्त्तियुक्तः -क्ता -क्तं, नामधारी &c., रूढः -ढा -ढं.

Rent, *p.p.* (Torn) विदारितः -ता -तं, विदीर्णः -र्णा -र्णं, दारितः &c., दीर्णः &c., प्रविदारितः &c., दलितः -ता -तं, विदलितः &c., भिन्नः -न्ना -न्नं, विभिन्नः &c., पाटितः -ता -तं, स्फुटः -टा -टं, स्फुटितः -ता -तं.

Rent, *s.* (Tear) छिद्रं, भेदः, भित्तिः *f.*, भङ्गः, विदरः, दरी, दारणं, छेदः.—(Revenue) करः, महाकरः, उत्पन्नं, *see* Produce.—(Sum paid for any thing held of another) करः, मूल्यं; 'raising the rent of land,' परिव्ययः.

To rent, *v. a.* (Grant the possession of lands &c., by lease, for a certain sum) पट्टोलिकापूर्व्वं निरूपितमूल्यमपेक्ष्य क्षेत्रगृहादि परप्रयोजनीयं दा, आविहितकालाद् वार्षिकमूल्यमपेक्ष्य क्षेत्रगृहादि परहस्ते समृ in caus.—(Take or hold by lease) पट्टोलिकापूर्व्वं वार्षिकमूल्यं प्रतिज्ञाय क्षेत्रगृहादि परहस्ताद् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or परहस्ताद् गृहीत्वा प्रयुज् or परहस्ताद् गृहीत्वा अध्यास् or अधिवस्.

Rental, rent-roll, *s.* करपरिसंख्या, करपरिसंख्यापत्रं.

Renter, *s.* (One who leases) पट्टदायी *m.* (न्), पट्टदः.—(One who takes on lease) पट्टादायी *m.* (न्), पट्टग्राही *m.*, पट्टधारी *m.*, पट्टोलिकाधारी *m.*

Renunciation, *s.* प्रत्याख्यानं, प्रत्यादेशः, त्यागः, परित्यागः, उत्सर्गः, उत्सर्जनं, विसर्गः, विसर्जनं, निरसनं, निरासः, प्रोज्झनं, वर्जनं, परिहारः, अस्वीकारः, अग्रहणं; 'of the world,' संन्यासः, संन्यासित्वं, सर्व्वसङ्गपरित्यागः.

Repaid, *p. p.* प्रतिदत्तः -त्ता -त्तं, प्रत्यर्पितः -ता -तं, प्रतिकृतः -ता -तं.

To repair, *v. a.* (Restore to a sound state, after decay, &c.) प्रतिसमाधा (c. 3. -दधाति -धत्ते -धातुं), पुनः समाधा, पुनः सन्धा, उद्धृ (c. 1. उद्धरति, उद्धर्त्तुं, rt. हृ), उद्धारं कृ, जीर्णोद्धारं कृ, जीर्णोद्धरणं कृ, प्रतिकृ, प्रतिसंकृ, पुनः स्वस्थं -स्थां कृ or स्वस्थीकृ, पुनः सुस्थं -स्थां कृ or सुस्थ (nom. सुस्थयति -यितुं), साध् (c. 10. साधयति -यितुं), पूर्व्ववत् कृ, सन्धानं कृ, प्रतिसमाधानं कृ.—(Make good a loss) क्षतिं पॄ (c. 10. पूरयति -यितुं) or सम्पॄ, क्षतिपूरणं कृ, क्षतिनिष्कृतिं कृ, क्षतिं निष्कृ or शुध् (c. 10. शोधयति -यितुं), हानिपूरणं कृ, हानिप्रतिकारं कृ.

To repair, *v. n.* (Have recourse, go to) आश्रि (c. 1. -श्रयति -यितुं), श्रि, आश्रयणं कृ, शरणार्थं गम् (c. 1. गच्छति, गन्तुं) or आगम् or उपगम् or अभिगम् or प्रतिगम् or या (c. 2. याति -तुं) or अभिया or प्रयाया or इ (c. 2. एति -तुं), अभ्युपे.

Repair, *s.* प्रतिसमाधानं, सन्धानं, पुनः सन्धानं, समाधानं, साधनं, उद्धारः, जीर्णोद्धारः, जीर्णोद्धरणं, प्रतिकारः, प्रतीकारः, प्रतिकरणं, स्वस्थकरणं, सुस्थकरणं, पूर्व्ववत्करणं.

Repaired, *p. p.* जीर्णोद्धृतः -ता -तं, पुनः सन्धितः -ता -तं, पुनः साधितः &c., प्रतिसमाहितः &c., पुनः समाहितः &c., पूर्व्ववत्कृतः &c., प्रतिकृतः &c., स्वस्थीकृतः &c., स्वस्थः -स्था -स्थं, सुस्थीकृतः &c., सुस्थितः &c.

Repairer, *s.* जीर्णोद्धारकः, जीर्णोद्धर्त्ता *m.* (र्त्तृ) सन्धाता *m.* (तृ).

Reparable, *a.* सन्धेयः -या -यं, समाधेयः &c., प्रतिसमाधेयः &c., साध्यः -ध्या -ध्यं, साधनीयः -या -यं, प्रतिकार्य्यः -र्य्या -र्य्यं, उद्धार्य्यः &c. उद्धरणीयः -या -यं.

Reparation, *s.* (Repair), *see* above.—(Amends) क्षतिपूरणं, हानिपूरणं, क्षतिनिष्कृतिः *f.*, हानिनिष्कृतिः *f.*, क्षतिशोधनं. *See* Indemnity, Compensation.

Repartee, *s.* रसिकोत्तरं, सरसोत्तरं, सरसप्रत्युक्तिः *f.*, भङ्गिः *f.*

Repast, *s.* आहारः, भोजनं, भक्षणं, भक्षिका, अशनं, प्राशनं, अभ्याहारः; 'light repast,' लघुभोजनं, लघ्वाहारः, अल्पाहारः, उपाहारः, फलाहारः.

To repay, *v. a.* प्रतिदा (c. 3. -ददाति -दत्ते -दातुं), पुनर् दा or प्रदा, पुनर् ऋ in caus. (अर्पयति -यितुं), प्रत्यृ, पुनः प्रतिपद् (c. 10. -पादयति -यितुं) or प्रयम् (c. 1. -यच्छति -यन्तुं), निर्यत् (c. 10. -यातयति -यितुं), निर्वृत् (c. 10. -वर्त्तयति -यितुं), प्रतिकृ.—(Requite) प्रतिकृ, निर्यत्, प्रतिफल (nom. प्रतिफलयति -यितुं); 'to repay a kindness,' प्रत्युपकारं कृ, प्रत्युपकृ; 'an injury,' प्रत्यपकृ, प्रत्यपकारं कृ.—(Compensate) प्रतिफलं दा, निष्कृतिं दा or कृ, निस्तारं कृ, अपाकृ, निष्कृ, *see To* compensate, recompense.

Repayment, *s.* प्रतिदानं, पुनर्दानं, प्रत्यर्पणं, पुनरर्पणं, प्रतिपादनं, पुनःप्रतिपादनं, निर्यातनं, निवर्त्तनं, प्रतिफलं. *See* Requital, Recompense, Compensation.

To repeal, *v. a.* परावृत् (c. 10. -वर्त्तयति -यितुं), निवृत्, प्रचारपरावर्त्तं कृ, प्रचारनिवर्त्तनं कृ, लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, प्रचारलोपं कृ, खण्ड् (c. 10. खण्डयति -यितुं), प्रचारखण्डनं कृ, अवरुह् in caus. (-रोपयति -यितुं), प्रचारभङ्गं कृ, प्रचारभञ्जनं कृ, उच्छिद्, उच्छेदं कृ, प्रचारोच्छेदं कृ, प्रचाररोधं कृ.

Repeal, *s.* परावर्त्तः -र्त्तनं, निवर्त्तनं, प्रचारपरावर्त्तः, प्रचारनिवर्त्तनं, लोपः, प्रचारलोपः, खण्डनं, अवरोपः -पणं, भङ्गः, प्रचारभङ्गः, अनुशयः, उच्छेदः, निरूहरणं.

Repealable, *a.* परावर्त्त्यः -र्त्त्या -र्त्त्यं, निवर्त्त्यः &c., लोपनीयः -या -यं.

Repealed, *p. p.* परावृत्तः -त्ता -त्तं, परावर्त्तितः -ता -तं, निवर्त्तितः &c., निवृत्तः -त्ता -त्तं, लुप्तः -प्ता -प्तं, खण्डितः -ता -तं, अवरोपितः &c., उच्छिन्नः -न्ना -न्नं.

Repealer, *s.* परावर्त्तकः, लोपकारी *m.* (न्), परावर्त्तवादी *m.* (न्).

To repeat, *v. a.* (Say again) पुनर् वद् (c. 1. वदति -दितुं), अनुवद्, मुहुर् वद्, अनुवच् (c. 2. -वक्ति -क्तुं), पुनर् वच्, पुनरुक्तिं कृ, पुनर्वचनं कृ, मुहुर्वचनं कृ, आम्रेड् (c. 1. -म्रेडति -डितुं), पुनर् भाष्, मुहुर्भाषां कृ.—(Do or make again) पुनः कृ, पुनः पुनः कृ, मुहुः कृ, पुनर् विधा, पुनर् अनुष्ठा or आवृत् in caus., मुहुर् अनुष्ठा, वारं वारं कृ.—(Rehearse, recite) पठ् (c. 1. पठति -ठितुं), सम्पठ्, अनुपठ्, कथ् (c. 10. कथयति -यितुं), आख्या (c. 2. -ख्याति -तुं), समाख्या, श्रु (c. 10. श्रावयति -यितुं), गॄ (c. 9. गृणाति, गरितुं -रीतुं), पठनं कृ.—

(Tell) कथ्, वद्.—(A sound or word) आम्रेड्, आम्रेडनं कृ.

Repeated, *p. p.* (Said again) पुनरुक्तः -क्ता -क्तं, मुहुरुक्तः &c., पुनर्भाषितः -ता -तं; 'said twice,' द्विरुक्तः -क्ता -क्तं.—(Done again or often) पुनः कृतः -ता -तं, पुनरावृत्तः -त्ता -त्तं, पुनरावर्त्तितः -ता -तं, पुनः पुनः कृतः &c., मुहुः कृतः &c., वारं वारं कृत &c., पौनःपुनिकः -की -कं, अभीक्ष्णः -क्ष्णा -क्ष्णं; 'twice,' द्विरावृत्तः &c.—(Recited, told) पठितः -ता -तं, कथितः &c.

Repeatedly, *adv.* पुनः, पुनर्, मुहुस्, मुहुर्मुहुस्, वारं वारं, अनुवारं, असकृत्, भूयस्, भूयोभूयस्, बहुवारं, वारेण, शश्वत्, अनेकशस्.

Repeater, *s.* अनुवादकः, अनुवादी *m.* (न्), कथकः, आख्यायकः.

To **repel**, *v. a.* प्रतिहन् (c. 2. -हन्ति -न्तुं), पराहन्, व्याहन्, प्रतिसृ (c. 10. -सारयति -यितुं), अपास्, प्रतिवृ (c. 10. -वारयति -यितुं), निवृ, वृ, अपानुद् (c. 6. -नुदति -नोत्तुं), व्यपानुद्, अपनुद्, प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), समवक्षिप्, प्रतिबाध् (c. 1. -बाधते -धितुं), निरस् (c. 4. -अस्यति -असितुं), अपास्, परास्, निराकृ, अपाकृ, प्रतिकृ, अपोह् (c. 1. -उहते -हितुं), अपावृत् in caus., प्रत्यादिश् (c. 6. -दिशति -देष्टुं), निवृत् in caus. *See* *To* **resist**.

Repelled, *p. p.* पराहतः -ता -तं, प्रतिहतः &c., व्याहतः &c., प्रतिसारितः -ता -तं, प्रतिवारितः &c., परास्तः -स्ता -स्तं, निरस्तः &c., निराकृतः &c., अपावृत्तः -त्ता -त्तं, अपनोदितः -ता -तं.

Repellent, **repelling**, *a.* or *part.* प्रतिघाती -तिनी -ति (न्), प्रतिवारकः -का -कं, निवारकः &c., प्रतिवारणः -णा -णं, प्रतिसारकः &c., प्रतिकारकः -का -कं; 'a repellent,' प्रतिकारः -रं, प्रतीकारः -रं.

Repelling, *s.* प्रतिघातः -तनं, प्रतिसारणं, प्रतिवारणं, निवारणं, वारणं, निराकरणं, निरसनं, परासनं, प्रतिकारः, प्रतिकरणं.

To **repent**, *v. n.* (Feel regret or remorse) अनुतप् in pass. (-तप्यते), पश्चात् तप्, प्रत्यनुतप्, पश्चात् सन्तप्, तप्, मनसा तप्, अनुशुच् (c. 1. -शोचति -चितुं), पश्चात् शुच्, खिद् in pass. (खिद्यते), पश्चात् खिद्, अनुशी (c. 2. -शेते -शयितुं), पापस्मृत्या पीड् in pass., अनुतापं कृ, पश्चात्तापं कृ, अनुतप्तः -प्ता -प्तं भू, सन्तप्तः &c. भू, अनुशोकं कृ, अनुशयं कृ.—(Change the mind) मनः परिवृत् (c. 10. -वर्त्तयति -यितुं) or परावृत् or व्यावृत्, अन्यमानसीभू.

Repentance, *s.* पश्चात्तापः, अनुतापः, सन्तापः, पश्चात्सन्तापः, मनस्तापः, अनुशोकः, अनुशोचनं, अनुशयः, दुष्कृतखेदः, पापखेदः, खेदः, पश्चात्खेदः, सन्त्वाधिः *m.*, पश्चाच्छोकः, विसूरितं, विप्रतीसारः, विप्रतिसारः, निवर्त्तनं, पश्चात्तापबुद्धिः *f.*, अनुतापबुद्धिः *f.*—(Change of mind) मनःपरिवर्त्तनं, मनःपरावर्त्तनं, मनोव्यावर्त्तः.

Repentant, *a.* अनुतापी -पिनी -पि (न्), पश्चात्तापी &c., अनुतप्तः -प्ता -प्तं, अनुशोचकः -का -कं, अनुशयी -यिनी &c., पश्चात्तापयुक्तः -क्ता -क्तं, पश्चात्तापान्वितः -ता -तं, जातानुतापः -पा -पं, जातपश्चात्तापः &c., जातानुशोकः -का -कं, जातानुशयः -या -यं, पापस्मृतिपीडितः -ता -तं, दुष्कृतस्मृतिपीडितः &c., जातखेदः -दा -दं, खेदान्वितः &c., अनुतापबुद्धिः -द्धिः -द्धि, पश्चात्तापबुद्धिः &c., शाकुनः -नी -नं.

Repented, *p.p.* अनुशोचितः -ता -तं, पश्चात् शोचितः &c., अनुशयितः &c.

Repercussion, *s.* प्रतिघातः, प्रतिहतिः *f.*, प्रतिहननं, प्रतिसारणं, परापतनं.

Repercussive, *a.* प्रतिघाती -तिनी -ति (न्), पराघाती &c., प्रतिसारकः -का -कं.

Repertory, *s.* कोषः, कोषागारं, भाण्डागारं, सञ्चयागारं, भाण्डगृहं.

Repetition, *s.* (Saying again) अनुवादः, पुनर्वादः, पुनरुक्तिः *f.*, पौनरुक्त्यं, पुनःकथनं, पुनर्वचनं, पुनरुच्चारणं, मुहुर्वचनं, मुहुर्भाषा, पुनर्भाषा, अनुलापः; 'saying twice,' द्विरुक्तिः *f.*—(Doing again) पुनःकरणं, मुहुःकरणं, पुनर्विधानं, पुनरनुष्ठानं, पुनरावृत्तिः *f.*, पुनरावर्त्तनं, आवृत्तिः *f.*, आवर्त्तनं, पौनःपुन्यं; 'doing twice,' द्विरावृत्तिः *f.*—(Of a word or sound) आम्रेडनं, आम्रेडितं.—(A word repeated) कथितपदं, कथितवाक्यं.—(Of an act) क्रियासमभिहारः, क्रियावृत्तिः *f.*—(Recital, rehearsal) पठनं, पाठः, अनुवादः; 'from memory,' अभ्यसनं, अभ्यासः.

To **repine**, *v. n.* व्यथ् (c. 1. व्यथते -थितुं), शुच् (c. 1. शोचति -चितुं), तप् in pass. (तप्यते), परितप्, सन्तप्, आत्मानं तप् in caus. or व्यथ् in caus., खिद् in pass. (खिद्यते), अवसद् (c. 1. -सीदति -सत्तुं), ग्लै, परिग्लै, म्लै.

Repining, *s.* आत्मव्यथा, मनस्तापः, मनःसन्तापः, मनोव्यथा, अवसादः.

To **replace**, *v. a.* (Put again in its place) स्वस्थाने पुनर् ऋ in caus. (अर्पयति -यितुं) or पुनर् धा (c. 3. दधाति, धातुं) or पुनर् आधा or पुनः स्था in caus. (स्थापयति -यितुं) or पुनर् न्यस्, प्रतिसृ (c. 10. -सारयति -यितुं), पुनराधानं कृ, पुनरर्पणं कृ, पुनःस्थापनं कृ.—(Supply the place of) उपकॢप् (c. 10. -कल्पयति -यितुं), उपसृज् (c. 6. -सृजति -स्रष्टुं), उपसर्जनं कृ, प्रतिनिधिं दा.

Replaced, *p. p.* पुनरर्पितः -ता -तं, पुनःस्थापितः &c., प्रतिसारितः &c.

To **replenish**, *v. a.* पृ (c. 10. पूरयति -यितुं), पुनः पृ, पुनः सम्पृ.

Replenished, *p. p.* पूरितः -ता -तं, सम्पूर्णः -र्णा -र्णं, समृद्धः -द्धा -द्धं

Replete, *a.* पूर्णः -र्णा -र्णं, सम्पूर्णः -र्णा -र्णं, परिपूर्णः &c., पर्याप्तः -प्ता -प्तं, पूरितः -ता -तं, संकीर्णः -र्णा -र्णं, आकीर्णः &c., आढ्यः -ढ्या -ढ्यं in comp., मयः -यी -यं in comp.; 'replete with knowledge,' विद्यापूर्णः &c., सम्पूर्णविद्यः -द्या -द्यं; 'with guile,' मायामयः &c.

Repletion, *s.* (State of being completely filled) पूर्णता, परिपूर्णता, सम्पूर्णता, पर्याप्तिः *f.*, पूर्त्तिः *f.*, आपूर्त्तिः *f.*, परिपूर्त्तिः *f.*, आभोगः.—(Fulness of the blood or system from eating, &c.) अतिपुष्टिः *f.*, अतिसौहित्यं, रक्तबाहुल्यं, रक्तवृद्धिः *f.*, रक्ताधिक्यं.

Replicant, *s.* उत्तरवादी *m.* (न्), प्रतिवादी *m.*, उत्तरपक्षी *m.*

Replied, *p. p.* प्रत्युक्तः -क्ता -क्तं, पुनरुक्तः &c. *See* **Answered**.

To **reply**, *v. a.* प्रतिवच् (c. 2. -वक्ति -क्तुं), प्रतिवद् (c. 1. -वदति -दितुं), पुनर् वद्, अनुवद्, पुनर् वच्, प्रतिब्रू, पुनर् ब्रू, प्रतिभाष्, पुनर् भाष्, प्रतिभण्, पुनर् भण्; 'he replied,' प्रत्युवाच, पुनराह, प्रत्याह, &c. *See* *To* **answer**.—(In law) उत्तरं वद्, उत्तरं कृ, प्रतिवद्.

Reply, *s.* (Answer) प्रतिवचनं, प्रतिवाक्यं, प्रत्युक्तिः *f.*, प्रत्युक्तं, उत्तरं, प्रत्युत्तरं, प्रतिवाक् *f.* (च्), प्रतिवादः, प्रतिवाणी -णिः *f.*—(In disputation) उत्तरं, प्रत्युत्तरं, कक्षा, उद्ग्राहः, कोटिः *f.*, प्रत्यर्थं.

To **report**, *v. a.* (Give an account, relate) आविद् (c. 10. -वेदयति -यितुं), निविद्, विद्, आख्या, ख्या in caus., ज्ञा in caus., विज्ञा in caus., कथ्, संकथ्, शंस्, बुध् in caus.—(Give an official account) अधिकारपूर्व्वं विज्ञापनं कृ or आवेदनं कृ or विज्ञा in caus.

Report, *s.* (Account given, statement) आवेदनं, विज्ञापनं, विज्ञप्तिः *f.*, वादः, कथा; 'written report,' आवेदनपत्रं, विज्ञापनपत्रं, लेखः.—(Rumor, common talk) प्रवादः, जनप्रवादः, जनवादः, जनश्रुतिः *f.*, जनवार्त्ता, जनरवः, जनवदन्ती, लोकप्रवादः, लोकवार्त्ता, वार्त्ता, किंवदन्ती, वदन्ती, वादः, उपश्रुतिः *f.*, रवः, वृत्तान्तः, आख्या, चर्चा, उद्घोषः.—(Reputation) कीर्त्तिः *f.*, ख्यातिः *f.*, यशस् *n.*; 'good report,' सुख्यातिः *f.*; 'evil,' कुख्यातिः *f.*, कुकीर्त्तिः *f.*, अकीर्त्तिः *f.*, कौलीनं.—(Sound, noise) शब्दः, ध्वनिः *m.*, ध्वाणः -णितं.

Reported, *p. p.* (Related) आवेदितः -ता -तं, कथितः &c., विज्ञप्तः -प्ता -प्तं, विज्ञापितः -ता -तं, आख्यातः &c., शंसितः &c.—(Rumored) घोषितः -ता -तं, उद्घोषितः &c., कीर्त्तितः &c.

REPORTER, s. वृत्तान्तलेखकः, समाचारलेखकः, वाक्यसारलेखकः.

To REPOSE, v. n. (Lie at rest) शी (c. 2. शेते, शयितुं), संविश् (c. 6. -विशति -वेष्टुं), विश्रम् (c. 4. -श्राम्यति -श्रमितुं), शयनं कृ, see To LIE.—(Rest on) अवलम्ब्, समालम्ब्, संश्रि, समाश्रि, उपाश्रि, निली, अवलम्बनं कृ.—(Confide in) विश्वस्, विश्रम्भ्.

REPOSE, s. विश्रामः, विश्रान्तिः f., विश्रमः, शमः, शान्तिः, विरामः, श्रमच्छेदः, क्लान्तिच्छेदः, [illegible] f., निर्वृतिः f., शीः f.

REPOSED, p.p. विश्रान्तः -न्ता -न्तं, गतश्रमः -मा -मं, गतक्लमः &c., नष्टश्रमः &c., अपहृतश्रमः &c., निवृत्तश्रमः &c., छिन्नक्लान्तिः -न्तिः -न्ति.

To REPOSIT, v. a. निधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), न्यासीकृ, रक्षणार्थं न्यस् or निधा, रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्, निधिं कृ.

REPOSITED, p.p. न्यस्तः -स्ता -स्तं, निहितः -ता -तं, रक्षितः -ता -तं.

REPOSITORY, s. निधिः m., निधानं, आधारः, कोषः, आगारं, भाण्डं, भाजनं, पात्रं, कोष्ठः -ष्ठकं, रक्षणस्थानं; 'of corn,' धान्यागारं, धान्यकोष्ठकं.

To REPREHEND, v. a. See To BLAME, REPROVE, &c.

REPREHENSIBLE, a. निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, विगर्ह्यः &c., परिभाषणीयः &c., दूषणीयः &c., दूष्यः -ष्या -ष्यं, दूषणार्हः -र्हा -र्हं, दोषवान् -वती -वत् (त्), सदोषः -षा -षं, निन्दापात्रं, निन्दाभाजनं, परिभाषणीयः &c.

REPREHENSION, s. निन्दा -न्दनं, उपालम्भः. See REPROOF, BLAME.

To REPRESENT, v. a. (Exhibit) दृश् (c. 10. दर्शयति -यितुं), प्रदृश्, see To SHOW.—(Describe) वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, विवृ, निरूप्; 'in writing or drawing,' लिख् (c. 6. लिखति, लेखितुं), आलिख्, विलिख्.—(Personate) रूप् (c. 10. रूपयति -यितुं), अभिनी, वेषं धृ or भृ.—(State respectfully) निविद् (c. 10. -वेदयति -यितुं), विज्ञा in caus. (-ज्ञापयति -यितुं), निवेदनं कृ, विज्ञापनं कृ.—(Stand in the place of) प्रतिनिधिर् भू or अस्, प्रतिभूर् अस्, प्रतिपुरुषो भू or अस्.

REPRESENTATION, s. (Act of exhibition) दर्शनं, प्रदर्शनं, प्रकाशनं; 'on the stage,' अभिनयः -यनं.—(Description) वर्णनं -ना, अनुवर्णनं, उपवर्णनं, निरूपणं.—(Respectful statement) निवेदनं, विज्ञापनं -ना, विज्ञप्तिः f., आवेदनं, उपन्यासः, उपपादनं.—(Delineation, sketch) आलेख्यं, आलेखनं, लेख्यं.—(Image, likeness, picture) प्रतिरूपं, प्रतिकृतिः f., प्रतिमा, प्रतिमानं, प्रतिमूर्त्तिः f., मूर्त्तिः f., प्रतिनिधिः m., प्रतिबिम्बं, प्रतिच्छाया, प्रतिच्छन्दः -न्दकं, चित्रं, चित्रलेखा.

REPRESENTATIVE, a. प्रदर्शकः -का -कं, उद्बोधकः -का -कं, प्रतिरूपकः &c.

REPRESENTATIVE, s. प्रतिनिधिः m., प्रतिभूः m., प्रतिपुरुषः, उपसर्जनं.

REPRESENTED, p.p. (Exhibited) दर्शितः -ता -तं, प्रदर्शितः &c.—(Described) वर्णितः -ता -तं.—(In a picture, &c.) चित्रलिखितः -ता -तं, आलिखितः &c., see PAINTED.—(Stated respectfully) निवेदितः -ता -तं, आवेदितः &c., विज्ञापितः &c., विज्ञप्तः -प्ता -प्तं, उपन्यस्तः -स्ता -स्तं, उपपादितः &c.—(Having substitutes) सप्रतिनिधिः -धिः -धि, सप्रतिभूः -भूः -भु.

To REPRESS, v. a. निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), नियम् (c. 1. -यच्छति -यन्तुं), संयम्.

REPRESSED, p.p. निगृहीतः -ता -तं, संयतः &c., जातनिग्रहः -हा -हं.

REPRESSION, s. निग्रहः -हणं, संयमः -मनं, निगृहीतिः f., यन्त्रणं.

REPRESSIVE, a. नियामकः -का -कं, निग्रहकारी -रिणी -रि (न्).

REPRIEVE, a. दण्डविलम्बः -म्बनं, दण्डनविलम्बः, आकालान्तराद् दण्डत्यागः or दण्डयापनं, दण्डकालयापनं, दण्डकालान्तरनयनं, परावर्त्तः, दण्डकालपरावर्त्तः, दण्डपरावर्त्तः.

To REPRIEVE, v. a. दण्डविलम्बनं कृ, दण्डविलम्बं कृ, आकालान्तराद् दण्डनं त्यज् or या in caus., शिक्षाविलम्बनं कृ, दण्डं or दण्डकालं परावृत् (c. 10. -वर्त्तयति -यितुं), दण्डकालपरावर्त्तं कृ, प्राणदानं कृ, प्राणदण्डविलम्बं कृ.

To REPRIMAND, v. a. निन्द् (c. 1. निन्दति -न्दितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), उपालभ् (c. 1. -लभते -लब्धुं), गर्ह्, विगर्ह्, अभिशंस्, क्षिप्, भर्त्स्, शब्दताडनं कृ, मुखदण्डनं कृ, वाग्दण्डं कृ, धिग्दण्डं कृ. See To REPROVE.

REPRIMAND, s. उपालम्भः, वाग्दण्डः, शब्ददण्डः, शब्दताडनं, धिग्दण्डः, मुखदण्डः -ण्डनं, प्रत्यादेशः, प्रत्यादेशवाक्यं, भर्त्सनवाक्यं, अभिशंसनं, निन्दा.

REPRIMANDED, p.p. उपालब्धः -ब्धा -ब्धं, प्रत्यादिष्टः -ष्टा -ष्टं, अभिशस्तः &c.

To REPRINT, v. a. पुनर् मुद्र् (nom. मुद्रयति -यितुं), पुनर् मुद्रीकृ.

REPRINTED, p.p. पुनर्मुद्रितः -ता -तं, पुनर्मुद्रीकृतः &c., पुनर्मुद्राङ्कितः &c.

REPRISAL, s. प्रत्यपहारः, प्रत्यपहरणं, प्रत्यपकारः, प्रत्यपकरणं, प्रतिपीडनं, क्षतिपूरणार्थम् अपहरणं or अपहारः, हानिपूरणार्थं प्रत्यपहरणं or प्रतिहरणं.

To REPROACH, v. a. निन्द् (c. 1. निन्दति -न्दितुं), विनिन्द्, प्रतिनिन्द्, प्रणिन्द्, तिरस्कृ, परिवद् (c. 1. -वदति -दितुं), परिभाष् (c. 1. -भाषते -षितुं), उपालभ् (c. 1. -लभते -लब्धुं), गर्ह्, विगर्ह्, परिगर्ह्, कुत्स्, अभिकुत्स्, भर्त्स्, अपवद्, आक्रुश्, समाक्रुश्, उपक्रुश्, गुप् in des., तर्ज्, क्षिप्, अधिक्षिप्, दोषम् आरुह् in caus., दोषं क्षिप्, दोषारोपं कृ, दोषीकृ, वाक्पारुष्यं कृ, धिक्कृ, धिक्पारुष्यं कृ. See To BLAME, CENSURE.

REPROACH, s. निन्दा -न्दनं, तिरस्कारः, तिरस्क्रिया, परिवादः, परीवादः, परिभाषा -षणं, गर्हा -र्हणं, उपालम्भः, उपक्रोशः, आक्रोशः, जुगुप्सा, परुषोक्तिः f., परुषवचनं, वाक्पारुष्यं, धिक्पारुष्यं, धिक्क्रिया, दुर्वाक्यं, दुरुक्तं, कुत्सा, घृणा, ऋतीया, पर्य्यनुयोगः, अवर्णः, वाच्यता, वचनीयता, हृणीया, रेन्या, क्षिः m., अपकारगीः f.

REPROACHABLE, a. निन्द्यः -न्द्या -न्द्यं, परिभाषणीयः &c., गर्ह्यः -र्ह्या -र्ह्यं.

REPROACHED, p.p. निन्दितः -ता -तं, तिरस्कृतः &c., उपालब्धः -ब्धा -ब्धं, परिभाषितः &c., गर्हितः &c., अभिक्रुष्टः -ष्टा -ष्टं, धिक्कृतः &c.

REPROACHFUL, a. (Opprobrious) निन्दकः -का -कं, परिवादकः &c., कुत्सावादी -दिनी -दि (न्), निन्दात्मकः &c., घृणाकरः -रा -रं, निन्दामयः -यी -यं.—(Shameful) गर्ह्यः -र्ह्या -र्ह्यं, लज्जाकरः -रा -री -रं, लज्जाप्रदः -दा -दं.

REPROACHFULLY, adv. सनिन्दं, निन्दया, सतिरस्कारं, सासूयं, सपरिवादं.

REPROBATE, a. दुष्टः -ष्टा -ष्टं, दुराचारः -रा -रं, दुरात्मा -त्मा -त्म (न्), धर्म्मबाह्यः -ह्या -ह्यं, त्यक्तधर्म्मा -र्म्मा -र्म्म (न्), दुष्टभावः -वा -वं, पापात्मा &c., पापचेताः -ताः -तः (स्), त्यक्तलज्जः -ज्जा -ज्जं, दुःशीलः -ला -लं.

REPROBATE, s. दुष्टजनः, कुलनाशः -शनः, वृषलः, हतपरलोकः.

To REPROBATE, v. a. गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, गर्हापूर्व्वम् असम्मतिं सूच् (c. 10. सूचयति -यितुं), निन्द् (c. 1. निन्दति -न्दितुं), घृणां कृ, न्यक्कृ.

REPROBATED, p.p. गर्हितः -ता -तं, गर्हापूर्व्वं निन्दितः &c., विगर्हितः &c.

REPROBATION, s. (Act) गर्हा -र्हणं, विगर्हणं -णा, निन्दा -न्दनं, घृणा.—(State) अतिदुष्टता, त्यक्तत्वं, गर्ह्यता.

To RE-PRODUCE, v. a. प्रत्युत्पद् (c. 10. -पादयति -यितुं), पुनर् उत्पद् or जन्.

REPRODUCED, p.p. प्रत्युत्पन्नः -न्ना -न्नं, प्रत्युत्पादितः -ता -तं, पुनरुत्पन्नः &c.

REPRODUCTION, s. प्रत्युत्पादनं, प्रत्युत्पत्तिः f., पुनरुत्पादनं, पुनरुत्पत्तिः f.

REPROOF, s. निन्दा -न्दनं, परिभाषणं, परिवादः, परीवादः, उपालम्भः, प्रत्यादेशः, निन्दावाक्यं, भर्त्सनवाक्यं, भर्त्सना, वाग्दण्डः, मुखदण्डः, शब्ददण्डः. See CENSURE, CHIDING.

Reprovable, *a.* निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, परिभाषणीयः &c.

To **reprove**, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, विनिन्द्, प्रणिन्द्, प्रत्यादिश् (c. 6. -दिशति -देष्टुं), उपालभ् (c. 1. -लभते -लब्धुं), परिवद्, अपवद्, परिभाष्, अपभाष्, गर्ह्, विगर्ह्, भर्त्स्, गुप् in des., कुत्स्, अभिकुत्स्, क्षिप्, अधिक्षिप्, तिरस्कृ, वाग्दण्डं कृ, आक्रुश्, उपक्रुश्, धिक्कृ. *See To* censure.

Reproved, *p. p.* निन्दितः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, उपालब्धः -ब्धा -ब्धं.

Reprover, *s.* निन्दकः, प्रत्यादेशकः, परिवादकः, वाग्दण्डकारी *m.* (न्).

Reptile, *s.* उरगः, उरोगामी *m.* (न्), उरोगः, उरोगमः, उरङ्गः, उरङ्गमः, सर्पः, सरीसृपः, सर्पी *m.* (न्), कृमिः *m.*, विलवासी *m.* (न्), विलेवासी *m.*, विलौकाः *m.* (स्), अपदः, अपादः, बहुपादः.

Reptile, *a.* (Creeping) सर्पी -र्पिणी -र्पि (न्), सर्पन् -र्पन्ती -र्पत् (त्), सर्पणः -णा णं.—(Relating to a reptile) सार्पः -र्पी -र्पं, कृमिलः -ला -लं.

Republic, *s.* लोकप्रभुत्वं, सर्व्वलोकप्रभुत्वं, लोककर्तृकप्रभुत्वं, प्रजाप्रभुत्वं, सर्व्ववर्णप्रभुत्वं, सर्व्ववर्णाधिपत्यं, साधारणप्रभुत्वं, साधारणाधिपत्यं, साधारणजनप्रभुत्वं, लोकसाधारणाधिपत्यं, सर्व्वप्रजाधिपत्यं, लोककर्तृकराज्यं, सामान्यजनकर्तृकराज्यं, लोकपालितं राज्यं, साधारणजनपालितराज्यं, प्रजापालितराज्यं.

Republican, *a.* लोकप्रभुत्वसम्बन्धी -न्धिनी -न्धि (न्), प्रजाप्रभुत्वसम्बन्धी &c., लोकाधिपत्यसम्बन्धी &c., लोकप्रभुत्वविषयकः -का -कं, लोकप्रभुत्वानुसारी &c., लोकप्रभुत्वानुरूपः -पा -पं.

Republican, *a.* लोकप्रभुत्ववादी *m.* (न्), लोकाधिपत्यपक्षपाती *m.*, लोकप्रभुत्वावलम्बी *m.*, प्रजाधिपत्यवादी *m.*, प्रजाधिपत्यानुग्राही *m.*, प्रजानाथः, लोकनाथः.

Republicanism, *s.* लोकप्रभुत्वपक्षपातः, लोकाधिपत्यपक्षपातः, लोकप्रभुत्वावलम्बनं, प्रजाधिपत्यवादः, लोकाधिपत्यानुग्रहः.

To **repudiate**, *v. a.* प्रत्याख्या (c. 2. -ख्याति -तुं), निराकृ, निरस्, प्रत्यादिश्, त्यज्, परित्यज्, प्रत्याचक्ष्, निर्नुद्, अपध्वंस्. *See To* reject.

Repudiated, *p. p.* प्रत्याख्यातः -ता -तं, निराकृतः &c., प्रत्यादिष्टः -ष्टा -ष्टं.

Repudiation, *s.* प्रत्याख्यानं, निरसनं, निरासः, निराकरणं, निराकृतिः *f.*, त्यागः, परित्यागः, प्रत्यादेशः, *see* Rejection.—(Divorce) विवाहसम्बन्धत्यागः, विवाहसम्बन्धमुक्तिः *f.*, दाम्पत्यमुक्तिः *f.*, भार्य्यानिराकरणं.

Repugnance, repugnancy, *s.* प्रतिकूलता, प्रातिकूल्यं, विरोधः, विरुद्धता, वैपरीत्यं, विमुखता, विमतिः *f.*, अनिच्छा.

Repugnant, *a.* प्रतिकूलः -ला -लं, विरुद्धः -द्धा -द्धं, विपरीतः -ता -तं, विरोधी -धिनी &c., विमुखः -खा -खी -खं. *See* Opposed, Adverse.

Repulse, *s.* प्रतिघातः, प्रतिहतिः *f.*, पराहननं, प्रतिहननं, प्रतिसारणं, निवारणं, वारणं, व्यपाकृतिः *f.*, विद्रवः, विद्रावणं, पराजयः, अपजयः.

To **repulse**, *v. a.* पराहन् (c. 2. -हन्ति -न्तुं), प्रतिहन्, प्रतिसृ. *See To* repel.

Repulsed, *p. p.* पराहतः -ता -तं, प्रतिहतः &c., व्याहतः &c., निहतः &c., आहतः &c., प्रहतः &c., प्रतिसारितः &c., प्रतिक्षिप्तः -प्ता -प्तं, विद्रावितः &c., निवारितः &c., व्यपाकृतः &c., पराजितः &c., प्रत्याख्यातः &c.

Repulsion, *s.* प्रतिसारकत्वं, प्रतिघातकत्वं, प्रतिसारणगुणः, प्रतिसारणशक्तिः *f.*, प्रतिहननशक्तिः *f.*, प्रतिहननं, प्रतिसारणं. *See* Repulse.

Repulsive, *a.* (Repelling) प्रतिघाती -तिनी -ति (न्), प्रतिघातकः -का -कं, प्रतिसारकः -का -कं, निवारकः &c., वारकः &c.—(Forbidding) अप्रीतिजनकः -का -कं, त्रासजनकः &c., त्रासकरः -री -रं, अमङ्गलः -ला -लं, अप्रसन्नमुखः -खी -खं.

Reputable, *a.* (In good esteem) मान्यः -न्या -न्यं, सम्मान्यः &c., माननीयः -या -यं, आदरणीयः &c., प्रशंसनीयः &c., मानार्हः -र्हा -र्हं, सम्मानार्हः &c., शिष्टः -ष्टा -ष्टं.—(Conferring reputation, not disgraceful) मानदः -दा -दं, मानप्रदः &c., मानदायी -यिनी &c., यशस्यः -स्या -स्यं, यशस्करः -री -रं, कीर्त्तिकरः -री -रं, ख्यातिकर &c., सुप्रतिष्ठः -ष्ठा -ष्ठं, अलज्जाकरः &c.

Reputably, *adv.* समानं, यथा सुख्यातिः उत्पद्यते तथाप्रकारेण.

Reputation, *s.* कीर्त्तिः *f.*, ख्यातिः *f.*, विख्यातिः *f.*, प्रतिष्ठा, समाख्या, यशस् *n.*, परिख्यातिः *f.*, प्रतिख्यातिः *f.*, प्रविख्यातिः *f.*, प्रकीर्त्तिः *f.*, कीर्त्तनं -नं, प्रतिपत्तिः *f.*, प्रथा, सम्प्रथा, मर्य्यादा, समाज्ञा, प्रसिद्धिः *f.*, गौरवं, चारित्रं; 'one who has established a reputation,' लब्धप्रतिष्ठः -ष्ठा -ष्ठं, प्राप्तप्रतिष्ठः &c.; 'good reputation,' सुकीर्त्तिः *f.*, सत्कीर्त्तिः *f.*, सुख्यातिः *f.*; 'bad reputation,' कुकीर्त्तिः *f.*, दुष्कीर्त्तिः *f.*, अकीर्त्तिः, अपकीर्त्तिः *f.*, कुख्यातिः *f.*, अख्यातिः *f.*, अयशस् *n.*, वाच्यता.

To **repute**, *v. a.* गण् (c. 10. गणयति -यितुं), विगण्, मन् (c. 4. मन्यते मन्तुं, c. 10. मानयति -यितुं), संख्या, परिसंख्या, कृत् (c. 10. कीर्त्तयति -यितुं).

Repute, *s.* कीर्त्तिः *f.*, ख्यातिः *f.*, प्रसिद्धिः *f.* *See* Reputation.

Reputed, *p. p.* मतः -ता -तं, गणितः &c., विगणितः &c., कीर्त्तितः &c.

Request, *s.* (Entreaty) प्रार्थनं -ना, अर्थना, अभ्यर्थना, अर्थः, याचना, याच्ञा, स्वार्थनिवेदनं, अर्थविज्ञापना, सनिः -नी *m. f.*—(Desire) आकांक्षा, अभिकांक्षा, कांक्षा, इच्छा, एषा, अभ्येषणा.—(State of being desired or held in estimation) अपेक्षा, आकांक्षा, मान्यता -त्वं, माननीयता; 'general request,' लोकमान्यता.

To **request**, *v. a.* प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अभ्यर्थ्, सम्प्रार्थ्, अर्थ्, याच् (c. 1. याचति -ते -चितुं), अभियाच्, प्रयाच्, सम्प्रयाच्, संयाच्, अर्थं निविद् (c. 10. -वेदयति -यितुं) or विज्ञा in caus. (-ज्ञापयति -यितुं), वृ (c. 9. वृणीते, वरितुं -रीतुं, c. 10. वारयति -यितुं), कांक्ष्, आकांक्ष्, अभिकांक्ष्.

Requested, *p. p.* प्रार्थितः -ता -तं, अभ्यर्थितः &c., अर्थितः &c., याचितः &c., अर्दितः -ता -तं.

To **require**, *v. a.* (Ask, demand) प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), याच् (c. 1. याचति -चितुं), अभियाच्.—(Need, call for) आकांक्ष् (c. 1. -कांक्षति -क्षितुं), अभिकांक्ष्, कांक्ष्, अर्ह् (c. 1. अर्हति -र्हितुं), प्रार्थ्; or expressed by भू or अस् in conjunction with the nouns प्रयोजनं, उपयोगः or कार्य्यं. *See To* need. The desid. form may sometimes be used to express the sense of 'require,' thus; 'three quantities being given, it is required to find a fourth,' त्रीन् राशीन् निर्दिश्य चतुर्थो जिज्ञास्यः (desid. pass. of ज्ञा).

Required, *p. p.* आकांक्षितः -ता -तं, अभिकांक्षितः &c., प्रार्थितः &c.

Requisite, *a.* आकांक्षितः -ता -तं, आकांक्षणीयः -या -यं, अभिकांक्षितः &c., प्रयोजनीयः &c., प्रयोजनार्हः -र्हा -र्हं, अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यप्रापणीयः &c. *See* Needful.

Requisite, *s.* अवश्यकवस्तु *n.*, अवश्यकद्रव्यं, अवश्यकविषयः; 'requisites,' प्रयोजनीयद्रव्यसामग्री, उपकरणसाहित्यं. *See* Necessaries.

Requisition, *s.* आकांक्षा, अभिकांक्षा, कांक्षा, प्रार्थनं -ना, अभ्यर्थनं -ना, अर्थना, याचनं -ना, अपेक्षा -क्षणं; 'is in requisition,' सेव्यतां याति.

Requital, *s.* (Recompense, return) प्रतिफलं, प्रतिदानं, निस्तारः, निष्कृतिः *f.*, प्रत्युपकारः, पारितोषिकं, उपकारमोक्षः, उपकारशुद्धिः *f.*, शुद्धिः *f.*, परिशोधः, परिवर्त्तनं.—(Retaliation) प्रतिकारः, प्रतीकारः, प्रतिकृतिः *f.*, प्रतिक्रिया, प्रत्यपकारः, प्रतिकर्म्म *n.* (न्), प्रतिहिंसा, निर्यातनं.

To **requite**, *v. a.* (Compensate, repay) प्रतिफलं दा, प्रतिदा, प्रतिफल् (nom. प्रतिफलयति -यितुं), निष्कृतिं दा, प्रत्युपकृ, निस्तारं कृ, पारि

तोषिकं दा.—(Retaliate) प्रतिकृ, विप्रतिकृ, प्रत्यपकृ, प्रतिकारं कृ, प्रतिहिंस् (c. 1. -हिंसति -सितुं, c. 7. -हिनस्ति), निर्यत् (c. 10. -यातयति -यितुं).

REQUITED, *p.p.* प्रतिफलितः -ता -तं, प्रतिकृतः &c., विप्रतिकृतः &c., निर्यातितः &c.

To RESALUTE, *v. a.* प्रत्यभिनन्द् (c. 1. -नन्दति -न्दितुं), प्रतिनन्द्, प्रत्यभिवद्, प्रत्यर्च्.

To RESCIND, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, खण्ड् (c. 10. खण्डयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), परिच्छिद्, उच्छिद्, भङ्गं कृ, भञ्ज्. *See To* REPEAL.

RESCINDED, *p.p.* लुप्तः -प्ता -प्तं, खण्डितः &c., उच्छिन्नः -न्ना -न्नं, परिच्छिन्नः &c.

RESCISSION, *s.* लोपः, खण्डनं, उच्छेदः, परिच्छेदः, भङ्गः, उद्धरणं, निरुद्धरणं, अवरोपः-पणं, अनुशयः, विप्रतिपत्तिः *f.*; 'of sale,' क्रयानुशयः. *See* REPEAL.

RESCRIPT, *s.* शासनं, आज्ञापत्रं, शासनपत्रं, राजाज्ञा, निबन्धः.

To RESCUE, *v. a.* त्रै (c. 1. त्रायते, त्रातुं), परित्रै, संत्रै, उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, रक्ष् (c. 1. रक्षति -क्षितुं), परिरक्ष्, अभिरक्ष्, संरक्ष्, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, निस्तॄ (c. 10. -तारयति -यितुं), तॄ, उद्धरणं कृ, उद्धारं कृ, रक्षणं कृ; 'from confinement,' बन्धनाद् मुच्.

RESCUE, *s.* त्राणं, परित्राणं, उद्धरणं, उद्धारः, समुद्धारः, समुद्धरणं, रक्षा -क्षणं, परिरक्षणं, निस्तारः, निस्तरणं, तारणं, मुक्तिः *f.*, मोचनं, विमोचनं, मोक्षः -क्षणं, परिमोक्षणं; 'to the rescue!' त्राहि, त्रायस्व.

RESCUED, *p.p.* उद्धृतः -ता -तं, समुद्धृतः &c., त्राणः -णा -णं, त्रातः -ता -तं, रक्षितः -ता -तं, परिरक्षितः &c., मुक्तः -क्ता -क्तं, मोचितः -ता -तं, विमोचितः &c., निस्तारितः &c.; 'from confinement,' मुक्तबन्धनः -ना -नं, बन्धनमुक्तः -क्ता -क्तं.

RESCUER, *s.* त्राता *m.* (तृ), उद्धर्त्ता *m.* (र्तृ), रक्षकः, मुक्तिदाता *m.* (तृ), उद्धारकः, मोचकः, निस्तारकः. *See* DELIVERER.

RESEARCH, *s.* अन्वेषणं -णा, पर्येषणं -णा, अनुसन्धानं, परीष्टिः *f.*, संवीक्षणं, गवेषणं -णा, निरूपणं, जिज्ञासा, मीमांसा, मार्गणं, मृगणा, मृगया, मृगः, विचारणा, तत्त्वानुसन्धानं, विचयः, वीचयनं, विचयनं.

RESEMBLANCE, *s.* (Likeness) औपम्यं, सादृश्यं, सदृशता, सरूपता, सारूप्यं, समता, साम्यं, समानता, तुल्यता -त्वं, तुला, तौल्यं, सारूप्यं, सरूपता, उपमा, उपमितिः *f.*, उपमानं -नता, अनुकारः, अनुहारः, *see* LIKENESS.—(Something similar, a representation) उपमा, प्रतिमा -मानं, प्रतिरूपं, प्रतिभासः, प्रतिकृतिः *f.*, प्रतिमूर्त्तिः *f.*, प्रतिच्छाया, प्रतिबिम्बं, प्रतिनिधिः *m.*

To RESEMBLE, *v. a.* (Be like) सदृशः -शी -शं भू or अस्, सदृशीभू, अनुकृ (c. 8. -करोति -कर्त्तुं), तुल्यः -ल्या -ल्यं भू, समः -मा -मं भू, समानः -ना -नं भू, उपमः -मा -मं भू, सरूपः -पा -पं भू, अनुरूपः -पा -पं भू; 'the son resembles his father,' पुत्रः पितुर् अनुकरोति or पुत्रः पितृरूपो भवति or पुत्रः पित्रा सदृशाकारो भवति; 'no one resembles him,' अनेन सदृशः कश्चिन् नास्ति or तस्य तुल्यः or तेन तुल्यः or तेन समो न को ऽपि भवति. A nominal verb may sometimes express the sense of 'resemble,' thus; 'he resembles a lion,' सिंहायते; 'it resembles heaven,' स्वर्गीयते.—(Liken) उपमा (c. 2. -माति, c. 3. -मिमीते -मातुं), सदृशीकृ, समीकृ, समान (nom. समानयति -यितुं).

RESEMBLING, *part.* अनुकारी -रिणी -रि (न्), सदृशः -शी -शं, तुल्यः -ल्या -ल्यं, समः -मा -मं, समाकारः -रा -रं, सरूपः -पा -पं, रूपधृत् *m.f.n.*, रूपभृत् *m.f.n.*, सवर्णः -र्णा -र्णं &c. *See* LIKE.

To RESENT, *v. n.* अपकारम् अपेक्ष्य कुप् (c. 4. कुप्यति, कोपितुं) or प्रकुप् or क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं) or रुष् (c. 4. रुष्यति, रोषितुं) or रोषं कृ or मन्युं कृ, अपकारमपेक्ष्य प्रत्यपकाराय or प्रतिकाराय मनः कृ, अपकारमपेक्ष्य जातमन्युः -न्युः -न्यु भू or जातक्रोधः -धा -धं भू, अपकारमपेक्ष्य क्रोधात् प्रत्यपकारं कृ in des., हिंसाम् अपेक्ष्य जातक्रोधत्वात् प्रतिहिंसां कृ in des. (चिकीर्षति -र्षितुं) or प्रतिद्रोहाय मनः कृ.

RESENTFUL, *a.* समन्युः -न्युः -न्यु, जातमन्युः &c., प्रतिहिंसाबुद्धिः -द्धिः -द्धि, प्रतिद्रोहबुद्धिः &c., प्रत्यपकारबुद्धिः &c., क्रोधशीलः -ला -लं, कोपशीलः &c., प्रतिहिंसाशीलः &c., दंशी -शिनी -शि (न्), सासूयः -या -यं.

RESENTMENT, *s.* मन्युः *m.*, क्रोधः, कोपः, रोषः, प्रकोपः, प्रतिद्रोहबुद्धिः *f.*, प्रत्यपकारबुद्धिः *f.*, प्रतिहिंसाबुद्धिः *f.*, दंशः, द्वेषः, असूया, ईर्ष्या, मात्सर्य्यं.

RESERVATION, *s.* (Keeping back, concealing) गोपनं, गुप्तिः *f.*, उपसंहारः, उपसंहरणं, उपसंहृतिः *f.*, संहरणं, संहृतिः *f.*, प्रत्याहारः, प्रत्याहरणं, संवृतिः *f.*, संवरणं, अपवरणं, अपावरणं, धृतिः *f.*, धरणं, विधृतिः *f.*, विधरणं, विनिग्रहः, निभृते स्थापनं.—(Mental reservation) मनोगुप्तिः *f.*, मनोगोपनं, मनोसंवृतिः *f.*, मनोसंवरणं, निह्नुतिः *f.*, अपह्नुतिः *f.*, निह्नवः, अपह्नवः.—(Custody, keeping in store) रक्षा -क्षणं, परिरक्षणं, संग्रहणं, सञ्चयः -यनं.

To RESERVE, *v. a.* (Keep back, withhold to a future time) उपसंहृ (c. 1. -हरति -हर्त्तुं), प्रत्याहृ, संहृ, विधृ (c. 1. -धरति -धर्त्तुं, c. 10. -धारयति -यितुं), विनिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), निग्रह्, आकालान्तरात् or कालान्तरं यावद् उपसंहृ or रक्ष् (c. 1. रक्षति -क्षितुं) or परिरक्ष्.—(Lay up, keep in store to a future time) रक्ष्, परिरक्ष्, आकालान्तरात् or परकालं यावद् रक्ष् or निधा (c. 3. -दधाति -धातुं) or सन्न्यस् (c. 4. -अस्यति -सितुं) or संचि (c. 5. -चिनोति -चेतुं) or संग्रह्.—(Conceal to another time) आकालान्तरात् गुप् (c. 1. गोपायति, c. 10. गोपयति, गोप्तुं) or गोपनं कृ or निभृते स्था in caus. (स्थापयति -यितुं) or संवृ (c. 5. -वृणोति -वरितुं, c. 10. -वारयति -यितुं) or अपवृ or अपावृ or संवरणं कृ, 'in the mind,' मनसा गुप्, मनोगोपनं कृ.—(Suffer to remain to another time) आकालान्तरात् शिष् (c. 10. शेषयति -यितुं) or परिशिष् or अवशिष् or रक्ष्; 'one should reserve one's money for a time of want,' आपदर्थं धनं रक्षेत्.

RESERVE, *s.* (Withholding, keeping back), *see* RESERVATION.—(Something concealed in the mind, withheld from disclosure) मनोगुप्तिः *f.*, मनोगुप्तं, निह्नुतिः *f.*, अपह्नुतिः *f.*—(Restraint) यन्त्रणं, निग्रहः, विनिग्रहः, निगृहीतिः *f.*—(In manner, disinclination to talk) कथाविरक्तिः *f.*, कथाविमुखता, कथावैरक्तं, वाग्यतत्वं, वाग्यतिः *f.*, वाग्यन्त्रणं, अल्पभाषणं, कथापराङ्मुखता, संलापपराङ्मुखता, आलापविरक्तिः *f.*, धीरता.—(Stock laid up) सञ्चयः, सञ्चितं, संग्रहः, निचयः.—(Stratagem in reserve, double resource) द्वैधं.—(Of an army) प्रतिग्रहः, परिग्रहः, सन्नहनं, पार्ष्णिग्राहं, पतद्ग्रहः. *See* REAR-GUARD.—(Without reserve), *see* UNRESERVEDLY.—(In reserve) निभृते, गोपने, गुप्तं. *See* the next.

RESERVED, *p.p.* or *a.* (Kept back or concealed to a future time) आकालान्तरात् or परकालं यावद् रक्षितः -ता -तं or उपसंहृतः -ता -तं or विधारितः &c. or विधृतः &c. or गुप्तः -प्ता -प्तं or निभृते स्थापितः -ता -तं or संवृतः &c.—(Left remaining) शिष्टः -ष्टा -ष्टं, अवशेषितः -ता -तं, आकालान्तराद् अवशेषितः &c.—(Restrained in manner, disinclined to talk) वाग्यतः -ता -तं, वाग्यन्त्रितः &c., यन्त्रितकथः -था -थं, यन्त्रितवाक् *m.f.n.* (च्), कथाविरक्तः -क्ता -क्तं,

संवादविरक्तः &c., कथाविमुखः -खा -खी -खं, कथापराङ्मुखः &c., संलापविमुखः &c., आलापविरक्तः &c., अनालापी -पिनी -पि (न्), अल्पभाषी -षिणी &c., अल्पालापी &c., परिमितालापी &c., परिमितकथः &c., गूढभावः -वा -वं, गूढस्वभावः &c., लज्जाशीलः -ला -लं, धीरः -रा -रं.

Reservedly, *adv.* वाग्यतम्, वाग्यतत्वात्, परिमितवाचा, गूढभावेन.

Reservedness, *s.* वाग्यतत्वं, कथाविरक्तिः *f.*, धीरता. *See* Reserve.

Reservoir, *s.* जलाशयः, तडागः, जलाधारः, उदकाधारः, निपानं, खातं, वापी, अम्भोनिधिः *m.*, जलदानगृहं, सरोवरः, क्रीडासरस् *n.*, वरासनं, तल्लः.

To reside, *v. n.* वस् (c. 1. वसति, वस्तुं), निवस्, अधिवस्, आवस्, समावस्, प्रतिवस्, वासं कृ, वृत्, स्था, आश्रि, निली, अध्यास्. *See* *To* dwell.—(Reside together or with) संवस्, सहवासं कृ; 'resided,' उषितः -ता -तं.

Residence, *s.* (Act of dwelling) वासः -सनं, वसनं, वसतिः *f.*, निवसतिः *f.*, निवासः, अधिवासनं -सिता, अधिष्ठानं, अधिष्ठितिः *f.*, अवस्थितिः *f.*, स्थितिः *f.*, संस्थितिः *f.*, प्रतिष्ठा, वर्त्तनं, निलयनं, आश्रयणं, अध्यासः -सनं; 'residence abroad,' प्रवासः.—(Place of dwelling) वसतिः *f.*, वासः, वासस्थानं, निवसतिः *f.*, निवासः, निवासस्थानं, निवासभूयं, गृहं, आवासः, अधिवासः, समावासः, आवसथः, वास्तुः -स्तु *m. n.*, स्थानं, अवस्थानं, प्रतिष्ठा, आयतनं, निकेतनं, आलयः, निलयः, निलायिता, क्षिः *f.*; 'permanent residence,' स्थिरप्रतिष्ठा, स्थावरप्रतिष्ठा; 'changing of residence,' गृहान्तरगमनं, स्थानान्तरगमनं, स्थलान्तरकरणं. *See* Dwelling.

Resident, *a.* वासी -सिनी -सि (न्), निवासी &c., वासकारी &c., स्थायी &c., स्थः -स्था -स्थं in comp., संस्थः -स्था -स्थं in comp., निलायी &c., कृतवासः -सा -सं, कृतालयः -या -यं, आश्रितः -ता -तं, समाश्रितः &c., समावासितः &c., अवस्थितः &c., अधिष्ठितः &c.; 'resident in Mathurá,' मथुरावासी &c., मथुरानिवासी &c.; 'in the city,' नगरस्थः &c.; 'the people resident there,' तत्रस्था जनाः.

Resident, *s.* वासी *m.* (न्); 'temporary resident,' आगन्तुः -न्तुकः.

Residentiary, *a.* वासी -सिनी &c., वासकारी &c. *See* Resident, *a.*

Residuary, residual, *a.* शेषसम्बन्धी -न्धिनी &c.; 'legatee,' शेषभागी *m.* (न्), शेषाधिकारी *m.*, शेषरिक्थभागी *m.*, शेषरिक्थभाक् *m.* (ज्).

Residue, *s.* शेषः -षं, अवशेषः, अवशिष्टं, परभागः, *see* Remainder.

To resign, *v. a.* (Give up) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, संत्यज्, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अवसृज्, उत्सर्गं कृ, उत्सर्जनं कृ, हा (c. 3. जहाति, हातुं), विहा, प्रहा, प्रोज्झ्, सन्न्यस्, प्रत्यादिश्; 'by writing,' त्यागपत्रेण उत्सृज्; 'to resign a title or claims,' अधिकारत्यागं कृ, स्वत्वत्यागं कृ, स्वत्वनिवृत्तिं कृ.—(Commit) सम् in caus. (-अर्पयति -यितुं), ऋ in caus., न्यस्, निक्षिप्, न्यासीकृ, प्रतिपद् in caus., परिदा, समर्पणं कृ.—(Submit to) सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), तिज् in des.

Resignation, *s.* (Giving up) त्यागः, परित्यागः, उत्सर्गः, उत्सर्जनं, विसर्जनं, सन्न्यसनं, सन्न्यासः; 'written resignation,' त्यागपत्रं, परित्यागपत्रं, त्यागलेखः; 'of claim,' स्वत्वत्यागः, स्वत्वनिवृत्तिः *f.*—(Committing, yielding) समर्पणं, अर्पणं, निक्षेपः, न्यसनं, न्यासीकरणं.—(Submission) क्षमा, क्षान्तिः *f.*, तितिक्षा, सहनं, सहिष्णुता, धीरता, मर्षः, शान्तिः *f.*, सन्तोषवृत्तिः *f.*—(To the will of God) ईश्वरेच्छासन्तोषवृत्तिः *f.*, ईश्वरेच्छानुवृत्तिः *f.*, ईश्वरेच्छानुवर्त्तनं, ईश्वरेच्छानुमतिः *f.*, ईश्वरेच्छानुरोधः, ईश्वरेच्छापरितोषः, भगवदिच्छानुमतिः *f.*, तितिक्षा, ईश्वरसंकल्पानुवृत्तिः *f.*

Resigned, *p. p.* or *a.* (Given up) त्यक्तः -क्ता -क्तं, परित्यक्तः &c., उत्सर्जितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, सन्न्यस्तः -स्ता -स्तं.—(Submissive) क्षान्तः -न्ता -न्तं, क्षमावान् -वती -वत् (त्), सहिष्णुः -ष्णुः -ष्णु, तितिक्षु &c., शान्तः &c., *see* Patient.—(To the will of God) ईश्वरेच्छासन्तोषवृत्तिः -त्तिः -त्ति, ईश्वरेच्छानुवर्त्ती -र्त्तिनी -र्त्ति (न्), ईश्वरेच्छानुरोधी &c., ईश्वरेच्छासन्तुष्टः -ष्टा -ष्टं, ईश्वरेच्छाभिमतः -ता -तं, ईश्वरेच्छानुमतः &c., ईश्वरसङ्कल्पानुवर्त्ती &c., भगवत्सङ्कल्पपरितुष्टः &c., यतचित्तः -त्ता -त्तं, शान्तचेताः -ताः -तः (स्).

Resilience, resiliency, *s.* प्रतिघातः. *See* Rebound.

Resin, *s.* सर्ज्जरसः, यक्षधूपः, अरालः, रालः, वृक्षधूपः, वृक्षनिर्यासः, शालनिर्यासः, सर्ज्जमणिः *m.*, सुरधूपः, धूपनः, सर्व्वरसः, रसाङ्कः, दधि, तीक्ष्णतैलं, अग्निवल्लभः, वह्निवल्लभः, महारूपः, बहुरूपः, कलकलः, धून

Resinous, *a.* सर्ज्जरसगुणकः -का -कं, यक्षधूपसगुणः -णा -णं.

To resist, *v. a.* or *n.* (Oppose, withstand) प्रतिकृ, विप्रतिकृ, वि… विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं), प्रतिकूलः -ला -लं भू, पर्यवस्था (c. 1. -तिष्ठति -स्थातुं), प्र… स्था, प्रत्याहन् (c. 2. -हन्ति -न्तुं), व्याहन्, निहन्, प्रतीप (nom. प्रतीपायते), प्रतियुध्, प्रतिसमास् (c. 2. -आस्ते -आसितुं), परिपन्थ (nom. परिपन्थयति -यितुं), विपक्षतां कृ, विरोधं कृ, प्रतिरोधं कृ, प्रातिकूल्यं —(Hinder) निवृ (c. 10. -वारयति -यितुं), बाध् (c. 1. बाधते -धि… प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), रुध्, निरुध्.—(Check) निग्रह् (c… -गृह्णाति -ग्रहीतुं), विनिग्रह्, स्तम्भ् (c. 10. स्तम्भयति -यितुं), प्रतिष्ट…

Resistance, *s.* प्रतिकारः, प्रतीकारः, विप्रतिकारः, प्रतिक्रिया, विरो… प्रतिरोधः, प्रतिकूलता, प्रातिकूल्यं, प्रतियोगः -गिता, पर्यवस्थानं, पर्यव… पर्यवस्थितिः *f.*, प्रत्यवस्थानं, प्रत्यवस्थितिः *f.*, प्रतिच्छेदः, निकारः, प्र… बन्धः -न्धकता, प्रतिष्टम्भः, निग्रहः -हणं, अवग्रहः, निवारणं, प्रतिया… प्रत्युपायः.—(In mechanics) प्रत्याघातः, प्रतिघातः.

Resisted, *p. p.* प्रतिकृतः -ता -तं, विप्रतिकृतः &c., विप्रकृतः &c., प्र… रुद्धः -द्धा -द्धं, रुद्धः &c., पर्यवस्थितः &c., प्रत्यवस्थितः &c., प्रतिष्ट… -ब्धा -ब्धं, निवारितः -ता -तं, प्रतिहतः &c., व्याहतः &c.

Resister, *s.* विरोधी *m.* (न्), प्रतिरोधी *m.*, प्रतियोगी *m.*, पर्यवस्थाता (तृ), प्रत्यवस्थाता *m.*, प्रतिरोधकः, प्रतिघाती *m.*, विरोधकारी *m.*

Resistless, *s.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अनवग्रहः -हा -हं. *See* Irresistib…

Resolute, *a.* दृढनिश्चयः -या -यं, स्थिरनिश्चयः &c., दृढसंकल्पः -ल्पा -ल्पं, स्थिरमतिः -तिः -ति, स्थिरचेताः -ताः -तः (स्), सुस्थिरचेताः &c., स्थिरधीः -धीः -धि, वज्रसंकल्पः -ल्पा -ल्पं, स्थिरः -रा -रं, सुस्थिरः &c., धीरः -रा -रं, सुधीरः &c., धैर्य्यवान् -वती -वत् (त्), धृतिमान् &c., साङ्कल्पिकः -की -कं, प्रगल्भः -ल्भा -ल्भं, व्यवसायी -यिनी -यि (न्), कृतनिश्चयः &c.

Resolutely, *adv.* दृढनिश्चयपूर्व्वं, सस्थिरनिश्चयं, सुस्थिरं, स्थिरचेतसा.

Resoluteness, *s.* स्थिरमतित्वं, दृढसंकल्पता, धैर्य्यं. *See* the next

Resolution, *s.* (Fixed purpose, determination) निश्चयः, विनिश्चयः, सङ्कल्पः, व्यवसायः, अध्यवसायः, निर्णयः, दृढनिश्चयः, दृढसङ्कल्पः, स्थिरनिश्चयः, कल्पः, मतिः *f.*, दृढमतिः *f.*, सम्प्रधारणा.—(Constancy) स्थिरमतित्वं, स्थिरता, सुस्थिरता, स्थैर्य्यं, धीरता, धैर्य्यं, धृतिः *f.*, धृ… मत्त्वं, धारणं -णा, प्रगल्भता, प्रागल्भ्यं, आग्रहः, निर्बन्धः.—(Decision or proposition offered for determination) निश्चयः, निर्णयः, उपन्यासः.—(Separation of parts), *see* Dissolution, Solutio…

Resolvable, *s.* विलयनीयः -या -यं, विभाज्यः -ज्या -ज्यं, विभेद्यः -द्या -…

To resolve, *v. a.* (Dissolve) विली in caus., विद्रु in caus., *see* Dissolve, Liquefy.—(Separate component parts) पृथ…

विभज्, वियुज्, विच्छिद्, विभिद्, विश्लिष् in caus., विद्रु in caus., मूलतश्शोधनं कृ, उद्घातं कृ.—(Resolve doubts or difficulties) संशयान् छिद् (c. 7. छिनत्ति, छेत्तुं) or उच्छिद्, व्याख्या (c. 2. -ख्याति -तुं), *see To* SOLVE.—(Constitute by resolution) निश्चयपूर्व्वं व्यवस्था in caus. or संस्था or [illegible] or क्लृप्.

To RESOLVE, *v. n.* (Determine in the mind) निश्चयं कृ, विनिश्चयं कृ, निर्णयं कृ, [illegible], मनसा निश्चि (c. 5. -चिनोति -चेतुं) or निर्णी (c. 1. -णयति -णेतुं) or संक्लृप् (c. 10 -कल्पयति -यितुं), व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो, मतिं कृ, बुद्धिं कृ, मनः कृ with dat. or loc. c.; as, 'he resolves to go,' गमनाय मनः or मतिं करोति, गमनाय निश्चयं करोति; 'he resolves to do that,' तत् कर्त्तुं व्यवस्यति; 'he is resolved to sacrifice his life,' स्वप्राणान् परित्यक्तुं व्यवसितो ऽस्ति.—(Dissolve), *see* DISSOLVE, MELT.

RESOLVED, *p. p.* (Analyzed) पृथक्कृतः -ता -तं, व्याकृतः &c., विभक्तः -क्ता -क्तं.—(Determined) कृतनिश्चयः -या -यं, कृतसङ्कल्पः -ल्पा -ल्पं, निश्चितः -ता -तं, सुनिश्चितः &c., सङ्कल्पितः &c., साङ्कल्पिकः -की -कं, व्यवसितः -ता -तं, प्रयतितः &c., कृतबुद्धिः -द्धिः -द्धि; 'having resolved on going to the forest,' वनगमनाय कृतबुद्धिः or वनं गन्तुं व्यवसितः.

RESOLVENT, *s.* (In medicine) द्रावकः, द्रावणं, शोथघ्नः, शोथहृत्.

RESOLVER, *s.* (Of doubts) संशयच्छेत्ता *m.* (त्तृ), संशयोच्छेदी *m.* (न्).

RESONANCE, *s.* अनुनादः, व्यनुनादः, प्रोद्घोषणं, उद्घोषणं, प्रतिध्वनिः *m.*

RESONANT, *a.* अनुनादी -दिनी -दि (न्), अनुनादः -दा -दं, प्रोद्घुष्टः -ष्टा -ष्टं, संघुष्टः &c., परिसंघुष्टः &c., उपघुष्टः &c., निह्रादी &c., मुखरितः -ता -तं.

To RESORT, *v. n.* आश्रि (c. 1. -श्रयति -यितुं), श्रि, आश्रयणं कृ, गम् (c. 1. गच्छति, गन्तुं), उपगम्, प्रतिगम्, अभिगम्, आगम्, उपे (c. 2. उपैति -तुं, rt. इ), अभ्युपे, अभिसृ (c. 1. -सरति -सर्त्तुं), या (c. 2. याति -तुं), प्रतिया, प्रत्याया, अभिया, या, सेव् (c. 1. सेवते -वितुं); 'resorted to,' आश्रितः -ता -तं; 'having resorted to,' आश्रित्य.

RESORT, *s.* (Act of going or betaking one's self) आश्रयणं, श्रयणं, उपगमः -मनं, अभ्युपगमः -मनं, प्रतिगमनं, अभिगमः -मनं, गमनं, अभिसारणं.—(Place of resort) गमनागमनस्थानं, अभिगमनस्थानं, अभिसारणस्थानं, आश्रयणस्थानं, आश्रयः, समाश्रयः, आयतनं, आशयः; 'resort of man,' लोकयात्रा.—(Refuge, means of relief) गतिः *f.*, उपायः.

To RESOUND, *v. a.* अनुनद् (c. 10. -नादयति -यितुं), व्यनुनद्, अभिनद्, आनद्, सन्नद्, नद्, ध्वन् (c. 10. ध्वनयति -यितुं), प्रतिध्वन्, प्रतिध्वनिं कृ.

To RESOUND, *v. n.* ध्वन् (c. 1. ध्वनति -नितुं), प्रतिध्वन्, प्रध्वन्, स्वन् (c. 1. स्वनति -नितुं), प्रतिस्वन्, स्तन् (c. 1. स्तनति -नितुं), प्रोद्घुष् (c. 1. -घोषति -षितुं), परिसंघुष्, गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), प्रक्ष्वेड् (c. 1. -क्ष्वेडति -डितुं), रस् (c. 1. रसति -सितुं).

RESOUNDING, *part.* (Sounding with) अनुनादः -दा -दं, निर्घुष्टः -ष्टा -ष्टं, परिसंघुष्टः &c., उपकूजितः -ता -तं, विकूजितः &c.

RESOURCE, *s.* गतिः *f.*, उपायः, अभ्युपायः, युक्तिः *f.*, प्रयुक्तिः *f.*, उपपत्तिः *f.*, तरणोपायः, क्लृप्तिः *f.*, कल्पना; 'other resource,' गत्यन्तरं, अन्योपायः, अन्यगतिः *f.*; 'having no other resource,' अनन्यगतिः -तिः -ति, अनन्यगतिकः -का -कं; 'having no resource,' अगतिकः -का -कं, गतिहीनः -ना -नं, निरुपायः -या -यं; 'last resource,' चरमगतिः *f.*, चरमोपायः, अगतिकगतिः *f.*—(Resources) विभवः, वित्तं, सम्भवः, धनं, अर्थः, आगमः, आयः; 'of small resources,' अल्पविभवः -वा -वं; 'of concealed resources,' उपगूढविभवः -वा -वं.

RESOURCELESS, *a.* अगतिकः -का -कं, गतिहीनः -ना -नं, निरुपायः -या -यं.

To RESPECT, *v. a.* (Regard, relate to) अपेक्ष् (c. 1. अपेक्षते -क्षितुं, rt. ईक्ष्), अवेक्ष्, प्रतीक्ष्, उद्दिश् (c. 6. -दिशति -देष्टुं), विषयकः -का -कं भू, सम्बन्ध् in pass. (-बध्यते), सम्बद्धः -द्धा -द्धं भू, सम्बन्धी -न्धिनी -न्धि भू.—(Esteem, reverence) मन् (c. 10. मानयति -यितुं), प्रतिमन्, सम्मन्, पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, आदृ (c. 6. -द्रियते -दर्त्तुं), सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), भज् (c. 1. भजति, भक्तुं), अर्ह् (c. 10. अर्हयति -यितुं), अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), अभ्यर्च्, समभ्यर्च्, समर्च्, सम्भू (c. 10. -भावयति -यितुं), पुरस्कृ, आदरं कृ, सम्मानं कृ.

RESPECT, *s.* (Relation, reference, regard) अपेक्षा, प्रतीक्षा, उद्देशः, विषयत्वं -ता, सम्बन्धः, अपेक्षा, अन्ववेक्षा, सन्धानं; 'with respect to,' अपेक्षया, अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, उद्देशेन, प्रति affixed; as, 'with respect to me,' मां प्रति.—(Esteem, reverence) मानं, सम्मानं, आदरः, मान्यत्वं, पूजा, अर्हा -र्हणं -णा, सम्भावना, अर्चा, अर्चनं -ना, अभ्यर्चा -र्चनं, सेवा -वनं, पुरस्कारः, प्रतीतिः *f.*, सत्कारः, अनुनयः, भक्तिः *f.*, सम्भ्रमः, मर्य्यादा; 'much respect,' बहुमानं.—(Respects, act of reverence) प्रणिपातः, प्रणामः, प्रणतिः *f.*, प्रणिपतनं, अभिवादनं, नमस्कारः, नमस्, नमस्या, वन्दनं, अभिवन्दनं; 'to pay one's respects,' प्रणिपत्, प्रणम्, नमस्कृ, अभिवद्, अभिवन्द्, वन्दनं कृ, प्रणामं कृ.—(Regard, view) अपेक्षा, अन्ववेक्षा, प्रतीक्षा, दृष्टिः *f.*; 'respect of persons,' भेददृष्टिः *f.*, पक्षदृष्टिः, पक्षपातः.—(Particular) विषयः, प्रकरणं.

RESPECTABILITY, *s.* मान्यता, सम्मान्यता, आर्य्यता -त्वं, गौरवं, गुरुता -त्वं, मर्य्यादा, प्रतिष्ठा; 'family respectability,' कुलमर्य्यादा.

RESPECTABLE, *a.* आर्य्यः -र्य्या -र्य्यं, मान्यः -न्या -न्यं, माननीयः -या -यं, सम्मान्यः &c., आदरणीयः -या -यं, पूजनीयः -या -यं, पूज्यः -ज्या -ज्यं, पूजनार्हः -र्हा -र्हं, प्रतीक्ष्यः -क्ष्या -क्ष्यं, प्रतीक्षणीयः -या -यं, अर्च्यः -र्च्या -र्च्यं, अर्चनीयः -या -यं, गुरुः -र्वी -रु, [illegible] -या -यं, गौरवितः -ता -तं, मर्य्यादावान् -वती -वत् (त्), मर्य्यादापालकः -का -कं, कुलमर्य्यादापालकः &c., मानी -निनी -नि (न्), पुरस्करणीयः &c., शिष्टः -ष्टा -ष्टं, सम्भावितः -ता -तं, भद्रकः -का -कं, अकुत्सितः -ता -तं, प्रतिष्ठितः &c., सप्रतिष्ठः -ष्ठा -ष्ठं; 'highly respectable,' परममान्यः &c.; 'a respectable person,' आर्य्यजनः, आर्य्यकः, आर्य्यमिश्रः, सज्जनः, सुजनः; 'respectable woman,' आर्य्यिका, आर्य्यका, कुलपालिका, कुलमर्य्यादापालिका, कुलस्त्री, कुलवधूः *f.*—(Moderate, fair) मध्यमः -मा -मं.

RESPECTABLY, *adv.* आर्य्यं, सगौरवं, समर्य्यादं, आर्य्यवत्, मान्यवत्, शिष्टवत्, आर्य्यजनवत्, आर्य्य in comp.; as, 'respectably dressed,' आर्य्यवेशः -शा -शं.

RESPECTED, *p. p.* सम्मानितः -ता -तं, पूजितः &c., आदृतः &c., कृतादरः -रा -रं, सेवितः -ता -तं, अर्चितः &c., प्रतीक्षितः &c.

RESPECTER, *s.* पूजकः, सम्पूजकः, आदरकृत्, प्रतीक्षकः, अपेक्षकः.

RESPECTFUL, *a.* आदरकारी -रिणी -रि (न्), आदृतः -ता -तं, दत्तादरः -रा -रं, कृतादरः &c., सादरः -रा -रं, आदरपूर्व्वः -र्व्वा -र्व्वं, आदरशीलः -ला -लं, आदरयुक्तः -क्ता -क्तं, मानकारी &c., मर्य्यादाशीलः &c., समर्य्यादः -दा -दं, प्रतीतः -ता -तं, सम्प्रतीतः &c.

RESPECTFULLY, *adv.* सादरं, समानं, आदरपूर्व्वं, आदरपुरःसरं, ससम्मानं, सम्मानपूर्व्वं, समर्य्यादं, अर्चापूर्व्वकं.

RESPECTFULNESS, *s.* आदरशीलता, मर्य्यादाशीलता, सादरत्वं, मर्य्यादा.

RESPECTING, *part.* प्रतीक्षकः -का -कं, अपेक्षकः &c., उद्देशकः &c.,

अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, प्रति affixed with an acc. c.

Respective, *a.* (Relative, not absolute) सापेक्षः -क्षा -क्षं, अपेक्षकः -का -कं, ससम्बन्धः -न्धा -न्धं. *See* Relative.—(Several) इतरेतरः -रा -रं, अन्योन्यः -न्या -न्यं, *see* Several; 'respective inclination,' इतरेतरकाम्या.—(Own) expressed by doubling the pronouns स्व, स्वकीय, स्वीय, स्वक, निज, आत्म, आत्मीय &c.; thus, 'in their respective stations.' स्वेषु स्वेषु स्थानेषु or simply by doubling the noun; thus, 'they dwell each in their respective houses,' गृहे गृहे प्रत्येकं वसन्ति.

Respectively, *adv.* इतरेतरं, अन्योन्यं, प्रत्येकं, प्रति or अनु prefixed, or more usually expressed by doubling a pronoun or noun, *see* the last.

Respiration, *s.* श्वासप्रश्वासं, श्वासोच्छ्वासं, श्वासः, श्वसनं, उच्छ्वासनं, प्राणः.

Respiratory, *a.* श्वासप्रश्वासकारी -रिणी &c., श्वासोच्छ्वाससम्बन्धी &c.

To respire, *v. n.* श्वासप्रश्वासं कृ, श्वासोच्छ्वासं कृ, श्वस् (c. 2. श्वसिति -तुं), आश्वस्, उच्छ्वस्, प्रश्वस्, प्राण् (c. 2. प्राणिति -तुं, rt. अन्).

Respite, *s.* विश्रामः, विश्रान्तिः *f.*, विरामः, विरतिः *f.*, निवृत्तिः *f.*, उपशमः, अपशमः, शमः, शान्तिः *f.*, विच्छेदः, अवरतिः *f.* *See* Reprieve.

To respite, *v. a.* विश्रामं दा, विश्रान्तिं दा, विश्रम् in caus. (-श्रामयति -यितुं), विरामं दा, अवकाशं दा. *See To* reprieve.

Resplendence, resplendency, *s.* प्रतापः, तेजस् *n.*, अतितेजस्. *See* Splendor.

Resplendent, *a.* प्रतापी -पिनी -पि (न्), सुप्रभः -भा -भं, देदीप्यमानः -ना -नं, प्रकाशमानः &c., विभ्राजमानः &c., अत्यादित्यः -त्या -त्यं, भानुमान् -मती -मत् (त्) *See* Splendid.

To respond, *v. n.* प्रतिवच् (c. 2. -वक्ति -क्तुं), प्रतिवद् (c. 1. -वदति -दितुं), प्रतिब्रू, प्रतिभाष्, प्रतिजल्प्. *See To* answer, reply, correspond.

Respondent, *s.* (In law) प्रतिवादी *m.* (न्), उत्तरवादी *m.*, प्रतिपक्षी *m.*, उत्तरपक्षी *m.*, समाधानपक्षी *m.*—(Party or cause of the respondent) उत्तरपक्षः, प्रतिपक्षः, समाधानपक्षः.

Response, *s.* (Answer) प्रतिवाक्यं, प्रतिवचनं, उत्तरं, *see* Reply.—(In disputations) प्रतिवादः, उत्तरं, प्रत्युत्तरं, समाधानं.—(Of an oracle) शकुनः -नं, प्रश्नः, प्रसादः, देववाणी, आकाशवाणी.—(In a litany, &c.) उत्तरवाक्यं.

Responsibility, *s.* अनुयोगाधीनता, अनुसन्धानाधीनता, विचाराधीनता, आह्वानाधीनता, अभियोज्यता, अनुयोज्यता, अभियोजनीयता, पर्यनुयोगाधीनता, पर्यनुयोज्यता, अनुसन्धानयोग्यता, आह्वानयोग्यता, आह्वेयता, उत्तरदानाधिकारः, उत्तरदानाधीनता, पृच्छाधीनता.

Responsible, *a.* (Liable to account or answer) अनुयोगाधीनः -ना -नं, पर्यनुयोगाधीनः &c., अनुसन्धानाधीनः &c., आह्वानाधीनः &c., आह्वेयः -या -यं, विचाराधीनः -ना -नं, अभियोज्यः -ज्या -ज्यं, अनुयोज्यः &c., पर्यनुयोज्यः &c., अनुयोजनीयः -या -यं, अनुयोक्तव्यः -व्या -व्यं, अभियोक्तव्यः &c., पृच्छाधीनः &c., आह्वानयोग्यः &c., अभियोक्त्राह्वानाधीनः &c., उत्तरदानाधिकारी -रिणी -रि (न्), उत्तरदानाधीनः -ना -नं; 'a responsible person,' अनुयोगाधीनजनः, यः प्रत्युत्तरं or प्रतिवाक्यं दातुम् अर्हति or येन प्रत्युत्तरं दातव्यम् ईदृशो जनः.—(Admitting or requiring an answer) प्रतिवाक्यः -क्या -क्यं.

Responsion, *s.* प्रतिवचनं, प्रतिवाक्यं, उत्तरकरणं, प्रत्युत्तरकरणं.

Responsive, *a.* उत्तरकारी -रिणी -रि (न्), उत्तरदायकः -का -कं, उत्तरदायी &c.

Rest, *s.* (Cessation of action or motion) विश्रामः, विश्रान्तिः *f.*, विरामः, निवृत्तिः *f.*, निवृत्तिः *f.*, विरामः, विरतिः *f.*, अवरतिः *f.*, उपरतिः *f.*, चेष्टानिवृत्तिः *f.*, व्यापारनिवृत्तिः *f.*, कर्मनिवृत्तिः *f.*, निश्चलता, कर्मच्छेदः, निर्व्यापारता, निरुद्यमता, व्यापाराभावः, उद्योगनिवृत्तिः *f.*, स्थिरता, नैश्चल्यं, अचलता, चलनाभावः. *See* Quiescence.—(Tranquillity, ease, quiet) सुखं, शान्तिः *f.*, शमः, उपशमः, शान्तता, प्रशान्तिः *f.*, स्वस्थता, स्वास्थ्यं, सौख्यं, समाधानं.—(Sleep, repose) निद्रा, निद्रावस्था, निद्रादशा, स्वप्नः, शयनं; 'at rest,' शान्तः -न्ता -न्तं, निवृत्तः -त्ता -त्तं, विश्रान्तः -न्ता -न्तं, निश्चलः -ला -लं, निर्व्यापारः -रा -रं, निश्चेष्टः -ष्टा -ष्टं, निरुद्यमः -मा -मं, निरुद्योगः -गा -गं.—(Pause in music or poetry) यतिः *f.*, अवसानं.—(That which is left) शिष्टं, अवशिष्टं, उच्छिष्टं, शेषः -षं, अवशेषः, *see* Remainder.—(The others) शिष्टजनाः *m. pl.*, अवशिष्टजनाः *m. pl.*, इतरे *m. pl.*, अपरे *m. pl.*, अन्ये *m. pl.* *See* Et-cætera.

To rest, *v. n.* (Cease from action or motion, be still) विश्रम् (c. 4. -श्राम्यति -श्रमितुं), निश्चलीभू, निश्चलः -ला -लं भू, विरम् (c. 1. -रमति -रन्तुं), आरम्, उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निर्वृत्, विनिवृत्, स्थिरीभू.—(Be tranquil, quiet) शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, सुखी -खिनी -खि भू, स्वस्थः -स्था -स्थं भू.—(Repose, sleep) शी (c. 2. शेते, शयितुं), स्वप् (c. 2. स्वपिति -तुं), संविश् (c. 6. -विशति -वेष्टुं), निद्रा, शयनं कृ, स्वप्नं कृ, निद्रां कृ.—(Lean on) अवलम्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, आलम्ब्, संश्रि (c. 1. -श्रयते -यितुं), समाश्रि, उपाश्रि, अवस्था (c. 1. -तिष्ठति -स्थातुं), निली (c. 4. -लीयते -लेतुं), अभिली, अवलम्बनं कृ.—(Confide) विश्रम्भ्, विश्रम्भ्.—(Remain) स्था, वृत्.

To rest, *v. a.* (Lay to rest, cause to rest) शी in caus. (शाययति -यितुं), विश्रम् (c. 10. -श्रामयति -यितुं), संविश् (c. 10. -वेशयति -यितुं), शयनं कृ.—(Lay, place on a support) अवलम्ब् in caus. (-लम्बयति -यितुं), न्यस् (c. 4. -अस्यति -सितुं), निधा, आधा, निविश्, स्था in caus., धृ in caus., सम्, आधारं कृ, आश्रयं कृ.

Rested, *p.p.* (Relieved from fatigue) विश्रान्तः -न्ता -न्तं, गतक्लमः -मा -मं, गतश्रमः -मा -मं, *see* Refreshed.—(Laid on for support) अवलम्बितः -ता -तं, आश्रितः -ता -तं, निलीनः -ना -नं, निषण्णः -ण्णा -ण्णं, निहितः &c., न्यस्तः -स्ता -स्तं; 'having rested upon' अवलम्ब्य, उपधाय.

Resting, *part.* अवलम्बी -म्बिनी -म्बि (न्), अवलम्बितः -ता -तं, आश्रितः &c., संश्रितः &c., अभिशयानः -ना -नं; 'her face resting on her hand,' हस्तनिहितवदना; 'resting on the head,' मस्तकस्थः -स्था -स्थं; 'a vessel resting on his head,' मस्तकावस्थितभाण्डः.

Resting-place, *s.* विश्रामस्थानं, विश्रमस्थानं, शयनस्थानं, उपधानं.

Restitution, *s.* प्रतिदानं, प्रत्यर्पणं, परिदानं, हृतप्रतिदानं, हृतप्रत्यर्पणं, हृतपरिदानं, पुनरर्पणं, प्रत्यानयनं. *See* Restoration.

Restive, restiff, *a.* दुर्दम्यः -म्या -म्यं, दुर्विनीतः -ता -तं, दुर्विनेयः -या -यं, दुर्वशः -शा -शं, अदम्यः &c., अवश्यः &c., अविनेयः &c., प्रतीपः -पा -पं, विषमः -मा -मं, दुर्निग्रहः -हा -हं, दुर्द्धरः -रा -रं, दुःशृष्टः -ष्टा -ष्टं; 'horse,' शृङ्खलः, शृङ्खलकः; 'elephant,' अंकुशदुर्द्धरः.

Restiveness, *s.* दुर्दम्यता, दुर्विनीतता, अवश्यता, प्रतीपता, दुष्टता.

Restless, *a.* (Unquiet) अशान्तः -न्ता -न्तं, शान्तिहीनः -ना -नं, अनिर्वृतः -ता -तं, अशान्तचित्तः -त्ता -त्तं, अस्वस्थः -स्था -स्थं, अधैर्यः -र्या -र्यं, अधृतचित्तः &c., परिप्लवः -वा -वं, व्याकुलः -ला -लं, विह्वलः -ला -लं, असमाहितः -ता -तं.—(Fidgety, always moving) चञ्चलः -ला -लं, चपलः -ला -लं, सदाचलः &c., सततगतिः -तिः -ति, सदा-

गतिः &c., निरास्वदः -दा -दं, अल्पयत्नीनः -ना -नं.—(Sleepless) विनिद्रः -द्रा -द्रं, विगतनिद्रः &c., अनिद्रः &c., उन्निद्रः &c., निद्राहीनः -ना -नं, स्वप्नहीनः &c.

Restlessly, *adv.* अशान्तं, अशान्त्या, चञ्चलं, सचाञ्चल्यं, अनिर्वृतं.

Restlessness, *s.* अशान्तिः, शान्तिहीनता, अनिर्वृतिः *f.*, अस्वस्थता, अस्वास्थ्यं, चञ्चलता, चाञ्चल्यं, चपलता, व्यग्रता, व्याकुलता, असमाधानं, असमाहितता.

Restorable, *a.* परावर्त्यः -र्त्या -र्त्यं, प्रतिदेयः -या -यं, प्रत्यर्पणीयः &c.

Restoration, *s.* (Act of giving back) प्रतिदानं, प्रत्यर्पणं, परावर्त्तः -र्त्तनं, परावृत्तिः *f.*, परिदानं, हृतप्रतिदानं, हृतपरिदानं, हृतप्रत्यर्पणं.—(Bringing back, or replacing in a former state) प्रत्यानयनं, उद्धरणं, उद्धारः, पूर्व्ववत्करणं, पूर्व्वस्थितिस्थापना, पूर्व्वदशास्थापनं, पूर्व्वदशानयनं, पुनःस्थापनं -ना.—(Repairing) जीर्णोद्धारः, जीर्णोद्धरणं, नष्टोद्धारः, नष्टोद्धरणं.—(Recovery) समुत्थानं, रोगात्समुत्थानं. *See* Recovery.

Restorative, *a.* तेजोदायकः -का -कं, तेजस्करः -रा -रं, सत्त्वदः -दा -दं, अग्निदायकः &c., अग्निदः &c., तेजोवर्धकः &c. *See* Invigorating.

Restorative, *s.* अग्निदायकम् or तेजोदायकम् औषधं, तेजोवर्धनं.

To restore, *v. a.* (Give back) प्रतिदा (c. 3. -ददाति -दत्ते -दातुं), परिदा, प्रऋ in caus. (-अर्पयति -यितुं), प्रतिपद् (c. 10. -पादयति -यितुं), पुनः प्रतिपद्, पुनर् ऋ in caus., पुनर् दा, पुनः प्रदा, परावृत् in caus. (-वर्त्तयति -यितुं), प्रयम् (c. 1. -यच्छति -दातुं), पुनः प्रयम्, निर्यत् (c. 10. -यातयति -यितुं), समुपाकृ, प्रत्यर्पणं कृ, प्रतिदानं कृ, परावर्त्तं कृ.—(Replace) पुनः स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, प्रतिरुह् in caus., प्रतिधा, *see* Replace.—(Bring back to its former state, repair) पूर्व्ववत् कृ, पूर्व्वस्थितिम् आनी or गम् in caus., पूर्व्वदशाम् आनी or प्रत्यानी, उद्धृ (c. 1. उद्धरति, उद्धर्तुं, rt. हृ), जीर्णोद्धारं कृ, प्रतिकृ, प्रतिसंस्कृ, साध्, *see* *To* repair.—(Bring back) प्रत्यानी (c. 1. -नयति -नेतुं), प्रतिनी, पुनर् आनी.—(Restore to life) जीव् in caus., *see* *To* re-animate.—(To health), *see* *To* cure, recover.

Restored, *p. p.* (Given back) प्रतिदत्तः -त्ता -त्तं, परिदत्तः &c., प्रत्यर्पितः -ता -तं, पुनरर्पितः &c., प्रतिपादितः &c., प्रत्यापन्नः -न्ना -न्नं, प्रदत्तः -त्ता -त्तं, परावृत्तः -त्ता -त्तं, परावर्त्तितः -ता -तं.—(Replaced) पुनःस्थापितः -ता -तं, प्रतिष्ठापितः &c.—(Repaired) उद्धृतः -ता -तं, जीर्णोद्धृतः &c., प्रतिसंस्कृतः &c.—(Brought back) प्रत्यानीतः -ता -तं, पुनरानीतः &c.—(To life) प्राप्तजीवनः -ना -नं.—(To one's senses) लब्धचेताः -ताः -तः (स्), प्राप्तचैतन्यः -न्या -न्यं. *See* Recovered.

Restorer, *s.* प्रतिदाता *m.* (तृ), उद्धर्त्ता *m.* (र्तृ), जीर्णोद्धर्त्ता, जीर्णोद्धारकः.

To restrain, *v. a.* निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, संयम्, परियम्, अभ्यायम्, यम्, निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, सन्निरुध्, संरुध्, निवृ (c. 10. -वारयति -यितुं), वृ, संहृ (c. 1. -हरति -हर्तुं), प्रत्याहृ, उपसंहृ, विधृ (c. 10. -धारयति -यितुं), यन्त् (c. 10. यन्त्रयति -यितुं), बाध्, निषिध्, प्रतिषिध्, प्रतिबन्ध्, नियमनं कृ, आकलनं कृ, आकल्.

Restrainable, *a.* निग्रहीतव्यः -व्या -व्यं, निग्रहणीयः -या -यं, नियन्तव्यः &c., नियम्यः -म्या -म्यं, निवारणीयः &c., संहरणीयः &c., प्रत्याहरणीयः &c., आकलनीयः &c.

Restrained, *p. p.* निगृहीतः -ता -तं, नियमितः &c., नियतः &c., संयतः &c., संयमितः &c., यतः &c., यन्त्रितः &c., नियन्त्रितः &c., रुद्धः -द्धा -द्धं, निरुद्धः &c., विधृतः -ता -तं, विधारितः &c., निवारितः &c., प्रत्याहृतः &c., उपसंहृतः &c., बाधितः &c., आकलितः &c., बद्धः -द्धा -द्धं, निबद्धः &c., प्रतिबद्धः &c., धैर्य्यशाली -लिनी &c.; 'in desire,' यतेन्द्रियः -या -यं, बद्धकामः -मा -मं.

Restrainer, *s.* नियन्ता *m.* (न्तृ), यन्ता *m.*, नियामकः, निग्रहीता *m.*, निरोधकः.

Restraint, *s.* निग्रहः -हणं, नियमनं, संयमः -मनं, संयामः, यमः, यतिः *f.*, नियतिः *f.*, यमनं, निगृहीतिः *f.*, यन्त्रणं, नियन्त्रणं, निरोधः, अवरोधः, प्रतिरोधः, उपरोधः, रोधः, सम्प्रतिरोधकः -कं, संग्रहः, प्रग्रहः, वियमः, वियामः, वारणं, निवारणं, आवरणं, प्रतिबन्धः, निबन्धः -न्धनं, बाधः -धा -धनं, आकलनं, दमः -मनं, स्तम्भः, गुप्तिः *f.*, निषेधः, प्रतिषेधः; 'self-restraint,' आत्मसंयमः, आत्मयमः, दान्तिः *f.*, नैयत्यं; 'absence of restraint,' निर्यन्त्रणं.—(Of speech) वाग्यमः -मनं, वाग्यतत्वं.—(In law, limitation) आसेधः; 'of time,' कालासेधः; 'of place,' स्थानासेधः; 'from living away from home,' प्रवासासेधः; 'from employment,' कर्म्मासेधः.

To restrict, *v. a.* निबन्ध् (c. 9. -बध्नाति -बन्धुं), परिमा (c. 2. -माति -तुं), परिमितं -तां कृ, सपरिमाणं -णां कृ, नियम् (c. 1. -यच्छति -यन्तुं), संयम्, निग्रह् (c. 9. -गृह्णाति, ग्रहीतुं), निरूप् (c. 10. -रूपयति -यितुं), मर्य्यादां or सीमां निरूप्, समर्य्यादं -दां कृ, ससीमं -मां कृ.

Restricted, *p. p.* निबद्धः -द्धा -द्धं, परिमितः -ता -तं, मितः &c., नियतः &c., नियमितः &c., समर्य्यादः -दा -दं, सावधिकः -का -कं, ससीमः -मा -मं; 'as a word,' मितार्थः, योगरूढः. *See* Limited.

Restriction, *s.* निबन्धः -न्धनं, बन्धः -न्धनं, नियमः -मनं, संयमः, नियतिः *f.*, निग्रहः, मर्य्यादा, सीमा, परिसीमा, अवधिः *m.*, परिमितिः *f.*, परिमितता, परिमाणं, परिच्छेदः, विशेषः -षणं; 'without restriction,' अनिबन्धनः -ना -नं, अविशेषणः -णा -णं.

Restrictive, *a.* निबन्धनः -ना -नं, नियामकः -का -कं, परिमापनः -ना -नं, परिच्छेदकः &c., मर्य्यादानिरूपकः &c., सीमानिरूपकः &c.

To result, *v. n.* (Issue, proceed) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्, जन् (c. 4. जायते, जनितुं), उत्पन्न इव, सिध् (c. 4. सिध्यति, सेद्धुं), प्रभू (c. 1. -भवति -वितुं), उद्भू, अनुभू in pass., प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुवृत्, निःसृ, इ.—(End in) अवसो (c. 4. -स्यति -सातुं), पर्य्यवसो, निष्पद् in pass., विगम्, निर्गम्, अपगम्.

Result, *s.* (Consequence, issue) परिणामः, फलं, उत्पत्तिः *f.*, सिद्धिः *f.*, प्रयुक्तिः *f.*, प्रयोगः, उत्पन्नं, उद्भूतं, निष्पन्नं, उत्तरं, फलमुत्तरं, फलोदयः, फलोत्पत्तिः *f.*, निर्गमः, शेषः, अन्तः, उदर्कः, जन्यं, अनुभवः, भव्यं, अनुसारः, अनुवर्त्तनं, अन्वयः, प्रत्ययः, अनुपक्रः, योगः, कार्य्यं, अर्थः, फलितार्थः, अवसानं, अवसायः, पर्य्यवसानं, गुणः, परिपाकः, *see* Effect; 'unexpected result,' विपाकः; 'happy result,' शुभफलं.—(Result of reasoning, conclusion) सिद्धान्तः, सिद्धिः *f.*, निष्कितार्थः, मथितार्थः, निर्णीतार्थः, उपपत्तिः *f.*, अनुभूतिः *f.*, अनुमितिः *f.*, घटितार्थः.

Resulting, *part.* प्रयुक्तः -क्ता -क्तं, उत्पन्नः -न्ना -न्नं, जातः -ता -तं, जनितः &c., जन्यः -न्या -न्यं, उद्भूतः &c., अनुवृत्तः -त्ता -त्तं, प्रवृत्तः &c., अनुसारी -रिणी &c., अनुयायी &c., फल in comp., प्रभव in comp., उद्भव in comp.; 'pain resulting from sin,' पापप्रयुक्तं दुःखं; 'fever resulting from fasting,' उपवासप्रयुक्तो ज्वरः; 'obedience resulting from fear,' भयप्रयुक्ता भक्तिः; 'resulting from that,' तत्फलः -ला -लं.

Resumable, *a.* प्रत्याहरणीयः -या -यं, प्रत्याहार्य्यः -र्य्या -र्य्यं, अवहार्य्यः &c.

Resumé, *s.* सारः, सारार्थः, सारसंग्रहः, संग्रहः, उपसंहारः.

To resume, *v. a.* (Take back or again) पुनर् आदा (c. 3. -ददाति

-दत्ते -दातुं), प्रत्यादा, पुनर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रत्याहृ (c. 1. -हरति -हर्तुं), पुनर् आहृ, पुनर् हृ, अपहृ, अनुप्राप् (c. 5. -आप्नोति -आप्तुं), पुनः प्राप्, प्रत्यवाप्, पुनर् लभ्.—(Take up again after interruption, begin again) प्रकृतम् or प्रस्तुतम् or मूलविषयम् अनुसृ (c. 1. -सरति -सर्तुं), प्रकृतप्रसङ्गं कृ, प्रकृतानुसरणं कृ, पुनर् आरभ् (c. 1. -रभते -रब्धुं), पुनःप्रसङ्गं कृ, पुनर् वद् or ब्रू; 'he resumed,' पुनराह.

Resumed, *p.p.* प्रत्याहृतः -ता -तं, अपहृतः &c., पुनर्गृहीतः -ता -तं.

Resuming, *part.* दत्तापहारी -रिणी -रि (न्), प्रत्याहारकः -का -कं.

Resumption, *s.* प्रत्याहरणं, प्रत्याहारः, पुनराहरणं, पुनर्हरणं, अपहारः, अपहरणं, पुनर्ग्रहणं, प्रत्यादानं, पुनरादानं; 'of a grant,' दत्तापहारः, दत्तापहरणं.

Resurrection, *s.* मृतोत्थानं, मृतोत्थितिः *f.*, मृतलोकोत्थानं, पुनरुत्थानं, पुनरुत्थितिः *f.*, मृतपुनरुत्थानं, न्यायदिने or विचारदिने मृतलोकानां पुनरुत्थितिः *f.* or श्मशानादुत्थितिः *f.*; 'resurrection day,' मृतोत्थानकालः.

To resuscitate, *v. a.* प्रतिजीव् (c. 10. -जीवयति -यितुं), संजीव्, उज्जीव्, जीव्, पुनः सजीवं -वां कृ, उत्था in caus. *See To* revive.

Resuscitated, *p. p.* संजीवितः -ता -तं, प्रतिजीवितः &c., पुनः सजीवीकृतः &c.

Resuscitation, *s.* प्रतिजीवनं, सञ्जीवनं, पुनः सजीवीकरणं, पुनरुत्थापनं.

Retail, retailing, *s.* अल्पविक्रयः, खण्डविक्रयः, क्षुद्रविक्रयः, अल्पपण्यता, अल्पविपणः, अल्पवाणिज्यं, खण्डवाणिज्यं, क्षुद्रवाणिज्यं.

To retail, *v. a.* अल्पशः or खण्डशो विक्री (c. 9. -क्रीणाति -णीते -क्रेतुं), अल्पविक्रयं कृ, खण्डविक्रयं कृ, अल्पपण्यतां कृ, पण् (c. 1. पणते -णितुं), खण्डवाणिज्यं कृ.

Retailer, *s.* खण्डविक्रयी *m.* (न्), खण्डविक्रयकारी *m.*, अल्पविक्रयकारी *m.*, विपणी *m.* (न्), प्रापणिकः, आपणिकः, खण्डवाणिज्यकृत् *m.*, खण्डवणिक् *m.* (ज्).

To retain, *v. a.* (Keep, hold) धृ (c. 10. धारयति -यितुं, c. 1. धरति, धर्तुं), सन्धृ, धा (c. 3. दधाति, धत्ते, धातुं), रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्, अभिरक्ष्, धारणं कृ.—(Keep back) विधृ, निग्रह्, विनिग्रह् संनिग्रह्, संहृ, उपसंहृ.—(Hire, engage) वेतनेन or मूल्येन ग्रह्, निरूपितवेतनं प्रतिज्ञाय कर्म्मणि नियुज् or स्था in caus.—(Remember), *see* the word.

Retained, *p. p.* धृतः -ता -तं, धारितः &c., विधृतः &c., स्थापितः &c.

Retainer, *s.* (Dependant, adherent) आश्रितः, आश्रयी *m.* (न्), अनुचरः, अनुजीवी *m.* (न्), उपजीवी *m.*, भाक्तिकः, भृत्यः, अवलम्बी *m.*, अनुषङ्गी *m.*, अनुगामी *m.*, अनुचारी *m.*, अनुयायी *m.*, अनुगः, सपक्षः, सेवकः, पार्श्वकः; 'an old retainer,' चिराश्रितः, चिरसेवकः; 'body of retainers,' परिवारः, भृत्यवर्गः, सेवकवर्गः, अनुयायिवर्गः.

Retaining, *s.* धारणं, धरणं, धृतिः *f.*, रक्षणं, नियोजनं, स्थापनं.

To retaliate, *v. a.* प्रतिकृ, विप्रतिकृ, विप्रकृ, प्रत्यपकृ, वैरप्रतिकारं कृ, प्रत्यपकारं कृ, प्रतिफल् (nom. प्रतिफलयति -यितुं), प्रतिफलं दा, प्रतियातं कृ, प्रतिहिंस् (c. 7. -हिनस्ति, c. 1. -हिंसति -सितुं), प्रतिहिंसां कृ, वैरशुद्धिं कृ, वैरोद्धारं कृ, निर्यत् (c. 10. -यातयति -यितुं), वैरनिर्यातनं कृ.

Retaliated, *p.p.* प्रतिकृतः -ता -तं, विप्रतिकृतः &c., विप्रकृतः &c., प्रत्यपकृतः &c., प्रतिफलितः -ता -तं, निर्यातितः -ता -तं.

Retaliation, *s.* प्रतिकारः, प्रतीकारः, प्रतिकृतिः *f.*, प्रतिक्रिया, प्रतिकर्म्म *n.* (न्), विप्रतिकारः, विप्रकारः, विप्रकृतिः *f.*, प्रत्यपकारः, वैरप्रतिक्रिया, वैरप्रतिकारः, प्रतिविधिः *m.*, प्रतिफलं, प्रतिबलं, प्रतिहिंसा, वैरशुद्धिः *f.*,

वैरोद्धारः, निर्यातनं, वैरनिर्यातनं, अपकारः, अपक्रिया, अपकरणं, समाधिः *m.*, शुद्धिः.

To retard, *v. a.* (Diminish the velocity of motion) वेगरोधं कृ, वेगावरोधं कृ, वेगं or गतिं रुध् (c. 7. रुणद्धि, रोद्धुं) or अवरुध् or विधृ (c. 10. -धारयति -यितुं), वेगविधारणं कृ, वेगविलम्बनं कृ, गतिविलम्बनं कृ, गतिमन्दतां कृ, मन्दगतिं -तिं -ति कृ.—(Cause delay) विलम्ब् (c. 10. -लम्बयति -यितुं), विलम्बं कृ, विलम्बनं कृ, मन्दतां कृ, मन्दं -न्दां कृ.—(Hinder) रुध्, निरुध्, प्रतिरुध्, अवरुध्, संरुध्, बाध्, स्तम्भ्, प्रतिबन्ध्.

Retardation, retarding, *s.* वेगरोधः, वेगावरोधः, वेगविधारणं, वेगविलम्बनं, गतिविलम्बनं, गतिप्रतिबन्धः, वेगसंकोचः, रोधः, अवरोधः, विलम्बनं.

Retarded, *p. p.* रुद्धवेगः -गा -गं, अवरुद्धवेगः &c., रुद्धगतिः -तिः -ति, अवरुद्धगतिः &c., विलम्बितः -ता -तं, विलम्बितवेगः -गा -गं, विलम्बितगतिः -तिः -ति, विधारितवेगः &c.; 'gradually retarded motion,' क्षीयमाणो वेगः, क्षीयमाणा गतिः.

Retarding, *part.* विलम्बी -म्बिनी &c., वेगरोधकः -का -कं, वेगावरोधकः &c.

To retch, *v. n.* वमितुं or छर्दयितुं यत्नं कृ or उद्वमं कृ or उद्वम्, वमनोद्यमं कृ.

Retention, *s.* धारणं -णा, धृतिः *f.*, धरणं, आग्रहः, ग्रहः, संग्रहः -हणं.—(Faculty of the mind) धारणाशक्तिः *f.*, धारणा, स्मृतिः *f.*, मेधा.

Retentive, *a.* (As memory) धारणावान् -वती -वत् (त्), धारणाशक्तिविशिष्टः -ष्टा -ष्टं, धारणाशक्तियुक्तः -क्ता -क्तं.—(Retaining) धारकः -का -कं, धरः -रा -रं, आग्रही -हिणी &c.; 'of moisture,' क्लेदधारकः -का -कं; 'of life,' दुर्मरः -रा -रं.

Retentiveness, *s.* धारणाशक्तिः *f.*, धारणक्षमता, धारकत्वं, धृतिः *f.*, दृढता.

Reticular, reticulated, *a.* जालाकारः -रा -रं, जालाकृतिः -तिः -ति, जालरूपः -पा -पं, व्यत्यस्तरेखाविशिष्टः -ष्टा -ष्टं, जालवद् अन्तरालविशिष्टः &c.

Reticulation, *s.* जालकर्म्म *n.* (न्), जालाकारकर्म्म *n.*, जालवत्कर्म्म *n.*

Reticule, *a.* स्त्रीलोकेन हस्तेन भृतं सूच्यादिधारणयोग्यो लघुकोषः.

Retina, *s.* नेत्रान्तःस्थितचित्रपत्रं, नेत्रान्तःस्थचित्रपत्रं.

Retinue, *s.* परिवारः, परिबर्हः, बर्हः, परिग्रहः, तन्त्रं, परिकरः, परिजनः, परिजनाः *m. pl.*, परिचराः *m. pl.*, अनुचराः *m. pl.*, परिचरवर्गः, सहचरवर्गः, भृत्यवर्गः, परिच्छदः.

To retire, *v. n.* अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, परावृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रतिनिवृत्, निवृत्, पार्श्वे परावृत्, अवस्था (c. 1. -तिष्ठते -स्थातुं), अपसृ (c. 1. -सरति -सर्तुं), अपया (c. 2. -याति -तुं), अपगम् (c. 1. -गच्छति -गन्तुं), व्यपगम्, चल् (c. 1. चलति -लितुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्.—(Retire into privacy or private life) विविक्ततां or विविक्तवृत्तिम् आस्था or सेव्, सर्वसङ्गान् समस् (c. 4. -अस्यति -सितुं) or त्यज्, सङ्गत्यागं कृ, गृहत्यागं कृ, विविक्तदेशे वस्.

Retired, *a.* (Sequestered, secluded) विविक्तः -क्ता -क्तं, विजनः -ना -नं, निभृतः -ता -तं, एकान्तः -न्ता -न्तं, निर्जनः &c., निःशलाकः -का -कं.—(Secret) गूढः -ढा -ढं, गुप्तः -प्ता -प्तं, प्रच्छन्नः -न्ना -न्नं; 'a retired spot,' विविक्तस्थानं, निर्जनस्थानं, निर्जनदेशः, रहःस्थानं; 'a place whence water has retired,' परापः -पा -पं, परेपः -पा -पं; 'leading a retired life,' विविक्तसेवी -विनी -वि (न्).

Retirement, *s.* (Act of retiring) परावर्त्तः -र्त्तनं, प्रतिनिवर्त्तनं, निवर्त्तनं, पार्श्वपरिवर्त्तनं, अपक्रमः -मणं, अपसरणं, अपगमः -मनं, पलायनं.—(Act of retiring into privacy or private life) विविक्तसेवनं, विविक्तवृत्तिसेवनं, विविक्तवासासेवनं, विविक्तदेशे वासः, सङ्गत्यागः, गृहत्यागः.—(Private or retired life or state) विविक्तता -त्वं,

विविक्तवृत्तिः *f.*, विविक्तदशा, एकाकिता, एकाकवृत्तिः *f.*—(Place of retirement) विविक्तस्थानं, निर्जनस्थानं, निभृतस्थानं, निवासः.

RETIRING, *part.* or *a.* (Withdrawing) परावर्त्ती -र्त्तिनी -र्त्ति (न्), अपक्रामन् -मन्ती -मत् (त्), आत्मपरिवर्त्ती &c.—(Not forward or bold) विविक्तसेवी &c., एकान्तसेवी &c., विविक्तप्रियः -या -यं, एकान्तप्रियः &c., अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं, मन्दास्यविह्वलः -ला -लं, मन्दसभाजितः -ता -तं. *See* RESERVED.

TO RETORT, *v. a.* प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रत्यवक्षिप्, पुनः क्षिप् or अवक्षिप्, प्रतिकृ, प्रत्यारुह् in caus. (-रोपयति -यितुं). *See* TO RECRIMINATE.

TO RETORT, *v. n.* प्रत्यपवद् (c. 1. -वदति -दितुं), प्रत्यपवादं कृ, प्रत्यवक्षेपं कृ, प्रत्युत्तरं कृ, प्रतिनिन्द् (c. 1. -निन्दति -न्दितुं), पुनर् निन्द्, प्रत्यारोपं कृ.

RETORT, *s.* (Return of an accusation or incivility) प्रत्यपवादः, प्रत्यवक्षेपः, प्रत्यारोपः, प्रत्यभियोगः, प्रत्युत्तरं, प्रतिनिन्दा, विप्रकृतिः *f.*, विप्रकारः, विप्रतिकारः, प्रतिकारः.—(Vessel in chemistry for distillation) वकः, वकयन्त्रं, मूषः -षी -षा -षिका; 'glass retort,' काचवकः, काचवकयन्त्रं.

TO RETRACE, *v. a.* (One's steps) निवृत्, प्रतिनिवृत्. *See* TO RETURN.

TO RETRACT, *v. a.* or *n.* कथितत्यागं कृ, उक्तत्यागं कृ, उक्तास्वीकारं कृ, कथितास्वीकारं कृ, उक्तप्रत्यादेशं कृ, व्यतिक्रमं कृ, अनुशयं कृ, निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl.; 'induce to retract,' निवृत् in caus. *See* TO RECANT, RECALL.

RETRACTATION, RETRACTION, *s.* कथितत्यागः, उक्तत्यागः, उक्तप्रत्यादेशः, उक्तास्वीकारः, कथितास्वीकारः, निवर्त्तनं, निवृत्तिः *f.*, अनुशयः, व्यतिक्रमः. *See* RECANTATION.

RETRACTED, *p. p.* अनुशयितः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, व्यतिक्रान्तः -न्ता -न्तं.

RETREAT, *s.* (Act of retiring) अपक्रमः -मणं, अपसरणं, अपयानं, परावर्त्तः, परावृत्तिः *f.*, अपावर्त्तनं, अपावृत्तिः *f.*, परिवर्त्तः -र्त्तनं, विप्रयाणं, प्रतिप्रयाणं, अपायः, अपगमः -मनं, उपक्रमः, निवर्त्तनं, प्रतिनिवर्त्तनं, वक्रमः.—(Of an army) पलायनं, विपलायनं, प्रपलायनं, द्रावः, विद्रवः, प्रद्रावः, सन्द्रावः, उद्रावः, द्रवः, संयुगे निवर्त्तनं.—(Place of retirement) विविक्तस्थानं, विविक्तदेशः, निर्जनस्थानं, निर्जनदेशः, निभृतस्थानं, रहःस्थानं, परावर्त्तनस्थानं.

TO RETREAT, *v. n.* (Retire) अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, परावृत्, अपया, अपगम्, *see* TO RETIRE.—(As an army) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु, अपधाव् (c. 1. -धावति -वितुं), प्रधाव्.—(Withdraw into privacy), *see* TO RETIRE.

RETREATED, *p. p.* परावृत्तः -त्ता -त्तं, अपावृत्तः &c., पलायितः -ता -तं.

TO RETRENCH, *v. a.* (Cut off, curtail) छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, अपकृत् (c. 6. -कृन्तति -कर्त्तितुं), लू (c. 9. लुनाति, लवितुं), लुप् (c. 6. लुम्पति, लोप्तुं), खर्व्, छेदनं कृ.—(Lessen expenses, &c.) व्ययं न्यूनीकृ or अल्पीकृ or ह्रस् in caus. or संहृ.

RETRENCHMENT, *s.* छेदः, अवच्छेदः, लोपः, व्ययच्छेदः, व्ययलोपः, न्यूनव्ययः.

RETRIBUTION, *s.* प्रतिफलं, प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकारः, निष्कृतिः *f.*

RETRIBUTIVE, RETRIBUTORY, *a.* प्रतिफलप्रदः -दा -दं, प्रतिफलदायकः -का -यिका -कं, प्रतिफलदः &c., परिशोधकः -का -कं, प्रतिकारकः -का -कं, प्रतिकारी -रिणी -रि (न्).

RETRIEVABLE, *a.* उद्धरणीयः -या -यं, पुनरुद्धरणीयः &c., पुनःप्रापणीयः &c.

TO RETRIEVE, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, पुनर् उद्धृ, पुनः प्राप् (c. 5. -आप्नोति -आप्तुं), पुनर् लभ्, पुनर् आनी, उद्धारं कृ, उद्धरणं कृ. *See* TO RECOVER, RESTORE.

RETRIEVED, *p. p.* उद्धृतः -ता -तं, समुद्धृतः &c., पुनः प्राप्तः -प्ता -प्तं.

TO RETROCEDE, *v. n.* प्रतिगम् (c. 1. -गच्छति -गन्तुं), विपरीतं गम्, परावृत्.

RETROCESSION, *s.* प्रतिगमनं, पश्चाद्गमनं, विपरीतगमनं, परावर्त्तनं.

RETROGRADATION, *s.* प्रतिक्रमः, व्यतिक्रमः, विपरीतगतिः *f.*, वक्रगतिः *f.*

RETROGRADE, *a.* विपरीतगामी -मिनी -मि (न्), प्रतिगामी &c., व्यतिक्रामकः -मा -मं, विपरीतगतिकः -का -कं, परावृत्तः -त्ता -त्तं, प्रतीपः -पा -पं, प्रातीपिकः &c.—(In astronomy) वक्रगतिः -तिः -ति, वक्रः -क्रा -क्रं.

TO RETROGRADE, *v. n.* (Go backward) परावृत् (c. 1. -वर्त्तते -र्त्तितुं), विपरीतं गम् (c. 1. गच्छति, गन्तुं), प्रतिगम्, पश्चाद् गम्, प्रतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, व्यतिक्रमं कृ.—(Decline) क्षीणसत्त्वः -त्त्वा -त्त्वं भू, मूलसत्त्वाद् भ्रंश्. *See* TO DEGENERATE, DECLINE.

RETROGRESSION, *s.* पश्चाद्गमनं, विपरीतगमनं, प्रतिगमनं, व्यतिक्रमः.

RETROSPECT, *s.* गतावलोकनं, अतीतावलोकनं, गतकालावलोकनं, अतीतकालावलोकनं, भूतावलोकनं, भूतकालावलोकनं, अनुदर्शनं, अनुदृष्टिः *f.*, पश्चाद्दर्शनं, पश्चादृष्टिः *f.*, पश्चादवलोकनं, अन्ववलोकनं.

RETROSPECTIVE, *a.* (Looking back) पश्चाद्दर्शी -र्शिनी -र्शि (न्), पश्चादवलोकी &c., गतावलोकी &c., गतकालावलोकी &c., अनुदर्शी &c.—(Relating to what is past) गतापेक्षकः -का -कं, भूतापेक्षकः &c., अतीतापेक्षकः &c., गतकालापेक्षकः &c., गतकालापेक्षी -क्षिणी &c., गतकालसापेक्षः -क्षा -क्षं, भूतकालसापेक्षः &c.

RETROSPECTIVELY, *adv.* गतापेक्षया, गतकालापेक्षया, गतकालसापेक्षं, भूतापेक्षया.

TO RETURN, *v. n.* (Come back, go back) पुनर् आगम् (c. 1. -गच्छति -गन्तुं), प्रत्यागम्, प्रतिगम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रत्यावृत्, प्रतिनिवृत्, सन्निवृत्, पर्यावृत्, उपावृत्, व्यावृत्, विनिवृत्, आवृत्, पुनर् आवृत्, प्रतिया (c. 2. -याति -तुं), प्रत्याया, पुनर् आया, प्रत्युपया, प्रत्ये (c. 2. प्रत्येति -तुं, rt. इ), पुनर् इ, प्रतिक्रम् (c. 1. -क्रामति -क्रमितुं), प्रतिपद् (c. 4. -पद्यते -पत्तुं), पुनर् अभिपद्, पुनर् उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रत्युपस्था, पुनर् आव्रज्; 'he returned to the place whence he came,' प्रतिजगाम यथागतं.—(Turn back or round) परावृत्, परिवृत्, पर्यावृत्, परिवर्त्तनं कृ.—(Answer), *see* REJOIN, RETORT.

TO RETURN, *v. a.* (Give back) प्रतिदा (c. 3. -ददाति -दातुं), पुनर् दा, परिदा, प्रत्यृ in caus., पुनर् कृ, प्रतिपद्, *see* TO RESTORE.—(Bring or send back) पुनर् नी or आनी, पुनर् आनी in caus. (-नाययति -यितुं), पुनर् गम् in caus., पुनः प्राप् in caus.—(Give in recompense) प्रतिकृ, प्रतिफलं दा, प्रतिफलाय दा, प्रतिदा; 'to return a benefit,' प्रत्युपकृ; 'an injury,' प्रत्यपकृ, प्रतिहिंस्, प्रतिहिंसां कृ; 'to return evil for good,' परोपकारे कृते प्रत्यपकारं कृ or आचर्, उपकारात् प्रति अपकारं कृ, उपकारं प्राप्य अपकारं कृ; 'to return good for evil,' परापकारे कृते प्रत्युपकारं कृ or आचर्.—(Render an official account), *see* TO REPORT.

RETURN, *s.* (Coming back) पुनरागमनं, प्रत्यागमः -मनं, प्रतिगमनं, प्रत्यावृत्तिः *f.*, प्रत्यावर्त्तनं, निवर्त्तनं, निवृत्तिः *f.*, प्रतिनिवृत्तिः *f.*, सन्निवृत्तिः *f.*, पर्यावृत्तिः *f.*, पर्यावर्त्तः -र्त्तनं, पुनरावृत्तिः *f.*, आवृत्तिः *f.*, परावृत्तिः *f.*, उपयानं.—(Turning back or round) परावर्त्तनं, परावृत्तिः *f.*, परिवृत्तिः *f.*—(Periodical revolution) परिवर्त्तः -र्त्तनं, परिवृत्तिः *f.*, पुनरावर्त्तः, पुनरावृत्तिः *f.*, विवर्त्तः, पर्ययः, पर्यायः; 'of the seasons,' ऋतुपरिवर्त्तः, ऋतुपर्यायः.—(Repayment) प्रतिदानं, परिदानं.—(Requital) प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकर्म्म *n.* (न्),

प्रतिकारः, प्रतीकारः, प्रतिफलं, *see* REQUITAL; 'return of a benefit,' प्रत्युपकारः, उपकारमोक्षः; 'of an injury,' प्रत्यपकारः; 'of good for evil,' परेणापकारे कृते तस्य प्रत्युपकाराचरणं.—(Profit, return of trade) उत्पन्नं, फलं, फलोदयः, लाभः, लब्धिः *f.*, प्राप्तिः *f.* —(Official statement), *see* REPORT.—(In return for) प्रति with abl. c., विनिमयेन, हेतोः, हेतौ, *see* FOR.

RETURNED, *p. p.* पुनरागतः -ता -तं, प्रत्यागतः &c., प्रतिगतः &c., आगतः &c., पुनरायातः &c., प्रत्यावृत्तः -त्ता -त्तं, प्रतिनिवृत्तः &c., विनिवृत्तः &c., निवृत्तः &c., पुनरावृत्तः &c., परावृत्तः &c.—(Given back) प्रतिदत्तः -त्ता -त्तं, परिदत्तः &c.—(Requited) प्रतिकृतः -ता -तं, प्रतिफलितः &c.

RE-UNION, *s.* पुनर्योगः, पुनःसंयोगः, पुनःसंसर्गः, पुनर्मेलनं, पुनःसन्धिः *m.*, पुनःसन्धानं, प्रतिसमाधानं, पुनःसमागमः.—(Assembly) सभा.

To RE-UNITE, *v. a.* पुनः संयुज्, पुनः सन्धा, पुनः संसृज्, पुनर् एकीकृ.

RE-UNITED, *p. p.* पुनःसंयुक्तः -क्ता -क्तं, पुनःसंसृष्टः -ष्टा -ष्टं, पुनर्मिलितः -ता -तं.

To REVEAL, *v. a.* प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, विवृ (c. 5. -वृणोति -वृणुते -वरितुं -रीतुं), अपवृ, अपावृ, व्यक्तीकृ, व्यञ्ज् (c. 7. -अनक्ति -अंक्तुं, c. 10. -अञ्जयति -यितुं) प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), आविष्कृ, प्रादुष्कृ.—(Tell) सूच्, ज्ञा in caus., ख्या in caus., निविद्.—(A secret) रहस्यभेदं कृ.

REVEALED, *p. p.* प्रकाशितः -ता -तं, विवृतः &c., आविष्कृतः &c., प्रादुष्कृतः &c., व्यक्तीकृतः &c., सूचितः &c., ज्ञापितः &c., प्रकटितः -ता -तं.

REVEALER, *s.* प्रकाशकः, विवरणकृत्, सूचकः, ज्ञापकः, ख्यापकः; 'of a secret,' रहस्यभेदकः, रहस्यप्रकाशकः.

REVEALING, REVEALMENT, *s.* प्रकाशनं, विवरणं, विवृतिः *f.*, व्यक्तीकरणं, प्रकटीकरणं, आविष्करणं, स्पष्टीकरणं; 'of a secret,' रहस्यभेदः.

To REVEL, *v. n.* अतिशयहास्यशब्देन उत्सवं कृ, रात्रिकाले हासिकादिशब्देन उत्सवं कृ or अतिशयतुमुलेन सम्प्रीतिं कृ or केलिं कृ; 'one who revels in his lusts,' कामकामी *m.* (न्).

REVEL, *s.* अतिशयहास्यशब्देन उत्सवः, हासिकादिशब्देन सम्प्रीतिः *f.* or केलिः *m. f.*; 'master of the revels,' केलिसचिवः.

REVELATION, *s.* प्रकाशनं, विवरणं, प्रादुष्करणं, आविष्करणं, स्पष्टीकरणं, प्रकाशितवाक्यं, ईश्वरप्रत्यादेशः. *See* REVEALING.

REVELER, *s.* अतिशयहास्यशब्देन or अतिशयहासिकादिशब्देन उत्सवकारी *m.* (न्), सम्प्रीतिरतः, सम्प्रीतिप्रसक्तः, सम्प्रीतिप्रियः, पानोत्सुकः, पानासक्तः.

REVELRY, *s.* अतिशयहासिकादिशब्देन उत्सवकरणं. *See* REVEL.

To REVENGE, *v. a.* प्रतिकृ, वैरशुद्धिं कृ, वैरप्रतिक्रियां कृ, वैरप्रतिकारं कृ, अपकारशुद्धिं कृ, अपकारं प्राप्य प्रत्यपकृ, हिंसां प्राप्य प्रतिहिंस् (c. 7. -हिनस्ति, c. 1. -हिंसति -सितुं), परेणापकारे कृते प्रत्यपकारं कृ, अपकारात् प्रति अपकारं कृ, परेण द्रोहे कृते प्रतिद्रोहं कृ, वैरोद्धारं कृ, वैरनिर्यातनं कृ, निर्यत् (c. 10. -यातयति -यितुं), अपकारमोक्षं कृ; 'to revenge an insult,' अवलेपप्रतिकारं कृ, अवलेपशुद्धिं कृ.

REVENGE, *s.* वैरशुद्धिः *f.*, वैरप्रतिक्रिया, वैरप्रतिकारः, वैरप्रतिकृतिः *f.*, वैरनिर्यातनं, वैरोद्धारः, अपकारशुद्धिः *f.*, प्रतिकारः, प्रतीकारः, प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकर्म्म *n.* (न्), विप्रतिकारः, प्रतिहिंसा, प्रत्यपकारः, प्रतिद्रोहः, निर्यातनं, प्रतिफलं, प्रतिविधिः *m.*—(Feeling or desire of revenge) प्रतिहिंसाबुद्धिः *f.*, प्रतिद्रोहबुद्धिः *f.*, प्रत्यपकारबुद्धिः *f.*, प्रतिद्वेषः, प्रत्यपकारेच्छा, प्रतिद्रोहेच्छा, वैरिता, जिघांसा.

REVENGED, *p. p.* प्रतिकृतः -ता -तं, निर्यातितः &c., वैरशुद्धः -द्धा -द्धं.

REVENGEFUL, *a.* प्रतिहिंसाबुद्धिः -द्धिः -द्धि, प्रतिद्रोहबुद्धिः &c., प्रत्यपकारबुद्धिः &c., प्रतिहिंसाशीलः -ला -लं, प्रतिहिंसेच्छुः -च्छुः -च्छु, प्रतिद्रोहेच्छुः &c., प्रत्यपकारेच्छुः &c., प्रतिकारेच्छुः &c., निर्यातनशीलः &c., दंशी -शिनी -शि (न्), छि[illegible]पः -पा -पं.

REVENGEFULLY, *adv.* प्रतिहिंस[illegible]या, प्रत्य[illegible]कारबुद्ध्या, प्रतिद्रोहशीलत्वात्

REVENGEFULNESS, *s.* प्रति[illegible], प्र[illegible]हिंसाबुद्धिः *f.*, प्रत्यपकारशीलत[illegible]

REVENGER, *s.* प्रतिकारकः, प्रतिहिंस[illegible] वैरशोधकः, प्रत्यपकारकः.

REVENUE, *s.* बलिः *m.*, करः, आयः, राजस्वं, रा[illegible]धनं, राजकरः -रं, उत्प[illegible] नृपांशः, राजांशः, उपस्वत्वं, भागधेयः, [illegible]ः, [illegible], प्राप्तिः *f.*

To REVERBERATE, *v. a.* (Send or beat back) प्रति[illegible] (c. 6. -क्षिप[illegible] -क्षेप्तुं), प्रतिप्रक्षिप्, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिहननं कृ, प्रतिघातं कृ

To REVERBERATE, *v. n.* प्रतिध्वन् (c. 1. -ध्वनति -नितुं), प्रतिध्वनिं कृ, प्रतिध्वननं कृ, प्रतिनद् (c. 1. -नदति -दितुं), अनुनद्, व्यनुनद्, प्रतिना[illegible] कृ, प्रतिगर्ज् (c. 1. -गर्जति -र्जितुं), प्रतिगर्जनं कृ; 'cause to reverberate,' अनुनद् in caus., व्यनुनद्, प्रतिनद्. *See To* RESOUN[D]

REVERBERATING, *part.* प्रतिध्वनन् -नन्ती -नत् (त्), प्रतिगर्जन् &c., प्रतिनादयन् &c.

REVERBERATION, *s.* (Sending or beating back) प्रतिक्षेपः -पणं, प्रतिप्रक्षेपः -पणं, प्रतिघातः, प्रतिहननं.—(Of sound) प्रतिध्वनिः *m.*, प्रतिध्वननं, प्रतिनादः, अनुनादः, व्यनुनादः, प्रतिगर्जनं -ना, प्रतिशब्दः, प्रतिनिनदः.

To REVERE, *v. a.* पूज् (c. 10. पूजयति -यितुं), अभिपूज्, सम्पूज्, मन् (c. 10. मानयति -यितुं), सम्मन्, अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), समर्च्, अभ्यर्च्, उपास् (c. 2. -आस्ते -आसितुं), सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), आदृ (c. 6. -द्रियते -दर्तुं), भज् (c. 1. भजते, भक्तुं), नमस्कृ, पुरस्कृ, सत्कृ, पूजां कृ, आदरं कृ. *See* OBEISANCE.

REVERED, *p. p.* पूजितः &c., सेवितः &c., अर्चितः &c. *See* HONOURE[D]

SCAFFOLD, SCAFFOLDING, *s.* मञ्चः, मञ्चकः, इन्द्रकोषः, कर्णवंशः, ताराकृतं.—(For spectators) प्रेक्षामञ्चः -ञ्चकः, प्रेक्षागारं, मञ्चः.—(For the execution of a criminal) बध्यमञ्चः, घातमञ्चः, बध्यघातमञ्चः, बधस्थानं, घातस्थानं.

To SCALD, *v. a.* अतितप्तजलेन दह् (c. 1. दहति, दग्धुं), सुतप्तजलेन दह्, तप्तजलसम्पर्केण दह्, सुतप्तजलसेकेन दह्.

SCALD, *s.* अतितप्तजलकृतं क्षतं, तप्तजलक्षतं, तप्तजलसम्पर्कजो दाहः.

SCALDED, *p.p.* अतितप्तजलसम्पर्केण दग्धः -ग्धा -ग्धं, तप्तजलदग्धः &c., तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं.

SCALDING, *part.* अतिदाहकः -का -कं, अतितापकः &c., ज्वलन् -लन्ती -लत् (त्).

SCALE, *s.* (Balance, pair of scales) तुला, तुलायन्त्रं, मापनयन्त्रं, मापनदण्डः, मापनः, घटः, पदार्थमापनार्थं तुलायन्त्रं; 'goldsmith's scales,' टङ्कणी -णिका, नाराची -चिका.—(The cup or dish of a balance) घटः, तुलाघटः.—(Sign of the balance), *see* LIBRA.—(Of a fish) शल्कं, शकलं, वल्कं, मत्स्यवल्कं, मीनवल्कं, वल्कलं, शकलं.—(Of an animal) कवचः.—(Thin plate or crust) फलकः -कं, शल्कं, शकलं, वल्कं, पत्रं, पटलं.—(Ladder) सोपानं, सोपानपद्धतिः *f.*, निःश्रेणी.—(Regular gradation or series) श्रेणी -णिः *f.*, श्रेढी, क्रमः, अनुक्रमः, पंक्तिः *f.*, आवली, पर्य्यायः; 'on a small scale,' अल्पपरिमाणः -णा -णं.—(In music) ग्रामः, रागः, वर्णः, *see* GAMUT, MODE.

To SCALE, *v. a.* (Climb) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), अधिक्रम्.—(The walls of a fortress, &c.) लंघ् (c. 10. लंघयति -यितुं), अभिलंघ्, उल्लंघ्, अवस्कन्द्, लंघनं कृ,

दुर्गलंघनं कृ.—(Strip of scales) वल्क (nom. वल्कयति -यितुं), वल्कं or वल्कलं हृ or निर्हृ or निष्कृष्, निर्वल्कलीकृ.

To SCALE, *v. n.* (Come off in scales) निर्वल्कलीभू, शकलीभू.

SCALED, *p.p.* लंघितः -ता -तं, उल्लंघितः &c., अवस्कन्दितः -ता -तं.

SCALENE, *a.* (Triangle) विषमत्रिभुजः, विषमत्रिकोणं, असमत्रिभुजः.

SCALL, *s.* कच्छुः *f.*, सिध्म *n.* (न्), शुष्कव्रणः. *See* SCAB.

SCALLOP, *v. a.* (Shell-fish) कम्बुः *m.*. कम्बुभेदः.

To SCALLOP, *v. a.* कम्बुरूपेण छेदाङ्कितं -तां कृ, अन्योन्याकारछेदाङ्कितं -तां कृ, अर्द्धमण्डलरूपछेदाङ्कितं -तां कृ, अर्द्धमण्डलरूपचिह्नैर् वस्त्रान्तं परिछिद्.

SCALP, *s.* मस्तकाग्रत्वक् *f.* (च्), मस्तकाग्रचर्म्म *n.* (न्), शिरोग्रत्वक् *f.*, शिरोस्थित्वक् *f.*, शिरोग्रचर्म्म *n.*, शिरोस्थिचर्म्म *n.*, मस्तकास्थिचर्म्म *n.*

To SCALP, *v. a.* मस्तकाग्रत्वचम् अवछिद् (c. 7. -छिनत्ति -छेत्तुं), मस्तकाग्रचर्म्म अपकृत् or उत्कृत् or निष्कृत्, शिरोस्थिचर्म्म निष्कृष् or निर्हृ or हृ.

SCALPED, *p.p.* हृतमस्तकत्वक् *m.f.n.* (च्), हृतमस्तकचर्म्मा -र्म्मा -र्म्म (न्).

SCALY, *a.* सशल्कः -ल्का -ल्कं, सवल्कः &c., वल्कवान् -वती वत् (त्), वल्कमयः -यी -यं, वल्करूपः -पा -पं, वल्की -ल्किनी -ल्कि (न्), वल्कली &c., शल्की &c., शल्कली &c., शकली &c., वल्कावृतः -ता -तं, शल्कावृतः &c.

SCAMP, *s.* अधमाचारः, दुराचारः, दुर्वृत्तः, दुष्टजनः, जाल्मः, धूर्त्तः, खलः.

To SCAMPER, *v.n.* सत्वरं or त्वरितं धाव् (c. 1. धावति -वितुं) or द्रु or चल्.

To SCAN, *v. a.* (Scrutinize) सूक्ष्मं निरीक्ष् or परीक्ष् or वीक्ष्, सूक्ष्मं दृश् or निरूप्, सूक्ष्मं ज्ञा in des.—(Count the feet of verse) छन्दोमात्रां गण् (c. 10. गणयति -यितुं), छन्दोमात्रागणनं कृ.

SCANDAL, *s.* (Reproachful aspersion or calumny) अपवादः, परिवादः, पिशुनवाक्यं, पिशुनवचनं, पिशुनकथा, पैशुन्यं, असूया, अभ्यसूया, असूयककथा, अभ्यसूयककथा, विगर्हकथा, विगानं, वाग्दोषः.—(Gossiping rumor) जनरवः, लोकप्रवादः, लोकरवः, लोकवादः.—(Cause of reproach, disgrace) कलङ्कः, कलङ्ककारणं, अकीर्त्तिकारणं, अपमानकारणं, अपमानहेतुः *m.*, वचनीयता.—(Cause of stumbling, impediment) स्खलनहेतुः *m.*, स्खलितकारणं, बाधा, विघ्नः, व्याघातः.

To SCANDALIZE, *v. a.* बीभत्सं or अरुचिं or असन्तोषं जन् or कृ, वैकृत्यं जन्, गर्हां जन्, कुत्सां जन्, व्यथ् (c. 10. व्यथयति -यितुं), व्यथां जन् or कृ, क्लेशं दा, बाधां कृ, बाध्, विप्रियं कृ, व्यलीकं कृ.

SCANDALIZED, *p. p.* जातबीभत्सः -त्सा -त्सं, जातबाधः -धा -धं, व्यथितः &c.

SCANDALOUS, *a.* (Disgraceful) कलङ्ककरः -री -रं, अकीर्त्तिकरः &c., कुकीर्त्तिकरः &c., कुख्यातिजनकः &c., लज्जाकरः &c., गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, गर्हितः -ता -तं, अपयशस्करः &c., अपयशोजनकः &c., यशोनाशकः &c., यशोघ्नः -घ्नी -घ्नं, अपमानजनकः &c.—(Offensive, causing disgust, &c.) बीभत्सजनकः -का -कं, बीभत्सकरः -री -रं, घृणोत्पादकः &c., कुत्सितः -ता -तं.—(Defamatory) अपवादकः -का -कं, असूयकः &c., असूकः &c., अभ्यसूयकः &c.

SCANDALOUSLY, *adv.* गर्हणीयं, गर्ह्यं, कुत्सितं, गर्ह्यप्रकारेण, कुत्सितप्रकारेण, यथा बीभत्सो जायते तथाप्रकारेण.

SCANDALOUSNESS, *s.* गर्ह्यता, गर्हणीयता, बीभत्सजनकता, घृणाजनकता.

SCANNED, *p.p.* सूक्ष्मं निरूपितः -ता -तं or निरीक्षितः &c. or परीक्षितः &c.

SCANSION, *s.* छन्दोमात्रागणनं, श्लोकमात्रागणनं, छन्दोमात्रापरीक्षा.

SCANT, *To* SCANT, *see* SCANTY, *To* STINT, LIMIT.

SCANTILY, *adv.* अविस्तीर्णं, अविस्तारेण, अबाहुल्येन, अविपुलं, अप्रचुरं, अप्राचुर्येण, अपर्य्याप्तं, विकलं, अबहु, अल्पमात्रं, स्वल्पं.

SCANTINESS, *s.* अविस्तीर्णता, अविस्तृतिः *f.*, अबाहुल्यं, अविपुलता, अवैपुल्यं, अप्रचुरता, अप्राचुर्य्यं, अबहुत्वं, अल्पता, स्वल्पता, क्षुद्रता, अपृथुता, सङ्कीर्णता, न्यूनता.

SCANTY, *a.* (Narrow) अविस्तीर्णः -र्णा -र्णं, अविस्तृतः -ता -तं, सङ्कटः -टा -टं, सम्बाध in comp., अपृथुः &c., तनुः &c.—(Small, not full) अल्पः -ल्पा -ल्पं, स्वल्पः &c., क्षुद्रः -द्रा -द्रं, अविपुलः -ला -लं, अबहुलः &c., अप्रचुरः -रा -रं, अपूर्णः -र्णा -र्णं, विकलः -ला -लं, न्यूनः -ना -नं, अपर्य्याप्तः -प्ता -प्तं, लुप्तः -प्ता -प्तं.—(Niggardly) कृपणः -णा -णं.

SCAPULA, *s.* स्कन्धः, भुजशिरस् *n.*, अंसः, अंसफलकं, बाहुमूलं, फलकः.

SCAPULAR, *a.* स्कन्धसम्बन्धी -न्धिनी -न्धि (न्), स्कन्धविषयकः -का -कं.

SCAR, *s.* (Mark of a wound) क्षतचिह्नं, व्रणचिह्नं, व्रणः -णं, शुष्कव्रणं, शुष्कक्षतं, क्षतं, किणः -णं, क्षारी, क्षताङ्कः, व्रणाङ्कः.—(Any mark) चिह्नं, अङ्कः.

To SCAR, *v. a.* क्षतेन or व्रणेन चिह्न् (c. 10. चिह्नयति -यितुं), क्षतचिह्नितं -तां कृ.

SCARAMOUCH, *s.* भण्डः, वैहासिकः. *See* BUFFOON.

SCARCE, *a.* (Rare) विरलः -ला -लं, विरलागतः -ता -तं, दुर्लभः -भा -भं, दुर्लभ्यः -भ्या -भ्यं, दुष्प्रापः -पा -पं, दुष्प्राप्यः -प्या -प्यं, अप्राप्यः &c., असाधारणः -णा -णी -णं, *see* RARE.—(Small in quantity, deficient) अबहुलः -ला -लं, अप्रचुरः -रा -रं, अपुष्कलः -ला -लं, अविपुलः &c., अल्पः -ल्पा -ल्पं, स्वल्पः &c.

SCARCELY, SCARCE, *adv.* कष्टेन, कृच्छ्रेण, सकृच्छ्रं, दुःखेन, सदुःखं, कष्टं, सकष्टं, आयासेन, कठिनं, काठिन्येन, सकाठिन्यं, दुस् or दुःख prefixed; 'scarcely to be found,' दुर्लभ्यः &c., दुःखप्राप्यः &c.

SCARCITY, SCARCENESS, *s.* (Rareness) विरलता -त्वं, वैरल्यं, दुर्लभता, दौर्लभ्यं, दुर्लभ्यता, दुष्प्रापत्वं, दुष्प्राप्यता, अप्रसिद्धता, असाधारणता, असाधारण्यं, क्वाचित्कता.—(Smallness of quantity, deficiency) अबाहुल्यं, अबहुत्वं, अप्राचुर्य्यं, अप्रचुरता, अपुष्कलता, अविपुलता, अल्पता -त्वं, स्वल्पता, न्यूनता.—(Time of scarcity) दुर्भिक्षं, दुष्कालः, अनाकालं, प्रयामः, नीवाकः, महार्घता.

To SCARE, *v. a.* त्रस् (c. 10. त्रासयति -यितुं), संत्रस्, वित्रस्, भी in caus. (भाययति -यितुं, भीषयति -यितुं), उद्विज् (c. 10. -वेजयति -यितुं), त्रासं कृ, भयहेतुदर्शनेन विद्रु (c. 10. -द्रावयति -यितुं), भयप्रदर्शनेन द्रु.

SCARE-CROW, *s.* काकत्रासकमूर्त्तिः *f.*, काकादित्रासकवस्तु *n.*, काकादित्रासनार्थं क्षेत्रस्थापितं भयानकवस्तु or भयङ्करवस्तु *n.*, पक्षित्रासकमूर्त्तिः *f.*, भयहेतुः *m.*, भयप्रदर्शनं.

SCARED, *p.p.* त्रासितः -ता -तं, वित्रस्तः -स्ता -स्तं, त्रस्तः &c., भीतः -ता -तं.

SCARF, *s.* चैलं, अङ्गवस्त्रं, उपवस्त्रं, उत्तरीयं, सिचयः, अधिकाङ्गं.

SCARF-SKIN, *s.* बाह्यत्वक् *f.* (च्), बहिस्त्वक् *f.*, बाह्यचर्म्म *n.* (न्), अवभासिनी.

SCARIFICATION, *s.* त्वक्छेदः -दनं, त्वग्लिखनं, त्वगुल्लिखनं, लिखनं, उल्लिखनं, प्रोल्लेखनं, रक्तमोक्षणार्थं त्वक्छेदनं or चर्म्मछेदनं.

SCARIFICATOR, SCARIFIER, *s.* त्वक्छेदकः, त्वगुल्लेखकः, त्वक्छेदनयन्त्रं.

SCARIFIED, *p.p.* लिखितः -ता -तं, उल्लिखितः &c., छिन्नत्वक् *m.f.n.*, उल्लिखितत्वक्.

To SCARIFY, *v. a.* त्वचं or चर्म्म लिख् (c. 6. लिखति, लेखितुं) or उल्लिख् or प्रोल्लिख् or प्रलिख् or विलिख्, त्वचं छिद् (c. 7. छिनत्ति, छेत्तुं) or विछिद्.

SCAR-LESS, *a.* निर्व्रणः -णा -णं, निर्व्रणः &c., व्रणहीनः -ना -नं, अव्रणः &c.

SCARLET, *a.* सुरक्तः -क्ता -क्तं, रक्तः &c., शोणितः &c., सिन्दूरवर्णः &c.

SCARLET-FEVER, SCARLATINA, *s.* उदर्द्दः, उदर्दः.

SCATE, *s.* (Fish) शङ्कुचिः *m.* -ची *f.*, शङ्कुचि: -ची, शङ्कुः *m.*, शङ्कोचः, सङ्कोचः.

To SCATH, *v. a.* क्षतं कृ, क्षतिं कृ, क्षण्, अर्द्, हिंस्. *See To* HURT, DAMAGE.

Scathed, *p. p.* क्षतः -ता -तं, परिक्षतः &c., विक्षतः &c. अर्द्दितः &c.

Scathless, *a.* अक्षतः -ता -तं, अपरिक्षतः &c., क्षतहीनः -ना -नं, अविक्षतः &c., अक्षितः &c., अहिंसितः &c., अजातक्षतः -ता -तं, अजातापकारः -रा -रं.

To **scatter**, *v. a.* कॄ (c. 6. किरति, करितुं -रीतुं), विकॄ, प्रकॄ, आकॄ, अवकॄ, इतस्ततो or बहुधा विकॄ or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), बहुधा क्षिप् or व्यस् (c. 4. -अस्यति -सितुं), विनिर्धू (c. 5. -धूनोति -धवितुं), विधू, विद्रु (c. 10. -द्रावयति -यितुं), विध्मा. *See To* dis-perse, dissipate.

To **scatter**, *v. n.* विकॄ in pass. (-कीर्य्यते), कॄ in pass., बहुधा गम् (c. 1. गच्छति गन्तुं) or विगम्, विक्षिप् in pass. (-क्षिप्यते).

Scattered, *a.* विकीर्णः -र्णा -र्णं, आकीर्णः &c., अवकीर्णः &c., प्रकीर्णः &c., कीर्णः &c., विक्षिप्तः -प्ता -प्तं, व्यस्तः -स्ता -स्तं, सुव्यस्तः &c., उदस्तः &c., बहुधा क्षिप्तः &c., बहुधागतः -ता -तं, प्रसृतः &c., प्रसारितः &c., विधूतः -ता -तं, विनिर्धूतः &c., खण्डितः &c., असंहतः -ता -तं; 'having scattered,' विकीर्य्य; 'being scattered,' कीर्य्यमाणः -णा -णं. अवकीर्य्यमाणः &c., विकीर्य्यमाणः &c.

Scattering, *s.* किरणं, विकिरणं, अवकिरणं, कीर्णिः *f.*, विकीर्णिः *f.*, विकिरः, विक्षेपः -पणं, विसारणं, बहुधा क्षेपः, बहुधागमनं.

Scattering, *part.* विकिरन् -रन्ती -रत् (त्), विकिरणकारी -रिणी -रि (न्).

Scavenger, *s.* अवस्करकः, मलापकर्षी *m.*, मलाकर्षी *m.* (न्), खलपूः *m.*, मार्गशोधकः, मार्गसम्मार्जकः.

Scene, *s.* (Stage) रङ्गः, रङ्गभूमिः *f.*, रङ्गशाला; 'back of the scenes,' नेपथ्यं; 'behind the scenes,' नेपथ्ये.—(Curtain or hanging of a theatre) अपटी.—(Division of an act) प्रवेशः, पात्रप्रवेशः, अङ्कपरिच्छेदः; 'introductory scene,' प्रवेशकः.—(Place represented) भूमिः *f.*, स्थलं -ली, स्थानाकारः, स्थानप्रतिरूपं, भूमिप्रतिरूपं.—(Place where any thing is represented) रङ्गः, भूमिः *f.*—(Painting representing scenery) चित्रगता गृहवृक्षादिरचना, वर्णगता दृक्पातविषयरचना.—(Assemblage of objects seen at one view) दृक्पातविषयः, दृक्पथगोचरविषयाः *m. pl.*, दृष्टिपातविषयः.

Scenery, *s.* (Appearance of various natural objects as seen together) जलतृणवृक्षादिसंस्था, पर्व्वतवृक्षादिसंस्था, जलपर्व्वतवृक्षादिरचना, दृष्टिपातविषयरचना. दृक्पातविषयसंस्था, दृक्पथगोचरजलपर्व्वतवृक्षादि.—(Of a theatre) रङ्गभूमौ or रङ्गशालायां गृहवृक्षादिरचना, चित्रगता or वर्णगता गृहवृक्षादिरचना.

Scenic, scenical, *a.* नाटकीयः -या -यं, अभिनयविषयकः -का -कं.

Scent, *s.* (Odor, smell) गन्धः, वासः; 'sweet scent,' सुगन्धः, सुवासः, आमोदः, मोदः, वासः, परिमलः, धूपः, सौरभ्यं, सुरभिगन्धः, 'a scent spreading far,' समाकर्षी *m.* (न्), निर्हारी *m.*; 'made up scent,' कृत्रिमधूपः -पकः, वृकधूपः, वकधूपः.—(Power of smelling) घ्राणशक्तिः *f.*, घ्राणेन्द्रियं, घ्राणं; 'having a quick scent,' शीघ्रघ्राणः -णा -णं, तीक्ष्णघ्राणः &c., शीघ्रचेतनः -ना -नं.

To **scent**, *v. a.* (Smell) घ्रा, आघ्रा, उपघ्रा, उपाघ्रा.—(Perfume) वास् (c. 10. वासयति -यितुं), सुरभीकृ, भू in caus., धूप्, सुगन्धीकृ, *see To* perfume.

Scented, *p. p.* (Smelt) घ्रातः -ता -तं, आघ्रातः &c., घ्राणः -णा -णं. (Perfumed) वासितः -ता -तं, सुवासितः &c., अनुवासितः &c., सुरभितः -ता -तं, सुरभीकृतः &c., सुरभिः -भिः -भि, सुरभिगन्धिः -न्धिः -न्धि, सुगन्धी -न्धिनी -न्धि (न्), गन्धी &c., सुगन्धवान् -वती -वत् (त्), गन्धवान् &c., आमोदितः -ता -तं, भावितः &c., परिमलितः &c., *see* Perfumed.

Scentless, *a.* निर्गन्धः -न्धा -न्धं, अगन्धः &c., गन्धहीनः -ना -नं.

Sceptic, *s.* अविश्वासी *m.* (न्), हैतुकः, सन्दिग्धमतिः *m.*, संशयात्मा *m.* (न्), चार्वाकः, अप्रत्ययी *m.*, संशयकारी *m.*, युक्तिबलेन सर्व्वत्र संशयकारी *m.*

Sceptical, *a.* अविश्वासी -सिनी -सि (न्), अप्रत्ययी &c., संशयालुः -लुः -लु, संशयात्मा -त्मा -त्म (न्), सन्दिग्धमतिः -तिः -ति, सन्दिग्धमानसः -सा -सं, संशयानः -ना -नं, संशयापन्नः -न्ना -न्नं, संशयापन्नमानसः -सा -सं. *See* Infidel.

Scepticism, *s.* अविश्वासः, संशयः, सन्दिग्धमतित्वं, *see* Infidelity.

Sceptre, scepter, *s.* राजदण्डः -ण्डं, राजवेत्रं, राजयष्टिः *m.*, शास्तिः *f.*—(Royal authority or office) राजाधिकारः, छत्रसिंहासनं.

Sceptred, sceptered, *a.* राजदण्डधारी -रिणी -रि (न्), दण्डी -ण्डिनी &c.

Schedule, *s.* (Paper, document) पत्रं, लेखः, लेख्यं.—(Paper annexed to a larger document) पत्रानुबन्धः, लेख्यानुबन्धः.—(List), *see* List, Inventory.

Scheme, *s.* कल्पना, उपायः, सङ्कल्पः, परिकल्पना, परिकल्पितं, व्यवसायः, अनुसन्धानं, अनुसन्धा, युक्तिः *f.*, प्रयुक्तिः *f.*. प्रयोगः. कल्पितं, उपायकल्पना.

To **scheme**, *v. a.* मनसा कॢप् or परिकॢप्, उपायं कॢप्. *See To* plan.

Schemer, *s.* उपायकल्पकः, परिकल्पकः, कल्पनाकारी *m.* (न्), उपायी *m.*

Scheming, *part.* or *a.* युक्तिमान् -मती -मत् (त्), अनुसन्धानी -निनी -नि (न्), अनुसन्धायी &c., उपायी &c., उपायचिन्तकः -का -कं, विदग्धः -ग्धा -ग्धं; 'a scheming woman,' खोटिः *f.*, खोरिः *f.*, विदग्धा स्त्री.

Schirrhus, *s.* *See* Scirrhus.

Schism, *s.* शाखा, शाखाभेदः, धर्म्मभेदः, मतभेदः, मार्गभेदः, सम्प्रदायः, धर्म्मविभेदः, मतविभेदः, धर्म्मविच्छेदः.

Schismatic, schismatical, *a.* धर्म्मभेदकः -का -कं, मतभेदकः &c., मार्गभेदकः &c., शाखाभेदसम्बन्धी -न्धिनी -न्धि (न्), मार्गभेदसम्बन्धी &c., मार्गभेदविषयकः -का -कं.

Scholar, *s.* (Learner, pupil) शिष्यः, विद्यार्थी *m.* (न्), अन्तेवासी *m.*, छात्रः, अन्तेवासिजनः, अध्यायी *m.*, अध्येता *m.* (तृ), विद्याभ्यासी *m.* (न्), शिक्षिताक्षरः, अधीती *m.*, विद्याभ्यासकृत् *m.*, अक्षरमुखः, पाठार्थी *m.*; 'head scholar,' पट्टशिष्यः; 'scholar of a scholar,' प्रशिष्यः.—(Learned man) पण्डितः, पण्डितजनः, विद्वान् *m.* (स्), विद्वज्जनः, कृतविद्यः, सर्व्वरसः, रमठः, तान्त्रिकः, *see* Learned.

Scholar-like, scholarly, *a.* पण्डितयोग्यः -ग्या -ग्यं, छात्रयोग्यः &c.

Scholarship, *s.* पाण्डित्यं, पण्डितत्वं, विद्या, वैदुष्यं, *see* Learning.

Scholastic, scholastical, *a.* पाठशालासम्बन्धी -न्धिनी -न्धि (न्), शालासम्बन्धी &c., पण्डितसभासम्बन्धी &c., पाण्डित्यविषयकः -का -कं.

Scholiast, *s.* भाष्यकारः, टीकाकारः, टीकालेखकः, *see* Commentator.

Scholium, *s.* टीका, भाष्यं, टीकाग्रन्थः, आदर्शः, *see* Commentary.

School, *s.*, (Place of instruction) पाठशाला, विद्यालयः -यं, विद्यावेश्म *n.* (न्), विद्यागृहं, शिक्षालयः -यं, शिक्षागृहं, विद्याभ्यासगृहं, विद्याभ्यासशाला, अध्ययनशाला, अध्ययनगृहं, मठः, आश्रमः, अवसथः, आवसथ्यः, शाला.—(Body of scholars) शिष्यसमूहः, विद्यार्थिसमूहः, छात्रसमूहः, पाठशाला. शाला.—(Sect of philosophers) शाखा, पण्डितशाखा, शिक्षासम्प्रदायः, शालासम्प्रदायः; 'difference of school,' शाखाभेदः; 'of the same school,' एकशाखः -खा -खं; 'of a good school,' शालाशुद्धः -द्धा -द्धं.—(School or system of philosophy) दर्शनं, तीर्थं. There are six schools or systems of philosophy recognised by the Hindús, viz. 1. Púrva Mí-

mánsá, पूर्व्वमीमांसा, founded by Jaimini, for the purpose of illustrating and explaining the karmakánda, or ritual part of the Vedas. It gives the rationale or meaning of the ritual enjoined in those sacred books, as distinct from the theological or spiritual part of them, and acknowledges the principle of एकत्वं, or oneness, which it was the object of the Vedánta system more fully to investigate. 2. Sánkhya, सांख्य:, ascribed to the Muni Kapila. This system is an attempt to account for the existence of the universe without the Deity, by asserting the principle of द्वैतं or duality, or, in other words, the co-existence of Spirit and matter. 3. Vedánta, वेदान्त:, or Uttara Mímánsá, उत्तरमीमांसा, said to have been founded by Vyása, and subsequently fully developed by its most celebrated teacher शङ्कर: or शङ्कराचार्य्य:. This system is wholly concerned with the theological and philosophical part of the Vedas, or that part contained in the chapters called Upanishads, and its teaching is intended to oppose the duality of the Sánkhya system by shewing that the end or aim of the Vedas is एकत्वं, or the oneness of Spirit. It denies the co-existence of matter with Spirit, and hence the conclusion arrived at is the non-existence of any thing but God. 4. Nyáya, न्याय:, founded by the inspired sage Gautama, and the most popular of all the systems. It is neither so mystical as the Vedánta, nor so fanciful as the Sánkhya. Its title signifies 'the fitness of things,' and it may be described as an attempt to treat of almost all subjects, according to a philosophical method and logical arrangement. 5. Vaiseshika, वैशेषिकं, a branch of the Nyáya, founded by the sage कणाद:, to supply what was incomplete in the aphorisms of Gautama. 6. Yoga, योग: or Pátanjala, पातञ्जलं, founded by the sage पतञ्जलि: m. Its object is to shew that, even in the body, there may be, to a great extent, union with the Supreme Being. These philosophical systems are contained in sacred writings called Shástras. *See* the word.

To school, *v. a.* शिक्ष्, अनुशिक्ष्, उपदिश्, शास्. *See To* teach, instruct.

School-boy, *s.* बालशिष्य:, बालछात्र:, बालाध्यायी *m.* (न्), विद्याभ्यासार्थं पाठशालाम् अभिगच्छति य: कुमार: or बाल: or बालक:.

School-fellow, *s.* सहाध्यायी *m.* (न्), सहपाठक:, समाध्यायी *m.*, एकपाठशालाभिगामी *m.*, एकगुरु: *m.*, एकोपाध्याय:.

School-house, *s.* पाठशाला, पाठगृहं, शिक्षागृहं, शिक्षाशाला, शाला.

Schooling, *s.* शिक्षा -क्षणं, अध्यापनं, उपदेश:, पाठ:, विद्यादानं.—(Compensation for instruction) शिक्षावेतनं, शिक्षामूल्यं.

Schoolman, *s.* तार्किक:, नैयायिक:, न्यायविद् *m.*, तर्कशास्त्रज्ञ:.

Schoolmaster, *s.* बालाध्यापक:, बालोपदेशी *m.* (न्), बालोपदेशक:, बालशिक्षक:, अर्भकाध्यापक:, उपाध्याय:, शिक्षागुरु: *m.*, शिक्षादाता *m.* (तृ), विद्यादाता *m.*, पाठशालानायक:, पाठशालाध्यक्ष:, आचार्य्य:, गुरु: *m.*, उपाध्याय:, अध्यापक:.

Schoolmistress, *s.* बालाध्यापिका, बालोपदेशिनी, उपाध्याया, आचार्य्या, शिक्षादात्री, विद्यादात्री, पाठशालाध्यक्षा, पाठशालानायिका.

School-room, *s.* पाठशाला, शिक्षाशाला. *See* School-house.

Schooner, *s.* कूपकद्वयविशिष्टा नौका, द्विकूपकनौ: *f.*, द्विकूपक:.

Sciatica, *s.* कटिशिरावेदना, कटिस्नायुवेदना, श्रोणिशिरावेदना.

Sciatical, *a.* कटिसम्बन्धी -न्धिनी -न्धि (न्), श्रोणिसम्बन्धी &c.

Science, *s.* विद्या, विज्ञानं, ज्ञानं, शास्त्रं, व्युत्पत्ति: *f.*, *see* Knowledge; 'study of science,' विद्याभ्यास:; 'a science,' विद्या; 'book of science,' शास्त्रं, *see* Shástra; 'sacred science,' श्रुतं, ज्ञानं; 'profane,' विज्ञानं, उपविद्या; 'skilled in sacred science,' शास्त्रविद्, आम्नायविद् -वित् -वित्.

Scientific, scientifical, *a.* (According to the principles of science) विद्यासूत्रानुसारी -रिणी -रि (न्), विद्यातत्त्वानुसारी &c., विद्याक्रमानुसारी &c., विद्यासूत्रानुयायी &c., शास्त्रानुसारी &c.—(Well versed in science) विद्यावान् -वती -वत् (त्), ज्ञानी &c., विद्वान् -दुषी -द्वत् (स्), ज्ञानवान् &c., कृतविद्य: -द्या -द्यं, कोविद: -दा -दं, ज्ञातसिद्धान्त:, तात्त्विक:.

Scientifically, *adv.* विद्यासूत्रानुसारेण, विद्यातत्त्वानुसारात्, विद्याक्रमेण.

Scimitar, *s.* खड्ग:, वक्रखड्ग:, न्युब्जखड्ग:, असि: *m.*, निस्त्रिंश:, वक्रनिस्त्रिंश:, चक्रकृपाण:, चन्द्रहास:, मण्डलाग्र:, असिरिष्टि: *m.*, धाराविष:, विधुपञ्जर:, करपाल:, करवाल:, कौक्षेयक:.

To scintillate, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), अग्निकणान् or अग्निस्फुलिङ्गान् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), ज्वलनकणान् मुच् or निःसृ in caus.

Scintillation, *s.* स्फुरणं, अग्निकणस्फुरणं, स्फुलिङ्गस्फुरणं, स्फुलिङ्गज्वलनं, अग्निकणज्वलनं, स्फुलिङ्गोत्क्षेप:, कणोत्क्षेप:.

Sciolism, *s.* खण्डपाण्डित्यं, खण्डज्ञानं, खण्डितज्ञानं, पाण्डित्याभास:, अर्द्धपाण्डित्यं, किञ्चिज्ज्ञानं, अल्पज्ञानं, चुचकता -त्वं.

Sciolist, *s.* खण्डपण्डित:, खण्डज्ञानी *m.* (न्), अल्पविद्य:, अल्पज्ञ:, किञ्चिज्ज्ञ:, अल्पविद्यावान् *m.* (त्), चुचक:.

Scion, *s.* अङ्कुर:, पल्लव:, नवपल्लव:, किसलय:, प्ररोह:, प्रवाल:.

Scirrhous, *a.* ग्रन्थिमान् -मती -मत् (त्), ग्रन्थिल: -ला -लं, घनीभूत: &c.

Scirrhus, scirrhosity, *s.* मांसग्रन्थि: *m.*, मांसकाठिन्यं, मांसघनता.

Scissible, scissile, *a.* छेदनीय: -या -यं, छेद्य: -द्या -द्यं, कर्त्तनीय: -या -यं.

Scissors, *s. pl.* कर्त्तरी, कर्त्तनी, कृपाणी, कर्त्री, छेदनी, खण्डधारा, शरारीमुखी.

To scoff, *v. n.* अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), क्षिप्, अवज्ञा, तिरस्कृ, मुखरीकृ, अवहस्, उपहस्, अपहस्, विहस्, प्रहस्, अपहासभूमिं कृ, उपहासास्पदं कृ, अपहासास्पदं कृ, गर्ह्, अवगर्ह्, अवगुर्, अवमन्, आक्षर्, भर्त्स्, परिभू, निन्द्, तुच्छीकृ, अवज्ञां कृ. *See To* jeer, mock.

Scoff, *s.* अवक्षेप:, क्षेप:, अपहास:, उपहास:, उपहासोक्ति: *f.*, अवज्ञा, अपहासवाक्यं, अपमानोक्ति: *f.*, अपमानं, अवहेला, तिरस्कारोक्ति: *f.*, निन्दोक्ति: *f.*

Scoffer, *s.* उपहासक:, अपहासक:, अवक्षेपक:, क्षेपक:. *See* mocker.

Scoffing, *s.* अवहास:, उपहास:, तिरस्कार:, तिरस्क्रिया, अवक्षेपणं.

Scoffingly, *adv.* सावक्षेपं, सावहासं, सतिरस्कारं, उपहासेन, सावहेलं.

To scold, *v. a.* or *n.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, विनिन्द्, उपालभ् (c. 1. -लभते -लब्धुं), भर्त्स् (c. 10. भर्त्सयति -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), तर्ज् (c. 10. तर्जयति -यितुं), आक्रुश्, गर्ह्, विगर्ह्, गुप् in des., क्षिप्, अवक्षिप्, अधिक्षिप्, वाग्दण्डं कृ, तिरस्कृ, परिवद्, परिभाष्. *See To* chide, reprove.

Scold, *s.* (Foul-mouthed scolding woman) दुर्मुखी, वाग्दुष्टा, कर्कशा,

पूतना, कैकेयी, दुर्गा, कृत्या, महामाया, सदाचण्डा, चक्रशीला, कर्णेटा.

SCOLDED, *p.p.* निन्दित: -ता -तं, उपालब्ध: -आ -ब्धं, प्रत्यादिष्ट: -ष्टा -ष्टं, तर्जित: -ता -तं, भर्त्सित: &c., तिरस्कृत: &c., अधिक्षिप्त: -प्ता -प्तं.

SCOLDER, *s.* निन्दक:, उपालम्भकारी *m.* (न्), प्रत्यादेशक:, उपक्रोष्टा *m.* (ष्टृ).

SCOLDING, *s.* निन्दा -न्दनं, उपालम्भ:, तर्जनं, भर्त्सनं, निर्भर्त्सनं, वाग्दण्ड:, वाक्पारुष्यं, परिवाद:, परिभाषणं, धिक्कार:, धिक्क्रिया, तिरस्कार:, तिरस्क्रिया.

SCOLLOP, *To* SCOLLOP, *see* SCALLOP, *To* SCALLOP.

SCONCE, *s.* (Holder of the end of a candle) दीपाधाराधार:, वर्त्त्याधार:, दीपाधारयोग्या लोहनलिका.—(Mulct) दण्ड:, दण्डलेश:.

To SCONCE, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं). *See To* MULCT, FINE.

SCOOP, *s.* (Kind of ladle) दर्वी, दर्विका:, दार्वी, कवि: *f.*, कवी, खजिका; 'batter-scoop,' कुम्भलिका.—(Instrument for excavating) खनित्रं, उत्खनित्रं, खात्रं.

To SCOOP, *v. a.* (Lade out), *see To* LADLE.—(Make hollow, excavate) खन् (c. 1. खनति -नितुं), उत्खन्, निखन्, प्रोत्खन्, खनित्रेण शून्यीकृ or शुषिरीकृ or पुट् or पुटीकृ.

SCOOPED, *p. p.* उत्खात: -ता -तं, उत्खनित: -ता -तं, शुषिरीकृत: &c.

SCOPE, *s.* (End, aim) अभिप्राय:, अभिप्रेतं, तात्पर्य्यं, आशय:, अर्थ:, उद्देश:, आकूतं, अभिसन्धि: *m.*, अभिसन्धानं, तात्पर्य्यार्थ:, आकांक्षा, विवक्षितं, *see* MEANING.—(Limit, compass) अन्त:, पर्य्यन्त: -न्तं, परिमाणं, विषय:.—(Room, space) अवकाश:, प्रसर:, अवसर:.

SCORBUTIC, SCORBUTICAL, *a.* नाविकरक्तपित्तसम्बन्धी -न्धिनी -न्धि (न्), नाविकरक्तपित्तरोगी -गिणी &c.; 'scorbutic affection of the gums,' शीताद:; 'diseased with it,' शीतादरोगी &c.

To SCORCH, *v. a.* बाह्यतस् or बहिस् or बहिर्भागे दह् (c. 1. दहति, दग्धुं) or निदह् or परिदह् or तप् (c. 1. तपति, तप्तुं, c. 10. तापयति -यितुं).

To SCORCH, *v. n.* बाह्यतस् or बहिर्भागे दह् in pass. or तप् in pass.

SCORCHED, *p. p.* बाह्यतस् or बहिर्भागे दग्ध: -ग्धा -ग्धं or परिदग्ध: &c. or तप्त: -प्ता -प्तं or सन्तप्त: &c. or अभितप्त: &c. or उत्तप्त: &c., भर्जित: -ता -तं, भृष्ट: -ष्टा -ष्टं.

SCORCHING, *part.* or *a.* दाहक: -का -कं, तापक: &c., उष्ण: -ष्णा -ष्णं, अत्युष्ण: &c., प्रचण्ड: -ण्डा -ण्डं, चण्ड: &c., नैदाघ: -घी -घं.

SCORCHING, *s.* बहिर्दाह:, बहिर्दहनं, बहिर्भागे दाह:, बाह्यतस्ताप:.

SCORE, *s.* (Twenty) विंशकं, विंशी *m.* (न्), विंशति: *f.*—(Notch) छेद:, अवच्छेद:, विच्छेद:.—(Line) रेखा, अङ्क:, वर्त्ति: *f.*—(Account, reckoning) गणना, विगणना, विगणनपत्रं, विगणनलेख:, विगणनापत्रं.—(Reason) हेतु: *m.*, कारणं, निमित्तं; 'on the score of,' हेतो:, हेतौ, कारणात्, कृते, निमित्ते or expressed by the abl. c., or by the affix तस्; 'on the score of relationship,' ज्ञातिभावहेतो:, ज्ञातित्वात्, ज्ञातिभावतस्.

To SCORE, *v. a.* (Notch) छिद्, अवछिद्, छेदं कृ.—(Mark with lines) रेखाङ्कितं -तां कृ, रेखाभिर् अङ्क् (c. 10. अङ्कयति -यितुं) or चिह्न्, अङ्कं कृ, अङ्कनं कृ.—(Set down a debt) ऋणं लिख् or अभिलिख्, ऋणाभिलेखनं कृ, ऋणं लेख्ये आरुह् in caus.—(Set down, take an account of) लिख् (c. 6. लिखति, लेखितुं), अभिलिख्, अङ्क्.

SCORED, *p. p.* अङ्कित: -ता -तं, रेखाङ्कित: &c., लिखित: &c., अभिलिखित: &c.

SCORIA, *s.* रीति: *f.*, रीतिका, किट्टं, किट्टाल:, लोहकिट्टं. *See* DROSS.

SCORN, *s.* अवज्ञा, अवज्ञानं, अवमानं, अवमति: *f.*, अपमानं, अवहेला -लं -लनं, परिभव:, परिभाव:, परिभूति: *f.*, तिरस्कार:, तिरस्क्रिया, अवलेप:, घृणा, उन्माद:, *see* CONTEMPT; 'object of scorn,' तिरस्कारविषय:, तिरस्कारास्पदं, तिरस्कारपात्रं, परिभवास्पदं, परिभवपदं.

To SCORN, *v. a.* अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), तृणाय मन्, अवधीर्, तिरस्कृ, परिभू, गर्ह्, विगर्ह्, तुच्छीकृ, न्यक्कृ, कुत्स्, उपेक्ष्, कदर्थीकृ, बाध् in des., अपध्यै, निन्द्, धिक्कृ. *See To* CONTEMN, DESPISE.

SCORNED, *p.p.* अवज्ञात: -ता -तं, अवमत: &c., अवमानित: &c., अवधीरित: &c., विमानित: &c., तिरस्कृत: -ता -तं, गर्हित: -ता -तं, विगर्हित: &c., परिभूत: &c., अतिनिन्दित: &c., निन्दित: &c.

SCORNER, *s.* अवज्ञाता *m.* (तृ), निन्दक:, अवमन्ता *m.* (न्तृ), अवमानकृत्, अवहेलकृत्, अवज्ञाकारी *m.* (न्), तिरस्कारी *m.*, तिरस्कर्त्ता *m.*, (र्त्तृ), घृणाकर:.

SCORNFUL, *a.* अवज्ञाकारी -रिणी -रि (न्), अवज्ञानी &c., अवमानी &c., सावहेल: -ला -लं, सावज्ञ: -ज्ञा -ज्ञं, परिभवी &c., परिभावी &c., परिभावुक: -का -कं, अवमन्ता -न्त्री -न्तृ (न्तृ), सावलेप: -पा -पं, सोन्माद: -दा -दं, अवलिप्त: -प्ता -प्तं, दृप्त: -प्ता -प्तं, तिरस्कारी &c., अवहेलात्मक: -का -कं, निन्दात्मक: &c., अवज्ञारूप: -पा -पं, अवमानार्थक: &c.

SCORNFULLY, *adv.* सावज्ञानं, सावहेलं, सावमानं, सपरिभावं, परिभवेन, सावलेपं, सोन्मादं, सतिरस्कारं, दृप्तवत्, निन्दापूर्व्वं, निन्दकवत्.

SCORNFULNESS, *s.* अवज्ञाशीलता, सावहेलत्वं, अवलिप्तता, सोन्मादत्वं.

SCORPIO, *s.* (The sign) वृश्चिक:, कौर्प्य:, अलि: *m.*

SCORPION, *s.* वृश्चिक:, अलि: *m.*, अली *m.* (न्), आलि: *m.*, आरी *m.* (न्), द्रुण:, द्रोण:, द्रूण:, अलिपक:, अवशीन:, लूमविष:, घस्कराटिका; 'its tail or sting,' लूमं -म:.

SCOT, *s.* (Portion of money assessed) कर:, देयभाग:, देयांश:, देयं.

To SCOTCH, *v. a.* छेदं कृ, छेदैर् अङ्क्, अवच्छेदं कृ, ईषद् व्रण or छिद्.

SCOT-FREE, *a.* अदण्डित: -ता -तं, अक्षत: -ता -तं, निर्व्रण: -णा -णं.

SCOUNDREL, *s.* धूर्त्त:, दुर्जन:, दुरात्मा *m.* (न्), दुर्वृत्त:, खल:, कुत्साकर्म्मा *m.* (न्), अधमवृत्ति: *m.*, दुष्कर्म्मा, जघन्यवृत्ति: *m.*, कुत्सितवृत्त:. *See* RASCAL.

To SCOUR, *v. a.* (Scrub, cleanse by friction) मृज् (c. 1. मार्जति -र्जितुं, c. 2. मार्ष्टि -र्ष्टुं), सम्मृज्, प्रक्षल् (c. 10. -क्षालयति -यितुं), निर्णिज् (c. 3. -णेनेक्ति -णेक्तुं), धाव् (c. 10. धावयति -यितुं), घर्षणेन शुध् (c. 10. शोधयति -यितुं), निर्घर्षणेन शुध् or परिष्कृ.—(Purge), *see* the word.—(Pass swiftly over) शीघ्रं or त्वरं तृ or अतितृ or अतिक्रम्.—(Run swiftly) शीघ्रं धाव्.

SCOURED, *p. p.* मार्जित: -ता -तं, सम्मार्जित: &c., मृष्ट: -ष्टा -ष्टं, सम्मृष्ट: &c., प्रक्षालित: -ता -तं, निर्णिक्त: -क्ता -क्तं, घर्षणेन धावित: -ता -तं or धौत: -ता -तं or शोधित: &c., निर्धौत: &c., परिष्कृत: &c.

SCOURER, *s.* वस्त्रनिर्णेजक:, वस्त्रसम्मार्जक:, वस्त्रप्रक्षालक:, वस्त्रधावक:, वस्त्रशोधक:, चैलमार्जक:, चैलधाव: -वक:, निर्णेजक:, नेजक:.

SCOURGE, *s.* कशा, कषा, प्रतिष्कश:, प्रतिष्कष:, चलिसङ्ग:, चर्म्मदण्ड:, रज्जु: *m.f.*, चर्म्मरज्जु: *m.f.*, ताडनी, प्रतोद:.

To SCOURGE, *v. a.* कशया तड् (c. 10. ताडयति -यितुं), रज्ज्वा or रज्जुना or चर्म्मरज्ज्वा तड् or प्रहृ (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं), कशाघातं कृ, कशाताडनं कृ.

SCOURGED, *p. p.* कशाहत: -ता -तं, कशाताडित: &c. रज्जुताडित: -ता -तं

SCOURGING, *s.* कशाघात:, कशाताडनं, रज्ज्वाघात:, कशाप्रहार:; 'worthy of scourging,' कशार्ह: -र्हा -र्हं, कश्य: -श्या -श्यं.

SCOURING, *s.* मार्जनं, सम्मार्जनं, मार्ष्टि: *f.*, परिमार्जनं, प्रक्षालनं, निर्णेक:, निर्णेजनं, धावनं, परिष्कार:, वस्त्रमार्जनं, मलापकर्षणं.

SCOUT, *s.* चार:, चर:, गुप्तचर:, गूढदूत:, गूढचार: -री *m.* (न्), गुप्तगति: *m.*

गूढदूतः, गूढनिरूपकः, शत्रुचेष्टानिरूपकः, प्रणिधिः *m.* *See* Spy.

To scout, *v. n.* (Act as scout) गूढचारवत् शत्रुचेष्टानिरूपणं कृ.

To scout, *v. a.* गर्ह् (c. 1. गर्हते -र्हितुं), सवीभत्सं निराकृ or निरस्.

Scowl, *s.* भ्रूभङ्गः, भ्रूकुटिः *f.*, भ्रूक्षेपः, भ्रूसङ्कोचः, कटाक्षः, अप्रसन्नदृष्टिः *f.*, अप्रसादसूचका कुदृष्टिः *f.*, मुखमालिन्यं.

To scowl, *v. n.* भ्रूभङ्गं कृ, भ्रूकुटिं कृ, कटाक्षेण or भ्रूभङ्गेन दृश् (c. 1. पश्यति, द्रष्टुं), भ्रुवौ संकुच् (c. 1. -कोचति -चितुं), भ्रूसंकोचं कृ.

Scowling, *part.* सभ्रूभङ्गमुखः -खी -खं, मलिनमुखः &c. *See* Frowning.

Scowlingly, *adv.* सभ्रूभङ्गं, सकटाक्षं, भ्रूभङ्गेन, सभ्रूक्षेपं, भ्रूसङ्कोचपूर्वं.

Scragginess, *s.* कृशता, परिकृशता, कृशाङ्गता, क्षामता, क्षीणता, कार्श्यं.

Scraggy, scragged, *a.* (Lean) कृशः -शा -शं, परिकृशः &c., कृशाङ्गः -ङ्गी -ङ्गं, क्षामः -मा -मं, शिरालः -ला -लं.—(Rough) रुक्षः -क्षा -क्षं, रूक्षः &c., *see* Rugged.

To scramble, *v. n.*, (Climb by seizing with the hands) हस्ताभ्यां धृत्वा or हस्ताभ्याम् अवलम्ब्य आरुह् or अभिरुह्.—(Catch with haste, preventive of another) परनिवारणपूर्वं or परनिरसनपूर्वं सहसा धृ (c. 1. धरति, धर्तुं) or हृ (c. 1. हरति, हर्तुं) or झटिति ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

Scramble, scrambling, *s.* (Seizing with haste, &c.) इष्टद्रव्यग्रहणार्थं परनिवारणपूर्वं सहसा हरणं or हरणेच्छा.—(Climbing with the hands) हस्ताभ्याम् अवलम्ब्य आरोहणं.

Scrap, *s.* खण्डः -खण्डकः, लवः, अंशः, भागः, शकलः -लं; 'of food,' पिण्डः, पिण्डोलिः *f.*, फेलकः, फेला, लवः. *See* Crum.

Scrap-book, *s.* खण्डकाव्यादिरक्षणपुस्तकं, खण्डकवितादिरक्षणग्रन्थः, खण्डकविताग्रन्थः, श्लोकमुद्रादिरक्षणार्थं पुस्तकं.

To scrape, *v. a.* (Rub the surface with something sharp) लिख् (c. 6. लिखति, लेखितुं), उल्लिख्, विलिख्, प्रलिख्, निर्लिख्, प्रोल्लिख्, तक्ष् (c. 1. तक्षति -क्षितुं), त्वक्ष्, खन् (c. 1. खनति -नितुं), क्षुर् (c. 6. क्षुरति, क्षोरितुं), छुर् (c. 6. छुरति, छोरितुं), उल्लेखनं कृ, तक्षणं कृ.—(Rub with a grating noise) घृष् (c. 1. घर्षति -र्षितुं), घर्षणं कृ, *see* *To* rub.—(Clean by scraping) घर्षणेन मृज् or प्रक्षल् or निर्णिज्.—(Remove by scraping, scrape off) घर्षणेन अपनी or विनी or मृज् or अपमृज् or अवमृज् or परिमृज् or शुध् in caus., निर्घर्षणं कृ.—(Scrape together) संचि (c. 5. -चिनोति -चेतुं), समाचि, एकीकृ, एकत्र कृ.—(Scrape the feet) पादघर्षणं कृ.

To scrape, *v. n.* (Make a harsh noise) परस्परसंघर्षजं कर्कशशब्दं कृ, परस्परघर्षणं कृ.—(Make an awkward bow) कुप्रणामं कृ.—(Scrape acquaintance) मैत्र्यं कृ, अन्यस्य मैत्र्यम् उपगम्, अन्यस्मिन् प्रीतिं कृ.

Scrape, *s.* (Rubbing) घर्षणं, निर्घर्षणं, तक्षणं, क्षुरणं.—(Bow) कुप्रणामः.—(Difficulty) दुर्गं, दुर्गतिः *f.*, दुर्दशा, दुरवस्था, दुःस्थितिः *f.*, दुःखं, कष्टं, आधिः *m.*

Scraped, *p. p.* उल्लिखितः -ता -तं, प्रोल्लिखितः &c., घर्षितः &c., *see* Rubbed.

Scraper, *s.* (Instrument for scraping) उल्लेखनी -निका, निर्लेखनं -नी, लेखनी, घर्षणी, निर्घर्षणी, निर्घर्षणकः, घर्षणयन्त्रं.—(For the feet) पादोल्लेखनी, पादनिर्लेखनी, पादघर्षणी, पादनिर्घर्षणकः.—(For the tongue) जिह्वोल्लेखनी -निका, जिह्वानिर्लेखनं -नी.—(Kind of shovel) अभ्रिः *f.*, अभ्री, काष्ठकुद्दालः.

Scraping, *s.* (The act) उल्लेखनं, प्रोल्लेखनं, निर्लेखनं, लेखनं, घर्षणं, निर्घर्षणं, क्षुरणं, छुरणं, तक्षणं, खननं; 'the tongue,' जिह्वोल्लेखनं, जिह्वानिर्लेखनं.—(That which is scraped off, scrapings) अवस्करः, अपस्करः, अवकरः, मलं, उच्छिष्टं, कल्कं, विदलं.

To scratch, *v. n.* (Tear or lacerate the skin or surface) त्वचम् उल्लिख् (c. 6. -लिखति -लेखितुं) or प्रोल्लिख् or विलिख् or निर्लिख् or प्रलिख् or लिख्, त्वचं दॄ (c. 10. दारयति -यितुं) or विदॄ or अवदॄ, त्वचं छिद् (c. 7. छिनत्ति, छेत्तुं) or भिद् or निर्भिद्, त्वचं कृत् or निकृत् or क्षुर् (c. 6. क्षुरति, क्षोरितुं) or क्षुण्, त्वक्छेदं कृ.—(With the nail) नखेन त्वचं दॄ or विदॄ, नखेन त्वचं लिख् or उल्लिख् or प्रलिख्, नखेन अङ्क् (c. 10. अङ्कयति -यितुं), नखेन त्वक्छेदं कृ or त्वग्भेदं कृ.—(Allay itching by scratching) कण्डू (nom. कण्डूयति -ते), कण्डूयनं कृ, कण्डूयां कृ, कण्डूतिं कृ, नखेन त्वचं घृष् (c. 1. घर्षति -र्षितुं) or विघृष्, त्वग्घर्षणं कृ, त्वग्विघर्षणं कृ, गात्रघर्षणं कृ, गात्रविघर्षणं कृ, 'he scratches his head with his nails,' नखैः or अंगुल्यग्रैर् आत्मनः शिरः or आत्मनः शिरोरुहान् कण्डूयति.—(Scratch the ground, excavate with the claws, as birds, &c.) विष्कृ (c. 6. -किरते -करितुं -रीतुं), अपस्कृ, भूमिम् आलिख्य विक्षिप्.—(Wound slightly) त्वचं क्षण्, ईषत् क्षण् or परिक्षण्, त्वग्व्रणं कृ, त्वक्क्षतं कृ, ईषद्व्रणं कृ.—(Write roughly), *see* *To* scrawl.—(Scratch out), *see* *To* erase.

Scratch, *s.* (Laceration of the skin or surface) त्वक्छेदः, त्वग्भेदः, त्वगुल्लेखनं, त्वग्लेखनं, त्वग्विलेखः, त्वग्दारणं, त्वग्विदारणं, त्वग्विभेदः, त्वक्क्षतं, त्वक्क्षतिः *f.*, त्वक्परिक्षतिः *f.*, परिक्षतिः *f.*—(With the nail) नखलेखा, नखविलेखः, नखच्छेदः, नखव्रणः -णं, नखक्षतं, नखाङ्कः, नखचिह्नं, नखपदं, नखक्षतिः *f.*, नखपरिक्षतिः *f.*, व्याघ्रनखं -खकं, मुमुलं, शशप्लुतकं.—(With a thorn) कण्टकक्षतं, कण्टकव्रणः.—(Slight wound) त्वग्भेदः, त्वक्क्षतं, त्वग्व्रणः, ईषत्क्षतं, ईषत्त्वग्भेदः, ईषत्त्वक्छेदः.—(Rudely drawn figure), *see* Scrawl.

Scratched, *p. p.* (Lacerated on the surface) लिखितः -ता -तं, उल्लिखितः &c., प्रोल्लिखितः &c., विदारितः &c., दारितः &c., छिन्नत्वक् *m.f.n.* (च्), भिन्नत्वक् *m.f.n.*, क्षतत्वक् *m.f.n.*, परिक्षतत्वक्, क्षतः -ता -तं, परिक्षतः &c.—(With the nail) नखलिखितः -ता -तं, नखोल्लिखितः &c., नखदारितः &c., नखविदारितः &c., नखछिन्नः -न्ना -न्नं, नखक्षतः -ता -तं, नखपरिक्षतः &c., नखाङ्कितः &c.—(With a thorn) कण्टकक्षतः -ता -तं, कण्टकछिन्नः -न्ना -न्नं.—(Rubbed with the nail) घर्षितः -ता -तं, विघर्षितः &c., नखघर्षितः &c., घृष्टः -ष्टा -ष्टं.

Scratcher, *s.* (One who scratches) त्वग्भेदकः, त्वक्छेदकः, त्वगुल्लेखकः, त्वग्लेखकः, त्वग्दारकः, त्वग्विदारकः, उल्लेखकः, कण्डूयनकः, कण्डूतिकारी *m.* (न्), कण्डूयाकृत् *m.*—(Bird that scratches for food) विष्किरः, नखविष्किरः, अपस्करकारी *m.*

Scratching, *s.* (The act of lacerating the surface) उल्लेखनं, प्रोल्लेखनं, विदारणं, त्वगुल्लेखनं, त्वग्लेखनं, त्वग्दारणं, त्वग्विदारणं, त्वक्छेदनं, त्वग्भेदनं, *see* Scratch, *s.*—(Scratching to allay itching) कण्डूयनं, कण्डूया, कण्डूतिः *f.*, कण्डूः *f.*

Scratching, *part.* (Lacerating the surface) लिखन् -खन्ती -खत् (त्), उल्लिखन् &c.—(To allay itching) कण्डूयन् -यन्ती -यत् (त्), कण्डूयमानः -ना -नं.

To scrawl, *v. a.* अस्पष्टं or अस्पष्टाक्षरैः or अस्पष्टक्रमेण लिख् (c. 6. लिखति, लेखितुं) or अङ्क् (c. 10. अङ्कयति -यितुं), अनवधानेन or प्रमादेन लिख्, स्थूलाक्षरैः or कदक्षरैः or अव्यक्ताक्षरैर् लिख्, स्थूलवर्णैः or स्थूलक्रमेण लिख् or आलिख्, अतिशीघ्रं लिख्, अतिक्षिप्रं लिख्.

Scrawl, scrawling, *s.* अस्पष्टलेखः, अस्पष्टलिखनं, स्थूललेखः, स्थूल-

लेख्यं, स्थूलालेख्यं, अस्पष्टाक्षरलिखनं, स्थूलाक्षरलिखनं, कदक्षरलिखनं.

SCRAWLED, *p.p.* अस्पष्टाक्षरैः or स्थूलाक्षरैर् लिखितः -ता -तं or अङ्कितः &c.

To SCREAM, *v. n.* विक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), क्रुश्, रु (c. 2. रौति, रवितुं), विरु, नद् (c. 1. नदति -दितुं), रस् (c. 1. रसति -सितुं), वाश् (c. 1. वाशते -शितुं), उच्चैः or उच्चैःस्वरेण क्रुश्, चीत्कारं कृ, चिक्कारं कृ, चीत् शब्दं कृ, चीत्कृ, उच्चनादं कृ, महानादं कृ, उच्चस्वरं कृ, नादं कृ; 'with pain,' आर्त्तनादं कृ, आर्त्तस्वरं कृ.

SCREAM, SCREAMING, *s.* विक्रुष्टं, विक्रोशनं, चीत्कारः, चिक्कारः, नादः, उच्चनादः, महानादः, रावः, रुतं, क्रुष्टं, उत्क्रोशः, उत्क्रुष्टं, रासः, स्वरः, उच्चस्वरः, कोलाहलः, चटुः -टु *m. n.*; 'of pain,' आर्त्तनादः, आर्त्त-स्वरः, आर्त्तरावः.

To SCREECH, SCREECH, SCREACHING, *see To* SCREAM, SCREAMING.

SCREECH-OWL, *s.* नक्तरावी कालपेचकः, कर्कशरावी पेचकभेदः.

SCREEN, *s.* (Partition) व्यवधानं, व्यवधा, तिरस्करिणी, तिरोधानं, अन्त-र्धानं, अन्तर्धा, जवनिका, यवनिका, पटः -टं, कटः, प्रतिसीरा, छाया. —(Coarse sieve) स्थूलचालनी.

To SCREEN, *v. a.* (Shelter, protect) छद् (c. 10. छादयति -यितुं), प्रछद्, आछद्, समाछद्, संछद्, गुप् (c. 1. गोपायति, गोप्तुं), अभिगुप्, संगुप्, व्यवधा (c. 3. -दधाति -धातुं), तिरोधा, अन्तर्धा, पिधा, अपिधा, वृ (c. 5. वृणोति -वरितुं -रीतुं, c. 10. वारयति -यितुं), संवृ, आवृ, अपवृ, निवृ, व्यवधानेन रक्ष् or संरक्ष्, गोपनं कृ, संगोपनं कृ, गुप्तिं कृ.—(Sift) शुध्, गालनं कृ, निर्गलनं कृ.

SCREENED, *p. p.* (Protected) छादितः -ता -तं, छन्नः -न्ना -न्नं, प्रछादितः &c., आच्छादितः &c., गुप्तः -प्ता -प्तं, गोपितः -ता -तं, संगोपितः &c., गोपायितः &c., व्यवहितः &c., आवृतः &c., संवृतः &c., व्यावृतः &c., अन्तरितः -ता -तं, अन्तर्हितः &c., तिरोहितः &c., व्यवधानरक्षितः &c., व्यवधानगुप्तः -प्ता -प्तं.—(Sifted) शोधितः -ता -तं, निर्गलितः &c.

SCREENING, *part.* व्यवधायकः -का -कं, व्यवधायी -यिनी &c., अन्तर्धायकः &c.

SCREW, *s.* (Spiral bolt or cylinder) व्यावर्त्तनकीलः -लकः, आवर्त्तन-कीलः -लकः, परिवर्त्तनकीलः, सावर्त्तनकीलः, विवर्त्तनकीलः, कीलः -लकः, मलमूत्रं; 'male screw,' नरः; 'female,' नारी.—(Stingy person) कृपणः, दृढमुष्टिः *m.*, गाढमुष्टिः *m.*

To SCREW, *v. a.* (Fasten with screws) आवर्त्तनकीलकैः or व्यावर्त्त-नकीलकैर् बन्ध् (c. 9. बध्नाति, बन्द्धुं), कीलकैर् बन्ध्, मलमूत्रेण बन्ध्. —(Twist) व्यावृत् (c. 10. -वर्त्तयति -यितुं), आवृत्, परिवृत्.—(Press), *see* the word.—(Oppress) पीड्, बाध्, *see* OPPRESS.—(Drive a screw) कीलं व्यावर्त्य प्रविश् in caus., कीलं परिवर्त्य प्रविश्.

SCREWED, *p. p.* सावर्त्तनकीलबद्धः -द्धा -द्धं, परिवर्त्तनकीलबद्धः &c., बाधितः &c.

To SCRIBBLE, SCRIBBLED, SCRIBBLING, *see To* SCRAWL, SCRAWLED, &c.

SCRIBBLER, *s.* कुलेखकः, कदक्षरलेखकः, कुग्रन्थकारः, अस्पष्टलेखकः.

SCRIBE, *s.* लेखकः, लिपिकरः, लिपिकारः, लिपिजीवी *m.* (न्), कायस्थः, अक्षरजीवकः, अक्षरजीवी *m.* (न्), अक्षरचनः, अक्षरचणः, अक्षरचञ्चुः, अक्षरचुञ्चुः *m.*, मसिपण्यः, मसिजीवी *m.*, वर्णिकः, वार्णिकः, वर्णी *m.* (न्), किरकः, लिपिकरः, लिपिङ्करः, करणः.

SCRIP, *s.* (Small bag) क्षुद्रकोषः, वस्त्रसम्पुटकः.—(Writing, certi-ficate) लेखः, लेख्यं, पत्रिका, पत्रं, प्रमाणपत्रं.

SCRIPTURAL, *a.* शास्त्रीयः -या -यं, शास्त्रानुसारी -रिणी -रि (न्), यथा-शास्त्रः -स्त्रा -स्त्रं, शास्त्रसिद्धः -द्धा -द्धं, श्रुतिसिद्धः &c., शास्त्रोक्तः -क्ता -क्तं, शास्त्रप्रोक्तः &c., वेदोक्तः &c., वेदोदितः -ता -तं, वैदिकः -की -कं, श्रुत्युक्तः &c., श्रुतिविहितः -ता -तं, श्रुतिकथितः &c., श्रुत्युदितः &c.,

यथाश्रुतिः -तिः -ति, औपनिषदः -दी -दं, शास्त्रानुयायी &c., धर्म्मग्र-न्थानुसारी &c., धर्म्मग्रन्थप्रोक्तः &c.

SCRIPTURALLY, *adv.* शास्त्रतस्, यथाशास्त्रं, शास्त्रानुसारेण, शास्त्रवत्.

SCRIPTURE, *s.* (Writing) लेखः -खनं, लिपिः *f.*, लिखनं, लेखनं, लिखितं, अक्षरविन्यासः, अक्षरसंस्थानं.—(Sacred writing) श्रुतिः *f.*, श्रुतं, शास्त्रं, ब्रह्म *n.* (न्), कल्पः, आगमः, आम्नायः, प्रमाणं.—(The Bible) धर्म्मग्रन्थः, धर्म्मपुस्तकं. The sacred writings of the Hindús may be arranged under seven heads, viz. 1. Vedas, 2. Upa-nishads, 3. Vedángas, 4. Upavedas, 5. Shástras, 6. Puránas and 7. Upapuránas. The Student is referred to each separate head for a fuller explanation than is here given of the subdivisions comprised under the several titles. 1. The Vedas are four in number, viz. ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः. 2. The Upanishads, are the theological and philosophical chapters of the Vedas, either detached from, or comprehended in, the principal work, and collectively called वेदान्तः. 3. The Vedángas are six sacred sciences subordinate to the Vedas, viz. Pronunciation, शिक्षा. De-scription of religious ceremonies, कल्पः, Grammar, व्याकरणं, Prosody, छन्दस्, Astromony, ज्योतिषं, Explanation of difficult and obscure phrases, निरुक्तं -क्तिः. 4. The Upavedas, or Mi-nor vedas, are four, viz. Medicine, आयुर्वेदः, Archery and military art, धनुर्वेदः, Music, गान्धर्ववेदः or गन्धर्ववेदः, Mechanics and the use of tools, &c., शिल्पशास्त्रं or शस्त्रशास्त्रं. 5. Shástra is a title of very general application, but it is properly re-stricted to six sacred and philosophical treatises, viz. मीमां-साशास्त्रं, सांख्यशास्त्रं, वेदान्तशास्त्रं, न्यायशास्त्रं containing the branch called वैशेषिकं, योगशास्त्रं and धर्म्मशास्त्रं. The last contains the body of Hindú law, the others are the text-books of the six Hindú schools of philosophy, *see* SCHOOL. 6. The Puránas are eighteen mythological poems, *see* PURÁNA. 7. The Upapuránas, or inferior Puránas, are also eighteen, *see* under PURÁNA.—(One who is conversant with scripture) वेदवित्, वेदज्ञः, शास्त्रवित्, शास्त्रज्ञः, शास्त्रदर्शी *m.* (न्), बहुवेदार्थदर्शी *m.*, शास्त्राभिज्ञः, शास्त्री *m.*, शास्त्राचरणः, शास्त्र-सम्पन्नः, ब्रह्मज्ञः, ब्रह्मवित्, ब्रह्मवेदी *m.*, ब्रह्मवेत्ता *m.* (तृ), वैदिकः, श्रुतिधरः, श्रुतिज्ञः, श्रोत्रियः, छान्दसः, स्थूललक्षः; 'conversancy with it,' ब्रह्मज्ञानं, वेदव्युत्पत्तिः *f.*, शास्त्रव्युत्पत्तिः *f.*, शास्त्रज्ञानं, ब्रह्म-वेदः, ब्रह्मविद्या; 'study of scripture,' ब्रह्माभ्यासः, ब्रह्माधिगमः -मनं, वेदाधिगमः -मनं, ब्रह्मसत्रं, वेदाध्ययनं, शास्त्राध्ययनं; 'relating to the study of it,' ब्रह्माधिगामिकः -की -कं; 'teaching it,' वेदाध्यापनं, ब्रह्मोपदेशः; 'teacher of it,' आचार्य्यः, उपाध्यायः, वेदाध्यापकः, ब्रह्मोपदेशकः; 'reading it aloud,' ब्रह्मघोषः; 'holiness derived from reading it,' ब्रह्मवर्चसं; 'savour or excellency of it,' ब्रह्मरसः; 'relating to scripture,' श्रौतः -ती -तं, वैदिकः -की -कं, शास्त्रीयः -या -यं; 'authority of it,' श्रुतिप्रामाण्यं, आगमप्रामाण्यं.

SCRIVENER, *s.* नियमपत्रलेखकः, पत्रलेखकः, लेखकः, लिपिकरः.

SCROFULA, *s.* गण्डमाला, कण्ठमाला, अपची, कण्ठगण्डः, गलगण्डः.

SCROFULOUS, *a.* गण्डमाली -लिनी -लि (न्), कण्ठमाली &c., गण्डमा-लारोगी &c.

SCROLL, *s.* लेख्यपत्रं -त्रकं, दीर्घपत्रं -त्रकं, पटः, दीर्घपटः, पट्टः, धर्म्मपुस्तकं.

SCROTUM, *s.* अण्डकोशः, अण्डकोषः, मुष्कः, मुष्ककोषः, फलकोशः, फलकोषकः, वृषणः, वृषणकोषः, कोषः -षकः, कोशः, सीमा *m.* (न्), सीमा, अण्डं -ण्डकः, नीरण्डं -ण्डकः; 'enlargement of it,' कोषवृद्धिः *f.*, वृद्धिः *f.*; 'septum of it,' महावीर्य्यं, विटपः.

To SCRUB, *v. a.* अतिशयेन or अयत्नं मृज् (c. 1. मार्जति -र्जितुं, c. 2. मार्ष्टि -ष्टुं), अतिघर्षणेन मृज्, बलयत् or बलेन मृज्, अतिमार्जनं कृ, अयत्नं प्रक्षल् (c. 10. -क्षालयति -यितुं) or निर्णिज् (c. 3. -णेनेक्ति -णेक्तुं) or धाव् or घृष्. *See To* RUB.

SCRUB, *s.* हीनवृत्तिः *m.*, अधमवृत्तिः *m.*, जघन्यवृत्तिः *m.*, नीचकर्म्मकारी *m.* (न्), नीचकर्म्मा *m.* (न्), कुत्सितकर्म्मा *m.*, अपकर्म्मकृत्, अधमकर्म्मा *m.*, पामरः, ग्रामीनः.

SCRUBBED, *p. p.* अतिघर्षणपूर्व्वं or अतिघर्षणेन मार्जितः -ता -तं or निर्णिक्तः -क्ता -क्तं, अतिनिर्णिक्तः &c., सुनिर्णिक्तः &c., सुप्रक्षालितः &c., सुमृष्टः &c., सुघर्षितः &c.

SCRUBBY, *a.* क्षुद्रः -द्रा -द्रं, नीचः -चा -चं, तुच्छः -च्छा -च्छं. *See* MEAN.

SCRUPLE, *s.* (Hesitation) शङ्का, आशङ्का, विकल्पः, संशयः. *See* DOUBT.

To SCRUPLE, *v. n.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, अभिशङ्क्, विशङ्क्, विक्लृप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं), त्रस् (c. 4. त्रस्यति -सितुं), विलम्ब्. *See To* HESITATE.

SCRUPULOUS, *a.* (Hesitating) शङ्की -ङ्किनी -ङ्कि (न्), आशङ्की &c., शङ्कान्वितः -ता -तं, आशङ्कान्वितः &c., सशङ्कः -ङ्का -ङ्कं, संशयी &c., सन्देही &c., शङ्काशीलः -ला -लं, आशङ्काशीलः &c.—(Exact, nice, precise) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः &c., सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी &c., सूक्ष्माचारी &c., अतिसूक्ष्माचारी &c., यथाचारः -री -रं, यथाचारी &c.

SCRUPULOUSNESS, *s.* शङ्काशीलता, सशङ्कता, सूक्ष्मता, अतिसूक्ष्मता, सूक्ष्मदृष्टिः *f.*

SCRUTINEER, *s.* सूक्ष्मपरीक्षकः, सूक्ष्मनिरूपकः, निरूपकः. *See* SCRUTINIZER.

To SCRUTINIZE, *v. a.* सूक्ष्मं or अतिसूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं) or परीक्ष् (c. 1. -ईक्षते -क्षितुं) or निरीक्ष् or दृश् (c. 1. पश्यति, द्रष्टुं) or अनुसन्धा (c. 3. -दधाति -धातुं) or ज्ञा in des. (जिज्ञासते -सितुं) or अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं) or मार्ग् (c. 10. मार्गयति -यितुं), परिमार्ग्.

SCRUTINIZED, *p. p.* अतिसूक्ष्मं निरूपितः -ता -तं or परीक्षितः &c. or निरीक्षितः &c.

SCRUTINIZER, *s.* सूक्ष्मनिरूपकः, सूक्ष्मपरीक्षकः, सूक्ष्मदर्शी *m.* (न्), सूक्ष्मानुसन्धायी *m.*, सूक्ष्मानुसन्धानी *m.*, सूक्ष्मजिज्ञासाकृत् *m.*, निरूपकः, परीक्षकः &c.

SCRUTINY, *s.* सूक्ष्मपरीक्षा, सूक्ष्मनिरूपणं, सूक्ष्मानुसन्धानं, सूक्ष्मदर्शनं, सूक्ष्मनिरीक्षा -क्षणं, सूक्ष्मजिज्ञासा, परीक्षा -क्षणं, निरूपणं, अनुसन्धानं, निरीक्षणं, संवीक्षणं, जिज्ञासा, अनुयोगः.

To SCUD, *v. n.* अतिवेगेन गम् (c. 1. गच्छति, गन्तुं) or चल् (c. 1. चलति -लितुं), सहसा चल्; 'before the wind or a tempest,' अतिवेगेन अनुवातं चल्, वात्यावेगेन अतिशीघ्रं चल् or वह् in pass. (उह्यते), अतिवेगेन वात्याप्रेरितः -ता -तं भू.

SCUD, *s.* वातप्रेरितशीकरः, वातप्रेरितमेघः, वातप्रेरितकुज्झटिका.

SCUFFLE, *s.* विग्रहः, तुमुलं, बाहूबाहवि युद्धं, बाहूबाहवि कलहः, हस्ताहस्ति युद्धं, नियुद्धं, सङ्कुलयुद्धं, रणसङ्कुलं, शरीरसम्बन्धः.

To SCUFFLE, *v. n.* बाहूबाहवि युध् (c. 4. युध्यते, योद्धुं) or नियुद्धं कृ.

To SKULK, *v. n.* निभृतं स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), निभृतस्थाने or गूढस्थाने वृत्, गुप्तः -प्ता -प्तं भू or वृत्, अन्तरितः -ता -तं भू, गुप् in pass. (गुप्यते); 'to skulk off,' अपसृप् (c. 1. -सर्पति -र्प्तुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्.

SCULKER, *s.* निभृतवर्त्ती *m.* (न्), निभृतस्थायी *m.* (न्), गुप्तवर्त्ती *m.*

SCULKING, *s.* निभृतवर्त्तनं, निभृतस्थाने or गूढस्थाने वर्त्तनं, अपसर्पणं.

SCULL, *s.* (Bone that surrounds the brain) कपालः -लं, कर्पर:, शिरोस्थि *n.*, मस्तकः -कं, करोटः -टिः -टी *f.*, मुण्डः -ण्डं, भगालः; 'a chaplet or necklace of sculls,' कपालस्रज् *f.* (ज्), कापाली स्रक्, कपालमाला, कापाली माला; 'pertaining to the scull,' कापालः -ली -लं, कापालिकः -की -कं.—(Short oar) क्षुद्रक्षेपणिः, क्षुद्रदण्डः, ह्रस्वदण्डः.

To SCULL, *v. a.* क्षुद्रदण्डेन नौकां चल् (c. 10. चालयति -यितुं).

SCULL-CAP, *s.* शिरोवेष्टः -ष्टनं, शिरस्कं, शिरोवस्त्रं, मस्तकावरणं -णी.

SCULLER, *s.* क्षुद्रदण्डेन नौकाचालकः, क्षुद्रक्षेपणिचालकः. *See* ROWER.

SCULLERY, *s.* पिठरागारं -रः, भाण्डागारं -रः, पात्रागारं, स्थाल्यागारं, कटाहागारं, कुण्डागारं, पिठरं.

SCULLION, *s.* पिठरादिप्रक्षालकः -का, भाण्डादिमार्जकः -का, कटाहादिशोधकः -का, कुण्डकटाहादिपरिष्कारकः -का.

SCULPTOR, *s.* तक्षकः, तष्टा *m.* (ष्टृ), तक्षा *m.* (न्), त्वष्टा *m.*, मूर्त्तिकारः -रकः, प्रतिमाकारः -रकः, मूर्त्तितक्षकः, प्रतिमातक्षकः, उपमाता *m.* (तृ), उपमाकारः.

SCULPTURE, *s.* तक्षणं, तक्षणकर्म्म *n.* (न्), त्वक्षणं, मूर्त्तितक्षणं, प्रतिमातक्षणं, मूर्त्तिकरणं, प्रतिमाकरणं, उपमाकरणं, उपमातक्षणं.

To SCULPTURE, *v. a.* तक्ष् (c. 1. तक्षति -क्षितुं, c. 5. तक्ष्णोति), त्वक्ष् (c. 1. त्वक्षति -क्षितुं), प्रतिमातक्षणं कृ, मूर्त्तितक्षणं कृ, प्रतिमां कृ, मूर्त्तिं कृ.

SCULPTURED, *p. p.* तष्टः -ष्टा -ष्टं, तक्षितः -ता -तं, त्वष्टः -ष्टा -ष्टं.

SCUM, *s.* (Impure matter or froth which rises to the surface of liquors) मण्डः -ण्डं, मृद्वीरसः, रसाग्रं, फेनः, पराङ्गः, कारुजः, उत्पीडः, उत्तररसः, उपरिस्थरसः; 'of boiled rice,' निस्रावः, विस्रावः, मासरः, आचामः.—(Refuse, dirt) मलं, अवस्करः, अपस्करः, उच्छिष्टं, अवशिष्टं, कल्कं, उद्वर्त्तः, जुष्टं, असारद्रव्यं.

To SCUM, *v. a.* मण्डम् अपहृ (c. 1. -हरति -हर्त्तुं) or अपनी, निर्मण्डीकृ.

SCURF, *s.* त्वक्क्लेदः, चर्म्मक्लेदः, शिरश्चर्म्ममध्ये पिण्डितक्लेदः, मस्तकत्वक्क्लेदः, शिरोमज्जा, मस्तकमज्जा, मज्जा, शिरोमलं, चर्म्ममलं.

SCURFY, *a.* त्वक्क्लेदवान् -वती -वत् (त्), चर्म्ममलवान् &c., मलावृतः -ता -तं.

SCURRILITY, *s.* मौखर्य्यं, मुखरत्वं, दुर्मुखता, वाग्दुष्टता, वाक्पारुष्यं, पारुष्यं, परुषवचनं, परुषोक्तिः *f.*, दुर्वचनं, दुरुक्तिः *f.*, दुरुक्तं, दुर्भाषणं, अपभाषणं, दुर्वचस् *n.*, खलोक्तिः *f.*, परोद्वेजकभाषणं, अपशब्दः, व्यङ्गं.

SCURRILOUS, *a.* (Using abusive language) मुखरः -रा -रं, दुर्मुखः -खी -खं, वाग्दुष्टः -ष्टा -ष्टं, परुषवाक् *m. f. n.* (च्) परुषोक्तिकः -का -कं, परुषभाषी -षिणी -षि (न्), कटुभाषी &c., मुखशाखः -खा -खं, मुखशीलः -ला -लं, अवद्यमुखः &c., परोद्वेगकरभाषी &c., क्षेपकः -का -कं.—(Containing low abuse) परुषः -षा -षं, परुषोक्तिमयः -यी -यं, दुरुक्तः -क्ता -क्तं, दुर्वाच्यः -च्या -च्यं.

SCURVILY, *adv.* कुत्सितं, सकार्पण्यं, तुच्छप्रकारेण, अविनयेन, परुषं.

SCURVINESS, *s.* कुत्सितत्वं, तुच्छता, कार्पण्यं, पामरता, जघन्यता, खलता.

SCURVY, *s.* (The disease) शीतादः, नाषिकरक्तपित्तः -त्तं.

SCURVY, *a.* कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, पामरः -रा -रं, *see* MEAN.

SCUTCHEON, *s.* कुलचिह्नपत्रं, कुलमर्य्यादालक्षणपत्रं, कुलीनलक्षणपत्रं.

SCUTTLE, *s.* (Broad basket) विशालपेटकः, पृथुकरण्डः.—(Hole in the side of a ship) नौपार्श्वच्छिद्रं.

To SCUTTLE, *v. a.* नौकापार्श्वे or नौकातले छिद्राणि कृ, नौपार्श्वे सच्छिद्रं कृ.

To SCUTTLE, *v. n.* (Run off affectedly) वेलक्ष्येण अपधाव्.

SCYTHE, *s.* लवित्रकः, लवित्रं, लवाणकं, शस्यच्छेदनी, शस्यकर्त्तनी.

SEA, *s.* समुद्रः, अर्णवः, सागरः, जलधिः *m.*, उदधिः *m.*, अब्धिः *m.*, जलनिधिः *m.*, महोदधिः *m.*, वारिधिः *m.*, वारिनिधिः, नीरालयः, *see* OCEAN; 'a rough sea,' [illegible]र्णवः, क्षुब्धसमुद्रः, वातं; 'a sea of trouble,' दुःखसागरः; 'ablution or bathing in the sea,' समुद्रस्नानं; 'the seven seas,' सप्तसमुद्राः *m. pl.*, *see* under OCEAN.

SEA-BATHING, *s.* समुद्रस्नानं, समुद्रजलस्नानं.

SEA-BEAT, *a.* तरङ्गाहतः -ता -तं, कल्लोलाहतः &c., उत्तरङ्गः -ङ्गा -ङ्गं.

SEA-COAST, *s.* समुद्रतटं, समुद्रतीरं, जलधितीरं, अब्धितीरं, अब्धितटं.

SEA-FARING, *a.* समुद्रयायी -यिनी -यि (न्), समुद्रगामी &c., समुद्रगः -गा -गं, समुद्रमार्गेण or समुद्रपथेन गमनागमनकारी &c., नौकाजीवी &c., सांयात्रिकः -की -कं.

SEA-FIGHT, *s.* समुद्रयुद्धं, अब्धियुद्धं, नौकायुद्धं, नौयुद्धं.

SEA-GIRT, SEA-ENCIRCLED, *a.* समुद्रमेखलः -ला -लं, अर्णवमेखलः &c., अब्धिमेखलः &c., समुद्ररसनः -ना -नं, जलधिरसनः &c., समुद्रवेष्टितः -ता -तं, समुद्रवलयाङ्कितः &c., समुद्रान्तः -न्ता -न्तं, सागरान्तः &c.

SEA-GREEN, *a.* समुद्रवर्णः -र्णा -र्णं, अब्धिवर्णः &c., श्यामहरित् *m. f. n.*

SEA-GULL, *s.* समुद्रकुक्कुटः -टी, समुद्रचटकः, जलकुक्कुटः -टी, चिल्लिका, गङ्गाचिल्ली, देवट्टी, समुद्रप्लवः.

SEA-MAN, *s.* समुद्रयायी *m.* (न्), समुद्रगः, नाविकः. *See* SAILOR.

SEAMANSHIP, *s.* नाविकविद्या, नौचालनविद्या, नौकानयनविद्या.

SEA-PORT, *s.* नौकाशयः, नौकाश्रयः, समुद्रतीरस्थनगरी.

SEA-SALT, *s.* समुद्रलवणं, सामुद्रं, अक्षीवं, अक्षिवं, वसिरं, वशिरं.

SEA-SHORE, *s.* समुद्रतीरं, समुद्रतटं, समुद्रवेला, वेला, समुद्रान्तः -न्तं, सिन्धुतटं, जलधिरोधस् *n.*, वेलामूलं; 'on the sea-shore,' वेलायां, समुद्रतीरे.

SEA-SICK, *a.* समुद्रामयग्रस्तः -स्ता -स्तं, समुद्ररोगपीडितः -ता -तं.

SEA-SICKNESS, *s.* समुद्रामयः, समुद्ररोगः, ऊर्म्मिप्रलोठनजा वमनेच्छा.

SEA-SIDE, *s.* समुद्रतीरं, समुद्रवेला, समुद्रसमीपभूमिः *f.*

SEA-WATER, *s.* समुद्रजलं, समुद्राम्बु *n.*, सागराम्बु *n.*, समुद्रवारि *n.*, समुद्रोदकं.

SEA-WEED, *s.* समुद्रशाकः, समुद्रतृणं, समुद्ररोही शाकविशेषः.

SEA-WORTHY, *a.* समुद्रगमनयोग्यः -ग्या -ग्यं, समुद्रयानयोग्यः &c., समुद्रतरणयोग्यः &c.

SEAL, *s.* (Stamp) मुद्रा.—(Signet) मुद्रा, प्रत्ययकारिणी, दीनारः.—(Finger-ring seal) अङ्गुलिमुद्रा.—(Seal or tie with a seal for fastening a letter) तालिकः.—(Impression of a seal) मुद्रा.—(Sea-calf) समुद्रवत्सः, मकरः.

To SEAL, *v. a.* मुद्र (nom. मुद्रयति -यितुं), मुद्रीकृ, समुद्रीकृ, मुद्रितं -तां कृ.—(Mark with a seal) मुद्राङ्कितं -तां कृ, मुद्राचिह्नितं -तां कृ, मुद्रया अङ्क् (c. 10. अङ्कयति -यितुं) or चिह्न् (c. 10. चिह्नयति -यितुं), मुद्रालाञ्छितं -तां कृ.—(Fasten with a seal) मुद्रया बन्ध् (c. 9. बध्नाति, बन्द्धुं).

SEALED, *p.p.* मुद्रितः -ता -तं, मुद्रीकृतः &c., समुद्रः -द्रा -द्रं, समुद्रीकृतः &c.—(Marked with a seal) मुद्राङ्कितः -ता -तं, मुद्राचिह्नितः &c., मुद्रालाञ्छितः &c., अङ्कितः &c., चिह्नितः &c.—(Fastened with a seal) मुद्राबद्धः -द्धा -द्धं, तालिकबद्धः &c.; 'sealed papers,' मुद्रिका.

SEALING, *s.* मुद्रीकरणं, समुद्रीकरणं, मुद्राङ्कनं, मुद्राबन्धनं, अङ्कनं.

SEALING-WAX, *s.* लाक्षा, अलक्तः, अलक्तकं, लक्तकं, राक्षा.

SEAM, *s.* (Suture, joining) सन्धिः *m.*, सीवनं, सेवनी.—(Formed by sewing) सूचिसेवनं, सीवनं.—(Of planks) फलकसन्धिः *m.*, काष्ठसन्धिः *m.*—(Cicatrix) शुष्कव्रणः, रूढव्रणं.

SEAMLESS, *a.* सन्धिहीनः -ना -नं, सन्धिरहितः -ता -तं, निःसन्धिः -न्धिः -न्धि.

SEAMSTRESS, *s.* सूचिका, सूचिकर्म्मोपजीविनी, सूचीशिल्पोपजीविनी.

To SEAR, *v. a.* बहिर्भागं दह् (c. 1. दहति, दग्धुं, c. 10. दाहयति -यितुं), बहिर्मांसं दह्, दाहेन or दहनेन बहिर्भागं दृढीकृ or घनीकृ or कठिनीकृ or शुष्कीकृ.

SEAR, *a.* शुष्कः -ष्का -ष्कं, शीर्णः -र्णा -र्णं, विशीर्णः &c., म्लानः -ना -नं.

To SEARCH, *v. a.* अन्विष् (c. 4. -इष्यति, c. 6. -इच्छति -एषितुं -एष्टुं), अन्वेष् (c. 1. -एषते -षितुं), निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं), अवेक्ष्, निरीक्ष्, संवीक्ष्, मार्ग् (c. 1. मार्गति, c. 10. मार्गयति -यितुं), मृग् (c. 10. मृगयते -ति -यितुं), विचि (c. 5. -चिनोति -चेतुं), ज्ञा in des. (जिज्ञासते -सितुं), चर्च् (c. 1. चर्चति -र्चितुं).

SEARCH, SEARCHING, *s.* अन्वेषणं -णा, पर्य्येषणं -णा, अनुसन्धानं, जिज्ञासा, अन्विष्टिः *f.*, परीष्टिः *f.*, निरूपणं, परीक्षा -क्षणं, संवीक्षणं, निरीक्षा -क्षणं, समीक्षणं, अनुसरणं, मार्गः -र्गणं, शोधनं, अनुयोगः, विचयः, चर्चा, उद्देशः, तर्कः; 'for wealth,' अर्थान्वेषणं, अर्थेहा.

SEARCHED, *p. p.* अन्विष्टः -ष्टा -ष्टं, अन्वेषितः -ता -तं, निरूपितः -ता -तं.

SEARCHER, *s.* अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), अन्वेषकः, निरूपकः, निरूपयिता *m.* (तृ), परीक्षकः, निरीक्षकः, अनुसन्धाता, अनुसन्धायी *m.*, जिज्ञासाकृत्; 'of the heart,' अन्तर्यामी *m.*

SEARED, *p. p.* तप्तलोहदग्धः -ग्धा -ग्धं, दाहेन कठिनीकृतः -ता -तं.

SEASON, *s.* (Fit time or opportunity) अवसरः, अवकाशः, कालः, समयः, प्रस्तावः, प्रसङ्गः, कालयोगः, कालसन्धिः *m.*, सन्धिः *m.*, सुयोगः; 'season for action,' कार्य्यकालः, कार्य्यावसरः, कार्य्यसमयः; 'season for ablution,' स्नानावसरः; 'wrong season,' अकालः, अनवसरः; 'out of season,' अकालेन, अनवसरेण; 'born out of season,' अकालजः -जा -जं.—(Any time) कालः, समयः, वेला, *see* TIME.—(Auspicious moment) मुहूर्त्तः -र्त्तं, लग्नः -ग्नं, शुभलग्नः -ग्नं, शुभमुहूर्त्तः -र्त्तं.—(One of the divisions of the year) ऋतुः *m.*, कालः, समयः; 'revolution of the seasons,' ऋतुपर्य्यायः, *see* REVOLUTION; 'the interval or junction between two seasons,' ऋतुसन्धिः *m.*; 'the seasons collectively,' ऋतुगणः, ऋतुवर्गः; 'the six seasons,' षड्ऋतवः *m. pl.* The year is divided into six seasons, according to the Hindús, viz. 1. Spring, वसन्तः, वसन्तसमयः, comprising, according to the reckoning which refers to the Northern parts of India, the two months of चैत्रः and वैशाखः, *i. e.* from the middle of March to the middle of May, *see* SPRING. 2. The hot season or Summer, ग्रीष्मः, ग्रीष्मकालः, निदाघकालः, comprising the two months of ज्येष्ठः and आषाढः, *i.e.* from the middle of May to the middle of July, *see* SUMMER. 3. The rainy season, the rains, वर्षाः *m. pl.*, वर्षाकालः, वृष्टिकालः, comprising the two months श्रावणः and भाद्रः, *i. e.* from the middle of July to the middle of September, *see* under RAIN, RAINY. 4. The autumnal season, शरद्, शरत्कालः, शरदृतुः *m.*, comprising the two months आश्विनः and कार्त्तिकः, *i. e.* from the middle of September to the middle of November, *see* AUTUMN. 5. The cold season, हेमन्तः, comprising the two months मार्गशीर्षः and पौषः, *i. e.* from the middle of November to the middle of January. 6. The dewy season or season of hoar frost, शिशिरः, शिशिरकालः, comprising the

two months माघः and फाल्गुनः, *i.e.* from the middle of January to the middle of March. According to more modern authorities the season of Spring begins with the month Phálguna, or the middle of February. This reckoning will place each of the succeeding seasons a month earlier. Sometimes the word आगमः is used in composition for 'the coming on of a season,' or for the season itself, as 'the rainy season,' वर्षागमः, मेघागमः; 'the hot season,' ग्रीष्मागमः, उष्णागमः.

To SEASON, *v. a.* (Render palatable by the mixture of seasoning) वास् (c. 10. वासयति -यितुं), व्यञ्जनादिना संस्कृ or उपस्कृ, व्यञ्जनादि प्रक्षिप्य सुरसीकृ or हृद्यं -द्यं कृ or स्वादूकृ.—(Mature, prepare) पच्, पक्वं -क्वां कृ, पक्वीकृ, पक्वतां or परिपाकं कृ or जन्, सिद्धं -द्धां कृ, सिद्धीकृ, उपयुक्तं -क्तां कृ, योग्यं -ग्यां कृ; 'to season the body to heat,' शरीरं घर्म्मसहनयोग्यं कृ.

To SEASON, *v. n.* (Become mature) पक्वः -क्वा -क्वं भू, परिपक्वः -क्वा -क्वं भू, योग्यः -ग्या -ग्यं भू, उपयुक्तः -क्ता -क्तं भू. *See To* MATURE, *v. n.*

SEASONABLE, *a.* (Opportune) समयोपयुक्तः -क्ता -क्तं, प्रसङ्गोपयुक्तः &c., कालोपयुक्तः &c., समयोचितः -ता -तं, कालोचितः &c., कालिकः -की -कं, कालीनः -ना -नं, सामयिकः -की -कं, युक्तकालिकः -की -कं, उपयुक्तकालिकः &c., उचितकालिकः &c., कालानुरूपः -पा -पं, समयानुरूपः &c., प्रसङ्गानुरूपः &c., कालानुसारी -रिणी -रि (न्), समयानुसारी &c., कालानुकूलः -ला -लं, समयानुकूलः &c., कालप्राप्तः -प्ता -प्तं, समयप्राप्तः &c., अवसरप्राप्तः &c., प्रसङ्गप्राप्तः &c., प्राप्तकालः -ला -लं, प्राप्तसमयः -या -यं, प्राप्तावसरः -रा -रं, प्राप्तप्रसङ्गः -ङ्गा -ङ्गं, प्रास्ताविकः -की -कं, प्रस्तावसदृशः -शी -शं, कालसदृशः &c., प्रसङ्गसदृशः &c., प्रासङ्गिकः -की -कं, काल्यः -ल्या -ल्यं, काकतालीयः -या -यं.—(Done in season) कालकृतः -ता -तं, समयकृतः &c.; 'seasonable exertion,' कालकृतोद्योगः.—(Produced in season) कालजः -जा -जं, कालोत्पादितः -ता -तं, कालोत्पन्नः -न्ना -न्नं, कालोद्भवः -वा -वं, कालजातः -ता -तं, आर्त्तवः -वी -वं, ऋतुजः -जा -जं, ऋतुजातः -ता -तं, ऋतूद्भवः -वा -वं, ऋतवीयः -या -यं, ऋतव्यः -व्या -व्यं.

SEASONABLENESS, *s.* कालोपयुक्तता, समयोपयुक्तता, कालयोग्यता, प्रसङ्गयोग्यता, कालौचित्यं, समयौचित्यं, प्रसङ्गौचित्यं, कालोचितत्वं, कालानुकूल्यं, कालानुरूप्यं, कालानुरूपता, समयानुरूप्यं, कालसादृश्यं, प्रस्तावसादृश्यं, प्रसङ्गसादृश्यं, कालप्राप्तता, समयप्राप्तता, कालिकता -त्वं, कालजता, कालोत्पन्नता, सामयिकत्वं.

SEASONABLY, *adv.* काले, कालतस्, यथाकालं, समये, समयतस्, यथासमयं, समया, कालानुसारेण, समयानुसारेण, उपयुक्तकाले, उपयुक्तसमये, कालोपयुक्तं, यथावसरं, यथावकाशं, यथाप्रसङ्गं, कालानुरूपेण, प्रस्तावानुरूपेण, प्रस्तावसदृशं, स्थाने, योगतस्, वेलायां.

SEASONED, *p. p.* or *a.* (Mixed with seasoning, &c.) वासितः -ता -तं, प्रयस्तः -स्ता -स्तं, सुसंस्कृतः -ता -तं, व्यञ्जनयुक्तः -क्ता -क्तं, व्यञ्जनादिसंस्कृतः &c., सव्यञ्जनः -ना -नं.—(Matured) पक्वः -क्वा -क्वं, सिद्धः -द्धा -द्धं.

SEASONING, *s.* (That which is added to give a relish) व्यञ्जनं, उपस्करः, उपकरणं, तेमनं, प्रहितं, निष्ठानं, सन्धितं, वेसवारः, वेशवारः, वेषवारः, सूदः, मिश्रकं, मोदकं, अग्निवर्धनः -नं; 'acid seasoning,' शुक्तः -क्तं, वृक्षाम्लं, तिन्तिडीकं.—(Act of maturing) पचनं, पाकः, पक्वीकरणं, उपयुक्तकरणं.

SEAT, *s.* (That on which one sits, chair, &c.) आसनं, पीठः -ठं, विष्टरः, विस्तरः, आसितं, संवेशः, निषद्यकं.—(Thing spread to sit on) आस्तरणं, आस्तरः, विष्टरः, विस्तरः.—(Seat of justice) धर्म्मासनं, न्यायासनं, विचारासनं.—(Mansion, place of abode or inherence) स्थानं, वासस्थानं, निवासस्थानं, वसतिः *f.*, निवसतिः *f.*, आश्रयः, आयतनं, आस्पदं, अधिष्ठानं, अधिष्ठितिः *f.*, निकेतनं, निवेशनं, वेश्म *n.* (न्), निलयः -यनं, आलयः, आकरः, मठः; 'seat of consciousness,' अहङ्कारास्पदं, अहङ्काराश्रयः; 'of diseases,' रोगायतनं, रोगाश्रयः; 'of enjoyment,' भोगायतनं, भोगास्पदं, सुखास्पदं; 'of joy,' हर्षास्पदं, आनन्दास्पदं; 'of pain,' दुःखायतनं, दुःखास्पदं; 'of sorrow,' शोकास्पदं; 'of avarice,' लोभास्पदं; 'of all happiness and prosperity,' सकलसुखसम्पत्तिवसतिः *f.*; 'of the blood,' रक्ताशयः; 'of the bile,' पित्ताशयः; 'of science,' विद्याकरः; 'of one's ancestors,' आद्यस्थानं, आदिपुरुषस्थानं.

To SEAT, *v. a.* (Cause to sit down) उपविश् in caus. (-वेशयति -यितुं), समुपविश्, आसनं ग्रह् in caus. (ग्राहयति -यितुं), दत्तासनं ग्रह् in caus., दत्तासने उपविश् in caus. or स्था in caus., आसनस्थितं -तां कृ.—(Seat one's self) उपविश् (c. 6. -विशति -वेष्टुं), आसनं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), आसनपरिग्रहं कृ.—(Install) प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), अधिकारं प्रविश् (c. 10. -वेशयति -यितुं), अधिकारारूढं -ढां कृ, पदारूढं -ढां कृ.—(Settle), *see* the word.

SEATED, *p. p.* (On a seat) उपविष्टः -ष्टा -ष्टं, समुपविष्टः &c., आसीनः -ना -नं, समासीनः &c., आसनोपविष्टः -ष्टा -ष्टं, आसनस्थः -स्था -स्थं, आसनस्थितः -ता -तं, आसनारूढः -ढा -ढं, आसनगतः -ता -तं, आसनाश्रितः &c., आसनमाश्रितः &c., निषण्णः -ण्णा -ण्णं, सन्निषण्णः &c., अध्यासीनः -ना -नं, पीठाध्यासीनः &c., पीठोपविष्टः -ष्टा -ष्टं, पीठस्थः -स्था -स्थं, कृतासनपरिग्रहः -हा -हं; 'seated at ease,' सुखासीनः -ना -नं, सुखोपविष्टः -ष्टा -ष्टं; 'Be seated,' आसनं गृह्यतां, क्रियताम् आसनपरिग्रहः.—(Settled, fixed) स्थितः -ता -तं in comp., स्थः स्था स्थं in comp., निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, प्रतिष्ठितः &c., गतः -ता -तं in comp., निविष्टः -ष्टा -ष्टं; 'seated in the soul,' आत्मनिष्ठः -ष्ठा -ष्ठं; 'in the heart,' हृदयस्थः -स्था -स्थं, हृत्स्थः &c.; 'in the mind,' मनोनिष्ठः &c., मनोगतः -ता -तं; 'in the body,' शरीरस्थः &c., देहस्थः &c.; 'in the throat,' कण्ठस्थः &c., कण्ठगतः -ता -तं; 'in the bones,' अस्थिस्थः &c., अस्थिगतः -ता -तं; 'deeply seated,' बद्धमूलः -ला -लं, दृढमूलः &c.

To SECEDE, *v. n.* अपया (c. 2. -याति -तुं), व्यपया, अपगम् (c. 1. -गच्छति -गन्तुं), व्यपगम्, अपे (c. 2. अपैति -तुं), व्यपे, अपसृ (c. 1. -सरति -सर्त्तुं), अपक्रम् (c. 1. -क्रामति -क्रमितुं), धर्म्मं त्यज् (c. 1. त्यजति, त्यक्तुं) or उत्सृज्, भिन्नः -न्ना -न्नं भू, भिन्नमतः -ता -तं भू, विभक्तः -क्ता -क्तं भू, मतान्तरं ग्रह्, मतान्तरम् अवलम्ब्.

SECEDER, *s.* भिन्नमतग्राही *m.* (न्), मतान्तरग्राही *m.*, साधारणधर्म्मत्यागी *m.*

SECESSION, *s.* अपगमः, व्यपगमः, अपयानं, अपसरणं, अपक्रमः -मणं, त्यागः, उत्सर्गः, धर्म्मत्यागः, साधारणधर्म्मत्यागः, मतान्तरग्रहणं.

To SECLUDE, *v. a.* (Cause to keep apart from society, &c.) विविच् (c. 7. -विनक्ति -वेक्तुं, c. 10. -वेचयति -यितुं), विविक्तं -क्तां कृ, जनसंसर्गविविक्तं -क्तां कृ, पृथक्स्थितं -तां कृ, सभाविविक्तं -क्तां कृ, सभापृथक्स्थितं -तां कृ, विविक्तं वस् in caus.—(Shut up, hide) निरुध् (c. 7. -रुणद्धि -रोद्धुं), रुध्, गुप्, गोपनं कृ.—(Seclude one's self) विविक्तं वस् (c. 1. वसति, वस्तुं), विविक्तवासं कृ, एकाकी or एकाकिनी वस्, जनसंसर्गवर्जनं कृ, सङ्गवर्जनं कृ, सङ्गत्यागं कृ, सभावर्जनं कृ, सभ्यागं कृ, जनत्यजनं कृ.

SECLUDED, *p. p.* (Separated from society, &c.) विविक्तः -क्ता -क्तं.

जनसंसर्गविविक्तः &c., सभाविविक्तः &c., पृथक्स्थितः -ता -तं, प्रच्छन्नः -न्ना -न्नं.—(Living in retirement) विविक्तवासी -सिनी -सि (न्), एकान्तवासी &c., एकान्तस्थितः -ता -तं, विविक्तवृत्तिः -त्तिः -त्ति; 'a secluded spot,' विविक्तस्थानं प्रान्तरं, प्रान्तरशून्यं, *see* RETIRED.

SECLUSION, *s.* विविक्तता -त्वं, विविक्तिः, विविक्तदशा, विविक्तावस्था, विविक्तवृत्तिः *f.*, पृथक्स्थितिः *f.*, पृथक्स्थितत्वं, विविक्तस्थितिः *f.*, एकान्तस्थितिः *f.*, एकान्तत्वं, विविक्तवासः, एकान्तवासः. *See* PRIVACY.

SECOND, *a.* द्वितीयः -या -यं, द्वितीयकः -का -कं, द्वितीयीकः -का -कं; 'second in rank,' द्वितीयपदस्थः -स्था -स्थं; 'in quality,' द्वितीयगुणकः -का -कं; 'second in value, inferior,' अनुत्तमः -मा -मं, उत्तरः -रा -रं, अमुख्यः &c., *see* SECONDARY; 'second to none,' अद्वितीयः -या -यं, अनुत्तरः -रा -रं.

SECOND, *s.* (Helper) साहाय्यकारी *m.* (न्), सहकारी *m.*, उपकारी *m.*, सहायः, उत्तरसाधकः, द्वितीयः; 'the state or office of a second,' द्वितीयत्वं -ता.—(Measure of time, a simple breathing) प्राणपादः, अणुपादः, विपलं; 'in three seconds,' त्रिष्वणुपादेषु.—(Any minute measure of time) विपलं, विकला, पलं, क्षणः, त्रुटिः *f.*, निमेषः, निमिषः. A vipala is equal to $\frac{1}{60}$th of a pala or minute, a vikalá to $\frac{1}{60}$th of a kalá or minute of a degree. *See* MOMENT, INSTANT, *and the measures of time under* MEASURE.

To SECOND, *v. a.* (Help, back) उपकृ, उपकारं कृ, साहाय्यं कृ, सहायत्वं कृ, उपग्रह् (c. 9. -गृह्णाति, ग्रहीतुं), अनुग्रह्, पक्षपातं कृ, पक्षोद्ग्राहं कृ, पक्षोपग्रहं कृ, पक्षानुग्रहं कृ.

SECONDARILY, *adv.* अप्रधानतस्, अप्राधान्येन, अमुख्यशस्, गौणतस्, अनुषङ्गतस्, द्वितीयतस्, द्वितीयक्रमानुसारेण.

SECONDARINESS, *s.* अप्रधानता, अप्राधान्यं, अमुख्यता, गौणता, गौणिकता.

SECONDARY, *a.* (Not primary) अप्रधानः -ना -नं, अमुख्यः -ख्या -ख्यं, अप्रथमः -मा -मं, अप्राग्र्यः -ग्र्या -ग्र्यं, अनुषङ्गी -ङ्गिणी &c., आनुषङ्गिकः -की -कं, गौणः -णी -णं, गौणिकः -की -कं, उपसृष्टः -ष्टा -ष्टं, गुणभूतः -ता -तं; 'secondary rank,' अप्रधानता, अप्रधानपदं; 'any thing secondary,' अप्रधानं, उपसर्जनं.—(Not first rate) मध्यमः -मा -मं, मध्यमीयः -या -यं, मध्यमगुणकः -का -कं, विगुणः -णा -णं. The prepositions उप and अनु often give the sense of 'secondary;' as, 'a secondary planet,' उपग्रहः; 'a secondary passion or flavour,' उपरसः, अनुरसः; 'symptom,' अनुबन्धः.

SECONDED, *p. p.* अनुगृहीतः -ता -तं, उपगृहीतः &c., उपकृतः -ता -तं.

SECONDER, *s.* अनुग्राही *m.* (न्), उपकारी *m.*, पक्षपाती *m.*, पक्षोद्ग्राही *m.*

SECOND-HAND, *a.* (Not new, used by another) अन्योपभुक्तः -क्ता -क्तं, अन्यभुक्तः &c., अन्योपयोजितः -ता -तं, अन्यव्यवहारितः &c., अन्यपूर्वः -र्वा -र्वं, उच्छिष्टः -ष्टा -ष्टं.—(Not original) अन्यकल्पितः -ता -तं, अन्यसिद्धः -द्धा -द्धं, अन्यकृतः -ता -तं, अन्योक्तः -क्ता -क्तं.

SECONDLY, *adv.* द्वितीयतस्, द्वितीयं, द्वितीयपदे, द्वितीयवारे.

SECOND-RATE, *a.* मध्यमः -मा -मं, मध्यमगुणकः &c., *see* SECONDARY.

SECOND-SIGHT, *s.* दिव्यदृष्टिः *f.*, दिव्यचक्षुस् *n.*, अतिमानुषदृष्टिः *f.*

SECOND-SIGHTED, *a.* दिव्यदृष्टिः -ष्टिः -ष्टि, दिव्यचक्षुः -क्षुः -क्षुः (स्).

SECRECY, *s.* (Concealment, state of being hid or unknown) गुप्तता -त्वं, गुह्यता -त्वं, गुप्तिः *f.*, गोपनं, गोप्यता, गोपनीयता, गूढता, प्रच्छन्नता, रहस्यता -त्वं, संवृतिः *f.*, संवृतता -त्वं, अन्याज्ञातता -त्वं, गुप्तभावः.—(Keeping a secret, forbearance of disclosure) रहस्यगुप्तिः *f.*, रहस्यगोपनं, गुह्यगोपनं, गुप्तरक्षणं *f.*, गुप्तिः *f.*, संवृतिः *f.*, संवृत्तिः *f.*, रहस्यपालनं, रहस्याभेदः, रहस्याविक्षेपः, रहस्याकथनं, रहस्याभाषणं, निह्नवः, निह्नुतिः *f.*, अभाषणं, मौनं, अनुद्घाटनं; 'profound secrecy,' सुगुप्तिः *f.*, सुसंवृतिः *f.*, घनसंवृतिः *f.*, घनसंवृत्तिः *f.*—(Privacy) विविक्तता -त्वं, विविक्तभावः, एकान्तता, रहस् *n.*, रहोभावः रहोवासः, निभृतत्वं, *see* SECLUSION.

SECRET, *a.* (Concealed, not known to others) गुप्तः -प्ता -प्तं, गूढः -ढा -ढं, गुह्यः -ह्या -ह्यं, रहस्यः -स्या -स्यं, प्रच्छन्नः -न्ना -न्नं, छन्नः &c., उपच्छन्नः &c., संवृतः -ता -तं, निभृतः -ता -तं, निगूढः &c., अन्तर्हितः -ता -तं, अव्यक्तः -क्ता -क्तं, अप्रकाशः -शा -शं, अन्याज्ञातः -ता -तं, अन्याविदितः &c.; 'very secret,' सुगुप्तः -प्ता -प्तं, सुरहस्यः &c., सुरक्षितः &c.; 'secret sin,' गूढपातकं, प्रच्छन्नपातकं; 'secret intelligence,' गूढवार्त्ता, गूढभाषितं; 'secret door,' गूढद्वारं, अन्तर्द्वारं; 'secret purpose,' गूढार्थः, संवृत्तिः *f.*; 'secret emissary,' गूढचारः, गूढपुरुषः, गुप्तगतिः *m.*—(To be kept secret) गोप्यः -प्या -प्यं, गोपनीयः -या -यं, गुह्यः -ह्या -ह्यं, गोप्यः &c., संवरणीयः &c.—(Keeping a secret) गुह्याभेदी -दिनी &c., गुह्याभेदकः -का -कं, गुह्याभाषी &c., गुह्याकथकः &c., रहस्याभेदी, रहस्याकथकः &c., रहस्यानिवेदी &c.—(Sequestered, retired) विविक्तः -क्ता -क्तं, निभृतः -ता -तं, विजनः -ना -नं, छन्दः -न्दा -न्दं, *see* PRIVATE, RETIRED.—(Occult) गूढः -ढा -ढं, निगूढः &c., अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं; 'secret in operation,' निगूढकार्य्यः -र्य्या -र्य्यं, गूढकार्य्यः &c., अव्यक्तकार्य्यः &c.

SECRET, *s.* (Something concealed or to be kept secret) रहस्यं, गुह्यं, गोप्यं, गोपनीयं, गूढभाषितं, गुह्यभाषितं, गुप्तभाषितं, गुह्यार्थः, गोपनीयार्थः, गुह्यविषयः, गोपनीयविषयः, मर्म्म *n.* (न्), अपदक्षीणः, तृतीयागोचरं, निह्नवः; 'secret counsel,' मन्त्रः, गूढमन्त्रः; 'a well kept secret,' सुगुप्तरहस्यं, सुगुप्तमन्त्रः, सुरक्षितमन्त्रः; 'one who can keep a secret,' रहस्यपालकः, रहस्यरक्षकः, रहस्यगोपनचतुरः, गोपनीयार्थरक्षणचतुरः; 'keeping a secret,' रहस्यगोपनं &c., *see* SECRECY; 'divulging a secret,' रहस्यभेदः, रहस्यविक्षेपः, गुह्यभेदः, रहस्यकथनं, रहस्यप्रकाशनं, मर्म्मभेदः; 'to divulge a secret,' रहस्यं भिद् or प्रकाश् or कथ् or विक्षिप्; 'one who knows secrets,' रहस्यविद्, रहस्यज्ञः, मर्म्मविद्, मर्म्मज्ञः, मार्म्मिकः, मर्म्मवेदी *m.* (न्), मन्त्रज्ञः, मन्त्रविद्, अन्तर्वेदी *m.*; 'diving into the secrets of others,' मर्म्मभेदः, मर्म्मान्वेषणं; 'one who does so,' मर्म्मभेदी *m.* (न्), मर्म्मान्वेषी *m.*—(In secret) रहसि, रहस्, मिथस्, *see* PRIVATELY.

SECRETARY, *s.* लेखकः, लिपिकरः, लिपिकारः -रकः, वर्णिकः, कायस्थः; 'chief secretary,' लेखाधिकारी *m.* (न्).—(Minister), *see* the word.

To SECRETE, *v. a.* (Hide) गुप् (c. 1. गोपायति, गोप्तुं, c. 10. गोपयति -यितुं), गुह् (c. 1. गूहति -हितुं), संवृ (c. 5. -वृणोति -वरितुं, c. 10. -वारयति -यितुं), अपवृ, निह्नु, गोपनं कृ, अपहारं कृ.—(As saliva, bile, &c.) उत्पद् (c. 10. -पादयति -यितुं), जन् in caus., उद्दृष्.

SECRETED, *p. p.* गुप्तः -प्ता -प्तं, संवृतः -ता -तं, अपवारितः &c., उत्पादितः &c.

SECRETION, *s.* (Act of producing) उत्पादनं.—(Matter secreted) मलं, धातुः *m.*, उत्पादितमलं, शरीरमलं, शरीरोत्पादितमलं, शरीररसः; 'of the nose,' नासोत्पादितमलं, नासामलं; 'of the throat,' कफादिमलं, श्लेष्मादिमलं, कफः, श्लेष्मा *m.* (न्); 'of the bowels,' मलं, अन्नमलं, उदरमलं, पुरीषं; 'promoting the animal secretions,' धातुभृत्, धातुवर्धकः -का -कं.

SECRETLY, *adv.* रहसि, रहस्, रहस्यं, गुप्तं, सुगुप्तं, निभृतं -ते, सुनिभृतं -ते, प्रच्छन्नं -न्ने, उपांशु, गूढं, गुप्त or गूढ in comp.; as, 'going secretly,' गुप्तगतिः -तिः -ति, गूढचारी &c., *see* PRIVATELY.

SECRETNESS, *s.* गुप्तता -त्वं, गूढता, प्रच्छन्नता, रहस्यता, *see* SECRECY.

SECRETORY, *a.* उत्पादकः -का -कं, मलोत्पादकः &c., मलजनकः &c.

SECT, *s.* शाखा, मार्गः, भिन्नमार्गः, पन्थाः *m.* (पथिन्), पथः, सम्प्रदायः, मतं, पक्षः, गणः, तीर्थः; 'difference of sect,' शाखाभेदः, मतभेदः, मार्गभेदः; 'mark of a sect,' तिलकः -कं.

SECTARIAN, *a.* शाखासम्बन्धी -न्धिनी -न्धि (न्), शाखी &c., शाखिकः -की -कं.

SECTARIAN, SECTARY, *s.* शाखी *m.* (न्), शाखानुयायी &c., शाखावलम्बी *m.*, शाखाश्रयी *m.*, शाखाश्रितः, शाखासेवी, शाखामार्गानुयायी *m.*, भिन्नमार्गानुयायी *m.*

SECTARIANISM, *s.* शाखासेवनं, शाखानुगमनं, शाखाश्रयणं, भिन्नमार्गगमनं.

SECTION, *s.* (Division) परिच्छेदः, छेदः, विच्छेदः, भेदः -दनं, विभागः. —(Of a book) अध्यायः, अध्ययः, सर्गः, पर्व *n.* (न्), काण्डः -ण्डं, खण्डः -ण्डं, परिच्छेदः, विच्छेदः, स्कन्धः, प्रकरणं, प्रस्तावः, अङ्कः, वर्गः, शाखा, उच्छ्वासः, उल्लासः, आश्वासः, उद्घातः, लम्बकः; 'story divided into sections,' खण्डकथा.—(In geometry) मार्गः.

SECTOR, *s.* विच्छेदकः.—(Of a circle) कर्णद्वयान्तर्गतो वृत्तभागः.

SECULAR, *a.* (Pertaining to this present world, or to things not spiritual) लौकिकः -की -कं, ऐहलौकिकः &c., ऐहिकः -की -कं, इहलोकविषयकः -का -कं, इहलोकसम्बन्धी -न्धिनी &c., प्रापञ्चिकः -की -कं, सांसारिकः &c., संसारविषयकः &c., संसारसम्बन्धी &c., संसारी &c., व्यावहारिकः &c., लोकव्यवहारसम्बन्धी &c., विषयसम्बन्धी &c., प्रपञ्ची &c., इहलोकसापेक्षः -क्षा -क्षं, इहलोकापेक्षकः &c., दृष्टार्थः -र्था -र्थं; 'secular learning,' विज्ञानं, अर्थशास्त्रं.—(Not subject to monastic rules) व्यवहारी &c., व्यवहारिकः &c.

SECULARITY, SECULARNESS, *s.* लौकिकता -त्वं, ऐहिकत्वं -ता, ऐहलौकिकत्वं, ऐहिकबुद्धित्वं, ऐहिकविषयासक्तिः, संसारासक्तिः *f.*, लोकासक्तिः *f.*, इहलोकासक्तिः *f.*, प्रपञ्चासक्तिः *f.*

SECUNDINES, *s.* गर्भवेष्टनं, गर्भकोशः, गर्भकोषः, गर्भाशयः, जरायुः *m.*, गर्भावरणं चर्म *n.* (न्), गर्भावेष्टनचर्म *n.*

SECURE, *a.* (Free from danger) निर्भयः -या -यं, भयातीतः -ता -तं, अतीतभयः -या -यं, वीतभयः &c., गतभयः &c., अकुतोभयः &c., असम्भाव्यभयः &c., असम्भाव्यापकारः -रा -रं, भयसम्भवातीतः &c., अहार्य्यः -र्य्या -र्य्यं, अनाश्यः -श्या -श्यं, निरुपद्रवः -वा -वं, *see* SAFE.—(Free from fear of danger) निर्भयः -या -यं, अभयः &c., भयहीनः -ना -नं, निःशङ्कः -ङ्का -ङ्कं, अशङ्कः &c., विशङ्कः &c., निरातङ्कः &c., निरपेक्षः -क्षा -क्षं; 'rendering secure,' विधायकः -का -कं.

To **SECURE**, *v. a.* (Guard from danger) निर्भयं -यां कृ, निर्भयीकृ, भयं निवृ (c. 10. -वारयति -यितुं) or निरस् or निवृत् in caus., भयनिवारणं कृ, भयनिवृत्तिं कृ, भयनिरासं कृ, भयनिरसनं कृ, रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, सुरक्षितं -तां कृ, रक्षणं कृ.—(Make certain or sure) स्थिरीकृ, दृढीकृ, सत्याकृ, सनिश्चयं -यां कृ, सुनिश्चितं -तां कृ, अहार्य्यत्वं जन्, अनाश्यत्वं जन्.—(Make fast or firm) दृढं बन्ध् (c. 9. बध्नाति, बन्द्धुं), दृढीकृ, संस्तम्भ्; 'with a bar,' अर्गलेन बन्ध्.

SECURED, *p. p.* (Guarded from danger) रक्षितः -ता -तं, सुरक्षितः &c., निवृत्तभयः -या -यं, निवारितभयः &c.—(Made sure) स्थिरीकृतः -ता -तं, दृढीकृतः &c.—(Made fast) दृढबद्धः -द्धा -द्धं, सुबद्धः -द्धा -द्धं, अर्गलबद्धः &c., संस्तब्धः -ब्धा -ब्धं.

SECURELY, *adv.* निर्भयं, भयं विना, अभयेन, सक्षेमं, *see* SAFELY.

SECURITY, *s.* (Protection) रक्षा, रक्षणं, संरक्षणं, अभिरक्षणं, गुप्तिः *f.* गोपनं, त्राणं, परित्राणं, भयनिवारणं, भयनिरासः, भयनिरसनं.—(That which protects) रक्षणं, रक्षकः, त्राणं, आश्रयः, शरणं.—(Freedom from fear or danger) [illegible]यं, निर्भयता -त्वं, भयाभावः, भयहीनता, निःशङ्कता, शङ्काभा[illegible] अहार्य्यता -त्वं, अनाश्यता -त्वं, निर्विघ्नता, निरुपद्रवत्वं, [illegible] *f.*, *see* SAFETY.—(Assurance of safety) अभयवाक् *f.* (च्), *see* SAFETY.—(Securing, rendering firm) दृढीकरणं, स्थिरीकरणं, संस्तम्भनं, [illegible]मकरणं, विधायकत्वं.—(Certainty) निश्चयः, निःसंशयत्वं, संशयाभावः, सन्देहाभावः.—(Any thing given or deposited as a security) लग्नकः, बन्धकः, प्रातिभाव्यं, पारिभाव्यं, आधिः *m.*, न्यासः, निक्षेपः, *see* PLEDGE; 'for the payment of a debt,' दानप्रातिभाव्यं, ऋणमार्गणः; 'for appearance,' दर्शनप्रातिभाव्यं, दर्शनपारिभाव्यं, दर्शनप्रतिभूः *m.*—(A person who stands security) प्रतिभूः *m.*, प्रतिनिधिः *m.*

SEDAN, *s.* स्कन्धवाह्यपीठः, स्कन्धवहनयोग्यो पीठः, शिबिका.

SEDATE, *a.* धीरः -रा -रं, गम्भीरः -रा -रं, गम्भीरवृत्तिः -त्तिः -त्ति, गभीरवृत्तिः &c., गुरुवृत्तिः &c., गौरववृत्तिः &c., शान्तः -न्ता -न्तं, अन्तर्वेगहीनः -ना -नं, निरुद्विग्नः -ग्ना -ग्नं, निराकुलः -ला -लं, अव्याकुलः &c., अचञ्चलः -ला -लं.

SEDATELY, *adv.* गम्भीरं, सगाम्भीर्य्यं, धीरवत्, सधैर्य्यं, अव्याकुलं, निराकुलं, सगौरवं, गौरवेण, अचञ्चलं.

SEDATENESS, *s.* धीरता, गम्भीरता -त्वं, गाम्भीर्य्यं, गम्भीरवृत्तित्वं, गभीरता, गभीरवृत्तित्वं, धैर्य्यं, गौरवं, शान्तता, निराकुलता, अव्याकुलता, स्थिरता, स्थैर्य्यं, अचञ्चलता, अचाञ्चल्यं.

SEDATIVE, *a.* शान्तिकः -की -कं, शान्तिदः -दा -दं, शान्तिकरः -रा -रं, शान्तिकर्त्ता -र्त्री -र्तृ (र्तृ), शमकः -का -कं, उपशमकः -का -कं, उपशायी -यिनी -यि (न्).

SEDATIVE, *s.* (Medicine) शमनं, उपशमनं, ग्राही *m.* (न्).

SEDENTARINESS, *s.* अनुद्योगशीलता, अव्यायामशीलता, गतिहीनता, चलनाभावः.

SEDENTARY, *a.* अनुद्योगशीलः -ला -लं, अव्यायामशीलः &c., अव्यायामी -मिनी -मि (न्), निरुद्योगी &c., गतिहीनः -ना -नं, गतिरहितः -ता -तं, चलनरहितः &c.

SEDIMENT, *s.* मलं, किट्टं, उच्छिष्टं, कल्कं, खलं, शेषं, विनीयः, *see* DREGS; 'having sediment,' मली -लिनी -लि (न्), कल्की &c.

SEDITION, *s.* प्रकृतिकलहः, प्रजाकलहः, कलहः, भेदः, प्रकृतिक्षोभः, प्रजाक्षोभः, राजयुद्धं, राजद्रोहः, राज्यभेदः; 'fomenting sedition,' उपजापः; 'one who does so,' उपजापकः; 'to do so,' उपजप् (c. 1. -जपति -पितुं).

SEDITIOUS, *a.* कलहकारी -रिणी -रि (न्), प्रजाक्षोभकरः -री -रं, प्रकृतिक्षोभकरः &c., राज्यभेदकरः &c., भेदकरः &c., राजद्रोही &c., राजविरुद्धकारी &c., उपजापकः -का -कं.

SEDITIOUSLY, *adv.* उपजापेन, सोपजापं, यथा प्रजाकलहो जायते तथा.

To **SEDUCE**, *v. a.* (Entice from the path of rectitude) प्रलुभ् (c. 10. -लोभयति -यितुं), विलुभ्, परिलुभ्, लुभ्, सत्पथाद् or सन्मार्गाद् भ्रंश् (c. 10. भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or आकृष् (c. 1. -कर्षति -क्रष्टुं), मुह् (c. 10. मोहयति -यितुं), विमुह्, प्रलभ् (c. 1. -लभते -लब्धुं), लल् (c. 10. लालयति -यितुं), दुष्कर्म्मणि प्रवृत् in caus., विकृप् (c. 10. -कल्पयति -यितुं), सन्मार्गभ्रष्टं -ष्टां कृ, सन्मार्गच्युतं -तां कृ.—(A woman) छलेन कन्यां दुष् (c. 10. दूषयति -यितुं), सतीत्वाद् भ्रंश् in caus., सतीत्वनाशं कृ, छलेन कन्याम् अभिगम्.

Seduced, *p.p.* (Enticed) प्रलोभितः -ता -तं, विलोभितः &c., सन्मार्गभ्रंशितः &c., सन्मार्गभ्रष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं, मोहितः -ता -तं, विमोहितः &c., लालितः &c., प्रोत्साहितः -ता -तं, प्रवर्त्तितः &c.—(As a woman) सतीत्वभ्रंशिता, सतीत्वभ्रष्टा, भ्रष्टा, छलेन महसतीत्वा.

Seducer, *s.* प्रलोभकः, विलोभकः, ...कः, मोहकः, विमोहकः, विमोही *m.* (न्), लाली *m.*, लालनकारी *m.* ...तारकः.—(Of a woman) छलेन कन्यादूषकः or कन्याभिगन्ता *m.* (न्), ...छलेन सतीत्वनाशकः.

Seducible, *a.* प्रलोभनीयः -या -यं, आकर्षणीयः &c., प्रतारणीयः &c., विलोभनीयः &c., हार्य्यः -र्य्या -र्य्यं, भेद्यः -द्या -द्यं.

Seduction, *s.* प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः *f.*, सन्मार्गभ्रंशनं, सन्मार्गात्प्रभ्रंशनं, मोहनं, विमोहनं, लालनं, लोभदर्शनं, प्रतारणं, वञ्चनं, प्रलम्भः.—(Of a woman) कन्याहरणं, कन्यकाहरणं, छलेन कन्यादूषणं or कन्याभिगमनं or स्त्रीसंग्रहणं, कपटपूर्व्वः सतीत्वनाशः.

Seductive, *a.* प्रलोभकः -का -कं, विलोभकः &c., आकर्षकः &c., आकर्षी -र्षिणी -र्षि (न्), मोही &c., विमोहनः -ना -नी -नं, लाली &c., भ्रान्तिजनकः &c.

Sedulity, sedulousness, *s.* आसक्तिः *f.*, प्रसक्तिः *f.*, व्यासङ्गः, उद्योगासक्तिः *f.*, व्यवसायः, उद्योगशीलता. *See* Diligence, Industry.

Sedulous, *a.* उद्योगासक्तः -क्ता -क्तं, कर्म्मासक्तः &c., उद्यमासक्तः &c., उद्योगशीलः -ला -लं, व्यासङ्गी -ङ्गिनी &c., आसक्तः &c., तत्परः &c. *See* Industrious.

Sedulously, *adv.* आसक्तिपूर्व्वं, यत्नतस्, साभिनिवेशं. *See* Industriously.

See, *s.* धर्म्माध्यक्षाधिकारः, धर्म्माध्यक्षाधीनमण्डलं, धर्म्माध्यक्षाधीनदेशः, धर्म्माध्यक्षाधीनः प्रदेशः, धर्म्माध्यक्षाधिपत्यं.

To see, *v. a.* or *n.* (Perceive by the eye) दृश् (c. 1. पश्यति, द्रष्टुं), अभिदृश्, प्रतिदृश्, परिदृश्, अनुदृश्, प्रदृश्, सन्दृश्, विदृश्, ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, वीक्ष्, प्रेक्ष्, निरीक्ष्, अभिवीक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, अवेक्ष्, प्रत्यवेक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक्, अवलोक्, विलोक्, लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, उपलक्ष्, समुपलक्ष्, संलक्ष्, आलोच् (c. 10. -लोचयति -यितुं, c. 1. -लोचते -चितुं), निवर्ण् (c. 10. -वर्णयति -यितुं), सभाज् (c. 10. सभाजयति -यितुं), दृष्टिं कृ, दर्शनं कृ, अवलोकनं कृ, विलोकनं कृ.—(Perceive, understand) ज्ञा (c. 9. जानाति -नीते, ज्ञातुं), परिज्ञा, अवगम् (c. 1. -गच्छति -गन्तुं), अवे (c. 2. अवैति -तुं, rt. इ), बुध्, अवबुध्, उपलभ्, निशम्.—(Experience) अनुभू, भुज्, दृश्.—(Beware) सावधानः -ना -नं भू, अवहितः -ता -तं भू, अवधा.—(See into, examine) निरूप् (c. 10. -रूपयति -यितुं), निरीक्ष्, *see To* examine, inquire.—(See after) पाल्, रक्ष्, अवेक्ष्; 'see! see!' पश्य, पश्यत.

Seed, *s.* (Of plants, &c.) वीजं -जकं, रोहिः *m.*, इहः *m.*; 'good seed,' सुवीजं, वीजोत्कृष्टं; 'sowing seed,' वीजारोपः -पणं, वपः -पनं, वापः, उप्तिः *f.*; 'to sow seed,' वीजारोपणं कृ, वीजानि आरुह् in caus.; 'full of seed,' वीजपूर्णः -र्णा -र्णं; 'having it,' वीजवान् -वती &c., वीजी -जिनी &c.; 'growing from it,' वीजप्ररोहः -हा -हं, वीजप्ररोही -हिणी &c., वीजरुहः -हा -हं, वीज्यः -ज्या -ज्यं; 'sown with seed,' वीजितः -ता -तं; 'yielding seed,' वीजप्रदः -दा -दं, वीजसूः -सूः -सु; 'from seed,' वीजतस्.—(Of stone fruits) अष्टिः *f.*, अष्टीला -ष्ठिका.—(Of animals, seminal fluid) शुक्रं, रेतस् *n.*, धातुः *m.*, तेजस् *n.*, वीर्य्यं, वीर्य्यं, इन्द्रियं, धातुरात्मकः, आनन्दप्रभवः.—(Origin, source) वीजं, योनिः *m.*, मूलं, आदिः *m.* प्रभवः, उद्भवः.—(Offspring) सन्तानं, अपत्यं, प्रजा, कुलं, वंशः, वीजं.

To seed, *v. n.* (Produce seed) वीजं दा or प्रदा or उत्पद्, वीज (nom. वीजायते).

To seed, *v. a.* (Sow seed) वीजारोपं कृ, वीज (nom. वीजयति -यितुं).

Seeded, *p. p.* वीजितः -ता -तं, वीजवान् -वती -वत् (त्), वीजी -जिनी -जि (न्).

Seedless, *a.* निर्वीजः -जा -जं, वीजहीनः -ना -नं, वीजरहितः -ता -तं.

Seedling, *s.* वीजप्ररोहः, वीजप्ररोही *m.* (न्), वीजरुहः, वीजरोही *m.*

Seedsman, *s.* वीजविक्रयी *m.* (न्), वीजविक्रेता *m.* (तृ), वीजव्यापारी *m.*

Seed-time, *s.* वीजकालः, वीजारोपणकालः, उप्तिकालः, वापकालः.

Seed-vessel, *s.* वीजकोशः, वीजकोषः -षी, वीजगुप्तिः *f.*; 'of the lotus,' वीजमातृकः, कर्णिका, कर्णिकारः.

Seedy, *a.* वीजी -जिनी -जि (न्), वीजिकः -का -कं, वीजवान् -वती -वत् (त्), वीजपूर्णः -र्णा -र्णं, सवीजः -जा -जं, बहुवीजः -जा -जं, वीजमयः -यी -यं.

Seeing, seeing that, *s.* यस्मात्, येन, यत्. *See* Since.

Seeing, *part.* पश्यन् -श्यन्ती -श्यत् (त्), ईक्षमाणः -णा -णं, प्रेक्षमाणः &c.

Seeing, *s.* दृष्टिः *f.*, दर्शनं, ईक्षणं, प्रेक्षणं, सन्दर्शनं. *See* Sight.

To seek, *v. a.* (Look for, search for, inquire for) अन्विष् (c. 4. -इष्यति, c. 6. -इच्छति -एषितुं -एष्टुं), अन्वेष् (c. 1. -एषते -षितुं), मृग् (c. 10. मृगयते -ति -यितुं), मार्ग् (c. 1. मार्गति, c. 10. मार्गयति -यितुं), परिमार्ग्, निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), ज्ञा in des. (जिज्ञासते -सितुं), विचि (c. 5. -चिनोति -चेतुं), गवेष् (c. 10. गवेषयति -यितुं), अनुयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), इष् (c. 6. इच्छति, एषितुं), आकाङ्क्ष् (c. 1. -काङ्क्षति -क्षितुं), भज् (c. 1. भजते, भक्तुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), चर्च् (c. 1. चर्चति -र्चितुं), अन्वेषणं कृ, जिज्ञासां कृ, अनुयोगं कृ, इतस्ततो गम् or इतस्ततः परिक्रम्य अन्वेषणं कृ.—(Solicit, beg for) प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अर्थ्, अभ्यर्थ्, सम्प्रार्थ्, याच् (c. 1. याचति -चितुं), अभियाच्, प्रयाच्, सम्प्रयाच्, भिक्ष् (c. 1. भिक्षते -क्षितुं).

To seek, *v. n.* (Make search) अन्वेषणं कृ, जिज्ञासां कृ, अनुसन्धानं कृ.

Seeker, *s.* अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), अन्वेषणकृत् *m.*, जिज्ञासाकृत्, अनुसन्धाता *m.* (तृ), अनुवर्त्ती *m.*, प्रार्थकः, अर्थी *m.*

Seeking, *s.* अन्वेषणं -णा, जिज्ञासा, मार्गः -र्गणं. *See* Search.

Seeking, *part.* अन्विष्यन् -ष्यन्ती -ष्यत् (त्), अन्वेषी -षिणी -षि (न्), अन्वेषमाणः -णा -णं, इच्छन् &c.

To seem, *v. n.* दृश् in pass. (दृश्यते), लक्ष् in pass. (लक्ष्यते), प्रतिभा (c. 2. -भाति -तुं), सम्प्रभा, निर्भा, आभा, आभास् (c. 1. -भासते -सितुं); 'you seem astonished,' विस्मित इव प्रतिभासि.

Seeming, *s.* आभासः, आभा, छाया, वाह्यरूपं, आकारः, आकृतिः *f.*

Seemingly, *adv.* आभासेन, आकारेण, प्रत्यक्षतस्, प्रत्यक्षेण, वाह्यतस्.

Seemliness, *s.* (Comeliness) सुदृश्यता, सुरूपता.—(Propriety) योग्यता -त्वं, युक्तता, उपयुक्तता, औचित्यं. *See* Fitness.

Seemly, *a.* युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उपयुक्तः &c., उचितः -ता -तं, यथोचितः &c., उपपन्नः -न्ना -न्नं, समञ्जसः -सा -सं, सुरूपः -पा -पं.

Seen, *p.p.* दृष्टः -ष्टा -ष्टं, ईक्षितः -ता -तं, प्रेक्षितः &c., आलोकितः &c., अवलोकितः &c., आलोचितः &c., लोकितः &c., आलक्षितः -ता -तं, लक्षितः &c.; 'seen and unseen,' दृष्टादृष्टः -ष्टा -ष्टं; 'not seen or heard before,' अदृष्टाश्रुतपूर्व्वः -र्व्वा -र्व्वं; 'is seen,' दृश्यते, लक्ष्यते; 'to be seen, visible,' दृश्यः -श्या -श्यं, दर्शनीयः -या -यं, प्रेक्षणीयः &c., प्रेक्ष्यः &c., वीक्ष्यः &c., लक्ष्यः &c.; 'having seen,' दृष्ट्वा, प्रेक्ष्य, वीक्ष्य.

Seer, *s.* (One who sees) द्रष्टा *m.* (ृ), दर्शी *m.* (न्), चक्षुष्मान् *m.* (त्); 'far-seer,' दूरदर्शी *m.*—(Prophet) भाविदर्शी *m.*, भाविदर्शकः, भविष्यद्दर्शी *m.*, सिद्धः, सिद्धपुरुषः, सांमेधिकः, *see* Sage.

See-saw, *s.* उत्तानतं, निम्नोन्नतं, उच्चावचं, पातोत्पातं, आन्दोलनं, इतस्ततो विचलनं or चलनं, गतागतं, प्रतिगतागतं.

To **seethe,** *v. a.* क्वथ् (c. 1. क्वथति -थितुं), कुम्भीपाके or स्थाल्यां पच्.

Seethed, *p. p.* क्वथितः -ता -तं, स्थालीपक्वः -क्वा -क्वं, कुम्भीपक्वः &c.

Seether, *s.* कुम्भीरं, कुम्भीरं, पिष्टपचनं, स्थाली, पिठरः -रं, उखा.

Segment, *s.* छेदः, परिच्छेदः, विच्छेदः, खण्डः.—(Of a circle) वृत्तखण्डः -ण्डं, वर्तुलखण्डः, खण्डमण्डलं, धनुर्खं.

Segregarious, *a.* एकचरः -रा -रं, एकचारी -रिणी -रि (न्), विविक्तचारी &c.

To **segregate,** *v. a.* वियुज्, विश्लिष् in caus. *See To* separate, *v.a.*

Segregation, *s.* वियोगः, विश्लेषः, पृथक्करणं. *See* Separation.

Seignior, *s.* स्वामी *m.* (न्), प्रभुः *m.*, पतिः *m.* *See* Lord.

Seizable, *a.* हार्यः -र्या -र्यं, हरणीयः -या -यं, अपहार्यः &c., ग्राह्यः -ह्या -ह्यं, ग्रहणीयः &c., धार्यः &c., धरणीयः &c.

To **seize,** *v. a.* (Take by force) हृ (c. 1. हरति, हर्तुं), अपहृ, बलेन हृ, बलात्कारेण ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or अभिग्रह् or परिग्रह् or प्रतिग्रह् or धृ (c. 1. धरति, धर्तुं) or कल् (c. 10. कालयति-यितुं), प्रकल्, हरणं कृ.—(Grasp, clutch) ग्रह्, संग्रह्, परिग्रह्, उपसंग्रह्, धृ, ग्रस् (c. 1. ग्रसते -सितुं), परामृश् (c. 6. -मृशति -म्रष्टुं), संहृ, आकल् (-कलयति -यितुं), संग्राहं कृ.—(Attack suddenly, take hold of, as a fever, &c.) आक्रम् (c. 1. -क्रामति -क्रमितुं), आविश् (c. 6. -विशति -वेष्टुं), आक्रमणं कृ, ग्रस्, ग्रस्तः -स्ता -स्तं भू.—(Try to seize) ग्रह् in des. (जिघृक्षति -ते -क्षितुं), हृ in des. (जिहीर्षति -र्षितुं).

Seized, *p. p.* (Taken by force) हृतः -ता -तं, अपहृतः &c., बलेन हृतः &c., बलात्कारेण हृतः &c. or प्रहृतः &c. or गृहीतः -ता -तं or धृतः &c. or प्राप्तः -प्ता -प्तं, सम्प्राप्तः &c.—(Grasped, clutched) गृहीतः -ता -तं, संगृहीतः &c., धृतः &c., ग्रस्तः -स्ता -स्तं, आकलितः &c.—(Attacked suddenly) आक्रान्तः -न्ता -न्तं, आविष्टः -ष्टा -ष्टं, ग्रस्तः &c.; 'by fever,' ज्वरग्रस्तः &c.

Seizer, *s.* हर्त्ता *m.* (र्तृ), हारी *m.* (न्), हारकः, हरः, धर्त्ता *m.*, ग्राही *m.*, ग्राहकः, ग्रहीता *m.* (तृ), अपहर्त्ता *m.*

Seizure, *s.* (Taking by force) हरणं, अपहरणं, हारः, अपहारः, बलात्कारेण हरणं or ग्रहणं or ग्रहः or अभिग्रहः -हणं or प्रतिग्रहः -हणं or धरणं.—(Laying hold) ग्रहणं, ग्रहः, संग्राहः, संग्रहणं, परिग्रहणं, धरणं, धृतिः *f.*, ग्रसनं, आकलनं.—(Sudden attack, as of a disease) आक्रमणं, आवेशः, अवतारः, अवतरणं, लंघनं; 'first seizure,' पूर्वावतारः.

Seldom, *adv.* विरलं, वैरल्येन, क्वचित्, कदाचित्, कर्हिचित्, दुर् in comp.; 'seldom to be found,' दुर्लभः -भा -भं, दुष्प्रापः &c.; 'seldom to be seen,' दुर्दर्शयः -श्या -श्यं, दुर्लक्ष्यः -क्ष्या -क्ष्यं.

To **select,** *v. a.* उद्धृ (c. 1. उद्धरति, उद्धर्त्तुं, rt. हृ), उद्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), वृ (c. 5. वृणोति -णुते, c. 10. वरयति -यितुं, c. 1. वरति -रितुं -रीतुं), आवृ, प्रवृ, वावृत् (c. 4. वावृत्यते), वृत्, परिगण् (c. 10. -गणयति -यितुं), परिगणनं कृ, उद्धरणं कृ, उद्धारं कृ. *See To* choose.

Select, *a.* उत्कृष्टः -ष्टा -ष्टं, उत्तमः -मा -मं, विशिष्टः &c., *see* Choice.

Selected, *p. p.* उद्धृतः -ता -तं, वृतः -ता -तं, वृत्तः -त्ता -त्तं, वावृत्तः &c., परिगणितः -ता -तं, गृहीतः &c., उद्गृहीतः &c., अनोनीतः &c.

Selection, *s.* (Act of choosing) उद्धरणं, उद्धारः, उद्ग्रहणं, ग्रहणं, वरणं, वृतिः *f.*, वरः.—(Thing selected) उद्धृतं.—(Number of things selected) संग्रहः, संहिता, सारः; 'selection of parallel passages,' वृत्तिः *m.*

Self, *a.* or *pron.* (As united to a pronoun, &c. reciprocally, or in composition with adverb or noun) आत्मा *m.* (न्), आत्म in comp.; 'I will kill myself,' आत्मानं हनिष्यामि; 'blame thyself,' आत्मानं निन्द; 'he shows himself,' आत्मानं दर्शयति; 'for one's self,' आत्मार्थं; 'like one's self,' आत्मवत्; 'comparison with one's self,' आत्मौपम्यं.—(As united to a pronoun, &c. emphatically) स्वयं, स्वतस्; 'I myself will decide,' स्वयं निष्पत्तिं करिष्यामि. The pronoun सः is sometimes joined with the personal pronouns emphatically; as, 'I myself,' सो ऽहं.—(As the first member of a compound word) आत्म or स्व or स्वयं or स्वतः prefixed; 'self done,' आत्मकृतः -ता -तं, स्वयंकृतः &c.; 'self-given,' स्वयन्दत्तः -त्ता -त्तं, आत्मदत्तः &c.; 'self-sufficient,' स्वस्थः -स्था -स्थं; 'self-actuating,' स्वयंवहः -हा -हं.—(Of one's self, of one's own accord) स्वयं, स्वतस्; 'decayed of itself,' स्वयंशीर्णः -र्णा -र्णं.

Self-abasement, *s.* आत्मापकर्षः, अहङ्कारत्यागः, स्वाभिमानत्यागः.

Self-abhorrence, *s.* आत्मद्वेषः, आत्मगर्हा -र्हणं, आत्मबीभत्सः.

Self-abuse, *s.* आत्मनिन्दा, आत्मगर्हा, आत्माक्रोशः, आत्मकुत्सा.

Self-accomplished, *a.* आत्मसिद्धः -द्धा -द्धं, स्वतःसिद्धः &c., स्वयंसिद्धः &c.

Self-acquired, *a.* आत्मोपार्जितः -ता -तं, स्वोपार्जितः &c., आत्मार्जितः &c.

Self-advantage, *s.* आत्महितं, स्वहितं, आत्मोदयः, आत्मलाभः, स्वलाभः, आत्मसिद्धिः *f.*, आत्मवृद्धिः *f.*, आत्मविवृद्धिः, स्वार्थः.

Self-affairs, *s. pl.* आत्मकार्य्यं, स्वकार्य्यं, आत्मकर्म्म *n.* (न्), स्वकर्म्म *n.*

Self-aggrandizement, *s.* आत्मविवृद्धिः *f.*, आत्मवृद्धिः *f.*, स्ववृद्धिः *f.*, स्वमहत्त्ववृद्धिः *f.*, आत्मपदवृद्धिः *f.*, स्वपदवृद्धिः *f.*, आत्मोदयः.

Self-applause, *s.* आत्मप्रशंसा, आत्मश्लाघा, आत्मस्तुतिः *f.*

Self-beguiled, *a.* आत्मवञ्चितः -ता -तं, आत्ममोहितः &c., स्वमोहितः &c.

Self-born, self-begotten, *a.* आत्मभूतः -ता -तं, स्वजः -जा -जं, आत्मजः &c., आत्मजातः -ता -तं, स्वजातः &c., आत्मजनितः &c., आत्मोत्पन्नः &c., स्वोत्पन्नः &c.

Self-command, *s.* आत्मसंयमः, आत्मयमनं, अन्तर्यमनं, प्रतिसन्धानं, दान्तिः *f.*, दमः, दमथः. *See* Self-control.

Self-conceit, *s.* अहङ्कारः, अहम्मतिः *f.*, अहम्मानं, आत्माभिमानं, स्वाभिमानं, ममता, अहमहमिका, अभिमानं, अन्तर्हासः.

Self-conceited, *a.* अहङ्कारी -रिणी -रि (न्), अहम्मानी -निनी &c., आत्माभिमानी &c., स्वाभिमानी &c., साहङ्कारः -रा -रं, साभिमानः -ना -नं, स्वाभिमानः &c., अभिमानी &c., ममतायुक्तः -क्ता -क्तं. *See* Conceited.

Self-confidence, *s.* आत्मनिष्ठा, आत्मविश्वासः, स्वमतनिष्ठा, स्वबुद्धिनिष्ठा.

Self-confident, *a.* आत्मनिष्ठः -ष्ठा -ष्ठं, स्वमतनिष्ठः &c., स्वबुद्धिनिष्ठः &c.

Self-control, *s.* आत्मसंयमः, आत्मनिग्रहः, आत्मनियमः, आत्मयमनं, आत्मवशः, अन्तर्यमः -मनं, अन्तःसंयमः, संयमः.

Self-convicted, *a.* स्वनिर्णीतापराधः -धा -धं, स्वनिश्चितदोषः -षा -षं.

Self-created, *a.* स्वयङ्कृतः -ता -तं, आत्मकृतः &c., स्वजनितः -ता -तं.

Self-deceit, self-deception, *s.* आत्मवञ्चना, आत्मछलं, आत्मप्रतारणा.

Self-deceived, *a.* आत्मवञ्चितः -ता -तं, स्ववञ्चितः &c., स्वप्रतारितः -ता -तं.

Self-deceiving, *a.* आत्मवञ्चकः -का -कं, आत्मप्रतारकः &c., स्वप्रतारकः &c.

Self-dedication, *s.* आत्मनिवेदनं, आत्मसमर्पणं, स्वदेहविनियोगः.

SELF-DEFENCE, *s.* आत्मरक्षणं, आत्मरक्षा, आत्मत्राणं, स्वरक्षणं, स्वत्राणं, आत्मपरित्राणं, परित्राणं; 'in self-defence,' आत्मरक्षार्थं.

SELF-DELUSION, *s.* आत्मवञ्चनं -ना, आत्ममोहः -हनं, आत्मप्रतारणा.

SELF-DENIAL, *s.* आत्मपरित्यागः, आत्मसंयमः, आत्मनिरोधः, संयमः.

SELF-DENYING, *a.* आत्मपरित्यागी -गिनी -गि (न्), आत्मनियामकः -का -कं, आत्मसंयमी &c., आत्मनिरोधी &c., आत्मत्यागी &c.

SELF-DEPENDENCE, *s.* आत्मनिष्ठा, आत्माश्रयः, स्वतन्त्रता, स्वातन्त्र्यं, आत्मतन्त्रता, आत्मसंश्रयः, आत्माधीनता, आत्माधारः.

SELF-DEPENDENT, *a.* आत्मनिष्ठः -ष्ठा -ष्ठं, आत्माश्रयी -यिणी -यि (न्), आत्माश्रयः -या -यं, आत्माश्रितः -ता -तं, आत्मसंश्रितः &c., स्वतन्त्रः -न्त्रा -न्त्रं, आत्मतन्त्रः &c.

SELF-DESTRUCTION, *s.* आत्मनाशः, आत्मघातः, आत्महननं, आत्महत्या, आत्मव्यापादनं, स्वनाशः, स्वघातः.

SELF-DEVISED, *a.* आत्मकल्पितः -ता -तं, आत्मघटितः &c., स्वयोजितः -ता -तं.

SELF-DEVOTION, *s.* आत्मसमर्पणं, आत्मार्पणं, स्वदेहविनियोगः.

SELF-DISPARAGEMENT, *s.* निर्वेदः, निर्विण्णता, आत्मावमानं, आत्मावज्ञा -ज्ञानं.

SELF-EDUCATED, *a.* आत्मशिक्षितः -ता -तं, स्वशिक्षितः &c., आत्माध्यापितः &c.

SELF-ENJOYMENT, *s.* आत्मसुखं, आत्मसौख्यं, आत्मसन्तोषः, स्वमनःसुखं.

SELF-ESTEEM, *s.* अहम्मानं, अहम्मतिः *f.*, आत्ममानं, आत्मसम्मानं, अहङ्कारः.

SELF-EVIDENT, *a.* स्वतःप्रमाणः -णा -णं, स्वतःस्पष्टः -ष्टा -ष्टं, स्वतःसिद्धः -द्धा -द्धं, स्वतःप्रकाशः -शा -शं, स्वतःप्रत्यक्षः -क्षा -क्षं, प्रत्यक्षः &c.

SELF-EXAMINATION, *s.* आत्मपरीक्षा -क्षणं, आत्मविचारः -रणं -णा, आत्मपृच्छा -च्छनं, आत्मजिज्ञासा, आत्मविभावनं.

SELF-EXISTENCE, *s.* स्वयम्भवः, स्वयम्भावः, स्वयंवृत्तिः *f.*, स्वत्वं.

SELF-EXISTENT, *a.* स्वयम्भूः -म्भूः -म्भु, आत्मभूः -भूः -भु, आत्महेतुः -तुः -तु, आत्ममूलः -ला -लं, स्वतःसिद्धः -द्धा -द्धं, अकृत्रिमः -मा -मं.

SELF-GAINED, SELF-GOTTEN, *a.* आत्मोपार्जितः -ता -तं, स्वोपार्जितः &c., आत्मार्जितः &c., स्वहस्तार्जितः &c., स्वभुजोपार्जितः &c., स्वसम्पादितः &c.

SELF-GOVERNMENT, *s.* आत्मशासनं, आत्मशास्तिः *f.*, स्वशासनं, आत्मनियमनं.

SELF-IGNORANCE, *s.* आत्माज्ञानं, आत्माबोधः, आत्माज्ञता, स्वाज्ञानं.

SELF-IMMOLATION, *s.* आत्मघातः, आत्महननं, आत्मोत्सर्गः; 'of a widow after her husband,' अनुगमनं, अग्निप्रवेशः.

SELF-INTEREST, *s.* आत्महितं, स्वहितं, स्वार्थः, *see* SELF-ADVANTAGE.

SELF-INTERESTED, *a.* स्वार्थबुद्धिः -द्धिः -द्धि, स्वार्थी -र्थिनी -र्थि (न्), स्वार्थार्थी &c., स्वार्थनिष्ठः -ष्ठा -ष्ठं, स्वार्थपरः -रा -रं. *See* under INTERESTED.

SELF-INVITED, *a.* आत्माहूतः -ता -तं, आत्मनिमन्त्रितः &c., स्वाहूतः &c.

SELF-KNOWING, *a.* आत्मज्ञः -ज्ञा -ज्ञं, आत्मज्ञानी -निनी -नि (न्), आत्मतत्त्वज्ञः &c.

SELF-KNOWLEDGE, *s.* आत्मज्ञानं, आत्मविद्या, आत्मबोधः, आत्मबुद्धिः *f.*, आत्मवेदनं, आत्मदर्शनं, आत्मतत्त्वज्ञानं, आत्मानुभवः.

SELF-LOVE, *s.* आत्मानुरागः, कामात्मता, आत्मकामः, आत्मस्नेहः, ममता, अहम्मानं, अहम्मतिः *f.*, आत्ममानं, आत्मसम्मानं.

SELF-MOVED, *a.* स्ववहितः -ता -तं, आत्मवहितः &c., स्वयंवहः -हा -हं, स्वचोदितः -ता -तं, आत्मचोदितः &c., अनन्यचोदितः &c., स्वैरी -रिणी -रि (न्).

SELF-MURDER, *s.* आत्मघातः, आत्महत्या, आत्मवधः. *See* SUICIDE.

SELF-MURDERER, *s.* आत्मघातकः, आत्मघाती *m.*, आत्महा *m.* *See* SUICIDE.

SELF-OPINIONATED, *a.* स्वमताग्रही &c., स्वमताभिमानी &c. *See* OPINIATED.

SELF-POSSESSED, *a.* आत्मवान् -वती -वत् (त्), धृतात्मा -त्मा -त्म (न्), स्थिरात्मा &c., स्वस्थः -स्था -स्थं, स्वस्थचित्तः -त्ता -त्तं, आत्मस्थः &c., आत्मनिष्ठः -ष्ठा -ष्ठं, सत्त्वशाली -लिनी -लि (न्), अव्यग्रः -ग्रा -ग्रं, अव्यग्रचित्तः -त्ता -त्तं. *See* COLLECTED.

SELF-POSSESSION, *s.* आत्मनिष्ठा, स्वस्थता, स्वनिष्ठा, स्वास्थ्यं, चित्तस्वास्थ्यं, धृतिः *f.*, धृतात्मता, स्थिरात्मता, सत्त्वं, चित्तसत्त्वं, अव्यग्रता. *See* PRESENCE OF MIND.

SELF-PRAISE, *s.* आत्मप्रशंसा, आत्मस्तुतिः *f.*, आत्मश्लाघा.

SELF-PRESERVATION, *s.* आत्मरक्षा -क्षणं, आत्मत्राणं, आत्मपरित्राणं, स्वत्राणं.

SELF-PRESERVING, *a.* आत्मरक्षकः -का -कं, स्वरक्षः -क्षा -क्षं, आत्मत्रः -त्रा -त्रं.

SELF-PRODUCED, *a.* आत्मोद्भवः -वा -वं, आत्मसम्भवः &c., आत्मभूतः -ता -तं.

SELF-RELIANCE, *s.* आत्मनिष्ठा, आत्माश्रयः, आत्मविश्वासः, स्वमतनिष्ठा.

SELF-RESPECT, *s.* आत्ममानं -निता, आत्मसम्मानं, अहम्मानं.

SELF-RESTRAINED, *a.* आत्मसंयतः -ता -तं, आत्मनियन्त्रितः &c., आत्मनियमितः &c.

SELF-RESTRAINT, *s.* आत्मसंयमः, आत्मनिग्रहः, आत्मयमनं, आत्मनियमनं, आत्मनिरोधः, अन्तर्यमनं, आत्मवशः, यमः, संयमः, यतिः *f.*, नियतिः *f.*, दमः, दान्तिः *f.*

SELF-RIGHTEOUS, *a.* साधुम्मन्यः -न्या -न्यं, धर्माभिमानी -निनी -नि (न्).

SELF-RIGHTEOUSNESS, *s.* साधुम्मन्यता, धर्माभिमानं, मिथ्याधर्मत्वं.

SELF-SAME, *a.* समसमानः -ना -नं, अनन्यः &c. *See* SAME, IDENTICAL.

SELF-SATISFIED, *a.* आत्मसन्तुष्टः -ष्टा -ष्टं, आत्मतुष्टः &c., स्वसन्तुष्टः &c., स्वलाभपूर्णः -र्णा -र्णं, निजलाभपूर्णः &c., कृतकृत्यः -त्या -त्यं, कृतार्थः -र्था -र्थं.

SELF-SUFFICIENCY, *s.* स्वस्थता, स्वास्थ्यं, आत्मनिष्ठा, स्वाभिमानं, स्वनिष्ठता.

SELF-SUFFICIENT, *a.* स्वस्थः -स्था -स्थं, स्वनिष्ठः -ष्ठा -ष्ठं, स्वाभिमानी -निनी &c.

SELF-TORMENT, *s.* आत्मद्रोहः, आत्मविडम्बना, आत्मसन्तापः, आत्मक्लेशनं.

SELF-TORMENTING, SELF-TORMENTOR, *a.* or *s.* आत्मद्रोही -हिणी -हि (न्), आत्मविडम्बनाकारी -रिणी &c., आत्मविडम्बनाकर्त्ता -र्त्री -र्त्तृ (र्त्तृ), आत्मसन्तापकः -का -कं.

SELF-WILL, *s.* स्वेच्छा, स्वैरिता, स्वैरता, स्वाच्छन्द्यं, स्वच्छन्दता, स्वातन्त्र्यं.

SELF-WILLED, *a.* स्वैरी -रिणी -रि (न्), स्वैरः -री -रं, स्वच्छन्दः -न्दा -न्दं, स्वेच्छाचारी -रिणी &c., कामचारी &c., कामचारः -री -रं, स्वैरगतिः -तिः -ति, स्वरुचिः -चिः -चि, स्वतन्त्रः -न्त्रा -न्त्रं, यथेष्टचारी &c.

SELFISH, *a.* स्वार्थपरः -रा -रं, स्वार्थदृष्टिः -ष्टिः -ष्टि, स्वार्थबुद्धिः -द्धिः -द्धि, स्वार्थनिष्ठः -ष्ठा -ष्ठं, स्वार्थपरायणः -णा -णं, स्वार्थलिप्सुः -प्सुः -प्सु, स्वार्थी -र्थिनी -र्थि (न्), स्वार्थार्थी &c., स्वहितैषी -षिणी &c., स्वहितपरः -रा -रं, स्वहितपरायणः -णा -णं, स्वहितदृष्टिः -ष्टिः -ष्टि, स्वार्थलोभी &c., स्वलाभपरः -रा -रं, स्वलाभपरायणः -णा -णं, स्वलाभनिष्ठः -ष्ठा -ष्ठं, स्वलाभदृष्टिः &c., अर्थबुद्धिः &c., आत्मबुद्धिः &c., ममतायुक्तः -क्ता -क्तं, मामकः -की -कं, आत्मग्राही -हिणी &c., आत्मम्भरिः -रिः -रि, अहंक्रियावान् -वती -वत् (त्), केवलः -ला -लं.

SELFISHLY, *adv.* स्वार्थबुद्ध्या, स्वार्थलिप्सया, स्वहितैषया, स्वार्थपरत्वात्, स्वहितपरत्वात्, स्वार्थतस्, अर्थतस्.

SELFISHNESS, *s.* स्वार्थदृष्टिः *f.*, स्वार्थपरता, स्वार्थनिष्ठा, स्वार्थलिप्सा, स्वलाभनिष्ठा, स्वार्थबुद्धिः *f.*, स्वहितनिष्ठा, स्वहितपरता, ममता -त्वं, अहंक्रिया.

To SELL, *v. a.* विक्री (c. 9. -क्रीणाति -णीते -क्रेतुं), विक्रयं कृ, विक्रयणं कृ, विक्रीणनं कृ, पण् (c. 1. पणते -णितुं, पणायति, c. 10. पणयति -यितुं).

To SELL, *v. n.* (Be sold) विक्री in pass. (-क्रीयते); 'it sells at a low price,' अल्पमूल्येन विक्रीयते.

SELLER, *s.* विक्रेता *m.* (तृ), विक्रयी *m.* (न्), विक्रयिकः, विक्रयकारी *m.* (न्), विक्रयकर्त्ता *m.* (र्त्तृ), पणयिता *m.*; 'buyer and seller,' क्रयविक्रयिकः.

Selling, *s.* विक्रयः, विक्रयणं, विक्रीणनं, पणनं.

Selvage, selvedge, *s.* पटप्रान्तः, वस्त्रप्रान्तः, वस्तिः *m.*, तरी, दशा.

Semblance, *s.* (Likeness) आभासः -सता -सत्वं, सादृश्यं, सदृशता, औपम्यं, उपमा, प्रतिमा, प्रतिमानं, आभा.—(Form, appearance) आकारः, रूपं, मूर्त्तिः *f.*, विग्रहः.

Semen, *s.* शुक्रं, रेतस् *n.*, धातुः *m.*, तेजस् *n.*, वीजं, वीर्य्यं, इन्द्रियं, रेतनं, रेतं, धातुराजकः, हीलं, आनन्दप्रभवः.

Semi. This prefix may usually be expressed by अर्द्ध, *see* Half.

Semi-breve, *s.* (In music) दीर्घस्वरः.

Semicircle, *s.* अर्द्धमण्डलं, अर्द्धवृत्तं, वृत्तार्द्धं, मण्डलार्द्धं, अर्द्धचन्द्रः, चन्द्रार्द्धं; 'used as an hieroglyphick,' नादः.

Semicircular, *a.* अर्द्धमण्डलाकारः -रा -रं, अर्द्धवृत्ताकारः &c., अर्द्धवृत्ताकृतिः -तिः -ति, अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

Semi-diameter, *s.* अर्द्धव्यासः, व्यासार्द्धं, अर्द्धविष्कम्भः.

Semi-lunar, *a.* अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

Semi-metal, *s.* उपधातुः *m.*, अर्द्धधातुः *m.*

Seminal, *a.* वैजिकः -की -कं, वीज्यः -ज्या -ज्यं, वीजसम्बन्धी -न्धिनी -न्धि (न्), वीजविषयकः -का -कं; 'seminal fluid,' रेतस् *n.*, शुक्रं, *see* Semen; 'seminal effusion,' रेतःपातः, सेकः.

Seminary, *s.* (Ground where seed is sown) वीजारोपस्थलं -ली, वीजारोहस्थलं.—(Place of education) शिक्षास्थानं, शिक्षालयः, विद्याभ्यासस्थानं.

Semitone, *s.* (In music) स्वरांशः, मूर्च्छनं -ना.

Semivowel, *s.* अन्तस्थः, अर्द्धस्वरः, अर्द्धव्यञ्जनं.

Sempiternal, *a.* नित्यः -त्या -त्यं, नित्यस्थायी -यिनी -यि (न्). *See* Eternal.

Sempstress, *s.* सूचिका, सूचीशिल्पोपजीविनी, सूचिकर्म्मोपजीविनी.

Senate, *s.* वृद्धसभा, राजमन्त्रिसभा, वृद्धसंघः, वृद्धसदस् *n.*, राजामात्यसभा, श्रेष्ठसभा, शिष्टसभा, महासभा, प्रधानसभा, महासमाजः.

Senate-house, *s.* महासभास्थानं, प्रधानसभास्थानं, वृद्धसभास्थानं.

Senator, *s.* वृद्धसभासद् *m.*, प्रधानसभासद्, महासभाभ्यन्तरः.

Senatorial, *a.* वृद्धसभासम्बन्धी -न्धिनी -न्धि (न्), महासभासम्बन्धी &c.

To send, *v. a.* प्रेर् (c. 10. प्रेरयति -यितुं, rt. ईर्), प्रेष् (c. 10. प्रेषयति -यितुं, rt. इष्), सम्प्रेष्, अनुप्रेष्, परिप्रेष्, प्रहि (c. 5 -हिणोति -हेतुं), प्राप् in caus. (प्रापयति -यितुं, rt. आप्) संचर् (c. 10. -चारयति -यितुं), नुद् (c. 6. नुदति, नोत्तुं), प्रतिपद् (c. 10. -पादयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं) all with 2. acc.; as, 'he sent them to the city,' तान् नगरीं प्रेरयामास; 'I will send a letter to the king,' लेखं राज्ञो हस्तं प्रापयिष्यामि; or with acc. and dat., as, 'he sent a weapon to the king,' अस्त्रं राज्ञे प्राहिणोत्.—(Send away, despatch) प्रस्था in caus. (-स्थापयति -यितुं), अपसृ in caus. (-सारयति -यितुं), प्रया in caus. (-यापयति -यितुं), विसृज्, प्रणुद्, अपास्, सम्प्रेष्, *see* Dismiss.—(Send before or in advance) अग्रे प्रस्था in caus. or प्रया in caus., पुरस्कृ.—(Send for, summon, request or cause to be brought) आह्वे (c. 1. -ह्वयति -ह्वातुं), आनी in caus. (-नाययति -यितुं), उपानी in caus., आगम् in caus., आहृ in caus.; 'he sent for them from the village,' तान् ग्रामाद् आनाययामास or आहूतवान्.—(Send forth, emit, produce) विसृज्, निःसृ in caus., उदीर्, समुदीर्, निरस्, उत्क्षिप्, उत्पद् in caus.—(Cause to fall, as a missile, &c.) पत् in caus., क्षिप्, प्रक्षिप्.

Sender, *s.* प्रेरकः, प्रेरयिता *m.* (तृ), प्रेषकः, सम्प्रेषकः, प्रेषयिता *m.* प्रेरणकृत्, प्रेरणकर्त्ता *m.*, प्रयोजकः.

Sending, *s.* प्रेरणं -णा, प्रेषणं, प्रेषः, प्रस्थापनं, प्रयापणं, क्षेपणं.

Senile, *a.* वृद्धतासम्बन्धी -न्धिनी -न्धि (न्), वार्धक्यसम्बन्धी &c.

Senility, *s.* वृद्धता -त्वं, वार्धक्यं, [illegible]वस्था, वृद्धभावः. *See* Old age.

Senior, *a.* ज्येष्ठः -ष्ठा -ष्ठं, [illegible] &c., कालज्येष्ठः &c., ज्यायान् -यसी -यः (स्), अग्रजः -जा -जं, वरीयान् &c. वरिष्ठः &c., श्रेष्ठः &c. *see* Elder; 'senior in office,' अधिकारज्येष्ठः -ष्ठा -ष्ठं.

Senior, *s.* (One who is older) ज्येष्ठः, वयोज्येष्ठः, *see* the last.—(Elderly person) गुरुजनः, वृद्धजनः, आर्य्यजनः.

Seniority, *s.* ज्येष्ठता -त्वं, ज्यैष्ठ्यं, वयोज्येष्ठता, वयोज्यैष्ठ्यं, कालज्येष्ठता कालज्यैष्ठ्यं, अधिकवयस्कता; 'in office,' अधिकारज्येष्ठता, अधिकारज्यैष्ठ्यं; 'according to seniority,' अनुज्येष्ठं.

Sennight, *s.* (Week) सप्ताहं, सप्तरात्रं, *see* Week.

Sensation, *s.* (Feeling) वेदनं -ना, संवेदः, चेतना, चैतन्यं, चित् *f.*, इन्द्रियज्ञानं, इन्द्रियबोधः, इन्द्रियग्रहः -हणं.—(State of excited interest) लोकानुरागः, मनानुरागः.

Sense, *s.* (Organ of perception or sense) इन्द्रियं, ज्ञानेन्द्रियं, ज्ञानसाधनं, इन्द्रियवृत्तिः *f.*, इन्द्रियज्ञानं, करणं, हृषीकं, अक्षं, अध्यात्म *n.* (न्), विषयि *n.* (न्); 'the five senses or organs collectively,' पञ्चेन्द्रियं, इन्द्रियग्रामः, इन्द्रियवर्गः, इन्द्रियगणः, श्रोत्रादि *n.* These are the eye चक्षुस्, the ear श्रोत्रं, the nose घ्राणं, the tongue जिह्वा, the skin त्वक्, and are called ज्ञानेन्द्रियाणि to distinguish them from the five कर्म्मेन्द्रियाणि or organs of action; *see* Organ. To these ten an eleventh, the mind मनस्, is sometimes added. 'Subjugation or restraint of the senses,' इन्द्रियजयः, इन्द्रियदमनं, इन्द्रियनिग्रहः, इन्द्रियदमनं, इन्द्रियनियमनं; 'one who has subdued his senses,' जितेन्द्रियः -या -यं, यतेन्द्रियः &c., यती *m.* (न्); 'perceptible by the senses,' इन्द्रियग्राह्यः -ह्या -ह्यं, इन्द्रियगोचरः -रा -रं; 'by two senses,' द्वीन्द्रियग्राह्यः &c.; 'evident to the senses,' प्रत्यक्षः -क्षा -क्षं, प्रत्यक्षसिद्धः -द्धा -द्धं; 'deadness of the senses,' इन्द्रियस्वापः; 'pleasure of sense,' इन्द्रियसुखं, विषयसुखं; 'perversion of the senses,' इन्द्रियविप्रतिपत्तिः *f.*; 'disorder of them,' इन्द्रियवैकल्यं; 'acuteness of them,' इन्द्रियपाटवं; 'wanting a sense,' विकलेन्द्रियः -या -यं, निरिन्द्रियः &c.—(Object of sense) विषयः, इन्द्रियविषयः, इन्द्रियार्थः, अर्थः, गोचरः. These are five, corresponding to the five senses or organs of perception, viz. 'form' रूपं, 'sound' शब्दः, 'odour' गन्धः, 'flavour' रसः, 'touch' स्पर्शः.—(Perception by the senses, sensation) वेदनं -ना, संवेदः -दनं, बोधः -धनं, इन्द्रियज्ञानं, इन्द्रियबोधः -धनं, इन्द्रियग्रहः -हणं, ग्रहणं, चेतना.—(Perception by the mind, &c.) बोधः, वेदनं, ज्ञानं, अनुबोधः, उपलब्धिः *f.*, ग्रहः -हणं, *see* Perception.—(Understanding) बुद्धिः *f.*, मतिः *f.*, धीः *f.*, मेधा, चित्.—(Consciousness) चैतन्यं, चेतना, वेदनं, ज्ञानं, संज्ञा; 'internal sense,' अन्तश्चैतन्यं, अन्तःसंज्ञा; 'sense of pleasure,' सुखवेदनं, सुखानुभवः, सुखबोधः; 'to recover one's senses,' संज्ञां or चैतन्यं लभ्; 'one who has done so,' लब्धसंज्ञः -ज्ञा -ज्ञं, लब्धचैतन्यः -न्या -न्यं, लब्धचेताः -ताः -तः (स्); 'to lose one's senses, be out of one's senses,' बुद्धिभ्रष्टः -ष्टा -ष्टं भू, नष्टबुद्धिः -द्धिः -द्धि भू, हतबुद्धिः -द्धिः -द्धि भू, नष्टज्ञानः -ना -नं भू, हतज्ञानः -ना -नं भू, नष्टेन्द्रियः -या

-र्थं भू.—(Opinion) मतं, मतिः f., बुद्धिः f.—(Meaning) अर्थः, अभिप्रायः, आकांक्षा, आशयः, उद्देशः, विवक्षितं, विषयः, भावः; 'sense of words,' शब्दानुशासनं, पदार्थः, भावार्थः, शक्तिः f., विग्रहः; 'second sense,' अर्थान्तरं; 'tenor of the sense,' अर्थानुसन्धानं; 'according to the sense,' यथार्थं; 'apprehension of the literal sense,' शाब्दबोधः.—(Common sense) सामान्यबुद्धिः f., साधारणबुद्धिः f., साधारणधीः f.—(Good sense) सुबुद्धिः f., सुमतं, सुबुद्धिमत्त्वं, सुबुद्धिः f., सुधीः f., see INTELLIGENCE.

SHARED, *p. p.* विभक्तः -क्ता -क्तं, संविभक्तः &c., प्रविभक्तः &c., अंशितः -ता -तं, परिकल्पितः &c., अन्येन सह भुक्तः -क्ता -क्तं or सहोपभुक्तः &c.

SHARER, *s.* भागी *m.* (न्), अंशी *m.*, अंशहारी *m.* *See* PARTAKER.

SHARK, *s.* ग्राहः, तन्तुः *m.*, तन्तुणः, तन्तुनागः, नक्रराजः, मकरः, दृढदंशकः, जलकिराटः, समुद्रालुः *m.*, अवहारः, हाङ्गरः.

SHARP, *a.* (Having a keen edge) तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णधारः -रा -रं, शितधारः &c., धाराधरः -रा -रं, शितः -ता -तं, निशितः &c., तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, खरः -रा -रं, शातः -ता -तं, निशातः &c., प्रखरः -रा -रं, तेजोवान् -वती -वत् (त्), लविः -विः -वि; 'a sharp sword,' तीक्ष्णखड्गः, निशितनिस्त्रिंशः; 'sharp as a razor,' क्षुरधाराभः -भा -भं.—(Having a sharp point) तीक्ष्णाग्रः -ग्रा -ग्रं, शिताग्रः &c., तीक्ष्णशिखः -खा -खं, शातशिखः &c., सूक्ष्माग्रः &c., तीक्ष्णः &c.—(Acute of mind, quick, ready) तीक्ष्णबुद्धिः -द्धिः -द्धि, सूक्ष्मबुद्धिः &c., शीघ्रबुद्धिः &c., तीव्रबुद्धिः &c., विदग्धः -ग्धा -ग्धं, निपुणमतिः -तिः -ति, कुशलबुद्धिः &c., उत्पन्नमतिः &c., कुशाग्रीयमतिः &c., कुशाग्रमतिः &c., कुशाग्रबुद्धिः &c., प्रखरबुद्धिः &c., निपुणः -णा -णं, पटुः -टुः -टु, चतुरः -रा -रं.—(Quick in perception) शीघ्रग्राही -हिणी &c., सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मग्राही &c., तीक्ष्णः -क्ष्णा -क्ष्णं; 'a sharp sight,' सूक्ष्मदृष्टिः *f.*, तीक्ष्णदृष्टिः *f.*—(Quick in action, smart) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), शीघ्रकर्म्मा &c., आशुकारी &c., शीघ्रकारी &c., क्षिप्रकारी &c.—(Witty) रसिकः -का -कं, विदग्धः -ग्धा -ग्धं.—(Sour, acid) अम्लः -म्ला -म्लं, अम्लरसः -सा -सं, शुक्तः -क्ता -क्तं, शौक्तिकः -की -कं, अरुन्तुदः -दा -दं.—(Pungent) कटुः -टुः -टु, उग्रः -ग्रा -ग्रं, तिक्तकः -का -कं, *see* PUNGENT.—(Severe, cutting)

तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, उग्रः -ग्रा -ग्रं, कटुः -टुः -टु, प्रखरः -रा -रं, खरः &c., अरुन्तुदः -दा -दं, मर्म्मस्पृक् *m. f. n.* (श्), मर्म्मवेधी &c., मर्म्मभेदी -दिनी &c.; 'sharp language,' वागसिः *f.*, वागिषुः *m.*, कटुवाक्यं, अरुन्तुदवाक् *f.* (च्); 'sharp pain,' तीव्रवेदना, शूलः -लं.—(Piercing) वेधकः -का -कं, [illegible] &c.—(As sound) उदात्तः -त्ता -त्तं, कर्कशः -शा -शं.

SHARP, *s.* (Note) उदात्तः, उदात्तस्वरः, उच्चस्वरः.

SHARP-EDGED, *a.* तीक्ष्णधारः -रा -रं, शितधारः &c., निशितधारः &c.

To SHARPEN, *v. a.* तिज् (c. 10. तेजयति -यितुं), निशो (c. 4. -श्यति -शातुं), शो, निशि (c. 5. -शिनोति -शेतुं), क्ष्णु (c. 2. क्ष्णौति, क्ष्णवितुं), प्रक्ष्णु, संक्ष्णु, तीक्ष्णीकृ, तीक्ष्णधारीकृ, शितधारीकृ, तीक्ष्णाग्रीकृ; 'the appetite,' क्षुध् in caus.—(Sharpen up) उत्तिज्.

SHARPENED, *p. p.* तेजितः -ता -तं, निशितः -ता -तं, शितः &c., शातः &c., निशातः &c., विशितः &c., क्ष्णुतः &c.; 'as the appetite,' क्षुधितः &c.

SHARPER, *s.* कितवः, वञ्चकः, धूर्त्तः, कूटकः, प्रतारकः, कुहकः.

SHARPLY, *adv.* तीक्ष्णं, तीव्रं, तीक्ष्ण्यं, तिग्मं, प्रखरं, अरुन्तुदं, निपुणं.

SHARPNESS, *s.* (Keenness of edge) तीक्ष्णता, तैक्ष्ण्यं, धारातीक्ष्णता, तेजस् *n.*, तीव्रता, तिग्मता, तैग्म्यं.—(Of point) तीक्ष्णाग्रता -त्वं, शिताग्रता.—(Of mind) बुद्धितीक्ष्णता, बुद्धितैक्ष्ण्यं, तीक्ष्णबुद्धित्वं, बुद्धिसूक्ष्मता, विदग्धता, वैदग्ध्यं, निपुणता, नैपुण्यं, बुद्धिकौशल्यं, पटुता, पाटवं, चतुरता, चातुर्य्यं, मतिप्रकर्षः.—(Sourness) अम्लता, शुक्तता.—(Pungency) कटुता, प्रखरता, प्राखर्य्यं, उग्रता, तीक्ष्णता.—(Severity) तीक्ष्णता, तैक्ष्ण्यं, तीव्रता, तिग्मता.—(Of sound) कर्कशता, कार्कश्यं, उदात्तत्वं.

SHARP-NOSED, *a.* खरणाः -णाः -णः (स्), खरणसः -सा -सं, तीक्ष्णनासः &c.

SHARP-POINTED, *a.* तीक्ष्णाग्रः -ग्रा -ग्रं, शिताग्रः &c., सूच्यग्रः &c.

SHARP-SET, *a.* तीक्ष्णक्षुधान्वितः -ता -तं, बुभुक्षान्वितः &c., तीक्ष्णक्षुधार्त्तः &c.

SHARP-SHOOTER, *s.* क्षिप्रवेधी *m.*, लक्ष्यवेधी *m.* (न्), लक्ष्यवेधनकुशलः.

SHARP-SIGHTED, *a.* सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी -र्शि (न्), तीक्ष्णदृष्टिः &c., तीव्रदृष्टिः &c., काकदृष्टिः &c.

SHARP-WITTED, *a.* तीक्ष्णबुद्धिः -द्धिः -द्धि, सूक्ष्मबुद्धिः &c., क्षिप्रबुद्धिः &c.

SHÁSTRA, SHÁSTER, *s.* A term applied to scientific or philosophical treatises and books of law. There are properly only six Shástras, comprising the five philosophical systems (*see* SCHOOL), and the code of legal institutes; viz. 1. मीमांसाशास्त्रं or पूर्व्वमीमांसाशास्त्रं, 2. सांख्यशास्त्रं, 3. वेदान्तशास्त्रं, 4. न्यायशास्त्रं, including under it the वैशेषिकशास्त्रं, 5. योगशास्त्रं, 6. धर्म्मशास्त्रं. The last includes the celebrated code of Manu or मानवधर्म्मशास्त्रं. The term Shástra is also applied to less important branches of literature, and when used in the singular number denotes the body of all that has been written on each subject; as, 'Treatises on rhetoric,' अलङ्कारशास्त्रं; 'poetical works,' काव्यशास्त्रं; 'Treatises on the mechanical arts,' शिल्पशास्त्रं.

To SHATTER, *v. a.* (Break into many pieces) शतखण्डशः कृ or भिद् or भञ्ज्, सहस्रखण्डशः कृ, बहुखण्डशः कृ or भञ्ज्, शतखण्डीकृ, शतचूर्णीकृ, खण्डविखण्डीकृ, बहुशकलीकृ, खण्डं खण्डं कृ, छिन्नभिन्नीकृ, छेदविच्छेदं कृ, खण्ड्, मृद्, निर्भिद्, परिभञ्ज्, प्रभञ्ज्, भिद्, चूर्णि.

To SHATTER, *v. n.* शतखण्डशो भू or भिद् in pass., शतचूर्णीभू.

SHATTERED, *p. p.* शतखण्डशो भिन्नः -न्ना -न्नं or भग्नः -ग्ना -ग्नं, शतचूर्णीकृतः -ता -तं, सहस्रखण्डशो भग्नः -ग्ना -ग्नं, छिन्नभिन्नः -न्ना -न्नं.

SHATTERING, *s.* परिभङ्गः, शतखण्डीकरणं, शतचूर्णीकरणं, छेदविच्छेदः.

To SHAVE, *v. a.* (With a razor) क्षौरं कृ, क्षुर् (c. 6. क्षुरति, क्षोरितुं), खुर् (c. 6. खुरति, खोरितुं), मुण्ड् (c. 1. मुण्डति -ण्डितुं, c. 10. मुण्डयति -यितुं), मुण्डनं कृ, वापय् (c. 10. -वापयति -यितुं, c. 1. -वपति -वप्तुं), परिवप्, वप्, वपनं कृ, वापं कृ, क्षुरेण or क्षुरेण छिद् (c. 7. छिनत्ति, छेत्तुं) or लू (c. 9. लुनाति, लवितुं), भद्राकरणं कृ; 'to shave the head,' शिरोमुण्डनं कृ.—(Pare) तक्ष् (c. 1. तक्षति -क्षितुं), तक्षणं कृ, त्वक्ष्, छिद्, अवछिद्, अवकृत्, कॢप्.

SHAVED, SHAVEN, *p. p.* मुण्डितः -ता -तं, वापितः &c., परिवापितः &c., कृतक्षौरः -रा -रं, कृतवापनः -ना -नं, क्षुरितः -ता -तं, मुण्डः -ण्डा -ण्डं, क्लृप्तः -प्ता -प्तं; 'a number of shaved heads,' मुण्डमण्डली.

SHAVELING, *s.* मुण्डितशिराः *m.* (स्), वापितशिराः *m.*, मुण्डितः, मुण्डः.

SHAVER, *s.* (One who shaves) मुण्डकः, मुण्डी *m.* (न्), क्षुरी *m.*, मुण्डनकृत् *m.*, क्षौरकारी *m.* (न्), वपनकृत्.—(Boy) माणवकः.

SHAVING, *s.* (Act of cutting with a razor) क्षौरं, क्षौरकरणं, मुण्डनं, वपनं, वपः, वापः, परिवापः, वापनं, आवपनं.—(That which is pared off) तक्षं, विदलं, शकलं, खण्डः, छेदः, तनुच्छेदः, सूक्ष्मच्छेदः.

SHAWL, *s.* उत्तरीयं, प्रावरणं, प्रावारः, स्कन्धावरणं, स्कन्धवस्त्रं.

SHE, *pron.* सा (तद्), एषा (एतद्), इयं (इदं), असौ (अदस्).

SHEAF, *s.* शस्यस्तम्बः, शस्यस्तबकः, शस्यगुच्छः -च्छकः, शस्यमुष्टिः -ष्टी *f.*, शस्यभारः, स्तम्बः, लवकः, ताडः.

To SHEAR, *v. a.* लू (c. 9. लुनाति, लवितुं), कृत् (c. 6. कृन्तति, कर्त्तितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), वापय् (c. 10. -वापयति -यितुं), परिवप्, वप्, मुण्ड् (c. 1. मुण्डति -ण्डितुं, c. 10. मुण्डयति -यितुं), कॢप्, वपनं कृ, क्षौरं कृ; 'sheep,' मेषलोम छिद् or अवछिद् or लू.

SHEARED, *p. p.* लूनः -ना -नं, छिन्नलोमा -मा -म (न्), कृत्तलोमा &c.

SHEARER, *s.* छेदकः, छिद् in comp., लोमच्छिद्, लोमच्छेदकः, लवकः, लोमच्छेत्ता *m.* (तृ); 'of sheep,' मेषलोमच्छिद्.

SHEARING, *s.* छेदनं, लूनिः *f.*, लवनं, लवः, लुः *m.*, कर्त्तनं, कल्पनं, क्लृप्तिः *f.*, क्षौरं, वपनं, वापः, परिवापः, मुण्डनं; 'of wool,' लोमच्छेदनं, लोमकर्त्तनं, मेषलोमच्छेदः.

SHEARS, *s. pl.*, कर्त्तनी, कर्त्तरी, कल्पनी, कृपाणी, खण्डधारा.

SHEAT-FISH, *s.* बोदालः, वदालः, सहस्रदंष्ट्रः, सहस्रदंष्ट्री *m.* (न्).

SHEATH, *s.* (Case, covering) कोषः, कोशः, पिधानं, तिरोधानं, आवेष्टनं, परिवेष्टनं, वेष्टनं, आवरणं, आच्छादनं, पुटः, पेशी.—(Of a sword) खड्गकोषः, खड्गपिधानं, खड्गाधारः, कोषः, दलं, पेशी, *see* SCABBARD.—(In botany) शुङ्गा, दलं.

To SHEATHE, SHEATH, *v. a.* (Put into a case) कोषे निविश् (c. 10. -वेशयति -यितुं), कोषं प्रविश्, कोषस्थं -स्थां कृ.—(Envelop with a covering) आवेष्ट्, परिवेष्ट्, आच्छद्, परिच्छद्, पिधा, आवृ, परिवृ, कोशेन परिवेष्ट्.

SHEATHED, *p. p.* कोषस्थः -स्था -स्थं, कोशस्थः &c., कोषनिवेशितः -ता -तं.

To SHED, *v. a.* (Let fall, cast) पत् (c. 10. पातयति -यितुं), मुच् (c. 6. मुञ्चति, c. 10. मोचयति -यितुं), निर्मुच्, गल् in caus., गलनं कृ, विगलनं कृ; 'the feathers,' पक्षगलनं कृ.—(Let flow, spill) पत् (c. 10. पातयति -यितुं), स्रु (c. 10. स्रावयति -यितुं, c. 1. स्रवति, स्रोतुं), मुच्, प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), उत्सृज्, वृत् in caus., आपृत्, स्यन्द् (c. 10. स्यन्दयति -यितुं), क्षर् (c. 1. क्षरति -रितुं); 'to shed tears,' अश्रूणि पत् in caus., वाष्पं सृज्, अश्रूणि नेत्राभ्याम् आपृत् in caus.; 'to shed blood,' रक्तं स्रु in caus. or मुच् or मोक्ष्.

SHED, *p. p.* गलितः -ता -तं, विगलितः &c., पातितः &c., स्रावितः -ता -तं.

SHED, *s.* (Slight building) मण्डपः, मण्डपिकः, मण्डपिका, आमः, वितर्दिः -र्दी *f.*, विहारः; 'for cattle,' गोष्ठं, गोगोष्ठं, गोस्थानकं, गोगृहं, गोशाला.

SHEDDER, *s.* (Of blood) रक्तस्रावकः, रक्तस्रावी *m.* (न्), रक्तमोचकः, रक्तपातकः, रक्तोत्पादकः, शोणितोत्पादकः, असृक्स्रावी *m.*

SHEEP, *s.* मेषः, अविः *m.*, अविकः, उरभ्रः, उरणः, एडकः, भेडः, रोमशः, लोमशः, बहुरोमा *m.* (न्) ऊर्णायुः *m.*, अजः, *see* RAM; 'female,' मेषी -षिका, एडका, भेडी, उरणी, अविला, जालकिनी; 'flock of sheep,' औरभ्रकं, आविकटः.

SHEEP-COT, SHEEP-FOLD, *s.* मेषस्थानं -नकं, मेषशाला, मेषव्रजः, मेषालयः -यं.

SHEEPISH, *a.* अतिलज्जाशीलः -ला -लं, अतिलज्जावान् -वती -वत् (त्), मेषस्वभावः -वा -वं, मेषशीलः -ला -लं, जनभीतः -ता -तं, सभाभीतः &c.

SHEEPISHNESS, *s.* अतिलज्जा, मेषशीलता, जनभीतिः *f.*, सभाभीतिः *f.*

SHEEP-SHEARER, SHEEP-SHEARING. *See* SHEARER, SHEARING.

SHEEP-SKIN, *s.* मेषचर्म्म *n.* (न्), मेषलोम *n.* (न्), मेषाजिनं, अविचर्म्म.

SHEEP-STEALER, *s.* मेषहर्त्ता *m.* (र्तृ), मेषहारी *m.* (न्), मेषापहारकः.

SHEEP-STEALING, *s.* मेषहरणं, मेषापहारः, मेषापहरणं, मेषचौर्य्यं.

SHEER, *a.* (Mere, unmixed) मात्र in comp., मात्रकः -का -कं, केवलः -ला -ली -लं, केवली -लिनी -लि (न्), शुद्धः -द्धा -द्धं, *see* MERE.

To SHEER OFF, *v. n.* अपसृ, अपसृप्, अपसृप्, पलाय्, *see To* DECAMP. —(Move off on one side) पार्श्वे or पार्श्वतो गम् or चल्.

SHEET, *s.* (Of a bed, &c.) प्रच्छदपटः, प्रच्छदवस्त्रं, उत्तरप्रच्छदः, उत्तरच्छदः, शय्याच्छादनं, निचोलः.—(Of paper) पत्रं -त्रकं, पत्रिका, फलकः.—(Of metal) पत्रं, फलकः.—(Of water) वारिराशिः *m.*, वारिविस्तरः. —(Winding sheet) शववस्त्रं.

SHEET-ANCHOR, *s.* बृहल्लङ्गरः, महालङ्गरः, बृहदङ्कुशः. There is no Sanskrit equivalent for the modern anchor: लङ्गरः is borrowed from the Persian.

SHEET-IRON, *s.* लोहपत्रं -त्रकं, लोहपत्रिका, लोहफलकः.

SHE-GOAT, *s.* अजा, छागी. *See* GOAT.

SHELF, *s.* (Board or bracket in a wall) नागदन्तः -न्तकः, नागनिर्य्यूहः, निर्य्यूहः, नागः, छालारं, भित्तिबहिःस्थः फलकः, भित्तिबहिःस्थं दीर्घकाष्ठं; 'set of shelves,' कपाटः -टं.—(Sand-bank) सैकतं.

SHELL, *s.* (Hard covering of an animal) कम्बुः -म्बु *m. n.*, कवचः -चं; 'conch-shell,' शङ्खः, शङ्खकः -कं, शम्बूकः, जलकं, शुक्तिः *f.*, शुक्तिकामुलं, कम्बुः -म्बुकः; 'bivalve-shell,' कम्बुः *m.*, शम्बुः *m.*, शम्बुकः, शम्बूकः, शम्बुक्कः, जलशुक्तिः *f.*; 'oyster-shell,' शुक्तिः *f.*, शुक्तिपुटं, शुक्तिपेशी; 'small shell,' क्षुद्रशङ्खः, शुक्तिः *f.*, शङ्खनखः; 'used as a coin,' कपर्दः, कपर्दकः, *see* COWRIE; 'worker or dealer in shells,' शङ्खकारः, शङ्खी *m.* (न्), शाङ्खिकः, काम्बविकः; 'contained in a shell,' शुक्त्यन्तर्गतः -ता -तं.—(Of an egg) अण्डकवचः -चं, पेशी -शिः *f.*, अण्डपुटः -टं, अण्डपेशी.—(Of a nut, &c.) कवचः -चं.—(Of a pea, &c.) बीजकोशः, शिम्बा.—(Husk) त्वक् *f.* (च्), तुषः, कञ्चुकः, कोशः, पुटः—(Envelope) पुटः, कोशः, कोषः, आवेष्टनं, परिवेष्टनं, पेशी -शिः *f.*—(Outer part) बहिर्भागः, बाह्यभागः, बहिर्भागमात्रं.—(Bomb), *see* the word.

To SHELL, *v. a.* निस्त्वचीकृ, निस्त्वच (nom. निस्त्वचयति -यितुं), त्वच (nom. त्वचयति -यितुं), निस्तुषीकृ, निष्पुटीकृ, त्वचं or पुटं हृ or निर्हृ.

SHELL-CUTTER, *s.* शाङ्खिकः, शङ्खी *m.* (न्), शङ्खच्छेदकः, काम्बविकः.

SHELLED, *p. p.* निस्त्वचः -चा -चं, निस्त्वचीकृतः -ता -तं, निस्तुषितः &c.

SHELL-FISH, *s.* कम्बुस्थः, कम्बुवासी *m.* (न्), शङ्खस्थः, शुक्तिस्थः, कोशस्थः, कोशवासी *m.*, कम्बुयुक्तजन्तुः *m.*, कम्बुस्थमत्स्यः.

SHELLY, *a.* शङ्खी -ङ्खिनी -ङ्खि (न्), शाङ्खिकः -की -कं, काम्बवः -वी -वं, कम्बुमयः -यी -यं, शङ्खमयः &c., कम्बुपूर्णः -र्णा -र्णं, शङ्खाढ्यः &c.

SHELTER, *s.* आश्रयः, समाश्रयः, [illegible] आश्रयणं, शरणं, आश्रयः, आयः, छत्रं, अवस्थानं, निवासस्थानं [illegible]काशः; 'to take shelter,' आश्रि, समाश्रि, शरणार्थं गम्, *see* under SHELTER; 'being in shelter,' आश्रयस्थः -स्था -स्थं; 'having taken shelter,' आश्रितः.

To SHELTER, *v. a.* (Give shelter) आश्रयं दा, आश्रयः or शरणं भू. —(Protect, cover) रक्ष्, गुप्, पाल्, छद्, प्रच्छद्, गुप्तिं कृ, गोपनं कृ.—(Shelter one's self) आश्रि (c. 1. -श्रयति -यितुं), समाश्रि.

SHELTERED, *p. p.* or *a.* आश्रितः -ता -तं, समाश्रितः &c., संश्रितः &c., साश्रयः -या -यं.—(From the wind) निर्वातः -ता -तं.

SHELTERING, *part.* आश्रयभूतः -ता -तं, आश्रयदाता -त्री -तृ (तृ).

SHELTERLESS, *a.* निराश्रयः -या -यं, अनाश्रयः &c., आश्रयहीनः -ना -नं.

To SHELVE, *v. n.* प्रवणः -णा -णं भू, प्रवणीभू, पातुकः -का -कं भू, क्रमशः प्रवणीभू or अधोगम् or पत्.

SHELVING, *part.* or *a.* प्रवणः -णा -णं, पातुकः -का -कं, क्रमशः प्रवणः -णा -णं or अधोगामी -मिनी &c.; 'shelving ground,' प्रवः, प्रवणभूमिः.

SHEPHERD, *s.* मेषपालः -लकः, पशुपालः -लकः, अविपालः, पशुरक्षी *m.* (न्), मेषरक्षी *m.*, मेषरक्षकः, मेषपोषकः, औरभ्रिकः, उरभ्रपालः; 'his business,' मेषपालनं, पशुपालनं, पाशुपाल्यं; 'shepherd's boy,' पालदारकः.

SHEPHERDESS, *s.* मेषपाली, मेषपालिका, पशुपाली, मेषरक्षिणी.

SHERBET, *s.* शर्बत्संज्ञकं रसिकपानीयं, शर्करादिमिश्रितं मधुजम्बीरादिरसमयं पानीयं.

SHERIFF, *s.* न्यायसभाध्यक्षः, धर्म्मसभाध्यक्षः, निर्णयप्रादप्रवर्त्तनाधिकारी *m.* (न्), निर्णयप्रवर्त्तकः, राज्यनियमप्रवर्त्तकः.

SHERRY, *s.* स्पेनाख्यदेशजः प्रसिद्धमद्यविशेषः.

SHEW, *To* SHEW, SHEWN, *see* SHOW, *To* SHOW, &c.

SHIELD, *s.* (Buckler) फलकः -कं, फलं, चरं, चर्म्म *n.* (न्), चर्म्मं, आवरणं, चर्म्मावरणं, आवरकः -कं, स्फुरः, अङ्कराटः, खेटिका, ढालं, कङ्कटं; 'armed with a shield or bearing one,' फलकी *m.* (न्), फलकपाणिः *m.*, चर्म्मी *m.*, ढाली *m.* (न्), फलकभृत् *m.*—(Defence) रक्षणं, गुप्तिः *f.*, त्राणं.

To SHIELD, *v. a.* रक्ष्, त्रै, गुप्, पाल्, छद्. *See To* PROTECT, COVER.

SHIELDED, *p. p.* रक्षितः -ता -तं, छादितः &c., आवृतः &c., चमरितः &c.

To SHIFT, *v. n.* (Change) परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), विवृत्, विपरिवृत्, सम्परिवृत्.—(Move, change place) चल् (c. 1. चलति -लितुं), विचल्, स्थानान्तरं गम् (गच्छति, गन्तुं) or चल् or या, स्थानान्तरं गम्. —(Change clothes) वस्त्रान्तरं परिधा, निवस्.—(Shift for a livelihood) दिनर्निर्वाहं कृ, अगतिकगतिं कृ.

To SHIFT, *v. a.* (Change) परिवृत् (c. 10. -वर्त्तयति -यितुं), विपरिवृत्, विकृ (c. 8. -करोति -कर्त्तुं), विहृ; 'he shifts his course,' स्वमार्गं विकरोति.—(Cause to change place) विचल् (c. 10. -चालयति -यितुं), चल्, स्थानान्तरं गम् in caus., स्थानान्तरीकृ, स्थलान्तरीकृ, अन्यत्र कृ.—(Shift off), *see To* PUT OFF.

SHIFT, *s.* (Expedient) उपायः, गतिः *f.*, युक्तिः *f.*, अभ्युपायः.—(Evasion, trick) छल *n.* (न्), छलं, अपदेशः, व्यपदेशः.—(Under garment) अन्तरीयं, अधोवस्त्रं, अधोवसनं, अधोंशुकं.

SHILLY-SHALLY, *s.* विकल्पः, अस्थिरता, चापल्यं. *See* IRRESOLUTION.

SHIN, *s.* जङ्घाग्रभागः, जङ्घायाः पूर्व्वास्थि *n.*, अग्रजङ्घा.

To SHINE, *v. n.* प्रकाश् (c. 1. -काशते -शितुं, c. 4. -काश्यते), काश्, द्युत् (c. 1. द्योतते -तितुं), विद्युत्, राज् (c. 1. राजति -ते -जितुं), अभिराज्, अभिविराज्, दीप् (c. 4. [illegible]ते -पितुं), स्फुर् (c. 6. स्फुरति -रितुं), शुभ् (c. 1. शोभते -भितुं), विशुभ्, [illegible] (c. 1. भासते -सितुं), आभास्, प्रभास्, अवभास्, भा (c. 2. भाति -तुं), प्रभा, आभा, विभा, उद्भा, चकास् (c. 2. चकास्ति -सितुं), रुच् (c. 1. रोचते -चितुं), ज्वल् (c. 1. ज्वलति -लितुं), उज्ज्वल्, वर्चस् (nom. वर्चायते), ओजस् (nom. ओजायते); 'to shine very brightly,' दीप् in freq. (देदीप्यते), ज्वल् in freq. (जाज्वल्यते), शुभ् in freq. (शोशुभ्यते), अतितेजसा प्रकाश्; 'the fixed stars shine by their own light,' नक्षत्राणि स्वप्रकाशानि भवन्ति; 'planets shine by reflected light,' ग्रहाः परावृत्तकिरणैर् प्रकाश्यन्ते.

SHINE, *s.* प्रभा, प्रकाशः, द्युतिः *f.*, तेजस् *n.* *See* SUN-SHINE.

SHINGLE, *s.* (Gravel, pebble) शर्करा, शिलाखण्डः, वर्त्तुलशिला, वेलाहतशिला, वेलाहतशर्करा.—(Thin plank) फलकः.

SHINING, *part.* or *a.* प्रकाशमानः -ना -नं, दीप्तिमान् -मती -मत् (त्), द्युतिमान् &c., द्योती -तिनी -ति (न्), द्योतमानः -ना -नं, विद्योतमानः &c., शोभमानः &c., देदीप्यमानः &c., विराजमानः &c., प्रभावान् &c., कान्तिमान् &c., तेजस्वी &c., भास्वान् &c., भास्वरः -री -रं, भास्करः -रा -रं, प्रकाशन् -शन्ती -शत् (त्), स्फुरन् &c., भासयन् &c., प्रकाशः -शा -शं, प्रकाशी &c., काशी &c., काशिष्णुः -ष्णुः -ष्णु. *See* BRIGHT.

SHINY, *a.* दीप्तिमान् -मती -मत् (त्), तेजोमयः -यी -यं. *See* BRIGHT.

SHIP, *s.* वृहन्नौका, वृहन्नौः *f.*, वृहत्तरणी, नौः *f.*, नौका, वृहत्पोतः, पोतः, तरणिः -णी *f.*, अर्णवयानं, जलयानं, अर्णवपोतः, वोहित्थं, मद्गुः *m.*, प्लवः; 'to take ship,' नौकाम् आरुह् (c. 1. -रोहति -रोढुं); 'ship of war,' युद्धनौः *f.*, युद्धनौका.

SHIP, an affix denoting abstract state or office is rendered by ता or त्वं: as, 'a judge,' धर्म्माध्यक्षः; 'judgeship,' धर्म्माध्यक्षता -त्वं; 'a son,' पुत्रः; 'sonship,' पुत्रता -त्वं.

To SHIP, *v. a.* (Put on board ship) नौकाम् आरुह् in caus. (-रोपयति -यितुं) or प्रविश् (c. 10. -वेशयति -यितुं), नौकायां निविश् or सम् in caus.—(Fix in its place) स्वस्थाने धा or रुह् in caus., स्वस्थानीकृ.

SHIP-MASTER, *s.* नौकापतिः *m.*, नौस्वामी *m.* (न्), नौकास्वामी *m.*, नौकाधिपतिः.

SHIPMENT, *a.* नौकारोपणं, नौकाप्रवेशनं, नौकासमर्पणं.

SHIPPING, *s.* नौकासमूहः, नौकादिसमूहः, नौकासमवायः, नाविकं.

SHIP-WRECK, *s.* नौभङ्गः, नौकाभङ्गः, नौभेदः, नौकानाशः, नौव्यसनं, नौकाव्यसनं, नौकामज्जनं.—(Destruction) नाशः, विनाशः.

To SHIP-WRECK, *v. a.* नौकां भञ्ज् (c. 7. भनक्ति, भंक्तुं) or भिद् (c. 7. भिनत्ति, भेत्तुं) or नश् (c. 10. नाशयति -यितुं) or विनश्, नौभङ्गं कृ, नौभेदं कृ, नौव्यसनं कृ or जन्, उत्कूल् (c. 10. -कूलयति -यितुं), कूलोपरि क्षिप्.

SHIP-WRECKED, *p. p.* भिन्ननौकः -का -कं, भग्ननौकः &c., उत्कूलितः -ता -तं, कूलोपरि क्षिप्तः -प्ता -प्तं, सैकतोपरि क्षिप्तः &c.

To SHIRK, *v. a.* or *n.* छलेन कर्त्तव्यतां त्यज् or परिहृ or हा, छलेन पलाय् (c. 1. पलायते -यितुं, rt. इ) or व्यपदिश् (c. 6. -दिशति-देष्टुं), छलं कृ, छद्म कृ, व्यपदेशं कृ, अपदेशं कृ, अपसृप्, व्यपसृप्, अपक्रम् अपधाव्.

SHIRK, SHIRKER, *s.* कर्त्तव्यत्यागी *m.* (न्), कर्त्तव्यतात्यागी *m.*, छद्मकारी *m.*

SHIRT, *s.* अन्तरीयं, अधोवस्त्रं, अधोवसनं, अधोंशुकं, अन्तर्वस्त्रं, अन्तर्वसनं, क्षौमवस्त्रं, क्षौमवसनं, क्षौमाम्बरं.

To SHIVER, *v. a.* शतखण्डशः कृ or भिद्, सूक्ष्मखण्डशो भिद्, शतखण्डीकृ, सहस्रखण्डशो भञ्ज्, शतचूर्णीकृ, चूर्णीकृ, चूर्ण्, निष्पिष्. *See To* SHATTER, *v. a.*

To SHIVER, *v. n.* (Fall or be broken into many small pieces) सहस्रखण्डशो भिद् in pass. or पत्, शतखण्डशो भिद् in pass., शतचूर्णीभू.—(Quake or shake with cold, &c.) शीतार्त्तत्वात् कम्प् (c. 1. कम्पते -म्पितुं) or विकम्प् or प्रकम्प्, हिमार्त्तत्वात् वेप् (c. 1. वेपते -पितुं) or प्रवेप्, सीत्कारं कृ, शीत्कारं कृ.

SHIVER, *s.* (Small fragment) सूक्ष्मखण्डः -ण्डकः, भित्तिः *f.*, शकलः -लं, छेदः, दलं, छिन्नं, भिन्नं; 'into shivers,' सहस्रखण्डशः, सूक्ष्मखण्डशः.—(Shaking) कम्पः, सीत्कारः, *see* SHIVERING, *s.*

SHIVERED, *p. p.* सहस्रखण्डशो भिन्नः -न्ना -न्नं, सूक्ष्मखण्डशो भिन्नः &c., शतखण्डीकृतः -ता -तं, छिन्नभिन्नः &c., चूर्णितः &c., जर्ज्जरः -रा -रं.

SHIVERING, *s.* (The act of shattering) सहस्रखण्डशो भेदः -दनं, शतखण्डीकरणं, शतचूर्णीकरणं, चूर्णीकरणं, निष्पेषः -षणं.—(Quaking, trembling with cold, &c.) शीतार्त्तत्वात् or शीताविष्टत्वात् कम्पः or कम्पनं, विकम्पः -म्पनं, शरीरकम्पः, देहकम्पः, अङ्गकम्पः, वेपनं, वेपथुः *m.*, सीत्कारः, शीत्कारः, सीत्कृतं.

SHIVERING, *part.* (As with cold) कम्पमानः -ना -नं, विकम्पमानः &c., कम्पनः -ना -नं, कम्पान्वितः -ता -तं, वेपमानः -ना -नं, कम्पितः -ता -तं.

SHOAL, *s.* (A shallow) सैकतं, पुलिनं, कूलं, गाधभूमिः *f.*, उत्तानभूमिः *f.*—(Crowd) सङ्घः, सङ्घातः, समूहः; 'of fish,' मत्स्यसङ्घातः, मत्स्यसङ्घः, पोताधानं.

SHOCK, *s.* (Concussion) क्षोभः, विक्षोभः, संक्षोभः, संघट्टः -ट्टनं, आकस्मिकक्षोभः, आघातः व्याघातः.—(Impression of terror or disgust) त्रासावेशः, बीभत्सावेशः.—(Pile of sheaves) शस्यस्तम्बोत्करः, शस्यस्तम्बचितिः *f.* -राशिः *m.*

To SHOCK, *v. a.* (Shake by sudden collision) क्षुभ् (c. 10. क्षोभयति -यितुं), विक्षुभ्, संक्षुभ्, अकस्मात् क्षुभ्, संघट्ट् (c. 10. -घट्टयति -यितुं), आकस्मिकक्षोभं कृ.—(Strike with sudden terror or disgust) आकस्मिकत्रासं कृ or जन् (c. 10. जनयति -यितुं), आकस्मिकसाध्वसं कृ or जन्, बीभत्सं कृ or जन्, दारुणं कृ or जन् or उत्पद् in caus., भैरवं जन्.—(Pile sheaves) शस्यस्तम्बान् राशीकृ.

SHOCKED, *p. p.* (Struck with sudden horror) आकस्मिकत्रासोपहतः -ता -तं, साध्वसोपहतः &c., अकस्मात् साध्वसोपहतः &c. or बीभत्सोपहतः &c.

SHOCKING, *a.* आकस्मिकत्रासदः -दा -दं, आकस्मिकत्रासकरः -रा -रं, साध्वसकारी -रिणी -रि (न्), त्रासजनकः -का -कं, बीभत्सकरः -रा -रं.

SHOD, *p. p.* सपादुकः -का -कं, उपपादुकः -की -कं, पादुकायुक्तः -क्ता -क्तं, सपादत्रः -त्रा -त्रं, उपानद्युक्तः -क्ता -क्तं, उपानद्गुप्तः -प्ता -प्तं, उपानद्गूढः &c.

SHOE, *s.* पादुका, पादत्रं, उपानत् *f.* (ह्), पादूः *f.*, पादपा, पादत्राणं, पादरक्षा, चरणत्राणं, प्राणहिता, वर्ध्रं, पादबन्धनं; 'of a horse,' खुरत्रं, खुरत्राणं.

To SHOE, *v. a.* पादुकायुक्तं -क्तां कृ, सपादुकं कां कृ, उपानद्युक्तं -क्तां कृ, पादुकाबन्धनं कृ, पादुकां बन्ध् (c. 9. बध्नाति, बन्द्धुं).

SHOE-BLACK, SHOE-CLEANER, *s.* पादुकामार्जकः, पादुकासम्मार्जकः, पादुकामार्जः.

SHOELESS, *a.* पादुकाहीनः -ना -नं, अपपादत्रः -त्रा -त्रं, निष्पादुकः -का -कं.

SHOE-MAKER, *s.* पादुकाकारः, पादुकाकृत् *m.*, पादूकृत् *m.*, पादुकृत् *m.*, चर्म्मकारः -रकः, चर्म्मकृत् *m.*, चर्म्मकारी *m.* (न्), चर्म्मारः; 'shoemaker's knife,' चर्म्मप्रभेदिका, आरा.

Shoe-string, *s.* पादुकाबन्धनं -नी, पादुकाबन्धः, पादुकायोक्त्रं, उपानहन्धनं, पादुकाबन्धनसूत्रं, पादुकाबन्धनरज्जुः *m.f.*

To shoot, *v. a.* (Let fly, discharge) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), अस् (c. 4. अस्यति -सितुं), प्रास्, सृज् (c. 6. सृजति, स्रष्टुं), पत् (c. 10. पातयति -यितुं), ईर् (c. 10. ईरयति -यितुं), उदीर्, प्रेर्; 'to shoot an arrow,' शरं प्रक्षिप्; 'a dart,' अस्त्रं क्षिप्; 'a bullet from a gun,' आग्नेयनाडेर् लोहगुलिकां प्रक्षिप् or निःसृ in caus.—(Strike with any thing, kill) प्रहृ (c. 1. -हरति -हर्त्तुं), आहन् (c. 2. -हन्ति -न्तुं), हन्, अभ्याहन्, व्यध् (c. 4. विध्यति, व्यद्धुं), आव्यध्; 'with an arrow,' शरेण आहन्.—(Emit) उत्सृज्, विसृज्, निरस्, निःसृ in caus.—(Thrust forward) प्रसृ in caus.

To shoot, *v. n.* (With an arrow) शरप्रक्षेपं कृ, शरासनं कृ.—(With a gun) गुलिकाप्रक्षेपं कृ.—(Germinate) स्फुट्, उद्भिद् in pass., प्रोद्भिद्, प्ररुह्, विकस्, अङ्कुर (nom. अङ्कुरयति -यितुं), मुकुल.—(As pain) मर्म्म व्यध् (c. 4. विध्यति, व्यद्धुं), मर्म्मवेधनं कृ, शूल् (c. 1. शूलति -लितुं), शूलोपहतः -ता -तं भू, तीक्ष्णवेदनाम् अनुभू, तीव्रवेदनोपहतः -ता -तं भू.

Shoot, *s.* (Sprout) अङ्कुरः, पल्लवः, किसलयः, किशलयः, किसलः -लं, नवपल्लवः, प्ररोहः, प्रवालः, उद्भिज्जः, उद्भिद् *f.*, विसलं, नवविटपः, बालविटपः.

Shooter, *s.* क्षेप्ता *m.* (प्तृ), प्रक्षेप्ता *m.*, शरप्रक्षेपकः, गुलिकाप्रक्षेपकः; 'a good or sharp shooter,' क्षीप्रवेधी *m.* (न्).

Shooting, *part.* (Sprouting) उद्भिज्जः -ज्जा -ज्जं, उद्भिद् *m. f. n.*, प्ररोही &c.

Shooting, *s.* (Act of shooting arrows) शरप्रक्षेपः -पणं, शरासनं, बाणासनं, बाणमोक्षणं, शरमोक्षणं.—(Bullets, &c., with a gun) गुलिकाप्रक्षेपः, गुलिकासनं, गोलासनं.—(Sharp pain) शूलः -लं, तोदः -दनं, वेदना, तीक्ष्णवेदना, तीव्रवेदना.

Shop, *s.* पण्यशाला, विक्रयशाला, विक्रयगृहं, विक्रयस्थानं, पण्यवीथी -थिः *f.*, पण्यवीथिका, वीथिः -थी *f.*, विपणिः -णी *m. f.*, आपणः, आसनी, पाणिः *f.*, आपारिः *m.*; 'work-shop,' शिल्पशाला, शिल्पगृहं.

To shop, *v. n.* द्रव्यक्रयणार्थं विक्रयशालाम् अभिगम् (c. 1. -गच्छति -गन्तुं).

Shop-keeper, *s.* आपणिकः, विपणी *m.* (न्), पण्याजीवः, पण्यशालाधिकारी *m.* (न्), व्यापारी *m.*, क्रयविक्रयोपजीवी *m.*, क्रयविक्रयिकः, तुलाधारः.

Shop-lifter, *s.* चित्ताभः, विक्रयशालास्थद्रव्यापहर्त्ता *m.* (र्त्तृ).

Shop-lifting, *s.* विक्रयशालास्थद्रव्यहरणं, पण्यशालास्थद्रव्यापहरणं.

Shop-man, *s.* विक्रयशालायां सेवकः or कर्म्मकरः, आपणिकः.

Shopping, *s.* पण्यशालाभिगमनं, विक्रयशालाभिगमनं, पण्यशालासेवनं.

Shore, *s.* तीरं, कूलं, तटं, प्रतीरं, रोधस्, वेला, कूलभूः *f.*, मर्य्यादा, अनुमान् *m.* (त्), वप्रः, आयोगः, पाटकः; 'of the sea,' समुद्रतीरं, समुद्रतटं, समुद्रान्तः -न्तं; 'brought to shore,' उत्कूलितः -ता -तं.—(Prop) उपस्तम्भः, उपघ्नः.

To shore, *v. a.* (Prop) दीर्घकाष्ठेन उपस्तम्भ् or संस्तम्भ्.

Shorn, *p. p.* (Cut off) छिन्नः -न्ना -न्नं, अवच्छिन्नः &c., लूनः -ना -नं.—(Having the hair or wool cut off) छिन्नकेशः -शा -शं, छिन्नलोमा -मा -म (न्), कृत्तकेशः &c., कृत्तलोमा &c., मुण्डितः -ता -तं, कृतमुण्डनः -ना -नं, कृतवापः -पा -पं, परिवापितः -ता -तं, कृतचूडः -डा -डं.—(Deprived) हृतः -ता -तं, अपहृतः &c., हीनः -ना -नं.

Short, *a.* (Not long, not having great extension) ह्रस्वः -स्वा -स्वं, अल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं, खर्वः -र्वा -र्वं, अल्पकः -का -कं, अदीर्घः -र्घा -र्घं; 'very short,' ह्रसिष्ठः -ष्ठा -ष्ठं; 'a short plank,' क्षुद्रफलकः, ह्रस्वफलकः; 'a short distance,' कियद्दूरं, ईषद्दूरं, कियत्पर्य्यन्तं.—(Not long in time) अल्पकालिकः -की -कं, अल्पकालीनः -ना -नं, अदीर्घकालिकः &c., [illegible]कालीनः &c., अल्पकालस्थायी -यिनी -यि (न्), अचिरस्था[illegible]; 'in a short time,' *see* Shortly; 'for a short time,' अल्पकालं, अल्पक[illegible], क्षणमात्रं, कियत्कालं, ईषत्कालं; 'a short delay,' क्षणक्षेपः.—[illegible] Short in size or measure) ह्रस्वपरिमाणः -णा -णं, अल्पपरिमाणः &c., क्षुद्रपरिमाणः &c., अल्पप्रमाणः &c., अल्पप्रमाणकः -का -कं.—(In stature) ह्रस्वः -स्वा -स्वं, ह्रस्वशरीरः -रा -रं, ह्रस्वाङ्गः -ङ्गी -ङ्गं, अल्पशरीरः &c., अल्पतनुः -नुः -नु, वामनतनुः &c., क्षुद्रतनुः &c., अल्पमूर्त्तिः -र्त्तिः -र्त्ति, ह्रस्वमूर्त्तिः -र्त्तिः -र्त्ति, स्तोककायः -या -यं, वामनः -ना -नं, खर्वः -र्वा -र्वं, अतुङ्गः -ङ्गा -ङ्गं, नीचः -चा -चं, नीचकः -का -कं, पृश्निः -श्निः -श्नि, न्यङ्नीची न्यक्.—(Brief) अविस्तीर्णः -र्णा -र्णं, संक्षिप्तः -प्ता -प्तं, परिमितशब्दकः -का -कं, अल्पशब्दकः &c.—(Insufficient) न्यूनः -ना -नं, हीनः -ना -नं, अपर्य्याप्तः -प्ता -प्तं, अननुरूपः &c.—(Deficient in) हीनः -ना -नं, न्यूनः -ना -नं, विकलः -ला -लं, रहितः -ता -तं, ह्रसितः &c.—(Not of adequate extent) न्यूनपरिमाणः -णा -णं, न्यूनः -ना -नं; 'short of one's expectations,' आशान्यूनः -ना -नं; or expressed by ऋते, विना, अन्तरेण, वर्जयित्वा &c.; as, 'I shall be satisfied with nothing short of Rāma's exile,' नान्येन तुष्येयम् ऋते रामविवासनात्, *see* Except.—(As a vowel, &c.) लघुः -घुः -घ्वी -घु, ह्रस्वः -स्वा -स्वं; 'a short vowel,' ह्रस्वस्वरः, मात्रा.—(Friable) सुचूर्णनीयः -या -यं, आशुचूर्णनीयः &c., चूर्णगुणकः -का -कं, चूर्णनशीलः -ला -लं, भञ्जनशीलः &c., भिदुरः -रा -रं.—(To be short, come short), *see To* fail, *v. n.*—(To cut short), *see To* curtail, lessen.—(To fall short), *see To* fail, *v. n.*—(To stop short) अकस्मात् स्था or अवस्था, मार्गमध्ये स्था, अर्द्धमार्गे स्था or निवृत्.—(In short) संक्षेपतस्, समासतस्, अल्पशब्दतस्, सङ्क्षेपतस्, वस्तुतस्.

Short-bread, short-cake, *s.* सुभेद्यपिष्टकः, सुचूर्णनीयपिष्टकः.

Short-coming, *s.* दोषः, अपराधः, न्यूनता, अतिपातः, अपक्रिया, उपात्ययः, परित्यागः, छिद्रं, वैकल्यं. *See* Fault.

To shorten, *v. a.* (Make short) ह्रस् (c. 10. ह्रासयति -यितुं), ह्रस्वीकृ, अल्पीकृ, न्यूनीकृ, वामनीकृ.—(Contract) संक्षिप्, संह्रृ, संकुच्.

To shorten, *v. n.* अल्पीभू, न्यूनीभू, ह्रस् (c. 1. ह्रसते -सितुं), ह्रस्वीभू.

Shortened, *p. p.* ह्रसितः -ता -तं, न्यूनीकृतः -ता -तं, न्यूनीभूतः &c., अल्पीकृतः &c., अल्पीभूतः &c., संक्षिप्तः -प्ता -प्तं, संकुचितः -ता -तं.

Short-hand, *s.* संक्षिप्ताक्षरलिखनं, संक्षिप्ताक्षरलिपिः *f.*, संक्षिप्ताक्षरं; 'the art,' संक्षिप्ताक्षरलेखनविद्या.

Short-lived, *a.* अल्पायुः -युः -यु or अल्पायूः -यूः -युः (स्), ह्रसितायुः &c., अल्पवयाः -याः -यः (स्), अल्पकालिकः -का -कं, अचिरस्थायी -यिनी -यि (न्), अचिरजीवी &c., अदीर्घजीवी &c., क्षणस्थायी &c., क्षणजीवी &c.

Shortly, *adv.* (Quickly, in a little time) अचिरेण, अचिरात्, न चिरेण, न चिरात्, शीघ्रं, सपदि, अतिरात्.—(In a few words) अल्पशब्दतस्, संक्षेपतस्, समासतस्, अविस्तरेण, अविस्तरशस्.

Shortness, *s.* ह्रस्वता -त्वं, ह्रसिमा *m.* (न्), अल्पता -त्वं, क्षुद्रता, अदीर्घता.—(Of time) अल्पकालिकत्वं, कालाल्पता.—(Of life) आयुरल्पता -त्वं.—(Of size or stature) ह्रस्वता, ह्रस्वशरीरता, अल्पशरीरता,

वामनता, खर्वता, नीचता, अणुकता.—(Briefness) अविस्तीर्णता, अविस्तारः, अविस्तरः, संक्षेपः, संक्षिप्तता, संक्षिप्तिः *f.*, उपसंक्षेपः, समस्तता, विस्ताराभावः, अल्पविस्तारः.—(Insufficiency, deficiency) न्यूनता -त्वं, हीनता, अपर्याप्तिः *f.*, अल्पत्वं, वैकल्यं, परिमितता.

HORT-SIGHTED, *a.* अल्पदृष्टिः -ष्टिः -ष्टि, अल्पदृक् *m.f.n.* (श्), अल्पदृक्, अदूरदृष्टिः &c., अदीर्घदृष्टिः &c., अदूरदर्शी -र्शिनी &c., अदीर्घदर्शी &c.

HORT-SIGHTEDNESS, अदीर्घदृष्टिः *f.*, अदूरदृष्टिः *f.*, अल्पदृष्टिः *f.*

HORT-WINDED, *a.* दुःश्वासी -सिनी -सि (न्), श्वासकृच्छ्रग्रस्तः -स्ता -स्तं.

HOT, *p. p.* (Discharged, as an arrow, &c.) क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः &c., अस्तः -स्ता -स्तं, निरस्तः &c., मुक्तः -क्ता -क्तं, धनुर्मुक्तः &c.; 'as a bullet, &c.,' आग्नेययन्त्रमुक्तः &c., यन्त्रमुक्तः &c.; 'is shot forth,' प्रक्षिप्यते, निःसार्यते.—(Struck with an arrow) शराहतः -ता -तं, बाणाहतः &c., शरविद्धः -द्धा -द्धं; 'with a bullet,' गुलिकाहतः -ता -तं.

HOT, *s.* (Shooting, discharge of any missile) क्षेपः -पणं, प्रक्षेपः असनं, पातः -तनं, प्रहारः; 'of an arrow,' *see* SHOOTING, *s.*—(Missile, weapon) अस्त्रं, मुक्तं.—(Bullet) गुलिका, गुटिका, लोहगुलिका, गुलिः -ली *f.*, सीसकगुलिः *f.*, दूरवेधिनी गुलिका, आग्नेयास्त्रं.—(Flight of an arrow) शरायणं, बाणायणं, शरपातः.—(Of a bullet) गुलिकायनं, गुटिकायनं.—(A good shot, a good marksman) शीघ्रवेधी *m.* (न्), लक्ष्यवेधी, लक्ष्यवेधनकुशलः.

'O SHOT, *v. a.* गुलिकां निविश् in caus., गुलिकागर्भं -र्भां कृ.

HOTTED, *p.p.* गुलिकागर्भः -र्भा -र्भं, आग्नेयगुलिगर्भः &c., लोहगुलिगर्भः &c.

HOULD. When this auxiliary expresses obligation, it is rendered in Sanskrit by the fut. past. part., *see* OUGHT. When it expresses present or future time conditionally, it may be rendered by the present tense, or not unfrequently by the conditional tense.

HOULDER, *s.* स्कन्धः, अंशः, अंसः, भुजशिरस् *n.*, भुजशिखरं, दोःशिखरं, बाहुमूलं; 'having wide shoulders,' पृथुस्कन्धः -न्धा -न्धं, विपुलस्कन्धः &c., विपुलांशः -शा -शं; 'shoulder-joint,' स्कन्धसन्धिः *m.*, चिह्न *n.*; 'upon the shoulder,' स्कन्धे, स्कन्धेन, प्रतिस्कन्धं; 'he bears faggots on his shoulder,' इन्धनं स्कन्धेन वहति; 'the dog is borne on the shoulder,' कुक्कुरः स्कन्धेन उह्यते; 'he places the goat on his shoulder,' छागं स्कन्धे करोति; 'resting on the shoulder,' स्कन्धस्थः -स्था -स्थं.

'O SHOULDER, *v. a.* (Take or place on the shoulder, carry on the shoulder) स्कन्धे कृ or स्था in caus., स्कन्धस्थं -स्थां कृ, स्कन्धे आरुह् in caus., स्कन्धेन वह्.—(Push with the shoulder) स्कन्धेन तड् (c. 10. ताडयति -यितुं).

HOULDER-BLADE, *s.* फलकः, स्कन्धफलकः, अंशः, अंसः, भुजशिरस् *n.*, स्कन्धः, कासवरं.

'O SHOUT, *v. n.* (Utter a loud cry) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), उच्चैःस्वरेण क्रुश् or प्रक्रुश् or विक्रुश्, उच्चैः or उच्चैःस्वरेण नद् (c. 1. नदति -दितुं) or प्रणद् or घुष् (c. 10. घोषयति -यितुं) or उद्घुष्, मुक्तकण्ठं क्रुश्, महानादं कृ, महाघोषं कृ, महाध्वनिं कृ, प्रणादं कृ, उत्क्रोशं कृ, कोलाहलं कृ, चित्कारं कृ, चीत्कृ.—(For joy) हर्षनादं कृ, हर्षघोषं कृ, जयघोषं कृ, जयशब्दं कृ, जयकोलाहलं कृ, किलकिल (nom. किलकिलायति), जयजयेतिशब्दं कृ.

HOUT, *s.* (Loud cry) उत्क्रोशः, उत्क्रुष्टं, विक्रुष्टं, प्रणादः, महानादः, निनादः, महाघोषः, घोषणं -णा, उद्घोषणं, कोलाहलः, उच्चैर्घुष्टं, उच्चैःस्वरः,

चित्कारः, चीत्कारः, महाध्वनिः *m.*, संहूतिः *f.*, बहुभिः कृता संहूतिः.—(Of joy or triumph) जयघोषः, जयकोलाहलः, जयशब्दः, जयध्वनिः *m.*, जयरवः, जयारवः, हर्षनादः, हर्षस्वनः, जयजयेतिशब्दः.

To SHOVE, *v. a.* प्रसृ (c. 10. -सारयति -यितुं), संचल् in caus. *See To* PUSH.

SHOVE, *s.* प्रसारणं, अपसारणं, सञ्चालनं, प्रहारः. *See* PUSH, *s.*

SHOVEL, *s.* खनित्रः *f.*, कुद्दालः, कुदालः, काष्ठकुद्दालः.

To SHOW, *v. a.* (Exhibit) दृश् (c. 10. दर्शयति -यितुं), प्रदृश्, अभिदृश्, निदृश्, प्रतिदृश्, सन्दृश्, विदृश्, दर्शनं कृ, प्रदर्शनं कृ; 'to show cause of fear,' भयहेतुप्रदर्शनं कृ.—(Point out, indicate) निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, आदिश्, विनिर्दिश्, उद्दिश्, आदिश् in caus. (-देशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), अभिसूच्; 'show the way,' मार्गम् आदेशय.—(Inform, make known) ज्ञा in caus., बुध् in caus., प्रबुध्, निविद् in caus., आख्या, ख्या, कथ्.—(Manifest) प्रकाश् (c. 10. -काशयति -यितुं), व्यञ्ज्, व्यक्तीकृ, आविष्कृ, प्रादुष्कृ, प्रकटीकृ.—(Show a kindness, favor, &c.) उपकृ, उपकारं कृ, अनुग्रहं कृ, अनुग्रह्.—(Show forth), *see To* MANIFEST.—(Show off) दम्भार्थं दृश् in caus.—(Show one's self) आत्मानं दृश् in caus., दृश् in pass. (दृश्यते); 'he shows himself as if dead,' आत्मानं मृतवद् दर्शयति.—(Show up), *see To* EXPOSE.

To SHOW, *v. n.* दृश् in pass. (दृश्यते), लक्ष् in pass. (लक्ष्यते), प्रतिभा (c. 2. -भाति -तुं).

SHOW, *s.* (Appearance, semblance) आभासः, भासः, आकारः, आभा, दर्शनं.—(Ostentatious parade) दम्भः, आडम्बरः -रं, दम्भार्थं प्रकाशनं, कौतुकं.—(Pretence) छद्मन् *n.* (न्), व्यपदेशः.—(Spectacle) प्रेक्षा -क्षणं, कौतुकं, चमत्कारः.

SHOWER, *s.* (One who shows) दर्शकः, प्रदर्शकः, सन्दर्शकः, दर्शयिता *m.* (तृ).

SHOWER, *s.* (Of rain) धारासारः, धारासम्पातः, धारा, आसारः, वर्षः, वृष्टिः *f.*, आवृष्टिः *f.*, प्रवर्षः, तरसः.—(Of arrows) शरवर्षः, शरवृष्टिः *f.*, शरधारा, पत्रवृष्टिः.—(Of tears) अश्रुधारा.

To SHOWER, *v. a.* or *n.* वृष् (c. 1. वर्षति -ते -र्षितुं), धारासारेण वृष्; 'to shower down water,' जलधर्षेण or जलवर्षं वृष्, वारिणा अभिवृष्; 'to shower blood,' रक्तं वृष्; 'to shower arrows,' शरान् वृष्. *See To* RAIN.

SHOWER-BATH, *s.* धारायन्त्रगृहं, धारायन्त्रमन्दिरं, धारायन्त्रं, शिरोभिषेचनयन्त्रं, शिरोभिषेचनी, शिरोभिषेकः, शिरःस्नानं.

SHOWERY, *a.* वर्षुकः -का -कं, बहुवृष्टिः -ष्टिः -ष्टि, वृष्टिमान् -मती -मत् (त्), बहुधारः -रा -रं, वर्षिकः -की -कं. *See* RAINY.

SHOWING, *s.* दर्शनं, प्रदर्शनं, सन्दर्शनं, निर्देशः, प्रकाशनं, सूचनं.

SHOW-MAN, *s.* दर्शकः, प्रदर्शकः, दर्शयिता *m.* (तृ), कौतुकदर्शकः.

SHOWN, *p. p.* दर्शितः -ता -तं, प्रदर्शितः &c., सन्दर्शितः &c., निर्दिष्टः -ष्टा -ष्टं, प्रदिष्टः &c., सूचितः -ता -तं, ज्ञापितः &c., प्रकाशितः &c.

SHOWY, *a.* (Make a fine show) अतिशोभनः -ना -नं, दृश्यमानशोभनः -ना -नं, अतिदर्शनीयः -या -यं, अतिप्रकाशः -शा -शं, आडम्बरी -रिणी -रि (न्); 'showy learning,' सभापाण्डित्यं.

SHRED, *s.* खण्डः -ण्डकः, पटखण्डः, वस्त्रखण्डः, दीर्घखण्डः -ण्डकः.

To SHRED, *v. a.* दीर्घखण्डीकृ, दीर्घखण्डशः कृ or छिद् or व्यवछिद्.

SHREW, *s.* (Scold) कर्कशा, कुशीला, वामशीला, वक्रशीला, दुःशीला, उग्रशीला, कटुशीला.—(Mouse) वेश्मनकुलः, *see* SHREW-MOUSE.

SHREWD, *a.* (Cunning, knowing) विदग्धः -ग्धा -ग्धं, विचक्षणः -णा -णं, चतुरः -रा -रं, चातुरः -री -रं, पक्वबुद्धिः -द्धिः -द्धि, परिपक्वबुद्धिः

&c., पक्कः -क्का -क्कं, परिपक्कः &c., सूक्ष्मबुद्धिः &c., कुबुद्धिः &c., दीर्घदृष्टिः -ष्टिः -ष्टि, निपुणः -णा -णं, कुशलः -ला -लं, नागरः -रा -रं.—(Proceeding from cunning) विदग्ध in comp., वैदग्ध्यप्रयुक्तः-क्ता-क्तं.

Shrewdly, *adv.* विदग्धवत्, वैदग्ध्येन, सवैदग्ध्यं, विचक्षणवत्.

Shrewdness, *s.* वैदग्ध्यं, वैदग्धं, विदग्धता, विचक्षणता, वैचक्षण्यं, चतुरता, चातुर्य्यं, बुद्धिपक्कता, पक्कता, परिपक्कता, परिपाकः, नैपुण्यं, परिवेदना.

Shrewish, *a.* कर्कशः -शा -शं, कर्कशस्वभावः -वा -वं, कर्कशशीलः -ला -लं, वामशीलः &c., वक्रशीलः &c., कटुशीलः &c., कुप्रकृतिः -तिः -ति.

Shrew-mouse, *s.* वेश्मनकुलः, छिक्कलिका, दीना, चिक्का.

To **shriek**, *v. n.* उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), कर्कशस्वरेण क्रुश् or रु or क्रन्द् (c. 1. क्रन्दति -न्दितुं), चित्कारं कृ, चीत्कारं कृ. *See To* scream.

Shriek, *s.* रावः, कर्कशरावः, चित्कारः, चीत्कारः, उत्क्रोशः, उत्क्रुष्टं, विक्रुष्टं, नादः, क्रन्दनं, क्रन्दितं, कोलाहलः, उच्चध्वनिः *m.*

Shrike, *s.* (Fork tailed butcher-bird) कलिङ्गः, भिङ्गकः, भृङ्गः, भृङ्गकः, धूम्याटः, धूम्राटः.

Shrill, *a.* कर्कशः -शा -शं, पटुः -टुः -टु, कर्णवेधकः -का -कं, कर्णवेधी -धिनी -धि (न्), कर्णकटुः -टुः -टु, कल्लोलालः -ला -लं, उत्तालः -ला -लं; 'shrill-voiced,' कर्कशस्वरः -रा -रं, उच्चैःस्वरः &c.

Shrillness, *s.* कर्कशता -त्वं, कार्कश्यं, कटुता, कर्णवेधकत्वं.

Shrilly, *a.* कर्कशं, कर्कशस्वरेण, उच्चैःस्वरेण, पटुस्वरेण.

Shrimp, *s.* जलवृश्चिकः, इचाकः, गङ्गाटेयः, चिङ्गटः, गलाविलः, गलाविलः, गलानिकः.

Shrine, *s.* आयतनं, देवतायतनं, देवायतनं, पुण्यतीर्थं, तीर्थं, पुण्यद्रव्यायतनं, पुण्यद्रव्याधारः, पवित्रद्रव्याधारः.

To **shrink**, *v. n.* संकुच् in pass. (-कुच्यते), सङ्कोचम् इ (c. 2. एति -तुं), सङ्कोचं या, कुचनम् इ, कुच् in pass. (कुच्यते), आकुच्, संक्षिप् in pass. (-क्षिप्यते), संहृ in pass. (-ह्रियते), सद् (c. 1. सीदति, सत्तुं); 'as in fear, terror, &c.,' विकम्प् (c. 1. -कम्पते -म्पितुं), वित्रस् (c. 4. -त्रस्यति -सितुं), उद्विज्; 'with shame,' लज्ज् (c. 1. लज्जते -ज्जितुं), विलज्ज्.

To **shrink**, *v. a.* (Cause to contract) संकुच् (c. 1. -कोचति -चितुं), कुच् (c. 1. -कुचति -चितुं, c. 10. -कुचयति -यितुं), सङ्कोचं गम् in caus., सङ्कोचं कृ.

Shrinking, *s.* सङ्कोचः, आकुचनं, कुचनं, संक्षेपः, *see* Contraction.

To **shrivel**, *v. n.* संकुच् in pass. (-कुच्यते), आकुच् in pass. (-कुच्यते), कुच्, शॄ in pass. (-शीर्य्यते), विशॄ, संश्यानः -ना -नं भू, वलिपूर्णः -र्णा -र्णं भू, वलिरूपः -पा -पं भू.

To **shrivel**, *v. a.* (Cause to shrink) संकुच् (c. 1. -कोचति -चितुं), शॄ in caus. (शारयति -यितुं), शीर्णीकृ, विशीर्णीकृ, संश्यानीकृ.

Shrivelled, *p. p.* सङ्कुचितः -ता -तं, कुचितः &c., आकुचितः &c., शीर्णः -र्णा -र्णं, विशीर्णः &c., संश्यानः -ना -नं, विक्लिन्नः -न्ना -न्नं; 'into wrinkles,' वलिनः -ना -नं, वलिभः -भा -भं, वलिमान् -मती -मत् (त्).

Shroff, *s.* धनव्यापारी *m.* (न्), मुद्राव्यापारी *m.*, कलोपजीवी *m.*

Shroud, *s.* (For a corpse) शववस्त्रं, शववसनं, शवपरिधानं, प्रेतवस्त्रं, शवाच्छादनं.—(Cover) आच्छादनं.

To **shroud**, *v. a.* छद् (c. 10. छादयति -यितुं), प्रच्छद्. *See To* shelter.

Shrouded, *p.p.* प्रच्छन्नः -न्ना -न्नं, प्रच्छादितः &c., गूढः -ढा -ढं, उपगूढः &c.

Shrub, *s.* (Woody plant, dwarf tree) गुल्मः, स्तम्बः, कुक्षुटः, क्षुपः, कुपः, अप्रकाण्डः, विस्तारः, मुद्गपर्णः, अल्पवृक्षः.—(Drink), *see* Punch.

Shrubbery, *s.* गुल्मवाटिका, गुल्मवाटी, वृक्षवाटिका, उपवनं.

Shrubby, *a.* गुल्मावृतः -ता -तं, तरुगुल्मावृतः &c., गुल्ममयः -यी -यं.

To **shrug**, *v. a.* or *n.* (The shoulders) असमोधसूचनार्थं स्कन्धसङ्कोचं कृ or स्कन्धाकुञ्चनं कृ or स्कन्धोत्कर्षणं कृ or स्कन्धवेष्टनं कृ.

Shrug, *s.* स्कन्धसङ्कोचः, स्कन्धाकुञ्चनं, स्कन्धोत्कर्षणं, स्कन्धचेष्टा.

Shrunk, *s.* सङ्कुचितः -ता -तं, ...: -ता -तं, आकुञ्चितः &c., संवृतः -ता -तं, शीर्णः -र्णा -र्णं, संश्यानः -ना -नं, ...: -ता -तं, संक्षिप्तः -प्ता -प्तं, ह्रसितः -ता -तं, सन्नः -न्ना -न्नं, सङ्कीर्णः -र्णा -र्णं.

To **shudder**, *v. n.* कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, स्फुर् (c. 6. स्फुरति -रितुं), विस्फुर्, प्रस्फुर्, वेप् (c. 1. वेपते -पितुं), प्रवेप्, हुल् (c. 1. हुलति -लितुं), सीत्कारं कृ, शीत्कारोपहतः -ता -तं भू, सीत्कारग्रस्तः -स्ता -स्तं भू.

Shudder, **shuddering**, *s.* अङ्गकम्पः, शरीरकम्पः, अङ्गस्फुरणं, शरीरस्फुरणं, विस्फुरणं, अङ्गवेपनं, कम्पः -म्पनं, विकम्पः -म्पनं, सीत्कारः, सीत्कृतं, शीत्कारः.

To **shuffle**, *v. a.* (Shove one way and the other) इतस्ततः संचल् (c. 10. -चालयति -यितुं) or चल्, इतस्ततः सृ (c. 10. सारयति -यितुं) or विक्षिप्, बहुधा चल्; 'to shuffle the feet,' पादास्फालनं कृ, पादचापल्यं कृ.—(Mix together) सम्मिश्रीकृ, अस्तव्यस्तीकृ, अधरोत्तरीकृ, संकुलीकृ, सङ्करीकृ, विक्षिप्, सम्मिश्र्; 'cards,' द्यूतपत्रसम्मिश्रणं कृ.

To **shuffle**, *v. n.* (Practice evasions) छद्म कृ, छलं कृ, व्यपदेशं कृ, अपदेशं कृ, व्यपदिश् (c. 6. -दिशति -देष्टुं), कपटं कृ, वक्रवृत्तिः -त्तिः -त्ति भू, चपलः -ला -लं भू.

Shuffle, **shuffling**, *s.* (Mixing, pushing together) सम्मिश्रणं, अस्तव्यस्तीकरणं, इतस्ततः सञ्चालनं or सारणं or विक्षेपः; 'of the feet,' पादास्फालनं, पादचापल्यं.—(Evasion) छद्म *n.* (न्), छलं, व्यपदेशः, अपदेशः, वक्रता, चपलता, चापल्यं.

Shuffler, *s.* वक्रवृत्तिः *m.*, चपलवृत्तिः *m.*, छद्मवृत्तिः *m.* छली *m.* (न्).

To **shun**, *v. a.* वृज् (c. 10. वर्जयति -यितुं), परिवृज्, विवृज्, परिहृ (c. 1. -हरति -हर्तुं), प्रोज्झ् (c. 6. प्रोज्झति -ज्झितुं, rt. उज्झ्), उज्झ्, हा (c. 3. जहाति, हातुं), त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, वर्जीकृ.

Shunned, *p.p.* वर्जितः -ता -तं, विवर्जितः &c., परिहृतः -ता -तं, प्रोज्झितः -ता -तं, वर्जीकृतः -ता -तं, त्यक्तः -क्ता -क्तं, परित्यक्तः &c.

Shudra, *s.* *See* Súdra.

To **shut**, *v. a.* (Close, fasten up) पिधा (c. 3. -दधाति -धातुं), अपिधा, रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, अवरुध्, संवृ (c. 5. -वृणोति -वरितुं -रीतुं), बन्ध् (c. 9. बध्नाति, बन्द्धुं), संहृ (c. 1. -हरति -हर्तुं), संहन् (c. 2. -हन्ति -न्तुं); 'shut the door,' द्वारं पिधेहि or रुन्द्धि; 'they shut the doors,' द्वाराणि पिदधुः or रुरुधुः; 'to shut the mouth,' मुखं संवृ or पिधा; 'the hands,' हस्तौ बन्ध् or संहन्; 'a book,' पुस्तकं बन्ध्; 'the lips,' ओष्ठौ संवृ; 'the eyes,' मील्, निमील्, निमिष्, *see To* close, *v. a.*—(Contract, compress) संवृ, संहृ, संकुच्, संहन्, सम्पीड्.—(Bar) अर्गलेन बन्ध्.—(Obstruct) रुध्, निरुध्, स्तम्भ्, प्रतिबन्ध्.—(Shut in), *see To* confine, inclose.—(Shut out) बहिष्कृ, निवृ, निराकृ, निषिध्, *see To* exclude, preclude.—(Shut up) निरुध्, अवरुध्; 'in a prison,' कारायां निरुध्; 'in a box,' सम्पुटीकृ.

Shut, *p. p.* रुद्धः -द्धा -द्धं, पिहितः -ता -तं, संवृतः -ता -तं, बद्धः -द्धा -द्धं, पिधानवान् -वती -वत् (त्), सपिधानः -ना -नं; 'as a bud,' अविकचः -चा -चं, मुकुलीकृतः -ता -तं; 'as the eye,' निमीलितः -ता -तं, मुकुलितः &c.

SHUTTER, s. अवरोधकं, प्रतिबन्धकं, आच्छादनं, कपाटः; 'of a window,' जालकावरोधकं, जालकाच्छादनं, वातायनावरोधकं.

SHUTTLE, s. (Of a weaver) वसरः, सूत्रवेष्टनं, सूत्रवर्त्म, तसरः, मस्त्रिकः, नाडिचीरं.

SHUTTLE-COCK, s. लघुगुलिकावि[illegible]ो विनोदार्थं दण्डाहतो भूत्वा इतस्ततः प्रक्षिप्यते.

SHY, a. सभाभीतः -ता -[illegible] सभाभीरुः -रुः -रु, जनभीतः -ता -तं, लोकभीतः &c., भाषणविमुखः -खा -खी -खं, अल्पभाषी -षिणी -षि (न्), आलापविरक्तः -क्ता -क्तं, कातरः -रा -रं, आगमनभीरुः -रुः -रु, भीरुः -रुः -रु.

SHYNESS, s. सभाभीतिः f., सभाभीरुता, जनभीतिः f., लोकभीतिः f., सभाकम्पः, भाषणविमुखता, आलापवैरक्त्यं, भीरुता, कातरता.

SIBILANT, s. (Letter) ऊष्मः. See HISSING.

SICK, a. (Inclined to vomit) वमनेच्छुः -च्छुः -च्छु, विवमिषुः -षुः -षु, वमनोन्मुखः -खा -खं, वमी -मिनी -मि (न्), उद्गारी -रिणी &c., छर्दनेच्छुः -च्छुः -च्छु.—(Ill) रोगी -गिणी -गि (न्), रोगार्त्तः -र्त्ता -र्त्तं, रोगातुरः -रा -रं, रोगान्वितः -ता -तं, रोगग्रस्तः -स्ता -स्तं, अस्वस्थः -स्था -स्थं, आमयः -या -यं, व्याधितः -ता -तं, व्याधियुक्तः -क्ता -क्तं, व्रणी &c., विकारी &c., आमयावी &c., उपतापी &c., अभ्यान्तः -न्ता -न्तं, रुग्नः -ग्ना -ग्नं, see ILL, a.—(Disgusted) जातबीभत्सः -त्सा -त्सं, द्वेषी -षिणी &c., विकृतः -ता -तं, निर्विण्णः -ण्णा -ण्णं; 'sick of the world,' भवरोगी -गिणी &c., भवार्त्तः -र्त्ता -र्त्तं; 'sick-room,' विशिखा.—(To be sick, vomit) वम् (c. 1. वमति -मितुं), छर्द् (c. 10. छर्दयति -यितुं).

To SICKEN, v. a. (Disgust) बीभत्सं कृ or जन् (c. 10. जनयति -यितुं), वैकृत्यं जन्.—(Make sick) वमनेच्छां जन्, छर्दनेच्छां जन्, रोगार्त्तीकृ, सरोगीकृ.

To SICKEN, v. n. (Fall sick) रोगग्रस्तः -स्ता -स्तं भू, रोगार्त्तः -र्त्ता -र्त्तं भू, ज्वर् (c. 1. ज्वरति -रितुं), सरोगीभू, see *To* LANGUISH.—(Feel disgust) बीभत्सोपहतः -ता -तं भू, जातबीभत्सः -त्सा -त्सं भू.

SICKENING, a. बीभत्सजनकः -का -कं, विरक्तिजनकः &c., see DISGUSTING.

SICKISH, a. ईषद्वमनेच्छुः -च्छुः -च्छु, ईषद्रोगी -गिणी -गि (न्).

SICKLE, s. लवित्रं, दात्रं, लवाणकं, लवाकः, शस्यकर्त्तनी, शस्यछेदनी, कर्त्तनी, लवग्नः, लवहननं -नी, लवघनः, असृङ्गीकः.

SICKLINESS, s. सरोगता, रोगिता, रोगाधीनता, रोगशीलता, जन्मरोगिता.

SICKLY, a. (Unwell), see SICK.—(Habitually ill) सदारोगी -गिणी -गि (न्), नित्यरोगी &c., रोगाधीनः -ना -नं, रोगशीलः -ला -लं; 'by birth or nature,' जन्मरोगी &c., जातिरोगी &c., प्रकृतिरोगी &c., स्वभावरोगी &c.; 'having a sickly countenance,' रुग्नवदनः -ना -नं, रुग्नमुखः &c.

SICKNESS, s. (Inclination to vomit, nausea) वमनेच्छा, छर्दनेच्छा, विवमिषा, वमनोन्मुखता, वमः -मनं, वमिः f., वान्तिः f., उत्क्लेशः, उत्क्लेदः, उत्क्षेपः, उद्गारः, छर्दनं, छर्दी, छर्दं, छर्दिः f., छर्दिस् f., प्रच्छर्दिका.—(Disease) रोगः, व्याधिः m., आमयः, रुक् f. (ज्), अस्वास्थ्यं, अस्वस्थता, विकारः, असमाधानं, रुग्नावस्था, रोगिता, रोगग्रस्तता, रोगव्याप्तिः f., see DISEASE, ILLNESS.

SIDE, s. (Of a man or any animal) पार्श्वः, पार्श्वभागः, पक्षः -क्षकः, पक्षभागः, कुक्षिः m., कक्षः, पार्श्वाङ्गं, अर्द्धाङ्गं, अङ्कः, क्रोडः; 'pain in the side,' पार्श्वशूलः -लं, कुक्षिशूलः -लं; 'left side,' वामपार्श्वः, वामाङ्गं; 'turning upon the side,' पार्श्वपरिवर्त्तनं, अङ्गपरिवर्त्तनं; 'removed from the side of a parent,' पितुर् अङ्कात् परिभ्रष्टः, पितृपार्श्वात्परिभ्रष्टः -ष्टा -ष्टं; 'at one's side,' पार्श्वे, पार्श्वतस्; 'staying close at the side,' पार्श्वस्थः -स्था -स्थं, पार्श्वगतः -ता -तं, पार्श्वपरिवर्त्ती -र्त्तिनी &c., उपान्तस्थः -स्था -स्थं; 'sleeping at the side of,' पार्श्वशयः -या -यं.—(Edge, border) प्रान्तः, उपान्तः -न्तं, अन्तः, सीमा, धारा; 'of a wood,' वनान्तः -न्तं, वनधारा; 'of a river,' नदीतीरं, नदीकूलं, नदीतटं; 'of a roof,' पटलप्रान्तः; 'of a mountain,' पर्व्वतधारा, पर्व्वततटं.—(Declivity or slope of a mountain) उत्सङ्गः, नितम्बः, कटकः.—(Part considered in respect to its direction) दिक् f. (श्), दिशा, पार्श्वः or more usually expressed by the affixes तस्, त्र &c.; as, 'on all sides,' सर्व्वतस्, समन्ततस्, समन्तात्, विश्वतस्, परितस्, अभितस्, सर्व्वत्र, सर्व्वदिक्षु चतुर्दिक्षु; 'on both sides,' [illegible], उभयत्र, उभयपार्श्वयोः; 'on the other side,' अपरतस्, परतस्; '[illegible] the opposite side,' अभिमुखतस्, विपरीतभागे; 'side by side,' पार्श्वापार्श्वि.—(Any part being in opposition to another) पक्षः; 'side of an argument,' पक्षः; 'both sides of an argument,' पक्षद्वयं; 'taking up a side,' पक्षता; 'another side of the argument,' पक्षान्तरं.—(Party faction) पक्षः; 'one's own side,' आत्मपक्षः, स्वपक्षः; 'having a side,' पक्षवान् &c.; 'one of the opposite side,' विपक्षः, प्रतिपक्षः; 'one of the same side,' सपक्षः, स्वपक्षावलम्बी m. (न्), स्वपक्षकः; 'to take a side,' पक्षपातं कृ, see *To* SIDE; 'one who takes a side,' पक्षपाती m. (न्), पक्षोद्ग्राही m.—(Any part of a thing) भागः; 'the outer side,' बाह्यभागः; 'black on the two sides,' द्वयोर् भागयोः श्यामः -मा -मं.—(Branch of a family, separate line) पक्षः; 'relations on the father's side,' पितृपक्षः ज्ञातयः, 'on the mother's side,' मातृपक्षा बान्धवाः; 'noble on both sides,' मातृतःपितृतश्चाभिजनवान् -वती &c.—(Side of a geometrical figure) भुजः, बाहुः m., दोस् m.

SIDE, a. पार्श्विकः -की -कं, पार्श्वः -र्श्वी -र्श्वं, पार्श्वीयः -या -यं, पार्श्वस्थः -स्था -स्थं, पाक्षिकः -की -कं, पाक्षः -क्षी -क्षं, पार्श्व or पक्ष in comp.; 'a side door,' पक्षद्वारं.

To SIDE, v. n. (Embrace or adopt a side) पक्षपातं कृ, पक्षोद्ग्राहं कृ, पक्षं ग्रह् or उद्ग्रह् or अनुग्रह्.

SIDE-BOARD, s. पक्षफलकः -कं पार्श्वफलकः पार्श्वस्थफलकः.

SIDE-LONG, a. अनुपार्श्वः -र्श्वा -र्श्वं, पार्श्विकः -का -कं, आनुपार्श्विकः -की -कं, वक्रः -क्रा -क्रं, तिरश्चीनः -ना -नं, तिर्य्यङ् -रश्ची -र्य्यक् (च्); 'side-long glance,' तिर्य्यग्दृष्टिः f., अपाङ्गदृष्टिः.

SIDE-LONG, adv. अनुपार्श्वं, पार्श्वतस्, तिर्य्यक्, तिरस्, पार्श्वदिशि.

SIDE-LOOK, s. कटाक्षः, नेत्रकटाक्षः, अपाङ्गदृष्टिः f., अपाङ्गदर्शनं, दृष्टिविक्षेपः.

SIDER, s. पक्षकः, पक्षधरः, पक्षोद्ग्राही m. (न्), पक्षपाती m., पक्षी m.

SIDEREAL, SIDERAL, a. तारासम्बन्धी -न्धिनी -न्धि (न्), नाक्षत्रिकः -की -कं, नाक्षत्रः -त्री -त्रं, नक्षत्रसम्बन्धी &c., ताराविषयकः -का -कं, ग्रहसम्बन्धी &c., तारामयः -यी -यं, नक्षत्रमयः &c., तारापूर्णः -र्णा -र्णं.

SIDE-SADDLE, s. पक्षपर्य्याणं, पक्षपर्य्ययणं, स्त्रीपर्य्याणं, स्त्रीपर्य्ययणं.

SIDESMAN, s. पक्षकः, पक्षपाती m. (न्), पक्षोद्ग्राही m., पक्षी m., पार्श्विकः, पक्षधारी m. See PARTISAN.

SIDE-TABLE, s. पक्षफलकः -कं, पार्श्वफलकः, पार्श्वस्थफलकः.

SIDE-WAYS, SIDE-WISE, adv. तिर्य्यक्, तिरस्, तिरश्चीनं, अनुपार्श्वं, पार्श्वतस्; 'moving side ways,' तिर्य्यङ् -रश्ची -र्य्यक् (च्), तिर्य्यग्गामी -मिनी &c., तिरश्चीनः -ना -नं.

SIDING, *s.* (Taking a side) पक्षपातः, पक्षोद्ग्राहः, पक्षता.

To **SIDLE**, *v. n.*, तिर्य्यग् गम् (c. 1. गच्छति, गन्तुं), तिर्य्यक् चल् or या.

SIDLING, *s.* तिर्य्यक्चलनं, तिर्य्यग्यानं, तिर्य्यग्गमनं, तिर्य्यग्गतिः *f.*—(One of a horse's paces) उत्तेजितः.

SIEGE, *s.* अवरोधः -धनं, प्रतिरोधः, रोधः -धनं, चिरारोधः, रुद्धा, नगरवेष्टनं, नगरपरिवेष्टनं, सैन्यवेष्टनं.

SIEVE, *s.* चालनी -नं, धान्यचालनी, शोधनी, धान्यशोधनी, प्रस्फोटनं -नी, तितउः *m.*, तितउ *n.*, निर्गलनयन्त्रं, पाटीरः, शतपोनः.

To **SIFT**, *v. a.* (Separate by a sieve) शुध् (c. 10. शोधयति -यितुं), तितउना चल् (c. 10. चालयति -यितुं), चालनयन्त्रेण शुध् or शोधनं कृ, निर्गलनं कृ, प्रस्फुट् in caus.—(Investigate minutely) सूक्ष्मपरीक्षां कृ, [smudged] परीक्ष्, सूक्ष्मजिज्ञासां कृ, मन्थनं कृ, मथनं कृ.

SI[smudged], *p. p.* शोधितः -ता -तं, निर्गलितः &c., चालितः &c., मथितः &c.

SIFTING, *s.* शोधनं, धान्यशोधनं, धान्यचालनं, निर्गलनं, प्रस्फोटनं, धान्यप्रस्फोटनं, मथनं.

To **SIGH**, *v. n.* दीर्घनिश्वासं कृ, दीर्घनिःश्वासं कृ, दीर्घं निश्वस् or निःश्वस् (c. 2. -श्वसिति -तुं), दीर्घम् उच्छ्वस् or विनिश्वस् or विनिःश्वस् or समुच्छ्वस्, स्तन् (c. 1. स्तनति -नितुं), निस्तन्, सीत्कारं कृ.

SIGH, *s.* दीर्घनिश्वासः, दीर्घनिःश्वासः, दीर्घश्वासः, निःश्वासः, निश्वासः, निःश्वसनं, दीर्घनिःश्वसितं, निश्श्वासः, निश्श्वसनं, उच्छ्वासः, दीर्घोच्छ्वासः, उच्छ्वसितं, दीर्घोच्छ्वसितं, दीर्घश्वसितं, दीर्घश्वसनं, समुच्छ्वासः, समुच्छ्वसितं, विनिश्वासः, स्तननं, स्तनितं.

SIGHING, *part.* दीर्घनिश्वासी -सिनी -सि (न्), निःश्वासी &c., उच्छ्वासी &c., दीर्घोच्छ्वासी &c., दीर्घनिश्वस्य indec., निश्वसन् -सन्ती -सत् (त्), विनिश्वसन् &c.

SIGHT, *s.* (Vision, view, act of seeing) दृष्टिः *f.*, दर्शनं, ईक्षणं, वीक्षणं, वीक्षा, प्रेक्षणं, प्रेक्षा, आलोकः, आलोकनं, अवलोकनं, लोकः -कनं, लक्षणं, आलोचनं -ना, निशामनं, निर्वर्णनं, निध्यानं, निभालनं, निभालनं, सूचना; 'being within sight,' दृष्टिगोचरः -रा -रं, दृष्टिविषयः -या -यं, दृग्गोचरः &c., दृश्यः -श्या -श्यं, दृश्यमानः &c., चक्षुर्ग्राह्यः -ह्या -ह्यं, *see* VISIBLE; 'in sight,' दृष्टिगोचरेण; 'in sight of, in presence of,' साक्षात्, समक्षं, प्रत्यक्षेण, पश्यतस्, दृष्टितस्; 'in sight of many persons,' बहुजनसमक्षं; 'out of sight,' अदृश्यः -श्या -श्यं, *see* INVISIBLE; 'out of one's sight,' परोक्षे, अगोचरेण; 'out of my sight,' ममागोचरेण; 'at sight of,' दर्शनात्, दर्शनेन; 'at sight of the token,' अभिज्ञानदर्शनात्; 'first sight of,' प्रथमदर्शनं, अपूर्वदर्शनं; 'at the very first sight,' प्रथमदर्शनात् -ने, प्रथमदर्शनक्षणात्, आप्रथमदर्शनात्, सकृद्दर्शनात्; 'at sight, in commerce,' पत्रदर्शनात्.—(Faculty or sense of sight) दृष्टिः *f.*, दृक् *f.* (श्), चक्षुरिन्द्रियं, नेत्रेन्द्रियं, चक्षुस् *n.*, दृक्शक्तिः *f.*, दृष्टिशक्तिः *f.*, दर्शनशक्तिः *f.*, आलोचकं; 'charming or bewitching the sight,' दृष्टिबन्धः -न्धनं.—(Eye) चक्षुस् *n.*, नेत्रं, नयनं, लोचनं, दृष्टिः *f.*—(Spectacle, show, any thing seen) प्रेक्षा, प्रेक्षणं, कौतुकं; 'fond of sight-seeing,' कौतुकासक्तः -क्ता -क्तं.

SIGHTLESS, *a.* दृष्टिहीनः -ना -नं, नेत्रहीनः &c., काणः -णा -णं.

SIGHTLY, *a.* दर्शनीयः -या -यं, सुदर्शनः -ना -नं, सुदृश्यः -श्या -श्यं

STUPEFIED, *p. p.* मोहितः -ता -तं, जडीकृतः &c., जडीभूतः &c., मूढसंज्ञः -ज्ञा -ज्ञं, प्रमूढसंज्ञः &c., स्तम्भितः -ता -तं, स्तम्भितेन्द्रियः -या -यं, मोहितेन्द्रियः &c., स्तब्धः -ब्धा -ब्धं, हृतसंज्ञः &c.

To STUPEFY, *v. a.* मुह् (c. 10. मोहयति -यितुं), सम्मुह्, व्यामुह्, जडीकृ, इन्द्रियस्तम्भं कृ, इन्द्रियस्तम्भनं कृ, इन्द्रियाणि स्तम्भ् (c. 9. स्तभ्नाति, स्तम्भितुं, c. 10. स्तम्भयति -यितुं), विष्टम्भ्, संस्तम्भ्, स्तब्धीकृ.

STUPEFYING, *a.* मोहकः -का -कं, मोहजनकः -का -कं, स्तम्भकः -का -कं, इन्द्रियमोहकः &c., इन्द्रियस्तम्भकः &c., मोहकारी -रिणी &c., मोहकारकः &c.

STUPENDOUS, *a.* विस्मयजनकः -का -कं, विस्मयोत्पादकः &c., विस्मयकारकः &c., अद्भुतः -ता -तं, आश्चर्यः &c., आश्चर्यकरः &c. *See* WONDERFUL.

STUPENDOUSNESS, *s.* अद्भुतता -त्वं, आश्चर्यत्वं, विस्मयजनकता.

STUPID, *a.* मूढः -ढा -ढं, मूर्खः -र्खा -र्खं, प्रमूढः &c., मन्दबुद्धिः -द्धिः -द्धि, जडः -डा -डं, जडबुद्धिः &c., जडमतिः -तिः -ति, मूढमतिः &c., मन्दः -न्दा -न्दं, निर्बुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, स्थूलः -ला -लं, स्थूलबुद्धिः &c., स्थूलधीः -धीः -धि, दुर्मतिः -तिः -ति, दुर्बुद्धिः &c., दुर्मेधाः -धाः -धः (स्), मतिहीनः -ना -नं, बुद्धिहीनः &c., अबुधः -धा -धं, अबुद्धिमान् -मती -मत् (त्), अबुद्धिः &c., अविज्ञः -ज्ञा -ज्ञं, अज्ञः &c., मन्थरः -रा -रं, मन्दरः -रा -रं, कुशठः -ठा -ठं, कुशठकः -का -कं, कुण्ठितः -ता -तं, अज्ञानः -ना -नं, अज्ञानी &c., कुधीः &c., बर्बरः -रा -रं.

STUPIDITY, STUPIDNESS, *s.* मूढता, मूर्खता, स्थूलता, मन्दता, बुद्धिमन्दता, मन्दबुद्धित्वं, जडता, जडिमा *m.* (न्), बुद्धिजडता, मौर्ख्यं, स्थौल्यं, जाड्यं, मान्द्यं, बुद्धिजाड्यं, निर्बुद्धित्वं, बुद्धिहीनत्वं -ता, अविज्ञता, अज्ञता, अज्ञानं, कुशठता.

STUPIDLY, *adv.* मूर्खवत्, मूढवत्, अविज्ञवत्, सजाड्यं, समान्द्यं.

STUPOR, *s.* मोहः, इन्द्रियस्वापः, इन्द्रियसुप्तिः *f.*, इन्द्रियमोहः, इन्द्रियस्तम्भः, स्तम्भः, व्यामोहः, जडता, जाड्यं, जडिमा *m.* (न्).

STURDINESS, *s.* दृढाङ्गता, शरीरदृढता, दृढता. *See* ROBUSTNESS.

STURDY, *a.* दृढाङ्गः -ङ्गा -ङ्गं, दृढदेहः -हा -हं, *see* STOUT, ROBUST.

To STUTTER, *v. n.* स्खलद्वाक्येन वद्, अस्पष्टं वद्. *See To* STAMMER.

STUTTERER, *s.* स्खलद्वाक्यः, स्खलितवाक् *m.* (च्), वाग्विकलः, गद्गदवाक्.

STUTTERING, *s.* वाक्स्खलनं, वाग्वैकल्यं, अस्पष्टोच्चारणं, *see* STAMMERING.

STY, *s.* (For pigs) शूकरस्थानं, *see* PIG-STY.—(In the eye) कुम्भिका.

STYLE, *s.* (Manner) वृत्तिः *f.*, रीतिः *f.*, *see* MODE.—(Of speaking or writing) वाग्वृत्तिः *f.*, शब्दवृत्तिः *f.*, शब्दरीतिः *f.*, वाग्व्यापारः, शब्दरचना, वाक्सरणिः -णी *f.*; 'elegance of style in rhetoric,' गुणः; 'figurative style,' व्यञ्जनावृत्तिः *f.*—(Style of living) वृत्तिः *f.*—(Title) संज्ञा, ख्यातिः *f.*, प्रतिष्ठानाम *n.*—(For writing) लेखनी, कीलः, *see* PEN.—(Pointed iron graver) शलाका, तक्षणी, कीलः.—(Of a dial) शङ्कुः *m.*, कीलः.

To STYLE, *v. a.* संज्ञां कृ or दा, अभिधा, कृत्. *See To* NAME, CALL.

STYLED, *p. p.* संज्ञितः -ता -तं, संज्ञ in comp. *See* NAMED, CALLED.

STYLISH, *a.* सभ्यरीत्यनुसारी -रिणी -रि (न्), सभ्यवृत्त्यनुरूपः -पा -पं, सभ्यव्यवहारसिद्धः -द्धा -द्धं, सभ्यलोकमतः -ता -तं, अतिशोभनः -ना -नं.

STYPTIC, *a.* रक्तावरोधकः -का -कं, रक्तस्तम्भकः &c., रक्तस्रावावरोधी -धिनी &c., रक्तस्रावस्तम्भकः &c., रक्तनिरोधकः &c., स्तम्भकः &c., रक्तस्तम्भनः -ना -नं, कषायी -यिणी &c., कषायान्वितः -ता -तं, कषायः -या -यं.

STYPTIC, *s.* रक्तावरोधकं, रक्तस्तम्भनं, स्तम्भनं. *See* the last.

STYRAX, *s.* कपिञ्जः, अश्मपुष्पं, शीतशिवं. *See* BENZOIN.

STYX, *s.* (River of Hell) वैतरणी, परलोकनदी, प्रेतनदी.

SUAVITY, *s.* मधुरता, माधुर्य्यं, वाङ्माधुर्य्यं, मधुरोक्तित्वं, स्वादुता.

SUBACID, *a.* ईषदम्लः -म्ला -म्लं, काम्लः -म्ला -म्लं, किञ्चिदम्लः &c.

To SUBDIVIDE, *v. a.* अंशांशान् कृ, अंशांशीकृ, अवयवीकृ, प्रतिभागीकृ.

SUBDIVISION, *s.* अंशांशः, अवयवः, शाखा, उपशाखा, प्रतिभागः, भागप्रतिभागः, प्रभागः प्रत्यङ्गं उपाङ्गं, अङ्गस्कन्धः, उपप्रकरणं, विशेषः; 'having subdivisions,' अवयवी -विनी -वि (न्), शाखी &c.

To SUBDUE, *v. a.* वशीकृ, पराजि (c. 1. -जयति -ते -जेतुं), विजि (atm. only) संजि, जि, दम् (c. 10. दमयति -यितुं), प्रदम्, अभिभू, पराभू, स्ववशीकृ, आत्मवशीकृ, आत्मवशं नी (c. 1. नयति, नेतुं), स्वाधीनीकृ, आत्माधीनीकृ, स्ववशे स्था in caus. (स्थापयति -यितुं), आत्मायत्तं -त्तां कृ, आत्मायत्तीकृ, स्वायत्तीकृ, भञ्जनं कृ, भञ्ज्. *See To* CONQUER, OVERCOME, SOFTEN.

SUBDUED, *p. p.* वशीकृतः -ता -तं, वशीभूतः &c. दमितः -ता -तं, पराजितः &c., जितः &c. अभिभूतः -ता -तं, पराभूतः &c., दान्तः -न्ता -न्तं, स्ववशीकृतः &c., आत्मवशः -शा -शं वशी -शिनी -शि (न्), वशः &c., वशङ्गतः -ता -तं, स्ववशनीतः &c., हस्तङ्गतः &c., हस्तगतः &c., दर्परहितः &c., निवृत्तः -त्ता -त्तं. *See* OVERCOME, MORTIFIED, SOFTENED, HUMBLED.

SUBDUER, *s.* दमकः, दमी *m.* (न्), दमनकारी *m.* (न्), जेता *m.* (तृ).

SUBDUING, *s.* वशीकरणं, दमनं, दमः, भङ्गः. *See* SUBJUGATION.

SUBJACENT, *a.* अधःस्थः -स्था -स्थं, अधःस्थितः -ता -तं, अधोवर्त्ती &c.

SUBJECT, *a.* (Under the power of) वशः -शा -शं, वशी -शिनी -शि (न्), अधीनः -ना -नं, आयत्तः -त्ता -त्तं, अभ्यधीनः -ना -नं, भक्तः -क्ता -क्तं, तन्त्रः -न्त्रा -न्त्रं, उपजीवी -विनी -वि (न्), विवशः &c., अनुवशः &c., निघ्नः -घ्ना -घ्नं; 'to another,' परवशः -शा -शं, पराधीनः -ना -नं, परायत्तः &c., परतन्त्रः &c., परच्छन्दः -न्दा -न्दं, परवान् &c., परोपजीवी &c., नाथवान् &c.—(Liable to) अधीनः -ना -नं, योग्यः -ग्या -ग्यं, वशः -शा -शं, अर्ह in comp., नित्य in comp., आस्पदं in comp., पात्रं in comp., *see* OBNOXIOUS; 'subject to disease,' रोगाधीनः -ना -नं, नित्यरोगी &c., सदा-

रोगी &c., रोगास्पदं; 'subject to melancholy,' नित्यविषादी &c., सदाविषादी &c.—(To be subject) वशीभू, अधीनीभू, आयत्तीभू, उपजीव् (c. 1. -जीवति -वितुं).

Subject, *s.* (One that owes allegiance) प्रजा, भक्तः, वश्यः, उपजीवी *m.* (न्); 'subjects, collectively,' प्रजालोकः, प्रजा, प्रजाः *f. pl.*; 'beloved by one's subjects,' प्रजानुरक्तः -क्ता -क्तं, अनुरक्तप्रजः -जा -जं; 'the protection of one's subjects,' प्रजापालनं.—(That which is treated of, a topic, head) विषयः, प्रकरणं, प्रसङ्गः, प्रस्तावः, प्रसक्तिः *f.*, अर्थः, वृत्तान्तः, स्थानं, स्थलं, पदं, अधिकरणं, मार्गः; 'subject in hand,' प्रस्तुतं; 'on such a subject,' एवंविषयः -या -यं; 'this chapter is on the subject of the heavenly bodies, &c.,' अयं सर्गो ग्रहादिविषयकः.—(That in which any thing inheres or exists) अधिकरणं, आधारः, आश्रयः, आशयः, आस्पदं, स्थानं, अधिष्ठानं, आर्य्यं; 'of an inference,' व्याप्यं; 'of any operation or act,' आश्रयः, अधिकरणं, पात्रं, स्थानं, अधिष्ठानं, भूमिः *f.*—(Of a verb, in grammar) कर्त्ता *m.*—(Of a predicate) अनुवाद्यं.—(Of a proposition) साध्यं.

To **subject**, *v. a.* (Bring under the power of) वशीकृ, अधीनीकृ, आयत्तीकृ.—(Subjugate), *see To* subdue.—(Make liable) अधीनं -नां कृ, अधीनीकृ, वशीकृ, योग्यं -ग्यां कृ, आस्पदं कृ, आस्पदीकृ; 'to subject one to ridicule,' उपहासास्पदं कृ, उपहासास्पदीकृ; 'to subject to diseases,' रोगाधीनीकृ, रोगाधीनं -नां कृ; 'to a legal process,' विवादास्पदीकृ; 'to trial,' अनुभवारूढं -ढां कृ.

Subjected, *p. p.* वशीकृतः -ता -तं, अधीनीकृतः -ता -तं. *See* Subject, *a.*

Subjection, *s.* (The act) वशीकरणं, अधीनीकरणं.—(The state) वशता -त्वं, वशिता -त्वं, वशं, वश्यता -त्वं, भक्तिः *f.*, निघ्नता, आज्ञाधीनता; 'to another,' पराधीनता, परवशता, परवशित्वं, परवशा, परतन्त्रत्वं, पारतन्त्र्यं, पराश्रितत्वं.

Subjective, *a.* अधिकरणसम्बन्धी -न्धिनी -न्धि (न्), अधिष्ठानसम्बन्धी &c., अधिष्ठाननिष्ठः -ष्ठा -ष्ठं, अधिकरणनिष्ठः &c.

Subject-matter, *s.* विषयः, प्रस्तावः, प्रसङ्गः, प्रकरणं. *See* under Subject, *s.*

To **subjoin**, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं), आयुज्, समायुज्, संयुज्.

To **subjugate**, *v. a.* वशीकृ, करदीकृ, पराजि. *See To* subdue, *v. a.*

Subjugated, *p. p.* वशीकृतः -ता -तं, करदीकृतः &c. *See* Subdued.

Subjugation, *s.* वशीकरणं, दमनं, दमः, जयः -यनं, विजयः -यनं, पराजयः, अभिभवः, परिग्रहः, निग्रहः -हणं, भञ्जनं, भङ्गः, दण्डः -ण्डं; 'of one's enemies,' शत्रुदमनं; 'of foreign countries,' दिग्विजयः; 'of one's passions,' इन्द्रियदमः -मनं, इन्द्रियजयः, इन्द्रियनिग्रहः.

Subjunctive, *s.* (Mode in grammar) संशयार्थः.

Sublimate, *s.* (Of mercury) रसकर्पूरः, रसपुष्पं.

To **sublimate**, *v. a.* ऊर्द्ध्वपातनं कृ, ऊर्द्ध्वं पत् in caus. (पातयति -यितुं).

Sublimation, *s.* ऊर्द्ध्वपातनं, ऊर्द्ध्वकरणं, उच्चीकरणं, पुटपाकः.

Sublime, *a.* अत्युच्चः -च्चा -च्चं, अत्युच्छ्रितः -ता -तं, अत्युत्कृष्टः -ष्टा -ष्टं, अत्युन्नतः -ता -तं, अत्युद्धतः -ता -तं, अतिप्रौढः -ढा -ढं. *See* Lofty.

Sublimity, **sublimeness**, *s.* अत्युच्चता, अत्युत्कृष्टता, अत्युत्कर्षः, अत्युन्नतिः *f.*, अत्युन्नतिः *f.*, प्रौढता, अत्युद्धता. *See* Loftiness.

Sublunary, *a.* ऐहलौकिकः -की -कं, ऐहिकः -की -कं. *See* Mundane.

Submarine, *a.* समुद्राधःस्थः -स्था -स्थं, समुद्रतलस्थः &c., समुद्रस्थः &c.; 'submarine fire,' समुद्रवह्निः *m.*, वडवाग्निः *m.*, वाडवाग्निः *m.*, [illegible], वाडवः, और्वः, अब्ध्यग्निः *m.*, सलिलेन्धनः.

To **submerge**, *v. a.* निमज्ज् (c. 10. -मज्जयति -यितुं), जलान्तर् मज्ज्, जलान्तः कृ, जलान्तः स्था in caus. *See To* plunge, inundate.

To **submerge**, *v. n.* मज्ज् (c. 6. मज्जति -ज्जितुं), निमज्ज्. *See To* plunge, *v. n.*

Submerged, *p. p.* मज्जितः -ता -तं, निमज्जितः &c., [illegible] -ग्ना -ग्नं, आप्लावितः -ता -तं, *see* Plunged, Immersed; 'is submerged,' प्लाव्यते.

Submersion, *s.* निमज्जनं, मज्जनं, आप्लावः -वनं. *See* Immersion.

Submission, *s.* (To the power of another) वशता -त्वं, वशित्वं, वशं, वश्यता, अधीनता, पराधीनता, अनुवर्त्तनं, अनुवृत्तिः *f.*, वशवर्त्तनं, वशीभूतता, *see* Subjection, Obedience.—(Resignation) क्षमा, क्षान्तिः *f.*, *see* Resignation.

Submissive, *a.* वशवर्त्ती -र्त्तिनी -र्त्ति (न्), वश्यः -श्या -श्यं, वशगः -गा -गं, वशानुगः &c., वश्यात्मा -त्मा -त्म (न्), विधेयः -या -यं, विनतः -ता -तं, आनतः &c., दीनः -ना -नं, सविनयः -या -यं, क्षान्तः &c., अनुविधायी &c. *See* Obedient, Docile, Resigned.

Submissively, *adv.* सानुवर्त्तनं, क्षमापूर्वं, क्षान्तिपूर्वं, सविनयं.

Submissiveness, *s.* वशवर्त्तित्वं, आज्ञानुवर्त्तित्वं, वश्यता, विनतिः *f.*

To **submit**, *v. a.* or *n.* (One's self) वशीभू, वशं गम् (c. 1. गच्छति गन्तुं) or उपगम् or अभ्युपे (अभ्युपैति -तुं, rt. इ), वशतास्वीकारं कृ. *see To* obey.—(Submit to, bear with) सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), संक्षम्.—(Submit for another's consideration) परविचारं प्रार्थ् (c. 10. प्रार्थयति -ते -यितुं), परविचारं प्रार्थयित्वा विज्ञा in caus., *see To* refer, defer.

Submitted, *p. p.* (Referred) प्रार्थनापूर्वं परविचारार्थं समर्पितः -ता -तं.—(Submitted to) सोढः -ढा -ढं; 'to be submitted to,' क्षन्तव्यः -व्या -व्यं.

Subordinate, *a.* गौणः -णी -णं, अमुख्यः -ख्या -ख्यं, अप्राप्यः -प्या -प्यं, अप्रधान in comp.; 'any thing or person subordinate,' अप्रधानं, उपसर्जनं.

Subordinately, *adv.* गौणतस्, अप्रधानतस्, अप्राधान्येन, अमुख्यतस्.

Subordination, *s.* (State of being under control) वशता, वश्यता, *see* Subjection.—(Inferiority) अप्रधानता, अप्राधान्यं, अमुख्यता, गौणता; 'principle of subordination,' गौणमुख्यन्यायः.

To **suborn**, *v. a.* कुकर्म्मसम्पादने छलेन नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or प्रयुज्, कूटसाक्ष्यकरणे नियुज्.

Subornation, *s.* कुकर्म्मसाधने नियोजनं, कूटसाक्ष्यसाधनं.

Suborned, *p. p.* कुकर्म्मसाधने or कूटसाक्ष्यकरणे नियुक्तः -क्ता -क्तं.

To **subscribe**, *v. a.* or *n.* (Sign with one's own hand) हस्ताक्षरं लिख् (c. 6. लिखति, लेखितुं), स्वहस्ताक्षरं लिख् or अङ्क् (c. 10. अङ्कयति -यितुं), नामलिखनं कृ, नामाङ्कनं कृ, स्वनामाङ्कितं -तां कृ, नामाङ्कितं कृ, *see To* sign.—(Promise to pay by signing one's name) हस्ताक्षरम् अभिलिख्य or नामाङ्कनं कृत्वा किञ्चिद् दातुं प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं) or स्वांशं दातुं प्रतिज्ञा or धनांशं दातुं प्रतिज्ञा or अंशं दा in des. (दित्सति -त्सितुं).

Subscriber, *s.* (One who enters his name) नामाभिलेखकः, हस्ताक्षराभिलेखकः.—(Contributor) अंशदाता *m.* (तृ), अंशदायी *m.*, अंशदित्सुः *m.*

Subscription, *s.* (Act of signing) नामाभिलेखनं, स्वनामलिखनं, नामाङ्कनं, हस्ताक्षरलिखनं.—(Signature), *see* the word.—(Contribution) अंशदानं, धनांशदानं, अनेकसाध्यकार्य्यसाहाय्यिकधनदानं.—(Sum contributed) अनेकदत्तधनं, अंशदित्सुसमर्पितधनं.

Subsequence, *s.* अनुगमनं, अनुसारं, पश्चाद्गमनं, अनुयायिता.

Subsequent, *a.* पश्चात्कालिकः -का -कं, पश्चात्कालीनः -ना -नं, पाश्चात्यः -त्या -त्यं, परः -रा -रं, पराचीनः -ना -नं, उत्तरः -रा -रं, अवरः &c., कालान्[illegible]यः -या -यं, पश्चात् in comp.; 'subsequent period,' पश्चात्काल[illegible] 'subsequent rite,' अनुकर्म्म *n.*; 'subsequent mention,' [illegible]ाख्यानं.

Subsequently, *adv.* [illegible]श्चात्, परं, परतस्, परस्तात्, उत्तरं, उत्तरतस्, उत्तरत्र; 'subsequen[illegible] to the marriage,' विवाहात् परं or परतस्.

To **subserve**, *v. a.* उपकृ, साहाय्यं कृ. *See To* promote, serve.

Subservience, subserviency, *s.* उपयोगः -गिता, उपयुक्तता, उपकारः -रिता, अनुवृत्तिः *f.*, अनुवर्त्तनं, सहकारिता, तन्त्रता, पारतन्त्र्यं.

Subservient, *a.* उपयोगी -गिनी -गि (न्), उपकारी -रिणी &c., उपकारकः -का -कं, सहकृत्वा -त्वा -त्व (न्), अधीनः -ना -नं, तन्त्रः -न्त्रा -न्त्रं, वशः -शा -शं, निघ्नः &c. *See* Subject, Dependant.

To **subside**, *v. n.* (Sink) सद् (c. 1. सीदति, सत्तुं), अधोगम् (c. 1. -गच्छति -गन्तुं), अधोया, अधः पत्, *see To* settle, *v. n.*—(Become calm, cease) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, उपशम्, प्रसद्, सम्प्रसद्, विरम् (c. 1. -रमति -रन्तुं), निवृत्, विनिवृत्, विगम्, शान्तः -न्ता -न्तं भू, *see To* cease, *v. n.*; 'as the wind,' निर्वा (c. 2. -वाति -तुं), निर्वातीभू.

Subsided, *p. p.* शान्तः -न्ता -न्तं, प्रशान्तः &c., विरतः -ता -तं.

Subsidence, subsidency, *s.* (Sinking) अधःपतनं, अधोगतिः *f.*, अधोगमनं.

Subsidiary, *s.* उपकारी -रिणी &c., उपयोगी -गिनी &c., उपकारकः -का -कं, सहकारी &c., साहाय्यकारी &c.; 'something subsidiary,' उपसर्ज्जनं, उपपदं, *see* Subservient, Subordinate, *a.*

Subsidy, *s.* धनरूपसाहाय्यं, धनरूपोपकारः, धनरूपसाहित्यं.

To **subsist**, *v. n.* (Be, exist) वृत् (c. 1. वर्त्तते -र्त्तितुं), भू, अस्, विद् in pass.—(Live, be maintained) जीव् (c. 1. -जीवति -वितुं), उपजीव्, उपजीवनं कृ, निर्वाहं कृ, निर्वह् (c. 1. -वहति -वोढुं), जीवनिर्वाहं कृ, प्राणनिर्वाहं कृ, उदरनिर्वाहं कृ, प्राणयात्रां कृ, शरीरयात्रां कृ, उदरपोषणं कृ.—(Continue) स्था.

Subsistence, *s.* (Existence), *see* the word.—(Means of subsisting, livelihood) उपजीविका, जीविका, उपजीवनं, उपजीव्यं, जीवनं, जीवनोपायः, वृत्त्युपायः, प्राणयात्रा, शरीरयात्रा, जीवोपकरणं, जीवसाधनं, निर्वाहः, प्राणनिर्वाहः, जीवनिर्वाहः, प्राणधारणं, *see* Livelihood, Living, *s.*; 'bare subsistence,' दिननिर्वाहः, ग्रासाच्छादनं.

Subsistent, *a.* सत्त्ववान् -वती -वत् (त्), जीवी -विनी &c., उपजीवी &c.

Substance, *s.* (A real being) वस्तु *n.*, पदार्थः, द्रव्यं, सत्त्वं, अर्थः, भावः, *see* Thing.—(Material form, matter) मूर्त्तिः *f.*, मूर्त्तवस्तु *n.*, मूर्त्तद्रव्यं, वस्तु *n.*, द्रव्यं.—(Material or essential part) सारः, सारता, सारांशः, गर्भः, सत्त्वं, तत्त्वं, तत्त्वार्थः, मूलं, अर्थः, वस्तु *n.*, वस्तुता; 'in substance,' अर्थतस्, वस्तुतस्.—(Property, possessions) वसु *n.*, धनं, अर्थः, द्रविणं, द्रव्यं, वित्तं, विभवः, वैभवं, रिक्थं; 'one's whole substance,' सर्व्वस्वं.

Substantial, *a.* (Real) वास्तवः -वी -वं, वास्तविकः -की -कं, वस्त्वात्मकः -का -कं, सात्त्विकः -की -कं, *see* Real.—(Material) मूर्त्तिमान् -मती &c., मूर्त्तः -र्त्ता -र्त्तं, *see* Material.—(Having substance or solidity) सारवान् -वती -वत् (त्), सारः -रा -रं, घनः -ना -नं, *see* Solid.—(Possessed of property) वसुमान् &c., वित्तवान् &c., महाधनः -ना -नं, धनी &c., *see* Rich.

Substantially, *adv.* वस्तुतस्, अर्थतस्, सारतस्, तत्त्वतस्.

Substantialness, *s.* वास्तवत्वं, वास्तविकत्वं, सत्त्वं, सारता, सत्ता.

To **substantiate**, *v. a.* भू in caus., साध्, प्रमाणीकृ. *See To* prove.

Substantiated, *p. p.* भावितः -ता -तं, विभावितः &c. *See* Proved.

Substantiation, *s.* उपपादनं, साधनं, सिद्धिः *f.*, विभावनं, भावनं.

Substantive, *s.* (In grammar) विशेष्यं, सत्त्ववाचकः, द्रव्यवाचकः, सत्त्वं; 'proper substantive,' नामवाचकः, संज्ञावाचकः, संज्ञा.

Substantive, *a.* सात्त्विकः -की -कं, सत्त्ववाचकः -का -कं, वास्तविकः &c.

To **substitute**, *v. a.* उपकॢप् (c. 10. -कल्पयति -यितुं), उपसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्ज्जयति -यितुं) उपसर्ज्जनं कृ, उपकल्पनं कृ, कल्पनं कृ, परस्थाने कॢप्, परस्थाने कृ, प्रतिनिधिं कृ.

Substitute, *s.* प्रतिनिधिः *m.*, उपसर्ज्जनं, अनुकल्पः, प्रतिपुरुषः, प्रतिहस्तकः, प्रतिकृतिः *f.*, प्रतिच्छन्दः, गौणकल्पः, आदेशः.

Substituted, *p. p.* उपकल्पितः -ता -तं, उपसर्ज्जितः &c., परस्थाने कल्पितः -ता -तं, प्रतिनिधिभूतः &c., अतिदिष्टः -ष्टा -ष्टं, अध्यस्तः -स्ता -स्तं; 'to be substituted,' कल्पनीयः -या -यं, कल्प्यः -ल्प्या -ल्प्यं.

Substitution, *s.* उपकल्पनं, उपसर्ज्जनं, प्रत्याहारः, आदेशः, अतिदेशः.

Substratum, *s.* (Layer), *see* Stratum.—(In metaphysics) अधिकरणं, आधारः, आश्रयः, स्थानं, पात्रं, *see* Basis.

To **subtend**, *v. a.* अभिमुखं or प्रतिमुखं or अधो वितन् in pass.

Subterfuge, *s.* छलं, छद्म *n.* (न्), अपदेशः, व्यपदेशः, छिद्रं.

Subterranean, subterraneous, *a.* अन्तर्भौमः -मी -मं, भूम्यन्तर्गतः -ता -तं, गूढः -ढा -ढं; 'a subterranean place,' अन्तर्भूमिः *f.*; 'passage,' गूढमार्गः, सुरुङ्गा.

Subtile, subtle, *a.* (Fine, thin) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः &c., अतिलघुः -घुः -घु, निरवयवः -वा -वं, अणुकः -का -कं.—(In intellect, piercing) सूक्ष्मबुद्धिः -द्धिः -द्धि, सूक्ष्मदर्शी -र्शिनी &c., कुशाग्रीयमतिः -तिः -ति, कुशाग्रबुद्धिः &c., कुशाग्रीयः -या -यं, मार्म्मिकः -की -कं, मर्म्मिकः &c., मर्म्मविद्, मर्म्मवेदी &c.—(Sly), *see* Sly.

Subtilely, *adv.* सूक्ष्मं, सौक्ष्म्येण, सूक्ष्मतया, ससौक्ष्म्यं.

Subtility, subtileness, subtlety, *s.* सूक्ष्मता, सौक्ष्म्यं, निरवयवत्वं, अणिमा *m.* (न्), अतिलाघवं; 'of intellect,' बुद्धिसूक्ष्मता, कुशाग्रीयता, मतिप्रकर्षः.—(Cunning, slyness), *see* the words.

To **subtilize**, *v. a.* सूक्ष्मीकृ, अतिसूक्ष्मीकृ, सूक्ष्मतां कृ or जन्.

To **subtract**, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), उद्धरणं कृ.—(In arithmetic) शुध् (c. 10. शोधयति -यितुं), व्यवकल् (c. 10. -कलयति -यितुं), शोधनं कृ, व्यवकलनं कृ, अन्तरं कृ.—(In algebra) ऋणं कृ, अन्तरं कृ.

Subtracted, *p. p.* उद्धृतः -ता -तं.—(In arithmetic, &c.) शोधितः -ता -तं, व्यवकलितः &c.; 'to be subtracted,' शोध्यः -ध्या -ध्यं, शोधनीयः -या -यं.

Subtraction, *s.* उद्धारः, उद्धरणं.—(In arithmetic) शोधनं, शुद्धिः *f.*, व्यवकलनं, व्यवकलितं, अन्तरं, वर्ज्जनं, विवरं, पतनं.

Subtrahend, *s.* (Sum to be subtracted) शोधकः, ऋणं.

Suburb, suburbs, *s.* शाखानगरं, शाखापुरं, उपनगरं, उपपुरं, नगरोपान्तः -न्तं, नगरपरिसरः, नगरप्रान्तः -न्तं, गृहा, अभिष्यन्दिरमणं.

Suburban, *a.* शाखानगरस्थः -स्था -स्थं, उपनगरस्थः &c., शाखापुरस्थः &c., नगरोपान्तस्थः -स्था -स्थं, नगरोपान्तिकः -की -कं.

Subversion, *s.* ध्वंसः, विध्वंसः, परिध्वंसः, भङ्गः. *See* Overthrow.

Subversive, *a.* ध्वंसकरः -रा -रं, ध्वंसकारी -रिणी &c., परिध्वंसी &c., विनाशकः &c., *see* Destructive; 'of happiness,' सुखान्तकरः &c.

To **subvert**, *v. a.* ध्वंस् (c. 10. ध्वंसयति -यितुं), परिध्वंस्, विध्वंस्, नश् (c. 10. नाशयति -यितुं), विनश्, पत् in caus., निर्भिद्. *See To* overthrow.

Subverted, *p.p.* विध्वंसितः -ता -तं, पातितः &c., विनाशितः -ता -तं, निर्भिन्नः -न्ना -न्नं, *see* Overthrown; 'is subverted,' निर्भिद्यते.

Succedaneous, *a.* गौणः -णी -णं, गौणभूतः -ता -तं, उपसर्जनः -ना -नं, आनुकल्पिकः -की -कं; 'a succedaneous rule,' अनुकल्पः.

Succedaneum, *s.* उपसर्जनं, अनुकल्पः, गौणकल्पः. *See* Substitute.

To succeed, *v. n.* (Follow, be subsequent to) पश्चाद् आया (c. 2. -याति -तुं), अनुया, अनुक्रम्, पश्चाद् वृत् (c. 1. वर्त्तते -र्त्तितुं), अनुवृत्, परतो वृत्, परस्ताद् वृत्, उत्तरतो वृत्, अपरः -रा -रं वृत् or भू, उत्तरः -रा -रं वृत् or भू.—(Be successful) सिध् (c. 4. सिध्यति, सेद्धुं), संसिध्, सिद्धार्थीभू, कृतार्थीभू, सिद्धिं गम् or इ, सम्पद् (c 4. -पद्यते -पत्तुं), क्रम् (c. 1. क्रमते -मितुं), *see To* prosper, *v. n.*

Succeeded, *p.p.* अनुगतः -ता -तं, अनुयातः &c.; 'by fear,' भयोत्तरः -रा -रं.

Succeeding, *part.* or *a.* अनुयायी -यिनी -यि (न्), अनुगः -गा -गं, क्रमानुयायी &c., क्रमानुगः -गा -गं, उत्तरः -रा -रं, अपरः &c. *See* Subsequent, *a.*

Success, *s.* सिद्धिः *f.*, अर्थसिद्धिः *f.*, फलसिद्धिः *f.*, साध्यसिद्धिः *f.*, सम्पत्तिः *f.*, सम्पद् *f.*, उदयः, सफलता, सिद्धार्थता -त्वं, कृतार्थता, चरितार्थता, कृतकृत्यता, श्रीः *f.*, लक्ष्मीः *f.*—(Result) निर्गमः, निर्गतिः *f.*, परिणामः.

Successful, *a.* (Of persons) कृतार्थः -र्था -र्थं, सिद्धार्थः &c., चरितार्थः &c., प्राप्तार्थः &c., कृतकृत्यः -त्या -त्यं, अव्यर्थः -र्था -र्थं, कृतकामः -मा -मं, प्राप्तकामः &c., प्राप्ताशः -शा -शं, आशाप्राप्तः -प्ता -प्तं, कृतार्थीभूतः -ता -तं, श्रीमान् &c., *see* Prosperous.—(Of things) सिद्धः -द्धा -द्धं, सिद्धिमान् -मती -मत् (त्), सफलः -ला -लं, फलवान् &c., फलितः -ता -तं, सुफलः &c.

Successfully, *adv.* सफलं, सिद्धार्थतस्, कृतार्थतस्, अव्यर्था, सिद्धा.

Succession, *s.* (Following of things in order) आनुपूर्व्यं, आनुपूर्वी -र्वी, अनुक्रमः, पर्यायः, विपर्ययः, परम्परा, पारम्पर्यं, अन्वयः, समन्वयः, सन्ततिः *f.*, श्रेणी, वीप्सा, अनुयायित्वं, अनुयानं, अनुवृत्तिः *f.*, अनुवर्त्तनं, अनुषङ्गः, क्रमः; 'of office,' कर्म्मविपर्ययः; 'in succession,' अनुपूर्व्वशस्, *see* Successively.—(Line, series) श्रेणी, आवलिः -ली *f.*, माला; 'of kings,' राजावलिः -ली *f.*, *see* Series.—(Right of succeeding to another) उत्तराधिकारः -रिता, अधिकारपर्य्यायः, दायः -यत्वं, दायाधिकारः.

Successive, *a.* अनुपूर्वः -र्वा -र्वं, आनुक्रमिकः -की -कं, यथाक्रमः -मा -मं, यथानुक्रमः &c., पारम्परिकः -की -कं, परम्परः -रा -रं, क्रमानुसारी -रिणी -रि (न्), क्रमानुयायी &c., क्रमकः -का -कं, क्रमागतः -ता -तं, क्रमायातः &c., परम्परागतः -ता -तं, परम्परायातः &c., समतः -ता -तं.

Successively, *adv.* अनुपूर्वशस्, अनुक्रमशस्, यथापूर्वं, यथाक्रमं, परम्परं, पारम्पर्य्येण, पर्यायेण, विपर्ययेण, क्रमशस्, क्रमतस्, क्रमेण, क्रमात्, क्रमानुसारेण.

Successor, *s.* उत्तराधिकारी *m.* (न्), अपराधिकारी *m.*, क्रमानुयायी *m.*

Succinct, *a.* संक्षिप्तः -प्ता -प्तं, अविस्तीर्णः -र्णा -र्णं. *See* Concise.

Succinctly, succinctness, *see* Concisely, Conciseness.

Succory, *s.* (Plant, wild endive) कासनी.

Succour, *To* succour, &c. *See* Help, *To* help, &c.

Succulence, *s.* सरसता, बहुरसत्वं, सद्रवता, सजलता. *See* Juiciness.

Succulent, *s.* सरसः -सा -सं, बहुरसः &c., सद्रवः -वा -वं, सजलः -ला -लं, रसमयः -यी -यं, जलमयः &c., आर्द्रः -र्द्रा -र्द्रं. *See* Juicy.

To succumb, *v.n.* वशीभू, वशं गम्, सद् (c. 1. सीदति, सत्तुं), *see To* yield.

Such, *a.* (Of this kind) ईदृशः -शी -शं, ईदृक् *m.f.n.* (श्), ईदृक्षः -क्षा -क्षं, अमूदृशः -शी -शं, अमूदृक्षः &c.; 'such is the law,' ईदृशी मर्य्यादा.—(Of that kind, of such a kind) तादृशः -शी -शं, तादृक् *m.f.n.* (श्), तादृक्षः -क्षा -क्षं, एतादृशः &c., एतादृक् &c., एतादृक्षः &c., एवंविधः -धा -धं, तथाविधः -धा -धं, एवम्भूतः -ता -तं, एवं in comp.; 'such as me,' मादृशः &c., [illegible] &c., मादृक्षः &c., मद्विधः -धा -धं; 'such [illegible] thee,' त्वादृ[illegible]&c., त्वादृक् &c., भवादृशः &c.; 'what has such power [illegible] burn as fire?' किम् अन्यद् अनलात् प्रभवति दग्धुं.—(Such and such an one) अमुकः -का -कं.

To suck, *v. a.* (Draw in with the mouth) चूष् (c. 1. चूषति -षितुं), आचूष्, चूषां कृ, चूषणं कृ, चोषं कृ, चोषणं कृ.—(Draw in milk from the breast, as a child) स्तनं पा (c. 1. पिबति, पातुं) or धे (c. 1. धयति, धातुं), समभिधे, स्तनात् क्षीरं पा or निपा स्तनपानं कृ; 'a child that sucks the breast,' स्तनन्धयः -या -यी -यं.—(The finger or hand) अङ्गुलिं धे or अभिधे or पा, मुष्टिं धे, अङ्गुलिपानं कृ: 'a child that sucks its hand,' मुष्टिन्धयः.—(Imbibe, absorb, suck up) निपा, शुष् in caus., उच्छुष्, रसादानं कृ.

Suck, *s.* (Act of sucking), *see* Suction.—(Milk, &c., sucked) स्तन्यं, दुग्धं, चूषं; 'one who gives suck,' स्तन्यदायी, स्तन्यदायिनी.

Sucked, *p. p.* चूषितः -ता -तं, चोषितः &c., पीतः -ता -तं, पीतः &c., निपीतः &c.; 'that can be sucked,' चूष्यः -ष्या -ष्यं.

Sucker, *s.* चोषकः, चूषणकारी *m.* (न्), धाता *m.* (तृ). *See* Suckling.

Sucking, *s.* चूषणं, चूषा, चोषः -षणं; 'the breast,' स्तनपानं, स्तन्यपानं, क्षीरपानं; 'the fingers,' अङ्गुलिपानं.

To suckle, *v. a.* स्तनं धे in caus. (धापयति -यितुं) or उपधे in caus. or पा in caus. (पाययति -यितुं), स्तन्यं दा, स्तनपानं दा, स्तन्यदानेन पुष् (c. 10. पोषयति -यितुं).

Suckled, *p. p.* स्तन्यपोषितः -ता -तं, स्तनन्धयः &c.; 'by a bitch,' शुनिन्धयः -या -यं.

Suckling, *s.* (The act) स्तन्यदानं, स्तन्यदानेन पोषणं.—(Young child) स्तनन्धयः -या -यी -यं, स्तनपायी -यिनी &c., धाता -त्री (तृ), धयः -या.

Suction, *s.* आचूषणं, चूषणं, चोषः -षणं, रसादानं. *See* Sucking, *s.*

Sudden, *a.* आकस्मिकः -की -कं, साहसिकः -की -कं, सहसः -सा -सं, अकाण्डः -ण्डा -ण्डं, अकस्मादुत्पन्नः -न्ना -न्नं, अकस्माद्भूतः -ता -तं, एकपातः -ता -तं, अलक्षितः -ता -तं, अचिन्तितः &c., अकल्पितः -ता -तं, अकाण्डनिपाती -तिनी -ति (न्), अकस्माज्जातः -ता -तं, अकाण्डजातः &c.; 'sudden death,' अपमृत्युः *m.*, अपामृत्युः *m.*, अलक्षितमृत्युः, अलक्षितनाशः, अपघातः; 'on a sudden,' अकस्मात्.

Suddenly, *adv.* अकस्मात्, सद्यस्, सहसा, एकपदे, एकदा, अकाण्डे, हठात्, काकतालीयवत्; 'suddenly born,' अकाण्डजातः -ता -तं, अकस्माज्जातः &c.

Suddenness, *s.* आकस्मिकत्वं -ता, साहसिकत्वं, अकाण्डत्वं, अकल्पितत्वं.

Sudorific, *a.* स्वेदनः -ना -नं, स्वेदकरः -रा -रं, स्वेदोत्पादकः -का -कं, स्वेदजनकः &c., प्रस्वेदितः -ता -तं, प्रस्वेदितवान् -वती &c.

Súdra, *s.* (Man of the fourth or servile class) शूद्रः, अवरवर्णः जघन्यजः, वृषलः.

Suds, *s.* सर्ज्जिकासंसृष्टजलं, मार्ज्जनतैलसंसृष्टजलं, सर्ज्जिकाप्लावनजलं.

To sue, *v. a.* (In law) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभियोगं कृ, व्यवहाराभियोगं कृ, व्यवहारं कृ, व्यवहृ, वादं कृ, अभिशंस्. *See To* prosecute.

To sue, *v. a.* प्रार्थ्, याच्, प्रार्थनापूर्वकम् अभिधा. *See To* petition.

Suet, *s.* मेदस् *n.*, वसा, मांसस्नेहः, वृक्काद्युपरिगतं मेदस्.

To SUFFER, *v. a.* (Feel, undergo) अनुभू, उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उपभुज्, प्राप् (c. 5. -आप्नोति, -आप्तुं), ज्ञा, विद्, सेव्, क्षम्, दृश्; 'one who suffers pain,' [illegible]भागी -गिनी &c.—(Endure, bear) सह् (c. 1. सहते, सोढुं), [illegible] (c. 1. [illegible] क्षन्तुं), संक्षम्, मृष्, तिज् in des., उपास्.—(Permit, allow) अनुज्ञा, अनुमन्, अनुमतिं दा, *see To* PERMIT.

To SUFFER, *v. n.* (Undergo pain) दुःखम् अनुभू, दुःखभागी -गिनी -गि भू, दुःखी &c. भू, तप् in pass. (तप्यते), सन्तप्, व्यथ् (c. 1. व्यथते -थितुं), क्लिश् (c. 4. क्लिश्यते).

SUFFERABLE, *a.* सहनीयः -या -यं, सह्यः -ह्या -ह्यं, सोढव्यः -व्या -व्यं.

SUFFERANCE, *s.* सहनं, क्षमा, सहत्वं, सहता, साहनं. *See* ENDURANCE.

SUFFERED, *p. p.* (Undergone) अनुभूतः -ता -तं, उपागतः -ता -तं, उपगतः &c., भुक्तः -क्ता -क्तं, उपभुक्तः &c.—(Endured) सोढः -ढा -ढं, विसोढः &c.—(Permitted) अनुज्ञातः -ता -तं, अनिषिद्धः -द्धा -द्धं, अप्रतिषिद्धः &c.

SUFFERER, *s.* दुःखभागी *m.* -गिनी *f.* (न्), दुःखानुभवी *m.*, दुःखभोगी *m.*, दुःखभोक्ता *m.* (क्तृ), दुःखी *m.*, दुःखितः, दुःखोपेतः.

SUFFERING, *s.* (Bearing of pain) दुःखानुभवः, दुःखभोगः, दुःखोपभोगः, दुःखोपगमः, दुःखोपागमः, दुःखयोगः, दुःखवेदनं.—(Pain endured) दुःखं, व्यथा, क्लेशः, तापः, परितापः, वेदना, पीडा, कृच्छ्रं, आर्त्तिः *f.*

SUFFERING, *a.* दुःखी -खिनी -खि (न्). *See* SUFFERER, AFFLICTED.

To SUFFICE, *v. n.* क्लृप् (c. 1. कल्पते -ल्पितुं, कल्प्तुं), उपक्लृप्, पर्य्याप्तः -प्ता -प्तं भू, उपयुक्तः -क्ता -क्तं भू, यथेष्टः -ष्टा -ष्टं भू, उचितः -ता -तं भू; 'as much food as will suffice for a year,' संवत्सरनिर्वाहपर्य्याप्तम् अन्नं.

To SUFFICE, *v. a.* तृप् (c. 10. तर्पयति -यितुं), तुष्. *See To* SATISFY.

SUFFICIENCY, *s.* पर्य्याप्तिः *f.*, पर्य्याप्तत्वं -ता, उपयुक्तता -त्वं, यथेष्टता -त्वं, सामर्थ्यं, औचित्यं, योग्यता -त्वं, उचितत्वं, निर्वाहः. *See* COMPETENCE.

SUFFICIENT, *a.* पर्य्याप्तः -प्ता -प्तं, उपयुक्तः -क्ता -क्तं, यथेष्टः -ष्टा -ष्टं, उचितः -ता -तं, समर्थः -र्था -र्थं, योग्यः -ग्या -ग्यं; 'food sufficient for a month,' मासवृत्त्युचितम् अन्नं, *see* ENOUGH, *a.*; 'to be sufficient for,' क्लृप् (c. 1. कल्पते -ल्पितुं).

SUFFICIENTLY, *adv.* पर्य्याप्तं, अलं, यथेष्टं, उपयुक्तं. *See* ENOUGH, *adv.*

To SUFFOCATE, *v. a.* श्वासरोधं कृ, श्वासावरोधं कृ, श्वासं रुध् (c. 7. रुणद्धि, रोद्धुं) or अवरुध्, प्राणं रुध् or अवरुध्, कण्ठं रुध्. *See To* CHOKE, STIFLE.

SUFFOCATED, *p. p.* रुद्धश्वासः -सा -सं, रुद्धप्राणः -णा -णं, निरुद्धकण्ठः &c.

SUFFOCATING, *a.* श्वासरोधकः -का -कं, श्वासावरोधकः &c., प्राणरोधकः &c.

SUFFOCATION, *s.* श्वासरोधः -धनं, श्वासावरोधः, श्वासप्रतिरोधः, प्राणरोधः -धनं, प्राणावरोधः, कण्ठरोधः -धनं, श्वासप्रतिबन्धः, उद्बन्धनं.

SUFFRAGE, *s.* सम्मतं, सम्मतिः *f.*, सम्मतिज्ञापनं, स्वीकारः. *See* VOTE.

To SUFFUSE, *v. a.* समाप्लु (c. 10. -प्लावयति -यितुं), व्याप्, आकॄ.

SUFFUSED, *p. p.* समाप्लुतः -ता -तं, व्याप्तः -प्ता -प्तं, परिगतः -ता -तं, *see* OVERSPREAD; 'eyes suffused with tears,' नेत्राणि समाप्लुतानि वारिणा, बाष्पोपप्लुताक्षः -क्षी -क्षं, बाष्पाविलेक्षणः -णा -णं; 'face suffused with blushes,' ह्रीपरिगतमुखं.

SUFFUSION, *s.* व्याप्तिः *f.*, व्यापनं, व्याप्तता, समाप्लावनं, आच्छादनं.

SUGAR, *s.* शर्करा, गुडशर्करा, गुडोद्भवा, सिता, मिष्टं, इक्षुसारः, वालुकाशिका; 'coarse sugar,' गुडः; 'raw sugar,' मत्स्यण्डी, फाणितं; 'sugar-mill,' इक्षुयन्त्रं, इक्षुयन्त्रं.

To SUGAR, *v. a.* शर्करान्वितं -तां कृ, शार्करीकृ, सशर्करं -रां कृ, मिष्टीकृ.

SUGAR-CANDY, *s.* खण्डमोदकः, खण्डः, माक्षिकशर्करा, उपला, शुक्लोपला, शर्करा, सिताखण्डः, दृढगात्रिका.

SUGAR-CANE, *s.* इक्षुः *m.*, इक्षुरः, इक्षुकाण्डं, इक्षुदण्डः, मधुयष्टिः *f.*, मधुतृणं, गुडदण्डः, गुडदारुः *m.*, गुडतृणं, रसालः, महाक्षीरः, विपुलरसः, असिपत्रः, पयोधरः, मृत्युपुष्पः; 'varieties of it,' पुण्ड्रः, पौण्ड्रः, कान्तारकः, खण्डं; 'root of it,' मोरटं, इक्षुमूलं.

SUGARED, SUGARY, *a.* शर्करान्वितः -ता -तं, शर्करायुक्तः -क्ता -क्तं, सशर्करः -रा -रं, शार्करः -री -रं, ऐक्षवः -वी -वं, मिष्टः -ष्टा -ष्टं.

To SUGGEST, *v. a.* उपन्यस् (c. 4. -अस्यति -सितुं), समुपन्यस्, सूच् (c. 10. सूचयति -यितुं), सूचनं कृ, मन्त्र् (c. 10. मन्त्रयते -ति -यितुं), मन्त्रणं कृ, प्रबुध् (c. 10. -बोधयति -यितुं), उद्दिश् (c. 6. -दिशति -देष्टुं), आदिश्, उपदिश्, चित् (c. 10 चेतयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), समुपस्था in caus.

SUGGESTED, *p. p.* उपन्यस्तः -स्ता -स्तं, सूचितः -ता -तं, मन्त्रितः &c.

SUGGESTION, *s.* उपन्यासः, सूचना -नं, प्रबोधः, मन्त्रणं, बुद्धिः *f.*

SUGGESTIVE, *a.* सूचकः -का -कं, प्रबोधकः &c., चेतकः -का -कं.

SUICIDAL, *a.* आत्मघातकः -का -कं, आत्मघाती -तिनी -ति (न्).

SUICIDE, *s.* (Self-murder) आत्मघातः, आत्महत्या, आत्मवधः, आत्महननं, आत्मव्यापादनं, प्राणत्यागः, देहत्यागः, जीवितत्यागः, जीवोत्सर्गः, प्राणपरित्यागः, काम्यमरणं, आत्मद्रोहः, स्वप्राणहिंसा.—(Self-murderer) आत्मघाती *m.* (न्), आत्मघातकः, आत्महा *m.* (न्), आत्मत्यागी *m.*, आत्मध्रुक् *m.* (-द्रुह्), आत्मद्रोही *m.*, कृतजीवितत्यागः.

SUI-GENERIS, एकप्रकारः -रा -रं, स्वसदृशः -शी -शं, स्वप्रत्ययः -या -यं.

SUIT, *s.* (Set) गणः, समूहः, *see* SET; 'a [illegible] of clothes, &c.,' युगं, युग्मं, युगलं, युतकं, यमकं, यमलं; 'a suit of clothes,' वस्त्रयुगं, वस्त्रयुग्मं, वासोयुगं, आच्छादः.—(Petition) अर्थः प्रार्थनं ना, अभ्यर्थना, प्रणयः.—(In law) अर्थः, [illegible] अभियोगः, व्यवहारः.—(Retinue), *see* SUITE.

To SUIT, *v. n.* युज् in pass. (युज्यते), उपपद् in pass. *See To* FIT, *v. n.*

To SUIT, *v. a.* युज् (c. 10. योजयति -यितुं). *See To* FIT, ADAPT, *v. a.*

SUITABLE, *a.* योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः &c., यथायोग्यः &c., उपयोगी -गिनी &c., उचितः -ता -तं, सदृशः -शी -शं, प्रयोक्तव्यः -व्या -व्यं, *see* FIT, FITTING, *a.*; 'suitable to the occasion,' प्रस्तावसदृशः &c., *see* OPPORTUNE.

SUITABLENESS, *s.* योग्यता, युक्तता, उपयुक्तता, उपयोगिता -त्वं, उपयोगः, यथायोग्यता, उपपत्तिः *f.*, याथातथ्यं. *See* FITNESS.

SUITABLY, *adv.* युक्तं, योग्यं, यथायोग्यं, यथोचितं, *see* FITLY.—(Agreeably to) अनुसारेण -रतस्, अनुरूपेण.

SUITE, *s.* परिवारः, अनुचरवर्गः, पोष्यवर्गः. *See* RETINUE.

SUITED, *p. p.* उपयुक्तः -क्ता -क्तं, युक्तः &c., पर्य्याप्तः &c. *See* SUITABLE.

SUITOR, *s.* प्रार्थकः, प्रार्थयिता *m.* (तृ), अर्थी *m.* (न्), आवेदकः, *see* PETITIONER, PROSECUTOR.—(Wooer) विवाहार्थी *m.*, पाणिग्रहार्थी *m.*, प्रणयी *m.*

SULKILY, SULLENLY, *adv.* उदासीनं, उदासीनवत्, अन्तःक्रोधेन, अन्तःकोपेन.

SULKINESS, SULLENNESS, *s.* उदासीनता, अन्तःक्रोधत्वं, अन्तःकोपिता, अन्तःकोपिता, अन्तःक्रोधः, मलिनमुखत्वं, मुखमालिन्यं, प्रतीपता. *See* MOROSENESS.

SULKY, SULLEN, *a.* उदासीनः -ना -नं, अन्तःक्रोधी -धिनी -धि (न्), अन्तःकोपी &c., उदासवृत्तिः -त्तिः -त्ति, प्रतीपः &c. *See* MOROSE.

SULLIED, *p. p.* दूषितः -ता -तं, मलिनः &c., कलङ्कितः &c., *see* SOILED.

To sully, *v. a.* कलङ्क (nom. कलङ्कयति -यितुं), दुष् in caus. *See* *To* soil.

Sully, *s.* कलङ्कः, मालिन्यं, दूषणं, ग्लानिः *f.* *See* Soil, Stain.

Sulphate, *s.* (Of copper) तालगर्भं, तुत्थं.—(Of iron) कासीसं, काशीशं, हंसलोमशं, धातुशेखरः, नयनौषधं; 'green sulphate,' *see* under Iron, *s.*

Sulphur, *s.* गन्धकः, गन्धिकः, गन्धाश्मा *m.* (न्), सौगन्धिकः, सुगन्धिकः, गन्धमोदनं, अतिगन्धः, क्रूरगन्धः, गन्धपाषाणः, स्वर्णारिः *m.*, धातुवैरी *m.* (न्), शुल्वारिः *m.*, पामारिः *m.*, पामघ्नः, कीटघ्नः, शुकपुच्छः.

Sulphureous, *a.* गन्धकमयः -यी -यं, गन्धकयुक्तः -क्ता -क्तं, गन्धकगुणकः -का -कं, गन्धकगुणविशिष्टः -ष्टा -ष्टं, गन्धकधर्मकः -का -कं.

Sulphuret, *s.* (Of iron) पांशुकासीसं, तार्प्यं, धातुमाक्षिकं.—(Of mercury) कज्जली.

Sultriness, *s.* निर्वातत्वं -ता, अत्युष्णता, वातहीनता, वायुहीनता.

Sultry, *a.* निर्वातः -ता -तं, अत्युष्णः -ष्णा -ष्णं, वातहीनः -ना -नं, वायुहीनः &c., अत्युष्णवाष्पविशिष्टः -ष्टा -ष्टं; 'sultry vapour,' उष्णवाष्पः, मरीचिका, मृगतृष्णा.

Sum, *s.* (Aggregate, total) संख्या, साकल्यं, समुदायः, समाहारः, समवायः, गणनं.—(Substance, amount) सारः, अर्थः, सारांशः, गर्भः, तात्पर्यं.—(Compendium), *see* Summary, *s.*—(Sum of money) धनभागः, धनांशः, कियद्धनं, किञ्चिद्धनं; 'small sum of money,' धनलेशः, धनाल्पिका, किञ्चिद्धनं, अल्पधनं; 'large sum,' धनबाहुल्यं, बहुधनं; 'any very large sum,' परार्द्धं.—(In arithmetic, figures set for an arithmetical operation) राशिः *m. f.*, पिण्डः.—(In sum) संक्षेपतस्, *see* Summarily.

To sum, *v. a.* (Add together) राशीकृ, संख्या, परिसंख्या, परिगण्, संकल् (c. 10. -कलयति -यितुं), सङ्कलनं कृ, समाहृ, समाहरणं कृ, समीकृ.—(Sum up, condense) उक्तोपसंहारं कृ, उक्तसमाहारं कृ, उक्तप्रत्याहारं कृ, उक्तोपसंक्षेपं कृ, उक्तसारं वद्.

Summarily, *adv.* संक्षेपतस्, संक्षेपात् -पेण, समासतस्, *see* Concisely; 'to declare summarily,' संक्षेपतो वद्, समस्यच्.

Summary, *a.* सांक्षेपिकः -की -कं, सामासिकः -की -कं. *See* Concise, *a.*

Summary, *s.* संक्षेपः, संग्रहः, सारः, संक्षिप्तग्रन्थः, ग्रन्थस्थविषयानुक्रमणिका. *See* Compendium.

Summed, *p. p.* राशिगतः -ता -तं.—(Summed up) उपसंहृतः -ता -तं.

Summer, *s.* ग्रीष्मः, ग्रीष्मकालः, ग्रीष्मसमयः, निदाघकालः, निदाघः, उष्णकालः, उष्णसमयः, उष्णः, उष्णकः, उष्मः, उष्मा *m.* (न्), उष्णागमः, उष्मागमः, उष्मोपगमः, तपः, तपाः *m.* (स्).

Summer-house, *s.* विलासमन्दिरं, केलिगृहं; 'with water-works,' जलमन्दिरं, जलयन्त्रगृहं, जलयन्त्रमन्दिरं, जलयन्त्रनिकेतनं, जलहं, धारागृहं, धारायन्त्रगृहं, समुद्रगृहं.

Summit, *s.* अग्रं, शिखा, शिखरं, शेखरं, शृङ्गं, चूडा, कूटः -टं, पृष्ठं, उच्छ्रायः, उत्सेधः. *See* Top.

To summon, *v. a.* आह्वे (c. 1. -ह्वयति -ह्वातुं), आह्वानं कृ, आह्वान (nom. आह्वानयति -यितुं), आकृ in caus. (-कारयति -यितुं), आकारणं कृ.

Summoned, *p. p.* आहूतः -ता -तं, कृताह्वानः -ना -नं, आकारितः &c., आवाहितः &c.: 'one who does not appear when summoned,' आहूताप्रवदायी *m.*

Summoner, *s.* आह्वाता *m.* (तृ), आह्वायकः, आह्वानकारी *m.* (न्).

Summons, *s.* आह्वानं, आहूतिः *f.*, हूतिः *f.*, आह्वायः, आकारणं, आवाहनं.

Summum-bonum, *s.* परमार्थः, परार्थः, उत्तमार्थः.

Sumpter, sumpter-horse, *s.* स्थूरी *m.* (न्), स्थौरी. *See* Pack-horse.

Sumptuary, *a.* व्ययविषयकः -का -कं, व्ययसम्बन्धी -न्धिनी -न्धि (न्).

Sumptuous, *a.* महामूल्यः -ल्या -ल्यं, बहुमूल्यः &c. *See* Costly.

Sumptuously, *adv.* अतिव्ययपूर्व्वं, महाव्ययपूर्व्वं, [illegible].

Sumptuousness, *s.* महामूल्यता, [illegible]मूल्यता, महा[illegible] अतिव्ययः.

Sun, *s.* सूर्य्यः, रविः *m.*, भानुः *m.*, अर्कः, आदि[illegible], भास्करः, सविता *m.* (तृ), अर्यमा *m.* (न्), विवस्वान् *m.* (त्), [illegible], सूरः. The sun has innumerable names in Sanskrit, many of which are more properly epithets than names. Some of them are here collected with their meanings.—(As begetter and nourisher of all things, he is called) सविता *m.* (तृ), सावित्रः, पूषा *m.* (न्), विश्वपाः *m.*—(As causing day-light) दिनकरः, दिवसकरः, दिवाकरः, दिनकृत् *m.*, प्रभाकरः, विभाकरः, अहस्करः, भास्करः.—(As lord of the day) अहर्पतिः *m.*, दिनपतिः, द्युपतिः *m.*, दिनप्रणीः *m.*—(As gem of the day) दिनमणिः *m.*, दिवामणिः *m.*—(As gem of the sky) नभोमणिः *m.*, खमणिः *m.*, वियन्मणिः *m.*—(Enemy of darkness) तिमिररिपुः *m.*, ध्वान्तारातिः *m.*, तमोनुदः, तमोपहः.—(Receptacle of light) भाकोषः, तेजःपुञ्जः.—(Circle of light) भानेमिः *m.*—(Meteor of the sky) खद्योतः.—(The illuminator of the sky) खद्योतनः, प्रद्योतनः, विरोचनः.—(Eye of the sky) नभश्चक्षुः *m.*—(Eye of the world) जगच्चक्षुः *m.* (स्), लोकचक्षुः *m.*—(Beholder of the deeds of the world) कर्म्मसाक्षी *m.* (न्), जगत्साक्षी *m.*—(Lord of the constellations) ग्रहराजः, ग्रहपतिः *m.*, तपताम्पतिः *m.*, त्विषाम्पतिः *m.*—(Having a thousand rays) सहस्रकिरणः, सहस्रांशुः *m.*—(Garlanded with rays) किरणमाली *m.* (न्), अंशुमाली *m.*, मरीचिमाली *m.*—(Possessed of rays) अंशुमान् *m.* (त्), गभस्तिमान् *m.*, अंशुधरः, किरणः, गभस्तिः *m.*—(Lord of the rays) अंशुभर्त्ता *m.*—(Wielding rays) अंशुहस्तः, गभस्तिहस्तः, अंशुपाणः.—(Having hot rays) चण्डांशुः *m.*, चण्डकिरणः, घर्म्मांशुः *m.*, तिग्मांशुः *m.*, तीक्ष्णांशुः *m.*, खरांशुः *m.*, चण्डरश्मिः *m.*, चण्डमरीचिः *m.*, उष्णरश्मिः *m.*, चण्डदीधितिः *m.*, अशीतमरीचिः *m.*, अशीतकरः.—(Having bright rays) शुभ्ररश्मिः *m.*—(Possessed of light) प्रतिभावान् *m.* (त्), भास्वान् *m.*, विभावान् *m.*, ज्योतिष्मान् *m.*, विभावसुः *m.*—(The inflamer, or warmer) तपनः, तापनः.—(The Ripener) पचतः, पचेलिमः.—(The scorcher) शुष्णः.—(Burner of the forehead) ललाटन्तपः.—(The surprising light) चित्रभानुः *m.*—(Sporting or roaming in the sky) गगनविहारी *m.*, गगनाध्वगः, खगः, खचरः.—(Symbol in the sky) गगनध्वजः.—(Friend of the lotuses) पद्मबन्धुः *m.*, पद्मिनीकान्तः, पद्मिनीवल्लभः.—(Sprung from the lotus) पद्मगर्भः.—(Seated on a lotus) पद्मासनः.—(Holding a lotus in his hand) पद्मपाणिः *m.*, पद्मकरः.—(Drawn by seven horses) सप्ताश्वः.—(Drawn by green horses) हरिदश्वः.—(Ever-moving) सदागतिः *m.*—(Lord of life) जीवितेशः.—(Possessed of jewels) मणिमान् *m.*—(Best of deities) सुरोत्तमः.—(As son of Kaśyapa) काश्यपेयः, काश्यपिः *m.*—(As descended from Mritanda) मार्त्तण्डः, मृताण्डः, मृतण्डः.—(As having been shorn of his beams by Visvakarma, the architect of the gods) विकर्त्तनः.—(As identified with the 12 ádityas) द्वादशात्मा *m.* (न्), द्वादशात्मकः. The 12 ádityas are the offspring of Aditi, and are the emblems of the sun in each month of the year. Hence they are

identified with the sun itself. Their names are सूर्य्यः, वरुणः, वेदाङ्गः, भानुः *m.*, इन्द्रः, रविः *m.*, गभस्तिः *m.*, यमः, स्वर्णरेताः *m.*, दिवाकरः, मित्रः, विष्णुः *m.* Other names for the sun, of less obvious derivation, are the following: पतङ्गः, पपी: *m.* ([illegible]हंसः, इनः, [illegible]ः *m.*, मिहिरः, भगः, तरणिः *m.*, मित्रः, भट्टारकः, [illegible]ः, अरुणः, विश्वकर्म्मा *m.*, वरुणः, विष्णुः, कृष्णः. The following [illegible] the names of some of the sun's wives: छाया, अश्विनी, प्रभा, [illegible]ा, विश्वकर्म्मसुता, त्वाष्ट्री, सवर्णा, शनिप्रसूः *f.*, तपती, त्रसरेणुः *m.*, यदी, सौरी, सूर्य्या. His sons are यमः or वैवस्वतः, शनिः *m.*, अश्विनौ *m. du.* or अश्विनीकुमारौ *m. du.*, कर्णः, सावर्णिः *m.*, सुग्रीवः, रेवन्तः, रेवतः; 'his daughter, or the personified Taptí river,' तपती, तपनतनया, अर्कतनया; 'his charioteer,' अरुणः, अनूरुः *m.*, काश्यपिः *m.*, गरुडाग्रजः, सूरसूतः, सूर्य्यसारथिः *m.*; 'three of his attendants,' माठरः, पिङ्गलः, दण्डः; 'a worshipper of the sun,' सौरः; 'the sun's disk,' सूर्य्यमण्डलं, *see* Disk; 'early morning sun,' बालार्कः, बालातपः, बालमित्रः; 'figure of the sun as drawn for worship,' सूर्य्ययन्त्रं; 'half-yearly passage of the sun,' अयनं, *see* Solstice; 'mansion of the sun,' सूर्य्यनक्षत्रं, महानक्षत्रं; 'region of the sun,' सूर्य्यलोकः.—(Sun and moon) सूर्य्यचन्द्रमसौ *m. du.*, चन्द्रार्कौ *m. du.*, दिवाकरनिशाकरौ *m. du.*, पुष्पवन्तौ *m. du.*, पुष्पदन्तौ *m. du.*

Sun-beam, *s.* सूर्य्यरश्मिः *m.*, सूर्य्यकिरणः, सूर्य्यमयूखः, सूर्य्यकरः, सूर्य्यांशुः *m.*, तपनांशुः *m.*, तपनकरः, भानुकरः. *See* Ray, *s.*

Sun-burnt, *a.* सूर्य्यतप्तः -प्ता -प्तं, रवितप्तः &c., सूर्य्यव्याप्तः &c.

Sunday, *s.* भानुवारः, रविवारः, अर्कवारः, आदित्यवारः, भट्टारकवारः, रविवासरः, भानुवासरः, अर्कदिनं, अर्कः.

To sunder, *v. a.* वियुज्, विप्रयुज्, पृथक् कृ. *See To* part, separate.

Sundered, *p. p.* (Divided in sunder) पृथक्कृतः -ता -तं, द्वैधीभूतः -ता -तं, द्वैधीकृतः -ता -तं, विश्लिष्टः -ष्टा -ष्टं, विच्छेदितः -ता -तं, विप्रयुक्तः -क्ता -क्तं.

Sun-dial, *s.* छायायन्त्रं, छायामण्डलं, प्रतोदः, सूर्य्यघटी.

Sun-dried, *p. p.* आतपशुष्कः -ष्का -ष्कं, आतपशोषितः -ता -तं.

Sundry, *a.* नाना *indecl.*, विविधः -धा -धं, नानाविधः &c., पृथग्विधः &c., *see* Divers; 'sundries,' नानाद्रव्याणि *n. pl.*, नानाविधवस्तूनि *n. pl.*

Sun-flower, *s.* सूर्य्यकमलः, श्रीहस्तिनी, वेशदानः, भामकः, दिवाकरः, जामाता *m.* (तृ), विधातायुः *m.*, वनालिका; 'the flower,' सूर्य्यकमलं.

Sung, *p. p.* गीतः -ता -तं, परिगीतः &c.; 'by bards,' उपगीतः &c.

Sunk, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः &c., अवसन्नः -न्ना -न्नं, सन्नः &c., अवगाढः -ढा -ढं, निष्णातः -ता -तं; 'in mud,' पङ्कमग्नः &c.

Sunken, *a.* जलतलस्थः -स्था -स्थं, जलोपगूढः -ढा -ढं.

Sunless, *a.* असूर्य्यः -र्य्या -र्य्यं, अनादित्यः -त्या -त्यं, सूर्य्यहीनः &c.

Sunny, *a.* सूर्य्यतप्तः -प्ता -प्तं, रवितप्तः &c., सूर्य्यव्याप्तः &c., सूर्य्यातपव्याप्तः &c., सातपः -पा -पं, सार्कः -र्का -र्कं.

Sun-rise, *s.* सूर्य्योदयः, सूर्य्योदयकालः, अरुणोदयः, उदयः, उदयकालः, अभ्युत्थानं; 'before sun-rise,' सूर्य्ये अनुदिते.

Sun-set, *s.* सूर्य्यास्तं -स्तः, सूर्य्यास्तकालः अस्तः -स्तं, दिनान्तः, दिवावसानं, तिष्ठद्गु *n.*, उत्सूरः; 'at sun-set,' अस्तङ्गते सूर्य्ये.

Sun-shine, *s.* सूर्य्यातपः, आतपः, सूर्य्यप्रकाशः, प्रकाशः, सूर्य्यतापः, सूर्य्यकान्तिः *f.*, सूर्य्यतेजस् *n.*, सूर्य्यद्युतिः *f.*, सूर्य्यालोकः, द्योतः, सूर्य्यकिरणः, कल्ला.

To sup, *v. n.* or *a.* रात्रिभोजनं कृ, नक्तभोजनं कृ.—(Sip), *see To* sip.

Super. A prefix rendered by अति, अधिक, अतिशय &c., in comp.

To super-abound, *v. n.* अतिबहुलीभू, अतिविपुलीभू, अतिप्रचुरीभू.

Super-abundance, *s.* अतिबाहुल्यं, अतिवैपुल्यं, अतिप्राचुर्य्यं, आधिक्यं, अतिरिक्तता, आतिरेक्यं, उपचयः. *See* Exuberance.

Super-abundant, *a.* अतिबहुलः -ला -लं, अतिविपुलः &c., अतिप्रचुरः &c., अतिरिक्तः -क्ता -क्तं, अतिशयी -यिनी -यि (न्), अधिकः &c. *See* Exuberant.

To super-add, *v. a.* अधिकं समायुज् or संयुज्, अधिकसंयोगं कृ.

Super-annuated, *a.* अतिवयस्कः -स्का -स्कं, वयोधिकः -का -कं, वयोतीतः -ता -तं, वार्धक्याक्षमः -मा -मं, वार्धक्याशक्तः -क्ता -क्तं.

Super-annuation, *s.* अतिवयस्कता, वयोतीतता, वार्धक्याक्षमता.

Superb, *a.* अतिशोभनः -ना -नं, स्पर्धी &c. *See* Magnificent.

Supercilious, *a.* ऊर्द्ध्वदृष्टिः -ष्टिः -ष्टि, दर्पादुपेक्षकः -का -कं, *see* Lofty.

Superciliousness, *s.* दर्पादुपेक्षा, दर्पात् परोपेक्षा. *See* Haughtiness.

Supererogation, *s.* अत्याचारः, अतिरिक्ताचारः, अत्याचरणं, अतिरिक्ताचरणं, नियमातिरेकः, विध्यतिरेकः, कर्त्तव्याधिक्यं, काम्यत्वं.

Supererogatory, *a.* नियमातिरिक्तः -क्ता -क्तं, कर्त्तव्यातिरिक्तः &c., विध्यतिरिक्तः &c., अतिरिक्तः -क्ता -क्तं, काम्यः -म्या -म्यं.

Superexcellence, *s.* अत्युत्कृष्टता, अत्युत्तमता, सर्व्वश्रेष्ठता.

Superexcellent, *a.* अत्युत्कृष्टः -ष्टा -ष्टं, अत्युत्तमः -मा -मं, सर्व्वोत्कृष्टः -ष्टा -ष्टं, सर्व्वश्रेष्ठः &c., सर्व्वोत्तमः -मा -मं, श्रेष्ठः &c.

Superficial, *a.* (Pertaining to, or being on the surface) बाह्यः -ह्या -ह्यं, वाहीकः -का -कं, वहिःस्थः -स्था -स्थं, वहिर्भागस्थः &c., वहिर्लग्नः -ग्ना -ग्नं, पृष्ठस्थः &c., वहिस् or पृष्ठ in comp.; 'superficial view,' बाह्यदृष्टिः *f.*; 'superficial contents,' पृष्ठफलं.—(Shallow, not deep) अनिम्नः -म्ना -म्नं, अल्पः -ल्पा -ल्पं, *see* Slight; 'superficial scholar,' [illegible], अल्पज्ञः, पुस्तकः, शास्त्रगण्डः, *see* Smatterer.

Superficially, *adv.* बाह्यतस्, वहिर्भाग[illegible], [illegible] *See* Slightly.

Superficies, *s.* तलं, पृष्ठं, विस्तार[illegible], [illegible] उपरिस्थभागः.

Superfine, *a.* अत्युत्तमः -मा -मं, अत्युत्कृष्टः -ष्टा -ष्टं, अतिसूक्ष्मः &c.

Superfluity, *s.* अतिरेकः, आतिरेक्यं, अतिरिक्तता, आधिक्यं, आतिशय्यं, प्रयोजनातिरेकः, प्रयोजनातिरिक्तता, वैयर्थ्यं.

Superfluous, *a.* अतिरिक्तः -क्ता -क्तं, अधिकः -का -कं, प्रयोजनातिरिक्तः &c., अवश्यकातिरिक्तः &c., अनर्थकः -का -कं, विफलः -ला -लं.

Superhuman, *a.* अतिमानुषः -षा -षं, अतिमनुष्यः -ष्या -ष्यं, अतिमर्त्यः -र्त्या -र्त्यं, मानुषातिगः -गा -गं, जनातिगः &c., पुरुषातिगः &c., अपौरुषः -षी -षं; 'having superhuman intellect,' अतिमनुष्यबुद्धिः -द्धिः -द्धि; 'superhuman power,' विभूतिः *f.*, भूतिः *f.*, प्रभावः; 'possessed of it,' विभूतिमान् -मती -मत् (त्).

Superincumbent, *a.* उपरिस्थः -स्था -स्थं, उपरिवर्त्ती -र्त्तिनी -र्त्ति (न्).

To superinduce, *v. a.* अध्यानी (c. 1. -नयति -नेतुं), अनुनी, अध्यारुह् in caus.

To superintend, *v. n.* अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अध्यक्षः -क्षा -क्षं भू, अध्यक्षतां कृ, अवेक्ष्, उपदृश्, कार्य्यावेक्षणं कृ. *See To* oversee.

Superintendence, *s.* अध्यक्षता -त्वं, अधिकारः, अधीकारः, अधिष्ठितिः *f.*, अधिष्ठातृत्वं, अधिष्ठानं, अधिकर्म्म *n.* (न्), अधीशता, अवेक्षणं, कार्य्यावेक्षणं, कार्य्यदर्शनं, कार्य्येक्षणं, कार्य्याधीशता.

Superintendent, *s.* अध्यक्षः, अधीशः, अधिकारी *m.* *See* Overseer.

Superior, *a.* (Upper) उपरिस्थः -स्था -स्थं, ऊर्द्ध्वस्थः &c., ऊर्द्ध्वः -र्द्ध्वा -र्द्ध्वं.—(In rank or excellence) श्रेयान् -यसी -यः (स्), श्रेष्ठः -ष्ठा -ष्ठं, गरीयान् &c., वरीयान् &c., वरिष्ठः -ष्ठा -ष्ठं, ज्यायान् &c., ज्येष्ठः &c.,

विशिष्टः -ष्टा -ष्टं, प्रमुखः -खा -खं, प्रधानः -ना -नं, मुख्यः -ख्या -ख्यं, उत्कृष्टः &c., प्रकृष्टः &c., अधिकः -का -कं, प्रभविष्णुः -ष्णुः -ष्णु, वरः -रा -रं, गुरुः -र्वी -रु, अकनिष्ठः &c., *see* PRE-EMINENT; 'of superior worth,' गुणोत्कृष्टः &c., गुणाधिकः -का -कं; 'superior to the best,' परात्परः -रा -रं; 'to be superior,' विशिष् in pass. (-शिष्यते), अतिरिच् in pass. (-रिच्यते); 'action is superior to inaction,' अकर्म्मणः कर्म्म विशिष्यते or अकर्म्मणः कर्म्म ज्यायः; 'intellect is superior to action,' कर्म्मणो बुद्धिर् विशिष्यते or कर्म्मणो बुद्धिर् ज्यायसी.—(Beyond the influence of).

SUPERIOR, *s.* श्रेष्ठः, ज्येष्ठः, गुरुः.—(Of a convent) आश्रमगुरुः.

SUPERIORITY, *s.* श्रेष्ठता, श्रैष्ठ्यं, विशिष्टता, वैशिष्ट्यं, वैशेष्यं, प्रधानता, प्राधान्यं, उत्कृष्टता, उत्कर्षः, प्रमुखत्वं, प्रभविष्णुता, प्राग्भावः, आधिक्यं, ऊर्द्ध्वस्थितिः *f.*, प्राबल्यं, ज्येष्ठता, वरिष्ठता, बलीयस्त्वं, परिवृढिमा *m.* (न्), *see* PRE-EMINENCE.

SUPERLATIVE, *a.* परमः -मा -मं, अत्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, अतिशय or अति prefixed, *see* EXCESSIVE, SUPREME.—(In grammar) अतिशयार्थवाचकः -का -कं, परमावधिवाचकः &c.

SUPERLATIVELY, *adv.* अत्यन्तं, अतिशयेन, अति prefixed. *See* EXCESSIVELY.

SUPERNATURAL, *a.* अलौकिकः -की -कं, अतिमानुषः -षा -षं, मानुषासाध्यः -ध्या -ध्यं, अपौरुषेयः -यी -यं, मानवासाध्यः &c., अद्भुतः &c. *See* SUPERHUMAN.

SUPERNATURALLY, *adv.* अलौकिकं, अतिमानुषं, अलौकिकप्रकारेण.

SUPERNUMERARY, *a.* or *s.* अतिसंख्यः -ख्या -ख्यं, संख्यातिरिक्तः -क्ता -क्तं, नियतसंख्यातिरिक्तः &c., नियमातिरिक्तः &c., अधिकः -का -कं, अतिरिक्तः &c.

SUPERSCRIPTION, *s.* उपरिलेखः, उपरिस्थलेखः, वहिर्लेखः.

To SUPERSEDE, *v. a.* (Render void) लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ; 'this system has superseded all the others,' अयं मार्गः सर्व्वेषाम् अपरेषां लोपस्य कारणं बभूव.—(Set aside, displace) निरस् (c. 4. -अस्यति -सितुं), निराकृ, निःसृ in caus., अपसृ.

SUPERSEDED, *p. p.* निरस्तः -स्ता -स्तं, निराकृतः -ता -तं; 'a superseded wife,' अध्यूढा, अधिविन्ना, कृतसापत्निका, कृतसापत्नका, कृतसापत्नी, कृतसापत्नीका, कृतसपत्निका.

SUPERSTITION, *s.* (Over exactness in religion) अतिभक्तिः *f.*, अत्याचारः, अतिरिक्तभक्तिः *f.*, अतिरिक्ताचारः.—(Belief in supernatural agency, &c.) शकुनपिशाचादिविश्वासः, शकुनपिशाचादिभक्तिः *f.*, पिशाचादिनिष्ठा, शकुनादिविश्वासः.—(False religion) अन्यथाधर्म्मः, मिथ्याधर्म्मः, अन्यथाभक्तिः *f.*, अन्यथामार्गः, अशास्त्रीयभक्तिः *f.*, अविधिनिष्ठा, अविधिश्रद्धा, अवैधक्रिया.

SUPERSTITIOUS, *a.* (Over exact in religion) अत्याचारी -रिणी -रि (न्), अतिरिक्ताचारी &c.—(Credulous regarding supernatural agency, &c.) पिशाचादिविश्वासी &c., शकुनपिशाचादिविश्वासी &c., शकुनादिनिष्ठः -ष्ठा -ष्ठं, पिशाचादिनिष्ठः &c.—(Falsely religious) अन्यथाधर्म्मी -र्म्मिणी &c., अन्यथामार्गी &c., अवैधकर्म्मी &c., असत्यधर्म्मी &c., मिथ्याधर्म्मी &c.—(Proceeding from superstition) मिथ्याधर्म्ममूलकः -का -कं, अत्याचारमूलकः &c., पिशाचादिनिष्ठाप्रयुक्तः -क्ता -क्तं.

SUPERSTRUCTURE, *s.* वास्तुपरिस्थभवनं, उपरिव्यूहनं. *See* STRUCTURE.

To SUPERVENE, *v. n.* अकस्माद् उपस्था (c. 1. -तिष्ठति -स्थातुं) or आगम्.

To SUPERVISE, SUPERVISION, *see To* SUPERINTEND, INSPECT, &c.

SUPINE, *a.* (Lying with the face upward) उत्तानशयः -या -यं, उत्तानः -ना -नं, ऊर्द्ध्वमुखः -खा -खी -खं.—(Indolent) अलसः -सा -सं

SUPINENESS, *s.* अलसता, आलस्यं, तन्द्रा. *See* INDOLENCE.

SUPPER, *s.* नक्तभोजनं, रात्रिभोजनं, सायम्भोजनं, निशिभोजनं.

To SUPPLANT, *v. a.* (Trip up), *see* the word.—(Displace by stratagem) छलेन निरस् (c. [illegible] -अस्यति -[illegible]) or निराकृ or अपसृ (c. 10. -सारयति -यितुं), वञ्च् (c. 10. वञ्चयति -यितुं), *see To* DISPLACE.

SUPPLE, *a.* कोमलः -ला -लं, मृदुः -दुः -द्वी -दु, सुनम्यः -म्या -म्यं सुखनम्यः &c., नमनशीलः -ला -लं. *See* PLIANT, FLEXIBLE.

SUPPLEMENT, *s.* परिशिष्टं, परिबृंहणं, उत्तरखण्डः, अतिदेशः, अतिनिर्देशः न्यूनतापूरणं, न्यूनताभरणं.

SUPPLEMENTAL, SUPPLEMENTARY, *a.* अतिनिर्दिष्टः -ष्टा -ष्टं, अतिदिष्ट &c., अतिनिर्देशकः -का -कं, न्यूनतापूरकः -का -कं, न्यूनताभरकः &c.

SUPPLENESS, *s.* कोमलता, मृदुता, सुनम्यता, नमनशीलता.

SUPPLIANT, SUPPLICANT, *a.* or *s.* अर्थी -र्थिनी -र्थि (न्), प्रार्थकः -का -कं, प्रार्थयिता -त्री -तृ (तृ), मार्गणकः &c., अभ्यर्थयमानः -ना -नं, कृताञ्जलिः -लिः -लि, बद्धाञ्जलिः &c., शरणार्थी &c., शरणागतः -ता -तं

SUPPLIANTLY, *adv.* कृताञ्जलिवत्, बद्धाञ्जलिवत्, अञ्जलिकर्म्मपूर्व्वं.

To SUPPLICATE, *v. a.* अञ्जलिकर्म्मपूर्व्वं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं) or अभ्यर्थ् or सम्प्रार्थ् or अर्थ्, अञ्जलिं कृत्वा याच्. *See To* ENTREAT.

SUPPLICATED, *p. p.* प्रार्थितः -ता -तं, अनुनीतः -ता -तं. *See* ENTREATED.

SUPPLICATION, *s.* प्रार्थनं -ना, अर्थः, याञ्चा, अनुनयः. *See* ENTREATY.

SUPPLIED, *p. p.* सम्पन्नः -न्ना -न्नं, युक्तः -क्ता -क्तं, सम्भृतः -ता -तं; 'as an ellipsis,' अध्याहृतः -ता -तं; 'is plentifully supplied,' आपूर्य्यते

To SUPPLY, *v. a.* उपस्था in caus. (-स्थापयति -यितुं), उपकॢप्, परिकॢप्, सम्भृ, पॄ (c. 10. पूरयति -यितुं), सम्पॄ, *see To* FURNISH, PROVIDE.—(Serve instead of), *see To* SERVE.—(Supply an ellipsis) अध्याहृ, अभ्यूह्, ऊह्, अभ्यूहं कृ, समासाध्याहारं कृ.

SUPPLY, *s.* सम्भारः, सम्भृतिः *f.*, सामग्री, *see* STOCK, STORE.—(Supplies) निर्वाहः, यात्रिकं, पाथेयं, *see* PROVISIONS.

